५ अवसाने चास्याष्टीकायाः सप्ततिकाकर्मग्रन्थप्रान्तलिखितोपशमक्षपकश्रेणिक्षयस्वरूपमध्यात् क्षपकश्रेणिस्वरूपमेव विशदीकृतं उपशमश्रेणिस्वरूपस्योपशमनाप्रकरण उक्तत्वात्। तथा च पञ्चसङ्ग्रहानुसारेण केवलिसमुद्घातः सविस्तरं विस्तृतः। अत्र च टीकाकारपादैः क्षपकश्रेण्यधिकारे नवमगुणस्थानद्वितीयभागे स्थावरनरकद्विकतिर्यग्द्विकातपोद्योताद्यजातिचतुष्कसाधारणसूक्ष्माणां नामत्रयोदशप्रकृतीनां क्षपणेनातपोद्योतयोरपि क्षपणोक्ता, तदनन्तरं केवलिसमुद्घातप्रस्तावेऽपि दण्डकरणसमये "ऽसातवेदनीयाद्यवर्जसंस्थानपञ्चकाद्यवर्जसंहननपञ्चकाप्रशस्तवर्णादिचतुष्काप्रशस्तविहायोगत्युपघातापर्याप्तकास्थिराशुभदुर्भगदुःस्वरानादेययशःकीर्तिनीचैर्गोत्ररूपाणां पञ्चविंशतिप्रकृतीनामनन्तान् भागान् हन्ति, एकोऽनन्तभागोऽवशिष्यते, तस्मिन्नेव च समये सातवेदनीयदेवद्विके" त्याद्येकोनचत्वारिंशत्प्रकृतीनां क्षय उक्तः, आसु चैकोनचत्वारिंशत्प्रकृतिषु आतपोद्योतावपि पठिताविति विरोधः प्रतिभाति, तथाप्येवं समाधानं संभावयामः—नवमगुणस्थानद्वितीयभागे आतपोद्योतयोः क्षपणं पञ्चसङ्ग्रहाद्यनुसारेणोक्तं, समुद्घाते चावश्यकचूर्ण्यभिप्रायेणेति मतान्तरापेक्षया न दोषः। आवश्यकचूर्णौ हि त्रयोदशकनामप्रकृतीनामन्यथा गणना दृश्यते, तथा च तद्ग्रन्थः—"अट्ठण्हं कसायाणं संखेज्जतिभागं खवेमाणे गतो भवति ताहे नामस्स कम्मस्स इमाउ तेरसपयडीउ खवेइ, तं जहा—निरयगइनामं निरयाणुपुव्वीनामं एगिंदियजातिनामं बेइंदियजातिनामं तेइंदियजातिनामं चउरिंदियजातिनामं तिरियगइनामं तिरिक्कजोणियाणुपुव्वीनामं अप्पसत्थविहायोगतिनामं थावरनामं सुहुमनामं साहारणनामं अपज्जत्तं" इति।

सप्ततिकाकर्मग्रन्थोद्धृता विषया आसन्नाष्टपञ्चाशानि पत्राण्यभिव्याप्य स्थिताः। एवं चास्य मलयगिरिटीकातोऽस्यां

टीकायामदूरशतपत्राणामाधिक्यं संजातं दृश्यते । एतद्विस्तृतानुक्रमणिकादर्शनेऽप्यस्य सर्वविषयाणां ज्ञानं जायते । किं बहुना ? एतट्टीकाकाराः शतकसप्ततिकापञ्चसङ्ग्रहेभ्यः सर्वानुपयुक्तान् कर्मविषयानुद्धृत्यास्यां धृतवन्तो, येनाध्येतृणामन्यग्रन्थानपेक्षयैव कार्मग्रन्थिकज्ञानं संपूर्णं स्यात् ।

एतट्टीकामुद्रापणार्थमधुनैव सूरिपदालङ्कृतानां पन्यासश्रीकमलविजयगणिनामन्तेवासिनः पन्यासश्रीमोहनविजयगणिनः सदुपदेशेन बुहारिनिवासि–श्रेष्ठि–श्रीजीखाजाई–सौभाग्यचन्देणार्थिकसहायो दत्तोऽतस्तस्योपदेष्टॄणां च महोपकारं मन्यामहे ।

अद्ययावदस्मत्प्रयासप्रसिद्धेषु सर्वग्रन्थेष्वयं ग्रन्थ उपयुक्ततम इति प्रमोदास्पदं । अस्मिंश्च मतिदृष्टिदोषादिना किमप्यशुद्धं दृष्टिपथमवतरेद्विदुषां तद्बोधनपुरस्सरमस्मभ्यं ज्ञापयितुं कृपावद्भिः कृपा कार्या येन द्वितीयावृत्तौ तद्विषये सावधाना भवामः । इति शम् ॥

संवत् १९७३
वैशाखशुक्ल तृतीया

जैनधर्मप्रसारकसभा
भावनगर

विषयानुक्रमः ॥

विषयाः	गाथाङ्कः	पत्राङ्कः
मङ्गलाभिधेयप्रयोजनादि	१	१
कर्माष्टकं, तदुत्तरप्रकृतयश्च सविस्तरार्थाः	१	१–७
ध्रुवाध्रुवबन्धिनीस्वरूपम्	१	८
ध्रुवाध्रुवोदयास्वरूपम्	१	८
ध्रुवाध्रुवसत्ताकास्वरूपम्	१	९
सर्वदेशघातिनी–अघातिनीस्वरूपम्	१	९
परावर्तमानापरावर्तमानास्वरूपम्	१	१०
शुभाशुभप्रकृतीनां स्वरूपम्	१	१०
पुद्गलविपाकिनीस्वरूपम्	१	११
भवविपाकिनीस्वरूपम्	१	११
क्षेत्रविपाकिनीस्वरूपम्	१	११
जीवविपाकिनीस्वरूपम्	१	११
हेतुविपाकरसविपाकप्रकृतिस्वरूपम्	१	१२
स्वानुदयबन्धिस्वोदयबन्ध्युभयबन्धिस्वरूपम्	१	१३
समकव्यवच्छिद्यमान–क्रमव्यवच्छिद्यमान–उत्क्रमव्यवच्छिद्यमानबन्धोदयस्वरूपम्	१	१४
सान्तर–सान्तरनिरन्तर–निरन्तरबन्धस्वरूपम्	१	१४
उदयसंक्रमोत्कृष्टानुदयसंक्रमोत्कृष्टोदयबन्धोत्कृष्टानुदयबन्धोत्कृष्टस्वरूपम्	१	१५
उदयवत्यनुदयवतीस्वरूपम्	१	१६

विषयाः	गाथाङ्कः	पत्राङ्कः
करणाष्टकनामानि	.... २	१७
वीर्यस्वरूपम्	.... ३	१७
वैषम्ये योगस्य हेतुः	.... ४	१८
अविभागाद्यर्थाधिकारदशकनामानि	.... ५	१८
अविभागप्ररूपणा	.... ६	१९
वर्गणाप्ररूपणा	.... ७	१९
स्पर्धकानि–अन्तराणि	.... ८	१९
स्थानानि–अनन्तरोपनिधा	.... ९	२०
परम्परोपनिधा	.... १०	२०
वृद्धिहानी	.... ११	२१
उत्कृष्टमवस्थानम्	.... १२	२१
जघन्यावस्थानम्–अल्पबहुत्वम्	.... १३	२२
जीवेषु योगीयमल्पबहुत्वम्	१४–१५–१६	२२
तनुवाङ्मनोयोगाः	.... १७	२३
पुद्गलवर्गणाः	१८–१९–२०	२४
पुद्गलग्रहणस्वरूपम्....	.... २१	२८
स्नेहस्पर्धकानि	... २२	२८
नामप्रयोगस्पर्धकानि	.... २३	३०
कर्मभेदे हेतुः–प्रकृतिबन्ध-लक्षणम्	.... २४	३१
उत्तरप्रकृतिभागस्वरूपम्	२५–२६–२७–२८	३४
प्रकृतिप्रदेशबन्धयोः साद्यादिप्ररूपणा स्वाम्यादिप्ररूपणा च	.... २८	३८
रसेऽविभागाः	.... २९	४३

विषयाः	गाथाङ्कः	पत्राङ्कः
वर्गणाः	३०	४३
स्पर्धकानि-स्थानानि	३१	४४
कण्डकानि	३२	४४
षट् स्थानानि	३३-३४-३५-३६	४४
वृद्धिहानिप्रमाणम्- अधस्तनस्थानानि	३७	४५
वृद्धिस्थानानि	३८	४८
समयप्ररूपणा	३९	४८
अष्टसामयिके वृद्धिहानी- शेषेष्वपि	४०	४९
अनुभागबन्धस्थानानि	४१	४९
अविभागादिराशिस्वरूपम्	४२	५०
अल्पबहुत्वम्	४३	५०

विषयाः	गाथाङ्कः	पत्राङ्कः
अनुभागबन्धस्थाने जीवमानम्	४४	५१
वृद्धावनन्तरोपनिधा	४५	५१
परम्परोपनिधा	४६-४७-४८	५३
स्पर्शना	४९-५०-५१	५४
स्थितिस्थानेऽनुभागस्थानानि	५२	५४
अनन्तरपरम्परोपनिधा	५३-५६	५५
अनुकृष्टिस्तेषाम्	५७-६७	५७
अनुकृष्टीनां सातासाते अधिकृत्य भावना		६३
तिर्यग्गतेस्तीव्रमदन्ता		६४
त्रसनाम्नोऽनुभागः-तीव्रमन्दता		६५
अनुभागबन्धे साद्यनादिप्ररूपणा स्वामित्वप्ररूपणा च		६६

विषयाः	गाथाङ्कः	पत्राङ्कः
उत्तरप्रकृतीराश्रित्यानुभागप्ररूपणा		६६
स्वामित्वप्ररूपणा		६७
स्थितिस्थानानि	६८–८२	७१
जघन्योत्कृष्टस्थितिबन्धानामल्पबहुत्वम् (इति स्थितिबन्धः)		७८
निषेकप्ररूपणा	८३–८४	७९
अबाधाप्ररूपणा	८५–८६	८०
स्थितिसमुदाहारः प्रकृतिसमुदाहारश्च	८७–८८–८९	८२
जीवसमुदाहारः	९०–१०२	८४
जीवसमुदाहारे द्वित्रिचतुःस्थानकेषु जीवानामल्पबहुत्वम्		८८
स्थितिबन्धे साद्यनादिप्ररूपणा स्वामित्वप्ररूपणा च		८८

॥ इति बन्धनकरणम् ॥ १ ॥

विषयाः	गाथाङ्कः	पत्राङ्कः
संक्रमसामान्यलक्षणम्	१–२	९१
अपवादः	३	९२
नियमः	४	९२
पतद्ग्रहेऽपवादः	५	९३
साद्यनादिप्ररूपणा	६–७	९३
प्रत्येकं संक्रमादिप्रकृतिषु साद्यनादिप्ररूपणा	८–२७	९४
स्थितिसंक्रमस्य भेदलक्षणे	२८	१०८
प्रमाणम्	२९–३५	१०८
साद्यनादित्वम्	३६–३७	११३
उत्कृष्टे स्थितिसंक्रमे स्वामिनः	३८–३९	११४
जघन्ये स्थितिसंक्रमे स्वामिनः	४०–४३	११४
अनुभागसंक्रमस्य भेदः–स्पर्धकानि	४४–४९	११९

विषयाः	गाथाङ्कः	पत्राङ्कः
विशेषलक्षणम्	४६	११६
संक्रमप्रमाणम्	४७–४८	११६
मूलप्रकृतीनामुत्तरप्रकृतीनां च साद्यनादिप्ररूपणा	४९–५१	११७
कालमाननियमः	५२	११९
उत्कृष्टानुभागसंक्रमस्वामी	५३–५४	११९
जघन्यानुभागसंक्रमस्वामी	५५–५९	१२०
प्रदेशसंक्रमस्य लक्षणम्–भेदा–उद्वलनासंक्रमः	६०–६७	१२२
विध्यातसंक्रमः	६८	१२५
गुणसंक्रमः–यथाप्रवृत्तसंक्रमः–सर्वसंक्रमश्च	६९	१२५
अल्पबहुत्वं काले–स्तिबुकसंक्रमस्वरूपम्	७०–७१	१२६
साद्यनादिप्ररूपणा	७२–७३	१२७
उत्कृष्टप्रदेशसंक्रमस्वामी–गुणितकर्मांशप्ररूपणा	७४–९३	१२८
जघन्यप्रदेशसंक्रमस्वामी–क्षपितकर्मांशप्ररूपणा	९४–१११	१३३
॥ इति संक्रमकरणम् ॥ २ ॥		
स्थितेरुद्वर्तना	१	१३८
निक्षेपप्ररूपणा	२–३	१३८
स्थित्यपवर्तना	४–५–६	१४०
अनुभागस्योद्वर्तनापवर्तने	७	१४१
उद्वर्तनापवर्तनयोरल्पबहुत्वम्	८–९	१४२

विषयाः	गाथाङ्कः	पत्राङ्कः
तयोरेव कालनियमो विषयनियमश्च	१०	१४३
॥ इति उद्वर्तनापवर्तने ॥ ३–४ ॥		
उदीरणाया लक्षणं भेदाश्च	१	१४३
साद्यनादिप्ररूपणा–स्वामिनश्च	२–१२	१४४
प्रकृतेरुदीरणास्थानानि	१३–२८	१४६
स्थित्युदीरणा	२९–४२	१५८
अनुभागोदीरणा	४३–५९	१६५
प्रदेशोदीरणा	८०–८९	१७६
॥ इत्युदीरणा ॥ ५ ॥		
अकरणोपशमनानुयोगिनमस्कारः	१	१७९
करणकृताया उपशमनाया भेदौ	२	१७९
मोहसर्वोपशमार्हः	३–८	१७९
यथाप्रवृत्तादिकरणस्वरूपम्	९–३०	१८१

विषयाः	गाथाङ्कः	पत्राङ्कः
स्थितिघातरसघातस्थितिबन्धाऽल्प-		
रूपम्		१८२
गुणश्रेणिस्वरूपम्		१८२
अनिवृत्तिकरणस्वरूपम्		१८३
उपशमस्वरूपम्		१८५
सम्यग्दृष्टिस्वरूपम्		१८५
मिथ्यादृष्टिस्वरूपम्		१८६
चारित्रमोहोपशमकः		१८६
अनन्तानुबन्धिविसंयोजना	३१	१८८
दर्शनमोहक्षयः	३२	१८९
उपशमश्रेणिः	३३–६५	१९१
देशोपशमना प्रकृतेः-स्थितेः-अनुभागस्य	६६–७१	२०५
॥ इति उपशमनाकरणम् ॥ ६ ॥		

विषयाः	गाथाङ्कः	पत्राङ्कः
निधत्तिनिकाचने	७२–७३–७४	२०७
॥ इति निधत्तिनिकाचने ॥ ८ ॥		
(इति करणाष्टकम्)		
उदयः प्रकृतेः	१–२–३	२०८
” स्थितेः	४	२०९
” अनुभागस्य	५	२०९
” प्रदेशानाम्	६	२०९
साद्यनादिप्ररूपणा	७	२१०
उत्कृष्टप्रदेशोदयस्वामिनः–गुणश्रेणिः	८–९	२११
गुणश्रेणिस्थानम्	१०–१९	२११
जघन्यप्रदेशोदयस्वामी	२०–३२	२१४
॥ इत्युदयः ॥		

विषयाः	गाथाङ्कः	पत्राङ्कः
सत्तास्वरूपम्–साद्यनादिप्ररूपणा मूलप्रकृतेः	१	२१८
उत्तरासाम् साद्यनादिप्ररूपणा	२	२१८
एकैकप्रकृतिगतं स्वामित्वम्	३–९	२१८
प्रकृतिस्थानसत्कर्मप्ररूपणा	१०–१५	२२१
स्थितेः साद्यनादिप्ररूपणा	१६	२२३
उत्कृष्टायाः स्वामी	१७–१८	२२४
जघन्यायाः स्वामी	१९	२२५
स्थितेः भेदाः	२०	२२६
अनुभागस्य स्वरूपं–स्वामिनः	२१–२३	२२७
अनुभागभेदाः	२४	२२७
प्रदेशानां मूलतः साद्यनादिप्ररूपणा	२५	२२८
” उत्तरतः ”	२६	२२८

विषयाः	गाथाङ्कः	पत्राङ्कः
उत्कृष्टानां स्वामिनः	२७–३८	२२७
जघन्यानाम् "	३९–४३	२३२
स्पर्धकानि	४४–५०	२३३
मूलप्रकृतीनां जूयस्कारादयः बन्धस्थानेषु	५१	२३७
उत्तरप्रकृतीनां ते बन्धस्थानेषु		२४०
सर्वोत्तरप्रकृतीनां सामान्यतो जूय-स्कारादयः		२४१
उदयस्थानेषु ते		२४३
सर्वोत्तरप्रकृतीनां सामान्यतस्ते		२४४
सत्तास्थानेषु ते		२४६
सर्वोत्तरप्रकृतीनां सामान्यतस्ते		२४८
॥ इतिसत्ता ॥		
बन्धोदयसत्तासंवेधः मूलप्रकृतीराश्रित्य	५४	२५०

विषयाः	गाथाङ्कः	पत्राङ्कः
एतासां स्थानानि		२५१
आयुषो गुणस्थानेषु बन्धोदयसत्ताः		२५१
दर्शनावरणस्य बन्धोदयसत्तास्थानानि		२५२
गोत्रस्य बन्धोदयसत्तास्थानानां संवेधः		२५४
वेदनीयस्य " "		२५४
ज्ञानावरणान्तरायोः " "		२५४
मोहनीयस्य बन्धस्थानानि		२५४
" उदयस्थानि		२५५
" सत्तास्थानानि		२५८
" बन्धादिसंवेधः		२५९
" सत्तास्थानानामवस्थानकालमानम्		२६२
नामकर्मणो बन्धादिस्थानानि		२६३
" बन्धस्थानानि		२६४

विषयाः	गाथाङ्कः	पत्राङ्कः
नामकर्मणो गुणस्थानेषु बन्धव्यवच्छेदः		२६७
" मनुष्याणामुदयस्थानानि		२७१
" देवानां तानि		२७३
" गुणस्थानके उदयव्यवच्छेदः		२७४
" सत्तास्थानानि		२७४
" सत्तास्थानचिन्ता गुणस्थानेषु		२७५
" बन्धोदयसत्तानां परस्परसंवेधः		२७५
सर्वकर्मणां गुणस्थाने बन्धादिसंवेधचिन्ता		२८०
अव्यक्तोदयं गुणस्थानकोदयं चाश्रित्य पदसमूहः		२८१
गुणस्थानोदयपदसङ्ख्या		२८२
गुणस्थानान्याश्रित्योपयोगा उपयोगगुणितान्युदयपदानि च		२८२
लेश्यागुणिता उदयभङ्गा उदयपदानि च		२८३
योगगुणितास्ते तानि च		२८४
नामकर्मणो विशेषः		२८६
मिथ्यादृष्टेर्बन्धस्थानानि		२८६
तस्यैवोदयस्थानानि		२८७
तस्यैव सत्तास्थानानि		२८७
सासादनस्य बन्धोदयसत्तास्थानानि		२८९
सम्यग्मिथ्यादृष्टेस्तानि		२९०
अविरतसम्यग्दृष्टेस्तानि		२९०
देशविरतस्य तानि		२९१
प्रमत्तसंयतस्य तानि		२९२
अप्रमत्तसंयतस्य तानि		२९२
अपूर्वकरणस्य तानि		२९२

विषयाः	गाथाङ्कः	पत्राङ्कः
अनिवृत्तिबादरसूक्ष्मसंपरायोपशान्तमोहेष्वतिदेशः विशेषश्च		२९३
क्षीणमोहस्योदयादिस्थानानि		२९३
सयोगिकेवलिन उदयादिस्थानानि अयोगिनोऽपि		२९३
गतिषु बन्धादिस्थानानि		२९४
तिरश्चां बन्धादिस्थानानि		२९४
मनुष्यगतौ तानि		२९५
देवानां तानि		२९६
इन्द्रियेषु बन्धादिविचारः		२९६
जीवस्थानेषु बन्धादीनि		२९६
गत्यादि सर्वमार्गणासु बन्धादिस्थानविषयसत्पदप्ररूपणा		२९९
॥ इति बंधोदयसत्तासंवेधः ॥		
प्रकरणज्ञानस्य विशिष्टफलम्	५५	३००
क्षपकश्रेणीस्वरूपं		३००
केवलिसमुद्घातवर्णनम्		३०३
योगनिरोधस्वरूपम्		३०४
दृष्टिवादज्ञेभ्यः शुद्धिप्रार्थना	५६	३०७
पर्यवसानमङ्गलम्	५७	३०७
टीकाकृत्प्रशस्तिः		३०७

न्यायविशारदन्यायाचार्यमहोपाध्यायश्रीमद्यशोविजयविरचितटीकोपेता

। कर्मप्रकृतिः ।

महोपाध्यायश्री १ए श्रीकल्याणविजयगणिशिष्यमुख्यपंडितश्री ५ श्रीलाभविजयगणिशिष्यशिरोमणिपंडितश्रीश्रीश्रीनयविजयगणिगुरुभ्यो नमः ॥

ऐन्द्री समृद्धिर्यदुपास्तिलभ्या, तं पार्श्वनाथं प्रणिपत्य भक्त्या ।
व्याख्यातुमीहे सुगुरुप्रसादमासाद्य कर्मप्रकृतिं गभीराम् ॥ १ ॥

मलयगिरिगिरां या व्यक्तिरत्रास्ति तस्याः, किमधिकमिति भक्तिर्मेऽधिगन्तुं न दत्ते ।
वद वदन पवित्रीभावमुद्भाव्य भाव्यः, श्रम इह सफलस्ते नित्यमित्येव वक्ति ॥ २ ॥

इह चूर्णिकृदध्वदर्शकोऽभून्मलयगिरिर्व्यतनोदकण्टकं तम् ।
इति तत्र पदप्रचारमात्रात्, पथिकस्येव ममास्त्वभीष्टसिद्धिः ॥ ३ ॥

इह हि भगवान् शिवशर्मसूरिः कर्मप्रकृत्याख्यं प्रकरणमारिप्सुर्ग्रन्थादौ विघ्नविघाताय शिष्टाचारपरिपालनाय च मङ्गलमाचरन् प्रेक्षावत्प्रवृत्तयेऽभिधेयप्रयोजनादि प्रतिपादयति—

सिद्धं सिद्धत्थसुअं वंदिय णिद्धोयसव्वकम्ममलं । कम्मट्ठगस्स करणट्ठगुदयसंताणि वोच्छामि ॥ १ ॥

व्याख्या—सिद्धं वन्दित्वेति क्रियायोगः। स च नामतोऽपि कश्चिन्नवतीति तद्व्यवच्छेदार्थं विशेषणमाह—निर्धौतसर्वकर्ममलं नितरामपुनर्भावेन धौतो ज्ञानदर्शनचारित्रसलिलेन प्रक्षालितः सर्व एव कर्ममलो येन स तथा तं। विशेष्यमाह—सिद्धार्थसुतं सिद्धार्थनरेन्द्रापत्यं वर्द्धमानमित्यर्थः। यद्वा सिद्धमित्येव विशेष्यं, सिद्धत्थसुअमिति विशेषणं, तत्र च सिद्धार्थं सिद्धप्रयोजनं संसारनिस्तारकरणेन श्रुतं प्रवचनं यस्येत्यर्थाच्चनातिशयो लभ्यते । स्वकीयानन्तज्ञानाकलितभावावबोधात्सिद्धार्थाः सिद्धप्रयोजनाः सुता इव सुताः शिष्या गणधरादयो यस्य स तथा तमित्यर्थादावृत्त्या ज्ञानातिशयो लभ्यते । सिद्धार्थ इति भावप्रधाननिर्देशादमरनरेन्द्रादिपूजार्हत्वगुणेन सिद्धार्थतया श्रुतं प्रसिद्धमित्यर्थाच्चावृत्त्या पूजातिशयो लभ्यते । अपायापगमातिशयस्तु निर्धौतसर्वकर्ममलमित्यनेनावेदित एवेति भगवतोऽतिशयचतुष्टयं निष्टंकितं भवति। तमित्थंभूतं वन्दित्वा वक्ष्यामि कथयिष्यामि कर्माष्टकस्य बन्धसङ्क्रमादिहेतुभूतं करणाष्टकमुदयसत्ते च। तत्र कर्माष्टकस्वरूपमिह बहूपयोगीति सप्रज्ञेदं पञ्चसङ्ग्रहानुसारेण लिख्यते—ज्ञानावरणदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाख्याः कर्मणोऽष्टौ मूलप्रकृतयः । तत्र सामान्यविशेषात्मके वस्तुनि विशेषग्रहणात्मको बोधो ज्ञानं, तदावियते आच्छाद्यतेऽनेनेति ज्ञानावरणं। सामान्यग्रहणात्मको बोधो दर्शनं, तदावियतेऽनेनेति दर्शनावरणं। वेद्यते आह्लादादिरूपेण यत्तद्वेदनीयं। यद्यपि सर्वं कर्म वेद्यते तथापि पङ्क-

जादिपदवद्वेदनीयपदस्य रूढिविषयत्वात्सातासातरूपमेव कर्म वेदनीयमुच्यते, न शेषं। मोहयति सदसद्विवेकविकलं करोत्यात्मानमिति मोहनीयं, कृद्भक्ष्य (सि० ५-१-१०-२) मिति कर्त्तर्यनीयः। एत्यागच्छति प्रतिबन्धकतां कुगतिनिर्यियासोर्जन्तोरित्यायुः, यद्वा समन्तादेति गच्छति भवान्तरसङ्क्रान्तौ जन्तूनां विपाकोदयमित्यायुः, अन्नयत्राप्यौणादिक उस् प्रत्ययः। नामयति गत्यादिपर्यायानुभवनं प्रति प्रवणयति जीवमिति नाम। गूयते शब्द्यते उच्चावचैः शब्दैर्यत्तद्गोत्रं उच्चनीचकुलोत्पत्त्यभिव्यङ्ग्यः पर्यायविशेषः, तद्विपाकवेद्यं कर्मापि गोत्रं। यद्वा गूयते शब्द्यते उच्चावचैः शब्दैरात्मा यस्मात्तद्गोत्रं। जीवं दानादिकं चान्तरा व्यवधानापादनायैति गच्छतीत्यन्तरायं। पञ्च नव द्वे अष्टाविंशतिश्चतस्रो द्विचत्वारिंशत् द्वे पञ्च च यथाक्रममुत्तरप्रकृतयः। तत्र मतिश्रुतावधिमनःपर्यायकेवलज्ञानावरणभेदात् पञ्च ज्ञानावरणोत्तरप्रकृतयः। मतिश्रुतादिस्वरूपं च सुव्यक्तं। चक्षुर्दर्शनावरणाचक्षुर्दर्शनावरणावधिदर्शनावरणकेवलदर्शनावरणनिद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानर्द्धिभेदान्नव दर्शनावरणोत्तरप्रकृतयः। तत्र चक्षुषा दर्शनं चक्षुर्दर्शनं तदावरणं चक्षुर्दर्शनावरणं। शेषेन्द्रियमनोभिर्दर्शनमचक्षुर्दर्शनं तदावरणमचक्षुर्दर्शनावरणं। अवधिरेव दर्शनमवधिदर्शनं तदावरणमवधिदर्शनावरणं। केवलमेव दर्शनं केवलदर्शनं तदावरणं केवलदर्शनावरणं। 'ञा कुत्सायां' नियतं जाति अविस्पष्टतया कुत्सितत्वं गच्छति चैतन्यं यस्यां स्वापावस्थायां सा निद्रा नखच्छोटिकामात्रसाध्यप्रबोध्यस्वापावस्थेत्यर्थः। निद्रातोऽतिशायिनी निद्रा निद्रानिद्रा, मध्यमपदलोपी समासः, तस्यां ह्यत्यन्तमस्फुटीभूतं चैतन्यं बहुभिर्यत्नैः प्रबोधमुपयाति। उपविष्ट ऊर्ध्वस्थितो वा प्रचलति घूर्णते यस्यां स्वापावस्थायां सा प्रचला। प्रचलातोऽतिशायिनी (प्रचला) प्रचलाप्रचला, इयं हि चङ्क्रमणादि कुर्वतोऽप्युदयमागच्छतीति प्रच-

लातोऽस्या अतिशायिनीत्वं । स्त्याना पिण्डीभूता ऋद्धिरात्मशक्तिरूपा यस्यां स्वापावस्थायां सा स्त्यानर्द्धिः, तद्भावे हि प्रथमसंहननस्यार्द्धचक्रयर्द्धबलसदृशी शक्तिरुपजायते । अत्र निद्रादयः समधिगताया एव दर्शनलब्धेरुपघाते वर्त्तन्ते, दर्शनावरणचतुष्टयं तूद्गमोद्भेदित्वात्समूलघातं हन्ति दर्शनलब्धिमिति गन्धहस्ती । तथा च प्राप्तस्य दर्शनस्य नाशकत्वेनाप्राप्तस्य च प्रतिबन्धकत्वेन नवानामपि प्रकृतीनां दर्शनावरणत्वं परिभाषितं भवति । वेदनीयस्य द्वे प्रकृती सातमसातं च । तत्र यदुदयादारोग्यविषयोपभोगादिजनितमाह्लादलक्षणं सातं वेद्यते तत्सातवेदनीयं, तद्विपरीतमसातवेदनीयं । मिथ्यात्वं सम्यग्मिथ्यात्वं सम्यक्त्वं षोडश कषाया नव नोकषायाश्चेत्यष्टाविंशतिर्मोहनीयप्रकृतयः । तत्र यदुदयाज्जिनप्रणीततत्त्वाश्रद्धानं तन्मिथ्यात्वं, यदुदयाज्जिनप्रणीततत्त्वं न सम्यक् श्रद्धत्ते नापि निन्दति तत्सम्यग्मिथ्यात्वं, यदुदयवशाज्जिनप्रणीततत्त्वं सम्यक् श्रद्धत्ते तत्सम्यक्त्वं । एतच्च प्रकृतित्रयं दर्शनमोहनीयमुच्यते । कषस्य संसारस्यायो लाभो येभ्यस्ते कषायाः क्रोधमानमायालोभाः, ते च प्रत्येकमनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनभेदाच्चतुर्धेति षोडश । तत्रानन्तं संसारमनुबध्नन्तीत्येवंशीला अनन्तानुबन्धिनः, एषां च संयोजना इति द्वितीयमप्यस्ति नाम संयोज्यन्ते संबध्यन्तेऽनन्तैर्भवैर्जन्तवो यैस्ते संयोजना इति व्युत्पत्तेः । न विद्यते स्वल्पमपि प्रत्याख्यानं येषामुदयात्तेऽप्रत्याख्यानाः । प्रत्याख्यानं सर्वविरतिरूपमाव्रियते यैस्ते प्रत्याख्यानावरणाः । परीषहोपसर्गनिपाते सति चारित्रिणमपि सं ईषज्ज्वलयन्तीति संज्वलनाः । नोकषाया इत्यत्र नोशब्दः साहचर्ये, ततः कषायैः सहचारिणः सहवर्त्तिनो ये ते नोकषायाः, कैः कषायैः सहचारिण इति चेदाद्यैर्द्वादशभिः । तथाहि—नाद्येषु द्वादशसु कषायेषु क्षीणेषु नोकषाया अवतिष्ठन्ते, तदनन्तरमेव तेषामपि क्षपणाय

क्षपकस्य प्रवृत्तेः । यदैते समुज्जृम्भमाणा अवश्यं कषायानुद्दीपयन्ति ततः कषायसहचारिणः । उक्तं च—"कषायसहवर्त्तित्वात्कषायप्रेरणादपि । हास्यादिनवकस्योक्ता नोकषायकषायता ॥ १ ॥" ते च नोकषाया नव वेदत्रिकं हास्यादिषट्कं च । तत्र वेदत्रिकं स्त्रीवेदः पुरुषवेदो नपुंसकवेदश्च । तत्र यदुदये स्त्रियाः पुंस्यभिलाषः पित्तोदये मधुराभिलाषवत्स स्त्रीवेदः, यदुदयात्पुंसः स्त्रियामभिलाषः श्लेष्मोदयादम्लाभिलाषवत्स पुरुषवेदः, यदुदयात्स्त्रीपुंसयोरुपर्यभिलाषः पित्तश्लेष्मोदये मञ्जिकाभिलाषवत्स नपुंसकवेदः । हास्यादिषट्कं हास्यरत्यरतिभयशोकजुगुप्सालक्षणं । तत्र यदुदयात्सनिमित्तमनिमित्तं वा हसति तद्धास्यमोहनीयं, यदुदयाद्बाह्यान्यन्तरेषु वस्तुषु प्रीतिस्तद्रतिमोहनीयं, यदुदयात्तेष्वप्रीतिस्तदरतिमोहनीयं, प्रीत्यप्रीती सातासातात्मके एवेति वेदनीयकर्मणैवानयोरन्यथासिद्धिरिति नाशङ्कनीयं, तदुपनीतसुखदुःखहेतुसंनिधानेऽपि चित्तान्यथाभावस्यैतद्व्यापारत्वात्, यदुदयात् प्रियविप्रयोगादावाक्रन्दति भूपीठे लुठति दीर्घं निःश्वसिति तद्धोकमोहनीयं, यदुदयात्सनिमित्तमनिमित्तं वा स्वसङ्कल्पतो बिभेति तद्भयमोहनीयं, यदुदयाद्बुद्धमशुद्धं वा वस्तु जुगुप्सते तज्जुगुप्सामोहनीयं । एते षोडश कषाया नव च नोकषायाश्चारित्रमोहसंज्ञाः । सुरायुर्नरायुस्तिर्यगायुर्निरयायुश्चेति चतस्र आयुषः प्रकृतयः । चतुर्दश पिण्डप्रकृतयोऽष्टाऽप्रतिपक्षाः प्रत्येकप्रकृतयस्त्रसाद्या दश च सप्रतिपक्षा विंशतिरिति द्विचत्वारिंशन्नामकर्मप्रकृतयः । तत्र गतिजातिशरीराङ्गोपाङ्गबन्धनसङ्घातसंहननसंस्थानवर्णगन्धरसस्पर्शानुपूर्वीविहायोगतयश्चतुर्दश पिण्डप्रकृतयः । पिण्डत्वमवान्तरभेदयुक्तत्वं । तत्र गम्यते तथाविधकर्मसचिवैर्जीवैः प्राप्यत इति गतिः नारकत्वादिपर्यायपरिणतिः, सा चतुर्धा नरकगतिस्तिर्यग्गतिर्मनुष्यगतिर्देवगतिश्च, तद्विपाकवेद्या कर्मप्रकृतिरपि गतिः, साऽपि चतु-

र्द्धा । एकेन्द्रियादीनामेकेन्द्रियादिशब्दप्रवृत्तिनिबन्धनं तथाविधसमानपरिणतिलक्षणं सामान्यं जातिः, तद्विपाकवेद्या कर्मप्रकृतिरपि जातिः । अयमत्र पूर्वसूरीणामभिप्रायः—द्रव्यरूपमिन्द्रियमङ्गोपाङ्गनामेन्द्रियपर्याप्तिनामसामर्थ्यात्सिद्धं, भावरूपं तु स्पर्शनादीन्द्रियावरणक्षयोपशमसामर्थ्यात् "क्षायोपशमिकानीन्द्रियाणीति" वचनात् । यत्पुनरेकेन्द्रियादिशब्दप्रवृत्तिनिमित्तं सामान्यं तदन्यासाध्यत्वाज्जातिनामनिबन्धनमिति । अत्र कश्चिदाह—शब्दप्रवृत्तिनिमित्ततया न जातिसिद्धिः, अन्यथा हर्यादिपदप्रवृत्तिनिमित्ततया हरित्वादिकमपि जातिः सिद्ध्येत्, ततः एकेन्द्रियादिव्यवहार उपाधिविषय एवास्त्विति कृतं जातिनाम्ना । यदि चैवमप्येकेन्द्रियादिव्यवहारहेतुतयैकेन्द्रियत्वादिजातिरभ्युपगम्यते तदा नारकत्वादिकमपि नारकादिव्यवहारनिमित्तपञ्चेन्द्रियत्वादिव्याप्या जातिरेवास्त्विति कृतं गतिनाम्नेति । तत्र ब्रूमः—अपकृष्टचैतन्यादिनियामकतयैकेन्द्रियत्वादिजातिसिद्धिस्तदेव चैकेन्द्रियादिव्यवहारनिमित्तं लाघवात्तन्निबन्धनतया च जातिनामसिद्धिः । नारकत्वादिकं च न जातिरूपं, तिर्यक्त्वस्य पञ्चेन्द्रियत्वादिना साङ्कर्यात्, किं तु सुखदुःखविशेषोपभोगनियामकपरिणामविशेषरूपं तन्निबन्धनतया च गतिनामसिद्धिरिति कृतं प्रसङ्गेन । जातिः पञ्चधा—एकेन्द्रियजातिर्द्वीन्द्रियजातिस्त्रीन्द्रियजातिश्चतुरिन्द्रियजातिः पञ्चेन्द्रियजातिरिति, तद्विपाकवेद्यं जातिनामकर्मापि पञ्चधा । शीर्यत इति शरीरं, तच्च पञ्चधा—औदारिकं वैक्रियं आहारकं तैजसं कार्मणं च । एतद्विपाकवेद्यं कर्मापि शरीरनाम पञ्चधा । तत्र यदुदयादौदारिकशरीरयोग्यान् पुद्गलानादायौदारिकशरीररूपतया परिणमयति, परिणमय्य च जीवप्रदेशैः सहान्योऽन्यानुगमरूपतया संबन्धयति तदौदारिकशरीरनाम, एवं शेषशरीरनामान्यपि भावनीयानि । अङ्गान्यष्टौ शिरःप्रभृतीनि । उक्तं च—

"सीसमुरोयरपिट्ठी दो बाहू ऊरुया य अङ्गा"। तदवयवभूतान्यङ्गुल्यादीन्युपाङ्गानि। शेषाणि तु तत्प्रत्यवयवभूतान्यङ्गुलिपर्वरेखादीन्यङ्गोपाङ्गानि। ततोऽङ्गानि चोपाङ्गानि चाङ्गोपाङ्गानि, अङ्गोपाङ्गानि चाङ्गोपाङ्गानि चाङ्गोपाङ्गानि, "स्यादावसङ्ख्येय" (सि०-३-१-११ए) इत्येकशेषः,तन्निमित्तं कर्माङ्गोपाङ्गं, तत्त्रिधा—औदारिकोपाङ्गं वैक्रियोपाङ्गं आहारकोपाङ्गं च। तत्र यदुदयवशादौदारिकशरीरत्वेन परिणतानां पुद्गलानामङ्गोपाङ्गविभागपरिणतिरुपजायते तदौदारिकोपाङ्गनाम। एवं वैक्रियाहारकोपाङ्गनाम्नी अपि भावनीये। तैजसकार्मणयोस्तु जीवप्रदेशसमानसंस्थानत्वान्नास्त्यङ्गोपाङ्गसंभवः। बध्यतेऽनेनेति बन्धनं, यदुदयादौदारिकादिपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परमेकत्वमुपजायते काष्ठद्वयस्येव जतुसम्बन्धात्, तच्चौदारिकबन्धनादिभेदेन पञ्चप्रकारं। सङ्घात्यन्ते गृहीत्वा पिण्डीक्रियन्ते औदारिकादिपुद्गला येन तत्सङ्घातनं, तदप्यौदारिकसङ्घातनादिभेदेन पञ्चविधं। अथ कोऽस्य व्यापारः? पुद्गलसंहतिमात्रमिति चेन्न, पुद्गलसंहतिमात्रस्य ग्रहणमात्रादेव सिद्धत्वात् तत्र सङ्घातननामकर्मणोऽनुपयोगाद्, औदारिकादिशरीररचनानुकारिसङ्घातविशेषस्तद्व्यापार इति संप्रदायमतं, तदपि न, तन्तुसंहतेः पट इवौदारिकादिवर्गणाप्रभवपुद्गलसंहतेरेवौदारिकशरीरादौ हेतुत्वात् तत्राधिकविशेषानाश्रयणादिति चेत्सत्यं, प्रतिनियतप्रमाणौदारिकादिशरीररचनार्थं संहतिविशेषस्यावश्याश्रयणीयत्वात्तन्निमित्ततारतम्यज्ञागितया सङ्घातननामकर्मसिद्धिरिति संप्रदायान्निप्रायस्यैव युक्तत्वात्। संहननं नामास्थिरचनाविशेषः, तत् षोढा—वज्रर्षभनाराचं ऋषभनाराचं नाराचं अर्द्धनाराचं कीलिका सेवार्त्तं च। तत्र वज्रं कीलिका, ऋषभः परिवेष्टनपट्टः, नाराचमुभयतो मर्कटबन्धः, ततश्च द्वयोरस्थ्नोरुभयतो मर्कटबन्धेन बद्धयोः पट्टाकृतिना तृतीयेनास्थ्ना परिवेष्टितयोरुपरि तदस्थित्रयभेदिकीलिकाख्यवज्रनाम-

कमस्थि यत्र भवति तद्वज्रर्षभनाराचसंहननमाद्यं संहननं, यत्पुनः कीलिकारहितं तद्दृषभनाराचं द्वितीयं, यत्रास्थ्नोर्मर्कटबन्ध एव केवलस्तन्नाराचसंज्ञं तृतीयं, यत्र पुनरेकपार्श्वे मर्कटबन्धो द्वितीयपार्श्वे च कीलिकाबन्धस्तदर्द्धनाराचं चतुर्थं, यत्रास्थीनि कीलिकामात्रबद्धान्येव भवन्ति तत्कीलिकाख्यं पञ्चमं, यत्र पुनः परस्परं पर्यन्तस्पर्शमात्रलक्षणां सेवामागतान्यस्थीनि भवन्ति नित्यमेव स्नेहाभ्यङ्गादिरूपां सेवां प्रतीक्षन्ति वा तत्सेवार्त्ताख्यं षष्ठं । एतन्निबन्धनं संहननमपि षोढा । संस्थानमाकारविशेषः, सङ्गृहीतसङ्घातितबद्धेष्वौदारिकादिपुद्गलेषु यदुदयाद्भवति तत्संस्थाननाम, तच्च षोढा समचतुरस्रं न्यग्रोधपरिमण्डलं सादि कुब्जं वामनं हुंडं चेति । तत्र यदुदयात्समचतुरस्रं संस्थानं स्यात्तत्समचतुरस्रसंस्थाननाम, एवमग्रेऽपि भावनीयं । समाः सामुद्रिकशास्त्रोक्तप्रमाणलक्षणाविसंवादिन्यश्चतस्रोऽस्रयश्चतुर्दिग्भागोपलक्षिताः शरीरावयवा यस्य तत्समचतुरस्रं । नाभेरुपरि संपूर्णप्रमाणत्वादधस्त्वतथात्वादुपरिसंपूर्णप्रमाणाधोहीनन्यग्रोधवत्परिमंडलत्वं यस्य तन्न्यग्रोधपरिमंडलं । आदिरिहोत्सेधाख्यो नाभेरधस्तनो देहभागो गृह्यते, ततः सह आदिना नाभेरधस्तनभागेन यथोक्तप्रमाणलक्षणेन वर्तत इति सादि, विशेषणान्यथानुपपत्त्या विशिष्टार्थलाभः । अपरे तु साचीति पठन्ति, तत्र साचीति समयविदः शाल्मलीतरुमाचक्षते, ततः साचीव यत्संस्थानं तत्साचि, यथा शाल्मलीतरोः स्कन्धकाण्डमतिपुष्टं उपरि च न तदनुरूपा महाविशालता तद्वदस्यापि संस्थानस्याधोभागः परिपूर्णो भवति उपरिभागस्तु न तथेति भावः । यत्र शिरोग्रीवं हस्तपादादिकं च यथोक्तप्रमाणलक्षणोपेतं उरउदरादि च मरुभं तत्कुब्जं । यत्र पुनरुरउदरादि प्रमाणलक्षणोपेतं हस्तपादादिकं च हीनं तद्वामनं । यत्र तु सर्वेऽप्यवयवाः प्रमाणलक्षणपरिभ्रष्टास्तत् हुंडं । वर्ण्यतेऽलङ्क्रियते शरीरमनेनेति वर्णः, स च पञ्चधा—श्वेत-

पीतरक्तनीलकृष्णभेदात्, तन्निबन्धनं नामापि पञ्चधा । तत्रयदुदयाज्जन्तूनां शरीरे श्वेतवर्णः प्रादुर्भवेत् यथा बलाकादीनां तेच्छ्वेतवर्णनाम। एवमग्रेऽपि भावनीयं। "बस्त गंध अर्दने" (बस्ति गन्धिण् अर्दने चौरादिक आत्मनेपदी) गन्ध्यते आघ्रायते इति गन्धः, स द्विधा—सुरभिगन्धो दुरभिगन्धश्च तन्निबन्धनं नामापिद्विधा । तत्र यदुदयाज्जन्तूनां शरीरेषु सुरभिगन्ध उपजायते यथा शतपत्रादीनां तत्सुरभिगन्धनाम, एतद्वि परीतं दुरभिगन्धनाम भावनीयं । "रस आस्वादनस्नेहनयोः" रस्यते आस्वाद्यते इति रसः, स च पञ्चधा—तिक्तकटुकषायाम्लमधुरभेदात् तन्निबन्धनं नामापि पञ्चधा। तत्र यदुदयाज्जन्तूनां शरीरेषु तिक्तो रसो भवति यथा मरिचादीनां तत्तिक्तरसनाम। एवमग्रेऽपि भावनीयं। "ष्टुप स्पृश संस्पर्शे (स्पृशंत् संस्पर्शे तौदादिकः) स्पृश्यते इति स्पर्शः, स च कर्कशमृदुलघुगुरुस्निग्धरूक्षशीतोष्णभेदादष्टप्रकारः, तन्निबन्धनं नामाप्यष्टभेदं। तत्र यदुदयाज्जन्तूनां शरीरेषु पाषाणादीनामिव कार्कश्यं भवति तत्कर्कशस्पर्शनाम। एवमग्रेऽपि भावनीयं। विग्रहेण भवान्तरोत्पत्तिस्थानं गच्छतो जीवस्यानुश्रेणिनियता गमनपरिपाट्यानुपूर्वी, तद्विपाकवेद्या कर्मप्रकृतिरप्यानुपूर्वी, सा चतुर्धा—नरकगत्यानुपूर्वी तिर्यग्गत्यानुपूर्वी मनुष्यगत्यानुपूर्वी देवगत्यानुपूर्वी चेति। विहायसा गतिर्विहायोगतिः, प्रथमप्रकृतिव्यवच्छेदाय विहायसेति विशेषणं। सा प्रशस्ताऽप्रशस्ता च, (तत्र) प्रशस्ता हंसगजवृषभादीनां, अप्रशस्ता खरोष्ट्रमहिषादीनां, तद्विपाकवेद्या कर्मप्रकृतिरपि द्विप्रकारा विहायोगतिः । उक्ताः पिण्डप्रकृतयः एतासां चावान्तरभेदाः पञ्चषष्टिः । अथ प्रत्येकप्रकृतयो वक्तव्याः, ताश्च सप्रतिपक्षा अप्रतिपक्षाश्चेति द्विधा । तत्र पूर्वमल्पवक्तव्यत्वादप्रतिपक्षा उच्यन्ते, ताश्चागुरुलघूपघातपराघातोच्छ्वासातपोद्योतनिर्माणतीर्थकरनामभेदादष्ट । (तत्र) यदुदयात्प्राणिनां शरीराणि न गुरूणि न लघूनि नापि गुरुलघूनि किं त्वगुरुलघु-

परिणामपरिणतानि भवन्ति तदगुरुलघुनाम । यदुदयात्स्वशरीरावयवैरेव प्रतिजिह्वागलवृन्दलंबकचौरदन्तादिभिर्जन्तुरुपहन्यते स्वयंकृतोद्बन्धनभैरवप्रपातादिभिर्वा तदुपघातनाम । यदुदयादोजस्वी दर्शनमात्रेण वाकूसौष्ठवेन वा महासभागतः सभ्यानामपि त्रासमुत्पादयति प्रतिवादिनश्च प्रतिभां प्रतिहन्ति तत्पराघातनाम । यदुदयादुच्छ्वासनिःश्वासलब्धिरुपजायते तदुच्छ्वासनाम । यदुदयाज्जन्तुशरीराणि स्वरूपेणानुष्णान्यप्युष्णप्रकाशलक्षणमातपं कुर्वन्ति तदातपनाम, तद्विपाकश्च भानुमण्डलगतभूकायिकेष्वेव, न वह्नौ, प्रवचने निषेधात् । तत्रोष्णत्वमुष्णस्पर्शोदयादुत्कटलोहितवर्णनामोदयाच्च प्रकाशकत्वमिष्यत इति । यदुदयाज्जन्तुशरीराण्यनुष्णप्रकाशरूपमुद्योतं कुर्वन्ति यथा यतिदेवोत्तरवैक्रियचन्द्रग्रहनक्षत्रताराविमानरत्नौषधयस्तदुद्योतनाम । यदुदयाज्जन्तुशरीरेष्वङ्गप्रत्यङ्गानां प्रतिनियतस्थानवर्त्तिता भवति तन्निर्माणनाम सूत्रधारकल्पं, तदभावे हि तद्भूतककल्पैरङ्गोपाङ्गनामादिभिर्निर्निर्वर्त्तितानामपि शिरउरउदरादीनां स्थानप्रवृत्तेरनियमः स्यात् । यदुदयादष्टमहाप्रातिहार्याद्यतिशयाः प्रादुर्भवन्ति तत्तीर्थंकरनाम । उक्ता अप्रतिपक्षाः प्रत्येकप्रकृतयः । अथ सप्रतिपक्षास्ता उच्यन्ते, ताश्च त्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुस्वरसुभगादेययशःकीर्त्तयः स्थावरसूक्ष्मापर्याप्तसाधरणास्थिराशुभदुःस्वरदुर्भगानादेययशःकीर्त्तिरूपप्रतिपक्षसहिता विंशतिः । तत्र त्रसन्त्युष्णाद्यभितप्ताः स्थानान्तरं गच्छन्तीति त्रसा द्वीन्द्रियादयः, तद्विपाकवेद्या कर्मप्रकृतिरपि त्रसनाम । तद्विपरीतं स्थावरनाम, यदुदयादुष्णाद्यभितापेऽपि स्थानपरिहारासमर्थाः पृथिव्यादयः स्थावरा भवन्ति । यदुदयाज्जीवानां चक्षुर्ग्राह्यशरीरत्वलक्षणं बादरत्वं भवति तद्बादरनाम, पृथिव्यादेरेकैकशरीरस्य चक्षुर्ग्राह्यत्वाभावेऽपि बादरत्वपरिणामविशेषाद्बहूनां समुदाये चक्षुषा ग्रहणं भवति । तद्विपरीतं सूक्ष्मनाम,

यदुदयाद्बहूनां समुदितानामपि जन्तुशरीराणां चक्षुर्ग्राह्यता न भवति। यदुदयात्स्वयोग्यपर्याप्तिनिर्वर्त्तनसमर्थो भवति तत्पर्याप्तनाम। तद्विपरीतमपर्याप्तनाम, यदुदयात्स्वयोग्यपर्याप्तिनिर्वर्त्तनसमर्थो न भवति। यदुदयात्प्रतिजीवं भिन्नशरीरमुपजायते तत् प्रत्येकनाम, ननु कपित्थाश्वत्थपीलुप्रभृतीनां मूलस्कन्धत्वक्शाखादयः प्रत्येकमसङ्ख्येयजीवाः प्रवचने प्रोच्यन्ते, मूलादयश्च देवदत्तशरीरवदखण्डैकशरीराकारा उपलभ्यन्त इति कथं तेषां प्रत्येकशरीरत्वं ? प्रतिजीवं शरीरभेदाभावात्, इति चेन्नैवं, तन्मूलादिष्वसङ्ख्येयानामपि जीवानां भिन्नभिन्नशरीराभ्युपगमात्, केवलं श्लेषद्रव्यमिश्रितसकलसर्षपवर्त्तिवत्प्रबलरागद्वेषोपचितविचित्रप्रत्येकनामकर्मपुद्गलोदयात्तेषां परस्परविमिश्रशरीरसंभवात्। यदुदयादनन्तानां जीवानामेकं शरीरं भवति तत्साधारणनाम। यदुदयाच्छिरोऽस्थिदन्तादीनां शरीरावयवानां स्थिरता भवति तत् स्थिरनाम। तद्विपरीतमस्थिरनाम, यदुदयाज्जिह्वादीनां शरीरावयवानामस्थिरता। यदुदयान्नाभेरुपरितना अवयवाः शुभा जायन्ते तच्छुभनाम। तद्विपरीतमशुभनाम, यदुदयान्नाभेरधस्तनाः पादादयोऽवयवा अशुभा भवन्ति, तथाहि—शिरसा स्पृष्टस्तुष्यति मनुष्यः पादेन तु रुष्यति, कामिन्याः पादस्पर्शेनापि च यस्तोषः स मोहनिबन्धनो न तु वास्तव इति न तेन व्यभिचारः। यदुदयाज्जीवस्वरः श्रोतृप्रीतिहेतुर्भवति तत्सुस्वरनाम। तद्विपरीतं दुःस्वरनाम, यदुदयात्स्वरः श्रोतृणामप्रीतिहेतुर्भवति। यदुदयादनुपकृदपि सर्वस्य मनःप्रियो भवति तत्सुभगनाम। तद्विपरीतं दुर्भगनाम, यदुदयादुपकारकृदपि जनस्य द्वेष्यो भवति। यच्च तीर्थकरोऽप्यभव्यानां द्वेष्यो भवति तत्र न तीर्थकरगतदुर्भगत्वं निमित्तं, किं तु तत्कृतमिथ्यात्वदोष एवेत्यवधेयं। यदुदयाल्लोको यत्तदपि वचनं प्रमाणीकरोति दर्शनसमनन्तरमेव चाभ्युत्थानाद्याचरति तदादेयनाम। तद्विपरीतमनादेयनाम, यदुदयादुपपन्नमपि ब्रुवाणो नोपादेयवचनो

भवति, नाप्यभ्युत्थानादियोग्यः । तपःशौर्यत्यागादिना समुपार्जितेन यशसा कीर्त्तनं यशःकीर्त्तिः, यद्वा यशः सामान्येन ख्यातिः कीर्त्तिर्गुणोत्कीर्त्तनरूपा प्रशंसा, अथवा "एकदिग्गामिनी कीर्त्तिः सर्वदिग्गामुकं यशः । दानपुण्यभवा कीर्त्तिः पराक्रमकृतं यशः ॥ १ ॥" ते यशःकीर्त्ती यदुदयाद्भवतस्तद्यशःकीर्त्तिनाम । तद्विपरीतमयशःकीर्त्तिनाम, यदुदयान्मध्यस्थस्यापि जनस्याप्रशस्तो भवति । उक्ताः सप्रतिपक्षाः प्रत्येकप्रकृतयः । अत्र त्रसादयो दश प्रकृतयस्त्रसादिदशकं, स्थावरादयश्च दश स्थावरादिदशकमिति संज्ञा ग्राह्या । गोत्रस्य द्वे उत्तरप्रकृती—उच्चैर्गोत्रं नीचैर्गोत्रं च । यदुदयादुत्तमजातिकुलबलतपोरूपैश्वर्यश्रुतसत्काराभ्युत्थानासनप्रदानाञ्जलिप्रग्रहादिसंभवस्तदुच्चैर्गोत्रं । यदुदयात् पुनर्ज्ञानादिसंपन्नोऽपि निन्दां लभते हीनजात्यादिसंभवं च तन्नीचैर्गोत्रं । अन्तरायस्य दानलाभभोगोपभोगवीर्यान्तरायभेदात् पञ्चोत्तरप्रकृतयः । तत्र यदुदयात् सति विभवे समागते च गुणवति पात्रे दत्तमस्मै महाफलमिति जानन्नपि दातुं नोत्सहते तद्दानान्तरायं । यदुदयाद्दातुर्गृहे विद्यमानमपि देयं गुणवानपि याचमानोऽपि न लभते तल्लाभान्तरायं । यदुदयादविशिष्टाहारादि प्राप्तावप्यसति च प्रत्याख्यानादिपरिणामे कार्पण्यान्नोत्सहते भोक्तुं तद्भोगान्तरायं । एवमुपभोगान्तरायमपि भावनीयं, नवरं भोगोपभोगयोरयं विशेषः—सकृद्भुज्यत इति भोगः, पुनः पुनरुपभुज्यत इत्युपभोगः । यदुदयात्सत्यपि नीरुजि शरीरे यौवनेऽपि वर्त्तमानोऽल्पप्राणो भवति तद्वीर्यान्तरायं । अत्र च पिण्डप्रकृतीनां पंचषष्ट्याऽवान्तरभेदैस्त्रिनवतिर्नामकर्मप्रकृतयो भवन्ति । तत्र बन्धे उदये च बन्धनसंघातनानि स्वशरीरान्तर्गतान्येव विवक्ष्यन्ते, न पृथक्, वर्णादिचतुष्कं च भेदरहितं सामान्यत एव विवक्ष्यते, तथा च बन्धचिन्तायां नामत्रिनवतेर्बन्धनपञ्चकसङ्घातनपञ्चकवर्णादिषोडशकाप-

नयनात् सप्तषष्टिः परिगृह्यते । मोहनीये च सम्यक्त्वसम्यग्मिथ्यात्वे बन्धे नाधिक्रियेते, मिथ्यात्वपुञ्जलानामेव सम्यक्त्वानुगुणविशोधिविशेषेण त्रिधा कृतानां शुद्ध्यर्द्धविशुद्धिसर्वाविशुद्धिभिः सम्यक्त्वसम्यग्मिथ्यात्वमिथ्यात्वव्यपदेशसंभवात् । ततो बन्धे विंशत्युत्तरं प्रकृतीनां शतं भवति । उदये च द्वाविंशं शतमधिक्रियते सम्यक्त्वसम्यग्मिथ्यात्वयोरप्युदयसंभवात् । सत्तायां च पूर्वापनीतषड्विंशतिप्रकृतीनामपि ग्रहणादष्टचत्वारिंशं शतं ग्रन्थकारमते । गर्गर्षिप्रभृतिमते च बन्धनपञ्चदशकग्रहणादष्टपञ्चाशं शतं । अथ कथं पञ्चदश बन्धनानि भवन्तीति चेदुच्यते—औदारिकवैक्रियाहारकाणां स्वकतैजसकार्मणैः प्रत्येकं सहितानां नव बन्धनानि, तैजसकार्मणद्वययुक्तानां च तेषां त्रीणि, तैजसतैजसबन्धनं तैजसकार्मणबन्धनं कार्मणकार्मणबन्धनं चेति त्रीणि चेत्येवं पञ्चदश भवन्ति । तत्र पूर्वगृहीतानामौदारिकपुञ्जलानामौदारिकपुञ्जलैरेव गृह्यमाणैः सह यः सम्बन्धः स औदारिकौदारिकबन्धनं । तेषामेवौदारिकपुञ्जलानां पूर्वगृहीतानां गृह्यमाणानां च तैजसपुञ्जलैर्गृह्यमाणैः पूर्वगृहीतैश्च सह सम्बन्ध औदारिकतैजसबन्धनं । तेषामेवौदारिकपुञ्जलानां पूर्वगृहीतानां गृह्यमाणानां च कार्मणपुञ्जलैर्गृह्यमाणैः पूर्वगृहीतैश्च सह सम्बन्ध औदारिककार्मणबन्धनं । पूर्वगृहीतवैक्रियपुञ्जलानां स्वैरेव वैक्रियपुञ्जलैर्गृह्यमाणैः सह सम्बन्धो वैक्रियवैक्रियबन्धनं । तेषामेव वैक्रियपुञ्जलानां पूर्वगृहीतानां गृह्यमाणानां च तैजसपुञ्जलैर्गृह्यमाणैः पूर्वगृहीतैश्च सह सम्बन्धो वैक्रियतैजसबन्धनं । तेषामेव वैक्रियपुञ्जलानां पूर्वगृहीतानां गृह्यमाणानां च कार्मणपुञ्जलैर्गृहीतैर्गृह्यमाणैश्च सह सम्बन्धो वैक्रियकार्मणबन्धनं । पूर्वगृहीतानामाहारकपुञ्जलानां स्वैरेवाहारकपुञ्जलैर्गृह्यमाणैः सह सम्बन्ध आहारकाहारकबन्धनं । तेषामेवाहारकपुञ्जलानां पूर्वगृहीतानां गृह्यमाणानां च तैजसपुञ्जलैर्गृ-

हीतैर्गृह्यमाणैश्च सह सम्बन्ध आहारकतैजसबन्धनं । तेषामेवाहारकपुञ्जलानां गृहीतानां गृह्यमाणानां च कार्मणपुञ्जलैर्गृह्यमाणैर्गृहीतैश्च सह सम्बन्ध आहारककार्मणबन्धनं । औदारिकपुञ्जलानां तैजसपुञ्जलानां कार्मणपुञ्जलानां च गृहीतगृह्यमाणानां यो मिश्रः सम्बन्धस्तदौदारिकतैजसकार्मणबन्धनं । एवं वैक्रियतैजसकार्मणाहारकतैजसकार्मणबन्धने अपि भावनीये । तैजसपुञ्जलानां पूर्वगृहीतानां गृह्यमाणैः स्वैरेव तैजसपुञ्जलैः सह सम्बन्धस्तैजसतैजसबन्धनं । तेषामेव गृहीतानां गृह्यमाणानां च तैजसपुञ्जलानां कार्मणपुञ्जलैर्गृह्यमाणैर्गृहीतैश्च सह सम्बन्धस्तैजसकार्मणबन्धनं । कार्मणपुञ्जलानां प्राग्गृहीतानां स्वैरेव गृह्यमाणैः कार्मणपुञ्जलैः सह सम्बन्धः कार्मणकार्मणबन्धनं । ननु ये पञ्च बन्धनानीच्छन्ति परपुञ्जलसंयोगरूपस्य बन्धनस्य सतोऽप्यविवक्षणात्तन्मते सङ्घातनान्यपि पञ्च संभवन्ति । ये तु पञ्चदश बन्धनानीच्छन्ति तन्मते "नासंहतस्य बन्धनमिति" न्यायात्सङ्घातनान्यपि पञ्चदश प्राप्नुवन्तीत्युक्तसङ्ख्याविप्लव इति चेन्न, न हि तन्मते बन्धानुगुणपुञ्जलैकीकरणमात्रलक्षणं सङ्घातनं, किं त्वौदारिकादिरचनानुगुणपुञ्जलैकीकरणलक्षणमित्यदोषात् । तदेवमुक्ताः सर्वकर्मोत्तरप्रकृतयः ।

अथैतासां ध्रुवबन्धित्वध्रुवोदयत्वध्रुवसत्ताकत्वसर्वघातित्वपरावर्त्तनमानत्वाशुभत्वैः सप्रतिपक्षैः पुद्गलविपाकित्वभवविपाकित्वक्षेत्रविपाकित्वजीवविपाकित्वादैः स्वानुदयबन्धिस्वोदयबन्ध्युभयबन्धिसमकव्यवच्छिद्यमानबन्धोदयक्रमव्यवच्छिद्यमानबन्धोदयोत्क्रमव्यवच्छिद्यमानबन्धोदयसान्तरबन्धसान्तरनिरन्तरबन्धनिरन्तरबन्धोदयसंक्रमोत्कृष्टानुदयसङ्क्रमोत्कृष्टोदयबन्धोत्कृष्टानुदयबन्धोत्कृष्टोदयवत्यनुदयवतीसंज्ञाभिश्च यो विशेषः स विज्ञाव्यते—

तत्र निजहेतुसंज्ञवे यासामवश्यंज्ञावी बन्धस्ता ध्रुवबन्धिन्यः, ताश्च ज्ञानावरणपञ्चकमन्तरायपञ्चकं दर्शनावरणनवकं षोरुश कषाया मिथ्यात्वज्ञयजुगुप्सा इत्यष्टात्रिंशद् घातिप्रकृतयोऽगुरुलघु ज्ञपघातं निर्माणं तैजसं वर्णादिचतुष्कं कार्मणं चेति नव नामप्रकृतय इति सर्वसङ्ख्यया सप्तचत्वारिंशत् । एतासां ह्यावन्धकाल्लव्यवच्छेदाद्ध्रुवो बन्धः । तत्र मिथ्यात्वं मिथ्यादृष्टि गुणस्थानं यावत् निरन्तरं बध्यते, परतस्तूदयाज्ञावान्न तद्बन्धः, तद्धि यावद्वेद्यते तावदेव बध्यते "जे वेयइ से बज्झइ त्ति' वचनात् । अनन्तानुबन्धिचतुष्टयं स्त्यानर्द्धित्रिकं च सासादनं यावत् , परतोऽनन्तानुबन्ध्यनुदयेन तद्बन्धाज्ञावात् । एवमप्रत्याख्याना अविरतसम्यग्दृष्टिं यावत् । प्रत्याख्यानावरणा देशविरितिं यावत् । निज्ञाप्रचले अपूर्वकरणप्रथमज्ञागं यावत्, परतस्तद्बन्धयोग्याध्यवसायाज्ञावात् । एवं नव नामध्रुवबन्धिन्योऽपूर्वकरणचरमसमयं यावत् । संज्वलनक्रोधमानमायालोज्ञा अनिवृत्तिबादरं यावत् , परतो बादरकषायोदयाज्ञावेन तद्बन्धासंज्ञवात् । ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्कानि सूक्ष्मसंपरायं यावत् , परतः कषायोदयाज्ञावेन तद्बन्धायोगात् ॥

निजबन्धहेतुसंज्ञवेऽपि ज्ञजनीयबन्धा अध्रुवबन्धिन्यः, ताश्चोक्तशेषा औदारिकवैक्रियाहारकविहायोगतिगोत्रवेदनीययुगलघिकवेदत्रिकायुर्गत्यानुपूर्वीचतुष्टयजातिपञ्चकसंस्थानसंहननषट्कत्रसादिविंशत्युच्छ्वासतीर्थंकरातपोद्योतपराघातरूपास्त्रिसप्ततिः, एता हि स्वबन्धहेतुसाम्राज्येऽपि नावश्यं बन्धमायान्ति । पराघातोच्छ्वासनाम्नोरविरत्यादिस्वहेतुसत्त्वेऽप्यपर्याप्तनामकाले बन्धाज्ञावात्पर्याप्तनामबन्ध एव तद्बन्धादातपनाम्नोऽप्येकेन्द्रियप्रायोग्यप्रकृतिबन्ध एव बन्धात् , उद्योतस्यापि

१ अपर्याप्तप्रायोग्यबंधकाले. २ पर्याप्तप्रायोग्यबंधकाले.

तिर्यग्गतिप्रायोग्यप्रकृतिबन्ध एव बन्धात्, जिननाम्न आहारकद्विकस्य च सम्यक्त्वे संयमे च निजबन्धहेतौ विद्यमानेऽपि कदाचिदेव बन्धात्, शेषाणां च औदारिकद्विकादीनां सविपक्षत्वादेव। यद्यपि यत्किञ्चिद्बन्धहेतुसत्त्वे बन्धाभावोऽतिप्रसक्तो, यावद्बन्धहेतुसत्त्वे बन्धाभावश्चासंभवी, तथापि मिथ्यात्वादिपरिगणितसामान्यबन्धहेतुसत्त्वेऽवश्यं बन्धेन ध्रुवबन्धित्वं वैपरीत्ये चाध्रुवबन्धित्वमिति परिभाषारहस्यं।

उदयकालव्यवच्छेदादर्वाग्ध्रुवो निरन्तर उदयो यासां ता ध्रुवोदयास्ताश्च निर्माणस्थिरास्थिरतैजसकार्मणवर्णादिचतुष्कागुरुलघुशुभाशुभरूपा नामकर्मणो द्वादश, ज्ञानावरणान्तरायदशकं दर्शनावरणचतुष्टयं मिथ्यात्वं चेति घातिप्रकृतयः पञ्चदशेति सर्वसङ्ख्यया सप्तविंशतिः। तत्र मिथ्यात्वं मिथ्यादृष्टिगुणस्थानं यावत् ध्रुवोदयं, शेषा घातिप्रकृतयः क्षीणमोहचरमसमयं यावत्, नामप्रकृतयश्च द्वादश सयोगिकेवलिचरमसमयं यावत्।

व्यवच्छिन्नोदया अपि सत्यो याः प्रकृतयो हेतुसंपत्त्या भूयोऽप्युदयमायान्ति ता अध्रुवोदयाः, ताश्च स्थिरास्थिरशुभाशुभरहिता अध्रुवबन्धिन्यः ६९, मिथ्यात्वं विना च मोहनीयध्रुवबन्धिन्यः १९, निद्राः ५ उपघातनाम मिश्रं सम्यक्त्वं चेति पञ्चनवतिः। नन्वेवं मिथ्यात्वमपि किं नाध्रुवोदयं ?, सम्यक्त्वलाभे व्युच्छिन्नस्यापि तदुदयस्य मिथ्यात्वगमने पुनः संभवात्, उच्यते—यासां प्रकृतीनां गुणप्रत्ययादुदयव्युच्छेदो येषु गुणस्थानेषु नास्ति, द्रव्यक्षेत्राद्यपेक्षया तेष्वेव कदाचिदसौ भवति कदाचिच्च न ता अध्रुवोदयाः, यथा क्षीणमोहं यावदविच्छिन्नोदया अपि निद्राः कादाचित्कोदयाः, मिथ्यात्वं तु स्वोदयाविच्छेदं यावत्सततोदयमेवेति नाध्रुवोदयं। नन्वेवं मिश्रमपि मिश्रगुणस्थाने सततोदयमिति ध्रुवोदयं स्यात्, न,

गुणप्रत्ययोदयविच्छेदात् प्रागुदयभावाभावाभ्यां तस्याध्रुवोदयत्वपरिभाषणात् । यद्येकगुणस्थानावच्छेदेनोदयभावाभावप्रतियोगित्वमध्रुवोदयत्वं परिभाष्येत तदैव हि स दोषः स्यात् ।

विशिष्टगुणप्राप्तिं विना ध्रुवा निरन्तरा सत्ता यासां ता ध्रुवसत्ताकाः, ताश्च त्रसविंशतिर्वर्णादिविंशतिस्तैजसकार्मणतैजसतैजसबन्धनतैजसकार्मणबन्धनकार्मणकार्मणबन्धनतैजससंघातनकार्मणसंघातनरूपं तैजसकार्मणसप्तकं वर्णचतुष्कतैजसकार्मणानामुक्तत्वाच्चेषा एकचत्वारिंशद्ध्रुवबन्धिन्यः । वेदत्रिकं संस्थानषट्कं संहननषट्कं जातिपञ्चकं सातासातवेदनीयं हास्यरत्यरतिशोकरूपं युगलद्वयं औदारिकाङ्गौदारिकाङ्गोपाङ्गौदारिकसङ्घातनौदारिकौदारिकबन्धनौदारिककार्मणबन्धनौदारिकतैजसकार्मणबन्धनरूपमौदारिकसप्तकं उच्छ्वासोद्योतातपपराघातचतुष्कं विहायोगतिद्विकं तिर्यग्द्विकं नीचैर्गोत्रं चेति त्रिंशं शतं । एता हि सम्यक्त्वलाभादर्वाक् सर्वजन्तूनां सदैव संभवन्तीति ।

कदाचिद्भवन्ति कदाचिन्न भवन्तीत्येवमनियता सत्ता यासां ता अध्रुवसत्ताकाः, ताश्च उच्चैर्गोत्रं तीर्थकरनाम सम्यक्त्वं सम्यग्मिथ्यात्वं देवगतिदेवानुपूर्वीनरकगतिनरकानुपूर्वीवैक्रियशरीरवैक्रियाङ्गोपाङ्गलक्षणं वैक्रियषट्कं चत्वार्यायूंषि मनुजगतिमनुष्यानुपूर्वीलक्षणं मनुजद्विकं आहारकशरीराहारकाङ्गोपाङ्गलक्षणमाहारकद्विकं चेत्यष्टादश । तथाहि—उच्चैर्गोत्रं वैक्रियषट्कं चेत्येताः सप्त त्रसत्वाप्राप्तौ न भवन्ति, तत्प्राप्तौ च भवन्ति । यदा त्रसत्वावस्थायां लब्धा अपि स्थावरभावं गतेनावस्थाविशेषं प्राप्योद्वल्यन्त इत्यध्रुवसत्ताकाः । सम्यक्त्वं सम्यग्मिथ्यात्वं च यावत्तथाभव्यत्वपरिपाकं नायाति तावन्न भवति, तथाभव्यत्वपरिपाकेन प्राप्तं वा सन्मिथ्यात्वगतेन भूयोऽप्युद्वल्यते, अभव्यानां च तत्सर्वथा न भवतीत्य-

ध्रुवसत्ताकं । तीर्थकरनाम विशुद्ध (क्षे) सम्यक्त्वे सति भवति, नान्यदा । आहारकद्विकमपि तथाविधसंयमे सति बन्धमायाति, न तदभावे, बद्धमपि च तदविरतिप्रत्ययत उद्वल्यते। मनुष्यद्विकमपि तेजोभवं वायुभवं वा गतेनोद्वल्यते। तथा देवनारकायुषी स्थावराणां तिर्यगायुष्कं त्वहमिन्द्राणां मनुष्यायुष्कं च तेजोवायुसप्तमपृथिवीनारकाणां सर्वथा बन्धाभावात्सत्तायां न लभ्यते, अन्येषां तु संभवत्यपीति तीर्थकरनामादीनामध्रुवसत्ताकता । नन्वेता आयुश्चतुष्टयतीर्थकरनामवर्जा अनन्तानुबन्धिसहिताः सप्तदश श्रेण्यारोहाभावेऽप्युद्वलनयोग्या अभिहिताः, तथा चानन्तानुबन्धिनामप्युद्वलनासंभवात्कथं ध्रुवसत्कर्मतेति चेन्मैवं वादीः,सम्यक्त्वादिगुणानवाप्तौ कदाचिद्भावित्वस्यैवाध्रुवसत्कर्मलक्षणत्वाद्[1], उत्तरगुणप्राप्तौ सत्तोपरमादध्रुवसत्ताकत्वोक्तौ तु सर्वा अपि प्रकृतयस्तथा भवेयुरित्युक्तलक्षणस्यैव युक्तत्वात् सम्यक्त्वगुणेनोद्वल्यमानानामप्यनन्तानुबन्धिनां तदनवाप्तौ कादाचित्कत्वाद्भावेनध्रुवसत्ताकत्वानपायात्[2] ।

स्वविषयं कात्स्न्र्येन घ्नन्ति यास्ताः सर्वघातिन्यः, ताश्च केवलज्ञानावरणं केवलदर्शनावरणमाद्यद्वादशकषाया मिथ्यात्वं निद्राश्च पञ्चेति विंशतिः । एता हि प्रकृतयो यथायोगमात्मघात्यं गुणं सम्यक्त्वं ज्ञानं दर्शनं चारित्रं वा सर्वात्मना घातयन्तीति । उक्तशेषा घातिकर्मप्रकृतयः पञ्चविंशतिर्देशघातिन्यः, तासां ज्ञानादिगुणैकदेशविघातित्वात् । इयमत्र भावना— इह यद्यपि केवलज्ञानावरणीयं कर्म ज्ञानलक्षणं गुणं सर्वात्मना हन्तुं प्रवर्त्तते तथापि न तत्तेन समूलं हन्तुं शक्यते तथास्वभावत्वात्, यथा महीयसापि घनपटलेन रविचन्द्रकिरणावरणप्रवृत्तेनापि तत्प्रभा, अन्यथा दिनरजनीविभागानुभवा-

१ संबंधित्वं. २ सम्यक्त्वानवाप्तौ. ३ अनपगमात् .

नुपपत्तेः, ततः केवलज्ञानावरणीयेनावृतेऽपि सर्वात्मना केवलज्ञाने यः कोऽपि तत्रतमन्दविशिष्टविशिष्टतरप्रकाशरूपो ज्ञानैकदेशो मतिज्ञानादिसंज्ञितस्तं यथायोगं मतिश्रुतावधिमनःपर्यायज्ञानावरणानि घ्नन्ति, ततस्तानि देशघातीनि। एवं केवलदर्शनावरणीयेनावृतेऽपि सर्वात्मना केवलदर्शने या तत्रता मन्दमन्दतमविशिष्टादिरूपा प्रज्ञा चक्षुर्दर्शनादिसंज्ञा तां यथायोगं चक्षुरचक्षुरवधिदर्शनावरणान्यावृण्वन्ति, ततस्तान्यपि दर्शनैकदेशघातित्वाद्देशघातीनि। निद्रादयश्च पञ्च प्रकृतयो यद्यपि केवलदर्शनावरणावृतकेवलदर्शनगतप्रज्ञामात्रं दर्शनैकदेशमुपघ्नन्ति, तथापि ताश्चक्षुर्दर्शनावरणादिकर्मक्षयोपशमसमुत्थां दर्शनलब्धिं समूलकाषं कषन्तीति सर्वघातिन्य उक्ताः। संज्वलनकषाया नोकषायाश्चाद्यद्वादशकषायक्षयोपशमसमुत्थां चारित्रलब्धिं देशतो घ्नन्ति, तेषामतीचारमात्रसंपादनार्थत्वात्। उक्तं च—"सव्वेऽविय अइआरा संजलणाणं तु उदयउ हुंति। मूलच्छेज्जं पुण होइ बारसण्हं कसायाणं ॥ १ ॥" तथा—"घाइखउवसमेणं सम्मचरित्ताइं जाइं जीवस्स। ताणं हणंति देसं संजलणा णोकसाया य ॥ १ ॥" ततस्तेऽपि देशघातिनः। तथा इह यत्तु जीवो ग्रहणधारणादियोग्यं न ददाति न लभते न भुङ्क्ते नोपभुंक्ते न करोति वा तद्दानान्तरायादिविषयः। तच्च सर्वद्रव्याणामनन्ततमो भागः, ततस्तथारूपसर्वद्रव्यैकदेशविषयदानादिविघातकारित्वाद्देशघाति दानान्तरायादीति। इह च देशघातिलक्षणं सर्वघात्यन्यत्वगर्भं द्रष्टव्यं, तेन न चारित्रैकदेशरूपदेशविरतिप्रतिबन्धकानामप्रत्याख्यानानां देशघातित्वं। यद्वा चारित्रापेक्षया देशघातित्वं चारित्रगतापकर्षजनकत्वमेव, तच्च नाप्रत्याख्यानानामित्यदोषः। तदेवं घातिकर्मप्रकृतयः काश्चित्सर्वघातिन्यः काश्चिच्च देशघातिन्य इति स्थितं।

नामगोत्रवेदनीयायुरन्तर्गतास्तु प्रकृतयो हन्तव्याज्ञावान्न किमपि घ्नन्तीति ता अघातिन्यो ज्ञष्टव्याः । सर्वघातिनीनां हि रसस्ताम्रज्ञाजनवन्निश्चिज्ञो घृतवदतिस्निग्धो ज्ञाद्दावत्तनुप्रदेशोपचितः स्फटिकाज्ञवच्चातीव निर्मलः सकलस्वविषयघातित्वेन सर्वघाती ज्ञवति । देशघातिनीनां तु रसः कश्चिद्दंशदलनिर्मापितकटवदतिस्थूलश्चिज्ञशतसंकुलः, कश्चित्कम्बलवन्मध्यमविवरशतसंकुलः, कोऽपि मसृणवासोवदतिसूक्ष्मविवरसंवृतोऽल्पस्नेहो विमलश्च स्वविषयैकदेशघातित्वाद्देशघाती ज्ञवति । अघातिनीनां च ज्ञन्नयविलक्षणत्वादघाती रसः । केवलघातिनीनामपि प्रकृतीनां घातिप्रकृतिसंपर्कतस्तज्ञविपाकोपदर्शकत्वं ज्ञवति, स्वयमचौराणामपि चौरसंपर्कत इव चौरत्वं ।

याः प्रकृतयः प्रकृत्यन्तरस्य बन्धमुदयं वा विनिवार्य बन्धमुदयं वाऽऽगच्छन्ति ताः परावर्त्तमानाः, इतरा अपरावर्त्तमानाः । तत्र ज्ञानावरणपञ्चकमन्तरायपञ्चकं दर्शनावरणचतुष्टयं पराघाततीर्थकरोच्छ्वासमिथ्यात्वज्ञयजुगुप्सानामध्रुवबन्धिनवकं चेत्येकोनत्रिंशत्प्रकृतयो बन्धमुदयं चाश्रित्यापरावर्त्तमानाः । आसां बन्धस्योदयस्य वा शेषप्रकृतिज्ञिर्बध्यमानाज्ञिर्वेद्यमानाज्ञिर्वा हन्तुमशक्यत्वात् । शेषा बन्धमधिकृत्यैकनवतिसङ्ख्याः ज्ञदयमधिकृत्य च ता एव सम्यक्त्वसम्यग्मिथ्यात्वसहितास्त्रिनवतिः परावर्त्तमानाः ।

जीवप्रमोदहेतुरसोपेताः प्रकृतयः शुज्ञाः । नास्ति शुज्ञो रसो यासु ता अशुज्ञाः । तत्र मनुजत्रिकं देवत्रिकं तिर्यगायुरुच्छ्वासनाम शरीरपञ्चकमङ्गोपाङ्गत्रयं शुज्ञविहायोगतिः शुज्ञं वर्णादिचतुष्कं त्रसाददशकं तीर्थकरनाम निर्माणं आद्यसंस्थानसंहनने आतपनाम पराघातनाम पञ्चेन्द्रियजातिरगुरुलघु सातवेदनीयमुच्चैर्गोत्रमुद्योतनाम चेत्येता द्विचत्वारिंश-

त्प्रकृतयः शुभाः शेषाश्च द्व्यशीतिप्रकृतयोऽशुभाः । वर्णादिचतुष्कं हि शुभप्रकृतिसङ्ख्यायामशुभप्रकृतिसङ्ख्यायां च परिगृह्यते, तस्य द्विधा संभवादिति, शेषा द्व्यशीतिरशुभाः संभवन्ति । सम्यक्त्वसम्यग्मिथ्यात्वे तूदयमाश्रित्यैवाशुभे, न बन्धमाश्रित्य, तद्बन्धासंभवादिति ते पृथक्कृते ।

पुद्गले पुद्गलविषये विपाकः फलदानाभिमुख्यं यासां ताः पुद्गलविपाकिन्यः, ताश्च षट्त्रिंशत्, तद्यथा—आतपनाम उद्योतनाम संस्थानषट्कं संहननषट्कं द्वादश नामध्रुवोदयप्रकृतयः त्रीण्यादेयशरीराणि त्रीण्यङ्गोपाङ्गानि उपघातं पराघातं प्रत्येकं साधारणमिति । एता हि स्वविपाकं पुद्गलेषु दर्शयन्ति तथास्पष्टलक्षणत्वादतः पुद्गलविपाकिन्यः । ननु रत्यरत्योरप्युदयः पुद्गलान् संप्राप्य भवति । तथाहि—कण्टकादिस्पर्शादरतेर्विपाकोदयः, स्रक्चन्दनादिसंस्पर्शात्तु रतेः, ततस्ते अपि पुद्गलविपाकिन्यौ किं नोक्ते ? इति चेन्मैवं, कण्टकादिस्पर्शव्यतिरेकेऽपि प्रियाप्रियदर्शनस्मरणादिना रत्यरत्योर्विपाकोदयदर्शनेन पुद्गलव्यभिचारात्तयोः पुद्गलविपाकित्वासिद्धेः । एवं क्रोधादावपि प्रश्नसमाधाने भावनीये ।

भवे नारकादिरूपे स्वयोग्ये विपाकः फलदानाभिमुख्यं यासां ता भवविपाकिन्यः, ताश्चायुश्चतुष्टयप्रकृतयः, तथाहि—बद्धमप्यायुर्यावन्नाद्यापि पूर्वभवक्षयेण स्वयोग्यो भवः प्राप्तो भवति तावन्नोदयमायाति, ततो भवविपाकीति । नन्वायूंषीव गतयोऽपि स्वयोग्यभवप्राप्तावेवोदयमागच्छन्तीति ता अपि कथं न भवविपाका व्यपदिश्यन्ते ? सत्यं, आयुषां परभवे संक्रमेणाप्युदयो नास्तीति सर्वथा स्वभवव्यभिचाराभावादायूंषि भवविपाकानि व्यपदिश्यन्ते, गतीनां पुनः परभवेऽपि संक्रमेणोदयोऽस्ति, ततस्ताः स्वभवव्यभिचारान्न भवविपाकिन्यः ।

क्षेत्रे गत्यन्तरसंक्रमणहेतुनभःपथे विपाकः फलदानाभिमुख्यं यासां ताः क्षेत्रविपाकिन्यः, ताश्च नरकानुपूर्व्याद्याश्चतस्र आनुपूर्व्यः । एता हि पूर्वस्या गतेरुद्धृत्य गत्यन्तरे संक्रामतोऽपान्तराले उदयमायान्ति, न शेषकाले । यद्यपि स्वयोग्यक्षेत्रव्यतिरेकेणान्यत्राप्यासां संक्रमोदयः संभवति तथापि यथाऽऽसां क्षेत्रहेतुकः स्वविपाकोदयप्राकुर्भावस्तथा नान्यासामिति प्रकृत्यन्तरासंस्पर्शिनाऽसाधारणक्षेत्रहेतुकत्वेनासां क्षेत्रविपाकिनीत्वव्यपदेशः ।

जीवे जीवगते ज्ञानादिलक्षणे स्वरूपे विपाकस्तदनुग्रहोपघातादिसंपादनाभिमुख्यलक्षणो यासां ता जीवविपाकिन्यः, ताश्चेमाः—ज्ञानावरणपञ्चकं दर्शनावरणनवकं सातासातवेदनीये सम्यक्त्वसम्यग्मिथ्यात्ववर्जाः षड्विंशतिर्मोहनीयप्रकृतयः अन्तरायपञ्चकं गतिचतुष्टयं जातिपञ्चकं विहायोगतिद्विकं त्रसत्रिकं स्थावरत्रिकं सुस्वरदुःस्वरसुभगदुर्भगादेयानादेययशःकीर्त्ययशःकीर्त्तितीर्थकरनामोच्छ्वासनामानि नीचैर्गोत्रं उच्चैर्गोत्रं चेति षट्सप्ततिर्बन्धयोग्या उद्दिश्य पञ्चसङ्ग्रहे उक्ताः । अन्यत्र तूदययोग्या अधिकृत्य सम्यक्त्वसम्यग्मिथ्यात्वयोरपि ग्रहादष्टसप्ततिः । एता हि जीव एव स्वविपाकमादर्शयन्ति नान्यत्र । तथाहि—ज्ञानावरणपञ्चकं जीवस्य ज्ञानगुणमुपहन्ति । दर्शनावरणनवकं दर्शनगुणं, मिथ्यात्वमोहनीयं सम्यक्त्वगुणं, चारित्रमोहनीयप्रकृतयश्चारित्रगुणं, दानान्तरायादयो दानादिलब्धीः, सातासातवेदनीये सुखदुःखे जनयतः, गतिचतुष्टयादिकास्तु गत्यादिपर्याया इति । ननु भवविपाकादयोऽपि तत्त्वतो जीवविपाका एव, यत आयूंषि स्वयोग्यभवे विपाकं दर्शयन्ति, तद्भवधारणलक्षणं, तच्च जीवस्यैव, न तद्व्यतिरिक्तस्य । आनुपूर्व्योऽपि क्षेत्रे विपाकं दर्शयन्त्यो जीवस्यानुश्रेणिगमनविषयं स्वभावमादधति । पुद्गलविपाकिन्योऽप्यातपसंस्थाननामाद्या उदयप्राप्तास्तथारूपां जीवस्य

शक्तिं जनयन्ति, यया स जीवस्तथारूपानेव पुद्गलान् गृह्णाति, गृहीतानां च रचनाविशेषं करोति, ततो जीवविपाका एव सर्वाः। सत्यमेतत् केवलं भवादिप्राधान्यविवक्षया भवविपाकादन्यत्वेन जीवविपाकत्वं परिभाष्यत इति।

विपाकमाश्रित्यायमन्योऽप्यस्त्यनुयोगः, तद्यथाहि—द्विविधा विपाकतः प्रकृतयो–हेतुविपाका रसविपाकाश्च। तत्र हेतुमधिकृत्य विपाको निर्दिश्यमानो यासां ता हेतुविपाकाः, ताश्च पुद्गलक्षेत्रभवजीवहेतुभेदाच्चतुर्विधाः प्रागेवोक्ताः। रसं मुख्यीकृत्य विपाको निर्दिश्यमानो यासां ता रसविपाकाः, ताश्चतुर्धा–एकस्थानकरसा द्विस्थानकरसास्त्रिस्थानकरसाश्चतुःस्थानकरसाश्चेति। तत्र रसः शुभप्रकृतीनां क्षीरखण्डादिरसोपमोऽशुभप्रकृतीनां तु निम्बघोषातक्यादिरसोपमः स्वाभाविक एकस्थानक उच्यते। द्वयोः कर्षयोरावर्त्तितयोर्य एकः कर्षोऽवशिष्यते तदुपमो द्विस्थानकः। त्रयाणां कर्षाणामावर्त्तितानां य एकः कर्षोऽवशिष्यते तदुपमस्त्रिस्थानकः। चतुर्णां कर्षाणामावर्त्तने कृते सत्युद्धरितैककर्षोपमश्चतुःस्थानकः। एकस्थानकादिरसा द्विस्थानकादिरसा इह यथोत्तरमनन्तगुणा द्रष्टव्याः। अत्र च मतिश्रुतावधिमनःपर्यायज्ञानावरणानि चक्षुरचक्षुरवधिदर्शनावरणानि पुरुषवेदश्चत्वारः संज्वलनाः पञ्चविधमन्तरायं चेति सप्तदश प्रकृतय एकद्वित्रिचतुःस्थानकपरिणताः प्राप्यन्ते बन्धमधिकृत्य। तत्र यावन्न श्रेणिप्रतिपत्तिस्तावदासां सप्तदशप्रकृतीनां यथाध्यवसायं द्विस्थानकस्य त्रिस्थानकस्य चतुःस्थानकस्य वा रसस्य बन्धः। श्रेणिप्रतिपत्तौ त्वनिवृत्तिबादराद्धायाः सङ्ख्येयेषु भागेषु गतेषु तदनन्तरमेतासामशुभत्वादत्यन्तविशुद्ध्याध्यवसाययोगेनैकस्थानकस्यैव रसस्य बन्ध इत्येता बन्धमधिकृत्य चतुःस्थानपरिणताः प्राप्यन्ते। शेषास्तु शुभा अशुभा वा द्विस्थानकरसास्त्रिस्थानकरसाश्चतुःस्थानकरसाश्च प्राप्यन्ते, न तु कदाचनाप्येकस्थान-

करसाः । यत उक्तसप्तदशव्यतिरिक्तानां हास्याद्यानामशुभप्रकृतीनामेकस्थानकरसबन्धयोग्या शुद्धिरपूर्वकरणप्रमत्ताप्रमत्तानां न भवत्येव,. यदा त्वेकस्थानकरसबन्धयोग्या परमप्रकर्षप्राप्ता शुद्धिरनिवृत्तिबादराद्धायाः सङ्ख्येयेभ्यो भागेभ्यः परतो जायते तदा बन्धमेव न ता आयान्तीति न तासामेकस्थानको रसः । न च यथा श्रेण्यारोहेऽनिवृत्तिबादराद्धायाः सङ्ख्येयेषु भागेषु गतेषु परतोऽतिविशुद्धत्वान्मतिज्ञानावरणादीनामेकस्थानकरसबन्धस्तथा क्षपकश्रेण्यारोहे सूक्ष्मसंपरायस्य चरमद्विचरमादिसमयेषु वर्त्तमानस्यातीव विशुद्धत्वात्केवलद्विकस्य संभवद्बन्धस्यैकस्थानकरसबन्धसंभवः कथं न भवतीति शङ्कनीयं, स्वरूपस्यापि केवलद्विकरसस्य सर्वघातित्वात्, सर्वघातिनां च जघन्यपदेऽपि द्विस्थानकरसस्यैव संभवात् । शुभानामपि प्रकृतीनां मिथ्यादृष्टिः संक्लिष्टो नैकस्थानकरसं बध्नाति,मनागविशुध्यमान एव तद्बन्धसंभवाद् , अतिसंक्लिष्टे मिथ्यादृष्टौ तद्बन्धासंभवात्, संक्लेशोत्कर्षे च शुभप्रकृतीनामेकस्थानकरसबन्धसंभावनानवकाशात् । यास्त्वतिसंक्लिष्टेऽपि मिथ्यादृष्टौ नरकगतिप्रायोग्या वैक्रियतैजसाद्याः शुभप्रकृतयो बन्धमायान्ति, तासामपि तथास्वाभाव्यात् जघन्यतोऽपि द्विस्थानक एव रसो बन्धमायाति, नैकस्थानक इति । ननूत्कृष्टस्थितिमात्रं संक्लेशोत्कर्षेण भवति, ततो यैरेवाध्यवसायैः शुभप्रकृतीनामुत्कृष्टा स्थितिर्भवति तैरेवैकस्थानकोऽपि रसः किं न स्यादिति चेत् शृणु—इह हि प्रथमस्थितेरारभ्य समयवृद्ध्याऽसङ्ख्येयाः स्थितिविशेषा भवन्ति, एकैकस्यां च स्थितावसङ्ख्येया रसस्पर्द्धकसङ्घातविशेषाः, तत उत्कृष्टस्थितौ बध्यमानायां प्रतिस्थितिविशेषमसङ्ख्येया ये रसस्पर्द्धकसङ्घातविशेषास्ते तावन्तो द्विस्थानकरसस्यैव घटन्ते, नैकस्थानकस्येति न शुभप्रकृतीनामुत्कृष्टस्थितिबन्धेऽप्येकस्थानकरसबन्धः । उक्तं च—"उक्कोसठिईअज्झवसाणेहिं एगठाणिउ होही । सुनि-

याण तं न जं ठिइ असङ्खगुणियाउं अणुभागा ॥ १ ॥" अत्र सर्वघातिनीनां देशघातिनीनां वा प्रकृतीनां यानि चतुःस्थानकरसानि त्रिस्थानकरसानि वा स्पर्द्धकानि तानि नियमतः सर्वघातीनि भवन्ति । द्विस्थानकरसानि तु सर्वघातिनीनां सर्वघातीन्येव, देशघातिनीनां तु कानिचित्सर्वघातीनि कानिचिद्देशघातीनीत्येवं मिश्राणि । एकस्थानकरसानि च देशघातिनीनामेव भवन्ति, तानि च देशघातीन्येव । अत्र च देशघातिनामवधिज्ञानावरणादीनां सर्वघातिरसस्पर्धकेषु विशुद्ध्याध्यवसायतो देशघातिरूपतया परिणमनेन निहतेषु देशघातिरसस्पर्द्धकेषु चातिस्निग्धेष्वल्परसीकृतेषु तदन्तर्गतकतिपयरसस्पर्द्धकभागस्योदयावलिकाप्रविष्टस्य क्षये शेषस्य च विपाकोदयविष्कम्भलक्षणे उपशमे जीवस्यावधिमनःपर्यायज्ञानचक्षुर्दर्शनादयो गुणाः क्षायोपशमिकाः प्रादुर्भवन्ति, तदाऽवधिज्ञानावरणादीनां कतिपयदेशघातिरसस्पर्द्धकक्षयोपशमात्कतिपयदेशघातिरसस्पर्द्धकानां चोदयात् क्षयोपशमानुविद्ध औदयिको भावः प्रवर्त्तते । यदा चावधिज्ञानावरणादीनां सर्वघातीनि रसस्पर्धकानि विपाकोदयमागतानि भवन्ति तदा तद्विषय औदयिको भावः केवलः प्रवर्त्तते । मतिश्रुतावरणाचक्षुर्दर्शनावरणान्तरायप्रकृतीनां तु सदैव देशघातिनामेव रसस्पर्द्धकानामुदयो न सर्वघातिनां, ततः सर्वदैव तासामौदयिकक्षायोपशमिकौ भावौ संमिश्रौ प्राप्येते, न केवल औदयिकः । तदेवं ज्ञानावरणदर्शनावरणान्तरायाणामुदयेऽपि क्षयोपशमोऽविरुद्ध इति स्थितम् । मोहनीयस्य तु अनन्तानुबन्ध्यादिप्रकृतीनां प्रदेशोदये क्षायोपशमिको भावोऽविरुद्धो न विपाकोदये, यतोऽनन्तानुबन्ध्यादिप्रकृतयः सर्वघातिन्यः, सर्वघातिनीनां च रसस्पर्द्धकानि सर्वाण्यपि सर्वघातीन्येवेति तेषां विपाकोदये न क्षयोपशमसंभवः, किं तु प्रदेशोदये । न च सर्वघातिरसस्पर्द्धकप्रदेशा अपि सर्व-

स्वघात्यगुणघातनस्वभावा इति तत्प्रदेशोदयेऽपि कथं क्षायोपशमिकभावसंभव इति वाच्यं, तेषां सर्वघातिरसस्पर्द्धकप्रदेशानामध्यवसायविशेषेण मनागमन्दानुभावीकृतविरलवेद्यमानदेशघातिरसस्पर्द्धकेष्वन्तःप्रवेशितानां यथास्थितस्वबलप्रकटनासमर्थत्वात्। मिथ्यात्वाद्यष्टादशकषायरहितानां शेषमोहनीयप्रकृतीनां तु प्रदेशोदये विपाकोदये वा क्षयोपशमोऽविरुद्धस्तासां देशघातित्वात्, परं ताः प्रकृतयोऽध्रुवोदया इति तद्विपाकोदयाभावे क्षायोपशमिकभावे विजृम्भमाणे प्रदेशोदयवत्योऽपि ता न मनागपि देशविघातिन्यः। विपाकोदये तु प्रवर्त्तमाने क्षायोपशमिकभावसंभवे मनाग्मात्रिन्यमात्रकारित्वाद्देशघातिन्यो भवन्तीति कृतं प्रसङ्गेन।

स्वस्यानुदय एव बन्धो यासां ताः स्वानुदयबन्धिन्यस्ताश्च देवायुर्नरकायुर्देवगतिर्देवानुपूर्वी नरकगतिर्नरकानुपूर्वी वैक्रियशरीरं वैक्रियाङ्गोपाङ्गं आहारकद्विकं जिननाम चेत्येकादश। तथाहि—देवगतित्रिकस्य देवगतावुदयः, नरकत्रिकस्य नरकगतौ, वैक्रियद्विकस्योभयत्र। न च देवा नारका वा एताः प्रकृतीर्बध्नन्ति, तथा भवस्वाभाव्यात्, तीर्थकरनामापि केवलज्ञानप्राप्तावुदययोग्यं, न च तदा तद्बन्धोऽपूर्वकरण एव तद्बन्धव्यवच्छेदात्। आहारककरणकाले लब्ध्युपजीवनप्रमादात्, तदुत्तरकालं च मन्दसंयमस्थानवर्त्तित्वान्नाहारकद्विकोदये तद्बन्ध इत्येताः सर्वा अपि स्वानुदयबन्धिन्यः। स्वोदय एव बन्धो यासां ताः स्वोदयबन्धिन्यः, ताश्च ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकमिथ्यात्वनिर्माणतैजसकार्मणस्थिरास्थिरवर्णादिचतुष्कागुरुलघुशुभाशुभलक्षणाः, सप्तविंशतिर्ध्रुवोदयतया तासां सर्वदोदयभावात्। उभयस्मिन्नुदयेऽनुदये वा बन्धो यासां ता उभयबन्धिन्यः, ताश्च निद्रापञ्चकजातिपञ्चकसंस्थानषट्कसंहननषट्क-

कषायषोडशकनोकषायनवकपराघातोपघातातपोद्योतोच्छ्वाससातासातवेदनीयोच्चनीचैर्गोत्रमनुष्यत्रिकतिर्यक्त्रिकौदारिकद्वि-कप्रशस्ताप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थावरसूक्ष्मापर्याप्तसाधारणसुस्वरसुभगादेययशःकीर्त्तिदुःस्वरदुर्भगानादे-यायशःकीर्त्तिरूपा ह्यशीतिः, एतासां तिरश्चां मनुष्याणां वा यथायोगमुदयेऽनुदये वा बन्धसंभवात् ।

समकमेककालं व्यवच्छिद्यमानौ बन्धोदयौ यासां ताः समकव्यवच्छिद्यमानबन्धोदयाः, ताश्च संज्वलनलोभहीनपञ्च-दशकषायमिथ्यात्वभयजुगुप्साहास्यरतिमनुजानुपूर्वीसूक्ष्मत्रिकातपपुरुषवेदलक्षणाः षड्विंशतिः, तथाहि—सूक्ष्मत्रिकातपमि-थ्यात्वानां मिथ्यादृष्टौ, अनन्तानुबन्धिनां सासादने, मनुष्यानुपूर्वीद्वितीयकषायाणामविरते, प्रत्याख्यानावरणानां देश-विरते, हास्यरतिभयजुगुप्सानामपूर्वकरणे, संज्वलनत्रिकपुंवेदयोरनिवृत्तिबादरे बन्धोदयौ समकमेव व्यवच्छिद्येते । तत एताः समकव्यवच्छिद्यमानबन्धोदयाः । क्रमेण पूर्वं बन्धः पश्चादुदय इत्येवंरूपेण व्यवच्छिद्यमानौ बन्धोदयौ यासां ताः क्रमव्यवच्छिद्यमानबन्धोदयाः, ताश्चोक्तवदग्रेऽभिधास्यमानाव्यतिरिक्ताः षण्णवतिः, तथाहि—ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शना-वरणचतुष्टयानां सूक्ष्मसंपरायचरमसमये बन्धव्यवच्छेदः, उदयव्यवच्छेदः क्षीणकषायचरमसमये । निद्राप्रचलयोर्बन्धव्य-वच्छेदोऽपूर्वकरणप्रथमभागे, उदयव्यवच्छेदः क्षीणकषायद्विचरमसमये । असातवेदनीयस्य प्रमत्ते सातवेदनीयस्य सयो-गिचरमसमये बन्धव्यवच्छेदः, उदयव्यवच्छेदः पुनरुभयोरपि सयोगिकेवलिचरमसमयेऽयोगिचरमसमये वा । तथा चरम-संस्थानस्य मिथ्यादृष्टौ मध्यमसंस्थानचतुष्टयाप्रशस्तविहायोगतिदुःस्वरनाम्नां सासादने, औदारिकद्विकप्रथमसंहननयो-रविरते, अस्थिराशुभयोः प्रमत्ते, तैजसकार्मणसमचतुरस्रवर्णादिचतुष्कागुरुलघुचतुष्टयप्रत्येकस्थिरशुभसुस्वरनिर्माणाना-

मपूर्वकरणषष्ठभागे बन्धव्यवच्छेदः, उदयव्यवच्छेदः पुनरासामष्टाविंशतिसङ्ख्यानां सयोगिचरमसमये । तथा मनुजत्रिकस्य बन्धव्यवच्छेदोऽविरते, पञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेयतीर्थकरनाम्नामपूर्वकरणषष्ठांशे, यशःकीर्त्युच्चैर्गोत्रयोः सूक्ष्मसंपरायचरमसमये, उदयव्यवच्छेदः पुनरासां द्वादशानामप्ययोगिचरमसमये । तथा स्थावरैकद्वित्रिचतुरिन्द्रियजातीनां नरकत्रिकस्यान्त्यसंहननस्य नपुंसकवेदस्य च मिथ्यादृष्टौ बन्धव्यवच्छेदः, उदयव्यवच्छेदः पुनर्यथाक्रमं सासादनेऽविरतेऽप्रमत्तेऽनिवृत्तिबादरे च । तथा स्त्रीवेदस्य सासादने बंधव्यवच्छेदः, उदयव्यवच्छेदः पुनः अनिवृत्तिबादरे । तथा तिर्यगानुपूर्वीदुर्भगानादेयानां तिर्यग्गतितिर्यगायुरुद्योतनीचैर्गोत्राणां स्त्यानर्धित्रिकस्य तुर्यपञ्चमसंहननयोर्द्वितीयतृतीयसंहननयोश्च बन्धव्यवच्छेदः सासादने, उदयव्यवच्छेदः पुनर्यथासङ्ख्यमविरते देशविरते प्रमत्तेऽप्रमत्ते उपशान्तमोहे च । तथाऽरतिशोकयोर्बन्धव्यवच्छेदः प्रमत्ते, उदयव्यवच्छेदोऽपूर्वकरणे । संज्वलनलोभस्य बन्धव्यवच्छेदोऽनिवृत्तिबादरचरमसमये, उदयव्यवच्छेदः सूक्ष्मसंपरायान्त्यसमये । तत एताः षडशीतिः प्रकृतयः क्रमव्यवच्छिद्यमानबन्धोदयाः । पूर्वमुदयः पश्चाद्बन्ध इत्येवमुत्क्रमेण व्यवच्छिद्यमानौ बन्धोदयौ यासां ता उत्क्रमव्यवच्छिद्यमानबन्धोदयाः, ताश्चायशःकीर्त्तिसुरत्रिकवैक्रियद्विकाहारकद्विकरूपा अष्टौ, येनायशःकीर्त्तेः प्रमत्ते, देवायुषोऽप्रमत्ते, देवद्विकवैक्रियद्विकयोरपूर्वकरणे बन्धव्यवच्छेदः, उदयव्यवच्छेदस्तु षण्णामप्यविरते । आहारकद्विकस्य पुनरपूर्वकरणे बन्धस्योदयस्य चाप्रमत्तसंयते व्यवच्छेद इति ।

यासां प्रकृतीनां जघन्यतः समयमात्रं बन्धः, उत्कर्षतः समयादारभ्य यावदन्तर्मुहूर्त्तं, न परतः, ताः सान्तरबन्धाः, अन्तर्मुहूर्त्तमध्येऽपि सान्तरो विच्छेदलक्षणान्तरसहितो बन्धो यासां ताः सान्तरा इति व्युत्पत्तेः । अन्तर्मुहूर्त्तोपरि विच्छि-

द्यमानबन्धावृत्तिजातिमत्यः सान्तरबन्धा इति फलितार्थः। ताश्च सातवेदनीयस्त्रीवेदनपुंसकवेदहास्यरत्यरतिशोकनरकद्विकाहारकद्विकाद्यरहितसंस्थानसंहननपञ्चकाद्यजातिचतुष्टयातपोद्योताप्रशस्तविहायोगतिस्थिरशुभयशःकीर्त्तयः स्थावरदशकं च। एता हि (४१) जघन्यतः समयमात्रं बध्यन्ते, उत्कर्षतोऽन्तर्मुहूर्त्तं, परतस्तु निजबन्धहेतुसद्भावेऽपि तथास्वाभाव्यात्तद्योग्याध्यवसायपरावृत्त्या नियमात्प्रतिपक्षप्रकृतयो बध्यन्त इति सान्तरा उच्यन्ते। यासां जघन्यतः समयमात्रं बन्ध उत्कर्षतस्तु समयादारभ्य नैरन्तर्येणान्तर्मुहूर्त्तस्योपर्यपि कालमसङ्ख्येयं यावत्ताः सान्तरनिरन्तरबन्धाः, अन्तर्मुहूर्त्तमध्येऽपि सान्तराश्च निरन्तराश्चेतिकृत्वाऽन्तर्मुहूर्त्तमध्यविच्छिन्नबन्धतदुपरिविच्छिन्नबन्धोभयवृत्तिजातिमत्य इति यावत्, ताश्च समचतुरस्रं वज्रर्षभनाराचं पराघातोच्छ्वासौ पुरुषवेदः पञ्चेन्द्रियजातिः सातवेदनीयं शुभविहायोगतिर्वैक्रियौदारिकसुरमनुजतिर्यग्गोत्रद्विकानि सुस्वरत्रिकं त्रसचतुष्कं चेति सप्तविंशतिः। एता हि जघन्यतः समयमात्रं बध्यन्त इति सान्तराः, उत्कर्षतस्तु अनुत्तरसुरादिभिरसङ्ख्येयमपि कालं बध्यन्त इत्यन्तर्मुहूर्त्तमध्ये व्यवच्छेदाभावान्निरन्तरा इति। जघन्येनापि या अन्तर्मुहूर्त्तं यावन्नैरन्तर्येण बध्यन्ते ता निरन्तरबन्धा निर्गतमन्तरमन्तर्मुहूर्त्तमध्ये व्यवच्छेदलक्षणं यस्य तादृशो बन्धो यासामिति व्युत्पत्तेः अन्तर्मुहूर्त्तमध्याविच्छिन्नबन्धावृत्तिजातिमत्य इतियावत्, ताश्च ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणनवककषायषोडशकमिथ्यात्वभयजुगुप्साऽगुरुलघुनिर्माणतैजसकार्मणोपघातवर्णादिचतुष्टयरूपाः सप्तचत्वारिंशद्ध्रुवबन्धिन्यः जिननामायुश्चतुष्टयं चेति द्विपञ्चाशत्। एतासां बन्धो ह्यन्तर्मुहूर्त्तमध्ये न विच्छिद्यत इति।

यासां विपाकोदये प्रवर्त्तमाने सङ्क्रमत उत्कृष्टं स्थितिसत्कर्म लभ्यते, न बन्धतः, ता उदयसङ्क्रमोत्कृष्टाः, ताश्च मनुजगतिः

सातवेदनीयं सम्यक्त्वं स्थिरादिषट्कं हास्यादिषट्कं वेदत्रिकं शुभविहायोगतिराद्यानि पञ्च संहननानि पञ्च संस्थानानि उच्चैर्गोत्रं चेति त्रिंशत् । आसां हि प्रकृतीनामुदयप्राप्तानां या विपक्षभूता नरकगत्यसातवेदनीयमिथ्यात्वाद्याः प्रकृतयस्तासामुत्कृष्टां स्थितिं बद्ध्वा भूय आसामेवोदयप्राप्तानां बन्धमारभते, बध्यमानासु चैतासु पूर्ववद्भनरकगत्यादिविपक्षप्रकृतिदलिकं संक्रमयति, शुभप्रकृतीनां च स्थितिः स्वबन्धेन स्तोकैव भवतीति सङ्क्रमत आसामुत्कृष्टा स्थितिः प्राप्यते । यासां प्रकृतीनामनुदये सङ्क्रमत उत्कृष्टस्थितिलाभस्ता अनुदयसङ्क्रमोत्कृष्टाः, ताश्च मनुजानुपूर्वीसम्यग्मिथ्यात्वाहारकद्विकदेवद्विकविकलत्रिकसूक्ष्मत्रिकतीर्थकरनामलक्षणास्त्रयोदश । यत एतासां स्वबन्धत उत्कृष्टा स्थितिर्नावाप्यते, किं तु सङ्क्रमतः । सङ्क्रमतोऽप्युत्कृष्टा स्थितिस्तदाऽवाप्यते यदैतद्विपक्षप्रकृतीरुत्कृष्टस्थितीर्बद्ध्वा तदुत्तरमेतासु बध्यमानासु तद्दलिकं संक्रमयति । एतद्विपक्षप्रकृतीनामुत्कृष्टस्थितिबन्धकश्च प्रायो मिथ्यादृष्ट्यादिर्मनुष्यः । न च तदानीमासामुदयोऽस्तीत्यनुदयसङ्क्रमोत्कृष्टा एताः । यासां प्रकृतीनां विपाकोदये सति बन्धादुत्कृष्टं स्थितिसत्कर्मावाप्यते ता उदयबन्धोत्कृष्टाः । यासां तु विपाकोदयाभावे बन्धादुत्कृष्टस्थितिसत्कर्मावाप्तिस्ता अनुदयबन्धोत्कृष्टाः । तत्र नरकद्विकतिर्यग्द्विकौदारिकद्विकसेवार्त्तसंहननैकेन्द्रियजातिस्थावरनामातपनामानि निद्राश्च पञ्चेत्येताः पञ्चदश प्रकृतयोऽनुदयबन्धोत्कृष्टाः । शेषाः पुनरायुश्चतुष्टयरहिताः पञ्चेन्द्रियजातिवैक्रियद्विकं हुण्डं पराघातोच्छ्वासोद्योतविहायोगतयोऽगुरुलघुतैजसकार्मणनिर्माणोपघातवर्णादिचतुष्काणि स्थिरादिषट्कं त्रसादिचतुष्कमसातवेदनीयं नीचैर्गोत्रं षोडश कषाया मिथ्यात्वं ज्ञानावरणपञ्चकमन्तरायपञ्चकं दर्शनावरणचतुष्टयमित्येताः षष्टिः प्रकृतय उदयबन्धोत्कृष्टाः । एतासां ह्युदयप्राप्तानां स्वबन्धत उत्कृष्टा

स्थितिरवाप्यत इति । आयुषां तु नान्योऽन्यं सङ्क्रमो, नापि बध्यमानमायुर्दलिकं पूर्वबद्धायुष उपचयायालं । ततस्तिर्यग्मनुष्यायुषोरुत्कृष्टा स्थितिर्न कश्चमपीति ते अनुदयबन्धोत्कृष्टादिसंज्ञाचतुष्टयातीते । देवनारकायुषी त्वनुदयबन्धोत्कृष्टे अपि प्रयोजनाभावात् पूर्वाचार्यैः संज्ञाचतुष्टयातीते विवक्षिते ।

यासां प्रकृतीनां दलिकं चरमसमयेऽन्यासु प्रकृतिषु स्तिबुकसङ्क्रमेण सङ्क्रमय्यान्यप्रकृतिव्यपदेशेनानुभवेत्, न स्वोदयेन, ता अनुदयवतीसंज्ञाः । यासां च दलिकं चरमसमये स्वविपाकेन वेदयते ता उदयवत्यः । ताश्च ज्ञानावरणपञ्चकमन्तरायपञ्चकमायुश्चतुष्टयं दर्शनचतुष्टयं सातासातवेदनीये स्त्रीवेदनपुंसकवेदौ मनुष्यगतिः पञ्चेन्द्रियजातित्रसबादरपर्याप्तशुभसुस्वरादेयजिननामलक्षणं चरमोदयसंज्ञं नामनवकं उच्चैर्गोत्रं वेदकसम्यक्त्वं संज्वलनलोभ इति चतुस्त्रिंशत् । तथाहि—ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयरूपाणां चतुर्दशप्रकृतीनां क्षीणकषायचरमसमये, उक्तनामनवकस्य सातासातवेदनीययोरुच्चैर्गोत्रस्य चायोगिचरमसमये, संज्वलनलोभस्य सूक्ष्मसंपरायान्त्यसमये, वेदकसम्यक्त्वस्य स्वक्षपणपर्यवसानसमये, स्त्रीनपुंसकवेदयोः क्षपकश्रेण्यामनिवृत्तिबादराद्धायाः सङ्ख्येयेषु भागेष्वतिक्रान्तेषु तदुदयान्त(न्त्य)समये, आयुषां च स्वस्वभवचरमसमये स्ववेदनमस्ति, तत एता उदयवत्योऽभिधीयन्ते । यद्यपि सातासातवेदनीययोः स्त्रीनपुंसकवेदयोश्चानुदयवतीत्वमपि संभवति, तथापि 'प्राधान्येनैव व्यपदेश' इत्युदयवत्य एता उक्ता इति संप्रदायः, उदयवतीवृत्तिजातिमत्त्वलक्षणमनुदयवतीत्वं तासु नास्तीति तदभिप्रायः । उक्तशेषाश्चतुर्दशोत्तरशतसङ्ख्या अनुदयवत्यस्तासां दलिकस्य चरमसमयेऽन्यत्र सङ्क्रमणौघ्येण स्वविपाकवेदनाभावात् । तथाहि—चरमोदयसंज्ञनाम-

नवकनरकद्विकतिर्यग्द्विकैकद्वित्रिचतुरिन्द्रियजातिस्थावरसूक्ष्मसाधारणातपोद्योतवर्जा नाम्न एकसप्ततिप्रकृतयो नीचैर्गोत्रं चेत्येता द्विसप्ततिप्रकृतीः सजातीयासु परप्रकृतिषूदयमागतासु चरमसमये स्तिबुकसङ्क्रमेण प्रक्षिप्य परप्रकृतिव्यपदेशेनानुभवत्ययोगिकेवली । एवं निद्राप्रचले क्षीणकषायः मिथ्यात्वं सम्यग्मिथ्यात्वे तच्च सम्यक्त्वे प्रक्षिप्य सप्तकक्षयकालेऽनुभूयते । अनन्तानुबन्धिनां क्षपणसमये तद्दलिकं बध्यमानासु चारित्रमोहनीयप्रकृतिषु गुणसङ्क्रमेण सङ्क्रमय्योदयावलिकागतमुदयवतीषु प्रकृतिषु स्तिबुकसङ्क्रमेण संक्रमय्य तद्व्यपदेशेनानुभवति । स्थावरसूक्ष्मसाधारणातपोद्योतैकद्वित्रिचतुरिन्द्रियजातिनरकद्विकतिर्यग्द्विकरूपा नामत्रयोदशप्रकृतीर्बध्यमानायां यशःकीर्त्तौ गुणसङ्क्रमेण सङ्क्रमय्य तासामुदयावलिकागतं दलिकं नाम्न उदयमागतासु प्रकृतिषु स्तिबुकसङ्क्रमेण प्रक्षिप्य तद्व्यपदेशेनानुभवति । स्त्यानर्द्धित्रिकमप्यादौ दर्शनावरणचतुष्टये गुणसङ्क्रमेण सङ्क्रमयति । तत उदयावलिकागतं स्तिबुकसङ्क्रमेण संक्रमयति । एवमष्टौ कषायान् हास्यादिषट्कं पुरुषवेदं संज्वलनक्रोधादित्रिकमुत्तरोत्तरप्रकृतिषु मध्ये प्रक्षिपति । तत एताः सर्वा अप्यनुदयवत्यः । "वक्ष्यमाणगभीरार्थनीरराशिप्रवेशकृत् । कर्माष्टकस्वरूपस्य, नौरिवेयं प्ररूपणा ॥ १ ॥

तदेवमुक्तं सप्रपञ्चं कर्माष्टकं, तस्य बन्धसङ्क्रमादिकारणभूतं करणानां वीर्यविशेषरूपाणामष्टकं करणाष्टकं बन्धनादि वक्ष्यमाणं । तथा कर्मपुद्गलानां यथास्थितिबद्धानामबाधाकालक्षयात्सङ्क्रमापवर्त्तनादिकरणविशेषाद्योदयसमयप्राप्तानामनुभवनमुदयः । तेषामेव बन्धसङ्क्रमाभ्यां लब्धात्मलाभानां निर्जरणसङ्क्रमकृतस्वरूपप्रच्युत्यभावः सत्ता । इह करणाष्टकोदयसत्ता अभिधेयाः । तत्परिज्ञानं श्रोतुरनन्तरप्रयोजनं,ग्रन्थकर्त्तुश्च परानुग्रहः । परंपराप्रयोजनं तूभयोरपि मोक्षावाप्तिः । सम्बन्धस्तु

हेतुहेतुमद्भावलक्षणं (णः)। प्रकरणमिदं करणादिज्ञानहेतुः, तज्ज्ञानं च हेतुमदिति। अधिकारी चात्र तत्त्वबुभुत्सुर्मुमुक्षुर्वा ॥ १ ॥

तत्र 'यथोद्देशं निर्देश' इत्यादौ करणाष्टकं प्रतिपिपादयिषुराह—

बंधण १ संकमणु २ वट्टणा य ३ अववट्टणा ४ उदीरणया ५।
उवसामणा ६ णिधत्ती ७ णिकायणा ८ च त्ति करणाइं ॥ २ ॥

व्याख्या—बध्यते जीवप्रदेशैः सहान्योऽन्यानुगतीक्रियतेऽष्टप्रकारं कर्म येन वीर्यविशेषेण तद्बन्धनं। संक्रम्यन्तेऽन्यकर्मरूपतया व्यवस्थिताः प्रकृतिस्थित्यनुभागप्रदेशा अन्यकर्मरूपतया व्यवस्थाप्यन्ते येन तत्संक्रमणं। तत्रेदावेवोद्वर्त्तनापवर्त्तने, ते च कर्मणां स्थित्यनुभागाश्रये। तत्रोद्वर्त्येते प्रभूतीक्रियेते स्थित्यनुभागौ यया वीर्यपरिणत्या सा उद्वर्त्तना। अपवर्त्येते ह्रस्वीक्रियेते तौ यया साऽपवर्त्तना। उदीर्यतेऽनुदयप्राप्तं कर्मदलिकमुदयावलिकायां प्रवेश्यते यया सा उदीरणा। उपशम्यते उदयोदीरणानिधत्तिनिकाचनाकरणायोग्यत्वेन व्यवस्थाप्यते कर्म यया सोपशमना। निधीयते उद्वर्त्तनापवर्त्तनान्यशेषकरणायोग्यत्वेन व्यवस्थाप्यते यया सा निधत्तिः, पृषोदरादित्वादिष्टरूपसिद्धिः। "कच बन्धने" नितरां कच्यते स्वयमेव बन्धमायाति तथाविधसंक्लिष्टाध्यवसायस्य जीवस्य कर्म तत्प्रयुङ्क्ते जीव एव तथानुकूल्येन भवनादिति प्रयोक्तृव्यापारे णिग् (प्रत्ययः), ततो निकाच्यते सकलकरणायोग्यत्वेनावश्यवेद्यतया व्यवस्थाप्यते कर्म जीवेन यया

सा निकाचना । अथवा "कच बन्धने" इति चौरादिकोऽप्यस्तीति तस्येदं रूपं । चः समुच्चये । इतिः परिसमाप्तौ । एतावन्त्येव करणानि, नाधिकानि, बन्धसङ्क्रमादीनां कार्याणामष्टविधत्वेन करणमप्यष्टविधमेवेति भावः ॥ २ ॥

करणानि चामूनि जीववीर्यविशेषरूपाणीति प्रथमतो वीर्यं प्ररूपयति—

विरियंतरायदेसक्खएण सव्वक्खएण वा लद्धी । अज्झिसंधिजमियरं वा तत्तो विरियं सलेसस्स ॥ ३ ॥

व्याख्या—वीर्यान्तरायस्य देशक्षयेण सर्वक्षयेण वा लब्धिर्वीर्यलब्धिर्भवतीति शेषः । तत्र देशक्षयेण छद्मस्थानां सर्वक्षयेण च केवलिनां वीर्यलब्धिराविर्भवति । "तत्तो त्ति" तस्याः क्षायिकक्षायोपशमिकरूपाया वीर्यलब्धेः सकाशादुपजायमानं यत्सलेश्यस्य वीर्यमज्झिसन्धिजं बुद्धिपूर्वकं धावनवल्गनादिक्रियासु नियुज्यमानं, इतरदाऽनज्झिसन्धिजं भुक्ताहारस्य धातुमलत्वादिपरिणामापादकं, एकेन्द्रियादीनां वा तत्तत्क्रियानिबन्धनं तदिहाधिकृतमिति सोपस्कारं व्याख्येयं । द्विविधं हि वीर्यं छाद्मस्थिकं कैवलिकं च । उभयमपि प्रत्येकमकषायि सलेश्यं च भवति । तत्र छाद्मस्थिकमकषायि सलेश्यमुपशान्तक्षीणमोहानां, कैवलिकं च सयोगिकेवलिनां, छाद्मस्थिकं सूक्ष्मसंपरायान्तानां कषायिकमपि भवति, कैवलिकं चायोगिकेवलिनां सिद्धानां चालेश्यमपि, परमिह यत् सलेश्यं तदेव परिगृह्यते, तस्यैव बन्धादिहेतुत्वात्, तच्च सूक्ष्मबादरपरिस्पन्दरूपक्रियात्मकं योगसंज्ञमुच्यते । एकार्थिकान्यस्य चामूनि—"जोगो विरियं थामो उच्छाह परक्कमो तहा चेट्ठा । सत्ती सामत्थं ति य जोगस्स हवंति पज्जाया ॥ १ ॥" इति ॥ ३ ॥

अथास्य कार्यभेदेन संज्ञाभेदं जीवप्रदेशेषु तारतम्येनावस्थाने कारणं चाह—

परिणामालंबणगहणसाहणं तेण लद्धणामतिगं । कज्जब्भासणोसप्पवेसविसमीकयपएसं ॥ ४ ॥

व्याख्या—तद्वीर्यं परिणामालम्बनग्रहणसाधनं तेन हेतुना लब्धं नामत्रिकमन्वर्थं येन तत्तथा सिद्धं । तथाहि—तेन योगसंज्ञकेन वीर्यविशेषेणौदारिकादिशरीरप्रायं ग्यान् पुद्गलान् जीवः प्रथमतो गृह्णाति, गृहीत्वा चौदारिकादिरूपतया परिणमयति । तथा प्राणापानभाषामनोयोग्यान् पुद्गलान् प्रथमतो गृह्णाति, गृहीत्वा च प्राणापानादिरूपतया परिणमयति । ततो मन्दशक्तिः परिभ्रमणाय यष्टिमिव तन्निसर्गहेतुसामर्थ्यविशेषसिद्धये तानेव पुद्गलानवलम्बते । ततो ग्रहणपरिणामालम्बनसाधनं तद्ग्रहणादिसंज्ञमिष्यते । तदुक्तं—"गहणपरिणामफंदणरूवं तं ति" । तत्परिणामालम्बनग्रहणसाधनमित्यन्वयेन परिणामादिहेतुता प्रतिपादिता । तेन मनोवाक्कायावष्टम्भतो जायमानेन योगसंज्ञेन वीर्येण लब्धं नामत्रिकं । मनसा करणभूतेन योगो मनोयोगः, वाचा योगो वाग्योगः, कायेन योगश्च काययोगः इत्यन्वयान्तरेण संज्ञाभेदः प्रतिपादित इति तु प्राचीनव्याख्यानं। ननु सर्वेषु जीवप्रदेशेषु क्षायोपशमिक्यादिलब्धितौल्ये किमिति क्वचित्स्तोकं क्वचित्स्तोकतरमित्येवं वैषम्येण वीर्यमुपलभ्यत इत्यत आह–कार्येत्यादि, यदर्थं चेष्टते तत्कार्यं तस्याभ्यास आसन्नता । तथा जीवप्रदेशानामन्योऽन्यं परस्परं प्रवेशः शृङ्खलावयवानामिव सम्बन्धविशेषस्ताभ्यां कृत्वा विषमीकृताः प्रभूताल्पाल्पतरस्वभावजनकतया विसंस्थुलीकृताः प्रदेशा जीवप्रदेशा येन तत्तथा । तथाहि—येषामात्मप्रदेशानां हस्तादिगतानामुत्पाट्यमानघटादिकार्यनैकट्यं तेषां प्रभूततरा चेष्टा, दूरस्थानामंसादिगतानां स्वल्पा, दूरतरस्थानां तु पादादिगतानां स्वल्पतरेत्यनुभव-

सिद्धमेतत् । यथाहि लोष्टाद्यभिघाते सति सर्वप्रदेशेषु युगपद्वेदनोदयेऽपि येषामात्मप्रदेशानामभिघातकलोष्टादिद्रव्यनैकट्यं तेषां तीव्रतरा वेदना, शेषाणां तु मन्दा मन्दतरा, तत्रेहापि कार्यद्रव्याध्यासानध्यासविशेषादात्मप्रदेशेषु वीर्यवैषम्यं भावनीयं । एतच्च जीवप्रदेशानां मिथः सम्बन्धविशेषे सति भवति, नान्यथा, यथा शृङ्खलावयवानां, ते हि मिथः सम्बन्धविशेषादेकस्मिन्नवयवे परिस्पन्दमानेऽपरेऽपि परिस्पन्दन्ते, केवलं केचित् स्तोकं अपरे स्तोकतरमिति । सम्बन्धविशेषाभावे त्वेकस्मिंश्चलति नापरस्य चलनावश्यंभावो यथा गोपुरुषयोरिति सूक्तमुक्तं कार्याध्यासान्योऽन्यप्रवेशविषमीकृतप्रदेशमिति । ननु यत्प्रदेशावच्छेदेन लोष्टाद्यभिघातस्तत्प्रदेशावच्छेदेन वेदनोत्कर्ष इति संभवति, तस्य तद्धेतुत्वात् । यत्प्रदेशावच्छेदेन घटाद्युत्पाटनक्रिया तत्प्रदेशावच्छेदेन तद्वीर्योत्कर्ष इति तु न संभवति, तस्यास्तदहेतुत्वात्, प्रत्युत घटोत्पाटनेच्छाजनितघटोत्पाटनाप्रवृत्त्यात्मकवीर्येणैव घटोत्पाटनक्रियोत्पत्तेरिति कार्यद्रव्यनैकट्याद्वीर्योत्कर्ष इत्ययुक्तमिति चेन्न, औदारिकादिवर्गणाग्रहणाद्याश्रयस्य वीर्यस्यैवात्राधिकृतत्वात्, तदुत्कर्षे च कार्यद्रव्यनैकट्यस्यैव हेतुत्वात्, एकप्रदेशा हि ता ग्रहणादिगोचरमायान्ति, ततो येषु प्रदेशेषु ताः साक्षात्सन्निहितास्तेषु तद्ग्रहणादिवीर्योत्कर्षः, परंपरासन्निहितेषु तु तदपकर्षो, बाह्यप्रयत्नस्य तदवयवावच्छिन्नोत्कर्षे तु तदवयवावच्छिन्नक्रियाविशेषेच्छादिनियामकं, प्रदेशान्तरेषु तद्वैषम्ये च तत्सम्बन्धवैषम्यमिति न कोऽपि दोष इति यथागमं भावनीयं । कृतं प्रसङ्गेन ॥ ४ ॥

तदेवं वीर्यं प्रतिपाद्यास्यैव जघन्याजघन्योत्कृष्टानुत्कृष्टत्वबोधनाय प्ररूपणां चिकीर्षुरिमानर्थाधिकारानाह—

अविभागवग्गफड्डगअंतरठाणं अणंतरोवणिहा । जोगे परंपरावुड्ढिसमयजीवप्पबहुगं च ॥ ५ ॥

व्याख्या—योगे योगविषये प्रथममविभागप्ररूपणा कर्त्तव्या । ततो "वग्ग त्ति" वर्गणाप्ररूपणा । ततः स्पर्द्धकप्ररूपणा । तदनन्तरमन्तरप्ररूपणा । ततः स्थानप्ररूपणा । ततोऽनन्तरोपनिधा । ततः परंपरोपनिधा । ततो वृद्धिप्ररूपणा । ततः समयप्ररूपणा । ततो जीवानामल्पबहुत्वप्ररूपणेति ॥ ५ ॥

तत्रादावविभागप्ररूपणामाह—

पन्नाछेयणभिन्ना लोगासंखिज्जगप्पएससमा। अविभागा एक्केक्के हुंति पएसे जहन्नेणं ॥ ६ ॥

व्याख्या—इह हि जीवस्य वीर्यं केवलिप्रज्ञाछेदनकेन छिद्यमानं यदा विभागं न दत्ते तदा योऽंशो विश्राम्यति स वीर्याविभाग उच्यते । ते च प्रज्ञाछेदनकेन छिन्ना वीर्याविभागा एकैकस्मिन् जीवप्रदेशे चिन्त्यमाना जघन्येनाप्यसङ्ख्येयलोकाकाश (प्रदेश) प्रमाणा भवन्ति, उत्कर्षतोऽप्येतत्सङ्ख्या एव, किं तु ते जघन्यपदभाविवीर्याविभागेभ्योऽसङ्ख्येयगुणा द्रष्टव्याः । लोकासङ्ख्येयकप्रदेशसमा इत्यत्र लोकानां यदसङ्ख्येयकं तावत्प्रदेशसमा इत्यक्षरव्याख्या कार्या । उक्तं च—"पन्नाए अविभागं जहन्नविरियस्स वीरियं छिन्नं । एक्केक्कस्स पएसस्सऽसंखलोगप्पएससमं ॥ १ ॥ " इति ॥ ६ ॥

उक्ताऽविभागरूपणाऽथ वर्गणाप्ररूपणामाह—

जेसिं पएसाण समा अविभागा सव्वओ अ थोवतमा। ते वग्गणा जहन्ना अविभागहिया परंपरओ ॥ ७ ॥

व्याख्या—येषां जीवप्रदेशानां समास्तुल्यसङ्ख्या वीर्याविभागाः सर्वतः सर्वेभ्यश्चान्येभ्यो जीवप्रदेशगतवीर्याविभागेभ्यः स्तोकतमास्ते जीवप्रदेशा घनीकृतलोकासङ्ख्येयभागवृत्त्यसङ्ख्येयप्रतरगतप्रदेशराशिप्रमाणाः समुदिता एका वर्गणा,

सा च जघन्या सर्वस्तोकाविभागयुक्तत्वात् । परतस्तदनन्तरं वर्गणा । परं केवलं अविभागाधिका एकैकेनाविभागेनाधिका वाच्या । तथाहि—जघन्यवर्गणातः परे ये जीवप्रदेशा एकेन वीर्याविभागेनान्यधिका घनीकृतलोकासङ्ख्येयभागवृत्त्यसङ्ख्येयप्रतरगतप्रदेशराशिप्रमाणा वर्त्तन्ते । तेषां समुदायो द्वितीया वर्गणा । तदनन्तरं द्वाभ्यां वीर्याविभागाभ्यामधिकानामुक्तसङ्ख्यानामेव जीवप्रदेशानां समुदायस्तृतीया वर्गणा । एवमेकैकवीर्याविभागवृद्ध्या वर्द्धमानानां तावतां जीवप्रदेशानां समुदायरूपा वर्गणा असङ्ख्येया वाच्याः ॥ ७ ॥

ताश्च कियत्य इति तन्निरूपणाय स्पर्द्धकप्ररूपणामाह—

सेढिअसंखियमित्ता फड्डगमित्तो अणंतरा णत्थि । जाव असंखा लोगा तो बीयाई य पुव्वसमा ॥८॥

व्याख्या—श्रेणिर्घनीकृतलोकस्यैकैकप्रदेशपङ्क्तिरूपा तस्या असङ्ख्येयतमे भागे यावन्त आकाशप्रदेशास्तावन्मात्रा उक्तस्वरूपा वर्गणा एकं स्पर्द्धकं, स्पर्द्धन्त इवोत्तरोत्तरतुल्यवृद्ध्या वर्गणा अत्रेति व्युत्पत्तेः । उक्ता स्पर्द्धकप्ररूपणा, अथान्तरप्ररूपणामाह—इतः पूर्वोक्तस्पर्द्धकगतचरमवर्गणायाः परतो जीवप्रदेशा अनन्तरा न सन्ति एकैकवीर्याविभागवृद्ध्या निरन्तरं वर्द्धमाना न लभ्यन्ते इत्यर्थः । किंतु यावदसङ्ख्येया लोकास्तावत्सान्तरा एव भवन्ति । न हि पूर्वोक्तस्पर्द्धकगतचरमवर्गणायाः परतो जीवप्रदेशा एकद्वित्रादिवीर्याविभागैरधिकाः प्राप्यन्ते, नापि सङ्ख्येयैः, नाप्यसङ्ख्येयैः, किं त्वसङ्ख्येयलोकाकाशप्रदेशप्रमाणैरेवाधिकाः प्राप्यन्त इति । ततस्तेषां समुदायो द्वितीयस्पर्द्धकस्य प्रथमा वर्गणा । "तो त्ति" ततो द्वितीयस्पर्द्धकप्रथमवर्गणायाः परतो द्वितीयाद्या वर्गणाः पूर्वसमाः पूर्वस्पर्द्धकवदुक्तव्याः । तथाहि—प्रथमवर्गणायाः

परतो जीवप्रदेशानामेकेन वीर्याविभागेनाधिकानां समुदायो द्वितीया वर्गणा, द्वाभ्यामधिकानां तृतीया। एवं तावद्वाच्यं यावच्छ्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणा वर्गणा भवन्ति। तासां च समुदायो द्वितीयं स्पर्द्धकं। ततः पुनरप्येकद्वित्रादिभिः सङ्ख्येयैरसङ्ख्येयैर्वा वीर्याविभागैरधिका जीवप्रदेशा न लभ्यन्ते, किं त्वसङ्ख्येयलोकाकाशप्रदेशप्रमाणैरेवाधिकाः प्राप्यन्ते। तेषां समुदायस्तृतीयस्पर्द्धकस्य प्रथमवर्गणा। तत एकैकवीर्याविभागवृद्ध्या द्वितीयाद्याः वर्गणाः श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणा वक्तव्याः। तासां समुदायस्तृतीयं स्पर्धकं। एवमसङ्ख्येयानि स्पर्धकानि वाच्यानि ॥ ८ ॥

तदेवं कृताऽन्तरप्ररूपणा, अथ स्थानप्ररूपणां करोति—

सेढिअसंखियमित्ताइं फड्डगाइं जहन्नयं ठाणं । फड्डगपरिवुड्ढिअनं अंगुलभागो असंखतमो ॥ ९ ॥

व्याख्या—श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणानि पूर्वोक्तस्पर्द्धकानि जघन्यं योगस्थानं भवति। एतच्च सूक्ष्मनिगोदस्य सर्वाल्पवीर्यस्य भवप्रथमसमये वर्त्तमानस्य प्राप्यते। ततोऽन्यस्य जीवस्याधिकतरवीर्यस्य येऽल्पतरवीर्या जीवप्रदेशास्तेषां समुदायः प्रथमा वर्गणा। तत एकैकवीर्याविभागवृद्ध्या श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणा वर्गणा वाच्याः। तासां समुदायः प्रथमं स्पर्द्धकं। ततः प्रागुपदर्शितदिशा द्वितीयादीन्यपि स्पर्द्धकानि वाच्यानि, यावच्छ्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणानि भवन्ति। तेषां समुदायो द्वितीयं योगस्थानं। ततोऽन्यस्य जीवस्याधिकतमवीर्यस्योपदर्शितनीत्या तृतीयं योगस्थानं वाच्यं। एवमन्यान्यजीवापेक्षया तावद्योगस्थानानि वाच्यानि यावत्सर्वोत्कृष्टं योगस्थानमायाति। एतानि च सर्वाणि श्रेण्यसङ्ख्येयभागगतप्रदेशप्रमाणानि भवन्ति। ननु जीवानामनन्तत्वादनन्तानि योगस्थानानि भवन्ति,

प्रतिजीवं योगस्थानसंज्ञवादिति नोक्तसङ्ख्या युक्तेति चेन्मैवं, एकैकस्मिन् सदृशयोगस्थाने वर्तमानानां स्थावरजीवानामनन्तानां प्राप्यमाणत्वात्सर्वजीवापेक्षया सर्वयोगस्थानानामुक्तसङ्ख्यानामेव केवलिप्रज्ञया परिदृष्टत्वात्। कृता स्थानप्ररूपणा, अथानन्तरोपनिधावसरः, तत्रोपनिधानमुपनिधा, धातूनामनेकार्थत्वान्मार्गणमित्यर्थः, अनन्तरेणोपनिधाऽनन्तरोपनिधा, अनन्तराद्योगस्थानाद्युत्तरयोगस्थाने स्पर्धकसङ्ख्यामार्गणमित्यर्थः। तदेवाह—अतः प्रथमाद्योगस्थानाद्द्वितीयादिषु योगस्थानेषु प्रत्येकं स्पर्द्धकानां परिवृद्धिरङ्गुलभागोऽसङ्ख्येयतमः, अङ्गुलमात्रक्षेत्रसम्बन्धिन्यसङ्ख्येयभागे यावन्तः प्रदेशास्तावन्मानानि पूर्वपूर्वयोगस्थानगतस्पर्द्धकापेक्षयोत्तरोत्तरयोगस्थाने स्पर्द्धकान्यधिकानि भवन्तीत्यर्थः। इयमत्र भावना—इह प्रथमयोगस्थानवर्गणातः सर्वा अपि द्वितीययोगस्थानगतवर्गणा मूलत एव हीनतरजीवप्रदेशा भवन्ति, बहुबहुतरवीर्याणां जीवप्रदेशानां स्तोकस्तोकतरतयैवोपलम्भात्। ततोऽत्रादित एव वर्गणानामल्पप्रदेशतया महावकाशत्वेन विचित्रवर्गणाबाहुल्यसंभवाद्यथोक्तं स्पर्द्धकबहुत्वं सङ्गच्छते। एवमुत्तरोत्तरेष्वपि योगस्थानेषु स्पर्द्धकबाहुल्यं भावनीयम्॥ ए॥

तदेवं कृताऽनन्तरोपनिधा, अथ परंपरया मार्गणरूपां परंपरोपनिधां चिकीर्षुराह—

सेढिअसंखियभागं गंतुं गंतुं हवंति दुगुणाइं। पल्लासंखियभागो णाणागुणहाणिठाणाणि ॥ १० ॥

व्याख्या—प्रथमाद्योगस्थानाच्छ्रेण्यसङ्ख्येयभागं गत्वा गत्वोत्तरोत्तरयोगस्थाने द्विगुणानि स्पर्द्धकानि भवन्ति। अयं भावः—प्रथमे योगस्थाने यावन्ति स्पर्द्धकानि भवन्ति, तदपेक्षया श्रेण्यसङ्ख्येयभागगतप्रदेशराशिप्रमाणानि योगस्थानान्यतिक्रम्यानन्तरयोगस्थाने द्विगुणानि स्पर्द्धकानि भवन्ति। ततो योगस्थानात् परतस्तावन्ति योगस्थानान्यतीत्यापर-

स्मिन् योगस्थाने द्विगुणानि प्राप्यन्ते । एवमन्तिमयोगस्थानपर्यन्तं वक्तव्यं । तानि च द्विगुणद्विगुणस्पर्द्धकानि पल्यासङ्ख्येयभागः सूक्ष्माद्धापल्योपमस्यासङ्ख्येयतमे भागे यावन्तः समयास्तावन्ति द्विगुणवृद्धिस्थानानि भवन्तीत्यर्थः । "नानागुणहाणि ठाणाणि त्ति" नानारूपाणि यानि गुणहानिस्थानानि द्विगुणहानिस्थानानि तान्यपि पल्यासङ्ख्येयभागगतसमयप्रमाणान्येवोर्ध्वारोहणेन वृद्धिस्थानानामधोऽवतरणेन हानिस्थानानां च तौल्यात् । तथाहि—उत्कृष्टयोगस्थानादधोऽवतरणे श्रेण्यसङ्ख्येयांशप्रदेशप्रमाणयोगस्थानोल्लङ्घनेऽधस्तनयोगस्थाने चरमयोगस्थानस्पर्द्धकापेक्षयाऽर्द्धानि स्पर्द्धकानि प्राप्यन्ते । ततः पुनरपि तावत्सु योगस्थानेष्वतिक्रान्तेष्वधस्तने योगस्थानेऽर्द्धानि प्राप्यन्ते । एवं तावद्वाच्यं यावज्जघन्यं योगस्थानमिति । ननु द्विगुणानां हानिर्द्विगुणहानिरित्यर्थोऽर्द्धहानावनुपपन्न इति चेत्सत्यं, तत्तद्विगुणवृद्ध्यवधिसमाप्त्यवच्छिन्नहानेरेवेह द्विगुणहानेर्विवक्षितत्वात्, एतत्सूचार्थमेव सूत्रे नानेति पदं । अमूनि च यानि द्विगुणवृद्धिस्थानानि वा द्विगुणहानिस्थानानि वा तानि सर्वस्तोकानि, तेभ्यः पुनरेकस्मिन् द्विगुणवृद्धिस्थानयोर्द्विगुणहानिस्थानयोर्वाऽन्तराले यानि योगस्थानानि तान्यसङ्ख्येयगुणानि ॥ १० ॥

कृता परंपरोपनिधा, अथ वृद्धिप्ररूपणां कुर्वन्नाह—

वुड्ढीहाणिचउक्कं तम्हा कालोत्थ अंतिमल्लाणं । अंतोमुहुत्तमावलि असंखभागो य सेसाणं ॥ ११ ॥

व्याख्या—वीर्यान्तरायक्षयोपशमः क्वचित्कदाचित्कथञ्चिद्भवतीति तन्निबन्धनानि योगस्थानान्यपि कदाचिद्वर्द्धन्ते कदाचिच्च हीयन्ते । तत्र वृद्धिश्चतुर्धा—असङ्ख्येयभागवृद्धिः, सङ्ख्येयभागवृद्धिः, सङ्ख्येयगुणवृद्धिः, असङ्ख्येयगुणवृद्धि-

रिति । एवं हानिरपि चतुर्धा । यस्मादेवं वृद्धिहान्योश्चतुष्कं वर्त्तते तस्मात् कालोऽत्र नियतो वक्तव्य इति सोपस्कारमन्वयः । प्रतिज्ञातमेवाह—अन्तिमयोरसङ्ख्येयगुणलक्षणयोर्वृद्धिहान्योः प्रत्येकं कालोऽन्तर्मुहूर्त्त, शेषाणामाद्यानां तिसृणां वृद्धीनां हानीनां चावलिकाऽसङ्ख्येयभागमात्रः कालः । इयमत्र भावना—क्षयोपशमप्रकर्षाद्विवक्षितयोगस्थानात्प्रतिसमयमपरस्मिन्नपरस्मिन्नसङ्ख्येयगुणवृद्धे योगस्थाने जीवस्य यदारोहणं साऽसङ्ख्येयगुणवृद्धिः । यत् पुनः क्षयोपशमापकर्षात्प्रतिसमयमपरस्मिन्नपरस्मिन्नसङ्ख्येयगुणहीने योगस्थानेऽवतरणं साऽसङ्ख्येयगुणहानिः । इमे द्वे हानिवृद्धी उत्कर्षतोऽन्तर्मुहूर्त्तकालं यावन्निरन्तरं भवतः । आद्यास्तु तिस्रो वृद्धयो हानयो वोत्कर्षत आवलिकाया असङ्ख्येयं भागं, जघन्यतस्तु चतस्रोऽप्येकं द्वौ वा समयौ यावद्भवन्ति ॥ ११ ॥

अथ कियन्तं कालमुक्तवृद्धिहानिरहिता जीवा योगस्थानेष्ववस्थिताः प्राप्यन्त इति जिज्ञासायां समयप्ररूपणामाह—

चउराई जावट्ठगमित्तो जाव दुगं ति समयाणं । पज्जत्तजहन्नाउं जावुक्कोसं ति उक्कोसो ॥ १२ ॥

व्याख्या—समयानामवस्थितिकालनियामकानां चत्वार आदिर्यस्याः सा चतुरादिर्वृद्धिर्भवतीति शेषः, सा च तावद्वाच्या यावदष्टकं । "इत्तो त्ति" इत ऊर्ध्वं समयानां हानिर्वक्तव्येति संपूर्य योजनीयं, सा च तावद्यावद्द्विकं । सा च चतुरादिका वृद्धिः पर्याप्तजघन्यात्पर्याप्तसूक्ष्मनिगोदसत्कजघन्ययोगस्थानादारभ्य तावदवसेया यावदष्टकं, ततः परं हानिः, सापि तावद्यावदुत्कृष्टयोगस्थानं इत्येष उत्कृष्टोऽवस्थितिकालः । इयमित्थमेवार्थवशादक्षरयोजना विधेया । अयमिह भावार्थः—पर्याप्तसूक्ष्मनिगोदस्य सर्वाल्पवीर्यस्य जघन्याद्योगस्थानादारभ्य क्रमेण यानि योगस्थानानि श्रेण्यसङ्ख्येयभा-

गगतप्रदेशराशिप्रमाणानि, तान्युत्कर्षतश्चतुरः समयान् यावदवस्थितानि प्राप्यन्ते । ततः परं यानि तावन्ति योगस्थानानि तान्युत्कर्षतः पञ्च समयान् यावत् । ततः परं यानि तावन्ति तान्युत्कर्षतः षट् समयान् । ततोऽपि पराणि तावन्ति तान्युत्कर्षतः सप्त समयान् । ततोऽपि पराणि तावन्ति तान्युत्कर्षतोऽष्टौ समयान् यावदवस्थितानि लभ्यन्ते । ततः पराणि यानि क्रमेण योगस्थानानि श्रेण्यसङ्ख्येयांशगतप्रदेशप्रमाणानि तान्युत्कर्षतः सप्त समयान् यावदवस्थितानि । तदनन्तरमुक्तसङ्ख्याकानि तान्युत्कर्षतः षट् समयानवस्थितानि । एवं तावत्प्रतिलोमतया वाच्यं यावदन्तिमानि श्रेण्यसङ्ख्येयांशगतप्रदेशप्रमाणान्युत्कर्षतो द्वौ समयौ यावदवस्थितानि प्राप्यन्ते ॥ १२ ॥

तदेवमुक्तमुत्कृष्टमवस्थानकालमानमथ जघन्यावस्थानकालमानमाह—

एगसमयं जहन्नं ठाणाणप्पाणि अट्ठ समयाणि । उवरुं असंखगुणिया।ए समयसो ऊण ठाणाणि ॥ १३॥

व्याख्या—सर्वेषामुक्तयोगस्थानानां जघन्यत एकसमयं यावदवस्थानं । यान्यप्यपर्याप्तसूक्ष्मनिगोदसम्बन्धीन्यसङ्ख्येयानि योगस्थानानि तेषां जघन्यत उत्कर्षतो वा एकं समयं यावदवस्थानं, उत्कर्षतोऽपि तेषां समयमात्रावस्थाने किं बीजमिति चेत् "सव्वो वि अपज्जत्तगो पइखणमसंखगुणाए जोगवुड्ढीए वड्ढइ त्ति" वचनात् द्वितीयसमयेऽसङ्ख्येयगुणवृद्धिरेव । उक्ता समयप्ररूपणा, अथ तेषामेव चतुरादिसमयानां योगस्थानानामल्पबहुत्वमाह—ठाणाणीत्यादि, अष्टसामयिकानि स्थानानि योगस्थानानि अल्पानि सर्वस्तोकानि । तेभ्यः समयशः समयेन समयेनोनानि सप्तसामयिकादीनि स्थानानि, उवरुयोः पूर्वोत्तररूपयोर्द्वयोः पार्श्वयोरसङ्ख्येयगुणानि । तथाहि—अष्टसामयिकानि चिरकालस्थायित्वात्तो-

कान्येव प्राप्यन्ते । तेभ्य उभयपार्श्ववर्त्तीनि सप्तसामयिकानि अल्पस्थितिकत्वादसङ्ख्येयगुणानि, स्वस्थाने तु तानि द्वयान्यपि परस्परं तुल्यानि । तेभ्योऽप्यसङ्ख्येयगुणान्युभयपार्श्ववर्त्तीनि षट्सामयिकानि, स्वस्थाने तु तुल्यानि । तेभ्योऽप्यसङ्ख्येयगुणानि पञ्चसामयिकान्युभयपार्श्वगानि, स्वस्थाने तु तुल्यानि । तेभ्योऽप्युभयपार्श्वस्थानि चतुःसामयिकान्यसङ्ख्येयगुणानि, स्वस्थाने तु तुल्यानि । तेभ्योऽप्यसङ्ख्येयगुणानि त्रिसामयिकानि । तेभ्योऽप्यसङ्ख्येयगुणानि द्विसामयिकानि ॥१३॥

उक्तं चतुरादिसमयानां योगस्थानानामल्पबहुत्वं, सम्प्रति जीवस्थानानां जघन्योत्कृष्टयोगविषयमल्पबहुत्वमाह—

सव्वत्थोवो जोगो साहारणसुहुमपढमसमयम्मि । बायरबियतियचउरमणसन्नपज्जत्तगजहन्नो ॥ १४ ॥

व्याख्या—इहासङ्ख्येयगुण इत्यग्रिमगाथातः सम्बध्यते । ततः साधारणस्य सूक्ष्मस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगः सर्वस्तोकः । ततो बादरैकेन्द्रियस्य लब्ध्यपर्याप्तस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगोऽसङ्ख्येयगुणः । ततो द्वीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगोऽसङ्ख्येयगुणः । ततस्त्रीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमयवृत्तेर्जघन्यो योगोऽसङ्ख्येयगुणः । ततश्चतुरिन्द्रियस्य लब्ध्यपर्याप्तकस्याद्यसमयस्थस्य जघन्यो योगोऽसङ्ख्येयगुणः । ततोऽसंज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमयवृत्तेर्जघन्यो योगोऽसङ्ख्येयगुणः । ततः संज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्त्तमानस्य जघन्यो योगोऽसङ्ख्येयगुणः ॥ १४ ॥

ततः—

आइउगुक्कोसो सिं पज्जत्तजहन्नगेयरो य कमा । उक्कोसजहन्नियरो असमत्तियरे असंखगुणो ॥१५॥

व्याख्या—आदिद्विकस्यापर्याप्तसूक्ष्मबादरैकेन्द्रियलक्षणस्योत्कृष्टो योगः क्रमेणासङ्ख्येयगुणो वाच्यः । तथाहि—लब्ध्यपर्याप्तकसंज्ञिपञ्चेन्द्रियजघन्ययोगात्सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्यैवोत्कृष्टो योगोऽसङ्ख्येयगुणः । ततो बादरैकेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुण इति । ततः "सिं ति" अनयोः सूक्ष्मबादरैकेन्द्रिययोः पर्याप्तयोर्जघन्य इतरश्चोत्कृष्टो योगः क्रमादसङ्ख्येयगुणो वाच्यः । तथाहि—लब्ध्यपर्याप्तकबादरैकेन्द्रियोत्कृष्टयोगात्सूक्ष्मनिगोदस्य पर्याप्तस्य जघन्यो योगोऽसङ्ख्येयगुणः । ततो बादरैकेन्द्रियस्य पर्याप्तस्य जघन्ययोगोऽसङ्ख्येयगुणः । ततः सूक्ष्मनिगोदस्य पर्याप्तस्योत्कृष्टो योगोऽसङ्ख्येयगुणः । ततोऽपि बादरैकेन्द्रियस्य पर्याप्तस्योत्कृष्टो योगोऽसङ्ख्येयगुणः । ततोऽसमाप्तोऽपर्याप्तो द्वीन्द्रियादिरिति परिशेषाल्लभ्यते, तस्मिन्नुत्कृष्ट इतरस्मिँश्चापर्याप्ते द्वीन्द्रियादौ जघन्य इतर उत्कृष्टश्च परिपाट्याऽसङ्ख्येयगुणो वाच्यः । तथाहि—पर्याप्तबादरैकेन्द्रियोत्कृष्टयोगाद्द्वीन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः । ततस्त्रीन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसङ्ख्येयगुणः । ततश्चतुरिन्द्रियस्य लब्ध्यपर्याप्तस्योत्कृष्टो योगोऽसङ्ख्येयगुणः । ततोऽसंज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तस्योत्कृष्टो योगोऽसङ्ख्येयगुणः । ततोऽपि संज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तस्योत्कृष्टो योगोऽसङ्ख्येयगुणः । ततो द्वीन्द्रियस्य पर्याप्तस्य जघन्यो योगोऽसङ्ख्येयगुणः । ततस्त्रीन्द्रियस्य पर्याप्तस्य जघन्यो योगोऽसङ्ख्येयगुणः । ततश्चतुरिन्द्रियस्य पर्याप्तस्य जघन्यो योगोऽसङ्ख्येयगुणः । ततोऽसंज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य जघन्यो योगोऽसङ्ख्येयगुणः । ततः संज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य जघन्यो योगोऽसङ्ख्येयगुणः । ततो द्वीन्द्रियस्य पर्याप्तस्योत्कृष्टो योगोऽसङ्ख्येयगुणः । ततस्त्रीन्द्रियस्य पर्याप्तस्योत्कृष्टयोगोऽसङ्ख्येयगुणः । ततोऽपि चतुरिन्द्रियस्य पर्याप्तस्योत्कृष्टो योगोऽसङ्ख्येयगुणः १५

अमणाणुत्तरगेविज्जजोगजूमिगय तइयतणुगेसु । कमसो असंखगुणिउं सेसेसु य जोग उक्कोसो ॥१६॥

व्याख्या—अमना असंज्ञी ततः पर्याप्तचतुरिन्द्रियोत्कृष्टयोगादसंज्ञिपञ्चेन्द्रियस्य पर्याप्तस्योत्कृष्टो योगोऽसंख्येयगुणः । ततोऽनुत्तरोपपातिनां देवानामुत्कृष्टो योगोऽसङ्ख्येयगुणः । ततो ग्रैवेयकाणां देवानामुत्कृष्टो योगोऽसङ्ख्येयगुणः । ततो जोगजूमिजानां तिर्यङ्मनुष्याणामुत्कृष्टो योगोऽसङ्ख्येयगुणः । ततस्तृतीया तनुराहारकं शरीरं येषां ते तृतीयतनुकास्तेषूत्कृष्टो योगोऽसङ्ख्येयगुणः । ततः शेषाणां देवनारकतिर्यङ्मनुष्याणामुत्कृष्टो योगोऽसङ्ख्येयगुणः । असङ्ख्येयगुणकारोऽत्र सूक्ष्मक्षेत्रपल्योपमासङ्ख्येयजागगतप्रदेशराशिप्रमाणो द्रष्टव्यः । पर्याप्ताश्च सर्वत्रापि करणपर्याप्ता द्रष्टव्याः ॥ १६ ॥

तदेवं सप्रपञ्चं कृता योगप्ररूपणा, साम्प्रतमेभिर्योगैर्यत्करोति जीवस्तदाह—

जोगेहिं तयणुरूवं परिणमइ गिण्हिऊण पंचतणू । पाउग्गे चालंबइ जासाणुमणत्तणे खंधे ॥ १७ ॥

व्याख्या—योगैरनन्तरोक्तलक्षणैस्तदनुरूपं योगानुरूपं, जघन्ययोगे वर्त्तमानः स्तोकान्मध्यमे मध्यमानुत्कृष्टे च प्रजूतान् पुद्गलस्कन्धान् गृह्णातीति क्रमेणेत्यर्थः । प्रायोग्यानौदारिकादियोग्यान् स्कन्धान् पुद्गलस्कन्धान् गृहीत्वा परिणमयति । "पंचतणु त्ति" जावप्रधाननिर्देशादौदारिकादिपञ्चशरीरतयेत्यर्थः । तथा जाषाप्राणापानमनस्त्वप्रायोग्यान् पुद्गलस्कन्धान् प्रथमतो गृह्णाति, गृहीत्वा च जाषादित्वेन परिणमयति परिणमय्य च तन्निसर्गहेतुसामर्थ्यविशेषसिद्धये तान् पुद्गलस्कन्धानालम्बते । ततस्तदवष्टम्जतो जातसामर्थ्यविशेषः सन् विसृजति नान्यथा । यथा हि वृषदंशः स्वान्यङ्गान्यूर्ध्वं जिग-

मिषुः संकोचवशादवलम्बते स्थिरतया धारयतीत्यर्थः । ततस्तदवष्टम्भाज्जातशक्तिविशेषस्तान्यङ्गान्यूर्ध्वं प्रक्षेप्तुं शक्नोति नान्यथा, द्रव्यनिमित्तं वीर्यं संसारिणामुपजायत इति वचनप्रामाण्यात्तथेहापि भावनीयम् ॥ १७ ॥

ननु प्रायोग्यान् पुद्गलान् गृह्णात्यालम्बते चेत्युक्तं तत्र के पुद्गला ग्रहणप्रायोग्याः के चाग्रहणप्रायोग्या इति शिष्यजिज्ञासायां ग्रहणाग्रहणप्रायोग्याः पुद्गलवर्गणाः प्ररूपयति—

परमाणुसंखऽसंखाऽणंतपएसा अन्नवणंतगुणा । सिद्धाणंतभागो आहारगवग्गणा तितणू ॥ १८ ॥

व्याख्या—एकैकपरमाणुरूपाः तथा सङ्ख्यातप्रदेशा असङ्ख्यातप्रदेशाश्च वर्गणा भवन्ति । तत्रैकैके परमाणवः परमाणुवर्गणाः । इह च वर्गणाशब्दः समुदायवाची वर्गणायोग्यत्वमादाय समर्थनीयः । एकैकस्मिन् परमाणौ वर्गणाशब्दोऽनेकपर्यायोपनिपातापेक्षया द्रष्टव्य इत्यप्याहुः । यदि च परमाणूनां वर्गणा परमाणुवर्गणेत्युच्येत तदा जगति ये केऽपि परमाणवस्तत्समुदायः परमाणुवर्गणा प्रसज्येत । तथा च तस्यां वक्ष्यमाणाङ्गुलासङ्ख्यभागावगाहनाविरोधः, समुदितानां सर्वपरमाणूनां सर्वलोकगतत्वात् । तत एकैके परमाणव एव परमाणुवर्गणाः, एताश्चानन्ताः सर्वाग्रेण लोकव्यापिन्यश्च । परमाणुद्वयसमुदायरूपा द्विपरमाणुवर्गणाः, ता अप्यनन्ताः सकललोकव्यापिन्यश्च । एवं सर्वा अपि वर्गणाः प्रत्येकमनन्ताः सकललोकव्यापिन्यश्चावगन्तव्याः । त्रिपरमाणुसमुदायरूपास्त्रिपरमाणुवर्गणाः । एवमुत्तरोत्तरवृद्ध्या सङ्ख्येयपरमाण्वात्मकाः सङ्ख्येयवर्गणा वाच्याः । असङ्ख्येयपरमाण्वात्मका असङ्ख्याताः, असङ्ख्यातस्यासङ्ख्यातभेदात्मकत्वात् । अनन्तपरमाण्वात्मका यथोत्तरवृद्ध्याऽनन्ताः, अनन्तस्यानन्तभेदात्मकत्वात् । एताश्च मूलत आरभ्य सर्वा

अपि जीवानामल्पपरमाणुतया स्थूलपरिणामत्वेन चाग्रहणप्रायोग्याः, अनन्तपरमाणवात्मका अप्यर्वाक्तन्यो न ग्रहणप्रायोग्याः । यास्त्वजघन्योऽनन्तगुणानां सिद्धानन्तभागकल्पानां परमाणूनां समुदायात्मकास्ता "आहारवग्गण त्ति" आहरणमाहारो ग्रहणमित्यर्थः, आहार एवाहारकः, तत्प्रायोग्या वर्गणा भवन्ति ग्रहणप्रायोग्या वर्गणा भवन्तीत्यर्थः । किंविषया इत्याह—"तितणू" औदारिकवैक्रियाहारकरूपतनुत्रयविषया इत्यर्थः ॥ १८ ॥

अग्गहणंतरियाउ तेयगभासामणे य कम्मे य । धुवअधुवअचित्तासुन्नाचउअंतरेसुप्पिं ॥ १९ ॥

व्याख्या—एतास्तथा तैजसभाषाप्राणापानमनःकर्मणि विषयेऽग्रहणप्रायोग्यवर्गणान्तरिता ग्रहणप्रायोग्या वर्गणा भवन्ति तथाहि—अजघन्यानन्तगुणसिद्धानन्तभागकल्पपरमाणुसमुदायरूपा वर्गणौदारिकशरीरनिष्पादनाय ग्रहणप्रायोग्या भवति, सा च जघन्या । तत एकपरमाणवधिकस्कन्धरूपा द्वितीया ग्रहणप्रायोग्या । द्विपरमाणवधिकस्कन्धरूपा तृतीया । एवमेकैकपरमाणवधिकस्कन्धरूपास्तावद्वाच्या यावदुत्कृष्टा औदारिकशरीरप्रायोग्या वर्गणा । जघन्याया औदारिकग्रहणप्रायोग्यायाः सकाशादुत्कृष्टा वर्गणा विशेषाधिका । विशेषश्च तस्या एव वर्गणाया अनन्ततमो भागः । औदारिकप्रायोग्योत्कृष्टवर्गणात एकपरमाणवधिकस्कन्धरूपा वर्गणाऽग्रहणप्रायोग्या, सा च जघन्या । ततो द्विपरमाणवधिकस्कन्धरूपा द्वितीयाऽग्रहणप्रायोग्या । एवमेकैकपरमाणवधिकस्कन्धरूपा अग्रहणवर्गणास्तावद्वक्तव्या यावदुत्कृष्टा अग्रहणप्रायोग्या भवति । ताश्च जघन्यायाः सकाशादनन्तगुणाः । गुणकारश्चाजघन्यानन्तगुणसिद्धानन्तभागकल्पराशिप्रमाणो द्रष्टव्यः । एतासां चाग्रहणप्रायोग्यतौदारिकं प्रति प्रभूतपरमाणुनिष्पन्नत्वात्सूक्ष्मपरिणामत्वाच्च, वैक्रियं प्रति तु स्वल्प-

परमाणवात्मकत्वात्स्थूलपरिणामत्वाच्चावसेया । एवमुत्तरत्रापि भावनीयं । उक्ताग्रहणप्रायोग्योत्कृष्टवर्गणात एकपरमाणवधिकस्कन्धरूपा वैक्रियशरीरप्रायोग्या जघन्या वर्गणा । ततो द्विपरमाणवधिकस्कन्धरूपा द्वितीया । एवमेकैकपरमाणवधिकस्कन्धरूपा वर्गणा वैक्रियग्रहणप्रायोग्यास्तावद्याच्या यावदुत्कृष्टा ग्रहणप्रायोग्या वर्गणा आयाति । ताश्च जघन्यायाविशेषाधिकाः । विशेषश्च तस्या एव वर्गणाया अनन्ततमो भागः । वैक्रियशरीरग्रहणप्रायोग्योत्कृष्टवर्गणात एकपरमाणवधिकस्कन्धरूपा जघन्याऽग्रहणप्रायोग्या वर्गणा । ततो द्विपरमाणवधिकस्कन्धरूपा द्वितीयाऽग्रहणप्रायोग्या । एवमेकैकपरमाणवधिकस्कन्धरूपा अग्रहणप्रायोग्यास्तावद्याच्या यावदुत्कृष्टा अग्रहणप्रायोग्या वर्गणा । ताश्च जघन्यायाअनन्तगुणाः । गुणकारश्चाभव्यानन्तगुणसिद्धानन्तभागकल्परशिमानः । तत उत्कृष्टाग्रहणप्रायोग्यवर्गणात एकपरमाणवधिकस्कन्धरूपा वर्गणाऽऽहारकशरीरप्रायोग्या । सा च जघन्या । ततो द्विपरमाणवधिकस्कन्धरूपा द्वितीया । एवमेकैकपरमाणवधिकस्कन्धरूपा आहारकग्रहणप्रायोग्यास्तावद्वक्तव्या यावदुत्कृष्टाहारकग्रहणप्रायोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टास्तदनन्ततमभागेन विशेषाधिकाः । आहारकशरीरप्रायोग्योत्कृष्टवर्गणात एकपरमाणवधिकस्कन्धरूपाऽग्रहणप्रायोग्या जघन्या वर्गणा । तत एकैकपरमाणवधिकस्कन्धरूपा अग्रहणप्रायोग्यास्तावद्वक्तव्या यावदुत्कृष्टा । जघन्यायाश्चोत्कृष्टाऽभव्यानन्तगुणसिद्धानन्तभागकल्परशिप्रमाणेनानन्तगुणा । इह चूर्णिकृत्प्रभृतय औदारिकवैक्रियाहारकशरीरग्रहणप्रायोग्यवर्गणानामन्तराले ऽग्रहणवर्गणा नेच्छन्ति, परमावश्यकभाष्यादावेता इष्यन्त इति तन्मतेनोक्ताः । आहारकशरीरप्रायोग्योत्कृष्टवर्गणात एकपरमाणवधिकस्कन्धरूपा तैजसशरीरप्रायोग्या जघन्या वर्गणा । तत

एकैकपरमाणवधिकस्कन्धरूपास्तावद्वक्तव्या यावदुत्कृष्टा तैजसप्रायोग्या वर्गणा । तत एकपरमाणवाधिक्ये जघन्याऽग्रहणवर्गणा । तत एकैकपरमाणवधिकस्कन्धरूपास्तावद्वाच्या यावदुत्कृष्टा अग्रहणवर्गणा । तत उत्कृष्टाग्रहणवर्गणात एकपरमाणवधिकस्कन्धरूपा जघन्या भाषाप्रायोग्या वर्गणा, यत्पुद्गलान् गृहीत्वा जन्तवः सत्यादिभाषारूपतया परिणमय्यालम्ब्य च विसृजन्ति । तत एकैकपरमाणवधिकस्कन्धरूपा भाषाप्रायोग्या वर्गणास्तावद्वाच्या यावदुत्कृष्टा । तत एकपरमाणवाधिक्ये जघन्याऽग्रहणप्रायोग्या । तत एकैकपरमाणवधिकस्कन्धरूपास्तावद्वाच्या यावदुत्कृष्टा अग्रहणप्रायोग्या वर्गणा । तत एकपरमाणवधिकस्कन्धरूपा जघन्या प्राणापानयोर्वर्गणा, यत्पुद्गलान् गृहीत्वा जन्तवः प्राणापानरूपतया परिणमय्यालम्ब्य च विसृजन्ति । तत एकैकपरमाणवधिकस्कन्धरूपास्तावद्वाच्या यावदुत्कृष्टा ग्रहणप्रायोग्या वर्गणा । प्राणापानयोग्योत्कृष्टवर्गणात एकपरमाणवाधिक्ये जघन्याऽग्रहणप्रायोग्या । तत एकैकपरमाणवधिकस्कन्धरूपास्तावद्वक्तव्या यावदुत्कृष्टा अग्रहणप्रायोग्या । ततोऽग्रहणप्रायोग्योत्कृष्टवर्गणात एकपरमाणवधिकस्कन्धरूपा मनःप्रायोग्या जघन्या वर्गणा, यत्पुद्गलान् गृहीत्वा जन्तवः सत्यादिमनोरूपतया परिणमय्यालम्ब्य च विसृजन्ति । तत एकैकपरमाणवधिकस्कन्धरूपास्तावद्वाच्या यावदुत्कृष्टा मनःप्रायोग्या वर्गणा । उत्कृष्टमनःप्रायोग्यवर्गणात एकपरमाणवाधिक्ये जघन्याऽग्रहणप्रायोग्या । तत एकैकपरमाणवधिकस्कन्धरूपास्तावद्वाच्या यावदुत्कृष्टाऽग्रहणप्रायोग्या वर्गणा । ततोऽग्रहणप्रायोग्योत्कृष्टवर्गणात एकपरमाणवधिकस्कन्धरूपा जघन्या कर्मप्रायोग्या वर्गणा, यत्पुद्गलान् गृहीत्वा जीवा ज्ञानावरणादिरूपतया परिणमयन्ति । तत एकैकपरमाणवधिकस्कन्धरूपास्तावद्वाच्या यावदुत्कृष्टा कर्मप्रायोग्या वर्गणा । सर्वत्रो-

त्कृष्टा ग्रहणप्रायोग्यवर्गणा स्वजघन्यवर्गणानन्ततमभागरूपेण विशेषेण स्वस्वजघन्यवर्गणातोऽधिका, अग्रहणप्रायोग्योत्कृष्टवर्गणा च स्वजघन्यवर्गणाऽपेक्षयाऽभव्यानन्तगुणसिद्धानन्तभागकल्पराशिप्रमाणेनानन्तगुणा द्रष्टव्या । "भासामणे य" इत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वाद्भाषावर्गणानन्तरमग्रहणवर्गणान्तरिताः प्राणापानवर्गणा द्रष्टव्याः । ताश्च व्याख्याता एव । "कम्मे य" इत्यत्र चशब्दः सर्वसमुच्चये। अथैतासामौदारिकादिवर्गणानां वर्णादि प्रसङ्गतो निरूप्यते—तत्रौदारिकवैक्रियाहारकवर्गणाः पञ्चवर्णाः द्विगन्धाः पञ्चरसा अष्टस्पर्शाश्च । यद्यपि परमाणोरेक एव वर्ण एक एव रस एक एव गन्धो द्वावेव चाविरुद्धौ स्पर्शौ भवतस्तथापि समुदाये कोऽपि परमाणुः केनापि वर्णादिना युक्तो भवतीति समुदाये पञ्चवर्णादित्वप्रतिपादनमविरुद्धं तैजसप्रायोग्याद्याश्च वर्गणाः पञ्चवर्णाः पञ्चरसा द्विगन्धाश्च ज्ञातव्याः, स्पर्शचिन्तायां तु चतुःस्पर्शाः । तत्र मृदुलघुरूपौ द्वौ स्पर्शाववस्थितौ, अन्यौ तु द्वौ स्निग्धोष्णौ स्निग्धशीतौ रूक्षोष्णौ रूक्षशीतौ वाऽनियतौ । तदिदमुक्तं—"पंचरसपंचवण्णेहिं परिणया अट्ठफास दोगंधा । जावाहारगजोग्गा चउफासविसेसिया उवरिं ॥ १ ॥" तथौदारिकवर्गणाः प्रदेशार्थतया सर्वस्तोकास्ताभ्यो वैक्रियशरीरप्रायोग्या अनन्तगुणाः । ताभ्य आहारकप्रायोग्या अनन्तगुणाः । एवं तैजसभाषाप्राणापानमनःकर्मप्रायोग्या अपि वर्गणा यथोत्तरमनन्तगुणा वाच्याः । ध्रुवअध्रुवेत्यादि कर्मप्रायोग्योत्कृष्टवर्गणानन्तरं ध्रुवाचित्तद्रव्यवर्गणाः, तदनन्तरं चाध्रुवाचित्त(द्रव्य)वर्गणाः । ततः "सुन्ना चउ त्ति" चतस्रो ध्रुवशून्यवर्गणाः । तासां चतसृणां ध्रुवशून्यवर्गणानामन्तरे उपरिष्टात् प्रत्येकतनुषु बादरसूक्ष्मनिगोदे तथा महास्कन्धे वर्गणा यथासङ्ख्यं भवन्ति । तथाहि—प्रथमध्रुवशून्यवर्गणाया उपरि प्रत्येकशरीरिवर्गणा । द्वितीयध्रुवशून्यवर्गणाया उपरि बाद-

रनिगोदवर्गणा तृतीयध्रुवशून्यवर्गणाया उपरि सूक्ष्मनिगोदवर्गणा । चतुर्थध्रुवशून्यवर्गणाया उपरि महास्कन्धवर्गणा । तत्र कर्मप्रायोग्योत्कृष्टवर्गणानन्तरमेकपरमाण्वधिकस्कन्धरूपा जघन्या ध्रुवाचित्त(द्रव्य)वर्गणा । तत एकैकपरमाण्वधिकस्कन्धरूपा ध्रुवाचित्त(द्रव्य)वर्गणास्तावद्याच्या यावदुत्कृष्टा ध्रुवाचित्तद्रव्यवर्गणा । ध्रुवाचित्तद्रव्यवर्गणा नाम या सदैव लोके प्राप्यन्ते । तथाहि—एतासां मध्येऽन्या उत्पद्यन्तेऽन्या विनश्यन्ति, न पुनरेतासां यथास्थितसङ्ख्यानामन्यतमयाऽपि कदाचनापि लोको विरहितो भवति, अचित्तत्वं चासां जीवेन कदाचिदप्यग्रहणादवसेयं, जीवेन ग्रहणे त्वौदारिकादीनामिव कथञ्चित्सचित्तत्वमपि स्यादिति । जघन्यायाश्च सकाशादुत्कृष्टा वर्गणाऽनन्तगुणा । गुणकारश्च सर्वजीवानन्तगुणराशिप्रमाणो द्रष्टव्यः । तत एकपरमाण्वधिकस्कन्धरूपा जघन्याऽध्रुवाचित्तद्रव्यवर्गणा । तत एकैकपरमाण्वाधिक्येनाध्रुवाचित्तवर्गणास्तावद्याच्या यावदुत्कृष्टाऽध्रुवाचित्तद्रव्यवर्गणा भवति। अध्रुवाचित्तद्रव्यवर्गणा नाम यासां मध्ये काश्चिद्वर्गणाः कदाचिल्लोके भवन्ति । अत एवैताः सान्तरनिरन्तरा अप्युच्यन्ते । जघन्यायाश्च सकाशादुत्कृष्टा वर्गणा सर्वजीवानन्तगुणराशिप्रमाणेनानन्तगुणा । तत एकपरमाण्वधिकस्कन्धरूपा जघन्या प्रथमध्रुवशून्यवर्गणा । तत एकैकपरमाण्वाधिक्येन प्रथमध्रुवशून्यवर्गणास्तावद्वक्तव्या यावदुत्कृष्टा प्रथमध्रुवशून्यवर्गणा भवति । ध्रुवशून्यवर्गणा नाम याः कदाचनापि लोके न भवन्ति, केवलमुपरितनवर्गणानां बाहुल्यपरिज्ञानार्थं प्ररूपणामात्रमेव क्रियते । जघन्यायाश्च वर्गणायाः सकाशादुत्कृष्टाऽनन्तगुणा । गुणकारश्च सर्वजीवानन्तगुणराशिप्रमाणः । तत एकपरमाण्वधिकस्कन्धरूपा जघन्या प्रत्येकशरीरिद्रव्यवर्गणा । केयं प्रत्येकशरीरिद्रव्यवर्गणा नाम ? उच्यते—प्रत्येकशरीरिणां यथासंभवमौदारिकवैक्रिया-

हारकतैजसकार्मणेषु शरीरनामकर्मसु ये प्रत्येकं विश्रसापरिणामेनोपचयमापन्नाः सर्वजीवानन्तगुणाः पुञ्जास्ते प्रत्येकशरीरिद्रव्यवर्गणाः । उक्तं च शतकबृहच्चूर्णौ—"पत्तेयवग्गणा इह पत्तेयाणंतउरलमाईणं । पंचण्हसरीराणं तणुकम्मपएसगा जे उ ॥ १ ॥ तत्थेक्केकपएसे वीससपरिणामउवचिया हुंति । सव्वजियाणंतगुणा पत्तेया वग्गणा ताउ ॥ २ ॥" तत एकपरमाण्वधिकस्कन्धरूपा द्वितीया प्रत्येकशरीरिद्रव्यवर्गणा । एवमेकैकपरमाण्वाधिक्येन प्रत्येकशरीरिद्रव्यवर्गणास्तावद्वक्तव्या यावदुत्कृष्टा । जघन्यायाश्चोत्कृष्टाऽसङ्ख्येयगुणा । गुणकारश्च सूक्ष्मक्षेत्रपल्योपमासङ्ख्येयभागलक्षणः । कथमेतदवगम्यत इति चेदुच्यते—जघन्ये कर्मप्रदेशोपचये जघन्या तत्र वैश्रसिकी प्रत्येकशरीरिद्रव्यवर्गणोत्कृष्टे चोत्कृष्टा । जघन्यश्च कर्मप्रदेशोपचयो जघन्ययोगाद्भवति । उत्कृष्टश्चोत्कृष्टात् । जघन्याच्च योगस्थानादुत्कृष्टं योगस्थानं सूक्ष्मक्षेत्रपल्योपमासङ्ख्येयभागगुणितमेव प्राप्यते । ततो जघन्यात् कर्मप्रदेशोपचयादुत्कृष्टः कर्मप्रदेशोपचयस्तावन्मात्र एव, जघन्यायाः सकाशादुत्कृष्टा प्रत्येकशरीरिद्रव्यवर्गणाऽपि च तावत्प्रमाणैव सिध्यतीति । ततोऽनन्तरमेकपरमाण्वधिकस्कन्धरूपा जघन्या द्वितीयध्रुवशून्यवर्गणा, द्विपरमाण्वधिकस्कन्धरूपा द्वितीया । एवमेकैकपरमाण्वधिकस्कन्धरूपद्वितीयध्रुवशून्यवर्गणास्तावद्वाच्या यावदुत्कृष्टा द्वितीयध्रुवशून्यवर्गणा । जघन्यायाश्चोत्कृष्टाऽसङ्ख्येयगुणा । गुणकारश्चासङ्ख्येयलोकाकाशप्रदेशप्रमाणो द्रष्टव्यः । तत एकपरमाण्वधिकस्कन्धरूपा जघन्या बादरनिगोदद्रव्यवर्गणा । अथ केयं बादरनिगोदद्रव्यवर्गणा नाम ? उच्यते—बादरनिगोदजीवानामौदारिकतैजसकार्मणेषु शरीरनामकर्मसु ये प्रत्येकं सर्वजीवानन्तगुणाः पुञ्जा विश्रसापरिणामेनोपचयमायान्ति ते बादरनिगोदद्रव्यवर्गणाः । यद्यपि केषांचिद्बादरनिगोदजी-

वानां वैक्रियाहारकशरीरनामकर्मणी अपि संज्ञवतस्तथापि ते प्रथमसमयादेव निरन्तरमुद्वत्यमानत्वादत्यन्तमसारे इति न विवक्ष्येते । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया बादरनिगोदद्रव्यवर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा वर्गणास्तावद्वाच्या यावदुत्कृष्टा । जघन्यायाश्चोत्कृष्टा क्षेत्रपल्योपमासंख्येयभागलक्षणेन गुणकारेणासंख्येयगुणा । अत्र युक्तिः प्रत्येकशरीरिद्रव्यवर्गणायामिव भावनीया । तत एकपरमाण्वधिकस्कन्धरूपा जघन्या तृतीयध्रुवशून्यवर्गणा । तत एकैकपरमाण्वधिकस्कन्धरूपा वर्गणास्तावद्वाच्या यावदुत्कृष्टा तृतीयध्रुवशून्यवर्गणा । जघन्यायाश्चोत्कृष्टाऽसंख्येयगुणा । गुणकारश्चाङ्गुलमात्रक्षेत्रे आवलिकासंख्येयतमभागस्थयावत्समयप्रमाणेषु वर्गमूलेषु गृहीतेषु यत् चरमं वर्गमूलं तदसंख्येयतमभागे यावन्त आकाशप्रदेशास्तावत्प्रमाणो द्रष्टव्यः । तत एकपरमाण्वधिकस्कन्धरूपा वर्गणा जघन्या सूक्ष्मनिगोदवर्गणा । सा च तदौदारिकशरीराद्याश्रितविश्रसोपचितपुद्गलरूपा बादरनिगोदवर्गणावदविशेषेणावगन्तव्या, यावदुत्कृष्टा । जघन्यायाश्चोत्कृष्टाऽसंख्येयगुणा । गुणकारश्चावलिकाया असंख्येयतमभागे यावन्तः समयास्तावत्प्रमाणो द्रष्टव्यः । सूक्ष्मनिगोदजीवानां ह्युत्कृष्टं योगस्थानं जघन्यादावलिकासंख्येयभागगुणितमेव प्राप्यते, नाधिकं । योगाधीना च कर्मप्रदेशोपचयवृद्धिः, तदधीना च सूक्ष्मनिगोदवर्गणेति । तत एकपरमाण्वधिकस्कन्धरूपा वर्गणा जघन्या तुरीयध्रुवशून्यवर्गणा । तत एकैकपरमाण्वधिकस्कन्धरूपास्तावद्वाच्या यावदुत्कृष्टा तुरीयध्रुवशून्यवर्गणा । जघन्यायाश्चोत्कृष्टाऽसंख्येयगुणा । गुणकारश्च प्रतरासंख्येयभागवृत्त्यसंख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणः । तत एकपरमाण्वधिकस्कन्धरूपा वर्गणा जघन्या महास्कन्धवर्गणा । महास्कन्धवर्गणा नाम ये पुद्गलस्कन्धा विश्रसापरिणामेन टङ्ककूटपर्व-

ताद्याश्रिताः । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया महास्कन्धवर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा महास्कन्धवर्गणास्तावद्याच्या यावदुत्कृष्टा । जघन्यायाश्चोत्कृष्टाऽसङ्ख्येयगुणा । गुणकारश्च पल्योपमासङ्ख्येयभागलक्षणो द्रष्टव्यः । इमाश्च महास्कन्धवर्गणास्त्रसकायभूयस्त्वे स्वल्पाः, तदल्पत्वे तु प्रभूताः प्राप्यन्त इति वस्तुस्वभाव एषः । तदुक्तं शतकबृहच्चूर्णौ—महखंधवग्गणा टंककूड तह पव्वयाइगाणेसु । जे पोग्गला समसिया महखंधा ते उ वुच्चंति ॥ १ ॥ तत्थ तसकायरासी जम्मि य काले होंति बहुगो अ । महखंधवग्गणाउ तम्मि य काले भवे थोवा ॥ २ ॥ जं पुण होइ अ काले रासी तसकाइयाण थोवो उ । महखंधवग्गणाउ तहिं काले होंति बहुगाउ ॥ ३ ॥" एताश्च परमाणुवर्गणाद्या महास्कन्धवर्गणान्ताः "गुणणिप्फण्णसनाम" त्ति गुणैः कृत्वा निष्पन्नं स्वनाम यासां ताः । तथाहि—एकैकपरमाणवः परमाणुवर्गणा, द्वयोः परमाण्वोर्वर्गणा द्विपरमाणुवर्गणा इत्येवं तन्नाम्नामन्वर्थता विद्यत एवेति । तथा "असंखभागंगुलवगाहो त्ति" सर्वासामपि वर्गणानामवगाहोऽङ्गुलस्यासङ्ख्येयो भागः । यद्यपि सामस्त्येनैताः प्रत्येकमनन्ताः सकललोकाश्रिताश्च प्रागुक्तास्तथापि एकैकाः सत्योऽङ्गुलासङ्ख्येयभागमात्रक्षेत्रावगाहा एव भवन्तीत्यर्थः । तथा कार्मणशरीरप्रायोग्यवर्गणात आरभ्यावार्ग् यावदौदारिकशरीरप्रायोग्या वर्गणास्तावत्क्षेत्रावगाहः पश्चानुपूर्व्याऽसङ्ख्येयगुणो द्रष्टव्यः ॥ २० ॥

अथ तान् पुद्गलान् जीवो देशेन गृह्णाति सर्वात्मना वेति प्रश्नावकाशे सत्याह—

एगमवि गहणदव्वं सव्वप्पणयाइ जीवदेसम्मि । सव्वप्पणया सव्वत्थ वावि सव्वे गहणखंधे ॥ २१ ॥

व्याख्या—इह जीवः स्वप्रदेशावगाढमेव दलिकं गृह्णाति, न त्वनन्तरपरंपरप्रदेशावगाढमित्येकस्मिन् जीवप्रदेशे यद-

वगाढं ग्रहणऽव्यं तदेकमपि सर्वात्मना सर्वैरेवात्मप्रदेशैर्गृह्णाति जीवप्रदेशानां सर्वेषामपि शृङ्खलावयवानामिव परस्परं सम्बन्धविशेषादेकस्मिन् प्रदेशे स्वक्षेत्रावगाढग्रहणप्रायोग्यऽव्यग्रहणाय व्याप्रियमाणे सर्वेषामप्यनन्तरपरंपरतया तद्ग्रहणव्यापारसंज्ञवाऽस्ताग्रेण गृह्यमाणे घटादाविव मणिबन्धकूर्परांसाद्यवयवानां। तथा "सव्वत्थ वावि" त्ति सर्वेष्वपि जीवप्रदेशेषु येऽवगाढा ग्रहणप्रायोग्याः स्कन्धास्तानपि सर्वान् गृह्णाति जीवः सर्वात्मना एकैकप्रदेशस्थस्कन्धग्रहणे सर्वव्यापारसिद्धौ सर्वत्र सर्वव्यापारस्य न्यायप्राप्तत्वात् ॥ २१ ॥

इह पुद्गलऽव्याणां परस्परं सम्बन्धः स्नेहतो ज्ञवतीति स्नेहप्ररूपणा कर्त्तव्या। सा च त्रिधा—स्नेहप्रत्ययस्पर्धकप्ररूपणा, नामप्रत्ययस्पर्धकप्ररूपणा, प्रयोगप्रत्ययस्पर्धकप्ररूपणा च। तत्र स्नेहनिमित्तस्य स्पर्धकस्य प्ररूपणा स्नेहप्रत्ययस्पर्धकप्ररूपणा। शरीरबन्धननामकर्मोदयतः परस्परं बद्धानां शरीरपुद्गलानां स्नेहमधिकृत्य स्पर्धकप्ररूपणा नामप्रत्ययस्पर्धकप्ररूपणा। प्रकृष्टो योगः प्रयोगस्तेन प्रत्ययज्ञूतेन कारणज्ञूतेन ये गृहीताः पुद्गलास्तेषां स्नेहमधिकृत्य स्पर्धकप्ररूपणा प्रयोगप्रत्ययस्पर्धकप्ररूपणा। तत्र प्रथमतः स्नेहप्रत्ययस्पर्धकप्ररूपणां चिकीर्षुराह—

नेहप्पच्चयफड्डगमेगं अविज्ञागवग्गणा णंता। हस्सेव बहू बद्धा असंखलोगे ऽगुणहीणा ॥ २२ ॥

व्याख्या—स्नेहप्रत्ययं स्नेहनिमित्तमेकैकस्नेहाविज्ञागवृद्धपुद्गलवर्गणासमुदायरूपं स्पर्धकमेकं। तस्मिँश्च स्पर्धकेऽविज्ञागवर्गणा एकैकस्नेहाविज्ञागाधिकपरमाणुसमुदायरूपा अनन्ताः। तत्र ह्रस्वेनाल्पेन स्नेहेन ये बद्धाः पुद्गलास्ते बहवोऽर्थात् प्रज्ञूतेन स्नेहेन बद्धाः स्तोकाः। तथाऽसङ्ख्यलोके द्विगुणहीना आदिवर्गणायाः परतोऽसङ्ख्येयलोकाकाशप्रदेश-

प्रमाणवर्गणास्वतिक्रान्तासु याऽग्रिमवर्गणा तस्यां पुद्गला आदिवर्गणागतपुद्गलापेक्षया द्विगुणहीनाः । ततोऽपि तावत्प्रमाणासु वर्गणास्वतिक्रान्तास्वग्रिमवर्गणायां पुद्गला द्विगुणहीनाः । एवं तावद्याच्यं यावदुत्कृष्यमाणासङ्क्षेयभागहानिगता चरमा वर्गणेति । इयमत्र भावना—ये खलु सर्वोत्कृष्टस्नेहस्य केवलिप्रज्ञाच्छेदनकेन छित्त्वा निर्विभागा भागाः क्रियन्ते ते स्नेहाविभागाः । तत्र केचित् परमाणवो जघन्येकेन स्नेहाविभागेन युक्ताः सन्ति तेषां समुदायः प्रथमा वर्गणा । द्वाभ्यां स्नेहाविभागाभ्यां युक्ता ये परमाणवः सन्ति तेषां समुदायो द्वितीया । एवं स्नेहाविभागैः सङ्क्षेयैर्युक्तानां सङ्क्षेया वर्गणा वाच्याः, असङ्क्षेयैर्युक्तानामसङ्क्षेयाः, अनन्तैर्युक्तानां चानन्ताः । सर्वाग्निश्चाग्निरेकमेव स्पर्धकं भवति, अपान्तराले एकैकाविभागवृद्धिव्यवच्छेदाभावात् । एकैकाविभागवृद्धिव्यवच्छेदो हि स्पर्धकपर्यवसानं । उक्तं च—"रूवुत्तरवुड्ढीए छेउ फड्डगाणं" ति । द्विधा चैतासु वर्गणाप्ररूपणाऽनन्तरोपनिधया परंपरोपनिधया च । तत्रादावनन्तरोपनिधया प्ररूपणा क्रियते—प्रथमायां वर्गणायामेकस्नेहाविभागाणुसमुदायरूपायां यावन्तः पुद्गलास्तदपेक्षया द्वितीयस्यामसङ्क्षेयभागहीनाः । ततोऽपि तृतीयस्यामसङ्क्षेयभागहीनाः । एवं प्रतिवर्गणामसङ्क्षेयभागहान्या पुद्गलास्तावद्याच्या यावदनन्ता वर्गणा गच्छन्ति । ततोऽनन्तरायां पुद्गलाः प्राक्तनवर्गणागतपुद्गलापेक्षया सङ्क्षेयभागहीनाः । ततोऽग्रेतन्यामपि पुद्गलाः सङ्क्षेयभागहीनाः । एवं सङ्क्षेयभागहान्याऽप्यनन्ता वर्गणा वाच्याः । तत ऊपरितन्यां वर्गणायां पुद्गलाः प्राक्तनवर्गणागतपुद्गलापेक्षया सङ्क्षेयगुणहीनाः । ततोऽग्रेतन्यामपि वर्गणायां पुद्गलाः सङ्क्षेयगुणहीनाः । एवं सङ्क्षेयगुणहान्याप्यनन्ता वर्गणा वाच्याः । ततोऽनन्तरायां वर्गणायां पुद्गलाः प्राक्तनवर्गणागतपुद्गलापेक्षयाऽसङ्क्षेयगुणहीना भवन्ति ।

ततोऽग्रेतन्यामपि वर्गणायां पुञ्जला असङ्ख्येयगुणहीनाः । एवमसङ्ख्येयगुणहान्याऽप्यनन्ता वर्गणा वाच्याः । ततोऽनन्तरायां वर्गणायां पुञ्जलाः प्राक्तनवर्गणागतपुञ्जलापेक्षयाऽनन्तगुणहीना भवन्ति । ततोऽग्रेतन्यामपि वर्गणायां पुञ्जला अनन्तगुणहीना वाच्याः । एवमनन्तगुणहान्याऽप्यनन्ता वर्गणा वाच्याः यावत् सर्वोत्कृष्टा वर्गणाः । तदेवं कृतानन्तरोपनिधया प्ररूपणा, अथ परंपरोपनिधया क्रियते—तत्राद्यवर्गणायाः परतोऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणवर्गणातिक्रमे या वर्गणाऽऽगच्छति, तस्यां पुञ्जला आद्यवर्गणागतपुञ्जलापेक्षया द्विगुणहीना भवन्ति अर्धा भवन्तीत्यर्थः । ततः पुनरपि तावद्वर्गणातिक्रमे याऽनन्तरवर्गणा तस्यां पुञ्जला अर्धा भवन्ति । एवं भूयो भूयस्तावद्वाच्यं यावदसङ्ख्येयभागहानिगता चरमा वर्गणा । ततः परं सङ्ख्येयानां सङ्ख्येयभागहानिगतानां वर्गणानामतिक्रमे याऽनन्तरवर्गणा, तस्यां पुञ्जला असङ्ख्येयभागहानिगतचरमवर्गणापुञ्जलापेक्षयाऽर्धा भवन्ति । ततः पुनरपि सङ्ख्येया वर्गणा अतिक्रम्यानन्तरायां वर्गणायां पुञ्जला अर्धा भवन्ति । एवं भूयो भूयस्तावद्वाच्यं यावत्सङ्ख्येयभागहानावपि चरमा वर्गणा । उपरितनीषु तिसृषु हानिष्वियं द्विगुणहानिमार्गणलक्षणा परंपरोपनिधा न संभवति, यतः प्रथमायामपि सङ्ख्येयगुणहानिवर्गणायां पुञ्जलाः प्राक्तनवर्गणातः सङ्ख्येयगुणहीनाः प्राप्यन्ते । सङ्ख्येयगुणहीनाश्च जघन्यतोऽपि त्रिगुणचतुर्गुणहीना गृह्यन्ते, न तु द्विगुणहीनाः, "सिज्झंते जत्थ जत्थ संखेज्जागहाणं तत्थ तत्थ अजहण्णमणुक्कोसयं दट्ठव्वं" इत्यनुयोगद्वारचूर्णिवचनात्, सङ्ख्येयस्य प्रायः सर्वत्राप्यजघन्योत्कृष्टस्यैव ग्रहणात् । तस्मादादित आरभ्यान्यथा परंपरोपनिधया प्ररूपणा क्रियते—असङ्ख्येयभागहानौ प्रथमान्तिमवर्गणयोरन्तराले प्रथमवर्गणापेक्षया काश्चिदसङ्ख्येयभाग-

हीनाः, काश्चित्सङ्ख्येयभागहीनाः, काश्चित्सङ्ख्येयगुणहीनाः, काश्चिदसङ्ख्येयगुणहीनाः, काश्चिदनन्तगुणहीना इत्येवमसङ्ख्येयभागहानौ प्रथमवर्गणापेक्षया पञ्चापि हानयः संभवन्ति । सङ्ख्येयभागहानावसङ्ख्येयभागहानिवर्जाः प्रथमवर्गणापेक्षया शेषाश्चतस्रो हानयः । सङ्ख्येयगुणहानौ पुनरसङ्ख्येयभागहानिसङ्ख्येयभागहानिवर्जाः शेषास्तिस्रो हानयः । असङ्ख्येयगुणहानौ काश्चिदसङ्ख्येयगुणहीनाः काश्चिदनन्तगुणहीना इति द्वे एव हानी । अनन्तगुणहानौ त्वनन्तगुणहानिरेवैकेति । कृता परंपरोपनिधया प्ररूपणा, सम्प्रत्यल्पबहुत्वमुच्यते—असङ्ख्येयभागहानौ वर्गणाः सर्वस्तोकाः, ताभ्यः सङ्ख्येयभागहानावनन्तगुणाः, ताभ्योऽपि सङ्ख्येयगुणहानावनन्तगुणाः, ताभ्योऽप्यसङ्ख्येयगुणहानावनन्तगुणाः, ताभ्योऽप्यनन्तगुणहानौ वर्गणा अनन्तगुणाः । तथाऽनन्तगुणहानौ पुद्गलाः सर्वस्तोकाः, तेभ्योऽसङ्ख्येयगुणहानावनन्तगुणाः, तेभ्योऽपि सङ्ख्येयगुणहानावनन्तगुणाः, तेभ्योऽपि सङ्ख्येयभागहानौ पुद्गला अनन्तगुणाः, तेभ्योऽप्यसङ्ख्येयभागहानौ पुद्गला अनन्तगुणाः । उक्तं च—"थोवा उ वग्गणाउ पढमहाणीइ उवरिमासु कमा । होंति अणंतगुणाउ अनन्तभागो पएसाणं॥१॥"॥२२॥

तदेवं कृता स्नेहप्रत्ययस्पर्धकप्ररूपणा, अथ नामप्रत्ययस्पर्धकप्रयोगप्रत्ययस्पर्धकप्ररूपणां कर्तुमाह—

णामप्पउंगपच्चयगेसु वि णेया अणंतगुणणाए । धणिया देसगुणा सिं जहन्नजिट्ठे सगे कट्टु ॥ २३ ॥

व्याख्या—इह नामप्रत्ययस्पर्द्धकप्ररूपणायां षडनुयोगद्वाराणि—अविभागप्ररूपणा, वर्गणाप्ररूपणा, स्पर्धकप्ररूपणा, अन्तरप्ररूपणा, वर्गणापुद्गलस्नेहाविभागसकलसमुदायप्ररूपणा, स्थानप्ररूपणा चेति । तत्रौदारिकादिशरीरपञ्चकप्रा-

योग्यानां परमाणूनां यो रसः केवलिप्रज्ञाच्छेदनकेन छिद्यते, छित्त्वा च निर्विभागा भागाः क्रियन्ते तेऽविभागा गुणपरमाणवो ऽथवा परमाणवो वाऽभिधीयन्ते । एषाऽविभागप्ररूपणा । तत्रैकेन स्नेहाविभागेन युक्ताः पुद्गलाः शरीरयोग्या न भवन्ति पञ्चदशान्यतमबन्धनयोग्या न भवन्तीत्यर्थः । नापि द्वाभ्यां स्नेहाविभागाभ्यां युक्ता नापि सङ्ख्येयैर्नाप्यसङ्ख्येयैर्नाप्यनन्तैः, किं तु सर्वजीवानन्तगुणैरनन्तानन्तैरेव, तेषां समुदायः प्रथमा वर्गणा, सा च जघन्या । तत एकैकाविभागवृद्ध्या निरन्तरं तावद्वर्गणा वाच्या यावदभव्यानन्तगुणसिद्धानन्तभागकल्पा भवन्ति । एतासां समुदाय एकं स्पर्धकं । इत ऊर्ध्वमेकादिस्नेहाविभागाधिकाः परमाणवो न प्राप्यन्ते, किं तु सर्वजीवानन्तगुणैरनन्तानन्तैरेवाधिकाः प्राप्यन्ते । तेषां समुदायो द्वितीयस्पर्धकस्य प्रथमा वर्गणा । तस्यां च स्नेहाविभागाः प्रथमस्पर्धकप्रथमवर्गणागतस्नेहाविभागेभ्यो द्विगुणा भवन्ति । तत एकैकस्नेहाविभागवृद्ध्या निरन्तरं वर्गणास्तावद्वाच्या यावदभव्यानन्तगुणसिद्धानन्तभागकल्पा भवन्ति । तासां समुदायो द्वितीयं स्पर्धकं । तत एकादिस्नेहाविभागवृद्धाः परमाणवो न प्राप्यन्ते । किं तु सर्वजीवानन्तगुणैरनन्तानन्तैः स्नेहाविभागैर्वृद्धाः प्राप्यन्ते । तेषां समुदायस्तृतीयस्पर्धकस्य प्रथमा वर्गणा । तस्यां स्नेहाविभागाः प्रथमस्पर्धकसत्कप्रथमवर्गणातस्त्रिगुणाः । तत एकैकस्नेहाविभागवृद्ध्या प्रागुक्तप्रमाणा वर्गणा वाच्याः । तासां समुदायस्तृतीयं स्पर्धकं । एवं यतिसङ्ख्यं स्पर्धकं चिन्त्यते तदादिवर्गणायां प्रथमस्पर्धकप्रथमवर्गणागतस्नेहाविभागास्तत्तत्सङ्ख्यगुणिता लभ्यन्ते । स्पर्धकानि च तान्यभव्येभ्योऽनन्तगुणानि सिद्धानन्तभागकल्पानि भवन्ति । अन्तराणि चैतेषां रूपोनस्पर्धकतुल्यानि । यतश्चतुर्णामन्तराणि त्रीण्येव भवन्तीति । तथा वर्गणा स्वानन्तर्येण द्वे वृद्धी भवतः एकैकावि-

ऩागवृद्धिरनन्तानन्तविऩागवृद्धिश्च । तत्रैकैकाविऩागवृद्धिरेकस्पर्धकस्थानां वर्गणानां यथाक्रमं, अनन्तानन्तविऩागवृद्धिश्च पाश्चात्यस्पर्धकगतचरमवर्गणापेक्षयाऽग्रिमस्य स्पर्धकस्यादिवर्गणायाः, पारंपर्येण तु प्रथमस्पर्धकप्रथमवर्गणापेक्षया षऽपि वृद्धयो ज्ञेयाः । तदेवं कृता वर्गणास्पर्धकान्तरप्ररूपणाः । अथ वर्गणागतपुञ्जस्नेहाविऩागसमुदायप्ररूपणा क्रियते— तत्र प्रथमशरीरस्थानस्य प्रथमायां वर्गणायां सर्वस्तोकाः स्नेहाविऩागाः । ततो द्वितीयशरीरस्थानस्य प्रथमवर्गणायामनन्तगुणाः । तेभ्योऽपि तृतीयशरीरस्थानस्य प्रथमवर्गणायामनन्तगुणाः । एवमनन्तगुणया श्रेण्या सर्वाण्यपि स्थानानि नेतव्यानि । अत्रान्तरे शरीरपरमाणूनामेव तत्तद्बन्धनयोग्यानामल्पबहुत्वमुच्यते । तत्रौदारिकौदारिकबन्धनयोग्याः पुञ्जाः सर्वस्तोकाः । तेभ्य औदारिकतैजसबन्धनयोग्या अनन्तगुणाः । तेभ्योऽप्यौदारिककार्मणबन्धनयोग्या अनन्तगुणाः । तेभ्योऽप्यौदारिकतैजसकार्मणबन्धनयोग्या अनन्तगुणाः । तथा वैक्रियवैक्रियबन्धनयोग्याः सर्वस्तोकाः । तेभ्योऽपि वैक्रियतैजसबन्धनयोग्याः पुञ्जा अनन्तगुणाः । तेभ्योऽपि वैक्रियकार्मणबन्धनयोग्या अनन्तगुणाः । तेभ्योऽपि वैक्रियतैजसकार्मणबन्धनयोग्या अनन्तगुणाः । तथा आहारकाहारकबन्धनयोग्याः पुञ्जाः सर्वस्तोकाः । तेभ्य आहारकतैजसबन्धनयोग्या अनन्तगुणाः । तेभ्योऽप्याहारककार्मणबन्धनयोग्या अनन्तगुणाः । तेभ्योऽप्याहारकतैजसकार्मणबन्धनयोग्या अनन्तगुणाः । तेभ्योऽपि तैजसतैजसबन्धनयोग्या अनन्तगुणाः । तेभ्योऽपि तैजसकार्मणबन्धनयोग्या अनन्तगुणाः । तेभ्योऽपि कार्मणकार्मणबन्धनयोग्या अनन्तगुणा इति । सांप्रतं स्थानप्ररूपणावसरः—तत्र प्रथमस्पर्धकादारभ्याऽभव्यानन्तगुणसिद्धानन्तऩागकल्पैरनन्तैः स्पर्धकैरेकं प्रथमं शरीरप्रायोग्यं स्थानं ऩवति । ततस्तत्तिऩिरेव स्पर्ध-

कैरनन्तनागवृद्धैर्द्वितीयं शरीरस्थानं । नूयस्तितिरेव स्पर्धकैरनन्तनागवृद्धैस्तृतीयं शरीरस्थानं । एवं निरन्तरमनन्तनागवृद्धानि शरीरस्थानान्यङ्गुलमात्रक्षेत्रासङ्ख्येयनागगतप्रदेशराशिप्रमाणानि वाच्यानि । एतानि समुदितान्येकं कण्डकमभिधीयते, उक्तप्रमाणसङ्ख्याया एव समये कण्डकत्वेन परिभाषणात् । तस्माच्च कण्डकादुपरि यद्वरीरस्थानं तत्कण्डकगतचरमशरीरस्थानापेक्षयाऽसङ्ख्येयनागवृद्धं । तस्मात् पराण्यन्यानि शरीरस्थानानि यथोत्तरमनन्तनागवृद्धानि कण्डकमात्राणि वाच्यानि । एतानि च समुदितानि द्वितीयं कण्डकं । तस्मादुपरि यदन्यद्वरीरस्थानं तद्द्वितीयकण्डकगतचरमशरीरस्थानापेक्षयाऽसङ्ख्येयनागवृद्धं । ततः पुनरपि कण्डकमात्राण्यनन्तनागवृद्धानि वाच्यानि । तत्समुदायस्तृतीयं कण्डकं । एवमसङ्ख्येयनागान्तरितानि अनन्तनागवृद्धानि कण्डकानि तावद्वाच्यानि यावदन्तरालनामविनामसङ्ख्येयनागवृद्धानामपि स्थानानां कण्डकं परिसमाप्यते । ततश्चरमादसङ्ख्येयनागाधिकात्स्थानात् पराणि यथोत्तरमनन्तनागवृद्धानि कण्डकमात्राणि शरीरस्थानानि वाच्यानि । ततः परमेकं सङ्ख्येयनागवृद्धं स्थानं । ततो मूलादारभ्य यावन्ति स्थानानि प्रागतिक्रान्तानि तानि तथैवाभिधाय पुनरप्येकं सङ्ख्येयनागाधिकं स्थानं वक्तव्यं । एतानि चैवं सङ्ख्येयनागाधिकानि तावद्वाच्यानि यावत् कण्डकं परिपूर्यते । तत उक्तक्रमेण नूयोपि सङ्ख्येयनागाधिकस्थानप्रसङ्गे सङ्ख्येयगुणाधिकं स्थानमेकं वाच्यं । ततो नूयोऽपि मूलादारभ्य तावन्ति शरीरस्थानानि वाच्यानि । ततः पुनरप्येकं सङ्ख्येयगुणाधिकं स्थानं वाच्यं । अमून्यप्येवं सङ्ख्येयगुणाधिकानि स्थानानि तावद्वक्तव्यानि यावत्कण्डकमात्राणि भवन्ति । ततः पूर्वपरिपाट्या सङ्ख्येयगुणाधिकस्थानप्रसङ्गेऽसङ्ख्येयगुणाधिकं स्थानं वक्तव्यं । ततः पुनरपि मूलादारभ्य प्रागतिक्रान्तान्यभिधेयानि । ततो नूयो-

ऽप्येकमसङ्ख्येयगुणाधिकं वक्तव्यं । एवममून्यसङ्ख्येयगुणाधिकानि स्थानानि कण्ठकमात्राणि वक्तव्यानि । ततः पूर्वपरिपाट्याऽसङ्ख्येयगुणाधिकस्थानप्रसङ्गेऽनन्तगुणाधिकमेकं वक्तव्यं । ततः प्रागतिक्रान्तसर्वान्निधानादिक्रमेणानन्तगुणाधिकान्यपि कण्ठकमात्राणि वक्तव्यानि । तेषामुपरि पञ्चवृद्ध्यात्मकानि स्थानानि भूयोऽपि वक्तव्यानि । यत्त्वनन्तगुणवृद्धं स्थानं तन्न प्राप्यते, षट्स्थानकस्य परिसमाप्तत्वात् । एवमसङ्ख्येयानि षट्स्थानकानि शरीरस्थानेषु भवन्ति । सर्वाण्यपि च शरीरस्थानान्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि भवन्ति । उक्ता नामप्रत्ययस्पर्धकप्ररूपणा । अथ प्रयोगप्रत्ययस्पर्धकप्ररूपणा क्रियते—तत्र प्रयोगो योगः प्रकृष्टो योग इति व्युत्पत्तेः, तत्स्थानवृद्ध्या यो रसः कर्मपरमाणुषु केवलयोगप्रत्ययतो बध्यमानेषु परिवर्धते स्पर्धकरूपतया तत्प्रयोगप्रत्ययं स्पर्धकं । उक्तं च पञ्चसङ्ग्रहे—"होइ पउंगो जोगो तग्गाणविवड्ढणाइ जो उ रसो । परिवड्ढेई जीवे पउंगफड्डुं तयं बिंति ॥ १ ॥" एतत्प्ररूपणापि नामप्रत्ययस्पर्धकप्ररूपणावदवसेया । तदुक्तं—"अविभागवग्गफड्डगअंतरठाणाइ एत्थ जह पुव्विं । ठाणाइवग्गणाउं अणंतगुणणाइ गच्छंति ॥ १ ॥" अस्या अर्थः—अविभागवर्गणा स्पर्धकान्तरस्थानादिप्ररूपणा यथा पूर्वं नामस्पर्धके कृता तथाऽत्रापि प्रयोगप्रत्यये स्पर्धके कर्त्तव्या । स्थानानामाद्या वर्गणा अनन्तगुणनयाऽऽगच्छन्ति । तथाहि—प्रथमस्थानसत्कप्रथमवर्गणायां सकलपुद्गलगतस्नेहाविभागाः सर्वस्तोकाः । ततो द्वितीयस्थानगतप्रथमवर्गणायामनन्तगुणाः । ततोऽपि तृतीयस्थानगतप्रथमवर्गणायामनन्तगुणाः । एवं तावन्नेयं यावदन्तिमं स्थानमिति । "अंतरठाणाइ" इत्यत्रादिशब्दात् कण्ठकषट्स्थानकपरिग्रहः । अत एवैतदाधिक्यान्नामप्रत्ययस्पर्धकप्ररूपणायां प्रयोगप्रत्ययस्पर्धकप्ररूपणायां च प्रत्येकमष्टावप्यनुयोगद्वाराणि ज्ञेयन्ते । इदानीमल्पबहुत्व-

मुच्यते—स्नेहप्रत्ययस्पर्धकस्य जघन्यवर्गणायां सकलपुद्गलगताः स्नेहाविभागाः सर्वस्तोकाः । ततस्तस्यैवोत्कृष्टवर्गणायां तेऽनन्तगुणाः । तेभ्योऽपि नामप्रत्ययस्पर्धकस्य जघन्यवर्गणायामनन्तगुणाः । तेभ्योऽपि तस्यैवोत्कृष्टवर्गणायामनन्तगुणाः । तेभ्योऽपि प्रयोगप्रत्ययस्पर्धकस्य जघन्यवर्गणायामनन्तगुणाः । तेभ्योऽपि तस्यैवोत्कृष्टवर्गणायामनन्तगुणाः । अथ गाथाक्षरार्थ उच्यते—नामप्रत्ययेषु प्रयोगप्रत्ययेष्वपि च स्पर्धकेषु अविभागवर्गणादयः प्राग्वज्ज्ञेयाः । तथाहि—स्नेहप्रत्ययस्पर्धक इवात्राप्यविभागवर्गणा एकैकस्नेहाविभागवृद्ध्या अनन्ताः । तथा स्तोकेन स्नेहेन बद्धाः पुद्गला बहव इतरे स्तोकाः । यच्चासङ्ख्यलोके त्रिगुणहीना इत्युक्तं तदत्रासंभवान्न संबध्यते, स्नेहप्रत्ययस्पर्धकेष्वपि हि तन्न व्याख्या योजितं, यथासंभवमेव तद्योजनस्य तत्राभिप्रेतत्वात् । तथा "सिं ति" एषां स्नेहप्रत्ययनामप्रत्ययप्रयोगप्रत्ययस्पर्धकानां प्रत्येकं स्वके आत्मीये जघन्यज्येष्ठे वर्गणे बुद्ध्या पृथक्कृत्वा क्रमेण तासु "धणिय त्ति" निचिता देशगुणा निर्विभागभागरूपाः सकलपुद्गलगतस्नेहाविभागा अनन्तगुणनया ज्ञातव्याः इत्युचिताध्याहारेण व्याख्येयम् ॥ २३ ॥

तदेवं कृता पुद्गलानां मिथः संबन्धहेतुभूतस्य स्नेहस्य प्ररूपणा, अथ बन्धनकरणसामर्थ्याद्बध्यमानानां मूलोत्तरप्रकृतीनां विभागकारणमुपदर्शयन् प्रकृतिबन्धादीन् वैविक्त्येन स्पष्टयन्नाह—

मूलुत्तरपगईणं अणुभागविसेसओ हवइ भेओ । अविसेसियरसपगइउ पगइबंधो मुणेयव्वो ॥ २४ ॥

॥ ३२ ॥

व्याख्या—मूलोत्तरप्रकृतीनां "अहवा पयमीभेउ त्ति" भाष्यकृद्वचनात् प्रकृतिशब्दस्य भेदपर्यायत्वान्मूलोत्तरभेदानां कर्मसम्बन्धिनामनुभागविशेषतो ज्ञानावरकत्वादिस्वभाववैचित्र्याद्भेदो भवति । अनुभागशब्दोऽत्र स्वभावपर्यायः

"अणुन्नागो त्ति सहावो" इति चूर्णिकृद्वचनात्। भवति हि स्वभावभेदाद्वस्तुभेदो यथा तृणदुग्धादीनां, तथेह दलिकस्य कर्मरूपतया तुल्यस्यापि स्वभावभेदाद्भेद इति। तथाऽविशेषिताऽविवक्षिता रसप्रकृतिः उपलक्षणात् स्थित्यादयोऽपि यस्मिन् स प्रकृतिबन्धो ज्ञातव्यः। तुशब्दस्याधिकार्थसंसूचकत्वादविवक्षितरसप्रकृतिप्रदेशः स्थितिबन्धः, अविवक्षितप्रकृतिस्थितिप्रदेशो रसबन्धः, अविवक्षितप्रकृतिस्थितिरसः प्रदेशबन्ध इत्यपि द्रष्टव्यं। अत्र च कर्मणां प्रकृत्यादयो मोदकदृष्टान्तेन लक्षणीयाः। तथाहि—मोदकस्य यथा वातविनाशकत्वादिस्वभावः प्रकृतिस्तथा कर्मणां ज्ञानावरकत्वादिस्वभावः प्रकृतिः, यथा च तस्य स्थितिरेकद्विदिनाद्यवस्थानरूपा तथा कर्मणां स्थितिः प्रतिनियतकालावस्थानरूपा, यथा च तस्य रसः स्निग्धमधुरादिस्तथा कर्मणामपि शुभाशुभादिः, यथा च तस्य प्रदेशा एकद्विप्रसृत्यादिप्रमाणास्तथा कर्मणामपि बहुतरबहुतमादिविभागरूपाः। यत्तु—"ठिइबंधु दलस्स ठिई पएसबंधो पएसगहणं जं। ताण रसो अणुभागो तस्समुदाउ पगइबंधो॥ १॥" इति पञ्चसङ्ग्रहे प्रकृतिबन्धलक्षणमुक्तं, तत्काषायिककर्म प्रतीत्य संभवदपि नेहोपयुज्यते, स्थित्यादिसमुदायरूपप्रकृतिबन्धचिन्तने स्थित्याद्यंशाविवक्षणस्य कर्तुमशक्यत्वादिति। प्रकृतिबन्धे च विंशत्यधिकं शतमधिक्रियते, भूयस्कारादिविशेषश्चात्रत्योऽग्रे वक्ष्यते। अयं च प्रकृतिबन्धश्चतुर्धा—जघन्योऽजघन्य उत्कृष्टोऽनुत्कृष्टश्च। तत्र जघन्यः प्रकृतिबन्ध उपशान्तमोहादिगुणस्थानत्रये, तत्रैकस्या एव प्रकृतेर्बन्धात्, प्रकृतिबन्धमाश्रित्य चैकप्रकृतिबन्धस्यैव सर्वस्तोकत्वेन जघन्यत्वात्। उपशान्तमोहाद्भ्रष्टस्याजघन्यो बन्धः, मूलप्रकृतीरधिकृत्य षण्णामुत्तरप्रकृतीरधिकृत्य सप्तदशानां बन्धसंभवात्। संज्ञिनि मिथ्यादृष्टावुत्कृष्टः, मूलप्रकृतीनामष्टानामुत्तरप्रकृतीनां चतुःसप्ततेर्ब-

न्धात् । ततः स्तोकस्तोकतराणां मूलप्रकृतीनामुत्तरप्रकृतीनां वा यो बन्धः सोऽनुत्कृष्टः । उत्कृष्टबन्धात् परिणामहासेन पततोऽनुत्कृष्टो बन्धः सादिः । जघन्यबन्धादबन्धाद्वा प्रतिपततोऽजघन्यो बन्धः सादिः । इत्येवं सादित्वविशेषादजघन्यानुत्कृष्टयोर्नेदो नावनीयः । यद्वा पूर्वपश्चिमदिशोरिवावधिभेदाज्जघन्यमवधीकृत्य हि यावदुत्कृष्टस्तावदजघन्यः, उत्कृष्टमवधीकृत्य च यावज्जघन्यस्तावदनुत्कृष्ट इति । अनेनैव विशेषहेतुना सादित्वविशेषान्नावेऽप्यजघन्यानुत्कृष्टभेद उपलभ्यते । यत्तु—"उक्कोसा परिवडिए साइ अणुक्कोसउं जहन्नाउं । अबंधाउं वियरो तदभावे दो वि अविसेसा ॥ १ ॥" इत्युक्तं तत्सादित्वकृतस्फुटविशेषोपलम्भान्नावाभिप्रायेण । तत्राध्रुवबन्धिनीनां सातवेदनीयादीनां ७३ जघन्यादयश्चत्वारोऽपि भेदाः सादयोऽध्रुवाश्च भवन्ति । ध्रुवबन्धिनीनां तु संज्ञविनावजघन्यानुत्कृष्टावनादी ध्रुवौ साद्यध्रुवावपि च भवतः । जघन्योत्कृष्टौ तु ध्रुवबन्धिनीनामपि कादाचित्कत्वेन साद्यध्रुवावेव भवतः । तथा मूलप्रकृतिष्वायुषो बन्धः सादिरध्रुव एव च, अध्रुवबन्धित्वात् । वेदनीयस्यानादिरध्रुवो ध्रुवश्च, तत्रानादित्वं सार्वदिकत्वात्, ध्रुवोऽभव्यानां कदापि व्यवच्छेदाभावात्, अध्रुवो भव्यानां अयोगिनि व्यवच्छेदात् । शेषकर्मणां साद्यादिश्चतुर्विधः । तत्रोपशान्तमोहगुणस्थानात् पततः सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवावभव्याभव्यापेक्षया । उत्तरप्रकृतिषु ध्रुवबन्धिनीनां सर्वासामपि ४७ साद्यादिश्चतुर्विधः । तत्र स्वस्वाबन्धस्थानभ्रष्टानां सादिः, अबन्धस्थानं च तासां मध्ये मिथ्यात्वस्त्यानर्द्धित्रिकानन्तानुबन्धिनां मिश्रादिगुणस्थानजातं, द्वितीयकषायाणां देशविरतादि, तृतीयकषायाणां प्रमत्तादि, निद्राप्रचलागुरुलघुनिर्माणतैजसोपघातवर्णादिचतुष्टयकार्मणभयजुगुप्सानामनिवृत्तिबादरादि, संज्वलनानां सूक्ष्मसंपरायादि, ज्ञानावरणपञ्चकान्तरायपञ्च-

कदर्शनावरणचतुष्टयानामुपशान्तमोहगुणस्थानमिति । सादित्वे चानादित्वं ध्रुवं । तथा स्वस्वाबन्धस्थानमप्राप्तानामनादिः । ध्रुवोऽभव्यानां । भव्यानां ध्रुवः । अध्रुवबन्धिनीनां तु ७३ साद्यध्रुव एवेत्युक्तमेव । तथा नरकत्रिकदेवत्रिकवैक्रियद्विकमित्यष्टानां प्रकृतीनां बन्धे विकलेन्द्रियैकेन्द्रिया न योग्या इति तदितरासामेव ते बन्धस्वामिनः । तथा मनुष्यत्रिकमुच्चैर्गोत्रं प्रागुक्ताश्चाष्टाविति द्वादशानां बन्धे तेजस्कायिकवायुकायिका अयोग्याः । आहारकद्विकजिननामबन्धे सर्वेऽपि तिर्यञ्चोऽयोग्याः । वैक्रियद्विकाहारकद्विकनरकत्रिकदेवत्रिकसूक्ष्मत्रिकविकलजातित्रिकरूपाणां षोडशप्रकृतीनां बन्धे देवा अयोग्याः । एतासामेवातपस्थावरैकेन्द्रियजातिसहितानां बन्धे नारका अयोग्याः । तथा च तेजस्कायिकवायुकायिकाः पञ्चोत्तरशतप्रकृतीनां बन्धस्वामिनः । शेषैकेन्द्रियविकलेन्द्रिया नवोत्तरशतप्रकृतीनां, पञ्चेन्द्रियतिर्यञ्चः सप्तदशोत्तरशतप्रकृतीनां, देवाश्चतुरुत्तरशतसङ्ख्यानां, नारकाश्चैकोत्तरशतसङ्ख्यानामिति स्थितं । अन्योऽपि विशेषो ग्रन्थान्तरादन्यूह्यः, विस्तरभयान्नेह तन्यते ॥ ७४ ॥

उक्तः प्रकृतिबन्धोऽथ प्रदेशबन्धोऽवसरप्राप्तः । तत्राष्टविधबन्धकेन चित्रतागर्नाध्यवसायेन गृहीतं यद्दलिकं तस्याष्टौ भागा भवन्ति । सप्तविधबन्धकस्य तु सप्त भागाः । षड्विधबन्धकस्य तु षड्भागाः । एकविधबन्धकस्य चैक एवेत्येष मूलप्रकृतिभागविभागोऽथोत्तरप्रकृतीनां भागविभागमुपदिदर्शयिषुराह—

जं सव्वघाइपत्तं सगकम्मपएसणंतमो भागो । आवरणाण चउण्हा तिहा य अह पंचहा विग्घे॥७५॥

व्याख्या—यत्कर्मदलिकं सर्वघातिप्राप्तं केवलज्ञानावरणादि सर्वघातिप्रकृतिगतं तत्स्वककर्मप्रदेशानामनन्ततमो भागः

स्वकीयज्ञानावरणादिरूपाया मूलप्रकृतेर्यो मौलो भागस्तस्यानन्ततमो भाग इत्यर्थः । कुत इति चेत् स्वस्वमूलप्रकृतिपरमाणुषु स्निग्धतराणां परमाणूनामनन्ततमभागमात्रत्वात् । तेषामेव च सर्वघातिप्रकृतियोग्यत्वात् । तस्मिँश्चानन्ततमे भागेऽपसारिते यच्छेषं दलिकं तत्सर्वघातिप्रकृतिव्यतिरिक्तेभ्यस्तत्कालबध्यमानेभ्यः स्वस्वमूलप्रकृत्यवान्तरभेदेभ्यो विभज्य दीयते । तथा चाह—आवरणयोर्ज्ञानावरणदर्शनावरणयोः प्रत्येकं सर्वघातिप्रकृत्योर्ऽनन्ततमे भागेऽपसारिते शेषस्य दलिकस्य यथाक्रमं चतुर्धा त्रिधा च भागः क्रियते । कृत्वा च शेषदेशघातिप्रकृतिभ्यो दीयते । ज्ञानावरणमूलप्रकृतावाभजतो भागस्यानन्ततमे केवलज्ञानावरणाय दत्ते । दर्शनावरणमूलप्रकृतावाभजतश्च भागस्यानन्ततमे भागे षोढा कृत्वा निद्रापञ्चककेवलदर्शनावरणाभ्यां दत्ते । प्रत्येकं चतुर्णां त्रयाणामेव देशघातिभेदानां भागदानस्य शिष्यमाणत्वात् । अथ विघ्नेऽन्तराये यो मूलभाग आभजति स समग्रोऽपि पञ्चधा कृत्वा दानान्तरायादिभ्यो दीयते, तत्र सर्वघात्यवान्तरभेदाभावात् ॥२५॥

मोहे दुहा चउछा य पंचहा वा वि बज्झमाणीणं । वेयणिआउयगोएसु बज्झमाणीण भागो सिं ॥२६॥

व्याख्या—मोहे मोहनीये स्थित्यनुसारेण यो मूलभाग आभजति तस्य सर्वघात्यर्होऽनन्ततमो भागो द्विधा क्रियते तदर्धं दर्शनमोहनीयस्यार्धं च चारित्रमोहनीयस्यायाति । तत्र दर्शनमोहनीयसत्कं समग्रमप्यर्धं मिथ्यात्वमोहनीयस्य दीयते । चारित्रमोहनीयसत्कं त्वर्धं षोडशधा कृत्वाऽऽद्यषोडशकषायेभ्यो दीयते । ततः शेषदलिकं द्विधा कृत्वा बध्यमानानां कषायनोकषायप्रकृतीनां दीयते । तत्रैको भागः कषायमोहनीयस्य, एकश्च नोकषायमोहनीयस्य । तत्र कषायमोहनीयस्य भागः पुनश्चतुर्धा क्रियते । ते च चत्वारोऽपि भागाः संज्वलनक्रोधादिभ्यो दीयन्ते । नोकषायमोहनीयस्य

तु भागः पञ्चधा क्रियते । ते च पञ्चापि भागा यथाक्रमं त्रयाणां वेदानामन्यतमस्मै वेदाय बध्यमानाय हास्यरत्यरतिशोकयोरन्यतरस्मै युगलाय भयजुगुप्साभ्यां च दीयते, नान्येभ्यः, बन्धाभावात्, नोकषायेषु मध्ये यथोक्तानामेव युगपद्बन्धसंभवात् । तथा वेदनीययुर्गोत्रेषु यो मूलभाग आभजति स एषां स्वस्वैकप्रकृतेर्बध्यमानाया उपढौकते, द्व्याद्यानामेतत्प्रकृतीनां युगपदबन्धात् ॥ २६ ॥

पिंडपगईसु बज्झंतिगाण वन्नरसगंधफासाणं । सव्वासिं संघाए तणुम्मि य तिगे चउक्के वा ॥ २७ ॥

व्याख्या—पिण्डप्रकृतयोऽजहत्स्वार्थलक्षणया नामप्रकृतयः । यदाह चूर्णिकृत्—"पिंडपगईउ णामपगइउ" त्ति । तासु मध्ये बध्यमानानामन्यतमगतिजातिशरीरबन्धनसङ्घातनसंस्थानाङ्गोपाङ्गानुपूर्वीणां वर्णगन्धरसस्पर्शागुरुलघुपराघातोपघातोच्छ्वासनिर्माणतीर्थकरनाम्नामातपोद्योतप्रशस्ताप्रशस्तविहायोगतित्रसस्थावरबादरसूक्ष्मपर्याप्तापर्याप्तप्रत्येकसाधारणस्थिरास्थिरशुभाशुभसुस्वरदुःस्वरसुभगदुर्भगादेयानादेययशःकीर्त्ययशःकीर्त्यन्यतराणां च मूलभागो विभज्य समर्पणीयः । विशेषश्चायं, यदुत वर्णगन्धरसस्पर्शानां प्रत्येकं यद्भागलब्धं दलिकमायाति तत्सर्वासां तदवान्तरप्रकृतीनां विभज्य विभज्य दीयते । यथा वर्णनाम्नो भागलब्धं दलिकं पञ्चधा कृत्वा शुक्लादिभ्योऽवान्तरभेदेभ्यो देयं। एवं गन्धरसस्पर्शानामपि यथाभेदं विभज्य विभज्य देयमिति । तथा सङ्घाते तनौ च प्रत्येकं यद्भागलब्धं दलिकं तद्विधा चतुर्धा वा कृत्वा त्रिभ्यश्चतुर्भ्यो वा दीयते । तत्रौदारिकतैजसकार्मणानि वैक्रियतैजसकार्मणानि युगपत्त्रीणि शरीराणि सङ्घातनानि वा बध्नता त्रिधा क्रियते वैक्रियाहारकतैजसकार्मणरूपाणि चत्वारि शरीराणि सङ्घातनानि वा बध्नता चतुर्धा क्रियते ॥ २७ ॥

सत्तेक्कारवियप्पा बंधणनामाण मूलपगईणं । उत्तरसगपगईण य अप्पबहुत्ता विसेसो सिं ॥ २८ ॥

व्याख्या—बन्धननाम्नां भागलब्धं यद्दलिकं तस्य सप्त विकल्पाः सप्त भागा एकादश वा क्रियन्ते । तत्रौदारिकौदारिक १ औदारिकतैजस २ औदारिककार्मण ३ औदारिकतैजसकार्मण ४ तैजसतैजस ५ तैजसकार्मण ६ कार्मणकार्मण ७ रूपाणि वैक्रियचतुष्कतैजसत्रिकरूपाणि वा सप्त बन्धनानि बध्नता सप्त भागाः क्रियन्ते । वैक्रियचतुष्काहारकचतुष्कतैजसत्रिकलक्षणान्येकादश बन्धनानि बध्नता चैकादश । शेषाणां च प्रकृतीनां युगपदवान्तरभिन्नादिभेदबन्धाभावान्न भागदलिकं विभागमापद्यते, किं तु परिपूर्णमेवायाति । इहैकाध्यवसायगृहीतस्य कर्मदलिकस्य परमाणवो विभज्य मूलप्रकृतिभ्य उत्तरप्रकृतिभ्यश्च दत्ताः, तत्र जघन्यत उत्कर्षतो वा कस्याः प्रकृतेः कियान् भाग इति विशेषजिज्ञासायामाह—आसां मूलप्रकृतीनामुत्तरस्वप्रकृतीनां च परस्परं भागस्य विशेषोऽल्पबहुत्वाद्ग्रन्थान्तरोक्तादवसेयः । तत्र मूलप्रकृतीनामिदमल्पबहुत्वं, कर्मणां हि स्थित्यनुसारतो भाग आभजति । यस्य महती स्थितिस्तस्य महान् भागो यस्य स्तोका तस्य स्तोक इति । तत आयुषो भागः सर्वस्तोकः, तस्योत्कर्षतोऽपि त्रयस्त्रिंशत्सागरोपमप्रमाणत्वेनान्येभ्यः स्तोकस्थितिकत्वात् । ततो नामगोत्रयोर्भागो बृहत्तरः, तयोः स्थितेर्विंशतिसागरोपमकोटाकोटिप्रमाणत्वात् । स्वस्थाने तु मिथस्तुल्यः, तुल्यस्थितिकत्वात् । ततोऽपि ज्ञानावरणदर्शनावरणान्तरायाणां बृहत्तमः, तेषां स्थितेस्त्रिंशत्सागरोपमकोटाकोटिप्रमाणत्वात् । स्वस्थाने तु परस्परं तुल्य एव, तुल्यस्थितिकत्वात् । ततोऽपि मोहनीयस्य बृहत्तमः, तस्य स्थितेः सप्ततिसागरोपमकोटाकोटिप्रमाणत्वात् । वेदनीयस्य तु ज्ञानावरणादिभिः समानस्थितिकस्यापि सर्वेभ्य उत्कृष्ट एव भागोऽन्यथा स्पष्टतरस्वफलसुख-

दुःखोपदर्शकत्वानुपपत्तेः। उक्तं मूलप्रकृतीनामल्पबहुत्वं। अथ स्वस्वोत्तरप्रकृतीनां जघन्यत उत्कर्षतश्च तदभिधीयते—तत्रोत्कृष्टपदे सर्वस्तोकं केवलज्ञानावरणस्य प्रदेशाग्रं। ततो मनःपर्यायज्ञानावरणस्यानन्तगुणं। ततोऽवधिज्ञानावरणस्य विशेषाधिकं। ततः श्रुतज्ञानावरणस्य विशेषाधिकं। ततो मतिज्ञानावरणस्य विशेषाधिकं। तथा दर्शनावरणीये उत्कृष्टपदे सर्वस्तोकं प्रचलायाः प्रदेशाग्रं। ततो निद्राया विशेषाधिकं। ततोऽपि प्रचलाप्रचलाया विशेषाधिकं। ततोऽपि निद्रानिद्राया विशेषाधिकं। ततस्त्यानर्द्धेर्विशेषाधिकं। ततः केवलदर्शनावरणस्य विशेषाधिकं। ततोऽवधिदर्शनावरणस्यानन्तगुणं। ततोऽचक्षुर्दर्शनावरणस्य विशेषाधिकं। ततोऽपि चक्षुर्दर्शनावरणस्य विशेषाधिकं। तथा सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमसातवेदनीयस्य। ततो विशेषाधिकं सातवेदनीयस्य। तथा मोहे सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमप्रत्याख्यानावरणमानस्य। ततोऽप्रत्याख्यानावरणक्रोधस्य विशेषाधिकं। ततोऽप्रत्याख्यानावरणमायायाः। ततोऽप्रत्याख्यानावरणलोभस्य। ततः प्रत्याख्यानावरणमानस्य। ततः प्रत्याख्यानावरणक्रोधस्य। ततः प्रत्याख्यानावरणमायायाः। ततः प्रत्याख्यानावरणलोभस्य। ततोऽनन्तानुबन्धिमानस्य। ततोऽनन्तानुबन्धिक्रोधस्य। ततोऽनन्तानुबन्धिमायायाः। ततोऽनन्तानुबन्धिलोभस्य। ततश्च मिथ्यात्वस्य विशेषाधिकं। ततो जुगुप्साया अनन्तगुणं। ततो भयस्य विशेषाधिकं। ततो हास्यशोकयोर्विशेषाधिकं, स्वस्थाने तु द्वयोरपि परस्परं तुल्यं। ततो रत्यरत्योर्विशेषाधिकं, स्वस्थाने तु तयोस्तुल्यं। ततः स्त्रीवेदनपुंसकवेदयोर्विशेषाधिकं, स्वस्थाने तु द्वयोस्तुल्यं। ततः संज्वलनक्रोधस्य विशेषाधिकं। ततः संज्वलनमानस्य। ततः पुरुषवेदस्य। ततः संज्वलनमायाया विशेषाधिकं। ततः संज्वलनलोभस्यासङ्ख्येयगुणं। तथा चतुर्णामप्यायुषामुत्कृष्टं

प्रदेशाग्रं परस्परं तुल्यं । नामकर्मण्युत्कृष्टपदे प्रदेशाग्रं गतौ देवगतिनरकगत्योः सर्वस्तोकं । ततो मनुजगतौ विशेषाधिकं । ततस्तिर्यग्गतौ विशेषाधिकं । तथा जातौ चतसृणां द्वीन्द्रियादिजातीनामुत्कृष्टपदे प्रदेशाग्रं सर्वस्तोकं, स्वस्थाने तु तासां परस्परं तुल्यं । तत एकेन्द्रियजातेर्विशेषाधिकं । तथा शरीरनाम्नि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमाहारकस्य । ततो वैक्रियस्य विशेषाधिकं । तत औदारिकस्य । ततस्तैजसस्य । ततोऽपि कार्मणनाम्नो विशेषाधिकं । एवं सङ्घातनाम्न्यपि द्रष्टव्यं । तथा बन्धननाम्नि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमाहारकाहारकबन्धननाम्नः । तत आहारकतैजसबन्धनस्य विशेषाधिकं । ततोऽप्याहारककार्मणबन्धनस्य । तत आहारकतैजसकार्मणबन्धनस्य । ततो वैक्रियवैक्रियशरीरबन्धनस्य । ततो वैक्रियतैजसबन्धनस्य । ततो वैक्रियकार्मणबन्धनस्य । ततो वैक्रियतैजसकार्मणबन्धनस्य । तत औदारिकौदारिकबन्धननाम्नः । तत औदारिकतैजसबन्धनस्य । तत औदारिककार्मणबन्धनस्य । ततोऽप्यौदारिकतैजसकार्मणबन्धनस्य । ततस्तैजसतैजसबन्धनस्य । ततस्तैजसकार्मणबन्धनस्य । ततः कार्मणकार्मणबन्धनस्य विशेषाधिकं । तथा संस्थाननाम्नि संस्थानानां मध्यमानां चतुर्णामुत्कृष्टपदे प्रदेशाग्रं सर्वस्तोकं, स्वस्थाने तु तेषां परस्परं तुल्यं । ततः समचतुरस्रस्य विशेषाधिकं । ततोऽपि हुण्डस्य विशेषाधिकं । तथाङ्गोपाङ्गनाम्नि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमाहारकाङ्गोपाङ्गनाम्नः । ततो वैक्रियाङ्गोपाङ्गनाम्नो विशेषाधिकं । ततोऽप्यौदारिकाङ्गोपाङ्गनाम्नो विशेषाधिकं । तथा संहननानाम्नि सर्वस्तोकमाद्यानां पञ्चानां संहननानामुत्कृष्टपदे प्रदेशाग्रं, स्वस्थाने तु तेषां परस्परं तुल्यं । ततः सेवार्त्तसंहननस्य विशेषाधिकं । तथा वर्णनाम्नि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रं कृष्णवर्णनाम्नः । ततो नीलवर्णनाम्नो विशेषाधिकं । ततो लोहितवर्णनाम्नः, ततो हारिद्रवर्णनाम्नः,

ततश्च श्वेतवर्णनाम्नो विशेषाधिकं । तथा गन्धनाम्नि सर्वस्तोकं सुरभिगन्धनाम्नः, ततो दुरभिगन्धनाम्नो विशेषाधिकं । तथा रसनाम्नि सर्वस्तोकं कटुरसनाम्नः, ततस्तिक्तरसनाम्नो विशेषाधिकं, ततः कषायरसनाम्नः, ततोऽम्लरसनाम्नः, ततश्च मधुररसनाम्नो विशेषाधिकं । तथा स्पर्शनाम्नि सर्वस्तोकं उत्कृष्टपदे कर्कशगुरुस्पर्शनाम्नोः प्रदेशाग्रं, स्वस्थाने तु मिथो द्वयोरपि तुल्यं । ततो मृदुलघुस्पर्शनाम्नोर्विशेषाधिकं, स्वस्थाने तु मिथो द्वयोरपि तुल्यं । ततो रूक्षशीतस्पर्शनाम्नोर्विशेषाधिकं, स्वस्थाने तु मिथो द्वयोरपि तुल्यं । ततः स्निग्धोष्णस्पर्शनाम्नोर्विशेषाधिकं, स्वस्थाने तु मिथो द्वयोरपि तुल्यं । तथाऽऽनुपूर्वीनाम्नि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रं देवगतिनरकगत्यानुपूर्व्योः, स्वस्थाने तु मिथो द्वयोरपि तुल्यं । ततो मनुजगत्यानुपूर्व्या विशेषाधिकं । ततस्तिर्यगानुपूर्व्या विशेषाधिकं । तथा सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रं त्रसनाम्नः । ततो विशेषाधिकं स्थावरनाम्नः । तथा सर्वस्तोकं प्रदेशाग्रं पर्याप्तनाम्नः । ततो विशेषाधिकमपर्याप्तनाम्नः । एवं स्थिरास्थिरयोः शुभाशुभयोः सुभगदुर्भगयोरादेयानादेययोः सूक्ष्मबादरयोः प्रत्येकसाधारणयोर्वाच्यं । तथा सर्वस्तोकमयशःकीर्त्तिनाम्नः प्रदेशाग्रमुत्कृष्टपदे । ततो यशःकीर्त्तिनाम्नः सङ्ख्येयगुणं । शेषाणामातपोद्योतप्रशस्ताप्रशस्तविहायोगतिसुस्वरदुःस्वराणां परस्परं तुल्यमुत्कृष्टपदे प्रदेशाग्रं । निर्माणोच्छ्वासपराघातोपघातागुरुलघुतीर्थकरनामप्रकृतीनां त्वल्पबहुत्वं नास्ति । यत इदमल्पबहुत्वं शेषवर्णापेक्षया कृष्णवर्णनाम्न इव सजातीयप्रकृत्यपेक्षं सुभगदुर्भगयोरिव वा प्रतिपक्षप्रकृत्यपेक्षं चिन्त्यते । न चैताः परस्परं सजातीयाः, अन्यिन्नैकमूलप्रकृत्यभावात्, नापि विरुद्धाः, युगपदपि बन्धभावात्, ततोऽत्रानधिकृता इति । तथोत्कृष्टपदे प्रदेशाग्रं सर्वस्तोकं नीचैर्गोत्रस्य । ततो विशेषाधिकमुच्चैर्गोत्रस्य । तथाऽन्तराये सर्वस्तोकं दानान्तरायस्य । ततो

लाज्ञान्तरायस्य विशेषाधिकं । ततो ज्ञोगान्तरायस्य, तत उपज्ञोगान्तरायस्य, ततश्च वीर्यान्तरायस्य विशेषाधिकं । उक्तमुत्तरप्रकृतीनामुत्कृष्टप्रदेशाग्राल्पबहुत्वं, अथ जघन्यपदे तदन्निधीयते—तत्र ज्ञानावरणदर्शनावरणप्रकृतीनां यथोत्कृष्टपदे तथैवावगन्तव्यं । मोहनीये सर्वस्तोकं जघन्यपदे प्रदेशाग्रमप्रत्याख्यानमानस्य । ततोऽप्रत्याख्यानक्रोधस्य विशेषाधिकं । ततोऽप्रत्याख्यानमायाया विशेषाधिकं । ततोऽप्यप्रत्याख्यानलोज्ञस्य विशेषाधिकं । ततः प्रत्याख्यानावरणानन्तानुबन्धिमानक्रोधमायालोज्ञानां यथोत्तरमुक्तरीत्यैव विशेषाधिकं वाच्यं । ततो मिथ्यात्वस्य विशेषाधिकं । ततो जुगुप्साया अनन्तगुणं । ततो ज्ञयस्य विशेषाधिकं । ततो हास्यशोकयोर्विशेषाधिकं, स्वस्थाने तु मिथो द्वयोस्तुल्यं । ततो रत्यरत्योर्विशेषाधिकं, स्वस्थाने तु तयोः परस्परं तुल्यं । ततोऽन्यतरवेदस्य विशेषाधिकं । ततः संज्वलनानां चतुर्णां यथोत्तरं विशेषाधिकं । तथाऽऽयुषि सर्वस्तोकं जघन्यपदे प्रदेशाग्रं तिर्यङ्मनुष्यायुषोः । ततो देवनारकायुषोरसङ्ख्येयगुणं । तथा नाम्नि गतौ सर्वस्तोकं जघन्यपदे प्रदेशाग्रं तिर्यग्गतेः । ततो विशेषाधिकं मनुजगतेः । ततो देवगतेरसङ्ख्येयगुणं । ततो निरयगतेरसंख्येयगुणं । तथा जातौ सर्वस्तोकं चतुर्णां द्वीन्द्रियादिजातिनाम्नां । तत एकेन्द्रियजातेर्विशेषाधिकं । तथा शरीरनाम्नि सर्वस्तोकमौदारिकशरीरनाम्नः प्रदेशाग्रं । ततस्तैजसस्य विशेषाधिकं । ततः कार्मणस्य विशेषाधिकं । ततो वैक्रियशरीरनाम्नोऽसङ्ख्येयगुणं । ततोऽप्याहारकशरीरनाम्नोऽसङ्ख्येयगुणं । एवं सङ्घातनाम्न्यपि वाच्यं । अङ्गोपाङ्गनाम्नि सर्वस्तोकं जघन्यपदे प्रदेशाग्रमौदारिकाङ्गोपाङ्गनाम्नः । ततो वैक्रियाङ्गोपाङ्गनाम्नोऽसङ्ख्येयगुणं । ततोऽप्याहारकाङ्गोपाङ्गनाम्नोऽसंख्येयगुणं । तथा सर्वस्तोकं जघन्यपदे देवनरकानुपूर्व्योः प्रदेशाग्रं । ततो मनुजानुपूर्व्या विशेषाधिकं । ततो-

ऽपि तिर्यगानुपूर्व्या विशेषाधिकं । तथा सर्वस्तोकं त्रसनाम्नः । ततो विशेषाधिकं स्थावरनाम्नः । एवं बादरसूक्ष्मयोः पर्याप्तापर्याप्तयोः प्रत्येकसाधारणयोश्च ज्ञेयं । शेषाणां तु नामप्रकृतीनां नास्त्यल्पबहुत्वं । तथा सातासातवेदनीययोरुच्चैर्गोत्रनीचैर्गोत्रयोरपि । अन्तराये तु यथोत्कृष्टपदे तथैवावगन्तव्यं । इह यदा जन्तुरुत्कृष्टयोगस्थानवर्ती यदा च मूलप्रकृतीनामुत्तरप्रकृतीनां च स्तोकतराणां बन्धकः, तथा यदा प्रकृत्यन्तरदलिकानामुत्कृष्टप्रदेशसङ्क्रमः, तदोत्कृष्टप्रदेशाग्रसंज्ञवः, उत्कृष्टयोगे वर्त्तमानत्वे उत्कृष्टप्रदेशग्रहणसंज्ञवात् । स्तोकतरप्रकृतिबन्धकत्वे शेषाबध्यमानप्रकृतिलक्ष्यस्यापि ज्ञागस्य बध्यमानप्रकृतिष्वेवाज्ञजनात् । प्रकृत्यन्तरदलिकानामुत्कृष्टप्रदेशसङ्क्रमकाले च विवक्षितासु बध्यमानासु प्रकृतिषु प्रज्ञूतानां कर्मपुञ्जलानां प्रवेशात् । एतद्विपर्यासे तु जघन्यप्रदेशाग्रसंज्ञव इति ज्ञेयं । नन्वयं प्रतिसमयं बध्यमानानां प्रतिसमयं विज्ञागविधिरुक्तः, यदा तु तत्तद्गुणस्थाने स्वस्वबन्धोच्छेदः स्यात् तदा तज्ञागऽव्यं कस्या ज्ञागे समायातीति चेदुच्यते—तज्ञागलक्ष्यं ऽव्यं यावदेकापि तत्सजातीयप्रकृतिर्बध्यते तावत्तस्या एव विज्ञज्य देयं । यदा तु तत्सजातीयसर्वप्रकृतिबन्धोच्छेदो यस्या वा मिथ्यात्वप्रकृतेः सजातीया नापरा प्रकृतिरस्ति, तदा तज्ञागलक्ष्यं ऽव्यं सर्वं मूलप्रकृत्यन्तर्गतानां विजातीयप्रकृतीनां विज्ञज्य दीयते । तासामप्युच्छेदे तद्दलिकमन्यस्या एव मूलप्रकृतेः संपद्यते । एवं तावज्ज्ञेयं यावत्सूक्ष्मसंपराये गृहीतं दलिकं षड्ज्ञागीज्ञवति । तदूर्ध्वं तु सर्वदलिकं सातस्योपतिष्ठत इति ॥ २८ ॥

अथ च साद्यादिप्ररूपणा स्वाम्यादिप्ररूपणा च कर्त्तव्या । तत्र मोहायुर्वर्जानां षण्णां मूलप्रकृतीनामनुत्कृष्टः प्रदेशबन्धः साद्यादितया चतुर्विधः । तथाहि—एतेषां षण्णां कर्मणां सूक्ष्मसंपरायस्थस्योत्कृष्टयोगे वर्त्तमानस्यैकं द्वौ वा समयावु-

त्कृष्टः प्रदेशबन्धो ज्ञवति । ततोऽसौ सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः । स चोत्कृष्टात् प्रदेशबन्धात् पततो बन्धव्यवच्छेदं कृत्वा वा पततो मन्दयोगस्थानवर्त्तिनः प्रवर्त्तमानः सादिः । तत्स्थानमप्राप्तस्यानादिः । ध्रुवाध्रुवावज्ञव्यज्ञव्यापेक्षयेति । एषामेव षण्णां कर्मणामुत्कृष्टजघन्याजघन्यविकल्पाः साद्यध्रुवाः । तत्रोत्कृष्टः साद्यध्रुवो ज्ञावित एव । जघन्यः सूक्ष्मनिगोदस्यापर्याप्तस्योत्पत्तिसमये सर्वाल्पवीर्यस्य सप्तविधबन्धकस्य समयमेकं ल्ज्यते । ततो द्वितीयसमये तस्यैवाजघन्यः । ततो ज्यूयोऽपि सङ्ख्येयकालेऽसङ्ख्येयकाले वाऽतिक्रान्ते प्रागुक्तलक्षणसूक्ष्मनिगोदज्ञावं प्राप्तस्याद्यसमये जघन्यः । तदनन्तरसमये त्वजघन्यः । एवमनेकधा संसारिणां जघन्येऽजघन्ये च परावर्त्तनात् द्वावप्येतौ साद्यध्रुवौ । आयुर्मोहनीययोश्च जघन्यादयश्चत्वारोऽपि साद्यध्रुवाः । तत्राध्रुवबन्धित्वादायुषश्चतुर्णामपि ज्ञेदानां साद्यध्रुवता स्फुटा । मोहनीयस्य तूत्कृष्टः प्रदेशबन्धः सप्तविधबन्धकस्योत्कृष्टयोगस्थानवर्त्तिन एकं द्वौ वा समयौ ज्ञवति । ततोऽनुत्कृष्ट एवेति द्वावप्येतौ साद्यध्रुवौ । जघन्याजघन्ययोः साद्यध्रुवता तु ज्ञानावरणीयादिवज्ज्ञावनीया । उत्तरप्रकृतिषु ज्ञानावरणपञ्चकान्तरायपञ्चकनिद्राद्यद्वादशकषायज्ञयजुगुप्सादर्शनावरणचतुष्टयप्रचलारूपाणां ध्रुवबन्धिनीनां त्रिंशत्प्रकृतीनामनुत्कृष्टः प्रदेशबन्धश्चतुःप्रकारः—सादिरनादिर्ध्रुवोऽध्रुवश्चेति । तथाहि—ज्ञानावरणान्तरायपञ्चकचक्षुरचक्षुरवधिकेवलदर्शनावरणरूपाणां चतुर्दशप्रकृतीनां सूक्ष्मसंपरायस्थस्योत्कृष्टयोगस्य समयमेकं द्वौ वा समयावुत्कृष्टः प्रदेशबन्धः प्राप्यते, योगोत्कर्षेण बहुदलिकग्रहणादायुर्मोहबन्धव्यवच्छेदेन तज्ञागस्याधिकस्य प्रवेशाच्चतसृणां दर्शनावरणप्रकृतीनां सजातीयाबध्यमानप्रकृतिज्ञागोपनमनाच्च । स च प्रतिनियतकालज्ञावित्वात्साद्यध्रुवः । ततः समयान्तरे तस्यैव मन्दयोगस्थानवृत्तेर्बन्धव्यवच्छेदं कृत्वा वा

प्रतिपततोऽनुत्कृष्टः सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवावभव्याभव्यापेक्षया। तथा निद्राप्रचलयोरविरतसम्यग्दृष्ट्यादेरपूर्वकरणान्तस्योत्कृष्टयोगस्थानवृत्तेः सप्तविधबन्धकस्योत्कृष्टः प्रदेशबन्ध एकं द्वौ वा समयौ, योगस्थानोत्कर्षेण भूयिष्ठदलिकग्रहणात् स्त्यानर्द्धित्रिकलभ्यमानप्रकृतिभागप्रवेशादायुषा भागानादानाच्च। स च नियतकालभावित्वात्साद्यध्रुवः। ततः समयान्तरेऽनुत्कृष्टः, स च सादिः। बन्धव्यवच्छेदस्थानं गत्वा प्रतिपततो मन्दयोगस्थानस्य बन्धमारभमाणस्य वाऽनुत्कृष्टः, सोऽपि सादिः। तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ प्राग्वत्। अप्रत्याख्यानावरणचतुष्टयस्याविरतसम्यग्दृष्टेरुत्कृष्टयोगस्थानवर्त्तिनः समयमेकं द्वौ वा समयावुत्कृष्टः प्रदेशबन्धः, योगस्थानोत्कर्षाद्बहुदलिकग्रहणान्मिथ्यात्वानन्तानुबन्धिलभ्यमानभागप्रवेशाच्च। तत उत्कृष्टात्प्रदेशबन्धाद्बन्धव्यवच्छेदस्थानाद्वा प्रतिपततो मन्दपरिणामस्यानुत्कृष्टः, स च सादिः। अप्राप्ततत्स्थानस्यानादिः। ध्रुवाध्रुवौ प्राग्वत्। प्रत्याख्यानावरणचतुष्टयस्य देशविरतस्योत्कृष्टयोगस्थानवृत्तेरेकं द्वौ वा समयावुत्कृष्टः प्रदेशबन्धः, योगोत्कर्षाद्बहुदलिकग्रहणान्मिथ्यात्वानन्तानुबन्ध्यप्रत्याख्यानलभ्यमानभागप्रवेशाच्च। स च प्रतिनियतकालभावित्वात्साद्यध्रुवः। तत उत्कृष्टप्रदेशबन्धाद्बन्धव्यवच्छेदस्थानाद्वा च्युतस्य मन्दयोगस्थानस्यानुत्कृष्टः, स च सादिः। अप्राप्ततत्स्थानस्यानादिः ध्रुवाध्रुवौ पूर्ववत्। भयजुगुप्सयोरपूर्वकरणस्योत्कृष्टयोगिन एकं द्वौ वा समयावुत्कृष्टः प्रदेशबन्धः, योगोत्कर्षेण बहुदलिकग्रहणान्मिथ्यात्वादिसजातीयाबध्यमानप्रकृतिभागप्रवेशाच्च। स च साद्यध्रुवः, उत्कृष्टतोऽपि समयद्वयभावित्वात्। तत उत्कृष्टाद्बन्धव्यवच्छेदस्थानाद्वा प्रतिपततो मन्दपरिणामस्यानुत्कृष्टः। स च सादिः। अप्राप्ततत्स्थानस्यानादिः। ध्रुवाध्रुवता प्राग्वत्। संज्वलनक्रोधस्यानिवृत्तिबादरसंपरायस्योत्कृष्टयोगस्य चतु-

विंधबन्धकस्यैकं द्वौ वा समयावुत्कृष्टः प्रदेशबन्धः, योगोत्कर्षेण प्रभूतदलिकग्रहणान्मिथ्यात्वादीनां पुरुषवेदस्य च प्राग-प्रवेशाच्च । स च प्रतिनियतकालभावित्वात्साद्यध्रुवः । तथा तस्यैवोत्कृष्टयोगस्थानवर्त्तिनस्त्रिविधबन्धकस्यैकं द्वौ वा समयौ संज्वलनमानस्योत्कृष्टः प्रदेशबन्धः, संज्वलनक्रोधस्यापि भागप्रवेशात् । तस्यैवोत्कृष्टयोगस्य द्विविधबन्धकस्योत्कर्षतः समयद्वयं संज्वलनमायाया उत्कृष्टः प्रदेशबन्धः, संज्वलनमानस्यापि भागप्रवेशात् । तस्यैवोत्कृष्टयोगस्यैकविधबन्धकस्योत्कर्षतः समयद्वयं संज्वलनलोभस्योत्कृष्टः प्रदेशबन्धः । स चैवं संज्वलनचतुष्कस्योत्कृष्टः प्रदेशबन्धः प्रतिनियतकालभावित्वात्साद्यध्रुवः, ततोऽन्यः सर्वोऽप्यनुत्कृष्टः । स चोत्कृष्टप्रदेशबन्धस्थानात्प्रतिपततो बन्धव्यवच्छेदस्थानमारुह्य वा प्रतिपततो मन्दपरिणामस्य सादिः । अप्राप्ततत्स्थानस्यानादिः । ध्रुवाध्रुवौ प्राग्वत् । एतासामेव त्रिंशत्प्रकृतीनां जघन्याजघन्योत्कृष्टाः साद्यध्रुवाः । तत्रोत्कृष्टः साद्यध्रुवतयाऽन्तराल एव भावितः । जघन्याजघन्ययोः साद्यध्रुवता तु प्रागुक्तनिगोदावस्थामधिकृत्य भावनीया । शेषाणां तु मिथ्यात्वानन्तानुबन्धिस्त्यानर्द्धित्रिकागुरुलघुतैजसकार्मणोपघातवर्णादिचतुष्टयनिर्माणरूपाणां सप्तदशध्रुवबन्धिप्रकृतीनां जघन्यादयश्चत्वारोऽपि साद्यध्रुवाः । तथाहि—स्त्यानर्द्धित्रिकमिथ्यात्वानन्तानुबन्धिनां मिथ्यादृष्टेः सप्तविधबन्धकस्योत्कृष्टयोगस्थानवर्त्तिनः समयमेकं द्वौ वा समयौ यावदुत्कृष्टः प्रदेशबन्धः । सम्यग्दृष्टेरेताः प्रकृतयो बन्धमेव नायान्तीति मिथ्यादृष्टिग्रहणं । उत्कृष्टाच्च प्रतिपतितस्यानुत्कृष्टः । ततो भूयोऽपि समयान्तरे उत्कृष्ट इति द्वावपि साद्यध्रुवौ । तैजसकार्मणागुरुलघूपघातवर्णादिचतुष्टयनिर्माणरूपाणां नामध्रुवबन्धिनीनां नवानां प्रकृतीनां त्रयोविंशतिबन्धकस्य मिथ्यादृष्टेरुत्कृष्टयोगस्थानवर्त्तिनः समयमेकं द्वौ वा समयावुत्कृष्टः प्रदेशबन्धः, अन्यस्या-

सामुत्कृष्टप्रदेशबन्धासंज्ञवात् केवलज्ञानिना तथैव दृष्टत्वात् । ततः समयान्तरेऽनुत्कृष्टो ऽनूयोऽपि कालान्तरे उत्कृष्ट इति द्वावपि साद्यध्रुवौ । जघन्याजघन्यभावना तु प्राग्वत् । अध्रुवबन्धिनीनां चाध्रुवबंधित्वादेव चत्वारोऽपि विकल्पाः साद्यध्रुवा इति सर्वं सुस्थं । स्वामित्वप्ररूपणा च द्विविधा—उत्कृष्टप्रदेशविषया जघन्यप्रदेशविषया च । तत्राल्पतरप्रकृतिबन्ध उत्कटयोगश्च संज्ञिपर्याप्त उत्कृष्टप्रदेशबन्धकोऽल्पतरप्रकृतिबन्धभागानामल्पत्वात् उत्कटयोगत्वे च बहुप्रदेशग्रहणादे-तद्विपर्यये जघन्यप्रदेशबंधकः । तत्रायुषो मिथ्यादृष्टिरयताद्याश्च चत्वार उत्कृष्टप्रदेशबन्धस्वामिनः, सर्वेषामेतेषामुत्कृष्ट-योगस्थानस्यायुर्बन्धस्य च लभ्यमानत्वात् । सासादनः कस्मादुत्कृष्टप्रदेशबन्धस्वामी नेति चेदुच्यते—अल्पकालभाव-त्वादिना तस्योत्कृष्टयोगस्थानासंभवात् । अन्यथा मिथ्यात्वभागलाभेनानन्तानुबन्धिनामुत्कृष्टप्रदेशबन्धः सासादन एव लभ्येतेति तेषामनुत्कृष्टप्रदेशबन्धः साद्यादिरूपतया चतुर्विधः स्यात् । न चैतदिष्टं, साद्यध्रुवतयैव तस्य प्रागभिधानात् । शेषप्रकृतीनां मिथ्यादृष्टिरेव चोत्कृष्टप्रदेशबन्धस्वामी वाच्य इत्यतोऽपि न सासादनस्योत्कृष्टयोगसंभव इति न तद्ग्रहणं । सास्वादनसम्यग्मिथ्यादृष्टी विना मिथ्यादृष्ट्याद्या अनिवृत्तिबादरान्ताः सप्तविधबन्धका मोहनीयस्योत्कृष्टप्रदेशबन्धस्वा-मिनः । सर्वेषामप्येतेषामुत्कृष्टयोगस्थानस्य मोहनीयबन्धस्य च लभ्यमानत्वात् । सासादनसम्यग्मिथ्यादृष्टी कस्मान्त्य-क्ताविति चेत्तयोरुत्कृष्टयोगाभावात् । तत्र सासादनस्योत्कृष्टयोगाभावे युक्तिरुक्तैव । मिश्रेऽप्युत्कृष्टयोगान्युपगमे तत्र द्वितीयकषायाणामुत्कृष्टप्रदेशबन्धान्युपगमप्रसङ्गः । न चैतदिष्यते, तदुत्कृष्टप्रदेशबन्धस्वामिनोऽविरतसम्यग्दृष्टेरेवाभि-धास्यमानत्वात् । न च मिश्रादल्पतरप्रकृतिबन्धकोऽविरतसम्यग्दृष्टिरिति तस्यैव तथाभिधास्यमानत्वं युक्तं । मूलप्रकृ-

त्यपेक्षया सप्तविधबन्धकत्वस्योत्तरप्रकृत्यपेक्षया च सप्तदशमोहनीयप्रकृतिबन्धकत्वस्योभयोरविशेषात् । तस्मादुत्कृष्टयोगाभाव एव मिश्रपरित्यागे कारणमिति केचिद्ग्रन्थकृतः समादधते । मलयगिरिचरणास्तु सम्यग्मिथ्यादृष्टेरुत्कृष्टयोगस्थानहीनत्वे "सासाण सम्मामीसेसुक्कोसो जोगो न हवइ त्ति" पूर्वाचार्यवचनमेव प्रमाणमाहुः । मिश्रस्य व्यञ्जनावग्रहप्रख्यत्वान्न तत्रोत्कृष्टप्रदेशबन्ध इत्यपि युक्तमीक्षामहे । ज्ञानावरणदर्शनावरणवेदनीयनामगोत्रान्तरायाणामुत्कृष्टयोगस्थानवर्ती सूक्ष्मसंपराय उत्कृष्टप्रदेशबन्धस्वामी आयुर्मोहनीयभागयोरपि तत्र लभ्यमानत्वात् । एतन्मूलप्रकृतिविषयमुत्कृष्टप्रदेशबन्धस्वामित्वं भावितं, अथोत्तरप्रकृतिविषयं तद्भाव्यते—तत्र ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयसातवेदनीययशःकीर्त्युच्चैर्गोत्रान्तरायपञ्चकलक्षणानां सप्तदशप्रकृतीनां सूक्ष्मसंपराय उत्कृष्टयोगे वर्त्तमान उत्कृष्टप्रदेशबन्धस्वामी । मोहायुषी असौ न बध्नातीति तद्भागोऽत्राधिको लभ्यते । दर्शनावरणभागो नामभागश्च सर्वोऽपि यथासङ्ख्यं दर्शनावरणचतुष्कस्य यशःकीर्त्तेश्चैकस्या भवतीति सूक्ष्मसंपरायस्यैव ग्रहणं । अविरतसम्यग्दृष्टयः सप्तविधबन्धका उत्कृष्टयोगे वर्त्तमाना अप्रत्याख्यानावरणानामुत्कृष्टप्रदेशबन्धकाः । मिथ्यात्वमनन्तानुबन्धिनश्चैते न बध्नन्तीति तद्भागद्रव्यमधिकं लभ्यत इत्यमीषामेव ग्रहणं । देशविरता उक्तरूपाः प्रत्याख्यानावरणानामप्रत्याख्यानावरणानामप्यमी अबन्धका इति तद्भागाधिकद्रव्यलाभात् । पुरुषवेदसंज्वलनचतुष्टयानामनिवृत्तिबादरः सर्वोत्कृष्टयोगः पञ्चचतुस्त्रिद्व्येकबन्धक उत्कृष्टप्रदेशबन्धस्वामी बन्धमधिकृत्य व्यवच्छिन्नानां प्रकृतीनां यथायथं भागप्रवेशात् । प्रशस्तविहायोगतिमनुजायुःसुरत्रिकसुभगत्रिकवैक्रियद्विकसमचतुरस्रसंस्थानासातवेदनीयवज्रर्षभनाराचसंहननलक्षणानां त्रयोदशप्रकृतीनां मिथ्यादृष्टिः सम्यग्दृष्टिर्वोत्कृष्ट-

प्रदेशबन्धस्वामी । तथाहि—असातं मिथ्यादृष्टिसम्यग्दृष्टी द्वावपि प्रकृतिलाघवादिविशेषान्नावाप्युत्कृष्टयोगावुत्कृष्टप्रदेशं बध्नीतः । देवमनुष्यायुषोरप्यष्टविधबन्धकावुत्कृष्टयोगावविशेषेणोत्कृष्टप्रदेशबन्धं कुरुतः । देवद्विकवैक्रियद्विकाद्यसंस्थान-प्रशस्तविहायोगतिसुभगत्रिकलक्षणा नव नामप्रकृतयो नाम्नोऽष्टाविंशतिबन्धकाल एव बन्धमायान्ति । तां चाष्टाविंशतिं देवद्विकवैक्रियद्विकपञ्चेन्द्रियजातितैजसकार्मणाद्यसंस्थानवर्णचतुष्कागुरुलघूपघातपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादर-पर्याप्तप्रत्येकस्थिरास्थिरैकतरशुभाशुभैकतरसुभगत्रिकयशःकीर्त्ययशःकीर्त्येकतरनिर्माणलक्षणां देवगतिप्रायोग्यां सम्यग्दृष्टिर्मिथ्यादृष्टिश्च बध्नातीति द्वयोरप्युत्कृष्टयोगयोः सप्तविधबन्धकयोरष्टाविंशतिबन्धकाले उक्तानां नवप्रकृतीनामुत्कृष्ट-प्रदेशबन्धकत्वं । एकोनत्रिंशदादिबन्धस्थानेष्वप्येता नव प्रकृतयो बध्यन्ते, परं तत्र नागबाहुल्याद्युत्कृष्टप्रदेशबन्धासंभव इति तदग्रहणं । वज्रर्षभनाराचस्यापि सम्यग्दृष्टिर्मिथ्यादृष्टिर्वा सप्तविधबन्धकः । नाम्नो वज्रर्षभनाराचसहितास्तिर्यग्द्वि-कपञ्चेन्द्रियजात्यौदारिकद्विकतैजसकार्मणाद्यसंस्थानसंहननवर्णचतुष्कागुरुलघूपघातपराघातोच्छ्वासप्रशस्तविहायोगतित्रसच-तुष्कसुभगत्रिकस्थिरास्थिरैकतरशुभाशुभैकतरयशःकीर्त्ययशःकीर्त्येकतरनिर्माणलक्षणा मनुष्यद्विकपञ्चेन्द्रियजात्यौदारिक-द्विकतैजसकार्मणाद्यसंस्थानसंहननवर्णचतुष्कागुरुलघूपघातपराघातोच्छ्वासप्रशस्तविहायोगतित्रसचतुष्कसुभगत्रिकस्थिरास्थि-रैकतरशुभाशुभैकतरयशःकीर्त्ययशःकीर्त्येकतरनिर्माणलक्षणा वा एकोनत्रिंशत्प्रकृतीर्बध्नन्नुत्कृष्टयोग उत्कृष्टप्रदेशबन्धकः । त्रिंशद्बन्धादौ नागबाहुल्यात्तदग्रहणं । निद्राप्रचलाहास्यरत्यरतिभयशोकजुगुप्सातीर्थकरनामप्रकृतीनां सम्यग्दृष्टिरुत्कृष्ट-योगस्तथा । तत्र निद्राप्रचलयोरविरतसम्यग्दृष्ट्यादयोऽपूर्वकरणान्ताः सप्तविधबन्धकोत्कृष्टयोगा एकं द्वौ वा समयावुत्कृ-

ष्टप्रदेशबन्धकाः, आयुर्वर्ज्यन्यभागोऽधिको लभ्यत इति सप्तविधबन्धकग्रहणं, स्त्यानर्द्धित्रिकजघन्यरसबन्धाय सम्यग्दृष्टिग्रहणं । मिश्रस्त्वेतदबन्धकत्वेऽप्युत्कृष्टयोगाज्जघन्यरसबन्धेऽधिकृतः । हास्यरत्यरतिशोकभयजुगुप्सानां त्वविरताद्यपूर्वकरणान्ता ये ये उत्कृष्टयोगास्ते ते उत्कृष्टप्रदेशबन्धकाः । मिथ्यात्वजघन्यरसबन्धाय सम्यग्दृष्टिग्रहणं । तीर्थकरनाम्नोऽप्येत एव देवगतिप्रायोग्यामष्टाविंशतिं तीर्थकरनामसहितां बध्नन्तः सप्तविधमूलप्रकृतिबन्धकाः । तथा त्रिंशदेकत्रिंशद्बन्धौ तु जघन्यबादुत्यात्त्यज्येते । आहारकद्विकस्याप्रमत्तापूर्वकरणौ केवलस्थिरशुभयशःकीर्तिसहितप्रागुक्ताष्टाविंशतावाहारकद्विकप्रक्षेपेण त्रिंशन्नामोत्तरप्रकृतिबन्धकौ । तथा तीर्थकरनामसहिते एकत्रिंशद्बन्धेऽप्येतद्बध्यते । किं तु तत्र जघन्यबादुत्यात्तस्येहाग्रहणं । शेषाणां स्त्यानर्द्धित्रिकमिथ्यात्वानन्तानुबन्धिस्त्रीक्लीबवेदनारकतिर्यगायुर्नरकद्विकतिर्यग्द्विकमनुजद्विकौदारिकद्विकपञ्चेन्द्रियजातितैजसकार्मणवर्णचतुष्कागुरुलघुपराघातोपघातोच्छ्वासत्रसचतुष्कस्थिरास्थिरशुभाशुभायशःकीर्तिनिर्माणाद्यजातिचतुष्टयप्रथमवर्जसंस्थानसंहननातपोद्योताप्रशस्तविहायोगतिस्थावरचतुष्कदुर्भगत्रिकनीचैर्गोत्रलक्षणानां षट्षष्टिप्रकृतीनां मिथ्यादृष्टिरुत्कृष्टप्रदेशबन्धकः । तथाहि—मनुष्यद्विकादिपञ्चविंशतिप्रकृतीर्विना शेषाः सम्यग्दृष्टेरिह बन्ध एव नायान्ति । सासादनस्तु काश्चिद्बध्नाति, परं तस्योत्कृष्टयोगो न लभ्यते, अत एता एकचत्वारिंशन्मिथ्यादृष्टिरेवोत्कृष्टयोगोऽट्पतरबन्धक उत्कृष्टप्रदेशाः करोति । या अपि पञ्चविंशतिः सम्यग्दृष्टिबन्धयोग्यास्तासामपि मध्ये औदारिकतैजसकार्मणवर्णचतुष्कागुरुलघूपघातबादरप्रत्येकास्थिराशुभायशःकीर्तिनिर्माणलक्षणानां पञ्चदशानामपर्याप्तैकेन्द्रिययोग्यत्रयोविंशतिबन्ध एव । शेषाणां च दशानां पर्याप्तप्रायोग्यपञ्चविंशतिबन्ध एवोत्कृष्टप्रदेशबन्धो लभ्यते, नाधिकबन्धे, जघन्यबादुत्यात् । तौ च

त्रयोविंशतिपञ्चविंशतिबन्धौ सम्यग्दृष्टेर्न भवत इत्येतासामपि मिथ्यादृष्टिरेवोत्कृष्टबन्धस्वामी । उक्तमुत्तरप्रकृतिषूत्कृष्टप्रदेशबन्धस्वामित्वं । अथ जघन्यप्रदेशबन्धस्वामित्वमुच्यते—तत्रायुर्वर्जानां सप्तानां मूलप्रकृतीनां सूक्ष्मनिगोदो लब्ध्यपर्याप्तक आद्यसमये जघन्यप्रदेशबन्धस्वामी । द्वितीयादिसमयेऽसङ्ख्येयगुणयोगस्थानवृद्धेरादिसमयग्रहणं । आयुषोऽपि स एव शेषसूक्ष्मनिगोदापेक्षया सर्वमन्दयोगस्थानवर्ती स्वायुःशेषत्रिभागाद्यसमयस्थस्तथा । उत्तरप्रकृतिष्वाहारकद्विकस्य परावर्त्तमानयोगोऽष्टविधबन्धकः । सर्वजघन्यवीर्योऽप्रमत्तयतिर्देवद्विकवैक्रियद्विकपञ्चेन्द्रियजात्याद्यसंस्थानोच्छ्वासपराघातप्रशस्तविहायोगतित्रसदशकवर्णचतुष्कतैजसकार्मणागुरुलघूपघाततीर्थकरनामाहारकद्विकलक्षणैकत्रिंशन्नामोत्तरप्रकृतिबन्धकस्तथा, भागाद्यत्वात्त्रिंशद्बन्धत्यागः । तथाऽसंज्ञी घोलमानयोगः सर्वजघन्यवीर्यो नरकत्रिकसुरायुषोस्तथा पृथिव्यादीनामसंज्ञ्यपर्याप्तस्य चैतदबन्धकत्वात्संज्ञिपर्याप्तग्रहणं । सोऽपि यद्येकस्मिन्नेव योगे चिरमवतिष्ठमानो गृह्यते तदा तीव्रचेष्टो भवेदिति घोलमानयोगग्रहणं, परावर्त्तमानयोग इति तदर्थः । योगाद्योगान्तरसंक्रान्तौ च स्वभावादल्पैव चेष्टा भवति । पर्याप्तसंज्ञी च प्रभूतयोगत्वान्नात्राधिकृतः, जघन्यस्यापि पर्याप्तसंज्ञियोगस्योत्कृष्टासंज्ञिपर्याप्तयोगादसङ्ख्येयगुणत्वात् । सुरद्विकवैक्रियद्विकजिननाम्नां सम्यग्दृष्टिर्भवाद्यसमये वर्त्तमानस्तथा । तथाहि—तीर्थकरनामकर्मणो मनुष्यस्तीर्थकरनामकर्मबन्धकः कालं कृत्वा देवेषूत्पन्नः, तत्र प्रथमसमये वर्त्तमानो मनुष्यगतिप्रायोग्यजिननामसहितत्रिंशद्बन्धकः । सर्वजघन्ययोगोऽविरतसम्यग्दृष्टिर्जघन्यप्रदेशबन्धं विधत्ते । नारकोऽपि श्रेणिकादिवदेवं तद्बन्धकः संभवति, परमिह देवोऽल्पयोगत्वादनुत्तरवासी गृह्यते । नारकेषु त्वेवंभूतो जघन्ययोगो न लभ्यत इति तेषु समुत्पन्नो नेह गृहीतः । तिर्यञ्चस्तु तीर्थ-

करनाम न बध्नन्तीत्युपेक्षिताः । मनुष्यास्तु नवाद्यसमये तीर्थकरनामसहिता नाम्न एकोनत्रिंशत्प्रकृतीर्बध्नन्ति, परं तत्रा-
ल्पा नागा इति तेऽप्युपेक्षिताः । एकत्रिंशद्बन्धस्तु जिननामसहितः संयतस्यैव नवति, तत्र वीर्यमल्पं न लभ्यत इति
तस्यापि त्यागः । देवद्विकवैक्रियद्विकयोर्देवो नैरयिको वा तीर्थकरनामबन्धको यथासङ्ख्यं देवनवान्नारकनवाच्च च्युतो
मनुष्यनवे समुत्पद्यमान उत्पत्तिप्रथमसमयस्थो देवगतिप्रायोग्यास्तीर्थकरनामसहिता एकोनत्रिंशत्प्रकृतीर्बध्नन् सम्यग्दृ-
ष्टिर्जघन्ययोगस्थानवर्त्ती जघन्यप्रदेशबन्धकर्ता । देवनारका नवप्रत्ययादेवैतत्प्रकृतिचतुष्टयं न बध्नन्तीति नेहाधिकृताः ।
तिर्यञ्चश्चाऽनोगभूमिजा नवाद्यसमये बध्नन्ति एतत्केवलं देवगतिप्रायोग्यामष्टाविंशतिं बध्नन्तीति नागाल्पत्वात्तेऽपि नाधि-
कृताः । मनुष्यस्याप्यष्टाविंशतिबन्धकस्य नागा बहवो न लभ्यन्ते । त्रिंशदेकत्रिंशद्बन्धौ तु देवगतिप्रायोग्यौ संयतस्य
नवतः, परं तत्र वीर्यमल्पं न लभ्यते, अन्ये च देवगतिप्रायोग्या बन्धा एव न सन्तीत्येकोनत्रिंशद्बन्धकस्य मनुष्यस्यैव
ग्रहणं । ननु तिर्यक्षु पर्याप्तासंज्ञी देवगतिप्रायोग्यं बध्नन्नेतत्प्रकृतिचतुष्टयबन्धकः कस्मान्न गृहीतः ? उच्यते—प्रभूतयो-
गत्वादपर्याप्तसंज्ञियोगाद्धि पर्याप्तासंज्ञियोगो जघन्यतोऽप्यसङ्ख्येयगुण इति । शेषाणां तु मनुष्यायुस्तिर्यगायुर्वर्जितानां नवो-
त्तरशतसङ्ख्यानां प्रकृतीनां सूक्ष्मनिगोदो लब्ध्यपर्याप्तः सर्वाल्पवीर्य उत्पत्तिप्रथमसमये जघन्यप्रदेशबन्धस्वामी । नवरम-
पर्याप्तकसूक्ष्मसाधारणनाम्नां पञ्चविंशतिबन्धकः एकेन्द्रियातपस्थावराणां षड्विंशतिबन्धको, मनुष्यद्विकस्यैकोनत्रिंश-
द्बन्धकः, शेषाणां तु त्रिंशद्बन्धकः, उक्तविशेषणस्तथा । मनुष्यतिर्यगायुषोः स एव स्वायुःशेषत्रिभागसमये तथा,
कारणं तु प्रागुक्तमेव ।

तदेवमुक्तौ प्रकृतिप्रदेशबन्धौ, सम्प्रति स्थित्यनुभागबन्धप्ररूपणावसरः । तत्र बहुवक्तव्यत्वात् बहुवक्तव्यज्ञानेऽल्पवक्तव्यस्य सुज्ञानत्वसंभवात्तादृशशिष्येच्छानुरोधेन प्रथमतोऽनुभागबन्धस्यैव प्ररूपणा क्रियते—तत्र चतुर्दशानुयोगद्वाराणि—अविभागप्ररूपणा १, वर्गणाप्ररूपणा २, स्पर्धकप्ररूपणा ३, अन्तरप्ररूपणा ४, स्थानप्ररूपणा ५, कण्डकप्ररूपणा ६, षट्स्थानकप्ररूपणा ७, अधस्तनस्थानप्ररूपणा ८, वृद्धिप्ररूपणा ९, समयप्ररूपणा १०, यवमध्यप्ररूपणा ११, ओजोयुग्मप्ररूपणा १२, पर्यवसानप्ररूपणा १३, अल्पबहुत्वप्ररूपणा चेति १४ । तत्रादावविभागप्ररूपणां कुर्वन्नाह—

गहणसमयम्मि जीवो उप्पाएई गुणे सपच्चयउ । सव्वजियाणंतगुणे कम्मपएसेसु सव्वेसुं ॥ २९ ॥

व्याख्या—इहानुभागस्य हेतवः काषायिका अध्यवसायाः "तिसां सभागं कसायउ कुणइ त्ति" वचनात् । ते च द्विधा—शुभा अशुभाश्च । तत्रयेऽपि प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशप्रमाणाः, केवलं शुभा विशेषाधिकाः, सोपानारोहणावतरणतुल्यानामुभयेषां साम्येऽपि येष्वध्यवसायेषु वर्तमानः क्षपकः श्रेणिमारोहति तेभ्यः प्रतिपातो नास्तीति शुभानामशुभेभ्यो विशेषाधिक्यसंभवात् । एवं स्थिते स्वप्रत्ययत इत्यत्र सार्वविभक्तिकस्तसू प्रत्यय इति स्वस्यात्मनः संबन्धेन प्रत्ययेनानुभागबन्धं प्रति कारणभूतेन केनचिदेकेन शुभेनाशुभेन वाऽध्यवसायेनेत्यर्थः । जीवो ग्रहणसमये योग्यपुद्गलादानसमये सर्वेषु कर्मप्रदेशेष्वेकैकस्मिन् कर्मपरमाणावित्यर्थः । गुणान् रसस्य निर्विभागान् भागान् सर्वजीवानन्तगुणानुत्पादयति । अयं भावः—पूर्वं हि कर्मप्रायोग्यवर्गणान्तःपातिनः कर्मपरमाणवो न तथाविधविशिष्टरसोपेता आसीरन्, किंतु प्रायो नीरसा एकस्वरूपाश्च । ग्रहणसमय एव च जीवस्य काषायिकेनाध्यवसायेन तेषां सर्वजीवेभ्योऽनन्त-

गुणा रसाविभागा आपद्यन्ते ज्ञानावारकत्वादिविचित्रस्वभावता च, जीवानां पुद्गलानां च शक्तेरचिन्त्यत्वात् । न चैतदनुपपन्नं, शुष्कतृणादिपरमाणूनामत्यन्तनीरसानामपि गवादिभिर्गृहीतानां क्षीरादिरूपतया सप्तधातुरूपतया च परिणामदर्शनात् ॥ २९ ॥

अत्र कश्चिदाह—ननु तान् रसाविभागान् किं सर्वेष्वपि कर्मपरमाणुषु तुल्यान् जनयत्याहोस्विद्विषमान् ?, उच्यते—विषमान् । तथाहि—केषुचित् स्तोकान् ताँश्च जघन्यतोऽपि सर्वजीवानन्तगुणान्, केषुचित्तेभ्योऽपि प्रभूतान्, केषुचिच्च प्रभूततमान् । तत्र न ज्ञायते केषु कियन्त इति तद्ज्ञप्तये वर्गणादि प्ररूपयितुमाह—

सव्वप्पगुणा ते पढमवग्गणा सेसिया विसेसूणा । अविभागुत्तरियाउ सिद्धाणमणंतभागसमा ॥ ३० ॥

व्याख्या—सर्वेभ्योऽन्यपरमाणुभ्योऽल्पे स्तोका गुणा रसाविभागा येषां ते परमाणवः समुदिताः प्रथमवर्गणा । तस्यां च कर्मपरमाणवोऽतिप्रभूताः । शेषाश्च वर्गणा विशेषहीनाः कर्मपरमाण्वपेक्षया, तथाऽविभागोत्तरा एकैकस्नेहाविभागाधिकाः सिद्धानामनन्तभागसमा वाच्याः । तथाहि—प्रथमवर्गणागतपरमाण्वपेक्षया ये परमाणव एकेन रसाविभागेन वृद्धास्तेषां समुदायो द्वितीया वर्गणा । ते च प्रथमवर्गणागतपरमाण्वपेक्षया विशेषहीनाः । तेभ्योऽप्येकेन रसाविभागेनाधिकानां समुदायस्तृतीया वर्गणा । ते च द्वितीयवर्गणागतपरमाण्वपेक्षया विशेषहीनाः । एवमुत्तरोत्तरं रसाविभागवृद्धिपरमाणुविशेषहानी तावदवसेये यावदभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभागकल्पा वर्गणा भवन्ति ॥ ३० ॥

कृता वर्गणाप्ररूपणाऽथ स्पर्धकप्ररूपणामाह—

फड्डगमणंतगुणियं सव्वजिएहिं पि अंतरं एवं । सेसाणि वग्गणाणं समाणि ठाणं पढममित्तो ॥३१॥

व्याख्या—ताः सिद्धानन्तभागकल्पा अनन्ता वर्गणा एकं स्पर्द्धकं भवति । एषा स्पर्द्धकप्ररूपणा । अथान्तरप्ररूपणा क्रियते—इत ऊर्ध्वमेकादिरसाविभागाधिकाः परमाणवो न प्राप्यन्ते, किंत्वनन्तानन्तैरेव सर्वजीवेभ्योऽनन्तगुणैरधिकाः प्राप्यन्ते, ततस्तेषां समुदायो द्वितीयस्पर्द्धकस्य प्रथमा वर्गणा । तत एकैकरसाविभागवृद्ध्याऽभव्यानन्तगुणसिद्धानन्तभागकल्पा वर्गणा वाच्याः, तासां समुदायो द्वितीयं स्पर्द्धकं । तत ऊर्ध्वं पुनरेकादिरसाविभागवृद्धाः परमाणवो न लभ्यन्ते, किं तु सर्वजीवानन्तगुणैरनन्तानन्तैरेवाधिकाः, ततस्तेषां समुदायस्तृतीयस्पर्द्धकस्य प्रथमा वर्गणा । तत एकैकरसाविभागवृद्ध्या सिद्धानन्तभागाऽभव्यानन्तगुणा वर्गणा वाच्याः । तासां समुदायस्तृतीयं स्पर्द्धकं । एवं स्पर्द्धकान्यप्यभव्येभ्योऽनन्तगुणानि सिद्धानामनन्तभागकल्पानि भवन्ति । तेषां समुदाय एकमनुभागबन्धस्थानं । तथा चाह—अन्तरं प्रथमस्पर्द्धकचरमवर्गणाया द्वितीयस्पर्द्धकप्रथमवर्गणायाश्च सर्वजीवेभ्योऽनन्तगुणितं द्रष्टव्यं । एषाऽन्तरप्ररूपणा । "सव्वजिएहिं पि" इत्यत्रापेर्निन्नक्रमस्य शेषाणीत्यनन्तरं योजनादेवं शेषाण्यपि स्पर्द्धकान्यन्तराणि च यथोक्तप्रमाणानि वाच्यानि । तानि च स्पर्द्धकानि वर्गणानामेकस्पर्द्धकवर्गणानां समानि अभव्येभ्योऽनन्तगुणानि सिद्धानन्तभागकल्पानीत्यर्थः, एकं प्रथमं सर्वजघन्यं स्थानमनुभागस्थानं भवति । अनुभागबन्धस्थानं नाम एकेन कषायिकेणाध्यवसायेन गृहीतानां कर्मपरमाणूनां रसस्पर्द्धकसमुदायपरिमाणम् ॥ ३१ ॥

कृता स्थानप्ररूपणा । अथ कण्डकप्ररूपणार्थमाह—

(एत्तो) अंतरतुल्लं अंतरमणंतभागुत्तरं बिइयमेवं। अंगुलअसंखभागो अणंतभागुत्तरं कंडं ॥ ३२ ॥

व्याख्या—इतः प्रथमस्थानादारभ्य द्वितीयस्थानादर्वागन्तरं अन्तरतुल्यं प्रागुक्तप्रमाणान्तरतुल्यं द्रष्टव्यं। यथा प्रथमस्पर्द्धकचरमवर्गणाया द्वितीयस्पर्द्धकप्रथमवर्गणायाश्चान्तरं सर्वजीवानन्तगुणमुक्तं, तथा प्रथमस्थानान्तिमस्पर्द्धकचरमवर्गणाया द्वितीयस्थानाद्यवर्गणायाश्चान्तरं सर्वजीवानन्तगुणं वाच्यमित्यर्थः। तच्च द्वितीयस्थानमनन्तभागोत्तरं यथोत्तरानन्तभागाधिकस्पर्द्धकान्वितमित्यर्थः। एवं यथोत्तरमनन्तभागवृद्धानि स्थानानि तावद्वाच्यानि यावदङ्गुलासङ्ख्येयभागगताकाशप्रदेशप्रमाणानि भवन्ति। एतेषां समुदाय एकं कण्डकं। एतच्चानन्तभागोत्तरस्थानसमुदायरूपत्वादनन्तभागोत्तरं कण्डकं। एषा कण्डकप्ररूपणा ॥ ३२ ॥

अथ षट्स्थानकप्ररूपणा क्रियते—

एगं असंखभागेणणंतभागुत्तरं पुणो कंडं। एवं असंखभागुत्तराणि जा पुव्वतुल्लाइं ॥ ३३ ॥

व्याख्या—तस्मात् प्रथमात् कण्डकात्परमेकमनुभागबन्धस्थानमसङ्ख्येयेन भागेनाधिकं पूर्वस्थानगतस्पर्द्धकापेक्षयाऽसङ्ख्येयभागाधिकैः स्पर्द्धकैरधिकं द्रष्टव्यमित्यर्थः। ततः पुनरप्यनन्तभागोत्तरं कण्डं यथोत्तरमनन्तभागवृद्धानां स्थानानां कण्डकं। ततः पुनरप्येकमसङ्ख्येयभागाधिकं स्थानं। एवमनन्तभागवृद्धकण्डकव्यवहितान्यसङ्ख्येयभागाधिकानि

* पूर्वगाथान्तिमः शब्दः

स्थानानि तावद्वक्तव्यानि यावत्पूर्वतुल्यानि भवन्ति, कण्डकमात्राणि भवन्तीत्यर्थः । ततः पुनरप्यनन्तभागवृद्धानां स्थानानां कण्डकमभिधाय ॥ ३३ ॥

एक्कं संखेज्जुत्तरमेत्तो तीयाण तिन्नियां बिइयं । ताणि वि पढमसमाइं संखेज्जगुणोत्तरं एक्कं ॥ ३४ ॥

व्याख्या—एकं सङ्ख्येयोत्तरमिति सङ्ख्येयभागाधिकं स्थानं वक्तव्यं । "एत्तो त्ति" इतः सङ्ख्येयभागाधिकात् स्थानात् परतो मूलादारभ्य यावन्त्यनुभागबन्धस्थानानि प्रागतीतानि तान्यतीत्य गत्वा द्वितीयं सङ्ख्येयभागाधिकं स्थानं वक्तव्यं । तान्यपि सङ्ख्येयभागाधिकानि स्थानानि तावद्वाच्यानि यावत्प्रथमसमानि भवन्ति, प्रथमकण्डकतुल्यानि भवन्तीत्यर्थः । ततः पूर्वोक्तदिशा सङ्ख्येयभागाधिकस्थानप्रसङ्गे सङ्ख्येयगुणोत्तरं सङ्ख्येयगुणाधिकं स्थानमेकं वक्तव्यम् ॥ ३४ ॥

एत्तो तीयाणि अइन्नियाण बीयमवि ताणि पढमस्स । तुल्लाणसंखगुणियं एक्कं तीयाण इक्कस्स ॥ ३५ ॥

व्याख्या—इतः सङ्ख्येयगुणोत्तरादनुभागबन्धस्थानात् यावन्ति मूलत आरभ्य प्रागतिक्रान्तानि स्थानानि तावन्त्यतिक्रम्य द्वितीयं सङ्ख्येयगुणाधिकं स्थानं वक्तव्यं । अपिरेवमर्थे । एवं तानि सङ्ख्येयगुणाधिकानि स्थानानि तावद्वक्तव्यानि यावत्प्रथमस्यानन्तभागवृद्धस्थानकण्डकस्य तुल्यानि भवन्ति । ततः पूर्वपरिपाट्या पुनः सङ्ख्येयगुणाधिकस्थानप्रसङ्गेऽसङ्ख्येयगुणाधिकं स्थानमेकं वक्तव्यं । ततो मूलत आरभ्य यावन्त्यतीतानि तावन्ति भूयोऽप्यतिक्रम्य गत्वा द्वितीयमसङ्ख्येयगुणाधिकं स्थानं वक्तव्यम् ॥ ३५ ॥

बिइयं ताणि समाइं पढमस्साणंतगुणियमेगं तो। तीयाणतिन्हियाणं ताणि वि पढमस्स तुल्लाणि ॥३६॥

व्याख्या—तान्यप्यसङ्ख्येयगुणाधिकानि स्थानानि प्रथमस्य मूलभूतस्यानन्तभागवृद्धकण्डकस्य समानि तुल्यानि भवन्ति। ततः पूर्वपरिपाट्या पुनरप्यसङ्ख्येयगुणाधिकस्थानप्रसङ्गेऽनन्तगुणितमनन्तगुणाधिकं स्थानमेकं वक्तव्यं। "तो त्ति" ततो मूलत आरभ्य यान्यतीतानि तान्यतिक्रम्य द्वितीयमनन्तगुणाधिकं स्थानं वक्तव्यं। तान्यप्येवमनन्तगुणाधिकानि स्थानानि तावद्वक्तव्यानि यावत्प्रथमानन्तभागवृद्धस्थानकण्डकस्य तुल्यानि भवन्ति। ततः पूर्वपरिपाट्या पञ्चवृद्ध्यनन्तरं पुनरप्यनन्तगुणाधिकं स्थानं लभ्यते न वेति चेदुच्यते—न लभ्यते, षट्स्थानकस्य परिसमाप्तत्वात्। एतत्प्रथमं षट्स्थानकम् ॥३६॥

अस्मिंश्च षट्स्थानके त्रिविधा भागवृद्धिरुक्ता—अनन्तभागवृद्धिरसङ्ख्येयभागवृद्धिः सङ्ख्येयभागवृद्धिश्चेति। त्रिविधा च गुणवृद्धिः—सङ्ख्येयगुणवृद्धिरसङ्ख्येयगुणवृद्धिरनन्तगुणवृद्धिश्चेति। तत्र कियन्मात्रेणानन्तासङ्ख्येयसङ्ख्येयतमेन भागेन, कियन्मात्रेण वाऽनन्तासङ्ख्येयसङ्ख्येयगुणकारेण वृद्धिः ? इत्येतत्परिज्ञानार्थमाह—

सव्वजियाणमसंखिज्जलोगसंखिज्जगस्स जेट्ठस्स। भागो तिसु गुणणा तिसु छट्ठाणमसंखिया लोगा ॥३७॥

व्याख्या—आद्यासु तिसृषु वृद्धिष्वनन्तासङ्ख्येयसङ्ख्येयानां भागो यथाक्रमं सर्वजीवानामसङ्ख्येयलोकाकाशप्रदेशानां ज्येष्ठस्योत्कृष्टस्य सङ्ख्येयकस्य च द्रष्टव्यः। उत्तरासु च तिसृषु वृद्धिषु गुणना गुणकारो यथाक्रममनन्तासङ्ख्येयसङ्ख्येयानां सर्वजीवानामसङ्ख्येयलोकाकाशप्रदेशानामुत्कृष्टस्य सङ्ख्येयकस्य च द्रष्टव्यः। तथाहि—प्रथमस्यानुभागबन्धस्थानस्य सर्वजीवसङ्ख्याप्रमाणेन राशिना भागे हृते सति यल्लभ्यते स इहानन्तभागो ग्राह्यस्तेनाधिकं द्वितीयमनुभागबन्धस्थानं, तस्यापि

सर्वजीवप्रमाणेन राशिना ज्ञागे हृते यल्लभ्यते तेनाधिकं तृतीयमनुज्ञागबन्धस्थानं । एवं यद्यदनुज्ञागबन्धस्थानं यतो यतोऽनन्तज्ञागवृद्धमुपलभ्यते तत्तत्तस्य तस्य सर्वजीवप्रमाणराशिना ज्ञागलभ्येनानन्ततमेनांशेनाधिकं द्रष्टव्यं । तथाऽसङ्ख्येयज्ञागाधिकं नाम पाश्चात्यस्यानुज्ञागबन्धस्थानस्यासङ्ख्येयलोकाकाशप्रदेशप्रमाणेन राशिना ज्ञागे हृते यल्लभ्यते सोऽसङ्ख्येयतमो ज्ञागः तेनाधिकं । तथा सङ्ख्येयज्ञागाधिकं नाम पाश्चात्यस्यानुज्ञागबन्धस्थानस्योत्कृष्टेन सङ्ख्येयेन ज्ञागे हृते सति यल्लभ्यते स सङ्ख्येयतमो ज्ञागस्तेनाधिकं । तथा सङ्ख्येयगुणवृद्धं नाम पाश्चात्येऽनुज्ञागबन्धस्थाने उत्कृष्टसङ्ख्येयकप्रमाणेन राशिना गुणिते यावद्राशिनिष्पत्तिस्तावत्प्रमाणं । तथाऽसङ्ख्येयगुणवृद्धं नाम पाश्चात्येऽनुज्ञागबन्धस्थानेऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणेन राशिना गुणिते यावान् राशिर्ज्ञवति तावत्प्रमाणं । तथाऽनन्तगुणवृद्धं नाम पाश्चात्येऽनुज्ञागबन्धस्थाने सर्वजीवसङ्ख्याप्रमाणेन राशिना गुणिते यावान् राशिर्ज्ञवति तावत्प्रमाणं । प्रथमस्य षट्स्थानकस्य परिसमाप्तौ यदन्यदनुज्ञागस्थानमुपजायतेऽनन्तज्ञागवृद्धं तद्द्वितीयस्य षट्स्थानकस्य प्रथमं । ततः पूर्वोक्तक्रमेण संपूर्णं द्वितीयं षट्स्थानकं वक्तव्यं । एवमसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि षट्स्थानकानि ज्ञवन्ति । तथा चाह—"ज्ञाणमसंखया लोगा" । अत्र कश्चित् पूर्वपक्षयति—ननु प्रथमानुज्ञागबन्धस्थानस्य जीवप्रमाणेन राशिना ज्ञागहारः स्पर्द्धकापेक्षया वा परमाण्वपेक्षया वा रसाविज्ञागापेक्षया वा ? तत्र स्पर्द्धकापेक्षया तावन्न संज्ञवति तज्ञतस्पर्द्धकानामज्ञव्यानन्तगुणसिद्धानन्तज्ञागकल्पतयाऽतीव स्तोकत्वात् । नापि परमाण्वपेक्षया, यतो यथा यथाऽनुज्ञागवृद्धिस्तथा तथा पुद्गलाः स्तोकाः स्तोकतराश्च लभ्यन्त इति प्रथमादिस्थानाद्वितीयादिस्थाने परमाणूनां हानिरेव संज्ञवति, नानन्तज्ञागाधिकत्वमिति । नापि रसाविज्ञागापेक्षया,

यतः प्रथमस्थानाद्द्वितीयेऽपि स्थाने रसाविभागाः सङ्ख्येयादिगुणतया प्राप्यन्ते । तथाहि—प्रथमे स्थाने प्रथमस्पर्द्धके प्रथमवर्गणायामनन्ता अपि रसाविभागा असत्कल्पनया सप्त, द्वितीयस्यामष्टौ, तृतीयस्यां नव, चतुर्थ्यां दश, इदमेकं स्पर्द्धकं । इत ऊर्ध्वं रसाविभागानां नैकोत्तरवृद्धिः, किंतु सर्वजीवानन्तगुणाधिक्यं । ततो द्वितीयस्पर्द्धकप्रथमवर्गणायां सप्तदश, द्वितीयस्यामष्टादश, तृतीयस्यामेकोनविंशतिः, चतुर्थ्यां विंशतिः, इदं द्वितीयं स्पर्द्धकं । ततः सप्तविंशत्यादित्रिंशत्पर्यन्तवृद्ध्या तृतीयं । ततः सप्तत्रिंशदादिचत्वारिंशत्पर्यन्तवृद्ध्या चतुर्थं स्पर्द्धकं । एतानि च किलासत्कल्पनया प्रथममनुभागबन्धस्थानं । अत्र च रसाविभागाः सर्वसङ्ख्यया षट्सप्तत्यधिकानि त्रीणि शतानि । ततः सप्तचत्वारिंशदादिपञ्चाशत्पर्यन्तानामविभागानां चतसृषु वर्गणासु वृद्ध्या द्वितीयस्थानस्य प्रथमस्पर्द्धकं । ततः सप्तपञ्चाशदादिषष्टिपर्यन्तवृद्ध्या द्वितीयं । ततः सप्तषष्ट्यादिसप्ततिपर्यन्तवृद्ध्या तृतीयं । ततः सप्तसप्तत्याद्यशीतिपर्यन्तवृद्ध्या चतुर्थं स्पर्द्धकं । एतानि चासत्कल्पनया द्वितीयं स्थानं । अत्र च रसाविभागाः सर्वसङ्ख्यया षोडशोत्तरसहस्रं । तदेवं प्रथमस्थानगतरसाविभागापेक्षया द्वितीये स्थाने रसाविभागाः सङ्ख्येयगुणा लभ्यन्ते । उत्तरोत्तरस्थाने तु प्रभूतप्रभूततमा इति न क्वापि रसाविभागापेक्षया पूर्वस्थानादुत्तरस्थानस्यानन्तभागाधिकत्वमिति । अत्र वदन्ति—इयं षट्स्थानकप्ररूपणा बहुसंभवान्निप्रायेण, तेन यद्यप्यनन्तगुणवृद्धात् स्थानादर्वाक्तनेषु स्थानेषु सर्वजीवप्रमाणेन राशिना भागहारो न संभवति तथाप्युपरितनेषु स्थानेषु अन्येष्वपि च द्वितीयादिषट्स्थानेषु सर्वास्वपि च संयमश्रेण्यादिगतेषु संभवतीति न कश्चिद्विरोधः, बाहुल्येन सर्वत्रापि संभवात् । यद्यपि च पूर्वपूर्वस्थानापेक्षयोत्तरोत्तरस्थानेषु किञ्चिद्धीनहीनतराः परमाणवः प्राप्यन्ते, तथापि तेषु

वर्गणादीनां स्तोकस्तोकतरैः परमाणुभिर्निष्पत्तेरुक्तस्वरूपं स्पर्द्धकबाहुल्यं न विरुध्यते । सर्वजीवप्रमाणराशिना भागहार इत्युपलक्षणमित्यवर्गाण्यनन्तगुणवृद्धात् स्थानात् पूर्वपूर्वस्थानेभ्य उत्तरोत्तरस्थानानां सर्वस्तोकानन्तभागाधिकत्वमवसेयं सोपस्कारत्वात्सूत्रस्येति । तदेवमुक्ता षट्स्थानकप्ररूपणा । अथाधस्तनस्थानप्ररूपणा क्रियते—तत्र पञ्च मार्गणा आनन्तर्येणैकाद्यन्तरिततया च । तत्र प्रथमादसङ्ख्येयभागवृद्धस्थानादधः कियन्त्यनुभागबन्धस्थानान्यनन्तभागवृद्धानि ? उच्यते—कण्डकमात्राण्येव । प्रथमात्सङ्ख्येयभागवृद्धस्थानादधोऽसङ्ख्येयभागवृद्धान्यपि तावन्त्येव । प्रथमात्सङ्ख्येयगुणवृद्धस्थानादधः सङ्ख्येयभागवृद्धान्यपि तावन्त्येव । प्रथमादसङ्ख्येयगुणवृद्धस्थानादधः सङ्ख्येयगुणवृद्धान्यपि तावन्त्येव । तथा प्रथमादनन्तगुणवृद्धात्स्थानादधोऽसङ्ख्येयगुणवृद्धान्यपि तावन्त्येवेत्यवसेयं । एषोत्तरोत्तरस्थानादधोऽध आनन्तर्येण मार्गणा । तदुक्तम्—"सव्वासिं वुड्ढीणं कंडकमेत्ता अणंतरा वुड्ढी" । तथा प्रथमात्सङ्ख्येयभागवृद्धात्स्थानादधः कियन्त्यनन्तभागवृद्धानि स्थानानि ? उच्यते—कण्डकवर्गः कण्डकं च। एवं प्रथमात्सङ्ख्येयगुणवृद्धात्स्थानादधोऽसङ्ख्येयभागवृद्धानि स्थानानि तावन्त्येव । तथा प्रथमात्सङ्ख्येयगुणवृद्धात्स्थानादधः सङ्ख्येयभागवृद्धानि स्थानानि तावन्त्येव । तथा प्रथमादनन्तगुणवृद्धात्स्थानादधः सङ्ख्येयगुणवृद्धानि स्थानानि तावन्त्येव । एषा एकान्तरिता मार्गणा । उक्तं च—"एगंतराउ वुड्ढी वग्गो कंडस्स कंडं च ।" विवक्षितप्रथमस्थानादनन्तराधस्तनस्थानानां कण्डकमात्राणां प्रत्येकमधस्तादधस्तनस्थानानि कण्डकमात्राणि प्राप्यन्ते इति । कण्डकं कण्डकगुणितं कण्डकवर्गो भवति उपरि चैकं कण्डकमित्येकान्तरितमार्गणायां कण्डकवर्गः कण्डकं चेत्यस्य भावना । प्रथमात्सङ्ख्येयगुणवृद्धात्स्थानादधः कियन्त्यनन्तभागवृद्धानि स्थानानि ? उच्यते—

कण्ठकघनो द्वौ कण्ठकवर्गौ कण्ठकं चैवं प्रथमादसङ्ख्येयगुणवृद्ध्यादधोऽसङ्ख्येयभागवृद्ध्यानि स्थानानि तावन्त्येव । प्रथमादनन्तगुणवृद्धस्थानादधः सङ्ख्येयभागवृद्धस्थानान्यपि तावन्त्येवेत्यवसेयं । काऽत्र भावनेति चेदुच्यते—इह प्रथमात्सङ्ख्येयगुणवृद्ध्यात्स्थानादध एकैकस्य सङ्ख्येयभागवृद्धस्थानस्याधः प्रत्येकमेकैककण्ठकाधिकः कण्ठकवर्गोऽनन्तभागवृद्ध्यानां स्थानानां प्राप्यते । सङ्ख्येयभागवृद्ध्यानि च स्थानानि कण्ठकमात्राणि । ततः कण्ठकवर्गः कण्ठकेन गुणितः कण्ठकघनो भवति । कण्ठकं च कण्ठकगुणितं कण्ठकवर्गः । अन्त्यसङ्ख्येयभागवृद्ध्याद्योपरि कण्ठकवर्ग एकं च कण्ठकं प्राप्यते । ततो द्व्यन्तरितमार्गणायामनन्तभागवृद्ध्यानां कण्ठकघनो द्वौ कण्ठकवर्गावेकं च कण्ठकं भवति । एवमग्रेऽप्यूह्यं । एषा द्व्यन्तरितमार्गणा । उक्तं च—"कंमं कंमस्स घणो वग्गो दुगुणो दुगंतराएउ" । प्रथमादसङ्ख्येयगुणवृद्ध्यात्स्थानादधः कियन्त्यनन्तभागवृद्ध्यानि स्थानानि ? उच्यते—कण्ठकवर्गवर्गत्रयः कण्ठकघनात्रयः कण्ठकवर्गा एकं च कण्ठकं । एवं प्रथमादनन्तगुणवृद्ध्यात्स्थानादधोऽसङ्ख्येयभागवृद्ध्यानि स्थानान्यप्येतावन्त्येवेत्यवसेयं । काऽत्र भावनेति चेदुच्यते—इह प्रथमादसङ्ख्येयगुणवृद्ध्यात्स्थानादध एकैकस्य सङ्ख्येयगुणवृद्धस्य स्थानस्याधः प्रत्येकमनन्तभागवृद्ध्यानां स्थानानां कण्ठकघनो द्वौ कण्ठकवर्गावेकं च कण्ठकं प्राप्यते । सङ्ख्येयगुणवृद्ध्यानि च स्थानानि कण्ठकमात्राणि । ततः कण्ठकघनः कण्ठकेन गुणितः कण्ठकवर्गवर्गो भवति । तथाहि—चतुष्कस्य घनश्चतुःषष्टिप्रमाणः, स चतुष्केण गुण्यते, ततो द्विशती षट्पञ्चाशदधिका भवति, अयं चतुष्कस्य वर्गवर्गः, चतुष्कस्थानीयं चेह कण्ठकं द्रष्टव्यमिति । द्वौ कण्ठकवर्गौ कण्ठकेन गुणितौ द्वौ कण्ठकघनौ भवतः, वर्गस्य वर्गमूलेन गुणने घनस्य निष्पत्तेः । कण्ठकं च कण्ठकेन गुणितं कण्ठकवर्गः । सङ्ख्येयगुणवृद्धस्था-

नस्योपर्येकः कण्ठकघनो द्वौ च कण्ठकवर्गावेकं च कण्ठकं प्राप्यते, तत्पूर्वराशौ प्रक्षेप्यं । ततस्त्र्यन्तरितमार्गणायामनन्तभागवृद्धानां स्थानानां कण्ठकवर्गवर्गत्रयः कण्ठकघनात्रयः कण्ठकवर्गा एकं च कण्ठकं प्राप्यते । एवमसङ्ख्येयभागवृद्धानामपि भावनीयं । उक्तं च—"कंठगस्स वग्गवग्गो घणवग्गा तिगुणिया कंठं" एषा त्र्यन्तरिता मार्गणा । प्रथमादनन्तगुणवृद्धात्स्थानादधः कियन्त्यनन्तभागवृद्धानि स्थानानि ? उच्यते—अष्टौ कण्ठकवर्गवर्गाः षट् कण्ठकघनाश्चत्वारः कण्ठकवर्गा एकं च कण्ठकं । कथमिति चेदुच्यते—इह कण्ठकमसत्कल्पनया चतुःसङ्ख्यात्मकं कल्प्यते । तत्र प्रथमादनन्तगुणवृद्धात्स्थानादध एकैकस्यासङ्ख्येयगुणवृद्धस्य स्थानस्याधः प्रत्येकमनन्तभागवृद्धानां स्थानानामेकः कण्ठकवर्गः त्रयः कण्ठकघनाः त्रयः कण्ठकवर्गा एकं च कण्ठकं प्राप्यते । असङ्ख्येयगुणवृद्धानि च स्थानानि कण्ठकमात्राणि । ततः कण्ठकवर्गवर्गाः असङ्ख्येयाः कण्ठकमात्राः प्राप्यन्ते, तथापि कण्ठकमिह चतुःसङ्ख्यात्मकं कल्पितमिति चत्वारः कण्ठकवर्गवर्गाः लब्धाः त्रयश्च कण्ठकघनाः चतुःसङ्ख्यात्मकेन कण्ठकेन गुणिता जाता द्वादश । कण्ठकघनश्चतुष्केण गुणितः कण्ठकवर्गवर्गो भवति । ततोऽत्र लब्धास्त्रयः कण्ठकवर्गवर्गाः, सर्वसङ्ख्या जाताः सप्त कण्ठकवर्गवर्गाः । कण्ठकवर्गाश्च त्रयः चतुःसङ्ख्यात्मकेन कण्ठकेन गुणिता जाता द्वादश । कण्ठकवर्गश्च कण्ठकेन गुणितः कण्ठकघनो भवति । यथा चतुष्कवर्गः षोडशात्मा चतुष्केण गुणितश्चतुःषष्ट्यात्मकश्चतुष्कघनः, ततो लब्धास्त्रयः कण्ठकघनाः । कण्ठकं च कण्ठकेन गुणितं कण्ठकवर्ग एकोऽसङ्ख्येयगुणवृद्धस्थानकण्ठकाच्चोपरि एकः कण्ठकवर्गस्त्रयः कण्ठकघनास्त्रयः कण्ठकवर्गा एकं च कण्ठकं प्राप्यते । तच्च पूर्वराशौ प्रक्षिप्यते, तत उक्तप्रमाणं संपद्यते । उक्तं च—"अठकंठकवग्गवग्गा वग्गा चत्तारि

उग्घणं कंमं । चउअंतरवुड्ढीए हेट्ठाणप्परूवणय ॥ १ ॥ त्ति" एतच्चासत्कल्पनयोक्तं । वस्तुगत्या तु चतुरुत्तरकण्मक-मिताः कण्मकवर्गवर्गाः षट्ट कण्मकघनाश्चत्वारः कण्मकवर्गा एकं च कण्मकं भवति । उक्ता चतुरन्तरमार्गणा । तदेवं कृता पञ्चभिर्मार्गणाभिरधस्तनस्थानप्ररूपणा ॥ ३७ ॥

अथ वृद्धिस्थानप्ररूपणा क्रियते—

वुड्ढी हाणी ठक्कं तह्मा दोण्हं पि अंतमिह्माणं । अंतोमुहुत्तमावलि असंखभागो य सेसाणं ॥ ३८ ॥

व्याख्या—इह जीवानां परिणामविशेषेण कर्मपरमाणुष्वनुभागस्योक्तस्वरूपं वृद्धिहानिषट्कं भवति । तत्र का वृद्धिर्हानिर्वा कियन्तं कालं भवतीत्यवश्यं निरूप्यं, तस्मात्तन्निरूप्यते—तत्र द्वयोर्वृद्धिहान्योरन्तिमयोरनन्तगुणवृद्ध्यनन्तगुणहानिरूपयोरन्तर्मुहूर्त्तमवगन्तव्यं । अन्तर्मुहूर्त्तं कालं यावन्निरन्तरं जीवाः पूर्वस्मात् पूर्वस्मादनन्तगुणवृद्धाननन्तगुणहीनान् वाऽनुभागान् बध्नन्तीत्यर्थः । तथा शेषाणां पञ्चानामाद्यानां वृद्धीनां हानीनां वाऽऽवलिकाया असङ्ख्येयभागमात्रः कालो ज्ञातव्यो निरन्तरमनुभागानामाद्याः पञ्च वृद्धीर्हानीर्वाऽऽवलिकाऽसङ्ख्येयभागमात्रमेव कालं जीवाः कुर्वन्तीत्यर्थः । एषा च हानिवृद्धिकालप्ररूपणोत्कर्षतोऽवसेया । जघन्यतस्त्वेकं द्वौ वा समयौ सर्वा अपि भवन्तीत्यवसेयम् ॥ ३८ ॥

अथैतेष्वनुभागबन्धस्थानेषु बन्धमाश्रित्यावस्थाने कालमानं चिन्तयन्नाह—

चउराई जावठगमेत्तो जावं डुगं तिसमयाणं । ठाणाणं उक्कोसो जहण्णउ सव्वहिं समउ ॥ ३९ ॥

व्याख्या—चत्वार आदिर्यस्याः सा चतुरादिर्वृद्धिः । सा चावस्थितिकालनियामकानां समयानां तावद्द्रष्टव्या यावत्स-

मयाष्टकं । तत ऊर्ध्वं समयानां हानिर्वाच्या, सा च तावद्यावद्द्विकं । सा च वृद्धिर्हानिर्वा चतुरादिका स्थानानामनुभाग-बन्धस्थानानामुत्कर्षतो जघन्यतस्तु सर्वत्र समयो द्रष्टव्यः । इयमत्र भावना—यान्यनुभागबन्धस्थानानि जीवाः पुनः पुनस्तान्येव चतुरः समयान् बध्नन्ति, तानि चतुःसामयिकानि, तानि च प्रथमादनुभागस्थानादारभ्यासङ्ख्येयलोकाकाश-प्रदेशप्रमाणानि । तेभ्य उपरितनानि स्थानानि पञ्चसामयिकानि, तान्यप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि । तेभ्य उपरि-तनानि स्थानानि षट्सामयिकानि, तान्यप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि । तेभ्य उपरितनानि सप्तसामयिकानि, तान्यप्यसङ्ख्येयलोकाकाशप्रदेशराशिप्रमाणानि । तेभ्य उपरितनान्यष्टसामयिकानि, तान्यप्यसङ्ख्येयलोकाकाशप्रदेशप्रमा-णानि । तेभ्यः पराणि सप्तसामयिकानि, तान्यप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि । तेभ्यः पराणि षट्सामयिकानि, तान्यप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि । एवं तावद्वाच्यं यावद्द्विसामयिकानि ॥ ३९ ॥

तदेवं कृता समयप्ररूपणा । अथ यान्यनुभागबन्धस्थानान्यष्टसामयिकानि तानि यस्यां वृद्धौ हानौ वा प्राप्यन्ते तामाह—

डसु जवमज्झं थोवाणि अट्ठसमयाणि दोसु पासेसु। समऊणियाणि कमसो असंखगुणियाणि उप्पिं च४०

व्याख्या—द्वयोरनन्तगुणयोर्वृद्धिहान्योर्यवस्य मध्यमिव यवमध्यं अष्टसामयिकानीत्यर्थः । तथाहि—यवस्य मध्यं यथा पृथुलमुन्नयतः पार्श्वे च हीने हीनतरे तथाऽत्रापि कालतः पृथुलान्यष्टसामयिकान्यनुभागबन्धस्थानानि उन्नयपार्श्ववर्त्तीनि च सप्तसामयिकादीनि कालतो हीनानि हीनतराणि । ततोऽष्टसामयिकानि यवमध्यं । तानि चाद्यादष्टसामयिकात् स्थानादारभ्य सर्वाण्यप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणान्यनन्तगुणवृद्धौ प्राप्यन्ते । सप्तसामयिकानां

हि चरमानुभागबन्धस्थानात्प्रथममष्टसामयिकं स्थानमनन्तगुणवृद्धं । ततः शेषाण्यपि तदपेक्षयाऽनन्तगुणवृद्धान्येव भवन्ति । अष्टसामयिकानां चरमानुभागबन्धस्थानादुपरितनं सप्तसामयिकं स्थानमनन्तगुणवृद्धं, ततस्तदपेक्षया पाश्चात्यान्यष्टसामयिकानि सर्वाण्यप्यनन्तगुणहीनान्येव । तदेवमष्टसामयिकान्यनन्तगुणवृद्धावनन्तगुणहानौ च लभ्यन्ते । अष्टसामयिकानि चोपलक्षणं, तेनाद्यानि चतुःसामयिकानि सर्वान्तिमानि द्विसामयिकानि च वर्जयित्वा शेषाणि सर्वाण्यप्युक्तदिशाऽनन्तगुणवृद्धावनन्तगुणहानौ च ज्ञेयानि । आद्यानि चतुःसामयिकानि त्वनन्तगुणहानावेव, तदुपरितनानामनन्तगुणवृद्धत्वात् । अन्त्यानि द्विसामयिकानि त्वनन्तगुणवृद्धान्येव, तदधस्तनानामनन्तगुणहीनत्वादिति । कृता यवमध्यप्ररूपणा । अथ चतुःसामयिकादीनामल्पबहुत्वमाह—सर्वस्तोकानि यवमध्यभूतान्यष्टसामयिकानि, अतिचिरकालबन्धयोग्यानां स्तोकानामेव प्राप्तेः । तेभ्योऽसङ्ख्येयगुणानि पूर्वोत्तरोभयपार्श्ववर्तीनि सप्तसामयिकान्यल्पतरबन्धकालयोग्यत्वात्, स्वस्थाने तु परस्परं तुल्यानि । एवं द्वयोः पार्श्वयोः क्रमशः क्रमेण समयोनान्यसङ्ख्येयगुणानि वक्तव्यानि, यावच्चतुःसामयिकानि, स्वस्थाने तु परस्परं तुल्यानि । तेभ्य उपरि च त्रिसामयिकानि द्विसामयिकानि चासङ्ख्येयगुणानि क्रमेण केवलान्येव वक्तव्यानि ॥ ४० ॥

अथ सर्वानुभागबन्धस्थानसमुदाये विशेषसङ्ख्यां ज्ञापयन्नाह—

सुहुमगणिपवेसणया अगणिक्काया य तेसि कायठिई ।
कमसो असंखगुणियाण (अ) प्पवसाणाणि अणुभागे ॥ ४१ ॥

व्याख्या—सूक्ष्माग्नौ सूक्ष्माग्निकाये प्रवेशनमुत्पादो येषां ते तथा सूक्ष्माग्नौ प्रवेशन्त इतियावत्। तथाऽग्निकाया अग्निकायत्वेनावस्थिताः। तथा तेषामग्निकायानां कायस्थितिः कायस्थितिकालः। एते क्रमशः क्रमेणासङ्ख्येयगुणिताः। तथाऽनुत्तागेऽनुत्तागविषयेऽध्यवसानान्युपचारादध्यवसायनिर्वर्त्त्यान्यनुत्तागबन्धस्थानान्यसङ्ख्येयगुणानि। अयमिह विशदार्थः—ये एकस्मिन् समये सूक्ष्माग्निकायेषु प्रविशन्ति ते स्तोकाः। ते चासङ्ख्येयलोकाकाशप्रदेशप्रमाणाः। तेभ्योऽपि येऽग्निकायत्वेनावतिष्ठन्ते तेऽसङ्ख्येयगुणाः। तेभ्योऽप्यग्निकायिकानां कायस्थितिकालोऽसङ्ख्येयगुणः। तेभ्योऽप्यसङ्ख्येयगुणान्यनुत्तागबन्धस्थानानीति॥ ४१॥

अथौजोयुग्मप्ररूपणावसरः। तत्रौजो विषमं युग्मं समं। तत्प्ररूपणा चैवं—इह चतुर्णां विवक्षितराशीनां चतुर्भिर्त्तागे हृते यस्यैकः शेषो त्तवति स पूर्वपरिभाषया कल्योज उच्यते, यथा त्रयोदश। यस्य द्वावशिष्येते स द्वापरयुग्मः, यथा चतुर्दश। यस्य त्रयः शेषाः स त्रेतौ(त्र्यो)जः, यथा पञ्चदश। यस्तु सर्वात्मना निर्लेपो त्तवति स कृतयुग्मः। तत्राविभागादयः कतरस्मिन् राशाावित्याह—

कडजुम्मा अविभागा ठाणाणि य कंडगाणि अणुभागे।
पज्जवसाणमणंतगुणाउं उप्पिं न (अ) णंतगुणं॥ ४२॥

व्याख्या—अनुत्तागेऽनुत्तागविषयेऽविभागाः स्थानानि कण्डकानि च कृतयुग्मानि कृतयुग्मराशिरूपाणि द्रष्टव्यानि। कृतौजोयुग्मप्ररूपणा। अथ पर्यवसानद्वारमाह—अनन्तगुणादनन्तगुणवृद्धिकण्डकाऽुपरि पञ्चवृद्ध्यात्मकानि

सर्वाणि स्थानानि गत्वा पुनरनन्तगुणवृद्धं स्थानं न प्राप्यते, षट्स्थानकस्य परिसमाप्तत्वात् तदेव सर्वान्तिमं स्थानं षट्स्थानकस्य पर्यवसानं ॥ ४२ ॥

अथाल्पबहुत्वप्ररूपणार्थमाह—

अप्पबहुमणंतरउ असंखगुणियाणणंतगुणमाई । तव्विवरीयमियरउ संखेज्जकेसु संखगुणं ॥ ४३ ॥

व्याख्या—इह द्विधाऽल्पबहुत्वप्ररूपणा—अनन्तरोपनिधया परंपरोपनिधया च । तत्रानन्तरत इत्येकस्मिन् षट्स्थानकेऽन्तिमस्थानादारभ्य पश्चानुपूर्व्याऽनन्तरोपनिधया प्ररूपणायामनन्तगुणादीन्यनन्तगुणवृद्धानि स्थानान्यादौ कृत्वा शेषाण्यसङ्ख्येयगुणितानि वक्तव्यानि । तथाहि—सर्वस्तोकान्यनन्तगुणवृद्धानि स्थानानि, कण्डकमात्रत्वात्तेषां । तेभ्योऽसङ्ख्येयगुणवृद्धानि स्थानान्यसङ्ख्येयगुणानि । को गुणकारः ? कथ्यते—कण्डकं, तदुपरि चैकं कण्डकं प्रक्षिप्यते । यत एकैकस्यानन्तगुणवृद्धस्य स्थानस्याधस्तादसङ्ख्येयगुणवृद्धानि स्थानानि कण्डकमात्राणि प्राप्यन्ते । तेन कण्डकं गुणकारः । अनन्तगुणवृद्धस्थानकण्डकस्योपरि च कण्डकमात्राण्यसङ्ख्येयगुणवृद्धानि स्थानानि प्राप्यन्ते, न त्वनन्तगुणवृद्धस्थानं । तेनोपरितनकण्डकस्याधिकस्य प्रक्षेपः । तेभ्योऽप्यसङ्ख्येयगुणवृद्धेभ्यः स्थानेभ्यः सङ्ख्येयगुणवृद्धानि स्थानान्यसङ्ख्येयगुणानि तेभ्योऽपि सङ्ख्येयभागाधिकानि स्थानान्यसङ्ख्येयगुणानि । तेभ्योऽप्यसङ्ख्येयभागाधिकान्यसङ्ख्येयगुणानि । तेभ्योऽप्यनन्तभागाधिकान्यसङ्ख्येयगुणानि । गुणकारश्च सर्वत्र कण्डकं । उपरि चैकैककण्डकप्रक्षेपः । एकैकासङ्ख्येयगुणवृद्धादिस्थानस्याधस्तात्कण्डकमात्राणां सङ्ख्येयगुणवृद्धादिस्थानानामुपरि चैकैककण्डकस्य प्राप्तेः । कृताऽनन्तरोपनिधयाऽल्पबहुत्वप्ररू-

पणा । संप्रति परंपरोपनिधया तां कुर्वन्नाह—इतरत इतरस्यां परंपरोपनिधायां तद्विपरीतं, येन क्रमेणानन्तरोपनिधायामुक्तं ततो विपरीतं द्रष्टव्यं, इहादित आरभ्य वक्तव्यमित्यर्थः । तथाहि—सर्वस्तोकान्यनन्तभागवृद्धानि स्थानानि, यस्मादाद्यादनुभागबंधस्थानादारभ्य तानि कण्डकमात्राण्येव प्राप्यन्ते नाधिकानि । तेभ्योऽप्यसङ्ख्येयभागवृद्धानि स्थानान्यसङ्ख्येयगुणानि । यतः प्रथममसङ्ख्येयभागवृद्धं स्थानं पाश्चात्यकण्डकसत्कचरमस्थानापेक्षयाऽसङ्ख्येयेन भागेनाधिकमिति । तत उपरितनमनन्तभागवृद्धं सुतरां तथा । अनन्तभागवृद्धं हि तत्प्रथमासङ्ख्येयभागवृद्धस्थानापेक्षयानन्तभागवृद्धकण्डकसत्कचरमस्थानापेक्षया त्वसङ्ख्येयभागाधिकमेवेति । प्रथमादसङ्ख्येयभागवृद्धात्स्थानादारभ्य प्रथमात्सङ्ख्येयभागस्थानादर्वागन्तरावर्तीनि सर्वाण्यपि स्थानानि विशेषतरतमभावेनासङ्ख्येयभागवृद्धानि प्राप्यन्ते । ततोऽनन्तभागवृद्धेभ्योऽसङ्ख्येयभागवृद्धान्यसङ्ख्येयगुणानि । आनन्तर्येणानन्तभागवृद्धेऽपि परंपरागतमसङ्ख्येयभागवृद्धत्वमाश्रितमित्ययं परंपरोपनिधावकाशः । एवमग्रेऽप्यूह्यं । तेभ्योऽप्यसङ्ख्येयभागवृद्धेभ्यः स्थानेभ्यः सङ्ख्येयभागवृद्धानि स्थानानि सङ्ख्येयगुणानि । कथमिति चेदुच्यते—प्रथमे सङ्ख्यातभागवृद्धे स्थाने पाश्चात्यमनन्तरं स्थानमधिकृत्य सङ्ख्येयभागवृद्धिः प्राप्यते, तद्यदि प्रथमेऽपि सङ्ख्येयभागवृद्धे स्थाने सङ्ख्येयभागवृद्धिस्तदा तत उत्तरेषामनन्तभागवृद्धासङ्ख्येयभागवृद्धानां सुतरां सङ्ख्येयभागवृद्धिः । यतोऽनन्तभागवृद्धिरसङ्ख्येयभागवृद्धिर्वा पूर्वपूर्वानन्तरस्थानापेक्षया । प्रथमसङ्ख्येयभागवृद्धस्थानात्प्राक्तनमनन्तरं स्थानं प्रतीत्य तु सविशेषसविशेषतरसङ्ख्येयभागवृद्धिरेव सा । इयं च मौलद्वितीयसङ्ख्येयभागाधिकस्थानादर्वाग्वाच्या । द्वितीयं मौलं सङ्ख्येयभागाधिकं स्थानं तु द्वाभ्यां सातिरेकाभ्यां सङ्ख्येयभागाभ्यामभ्यधिकमवगन्तव्यं । तृतीयं त्रिभिः सातिरेकैः ।

तुरीयं चतुर्भिः सातिरेकैः । एवं तावद्वाच्य यावदुत्कृष्टसङ्ख्येयतुल्यान्यन्तरान्नावीनि मौलानि सङ्ख्येयन्नागवृद्धानि स्थानानि न्नवन्ति । एतावति चान्तराले यावन्ति स्थानानि तावन्ति सर्वाण्यपि सङ्ख्येयन्नागवृद्धानि, किं त्वेकेन स्थानेन न्यूनानि द्रष्टव्यानि । यत उत्कृष्टं सङ्ख्याततमसङ्ख्येयन्नागवृद्धं स्थानं सङ्ख्येयगुणं न्नवतीति तन्नेह गृह्यते । तत्रेह यावन्त्यसङ्ख्येयन्नागवृद्धानि स्थानान्यनन्तरमुक्तानि तावन्त्येकैकस्मिन्नन्तरान्नाविनां सङ्ख्येयन्नागवृद्धानां स्थानानामन्तरे प्राप्यन्ते । तानि चान्तरा न्नावीनि (मौलानि) सङ्ख्येयन्नागवृद्धानि स्थानान्यत्राधिकारे उत्कृष्टसङ्ख्यातकतुल्यानि गृह्यन्ते । केवलमेकमुत्कृष्टसङ्ख्याततमं त्यज्यत इत्यसङ्ख्येयन्नागवृद्धेभ्यः स्थानेभ्यः सङ्ख्येयन्नागवृद्धानि स्थानानि सङ्ख्येयगुणान्येव न्नवन्ति, प्राक्तनराशिप्रमाणानां तेषां सङ्ख्यातानामेवोत्तरोत्तरमभिवृद्धेः । तेभ्योऽपि सङ्ख्येयगुणवृद्धानि स्थानानि सङ्ख्येयगुणानि । यतः प्रथमात्सङ्ख्येयन्नागवृद्धात्प्राक्तनं यदनन्तरं स्थानं तदपेक्ष्योत्तराण्यन्तरान्तरान्नावीनि उत्कृष्टसङ्ख्यातकतुल्यानि मौलानि सङ्ख्येयन्नागवृद्धानि स्थानानि गत्वा चरमं स्थानं द्विगुणं साधिकं प्राप्यते । ततो न्नूयस्तावन्मात्राण्येव स्थानानि गत्वा चरमं स्थानं सातिरेकं त्रिगुणं । एवमेव चतुर्गुणं । एवं तावद्वाच्यं यावदुत्कृष्टसङ्ख्येयगुणं न्नवति । ततः परमुत्कृष्टसङ्ख्यातकतुल्यानि स्थानानि गत्वा चरमं यदेकेन गुणेन वृद्धमवाप्यते तज्जघन्यासङ्ख्येयगुणं न्नवति, तन्न गृह्यते । ततोऽर्वाक् सङ्ख्येयन्नागवृद्धेभ्यः स्थानेभ्यः सङ्ख्येयगुणवृद्धानि स्थानानि सङ्ख्येयगुणान्येव न्नवन्ति । तथा चाह—सङ्ख्येयाख्येषु सङ्ख्येयनामसु सङ्ख्येयन्नागवृद्धसङ्ख्येयगुणरूपेषु स्थानेषु, सङ्ख्येयगुणमिति क्रियाविशेषणं, सङ्ख्येयगुणनया परंपरोपनिधा वाच्येत्यर्थः । तद्विपरीतमितरत इत्यस्य विशेषनियमोऽयं । तेभ्योऽपि सङ्ख्येयगुणवृद्धेभ्यः स्थानेभ्योऽसङ्ख्येयगुणवृद्धानि स्थानान्यसङ्ख्येयगु-

णानि । यत उत्कृष्टसङ्ख्यातगुणवृद्धिपरिसमाप्तिभाविनो जघन्यासङ्ख्येयगुणस्थानात् पराणि सर्वाण्यप्यनन्तभागवृद्धासङ्ख्येयभागवृद्धसङ्ख्येयभागवृद्धसङ्ख्येयगुणवृद्धासङ्ख्येयगुणवृद्धानि स्थानान्यसङ्ख्येयगुणानि प्राप्यन्ते । तेभ्योऽप्यनन्तगुणवृद्धानि स्थानान्यसङ्ख्येयगुणानि । यतः प्रथममनन्तगुणवृद्धं स्थानं पाश्चात्यमनन्तरं स्थानमधिकृत्य यद्यनन्तगुणाधिकं तदा तत उत्तराण्या षट्स्थानकपरिसमाप्तेः सर्वाण्यपि सुतरां तथा । यावन्ति च स्थानानि प्रागतिक्रान्तानि तावन्त्येकैकस्मिन्ननन्तगुणवृद्धानामन्तरान्तराभाविनामन्तरे भवन्ति । कण्ठकमात्राणि च तान्यन्तराणीत्यसङ्ख्येयगुणवृद्धेभ्योऽनन्तगुणवृद्धान्यसङ्ख्येयगुणानि सुविशदान्येव । तदेवं कृताल्पबहुत्वप्ररूपणा ॥ ४३ ॥

प्ररूपितान्यनुभागबन्धस्थानानि । अथैतेषु निष्पादकत्वेन यथा जीवा वर्त्तन्ते तथा प्ररूपणा कर्त्तव्या । तत्राष्टावनुयोगद्वाराणि । तथाहि—एकैकस्मिन् स्थाने जीवप्रमाणप्ररूपणा १, अन्तरस्थानप्ररूपणा २, निरन्तरस्थानप्ररूपणा ३, नानाजीवकालप्रमाणप्ररूपणा ४, वृद्धिप्ररूपणा ५, यवमध्यप्ररूपणा ६, स्पर्शनाप्ररूपणा ७, अल्पबहुत्वप्ररूपणा ८ चेति । तत्राद्यप्ररूपणाद्वयं कुर्वन्नाह—

थावरजीवाणंता इक्किक्के तसजिया असंखिज्जा। लोगा सिमसंखिज्जा अंतरमह थावरे णत्थि ॥ ४४ ॥

व्याख्या—एकैकस्मिन् स्थावराणां बन्धयोग्येऽनुभागबन्धस्थानेऽनन्ताः स्थावरजीवा बन्धकत्वेन प्राप्यन्ते । त्रसप्रायोग्ये त्वेकैकस्मिन्ननुभागबन्धस्थाने जघन्येनैको द्वौ वा उत्कर्षतोऽसङ्ख्येया आवलिकाऽसङ्ख्येयभागमात्रास्त्रसजीवाः प्राप्यन्ते । तथा एषां त्रसजीवानामसङ्ख्येया लोका असङ्ख्येयलोकाकाशप्रदेशप्रमाणान्यनुभागबन्धस्थानान्यन्तरं त्रसप्रायोग्ये-

ष्वनुभागबन्धस्थानेषु त्रसजीवानां जघन्येनैकं द्वे वोत्कर्षतोऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि बन्धं नायान्तीत्यर्थः । अथ स्थावरे स्थावरप्रायोग्येषु स्थानेष्वन्तरं नास्ति । सर्वाण्यपि स्थावरप्रायोग्यानि स्थानाणि सर्वदैव स्थावरजीवैर्बध्यमानानि प्राप्यन्ते, स्थावरजीवानामनन्तत्वात्तत्प्रायोग्यस्थानानां चासङ्ख्येयत्वादन्तराप्राप्तेरिति भावः ॥ ४४ ॥

अथ निरन्तरस्थाननानाजीवकालप्रमाणप्ररूपणार्थमाह—

आवलिअसंखभागो तसा णिरंतरमहेगठाणम्मि । नाणा जीवा एवइकालं एगिंदिया णिच्चं ॥ ४५ ॥

व्याख्या—तसा इत्यत्र तृतीयार्थे प्रथमा, ततस्त्रसैर्निरन्तराणि निरन्तरं बध्यमानान्यनुभागबन्धस्थानानि जघन्येन द्वौ त्रीणि वा प्राप्यन्ते, उत्कर्षतस्त्वावलिकाया असङ्ख्येयभागमात्राणीत्यर्थवशाद्योजनीयं । कथमेतदवसेयमिति चेदुच्यते—त्रसजीवाः स्तोकाः त्रसप्रायोग्याणि स्थानानि त्वसङ्ख्येयगुणानि, ततो न सर्वाणि त्रसजीवैः क्रमेण निरन्तरं बध्यमानानि प्राप्यन्ते, किंतूत्कर्षतोऽप्युक्तप्रमाणान्येवेति । एकैकमनुभागबन्धस्थानं नानाजीवैर्बध्यमानं कियन्तं कालमविरहितं प्राप्यत इति प्रश्ने सत्युत्तरम्—अथैकस्थाने एकैकस्मिन्ननुभागबन्धस्थाने नानारूपास्त्रसजीवा जघन्येनैकं समयं, उत्कर्षत "एवइकालं ति" एतावन्तं कालं पूर्वोक्तस्वरूपं आवलिकाऽसङ्ख्येयभागमात्रं कालं यावदित्यर्थः, निरन्तरं बन्धकत्वेन प्राप्यन्ते, परतोऽवश्यं तत्स्थानं बन्धशून्यं भवति । अयं भावः—एकैकं त्रसप्रायोग्यमनुभागबन्धस्थानमन्यान्यत्रसजीवैर्निरन्तरं बध्यमानं जघन्येनैकं समयं द्वौ वा समयौ प्राप्यते, उत्कर्षतस्त्वावलिकाऽसङ्ख्येयभागमात्रं । एकेन्द्रिया नानाविधाः स्थावरप्रायोग्ये एकैकस्मिन्ननुभागबन्धस्थाने नित्यबन्धकत्वेन प्राप्यन्ते, न कदापि तद्बन्धशून्यं भवतीत्यर्थः । एकैकं

स्थावरप्रायोग्यमनुभागबन्धस्थानं स्थावरजीवैरन्यान्यैर्बध्यमानं सर्वकालमवाप्यते, न तु कदापि बन्धरहितं भवतीति भावः४५

अथ वृद्धिप्ररूपणावसरः। तत्र द्वे अनुयोगद्वारे—अनन्तरोपनिधा परंपरोपनिधा च। तत्रानन्तरोपनिधामाह—

थोवा जहन्नठाणे जा जवमज्झं विसेसउ अहिया। एत्तो हीणा उक्कस्सगं ति जीवा अणंतरउ ॥ ४६ ॥

व्याख्या—जघन्येऽनुभागबन्धस्थाने बन्धकत्वेन वर्त्तमाना जघन्यस्थानास्ते सर्वस्तोकाः। ततो द्वितीयेऽनुभागबन्धस्थाने विशेषाधिकाः। ततोऽपि तृतीये विशेषाधिकाः। एवं तावद्वाच्यं यावद्यवमध्यं, सर्वमध्यान्यष्टसामयिकानीत्यर्थः। इत ऊर्ध्वं पुनर्जीवा अनन्तरत आनन्तर्येण क्रमेणेत्यर्थः। विशेषहीना वक्तव्याः, ते च तावद्यावदुत्कृष्टं द्विसामयिकमिति ॥४६॥

गताऽनन्तरोपनिधा परंपरोपनिधामाह—

गंतूणमसंखिज्जे लोगे दुगुणाणि जाव जवमज्झं। एत्तो य दुगुणहीणा एवं उक्कोसगं जाव ॥ ४७ ॥

व्याख्या—जघन्यानुभागबन्धस्थानबन्धकेभ्यो जीवेभ्यो जघन्यानुभागबन्धस्थानादारभ्यासङ्ख्येयलोकाकाशप्रदेशप्रमाणानि स्थानान्यतिक्रम्य परं यदनुभागबन्धस्थानं तद्बन्धका जीवा द्विगुणा वृद्धा भवन्ति। ततः पुनरपि तावत्स्थानातिक्रमे परस्यानुभागस्थानस्य बन्धका द्विगुणवृद्धा भवन्ति। एवमेतावत्स्थानातिक्रमे द्विगुणवृद्धिनियामकानि स्थानानि तावद्वाच्यानि यावद्यवमध्यं। ततोऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणस्थानातिक्रमे परस्यानुभागबन्धस्थानस्य बन्धका द्विगुणहीना भवन्ति। एवं द्विगुणहानिस्तावद्वक्तव्या यावत्सर्वोत्कृष्टं द्विसामयिकमनुभागबन्धस्थानम् ॥ ४७ ॥

नाणंतराणि आवलि असंखभागो तसेसु इयरेसुं। एगंतरा असंखियगुणाइं नाणंतराइं तु ॥ ४८ ॥

व्याख्या—नानान्तराणि नानाप्रकाराणि द्विगुणवृद्धिद्विगुणहानिरूपाणि मध्यगतानि स्थानानि त्रसेषु आवलिकाऽसङ्ख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणानि । तथा चान्यत्राप्युक्तं—"आवलिअसंखभागो तसेसु हाणी ण होइ परिमाणं" । नन्वावलिकाऽसङ्ख्येयभागमात्राण्येवानुभागबन्धस्थानानि त्रसजीवैर्निरन्तरं बध्यमानानि प्राप्यन्त इति प्रागुक्तं तत्कथं त्रसेषु द्विगुणवृद्धिहानय इत्योऽभिधीयन्ते ?, एवं ह्येकापि द्विगुणवृद्धिर्द्विगुणहानिर्वा न प्राप्नोति, सत्यं, प्रागावलिकाऽसङ्ख्येयभागमात्राणि स्थानानि त्रसैर्निरन्तरं बध्यमानतया प्राप्यमाणान्युक्तानि । इह तु कालान्तरे बध्यमानान्यपि गृह्यन्ते, तेषु च जीवा उत्कृष्टपदे क्रमेण विशेषाधिका लभ्यन्ते, ततो यथोक्तप्रमाणा द्विगुणवृद्धिहानयो न विरुध्यन्ते । तथेतरेषु स्थावरेषु एकस्मादन्तरात्रसकायिकानामेकस्मिन् द्वयोर्द्विगुणवृद्ध्योर्द्विगुणहान्योर्वाऽपान्तराले यानि स्थानानि तेभ्य इत्यर्थः, नानान्तराणि यवमध्यादर्वाक्तन्यः परभाविन्यश्च द्विगुणवृद्धिहानय इत्यर्थः, असङ्ख्येयगुणानि । उक्तं च—"हाणिदुगंतरठाणा थावरहाणी असंखगुण त्ति" । इह त्रसानां द्विगुणवृद्धिहानयः स्तोकाः । तेभ्य एकद्विगुणवृद्धिहान्यन्यतमस्थानापान्तरालवर्तीनि स्थानान्यसङ्ख्येयगुणानि । स्थावराणां तु द्वयोर्द्विगुणवृद्ध्योर्द्विगुणहान्योर्वाऽन्तराले एकस्मिन् यानि स्थानानि तानि स्तोकानि द्विगुणवृद्धिद्विगुणहानिस्थानानि पुनरसङ्ख्येयगुणानि ॥ ४८ ॥

कृता वृद्धिप्ररूपणा । अथ यवमध्यप्ररूपणा क्रियते—तत्र यवमध्यस्थानान्यष्टसामयिकानि शेषस्थानापेक्षयाऽसङ्ख्येयभागमात्राणि । तथा यवमध्यस्याधस्तनानि स्थानानि स्तोकानि । ततो यवमध्यस्योपरितनान्यसङ्ख्येयगुणानि । उक्तं च

पञ्चसङ्ग्रहे—"जवमज्झे ठाणाइं असंखभागो उ सेसठाणाणं। हेट्ठम्मि होंति थोवा उवरिम्मि असंखगुणियाणि ॥ १ ॥" कृता यवमध्यप्ररूपणा। अथ स्पर्शनाप्ररूपणामाह—

फासणकालो तीए थोवो उक्कस्सगे जहन्ने उ। होइ असंखेज्जगुणो उ कंडगे तत्तिउं चेव ॥ ४९ ॥

जवमज्झकंडगोवरि हेट्ठा जवमज्झउं असंखगुणो। कमसो जवमज्झुवरिं कंडगहेट्ठा य तावइउं ॥ ५० ॥

जवमज्झुवरि विसेसो कंडगहेट्ठा य सव्वहिं च तहा। जीवप्पाबहुमेवं अज्झवसाणेसु जाणेज्जा ॥ ५१ ॥

व्याख्या—अतीते काले एकस्य जीवस्योत्कृष्टे द्विसामयिकेऽनुभागबन्धस्थाने स्पर्शनाकालः स्तोकोऽतीते काले परिभ्रमता जन्तुना स्तोकमेव कालं द्विसामयिकान्यनुभागबन्धस्थानानि स्पृष्टानीत्यर्थः। जघन्ये त्वनुभागबन्धस्थाने प्राथमिकेषु चतुःसामयिकेष्वित्यर्थः, अतीते काले स्पर्शनाकालोऽसङ्ख्येयगुणः। कण्डके तावन्मात्र एव स्पर्शनाकालो यावन्मात्र आद्येषु चतुःसामयिकेषु। कंडकं नामोपरितनानि चतुःसामयिकानि स्थानानि। ततो यवमध्येष्वष्टसामयिकेषु स्थानेषु स्पर्शनाकालोऽसङ्ख्येयगुणः। ततः कण्डकस्योपरिवर्त्तिचतुःसामयिकस्थानसङ्घातरूपस्योपरितनेषु त्रिसामयिकेषु स्थानेषु स्पर्शनाकालोऽसङ्ख्येयगुणः। ततो यवमध्यस्याधस्तात् पञ्चषट्सप्तसामयिकेष्वसङ्ख्येयगुणः उपरितनत्रिसामयिकस्पर्शनापेक्षया समुदितानि प्राथमिकानि पञ्चषट्सप्तसामयिकान्यसङ्ख्येयगुणकालं स्पृष्टानीत्यर्थः। स्वस्थाने त्वेषां तुल्यः स्पर्शनाकालः। ततः क्रमशः क्रमेण यवमध्याधुपरितनेषु कण्डकाधुपरितनचतुःसामयिकसङ्घातरूपाधस्तनेषु पञ्चषट्सप्तसामयि-

केषु स्वस्थानेषु तावन्मात्र एव स्पर्शनाकालो यावन्मात्रः पाश्चात्येषु पञ्चषट्सप्तसामयिकेषु । ततो यवमध्यस्योपरितनेषु द्विसामयिकपर्यन्तेषु सर्वेष्वपि स्थानेषु यः स्पर्शनाकालः स विशेषाधिकः । ततोऽपि कण्डकस्य यवमध्योपरिवर्त्तिचतुःसामयिकस्थानसङ्घातरूपस्याधस्तात्सर्वेष्वपि स्थानेषु जघन्यचतुःसामयिकपर्यन्तेषु स्पर्शनाकालः समुदितो विशेषाधिकः । ततोऽपि सर्वस्थानेषु स्पर्शनाकालो विशेषाधिकः । कृता स्पर्शनाप्ररूपणा । सम्प्रत्यल्पबहुत्वप्ररूपणार्थमाह—"जीवप्पबहुं ति" जीवाल्पबहुत्वमेवमध्यवसायस्थानेषु जानीयात् । तथाहि—द्विसामयिकानुभागनिबन्धनभूतेष्वध्यवसायेषु वर्त्तमानजीवाः स्तोकाः । ततः प्राथमिकचतुःसामयिकानुभागनिबन्धनभूतेष्वसङ्ख्येयगुणाः । एतावन्त एवोपरिवर्त्तिचतुःसामयिकानुभागबन्धस्थाननिबन्धनेषु । ततोऽपि यवमध्यानुभागबन्धस्थाननिबन्धनेष्वसङ्ख्येयगुणाः । ततोऽपि त्रिसामयिकानुभागबन्धस्थाननिमित्तेष्वसङ्ख्येयगुणाः । ततोऽप्याद्यपञ्चषट्सप्तसामयिकानुभागबन्धस्थानहेतुष्वसङ्ख्येयगुणाः । एतावन्त एवोपरितनपञ्चषट्सप्तसामयिकानुभागबन्धस्थाननिमित्तेषु । ततो यवमध्योपरिवर्त्तिनिःशेषानुभागबन्धस्थाननिमित्तेषु विशेषाधिकाः । ततोऽपि कण्डकाधस्तननिःशेषानुभागबन्धस्थानहेतुषु विशेषाधिकाः । ततोऽपि सर्वेष्वनुभागबन्धस्थाननिबन्धनेष्वध्यवसायेषु विशेषाधिकाः ॥ ४९–५०–५१ ॥

तदेवमनुभागबन्धस्थानेषु तन्निबन्धनेषु चाध्यवसानेषु यथा जीवा वर्त्तन्ते तथा प्ररूपितं । अथैकैकस्मिन् स्थितिस्थानाध्यवसाये नानाजीवापेक्षया कियन्तोऽनुभागबन्धाध्यवसायाः प्राप्यन्त इत्येतन्निरूपयितुमाह—

एक्केक्कम्मि कसाउदयम्मि लोगा असंखिया हुंति । ठिइबन्धठाणेसु वि अज्झवसाणाण ठाणाणि ॥ ५२॥

व्याख्या—एकैकस्मिन् कषायोदये स्थितिस्थाननिबन्धनऋते नानाजीवापेक्षयाऽनुभागबन्धाध्यवसायस्थानानि कृष्णादिलेश्यापरिणामविशेषरूपाण्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि भवन्ति । तथाहि—जघन्यस्थितेरारभ्योत्कृष्टां स्थितिं यावद्यावन्तः समयास्तावन्ति स्थितिस्थानानि । तथाहि—जघन्या स्थितिरेकं स्थितिस्थानं । सैव समयोत्तरा द्वितीयं । द्विसमयोत्तरा तृतीयं । एवं समयवृद्ध्या तावद्वाच्यं यावदुत्कृष्टा स्थितिः । एवं चासङ्ख्येयानि स्थितिस्थानानि भवन्ति । तेषु च प्रत्येकमेकैकस्मिन् स्थितिबन्धस्थानेऽध्यवसायस्थानानि तीव्रमन्दादिकषायोदयविशेषरूपाण्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि भवन्ति । एकैकस्मिंश्च कषायोदये सति असङ्ख्येयलोकाकाशप्रदेशप्रमाणान्यनुभागबन्धस्थानानि कृष्णादिलेश्यापरिणामविशेषरूपाणि भवन्ति । 'सकषायोदया हि कृष्णादिलेश्यापरिणामविशेषा अनुभागबन्धहेतव' इतिवचनादिति मिलितोऽर्थः । यत्तु 'स्थितिपाकविशेषस्तस्य भवति लेश्याविशेषेणे'ति वाचकवचनं तत्रापि पाकपदमहिम्नाऽनुभाग एव ग्राह्य इति वृद्धवादः ॥ ५२ ॥

अथानुभागबन्धाध्यवसायस्थानानां वृद्धिमार्गणा क्रियते । सा द्विधा—अनन्तरोपनिधया परंपरोपनिधया च । तत्रानन्तरोपनिधया तावद्वृद्धिमार्गणां चिकीर्षुराह—

थोवाणि कसाउदए अप्पवसाणाणि सव्वजहन्नम्मि । बिइयाइ विसेसहियाणि जाव उक्कस्सगं ठाणं ॥५३॥

व्याख्या—"सव्वजहन्नम्मि" सर्वजघन्ये स्थितिहेतौ कषायोदयेऽध्यवसानान्यनुभागबन्धाध्यवसायस्थानानि कृष्णादि-

लेश्यापरिणामरूपाणि स्तोकानि । ततो द्वितीयादौ यथोत्तरं विशेषाधिकानि तावद्वाच्यानि यावदुत्कृष्टं स्थितिबन्धाध्यवसायस्थानम् ॥ ५३ ॥

कृताऽनन्तरोपनिधया वृद्धिमार्गणाऽथ परंपरोपनिधया तां कुर्वन्नाह—

गंतूण असंखेज्जे लोगे दुगुणाणि जाव उक्कोसो । आवलिअसंखभागो णाणागुणवुड्ढिठाणाणि ॥ ५४ ॥

व्याख्या—जघन्यात् कषायोदयादारभ्यासङ्ख्येयलोकाकाशप्रदेशप्रमाणानि कषायोदयस्थानानि गत्वा परं यत् स्थितिबन्धाध्यवसायस्थानं कषायोदयरूपं तस्मिन्ननुभागबन्धाध्यवसायस्थानानि जघन्यकषायोदयस्थानसत्कानुभागबन्धाध्यवसायस्थानापेक्षया द्विगुणानि भवन्ति । पुनरपि तावत्कषायोदयस्थानातिक्रमे यदपरं स्थितिबन्धाध्यवसायस्थानं तस्मिन द्विगुणानि भवन्ति । एवं भूयो भूयस्तावद्वाच्यं यावदुत्कृष्टं कषायोदयस्थानं, यावन्ति चान्तरालिकानि नानारूपाणि द्विगुणवृद्धिस्थानानि तावन्त्यावलिकाऽसङ्ख्येयभागसमयप्रमाणानि भवन्ति ॥ ५४ ॥

सव्वासुहपगडीणं सुहपगडीणं विवज्जयं जाणे । ठिइबंधठाणेसु वि आउगवज्जाण पगडीणं ॥ ५५ ॥

व्याख्या—सर्वासामशुभप्रकृतीनां ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयमिथ्यात्वकषायषोडशकनोकषायनवकनरकायुराद्यजातिचतुष्टयाप्रथमसंस्थानपञ्चकसंहननपञ्चककृष्णनीलवर्णदुरभिगन्धतिक्तकदुरसकर्कशगुरुरूक्षशीतस्पर्शरूपाशुभकुवर्णादिनवकनरकगतिनरकानुपूर्वीतिर्यग्गतितिर्यगानुपूर्व्यप्रशस्तविहायोगत्युपघातस्थावरदशकनीचैर्गोत्रान्तरायपञ्चकलक्षणानां सप्ताशीतिसङ्ख्यानामेषा प्रागुक्ताऽनुभागबन्धाध्यवसायस्थानानां वृद्धिमार्गणा द्रष्टव्या । शुभप्रकृतीनां देव-

त्रिकमनुजत्रिकतिर्यगायुःसातवेदनीयपञ्चेन्द्रियजातिशरीरपञ्चकसङ्घातपञ्चकबन्धनपञ्चदशकाङ्गोपाङ्गत्रयाद्यसंहननसंस्थान-शुभवर्णाद्येकादशकपराघातागुरुलघूच्छ्वासातपोद्योतनिर्माणप्रशस्तविहायोगतित्रसदशकतीर्थंकरोच्चैर्गोत्रलक्षणानामेकोनसप्त-तिसङ्ख्यानां विपर्ययं जानीहि। तथाहि—उत्कृष्टे कषायोदयेऽनुभागबन्धाध्यवसायस्थानान्यासां सर्वस्तोकानि, द्विचरमे विशेषाधिकानि, त्रिचरमे विशेषाधिकानि, एवं तावद्वाच्यं यावत्सर्वजघन्यं कषायोदयस्थानं। इयमनन्तरोपनिधया वृद्धि-मार्गणा। परंपरोपनिधया वृद्धिमार्गणायां तूत्कृष्टकषायोदयस्थानादारभ्य यावत्सर्वजघन्यं कषायोदयस्थानं तावदधोऽधो-ऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणकषायोदयस्थानातिक्रमे यद्यत्स्थानमागच्छति तत्र तत्रानुभागबन्धाध्यवसायस्थानानां द्विगु-णवृद्धिर्वाच्या। तानि च नानारूपाणि द्विगुणवृद्धिस्थानान्यावलिकाऽसङ्ख्येयभागप्रमाणानि द्रष्टव्यानि। अमूनि चोक्तप्र-माणानि शुभप्रकृतीनामशुभप्रकृतीनां च प्रत्येकं द्विगुणस्थानानि स्तोकानि। एकस्मिन् द्विगुणवृद्ध्यपान्तराले कषायोदय-स्थानान्यसङ्ख्येयगुणानि। तदेवं स्थितिबन्धहेतुष्वध्यवसायेष्वनुभागबन्धहेतूनामध्यवसायानां प्ररूपणा कृता। अथ स्थिति-बन्धस्थानेष्वनुभागबन्धस्थानप्ररूपणां कुर्वन्नाह—स्थितिबन्धस्थानेष्वपि सर्वासामायुर्वर्जानां प्रकृतीनां कषायोदयेष्वनुभा-गबन्धाध्यवसायस्थानानीवानुभागबन्धस्थानानि वक्तव्यानि। तत्र पूर्वोक्तानामायुर्वर्जानामशुभप्रकृतीनां जघन्यस्थितावनुभागबन्धस्थानान्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि। तानि च स्तोकानि। ततो द्वितीयस्थितौ विशेषाधिकानि। ततोऽपि तृतीयस्थितौ विशेषाधिकानि। एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः। शुभप्रकृतीनां त्वायुर्वर्जानां प्रागुक्तानामुत्कृष्ट-

स्थितावनुभागबन्धस्थानान्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि । तानि स्तोकानि । तत एकैकसमयहान्या जघन्यस्थितिं यावद्विशेषाधिकानि वाच्यानि ॥ ५५ ॥

इयमनन्तरोपनिधया वृद्धिमार्गणा, अथेह परंपरोपनिधया तां चिकीर्षुराह—

पल्लासंखियभागं गंतुं दुगुणाणि आउगाणं तु । थोवाणि पढमबंधे तिण्हाइ असंखगुणियाणि ॥ ५६ ॥

व्याख्या—पल्योपमासङ्ख्येयभागमात्राणि स्थितिस्थानानि गत्वाऽतिक्रम्य यद्यदपरं स्थितिस्थानं तस्मिंस्तस्मिन् प्राक्तन-स्थितिस्थानसत्कानुभागबन्धस्थानेभ्यो द्विगुणान्यनुभागबन्धस्थानानि वाच्यानि । एतच्च पूर्वोक्तानामायुर्वर्जानामशुभप्रकृतीनां जघन्यस्थितेरारभ्योत्कृष्टस्थितिं यावदुपर्युपरि द्रष्टव्यं । पूर्वोक्तानामायुर्वर्जानां शुभप्रकृतीनां तूत्कृष्टस्थितेरारभ्य जघन्यस्थितिं यावत्पल्योपमासङ्ख्येयभागप्रमाणस्थितिस्थानातिक्रमेऽधोऽधोऽवतीर्य द्विगुणवृद्धिर्वाच्या । एतानि च शुभप्रकृतीनामशुभप्रकृतीनां च प्रत्येकं द्विगुणवृद्धिस्थानान्यावलिकाऽसङ्ख्येयभागसमयप्रमाणानि भवन्ति । तथा द्विगुणवृद्धिस्थानानि स्तोकानि, आवलिकाऽसङ्ख्येयभागमात्रत्वात् । एकस्मिन् द्विगुणवृद्ध्योरपान्तराले स्थितिस्थानान्यसङ्ख्येयगुणानि, पल्योपमासङ्ख्येयभागमात्रत्वात् । तथायुषां चतुर्णामपि प्रथमबन्धे जघन्यस्थितिबन्धे सर्वस्तोकान्यनुभागबन्धस्थानानि । ततः समयाधिकानां जघन्यस्थितावसङ्ख्येयगुणानि । ततोऽपि द्विसमयाधिकायामसङ्ख्येयगुणानि । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः ॥ ५६ ॥

अथानुभागबन्धस्थानानां तीव्रमन्दतापरिज्ञानार्थमनुकृष्टिमभिधित्सुराह—

घाईणमसुभवन्नरसगंधफासे जहन्नठिइबंधे। जाणुक्कवसाणाइं तदेगदेसो य अन्नाणि ॥ ५७ ॥

पल्लासंखियभागो जाव बिइयस्स होइ बिइयम्मि। आ उक्कस्सा एवं उवघाए वा वि अणुकट्ठी ॥५८॥

व्याख्या—इह ग्रन्थिदेशे वर्त्तमानस्याभव्यस्य यो जघन्यः स्थितिबन्धस्तस्मात् स्थितिवृद्धावनुकृष्टिरभिधीयमानाऽनुसर्त्तव्या। सातवेदनीयमनुजद्विकदेवद्विकतिर्यग्द्विकपञ्चेन्द्रियजातित्रसदशकाद्यसंहननसंस्थानाप्रशस्तविहायोगत्युच्चैर्गोत्रनीचैर्गोत्राणां त्वभव्यप्रायोग्यजघन्यबन्धादधोऽप्यनुसर्त्तव्या। इह च वर्गे वर्गेऽनुकृष्टिस्तीव्रमन्दत्वानि च स्वस्थाने तुल्यानीति चत्वारो वर्गाः परिगृह्यन्ते—अपरावर्त्तमानाशुभप्रकृतिवर्गः, अपरावर्त्तमानशुभप्रकृतिवर्गः, परावर्त्तमानशुभप्रकृतिवर्गः, परावर्त्तमानाशुभप्रकृतिवर्गश्चेति। तत्र घातिप्रकृतय उपघातमशुभवर्णनवकं चेत्यपरावर्त्तमानाशुभप्रकृतिवर्गः। पराघातबन्धनतनुसङ्घाताङ्गोपाङ्गसुवर्णाद्येकादशकतीर्थकरनिर्माणागुरुलघूच्छ्वासातपोद्योता अपरावर्त्तमानशुभप्रकृतिवर्गः। सातवेदनीयस्थिरादिषट्कोच्चैर्गोत्रदेवद्विकमनुजद्विकपञ्चेन्द्रियजातिसमचतुरस्रवज्रर्षभनाराचप्रशस्तविहायोगतयः परावर्त्तमानशुभप्रकृतिवर्गः। असातस्थावरदशकनरकद्विकाप्रशस्तविहायोगत्याद्यजातिचतुष्टयानाद्यसंस्थानसंहननानि परावर्त्तमानाशुभप्रकृतिवर्गः। तत्र प्रथमं वर्गमधिकृत्येदमभिधीयते—घातिनां पञ्चविधज्ञानावरणनवविधदर्शनावरणमिथ्यात्वषोडशकषायनवनोकषायपञ्चविधान्तरायलक्षणानां अशुभवर्णगन्धरसस्पर्शे च अत्र षष्ठ्यर्थे सप्तमीत्यशुभानां वर्णगन्धरसस्पर्शानां कृष्णनीलदुरभिगन्धतिक्तकटुगुरुकर्कशरूक्षशीतरूपाणामित्यर्थः। जघन्यस्थितिबन्धे यान्यनुभागबन्धाध्यवसाय-

स्थानानि तदेकदेशस्तदेकदेशप्रमाणान्यन्यानि द्वितीयस्थितिबन्धेऽधिकान्यायान्ति तावन्ति चासङ्क्षेयं भागं मुक्त्वा द्वितीयस्थितिबन्धारंभे प्राप्यन्त एव। इदमुक्तं भवति–जघन्यस्थितिबन्धारंभे यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसङ्क्षेयभागं मुक्त्वा शेषाणि सर्वाण्यपि द्वितीयस्थितिस्थानबन्धारंभे गच्छन्ति, तदेकदेशेनान्यानि च भवन्ति। तदुक्तम्—"मोत्तुमसंखं भागं जहन्नठिइगाणगाण सेसाइं। गच्छंति उवरिमाए तदेक्कदेसेण अणाइं॥१॥" द्वितीयस्थितिबन्धारंभे च यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसङ्क्षेयतमं भागं मुक्त्वा शेषाणि सर्वाण्यपि तृतीयस्थितिस्थानबन्धारंभे गच्छन्ति अन्यानि च भवन्ति। तृतीयस्थितिबन्धारंभे च यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसङ्क्षेयतमं भागं मुक्त्वा शेषाणि सर्वाण्यपि चतुर्थस्थितिस्थानबन्धारंभे गच्छन्ति अन्यानि (च) भवन्ति। एवं तावद्वाच्यं यावत्पल्योपमासङ्क्षेयभागमात्राः स्थितयो गता भवन्ति। अत्र च जघन्यस्थितिबन्धारंभाविनामनुकृष्टिः परिसमाप्ता। द्वितीयस्य स्थितिबन्धस्य सम्बन्धिनामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिर्द्वितीये। यत्र जघन्यस्थितिबन्धारंभाविनामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्ता। ततोऽनन्तरे परिनिष्ठां याति। ततश्चानन्तरे तृतीयस्थितिबन्धारंभाविनामनुकृष्टिर्निष्ठां याति। एवममुना प्रकारेण आ उत्कर्षादुत्कृष्टस्थितिं यावदवगन्तव्यं। उपघातेऽप्येवमेवानुकृष्टिरनुवृत्तिर्ज्ञातव्या इति ॥ ५७–५८ ॥

इयं पञ्चपञ्चाशत्प्रकृतिसमुदायरूपे प्रथमवर्गेऽनुकृष्टिरभिहिता, अथ द्वितीयवर्गे तामाह—

परघाउज्जोउस्सासायवधुवणामतणुउवंगाणं। पडिलोमा सायस्स य उक्कस्से जाणि समऊणे ॥ ५९ ॥

ताणि य अन्नाणेवं ठिइबंधो जा जहन्नगमसाए। हेट्ठुज्जोयसमेवं परित्तमाणीण उ सुभाणं ॥ ६० ॥

व्याख्या—पराघातोद्योतोच्छ्वासातपानां शुभवर्णाद्येकादशकागुरुलघुनिर्माणरूपाणां ध्रुवनाम्नां । "तणुउवंगाणं ति" तनुग्रहणेन शरीरसङ्घातबन्धनानि गृह्यन्ते, ततश्च शरीरपञ्चकसङ्घातपञ्चकबन्धनपञ्चदशकाङ्गोपाङ्गत्रयाणां चानुकृष्टिः प्रतिलोममभिधातव्या । तथाहि—एतासां प्रकृतीनामुत्कृष्टस्थितिबन्धारम्भे यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसङ्ख्येयं भागं मुक्त्वा शेषाणि सर्वाण्यप्येकसमयोनोत्कृष्टस्थितिबन्धारम्भे प्राप्यन्तेऽन्यानि च भवन्ति । एकसमयोनोत्कृष्टस्थितिबन्धारंभे च यानि तेषामसङ्ख्येयतमं भागं मुक्त्वा शेषाणि सर्वाण्यपि द्विसमयोनोत्कृष्टस्थितिबन्धारम्भे प्राप्यन्तेऽन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासङ्ख्येयभागमात्राः स्थितयोऽधोऽतिक्रान्ता भवन्ति । अत्रोत्कृष्टस्थितिबन्धारम्भभाविनामनुभागाध्यवसायस्थानानां स्थितिस्थाने स्थितिस्थानेऽसङ्ख्येयभागमोचनेनानुकृष्टिः परिसमाप्ता । ततोऽनन्तरमधस्तने स्थितिस्थाने एकसमयोनोत्कृष्टस्थितिबन्धारम्भभाविनामनुकृष्टिर्निष्ठां याति । ततोऽप्यनन्तराधस्तने द्विसमयोनोत्कृष्टस्थितिबन्धारम्भभाविनामनुकृष्टिर्निर्लिप्यते । एवं तावद्वाच्यं यावदात्मीया जघन्या स्थितिः । तीर्थकरनामातिदेशेनाग्रे वक्ष्यमाणमप्यत्र दृश्यं, "परघायबंधणतणु अंगसुवन्नाइ तित्थ निम्माणं। अगुरुलहूसासतिगं संघायं भयल सुभवग्गो ॥१॥" इत्येवं षट्चत्वारिंशत्प्रकृतिसमुदायरूपस्यापरावर्त्तमानशुभप्रकृतिवर्गस्य परिगणनात्, तत्र च सामस्त्येनेहानुकृष्टेरभिधित्सितत्वात् । उक्ता द्वितीयवर्गेऽनुकृष्टिः । अथ तृतीयवर्गमधिकृत्याह—"सायस्स उ" इत्यादि सातस्योत्कृष्टां स्थितिं बध्नतो यान्यनुभागबन्धाध्यवसायस्थानानि समयोनोत्कृष्टस्थितिबन्धारम्भेऽपि तानि भवन्ति अन्यानि च । यानि च समयोनोत्कृष्टस्थितिबन्धारम्भे भवन्ति द्विसमयोनोत्कृष्टस्थितिबन्धारम्भेऽपि तानि अन्यानि च भवन्ति । एवं तावद्वाच्यं

यावदसातेऽसातस्य जघन्यस्थितिबन्धः । अयमिह भावार्थः—सप्रतिपक्षाणां प्रकृतीनामन्तःकोटाकोट्यादीनि स्थितिस्थानानि स्थापनीयानि, अभव्यस्य हि जघन्यः स्थितिबन्धः सर्वस्तोकोऽप्यन्तःकोटीकोटिप्रमाणः, तस्मादारभ्य च प्रायोऽनुकृष्टिर्वक्तव्येति हेतोः । स्थापनायां च सातस्योपरिभागादारभ्याधोमुखमसातस्य चाधोभागादारभ्योर्ध्वमुखं सागरोपमशतपृथक्त्वप्रमाणाः स्थितयः परस्परमाक्रान्ताः स्थापयितव्याः । एतावत्यो हि स्थितयः परावर्त्य परावर्त्य बध्यन्ते, तत आक्रान्ताः स्थाप्याः । शेषास्तु सातस्याधोमुखा असातस्य चोर्ध्वमुखाः स्थाप्याः, यावत्पर्यन्तवर्त्तिनी निजनिजा स्थितिः एताश्चान्तराले प्रतिपक्षप्रकृतिबन्धाभावाच्छुद्धा इत्युच्यन्ते । ततोऽसातस्य जघन्यस्थितिबन्धं यावदधोमुखतया सातस्य स्थितयः प्रतिपक्षाक्रान्ताः सागरोपमशतपृथक्त्वप्रमाणा लभ्यन्ते । तत एतावत्प्रमाणासु सातस्य स्थितिषु तानि चान्यानि चेत्येवं क्रमोऽनुसरणीयः । "हेडुज्जोअसमं ति" अधस्तात्सातस्य शुद्धस्थितिषु उद्योतसमं, यथा प्रागुद्योतस्याभिहितं तथा वक्तव्यं । तथाहि—स्थापनायामसातस्य यो जघन्यः स्थितिबन्धोऽभव्यप्रायोग्यस्तत्समानं यत् स्थितिस्थानं तत्र यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसङ्ख्येयतमं भागं मुक्त्वा शेषाणि सर्वाणि तदधस्तने स्थितिस्थाने प्राप्यन्तेऽन्यानि च भवन्ति । तत्रापि यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसङ्ख्येयतमं भागं मुक्त्वा शेषाणि सर्वाणि ततोऽप्यधस्तने प्राप्यन्तेऽन्यानि च भवन्ति । अनेन क्रमेण तावद्वाच्यं यावत्पल्योपमासङ्ख्येयभागमात्राः स्थितयो गता भवन्ति । तत्र चासातसत्कजघन्यस्थितिबन्धतुल्यस्थितिस्थानसत्कानामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिर्निष्ठामेति । ततोऽधस्तने स्थितिस्थानेऽसातजघन्यबन्धतुल्यस्थितिस्थानाधस्तनस्थितिस्थानसत्कानामनुकृष्टिर्निष्ठिता भवति । एवं तावद्वाच्यं यावत्सातस्य

जघन्या स्थितिः । अतिदेशमाह—एवं यथा सातवेदनीयस्योक्तं तथा सर्वासां परावर्त्तमानानां शुभानां मनुजद्विकदेवद्विकपञ्चेन्द्रियजातिसमचतुरस्रवज्रर्षभनाराचप्रशस्तविहायोगतिस्थिरषट्कोच्चैर्गोत्ररूपाणां पञ्चदशसङ्ख्यानां शुभप्रकृतीनां नामग्राहमनुकृष्टिरभिधातव्या ॥ ९९–६० ॥

उक्ता तृतीयवर्गेऽनुकृष्टिरथ तुरीयवर्गे तामाह—

जाणि असायजहन्ने उदहिपुहुत्तं ति ताणि अण्णाणि । आवरणसमुप्पेवं परित्तमाणीणमसुभाणं ॥६१॥

व्याख्या—असातस्य जघन्यस्थितिबन्धारम्भे यान्यनुभागबन्धाध्यवसायस्थानानि तानि समयाधिकजघन्यस्थितिबन्धारम्भेऽपि भवन्ति अन्यानि च । यानि समयाधिकजघन्यस्थितिबन्धारम्भेऽनुभागबन्धाध्यवसायस्थानानि तानि द्विसमयाधिकजघन्यस्थितिबन्धारम्भेऽपि भवन्ति अन्यानि च । एवं तावद्वाच्यं यावदुदधिपृथक्त्वं सागरोपमशतपृथक्त्वं भवति । यावन्मात्रासु सातवेदनीयस्थितिष्वधोमुखेन तानि चान्यानि चेत्येवं क्रमोऽनुकृष्टेरुक्तस्तावत्प्रमाणास्वेवासातवेदनीयस्थितिषूर्ध्वमुखेन तानि चान्यानि चेत्येवं जघन्यस्थितेरारभ्य क्रमोऽभिधेय इत्यर्थः । एता एव च स्थितयोऽसातस्य सर्वजघन्यानुभागबन्धप्रायोग्याः, यत एतावत्यः स्थितयः सातात् परावृत्य परावृत्य बध्यन्ते परावर्त्तमानश्च प्रायो मन्दपरिणामो भवति । तत एतासु जघन्यानुभागबन्धसंभवः । इत ऊर्ध्वं त्वसातमेव केवलं बध्यते, तच्च तीव्रतरेण परिणामेन, ततो न तत्र जघन्यानुभागबन्धसंभवः । "उप्पिं ति" तत उपरि आवरणसमं ज्ञानावरणादितुल्यं वक्तव्यं । तथाहि—जघन्यानुभागबन्धप्रायोग्यस्थितीनां चरमस्थितिबन्धे यान्यनुभागबन्धाध्यवसायस्थानानि तेषा-

मसङ्ख्येयतमं भागं मुक्त्वा शेषाणि सर्वाण्यपि तदुपरितनस्थितिबन्धारम्भेऽनुवर्त्तन्ते अन्यानि च भवन्ति । ततोऽप्युपरितनस्थितिबन्धारम्भे प्राक्तनस्थितिस्थानसत्कानुभागबन्धाध्यवसायस्थानानामसङ्ख्येयतमं भागं मुक्त्वा शेषाणि सर्वाण्यनुवर्त्तन्तेऽन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासङ्ख्येयभागमात्राः स्थितयो गता भवन्ति । अत्र जघन्यानुभागबन्धप्रायोग्यचरमस्थितिसत्कानामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्यते । ततोऽप्युपरितनस्थितिबन्धे जघन्यानुभागबन्धप्रायोग्यचरमस्थित्यनन्तरं स्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः समाप्यते । एवं तावद्वाच्यं यावदसातस्योत्कृष्टा स्थितिः । अतिदेशमाह—एवं यथाऽसातवेदनीयस्योक्तं तथैव परावर्त्तमानानामशुभानां स्थावरदशकनरकद्विकाद्यजातिचतुष्टयानाद्यसंस्थानसंहननाप्रशस्तविहायोगतिरूपाणां सप्तविंशतिसङ्ख्यानामशुभप्रकृतीनां नामग्राहमनुकृष्टिरभिधेया ॥ ६१ ॥

तदेवं चतुर्णामपि वर्गाणामनुकृष्टिरभिहिताऽथ तिर्यग्द्विकनीचैर्गोत्राणामनुकृष्टिमभिधित्सुराह—

से काले सम्मत्तं पडिवज्जंतस्स सत्तमखिईए । जो ठिइबंधो हस्सो इत्तो आवरणतुल्लो उ ॥ ६२ ॥
जा अभवियपाउग्गा उप्पिमसायसमयाउ आ(जा)जेट्ठा।एसा तिरियगतिदुगे नीयागोए य अणुकट्ठी ६३

व्याख्या—सप्तमक्षितौ वर्त्तमानस्य नारकस्य "से काले" अनन्तरसमये सम्यक्त्वं प्रतिपद्यमानस्य यो ह्रस्वो जघन्यः स्थितिबन्धः इत ऊर्ध्वं स्थितिबन्धोऽनुकृष्टिमधिकृत्यावरणतुल्यो ज्ञानावरणतुल्यो ज्ञातव्यः । स च तावद्यावदभव्यप्रायोग्या जघन्या स्थितिः । तिर्यग्द्विकनीचैर्गोत्राणां हि स्थापनायां स्वप्रातपद्यप्रकृतिजघन्यस्थितिबन्धादभव्यप्रायोग्याज्जघ-

न्यतरः स्थितिबन्धः स्थापनीयः । ततोऽजघन्यप्रायोग्यजघन्यस्थितिं यावज्ज्ञानावरणतुल्यता द्रष्टव्येत्यर्थः । तत्र तिर्यग्गतिमधिकृत्य भाव्यते—सप्तमपृथिव्यां वर्त्तमानस्य नारकस्य सम्यक्त्वं प्रतिपित्सतस्तिर्यग्गतेर्जघन्यां स्थितिं बध्नतो यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसङ्ख्येयतमं भागं मुक्त्वाऽन्यानि सर्वाण्यपि द्वितीयस्थितिबन्धारम्भेऽनुवर्त्तन्तेऽन्यानि च भवन्ति । द्वितीयां स्थितिं बध्नतो यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसङ्ख्येयतमं भागं मुक्त्वाऽन्यानि सर्वाण्यपि तृतीयस्थितिबन्धारम्भेऽनुवर्त्तन्तेऽन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासङ्ख्येयभागमात्राः स्थितयो गच्छन्ति । अत्र च जघन्यस्थितिस्थानसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिर्निष्ठां याति । तत उपरितनस्थितिबन्धारम्भे द्वितीयस्थितिसत्कानामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिः समाप्तिमियर्त्ति । ततोऽप्युपरितनस्थितिबन्धारम्भे तृतीयस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिमेति । एवं तावद्वाच्यं यावदजघन्यप्रायोग्यो जघन्यस्थितिबन्धः । तत उपरिष्टादजघन्यप्रायोग्यजघन्यस्थितिबन्धादारभ्येत्यर्थः । असातेन समता तुल्यता ज्ञातव्या । "आजेष्ठत्ति" यावज्ज्येष्ठोत्कृष्टा स्थितिः । इदमुक्तं भवति—अजघन्यप्रायोग्यां जघन्यां स्थितिं बध्नतो यान्यनुभागबन्धाध्यवसायस्थानानि तानि तत उपरितनस्थितौ सर्वाणि भवन्ति अन्यानि च । तस्यामपि यान्यनुभागबन्धाध्यवसायस्थानानि तानि तत उपरितनस्थितौ सर्वाणि भवन्त्यन्यानि च । एवं तावद्वाच्यं यावत्सागरोपमशतपृथक्त्वं । एताश्च स्थितयः प्रायोऽजघन्यप्रायोग्यजघन्यानुभागबन्धविषयाः । यत एता मनुष्यगतिरूपप्रतिपक्षप्रकृत्या परावृत्त्य परावृत्त्य बध्यन्ते । परावृत्त्यबन्धे च प्रायः परिणाममान्द्यं भवति । तत एता जघन्यानुभागबन्धविषयाः । एतासां चरमस्थितौ यान्यनुभागबन्धाध्य-

वसायस्थानानि तेषामसङ्क्षेयं ञागं मुक्त्वा शेषाणि सर्वाण्यपि तदुपरितनस्थितिबन्धारम्भेऽनुवर्त्तन्तेऽन्यानि च । तत्रापि यान्यनुञागबन्धाध्यवसायस्थानानि तेषामसङ्क्षेयं ञागं मुक्त्वा शेषाणि सर्वाण्यपि तत उपरितनस्थितिबन्धारम्भेऽनुवर्त्तन्तेऽन्यानि च ञवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासङ्क्षेयञागमात्राः स्थितयो गच्छन्ति । अत्र जघन्यानुञागबन्धविषयचरमस्थितिसत्कानामनुञागबन्धाध्यवसायानामनुकृष्टिर्निष्ठामियर्त्ति । तत उपरितनस्थितिबन्धे जघन्यानुञागबन्धविषयचरमस्थित्यनन्तरस्थितिसत्कानां तेषामनुकृष्टिः समाप्यते । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः । एषा तिर्यग्गतिद्विके नीचैर्गोत्रे चानुकृष्टिः । तत्र यथा तिर्यग्गतौ ञाविता तथा तिर्यगानुपूर्व्यां नीचैर्गोत्रे च ञावनीया ॥ ६२-६३ ॥

अथ त्रसादिचतुष्कस्यानुकृष्टिमभिधित्सुराह—

तसबायरपज्जत्तगपत्ते(य)गाण परघाय तुल्लाउं । जाव ठारसकोऽकोऽी हेठा य साएणं ॥ ६४ ॥

व्याख्या—त्रसबादरपर्याप्तप्रत्येकनाम्नामनुकृष्टिः पराघाततुल्या पराघातस्येव वक्तव्या । सा चोपरितनात्स्थितिस्थानादारभ्याधोऽधोऽवतीर्य यावदधस्तादष्टादशकोटीकोट्यः सागरोपमाणां तिष्ठन्ति तावद्द्रष्टव्या । ततोऽधस्तात्सातेन तुल्यानुकृष्टिरभिधेया । तत्र त्रसनाम्नो ञावना क्रियते—त्रसनाम्न उत्कृष्टस्थितिबन्धारम्भे यान्यनुञागबन्धाध्यवसायस्थानानि तेषामसङ्क्षेयतमं ञागं मुक्त्वा शेषाणि सर्वाण्यपि समयोनोत्कृष्टस्थितावनुवर्त्तन्तेऽन्यानि च ञवन्ति । तानि च सर्वाण्यसङ्क्षेयञागं मुक्त्वा द्वितीयस्थितिबन्धारम्भे प्राप्यन्तेऽन्यानि च ञवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासङ्क्षेयञागमात्राः स्थितयो गच्छन्ति । अत्रोत्कृष्टस्थितिसत्कानामनुञागबन्धाध्यवसायस्थानानामनुकृष्टिः समाप्तिमियर्त्ति । ततोऽध-

स्तने च स्थितिस्थाने समयोनोत्कृष्टस्थितिसत्कानां तेषामनुकृष्टिर्निष्ठामुपैति । एवं तावद्वाच्यं यावदधस्तादष्टादशसागरोपमकोटीकोट्यस्तिष्ठन्ति । ततोऽष्टादशसागरोपमकोटाकोटीचरमस्थितौ यान्यनुभागबन्धाध्यवसायस्थानानि तान्यधस्तनस्थितिबन्धारम्भे सर्वाण्यपि भवन्त्यन्यानि च । तत्स्थानभावीनि च सर्वाण्यपि ततोऽप्यधस्तने स्थितिस्थाने भवन्त्यन्यानि च । एवं तावद्वाच्यं यावदभव्यप्रायोग्यजघन्यानुभागबन्धविषयस्थावरनामसत्कस्थितिप्रमाणाः स्थितयो गता भवन्ति । ततोऽनन्तरमधस्तने स्थितिस्थाने प्राक्तनानन्तरस्थितिस्थानसत्कानामनुभागबन्धाध्यवसायस्थानानामसङ्ख्येयं भागं मुक्त्वा सर्वाण्यपि तान्यनुवर्त्तन्तेऽन्यानि च भवन्ति । ततोऽप्यधस्तने स्थितिबन्धे प्राक्तनानन्तरस्थितिस्थानसत्कानां तेषामसङ्ख्येयं भागं मुक्त्वा शेषाणि सर्वाण्यपि तान्यनुवर्त्तन्तेऽन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासङ्ख्येयभागमात्राः स्थितयो गच्छन्ति । अत्र जघन्यानुभागबन्धविषयस्थावरनामसत्कस्थितिप्रमाणतयाऽभिहितानां स्थितीनां प्रथमस्थितेर्यान्यनुभागबन्धाध्यवसायस्थानानि तेषामनुकृष्टिर्निष्ठिता । ततोऽधस्तने स्थितिस्थाने द्वितीयस्थितिस्थानसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिनिष्ठामेति । एवं तावद्वाच्यं यावत्सर्वजघन्या स्थितिः । एवं बादरपर्याप्तप्रत्येकनाम्नामपि भावना कार्या ॥ ६४ ॥

तणुतुल्ला तित्थयरे अणुकड्ढी तिव्वमंदया एत्तो । सव्वपगईण नेया जहन्नगाई अणंतगुणा ॥ ६५ ॥

व्याख्या—तीर्थकरनाम्न्यनुकृष्टिस्तनुतुल्या यथा शरीरनाम्नि प्रागभिहिता तथा द्रष्टव्या । इत ऊर्ध्वमनुभागानां तीव्रमन्दता वक्तव्या, सा च सर्वासां प्रकृतीनां स्वस्वजघन्यानुभागबन्धादारभ्य यावदुत्कृष्टोऽनुभागबन्धस्तावत् स्थितिबन्धे

स्थितिबन्धेऽनन्तगुणा ज्ञेया, यथोत्तरमनन्तगुणानुन्नागो वक्तव्य इत्यर्थः । तत्राप्यशुन्नप्रकृतीनां जघन्यस्थितेरारन्योर्ध्वमुखं, शुन्नप्रकृतीनां तूत्कृष्टस्थितेरारन्याधोमुखं क्रमेणानन्तगुणो वक्तव्यः । इयं सामान्यतस्तीव्रमन्दताऽभिहिता, अथ विशेषत उच्यते—तत्र घातिकर्मणामप्रशस्तवर्णगन्धरसस्पर्शानामुपघातस्य च जघन्यायां स्थितौ जघन्योऽनुन्नागः सर्वस्तोकः । ततो द्वितीयस्यां स्थितौ जघन्योऽनुन्नागोऽनन्तगुणः । ततोऽपि तृतीयस्यां जघन्योनुन्नागोऽनन्तगुणः । एवं तावद्वाच्यं यावन्निवर्त्तनकंरूकं नवति । निवर्त्तनकण्डकं नाम यत्र जघन्यस्थितिबन्धारम्नन्नाविनामनुन्नागबन्धाध्यवसायस्थानानामनुकृष्टिर्निष्ठिता तत्पर्यन्ता आदित आरन्य पल्योपमासङ्ख्येयन्नागमात्राः स्थितयः । तदुक्तं—"कंरूं णिवत्तणकंरूगं च पलियस्ससंखंसो त्ति" ॥ ६५ ॥

णिवत्तणा उ एक्किक्कस्सो हेट्ठोवरिं तु जिट्ठियरो । चरमठिईणुक्कोसो परित्तमाणीण उ विसेसो ॥ ६६ ॥

व्याख्या—ततो निवर्त्तनकण्डकचरमस्थितिजघन्यानुन्नागादधस्तनप्रथमस्थितावुत्कृष्टोऽनुन्नागोऽनन्तगुणः । ततः कण्डकाउपरि प्रथमस्थितौ जघन्यानुन्नागोऽनन्तगुणः । ततोऽधस्तनद्वितीयस्थितावुत्कृष्टोऽनुन्नागोऽनन्तगुणः । ततः कण्डकाउपरि द्वितीयस्थितौ जघन्यानुन्नागोऽनन्तगुणः । ततोऽधस्तनतृतीयस्थितावुत्कृष्टोऽनुन्नागोऽनन्तगुणः । ततः कण्डकाउपरि तृतीयस्थितौ जघन्यानुन्नागोऽनन्तगुणः । एवं कण्डके कण्डके एकैकः स्व एकैकः स्व इति पदं प्रतिनियतकण्डकावधिमत्त्वं द्योतयति यथाक्रमं ज्येष्ठ उत्कृष्ट इतरश्च जघन्योऽनुन्नागोऽनन्तगुणो वाच्यः । स च तावद्यावत्सर्वोत्कृष्टायां स्थितौ जघन्यानुन्नागोऽनन्तगुणः, कण्डकमात्राणां च स्थितीनामुत्कृष्टोऽनुन्नागोऽद्याप्यनुक्तस्तिष्ठति शेषस्तु सर्वोऽप्युक्त

इति तमाह—"चरमठिईणुक्कोसो" चरमस्थितीनां कण्ठकमात्राणामुत्कृष्टोऽनुभागो निरन्तरमनन्तगुणतयाऽभिधातव्यः। तथाहि—सर्वोत्कृष्टायाः स्थितेर्जघन्यानुभागात्पल्योपमासङ्ख्येयभागमात्राणां चरमस्थितीनां प्रथमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणो वक्तव्यः । ततोऽप्युपरितन्यामनन्तरस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततोऽप्यनन्तरायामुपरितनस्थितौ सोऽनन्तगुणः। एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिरिति। पराघातादीनां षट्चत्वारिंशत्सङ्ख्यानां शुभप्रकृतीनां तूत्कृष्टात् स्थितिस्थानादारभ्याधोमुखमुक्तदिशाऽनन्तगुणनया तीव्रमन्दता वाच्या। तथाहि—एतासामुत्कृष्टायां स्थितौ जघन्यानुभागः सर्वस्तोकः। ततः समयोनायामुत्कृष्टस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततोऽपि द्विसमयोनायामुत्कृष्टस्थितौ जघन्योऽनुभागोऽनन्तगुणः। एवं तावद्वाच्यं यावन्निवर्त्तनकण्ठकं भवति। तत उत्कृष्टायां स्थितावुत्कृष्टानुभागोऽनन्तगुणः। ततो निवर्त्तनकण्ठकादधः प्रथमस्थितौ जघन्योऽनुभागोऽनन्तगुणः। ततः समयोनायामुत्कृष्टस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः। ततो निवर्त्तनकंण्ठकादधो द्वितीयस्थितौ जघन्यानुभागोऽनन्तगुणः। एवं तावद्वाच्यं यावज्जघन्यस्थितौ जघन्यानुभागोऽनन्तगुणः। कण्ठकमात्राणां च स्थितीनामुत्कृष्टोऽनुभागोऽद्याप्यनुक्तस्तिष्ठति, शेषः सर्वोऽप्युक्तः, ततो जघन्यस्थितेरूर्ध्वं कण्ठकमात्रं स्थित्युल्लङ्घने या चरमा स्थितिस्तस्यामुत्कृष्टोऽनुभागोऽनन्तगुणो वाच्यः। ततोऽधस्तनस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः। ततोऽप्यधस्तनस्थितौ सोऽनन्तगुणः। एवं तावद्वाच्यं यावज्जघन्यस्थितावुत्कृष्टोऽनुभागोऽनन्तगुण इति। "परित्तमाणीण व विसेसो" परावर्त्तमानप्रकृतीनां तु विशेषो द्रष्टव्यः॥ ६६॥

तमेवाह—

ताणमाणि त्ति परं असंखऩागाहि कंमगेक्काणं । उक्कस्सियरे णेया जा तक्कंमोवरि समत्ती ॥ ६७ ॥

व्याख्या—यावतीनां तानि चान्यानि चेत्येवमनुकृष्टिरन्निहिता तावतीनां सर्वासामपि जघन्योऽनुऩागस्तावन्मात्र एव द्रष्टव्यः । तानि चान्यानि चेत्येवमनुकृष्टेः परं कण्मकस्यासङ्खेयेभ्यो ऩागेभ्य ऊर्ध्वं कण्मकमात्राणामेकैकस्याश्च स्थितेर्यथासङ्खमुत्कृष्टा इतरे च जघन्या अनुऩागा अनन्तगुणा ज्ञेयाः । इदमुक्तं ऩवति—तानि चान्यानि चेत्येवमनुकृष्टेः परं जघन्योऽनुऩागो यथोत्तरं तावदनन्तगुणो वाच्यो यावत्कण्मकमात्राणां स्थितीनामसङ्खेया ऩागा गच्छन्ति, एको ऩागस्तिष्ठति । ततो यतः स्थितिस्थानादारभ्य तानि चान्यानि चेत्येवमनुकृष्टिः प्रारब्धा, तत्प्रभृतीनां कण्मकमात्राणां स्थितीनां यथोत्तरमुत्कृष्टोऽनुऩागोऽनन्तगुणो वक्तव्यः । ततो यतः स्थितिस्थानाऊजघन्यमनुऩागमुक्त्वा पश्चाद्घटितं तत उपरितने स्थितिस्थाने जघन्यानुऩागोऽनन्तगुणो वक्तव्यः । एवमेकैकं जघन्यानुऩागमुत्कृष्टानुऩागानां च कण्मकं कण्मकं तावद्देद्यावज्जघन्यानुऩागविषयाणां स्थितीनां तानि चान्यानि चेत्येवमनुकृष्टेः परं कण्मकं परिपूर्णं ऩवति, उत्कृष्टाश्चानुऩागाः सागरोपमशतपृथक्त्वतुल्या ऩवन्ति । सागरोपमशतपृथक्त्वं ह्यसत्कल्पनया लक्षं कण्मकानि सहस्रतुल्यानि, तदेकऩागः शतं, तदेकैकव्यक्त्यन्तरितानि च सहस्राणि लक्षं ऩवतीति । तत उपरि जघन्यानुऩागोऽनन्तगुणः । पश्चादेक उत्कृष्टोऽनुऩागोऽनन्तगुणः । ततः पुनरप्येको जघन्योऽनुऩागोऽनन्तगुणः । ततः पुनरप्येक उत्कृष्टोऽनुऩागोऽनन्तगुणः । एवं कण्मके कण्मके एकैकमुपर्यधो जघन्यमुत्कृष्टं चानन्तगुणमनुऩागं तावद्देद्यावज्जघन्यानुऩागविषयाः स्थितयः परिपूर्यन्ते ।

उत्कृष्टानुभागविषयाश्च कण्डकमात्रा अनुक्तास्तिष्ठन्ति, तासां यथोत्तरमुत्कृष्टोऽनुभागोऽनन्तगुणो वाच्यः। तथा चाह—"जा तक्कंडोवरि समत्ती" यावत्तेषां जघन्यानुभागानां कण्डकस्य चोपरितनस्य समाप्तिः। इदमुक्तं भवति—असङ्ख्येयेषु भागेषु यथोत्तरमनन्तगुणतयैकस्मिंश्चान्त्ये भागे उत्कृष्टानुभागकण्डकान्तरितत्वेनानन्तगुणतया परिसमापिताजघन्यानुभागस्थितिकण्डकादुपरि एकैकोत्कृष्टानुभागान्तरिता जघन्यानुभागास्तावद्वाच्या यावत्तेषां सर्वेषां समाप्तिर्भवति। ततो ये उत्कृष्टानुभागाः केवलास्तिष्ठन्ति तेऽपि यथोत्तरमनन्तगुणास्तावद्वाच्या यावत्सर्वसमाप्तिर्भवतीति गाथार्थः ॥ ६७ ॥

तत्र सातासाते अधिकृत्य भावना क्रियते—सातस्योत्कृष्टायां स्थितौ जघन्यानुभागः सर्वस्तोकः। ततः समयोनायामुत्कृष्टस्थितौ जघन्यानुभागस्तावन्मात्र एव। द्विसमयोनायामप्यसौ तावन्मात्र एव। एवमधोऽधोऽवतीर्य तावन्मात्र एव जघन्यानुभागस्तावद्वाच्यो यावत्प्रतिपद्माक्रान्ताः सागरोपमशतपृथक्त्वप्रमाणाः स्थितयो गता भवन्ति। ततोऽधस्तनाधस्तनस्थितिषु जघन्यानुभागाः क्रमेणान्तगुणास्तावद्वाच्या यावत्कण्डकस्यासङ्ख्येयभागा गता भवन्ति एकोऽवशिष्यते। एताश्च स्थितयः सङ्ख्येयभागहीनकण्डकमात्राः साकारोपयोगेनैव बध्यमानत्वात् पूर्वग्रन्थेषु साकारोपयोगसंज्ञा इति व्यवह्रियन्ते। तत उत्कृष्टस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणो वक्तव्यः। ततः समयोनायामुत्कृष्टस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः। ततोऽपि द्विसमयोनायामुत्कृष्टस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः। एवमधोऽधोऽवतीर्योत्कृष्टोऽनुभागोऽनन्तगुणस्तावद्वाच्यो यावत्कण्डकमात्राः स्थितयो गच्छन्ति। ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा पश्चाद्वर्तितं ततोऽधस्तने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः। ततः पुनरपि प्रागुक्तानां कण्डकमात्राणामुत्कृष्टानुभागस्थितीनामधस्तात्कण्डकमात्रासु

स्थितिषूत्कृष्टोऽनुभागः क्रमेणानन्तगुणो वाच्यः । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा निवृत्तं ततोऽधस्तने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः । ततः पुनरपि प्रागुक्तानां कण्डकमात्राणामुत्कृष्टानुभागस्थितीनामधस्तात्कण्डकमात्रासु स्थितिषूत्कृष्टोऽनुभागः क्रमेणानन्तगुणो वाच्यः।ततो यतःस्थितिस्थानाज्जघन्यमनुभागमुक्त्वा निवृत्तं ततोऽधस्तने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः। ततः पुनरपि कण्डकमात्राणां स्थितीनामुत्कृष्टोऽनुभागोऽनन्तगुणः।एवमेकैकस्याः स्थितेर्जघन्यानुभागः कण्डकमात्राणां च स्थितीनामुत्कृष्टोऽनुभागस्तावद्वाच्यो यावज्जघन्यानुभागविषयाणामेकैकस्थितीनां तानि चान्यानि चेत्येवमनुकृष्टेः परमुपदर्शनाषया साकारोपयोगकण्डकसंज्ञं कण्डकं परिपूर्णं भवति । उत्कृष्टानुभागविषयाश्च स्थितयोऽभव्यप्रायोग्यजघन्यस्थितिबन्धपर्यन्ताः सागरोपमशतपृथक्त्वप्रमाणाः समाप्यन्ते । ततः साकारोपयोगकण्डकादधस्तनप्रथमस्थितौ जघन्यानुभागोऽनन्तगुणः । ततोऽभव्यप्रायोग्यजघन्यस्थितेरधः प्रथमस्थितौ उत्कृष्टानुभागोऽनन्तगुणः । ततः साकारोपयोगकण्डकस्याधो द्वितीयस्थितौ जघन्यानुभागोऽनन्तगुणः । ततोऽभव्यप्रायोग्यजघन्यस्थितेरधो द्वितीयस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवमेकैकं जघन्यमुत्कृष्टं चानुभागमनन्तगुणतया तावन्नाषेत यावत्सर्वजघन्या स्थितिरायाति । कण्डकमात्राणां च स्थितीनामुत्कृष्टानुभागा अनुक्ता भवन्ति । तेऽप्यधोऽधः क्रमेणानन्तगुणा वक्तव्या यावत्सर्वजघन्या स्थितिः । एवं मनुष्यगतिमनुष्यानुपूर्वीपञ्चेन्द्रियजातिसमचतुरस्रसंस्थानवज्रर्षभनाराचसंहननप्रशस्तविहायोगतिस्थिरादिषट्कोच्चैर्गोत्राणामपि वक्तव्यं । असातस्य जघन्यस्थितौ जघन्यानुभागः सर्वस्तोकः । ततो द्वितीयादिस्थितिषु सागरोपमशतपृथक्त्वपर्यन्तं तावन्मात्र एव वाच्यः । तत उपरितनस्थितौ जघन्यानुभागोऽनन्तगुणः । ततो द्वितीयस्यां स्थितौ जघन्योऽनुभागोऽनन्तगुणः । एवं

तावद्वाच्यं यावत्कण्डकस्यासङ्ख्येया भागा गता भवन्ति एकोऽवतिष्ठते । ततो जघन्यस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततो द्वितीयादिस्थितिषु यथोत्तरमुत्कृष्टोऽनुभागः कण्डकमात्राः स्थितीर्यावदनन्तगुणो वाच्यः । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा व्युपरतं तत उपरितने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः । ततः प्रागुक्तादुत्कृष्टानुभागविषयात्कण्डकादुपरि कण्डकमात्राणां स्थितीनामुत्कृष्टोऽनुभागो यथोत्तरमनन्तगुणो वक्तव्यः । एवमेकैकस्याः स्थितेर्जघन्यानुभागः कण्डकमात्राणां च स्थितीनामुत्कृष्टोऽनुभागोऽनन्तगुणतया तावद्वाच्यो यावज्जघन्यानुभागविषयाणामेकैकस्थितीनां तानि चान्यानि चेत्येवमनुकृष्टेः परं कण्डकं परिपूर्णं भवति । उत्कृष्टानुभागविषयाश्च सागरोपमशतपृथक्त्वमात्रा भवन्ति यावत्सातरूपप्रतिपक्षप्रकृत्याक्रान्ताः स्थितयः परिनिष्ठामुपयन्तीत्यर्थः । ततः प्रागुक्तजघन्यानुभागकण्डकस्योपरि प्रथमस्थितौ जघन्यानुभागोऽनन्तगुणः । ततः सागरोपमशतपृथक्त्वादुपरितनस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततः पुनरपि प्रागुक्तात् स्थितिस्थानादुपरितने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः । ततः सागरोपमशतपृथक्त्वादुपरि द्वितीयस्यां स्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवमेकैकं जघन्यमुत्कृष्टं चानुभागमुपर्यधोऽनन्तगुणं वदंस्तावद्वक्तव्यावदसातस्य सर्वोत्कृष्टा स्थितिर्भवति । कण्डकमात्राणां च स्थितीनामुत्कृष्टानुभागा येऽद्याप्यनुक्तास्तिष्ठन्ति ते यथोत्तरमनन्तगुणा वक्तव्याः यावदुत्कृष्टा स्थितिः । एवं नरकद्विकपञ्चेन्द्रियजातिवर्जजातिचतुष्टयाप्रथमसंस्थानसंहननाप्रशस्तविहायोगतिस्थावरदशकानामपि तीव्रमन्दता वाच्या ॥

अथ तिर्यग्गतेस्तीव्रमन्दताऽभिधीयते—सप्तमपृथिव्यां वर्त्तमानस्य नैरयिकस्य सर्वजघन्ये स्थितिस्थाने जघन्यपदे जघ-

न्यानुभागः सर्वस्तोकः । ततः स द्वितीयस्थितावनन्तगुणः । ततोऽपि तृतीयस्थितौ सोऽनन्तगुणः । एवं तावद्वाच्यं यावन्निवर्त्तनकण्डकमतिक्रान्तं भवति । ततो जघन्यस्थितावुत्कृष्टपदे उत्कृष्टोऽनुभागोऽनन्तगुणः । ततो निवर्त्तनकण्डकादुपरि प्रथमस्थितौ जघन्यानुभागोऽनन्तगुणः । ततोऽधस्तनद्वितीयस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततः कण्डकादुपरि द्वितीयस्थितौ जघन्यानुभागोऽनन्तगुणः । एवमेकैकं जघन्यमुत्कृष्टं चानुभागमनन्तगुणतया तावन्नयेद्यावदभव्यप्रायोग्यजघन्यानुभागबन्धस्याधश्चरमा स्थितिः । अभव्यप्रायोग्यजघन्यानुभागबन्धस्य चाधः कण्डकमात्राणां स्थितीनामुत्कृष्टानुभागा इयताप्यनुक्ताः सन्ति, शेषास्तूक्ताः । ततोऽभव्यप्रायोग्यजघन्यानुभागबन्धविषये प्रथमस्थितौ जघन्योऽनुभागोऽनन्तगुणः । द्वितीयस्यां स्थितौ जघन्यानुभागस्तावन्मात्र एव । तृतीयस्यामपि स्थितौ तावन्मात्र एव सः । एवं तावद्वाच्यं यावत्सागरोपमशतपृथक्त्वमात्राः स्थितयोऽतिक्रान्ता भवन्ति । एतासां च स्थितीनां पूर्वपुरुषैः परावर्त्तमानजघन्यानुभागबन्धप्रायोग्या इति नाम कृतं । एतासां चोपरि प्रथमस्थितौ जघन्यानुभागोऽनन्तगुणः । ततोऽपि द्वितीयस्यां स्थितौ जघन्यानुभागोऽनन्तगुणः । ततोऽपि तृतीयस्यां सोऽनन्तगुणः । एवं तावद्वाच्यं यावन्निवर्त्तनकण्डकस्यासङ्ख्येया भागा गता भवन्ति एकोऽवतिष्ठते । ततो यतः स्थितिस्थानादुत्कृष्टमनुभागमुक्त्वा निवृत्तस्तत उपरितने द्वितीये स्थितिस्थाने उत्कृष्टोऽनुभागोऽनन्तगुणः । ततोऽप्युपरितने स्थितिस्थाने उत्कृष्टोऽनुभागोऽनन्तगुणः । एवमुपर्युपर्यनन्तगुणताऽनुभागस्य तावद्वाच्या यावदभव्यप्रायोग्यजघन्यानुभागबन्धस्याधश्चरमा स्थितिः । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा निवृत्तस्तत उपरितने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः । ततोऽभव्यप्रायोग्यजघन्यानुभागविषये प्रथमकण्डकमा-

त्राणां स्थितीनां यथोत्तरमुत्कृष्टोऽनुभागोऽनन्तगुणः । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा व्युपरतं तत उपरितने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः । ततोऽभव्यप्रायोग्यजघन्यानुभागविषयकण्डकादुपरि कण्डकमात्राणां स्थितीनामुत्कृष्टोऽनुभागो यथोत्तरमनन्तगुणो वाच्यः । एवमेकस्याः स्थितेर्जघन्यमनुभागं कण्डकमात्राणां च स्थितीनामुत्कृष्टमनुभागं वदंस्तावद्वक्तव्यो यावदभव्यप्रायोग्यजघन्यानुभागबन्धविषये चरमा स्थितिः । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा निवृत्तस्तत उपरितने जघन्यानुभागोऽनन्तगुणः । ततोऽभव्यप्रायोग्यजघन्यानुभागबन्धस्योपरि प्रथमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । तत उपरि प्रागुक्तजघन्यानुभागाद्द्वितीयस्थितौ जघन्यानुभागोऽनन्तगुणः । ततः प्रागुक्तादुत्कृष्टानुभागादुपरितने स्थितिस्थाने उत्कृष्टानुभागोऽनन्तगुणः । एवमुपर्यध एकैकस्याः स्थितेर्जघन्यमुत्कृष्टं चानुभागमनन्तगुणं वदता तावद्गन्तव्यं यावदुत्कृष्टस्थितौ जघन्यानुभागोऽनन्तगुणः । कण्डकमात्राणां च स्थितीनामुत्कृष्टानुभागाः कथनावशिष्टा यथोत्तरमनन्तगुणा वाच्या यावदुत्कृष्टा स्थितिः । एवमेव तिर्यगानुपूर्व्या नीचैर्गोत्रस्य च तीव्रमन्दता निरूपणीया ॥

अथ त्रसनाम्नोऽभिधीयते—त्रसनाम्नः सर्वोत्कृष्टस्थितेरारभ्याधोऽधः कण्डकमात्रासु स्थितिषु पश्चानुपूर्व्याऽनन्तगुणोऽनुभागो वक्तव्यः । तत उत्कृष्टायां स्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणः । ततः कण्डकादधः प्रथमस्थितौ जघन्यानुभागोऽनन्तगुणः । ततः समयोनायामुत्कृष्टस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततः कण्डकादधस्तन्यां द्वितीयस्यां स्थितौ जघन्यानुभागोऽनन्तगुणः । ततो द्विसमयोनायामुत्कृष्टस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावदष्टादशसागरोपमकोटाकोटीनामुपरितनी स्थितिः । ततोऽष्टादशसागरकोटाकोटीसम्बन्धिन्यामुत्कृष्टस्थितौ जघन्यानुभागोऽनन्तगुणः ।

समयोनायामुत्कृष्टस्थितौ तावानेव । द्विसमयोनायामपि तावानेव । एवमधोऽधोऽवतीर्य तावन्मात्रोऽनुभागस्तावद्वाच्यो यावदभव्यप्रायोग्यो जघन्यः स्थितिबन्धः । ततोऽधस्तन्यां प्रथमस्थितौ जघन्यानुभागोऽनन्तगुणः । ततो द्वितीयस्यां स्थितौ जघन्यानुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावत्कण्डकस्यासङ्क्षेया भागा गता भवन्ति । ततोऽष्टादशसागरोपमकोटाकोटीनामुपरिष्टात्कण्डकमात्राः स्थितयो याः कथनावशिष्टोत्कृष्टानुभागास्तासां चरमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततस्तद्विचरमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततस्त्रिचरमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवमधोऽधोऽवतीर्य तावद्वाच्यं यावत्कण्डकमतिक्रान्तं भवति । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा निवृत्तिः कृता ततोऽधस्तने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः । ततोऽष्टादशसागरकोटाकोटीनां सम्बन्धिन्याश्चरमस्थितेरारभ्याधोऽधः कण्डकमात्राणां स्थितीनामुत्कृष्टोऽनुभागः क्रमेणानन्तगुणो वाच्यः । ततः प्रागुक्तजघन्यानुभागादधस्तने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः । ततः प्रागुक्तकण्डकादधः कण्डकमात्राणां स्थितीनामधोऽधः क्रमेणोत्कृष्टानुभागा अनन्तगुणा वाच्याः । एवमेकस्या जघन्यानुभागं कण्डकमात्राणां च स्थितीनां उत्कृष्टमनुभागमनन्तगुणं वदंस्तावद्व्रजेद्यावदभव्यप्रायोग्यजघन्यानुभागबन्धविषये जघन्यस्थितिः । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा निवृत्तस्तदधस्तने स्थितिस्थाने जघन्यानुभागोऽनन्तगुणः । ततोऽभव्यप्रायोग्यजघन्यानुभागबन्धविषयजघन्यस्थितेरधः प्रथमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवमेकैकस्थितेर्जघन्यानुभागमेकैकस्याश्चोत्कृष्टानुभागमनन्तगुणमधोऽधो वदंस्तावदवतरेद्यावज्जघन्या स्थितिः । कण्डकमा-

त्राणां च स्थितीनामुत्कृष्टानुभागाः कथनावशिष्टा अधोऽधः क्रमेणानन्तगुणा द्रष्टव्याः । एवं बादरपर्याप्तप्रत्येकनाम्नामपि तीव्रमन्दताऽभिधेया । तदेवमुक्ता तीव्रमन्दता ॥

अथानुभागबन्धे साद्यनादिप्ररूपणा स्वामित्वप्ररूपणा च क्रियते—तत्र मूलप्रकृतिविषये नामकर्मवेदनीयकर्मणोरनुत्कृष्टो घातिकर्मणां चाजघन्योऽनुभागश्चतुर्विधः—सादिरनादिर्ध्रुवोऽध्रुवश्चेति । तथाहि—नामवेदनीययोरुत्कृष्टोऽनुभागः सूक्ष्मसंपरायान्त्यसमये क्षपकस्य भवति । स च द्वितीयसमये व्यवच्छेदमुपयातीति साद्यध्रुव एव । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः । स चोपशान्तमोहे न भवति ततः प्रतिपाते च भवतीति सादिः । तत्स्थानमप्राप्तस्यानादिः । अभव्यानां ध्रुवः । भव्यानामध्रुवः । तथा मोहनीयस्यानिवृत्तिबादरान्त्यसमये ज्ञानावरणदर्शनावरणान्तरायाणां च सूक्ष्मसंपरायान्त्यसमये क्षपकस्य जघन्योऽनुभागबन्धः । स चैकसामयिक इति साद्यध्रुवः । ततोऽन्यः सर्वोऽप्यजघन्यः । स चोपशमश्रेण्यां मोहनीयस्य सूक्ष्मसंपराये ज्ञानावरणादित्रिकस्योपशान्तमोहे न भवति, ततः प्रतिपाते च भवतीति सादिः । तत्स्थानमप्राप्तस्यानादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । गोत्रस्य द्वावप्यनुत्कृष्टाजघन्यौ चतुर्विधौ । तथाहि—गोत्रस्योत्कृष्टोऽनुभागबन्धः सूक्ष्मसंपरायान्त्यसमये क्षपकस्य, स चैकसामयिकत्वात्साद्यध्रुवः । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः, स चोपशान्तमोहे न भवति, ततः प्रतिपाते च भवतीति सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । तथा गोत्रस्य जघन्यानुभागबन्धः सप्तमक्षितिनारकस्यौपशमिकसम्यक्त्वमुत्पादयतोऽन्तरकरणं कृत्वा मिथ्यात्वस्य प्रथमस्थितावनुभवतः परिक्षीयमाणायामन्त्यसमये वर्त्तमानस्य नीचैर्गोत्रमधिकृत्य भवति, स चैकसामयिक इति साद्यध्रुवः । ततोऽन्यः सर्वोऽ-

प्यजघन्यो यावदुत्कृष्टो न भवति । स चौपशमिकसम्यक्त्वलाभकाले उच्चैर्गोत्रमधिकृत्य प्रवर्त्तमानः सादिः । तत्स्थानमप्राप्तस्यानादिः । ध्रुवाध्रुवौ पूर्ववत् । अमीषां सप्तानामपि कर्मणां शेषविकल्पाः सादयोऽध्रुवाश्चेति द्विविधाः । तथाहि—वेदनीयनाम्नोरुत्कृष्टोऽनुभागः साद्यध्रुवतया प्रागेव भावितः । मध्यमपरिणामे मिथ्यादृष्टौ सम्यग्दृष्टौ वाऽनयोर्जघन्योऽनुभागबन्धः संक्लिश्यमाने विशुध्यमाने वाऽजघन्य इति द्वावप्येतौ जघन्याजघन्यौ मिथ्यादृष्टौ सम्यग्दृष्टौ वा पर्यायेण प्राप्यमाणत्वात् साद्यध्रुवौ । घातिनां जघन्योऽनुभागबन्धः साद्यध्रुवतया प्रागेव भावितः । उत्कृष्टानुत्कृष्टौ तु क्रमेण मिथ्यादृष्टौ प्राप्येते, सर्वसंक्लिष्टे उत्कृष्टो मध्यमपरिणामे त्वनुत्कृष्ट इति साद्यध्रुवावेतौ । गोत्रस्य जघन्योत्कृष्टौ साद्यध्रुवौ प्रागेव भावितौ । आयुषस्त्वध्रुवबन्धित्वाच्चत्वारोऽपि विकल्पाः साद्यध्रुवाः सुप्रतीताः ॥

उत्तरप्रकृतिषु शुभध्रुवबन्धिनीनां तैजसकार्मणप्रशस्तवर्णगन्धरसस्पर्शागुरुलघुनिर्माणरूपाणामष्टानां प्रकृतीनामनुत्कृष्टोऽनुभागबन्धश्चतुर्धा । तथाहि—एतासां क्षपणार्हस्यापूर्वकरणस्य त्रिंशत्प्रकृतिबन्धव्यवच्छेदसमये समयमात्रमुत्कृष्टोऽनुभागबन्धः प्राप्यते । स चैकसामयिकत्वात्साद्यध्रुवः । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः । स चोपशमश्रेण्यां बन्धव्यवच्छेदात्परतो न भवति, ततः प्रतिपाते च भूयोऽपि भवतीति सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवौ पूर्ववत् । तथाऽशुभानां ध्रुवबन्धिनीनां ज्ञानावरणपञ्चकदर्शनावरणनवकमिथ्यात्वषोडशकषायजुगुप्साभयोपघाताप्रशस्तवर्णादिचतुष्टयान्तरायपञ्चकरूपाणां त्रिचत्वारिंशत्प्रकृतीनामजघन्यश्चतुर्धा । तथाहि—ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयरूपाणां चतुर्दशप्रकृतीनां क्षपकस्य सूक्ष्मसंपरायान्त्यसमये, चतुर्णां संज्वलनानामनिवृत्तिबादरक्षपकस्य स्वस्वबन्धव्यवच्छेदस-

मये, निद्राप्रचलोपघातभयजुगुप्साऽप्रशस्तवर्णगन्धरसस्पर्शानामपूर्वकरणस्य क्षपणार्हस्य स्वस्वबन्धान्तसमये, चतुर्णां प्रत्याख्यानावरणानां संयमं प्रतिपित्सतो देशविरतस्य स्वगुणस्थानान्तसमये तद्बन्धकेषु तस्यातिविशुद्धत्वात्, चतुर्णामप्रत्याख्यानावरणानामविरतसम्यग्दृष्टेः क्षायिकसम्यक्त्वं संयमं च युगपत्प्राप्स्यतः तद्बन्धकेषु तस्यैवातिविशुद्धत्वात्। स्त्यानर्द्धित्रिकमिथ्यात्वानन्तानुबन्धिनां मिथ्यादृष्टेः सम्यक्त्वं संयमं चैककालं प्रतिपत्तुकामस्य चरमसमये जघन्योऽनुभागबन्धो लभ्यते। स च समयमात्रभावीति सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यजघन्यः। स च ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयानामुपशान्तमोहे, निद्राप्रचलोपघाताप्रशस्तवर्णादिचतुष्टयभयजुगुप्सानामुपशमश्रेण्यामनिवृत्तिबादरे, प्रत्याख्यानावरणादीनां प्रमत्तसंयतादौ बन्धव्यवच्छेदे न भवति, ततः प्रतिपाते च भवतीति सादिः। तत्स्थानमप्राप्तस्यानादिः। ध्रुवाध्रुवावभव्यभव्यापेक्षया। आसामेव शुभानामशुभानां वा ध्रुवबन्धिनीनामुक्तशेषा विकल्पाः साद्यध्रुवाः। तथाहि—तैजसाद्यानामष्टानां शुभध्रुवबन्धिनीनामुत्कृष्टः साद्यध्रुवतया प्रागेव भावितः। जघन्याजघन्यौ तु संज्ञिपर्याप्तमिथ्यादृष्टौ पर्यायेण प्राप्येते। अतिसंक्लिष्टे जघन्यः सुविशुद्धे त्वजघन्य इति साद्यध्रुवावेतौ। अशुभध्रुवबन्धिनीनां तु जघन्यः साद्यध्रुवतया प्रागेव भावितः। उत्कृष्टस्तु मिथ्यादृष्टौ संज्ञिपर्याप्ते सर्वसंक्लिष्टे एकं द्वौ वा समयौ लभ्यते। ततः पुनरपि मन्दपरिणामेऽनुत्कृष्ट इतीमावपि साद्यध्रुवौ। अध्रुवबन्धिनीनां तु जघन्यादयश्चत्वारोऽप्यध्रुवबन्धित्वादेव साद्यध्रुवाः। कृता साद्यनादिप्ररूपणा॥

अथ स्वामित्वप्ररूपणा क्रियते—तत्राशुभप्रकृतीनां तद्बन्धकेषु चरमबन्धसमयवर्त्तिनोऽत्यन्तविशुद्धाः समयमेकं जघ-

न्यमनुभागं बध्नन्ति, स्वबन्धव्यवच्छेदादूर्ध्वमपि गत्वा पतन्तोऽजघन्यं बध्नन्ति । शुभानां प्रकृतीनां तद्बन्धकेषु चरमा अत्यन्तविशुद्धा उत्कृष्टमनुभागं बध्नन्ति । मन्दपरिणामपरिणतास्त्वनुत्कृष्टं । तथा सकलानामशुभप्रकृतीनामुद्योतातपतिर्यग्मनुजद्विकानां च संज्ञिमिथ्यादृष्टिः समयमेकमुत्कृष्टमनुभागं बध्नाति, तत्राशुभप्रकृतिषु नरकत्रिकद्वित्रिचतुरिन्द्रियजातिसूक्ष्मापर्याप्तसाधारणानां तिर्यग्मनुष्यो वा संज्ञी मिथ्यादृष्टिः उत्कृष्टानुभागबन्धस्वामी । तत्रापि नरकत्रिकस्यातिसंक्लिष्टो विकलत्रिकसूक्ष्मत्रिकयोश्च तदर्हसंक्लेशवान् अतिसंक्लिष्टो ह्येतत् षट्कमुद्वल्य नरकयोग्यं बध्नीयादिति । देवनारकाणां तु भवप्रत्ययवशादेतत्प्रकृतिबन्धासंभवः । एकेन्द्रियजातिस्थावरयोर्देवा एव भवनपत्यादय ईशानान्ता अतिसंक्लिष्टमिथ्यादृश उत्कृष्टानुभागबन्धकाः, तिर्यग्मनुष्याणामतिसंक्लिष्टानां नरकगतिप्रायोग्यबन्धकत्वात्, मन्दसंक्लेशे चैतासामशुभत्वेनोत्कृष्टानुभागबन्धासंभवात् । नारकाणामीशानोत्तरदेवानां च भवप्रत्ययत एवैतत्प्रकृत्यबन्धकत्वात्, तिर्यग्गतितिर्यगानुपूर्वीसेवार्त्तसंहननानां देवनारका अतिसंक्लिष्टा मिथ्यादृष्टय उत्कृष्टानुभागबन्धस्वामिनः । तिर्यग्नरा हि तदर्हसंक्लेशे वर्त्तमाना नरकयोग्यमेव बध्नीयुः । न च तद्योग्या एताः प्रकृतय इति देवनारकग्रहणं । ते हि सर्वसंक्लिष्टा अपि तिर्यगर्हमेव बध्नन्तीति । इह च सामान्योक्तावपि सेवार्त्तोत्कृष्टानुभागबन्धकाः सनत्कुमारादिसुरा एव न त्वीशानान्ताः, तेषामतिसंक्लिष्टानामेकेन्द्रियार्हस्यैव बन्धकत्वादित्यवधेयं । शेषाणां तु ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयमिथ्यात्वषोडशकषायनपुंसकवेदारतिशोकभयजुगुप्साद्विकसंस्थानाप्रशस्तवर्णरसगन्धस्पर्शोपघाताप्रशस्तविहायोगतिकुत्सगतुःस्वराशुभास्थिरानादेययशःकीर्त्तिनीचैर्गोत्रान्तरायरूपाणां षट्पञ्चाशत्प्रकृतीनां चतुर्गतिको मिथ्यादृष्टिरतिसंक्लिष्टो हास्यरति-

स्त्रीपुरुषवेदाद्यन्तवर्जसंस्थानसंहननरूपाणां द्वादशप्रकृतीनां तत्प्रायोग्यसंक्लिष्ट उत्कृष्टानुभागबन्धस्वामी । सर्वोत्कृष्टसंक्लेशो हि हास्यरतियुगलमतिक्रम्यारतिशोकयुगलं बध्नाति । स्त्रीवेदपुंवेदौ त्वतिक्रम्य क्लीववेदं निर्वर्त्तयति । संस्थानसंहननेष्वपि सर्वसंक्लिष्टो विंशतिसागरोपमकोटाकोटिस्थितिके हुंडसेवार्त्ते निर्वर्त्तयति । ततो विशुद्धोऽष्टादशसागरोपमकोटाकोटिस्थितिके वामनकीलिके । ततो विशुद्धतरः षोडशसागरोपमकोटाकोटिस्थितिके कुब्जार्द्धनाराचे । ततोऽपि विशुद्धश्चतुर्दशसागरोपमकोटाकोटिस्थितिके सादिनाराचे । ततो विशुद्धो द्वादशसागरोपमकोटाकोटिस्थितिके न्यग्रोधपरिमण्डलवज्रनाराचे । ततोऽपि विशुद्धो दशसागरोपमकोटाकोटिस्थितिके समचतुरस्रवज्रर्षभनाराचे इति । हीनाधिकसंक्लेशोऽन्यान्यबन्धसंभवात्तत्प्रायोग्यसंक्लेशग्रहणं । आतपोद्योततिर्यग्मनुष्यायुषां तु सुविशुद्धः संज्ञिमिथ्यादृष्टिरुत्कृष्टानुभागबन्धस्वामी । सम्यग्दृष्टीनां हि तिर्यगायुरातपोद्योतानि बन्धमेव नायान्तीति कुतस्तदुत्कृष्टानुभागबन्धवार्त्ता । मनुष्यायुषश्चोत्कृष्टोऽनुभागस्त्रिपल्योपमस्थितिकस्यावाप्यते, न शेषस्य, तिर्यग्मनुष्याश्च सम्यग्दृष्टयो न मनुष्यायुर्बन्धकाः, तेषां देवायुर्बन्धसंभवात् । येऽपि देवा नारका वा सम्यग्दृष्टयो मनुष्यायुर्बध्नंति तेऽपि कर्मभूमियोग्यमेव, नाकर्मभूमियोग्यं, तत्र तेषामुत्पादाभावात् । ततो मनुष्यायुरादीनां चतसृणामपि प्रकृतीनामुत्कृष्टानुभागबन्धस्वामी मिथ्यादृष्टिरेव, न सम्यग्दृष्टिरिति स्थितं । अत्रापि विशेषचिन्तायामातपस्य तत्प्रायोग्यविशुद्धो मिथ्यादृष्टिर्देवस्तथा, नारकाणामेकेन्द्रियार्हस्य तस्य बन्धासंभवात्, तिर्यङ्मनुष्याणां च तदुत्कृष्टरसयोग्यायां विशुद्धौ वर्तमानानां तिर्यक्पञ्चेन्द्रियादियोग्यान्यशुभतरबन्धसंभवात् । उद्योतनाम्नः सप्तमपृथिव्यां वर्त्तमानो नारक औपशमिकसम्यक्त्वमुत्पादयितुकामो यथाप्रवृत्तादिकरणत्रयपुरस्सरमन्तर-

करणं कृत्वा मिथ्यात्वस्य प्रथमस्थितिमनुभवँश्चरमसमये वर्त्तमान उत्कृष्टानुभागबन्धस्वामी, तद्बन्धकेषु तस्यातिविशुद्धत्वात् । तिर्यङ्मनुष्यायुषोस्तिर्यङ्मनुष्यो वा तत्प्रायोग्यविशुद्धो मिथ्यादृष्टिस्तथा । अगुरुलघुतैजसकार्मणनिर्माणप्रशस्तवर्णगन्धरसस्पर्शदेवद्विकवैक्रियद्विकाहारकद्विकपञ्चेन्द्रियजातिसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतितीर्थकरयशःकीर्त्तिवर्जत्रसादिनवकरूपाणामेकोनत्रिंशत्प्रकृतीनामपूर्वकरणः क्षपणार्हो देवगतिप्रायोग्यबन्धव्यवच्छेदसमये वर्त्तमान उत्कृष्टानुभागबन्धस्वामी, तद्बन्धकेष्वस्यैवातिविशुद्धत्वात् । मनुष्यद्विकौदारिकद्विकप्रथमसंहननानां सम्यग्दृष्टिर्देवोऽतिविशुद्ध उत्कृष्टानुभागमेकं द्वौ वा समयौ बध्नाति, मिथ्यादृष्टेः सम्यग्दृष्टिरनन्तगुणविशुद्ध इति सम्यग्दृष्टिग्रहणं । नारका अपि विशुद्धाः सन्त एताः प्रकृतीर्निर्वर्त्तयन्ति, केवलं नन्दीश्वरादिचैत्यमहोत्सवाद्युपबृंहितभावत्रिदशवदतिविशुद्धत्वाभावात्तेषामग्रहणं । तिर्यङ्मनुष्याणां पुनरतिशुद्धानां देवगतिप्रायोग्यबन्धकत्वात्तदयोग्यप्रस्तुतप्रकृतिबन्धासंभव इति सर्वव्युदासेन देवस्यैव ग्रहणं । तथाऽप्रमत्तसंयतो देवायुष उत्कृष्टानुभागबन्धस्वामी, सर्वेभ्यस्तद्बन्धकेभ्योऽस्यातिविशुद्धत्वात् । सातवेदनीययशःकीर्त्युच्चैर्गोत्राणां सूक्ष्मसंपरायश्चरमसमये वर्त्तमानस्तथा, तद्बन्धकेभ्योऽस्यैवातिविशुद्धत्वात् ।

जघन्यानुभागस्वामित्वविषयेऽप्रमत्तयतिः प्रमत्ताभिमुख आहारकद्विकस्य जघन्यानुभागबन्धस्वामी, तस्य तद्बन्धकेषु सर्वसंक्लिष्टत्वात् । सूक्ष्मत्रिकविकलत्रिकायुश्चतुष्टयदेवद्विकनरकद्विकवैक्रियद्विकरूपाणां षोडशप्रकृतीनां नरतिर्यञ्चो जघन्यानुभागबन्धस्वामिनः । अत्र हि तिर्यङ्मनुष्यायुषी विना शेषाश्चतुर्दश प्रकृतीर्देवनारका भवप्रत्ययादेव न बध्नन्ति, तिर्यङ्मनुष्यायुर्द्वयमपि यदा जघन्यस्थितिकं बध्यते तदा जघन्यरसं क्रियते । देवनारकास्तु तज्जघन्यं न बध्नन्त्येव, तत्स्थि-

तिकेषु तेषामुत्पत्त्यभावात्, तस्मादेतत्प्रकृतिषोडशकं देवनारकायोग्यमिति नरतिरश्चामेव ग्रहणं। तत्र नारकायुषोऽशुभत्वात्तद्बन्धकेषु सर्वविशुद्धा दशवर्षसहस्रलक्षणजघन्यस्थितिबन्धकाले जघन्यानुभागं तिर्यङ्मनुष्याः कुर्वन्ति, शेषायुस्त्रयस्य शुभत्वात्तद्बन्धकेषु सर्वसंक्लिष्टाः स्वस्वसर्वजघन्यस्थितिबन्धका जघन्यानुभागबन्धस्वामिनः। नरकद्विकस्याशुभत्वाज्जघन्यस्थितिबन्धकाले तद्बन्धकेषु सर्वविशुद्धास्तथा, देवद्विकस्य शुभत्वात्स्वोत्कृष्टस्थितिबन्धकाले तत्प्रायोग्यसंक्लिष्टास्तथा, अतिसंक्लिष्टो नरकादियोग्यं बध्नीयादिति तत्प्रायोग्यसंक्लेशग्रहणं। एवमन्यत्रापि द्रष्टव्यं। वैक्रियद्विकस्यापि शुभत्वान्नरकगतिबन्धसहितां सर्वोत्कृष्टां स्थितिं बध्नन्तस्तथा, विकलत्रिकसूक्ष्मत्रिकयोस्त्वशुभत्वात्तत्प्रायोग्यविशुद्धास्तथा। अतिविशुद्धा मनुष्यादिप्रायोग्यं बध्नन्तीति तत्प्रायोग्यविशुद्धिग्रहणं। औदारिकद्विकोद्योतानां देवा नैरयिका वा तिर्यग्गतेर्विंशतिसागरोपमकोटाकोटिप्रमाणामुत्कृष्टस्थितिं बध्नन्त उत्कृष्टसंक्लेशे वर्त्तमाना जघन्यानुभागबन्धस्वामिनः, एतासां प्रकृतीनां तिर्यग्गतिप्रायोग्यबन्धसहचरितानामेव जघन्यरसबन्धात्। तिर्यङ्मनुष्याणां चैतावति संक्लेशे वर्त्तमानानां नरकगतिप्रायोग्यबन्धसंभवेनैतद्बन्धासंभवात्। औदारिकाङ्गोपाङ्गस्य च देवा ईशानात्परे द्रष्टव्याः, ईशानान्तानामतिसंक्लिष्टानामप्येकेन्द्रियप्रायोग्यस्यैव बन्धात्। औदारिकाङ्गोपाङ्गस्य चैकेन्द्रियाप्रायोग्यत्वात्। तिर्यग्द्विकनीचैर्गोत्राणां सप्तमपृथिवीनारका औपशमिकसम्यक्त्वमुत्पादयन्तो यथाप्रवृत्तादिकरणत्रयपूर्वमन्तरकरणं कृत्वा प्रथमस्थितिं विपाकतोऽनुभवन्तश्चरमसमये मिथ्यादृष्टयस्तथा। अस्य हि प्रकृतित्रयस्याशुभत्वात्सर्वविशुद्धा जघन्यानुभागबन्धकारिणः। तद्बन्धकेषु चैत एव विशुद्धा इति। उक्तं च शतकचूर्णौ—"तिरियगइतिरियाणुपुव्विणीयागोयाणं अहे सत्तमपुढविनेरईउ

सम्मत्ताभिमुहो करणाइं करित्तु चरमसमयमिच्छदिट्ठी भवपच्चएण ताउं तिन्नि वि बंधई जाव मिच्छत्तभावो ताव तस्स जहण्णोणुभागो हवइ तब्बंधगेसु अच्चंतविसुद्धो त्ति काउं"। अन्यस्थानवर्ती ह्येतावत्यां विशुद्धौ मनुष्यद्विकादियुक्तमुच्चैर्गोत्रं बध्नीयादिति सप्तमपृथिवीनारकग्रहणमिति भावः। अविरतसम्यग्दृष्टिर्मिथ्यात्वनरकगमनाभिमुखो मनुष्यस्तीर्थकरनाम्नस्तथा। अस्य हि शुभप्रकृतित्वाज्जघन्यानुभागः संक्लेशेन बध्यते, स च यथोक्तविशेषणविशिष्टस्यैव लभ्यते। तत्र तिर्यञ्चस्तीर्थकरनाम्नः पूर्वप्रतिपन्नाः प्रतिपद्यमानकाश्च भवप्रत्ययेनैव न भवन्तीति मनुष्यग्रहणं। क्षायिकसम्यग्दृष्टिश्रेणिकादेर्नरकगमनाभिमुखस्यापि विशुद्धत्वादन्यगत्यभिमुखस्य च सम्यग्दृष्टेस्तादृशसंक्लेशाभावान्मिथ्यात्वनरकाभिमुखग्रहणं। पञ्चेन्द्रियजातितैजसकार्मणप्रशस्तवर्णगन्धरसस्पर्शागुरुलघुपराघातोच्छ्वासत्रसबादरपर्याप्तप्रत्येकनिर्माणलक्षणानां पञ्चदशप्रकृतीनां चतुर्गतिका अपि जीवा मिथ्यादृष्टयः सर्वोत्कृष्टसंक्लेशा जघन्यानुभागबन्धकारिणः। एता हि शुभप्रकृतित्वात्सर्वोत्कृष्टसंक्लेशैर्जघन्यरसाः क्रियन्ते। तत्र च तिर्यङ्मनुष्याः सर्वोत्कृष्टसंक्लेशे वर्त्तमाना नरकगतिसहचरिता एता बध्नन्तो जघन्यरसाः कुर्वन्ति। नारकाः सनत्कुमारादिदेवाश्च सर्वसंक्लिष्टाः पञ्चेन्द्रियतिर्यक्प्रायोग्या एता बध्नन्तो जघन्यरसाः कुर्वन्ति। ईशानान्तास्तु देवाः सर्वसंक्लिष्टाः पञ्चेन्द्रियजातित्रसवर्जाः शेषाः प्रकृतीस्त्रयोदशैकेन्द्रियप्रायोग्या बध्नन्तो जघन्यरसा विदधति। पञ्चेन्द्रियजातित्रसनाम्नी तु विशुद्धा अमी बध्नन्ति इति जघन्यरसो न लभ्यत इति तदर्जनं। त एव चतुर्गतिका मिथ्यादृष्टयो मनाग्विशुद्ध्यन्तः स्त्रीवेदनपुंसकवेदयोर्जघन्यानुभागबन्धस्वामिनः। केवलं मनाक्क्षुध्यन्तो नपुंसकवेदस्य। ततो मनाग्विशुद्धतराः स्त्रीवेदस्य। सर्वविशुद्धास्तु पुरुषवेदमेव बध्नन्तीति मनाग्विशुध्यन्त इत्युक्तं। सातवे-

दनीयस्थिरशुभयशःकीर्त्तीनां सप्रतिपक्षाणां सम्यग्दृष्टिर्मिथ्यादृष्टिर्वा परावर्त्तमानमध्यमपरिणामो जघन्यानुभागबन्धस्वामी । कथमिति चेदुच्यते—इह सातस्य पञ्चदशसागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, असातस्य च त्रिंशत् । तत्र प्रमत्तसंयतस्तत्प्रायोग्यविशुद्धोऽसातस्य सम्यग्दृष्टियोग्यस्थितिषु सर्वजघन्यामन्तःसागरोपमकोटाकोटिप्रमाणां स्थितिं बध्नाति । ततोऽन्तर्मुहूर्त्तात्परावृत्य परावृत्य सातं बध्नाति, पुनरप्यसातं । एवं देशविरताविरतसम्यग्दृष्टिसम्यग्मिथ्यादृष्टिसासादनमिथ्यादृष्टयोऽपि परावृत्य सातासाते बध्नन्ति । तत्र मिथ्यादृष्टिः सातासाते परावृत्य तावद्बध्नाति यावत्सातस्य पञ्चदश सागरोपमकोटाकोटिलक्षणा ज्येष्ठा स्थितिः । ततः परतोऽपि संक्लिष्टः संक्लिष्टतरः संक्लिष्टतमोऽसातमेव केवलं तावद्बध्नाति यावत् त्रिंशत्सागरोपमकोटीकोटयः । प्रमत्तादपि परतोऽप्रमत्तादयो विशुद्धविशुद्धतरविशुद्धतमाः सातमेव केवलं बध्नन्ति यावत्सूक्ष्मसंपराये षोडश मुहूर्त्ताः । तदेवं व्यवस्थिते सातस्यासातेन सह परावृत्य परावृत्य बन्धे उत्कृष्टस्थितेरारभ्य जघन्यानुभागबन्धोचितः परावर्त्तमानमध्यमपरिणामस्तावद्वक्तव्यते यावत्प्रमत्तेऽन्तःसागरोपमकोटाकोटीलक्षणा सर्वजघन्या स्थितिः । एतेषु हि सम्यग्दृष्टिमिथ्यादृष्टियोग्यस्थानेषु प्रकृतेः प्रकृत्यन्तरसंक्रमे मन्दः परिणामो जघन्यानुभागबन्धोचितो लभ्यते नान्यत्र । शुद्धस्थितावप्रमत्तादीनां मिथ्यादृष्टेश्च सातासातयोः प्रभूतरसाभिनिर्वृत्तेः सागरोपमसप्तभागत्रयादिरूपवेदनीयस्थितिबन्धकेष्वेकेन्द्रियादिष्वपि तथाविधाध्यवसायाभावाज्जघन्यानुभागबन्धो न संभवति, तस्माद्यथोक्तस्थितिबन्ध एव जघन्यानुभागबन्धसंभवस्तथाविधपरिणामसद्भावादिति । अस्थिराशुभायशःकीर्त्तीनां विंशतिसागरोपमकोटीकोटय उत्कृष्टा स्थितिः । स्थिरशुभयशःकीर्त्तीनां तु दश । तत्रास्थिराशुभायशःकीर्त्तीनां सम्यग्दृष्टियोग्यस्थितिषु

प्रमत्तसंयतस्तत्प्रायोग्यविशुद्धौ जघन्यां स्थितिमन्तःसागरोपमकोटाकोटीलक्षणां बध्नाति, ततोऽन्तर्मुहूर्त्ताद्विशुद्धः स्थिरादिका बध्नाति, पुनरप्यस्थिरादिका इत्येवं देशविरताविरतमिश्रसास्वादनमिथ्यादृष्टयोऽपि परावृत्य परावृत्य सप्रतिपक्षा अस्थिराशुभायशःकीर्तीर्बध्नन्ति । तत्र मिथ्यादृष्टिः परावृत्यैतास्तावद्बध्नाति यावत्स्थिरादीनामुत्कृष्टा स्थितिः । एतेषु च सम्यग्दृष्टिमिथ्यादृष्टिस्थानेषु जघन्यानुभागबन्धो लभ्यते नान्यत्र । दशकोटाकोटीपरतो ह्यस्थिरादय एवाशुभा बहुरसा बध्यन्ते । अप्रमत्तादिभिस्तु स्थिराद्याः शुभा एव बहुरसा बध्यन्त इति नान्यत्र जघन्यानुभागलाभः । तथा स्थावरैकेन्द्रियजात्योर्नैरयिकवर्जः शेषस्त्रिगतिको मिथ्यादृष्टिः परावर्त्तमानमध्यमपरिणामो जघन्यानुभागबन्धस्वामी । सर्वविशुद्धो हि पञ्चेन्द्रियजातित्रसनाम्नोर्बन्धको भवति । सर्वसंक्लिष्टः स्थावरैकेन्द्रियजात्योरुत्कृष्टानुभागबन्धक इत्यालोच्य मध्यमपरिणामग्रहणं । अयं च मध्यमपरिणामो यदैकस्मिन्नन्तर्मुहूर्त्ते एकेन्द्रियजातिस्थावरनाम्नी बद्ध्वा पुनर्द्वितीयेऽप्यन्तर्मुहूर्त्ते ते एव बध्नाति तदापि भवति । केवलं तदाऽवस्थितपरिणामेऽशुभयोरनयोर्जघन्यानुभागहेतुर्विशुद्धिर्न लभ्यत इति मध्यमपरिणामः परावर्त्तमानत्वेन विशिष्यते । तादृशश्च परिणामः पञ्चेन्द्रियजातित्रसनामन्यां परावृत्य परावृत्य बन्धे भवति, तदा च जघन्यानुभागो लभ्यत इति । भवत्वेवं तथापि नारकवर्जनं किमर्थमिति चेदुच्यते—नारकाणां स्वभावादेवैतत्प्रकृतिद्वयाबन्धकत्वात् । आतपनाम्नस्तु सर्वसंक्लिष्टा ईशानान्ता देवा मिथ्यादृष्टयो जघन्यानुभागबन्धस्वामिनः, अस्य शुभप्रकृतित्वेन सर्वसंक्लिष्टानामेव जघन्यानुभागबन्धकत्वात्, तद्बन्धकेषु चैतेषामेव सर्वसंक्लिष्टत्वात् । तिर्यङ्मनुष्या ह्येतावति संक्लेशे वर्त्तमाना नारकादिप्रायोग्यं बध्नीयुः । नारकाः सनत्कुमारादिदेवाश्च भवप्रत्ययादेव तन्न बध्नन्तीति सर्वपरि-

हारेण यथोक्तदेवानामेव ग्रहणं । मनुष्यद्विकसंहननषट्कसंस्थानषट्कविहायोगतिद्विकसुभगसुस्वरादेयदुर्भगदुःस्वरानादेयोच्चैर्गोत्रलक्षणानां त्रयोविंशतिप्रकृतीनां चतुर्गतिका अपि मिथ्यादृष्टयो मध्यमपरिणामा जघन्यानुभागं कुर्वन्ति। सम्यग्दृष्टीनां ह्येतासां परावृत्तिर्नास्ति। तथाहि—तिर्यङ्मनुष्याः सम्यग्दृष्टयो देवद्विकमेव बध्नन्ति, न मनुष्यादिद्विकानि। संस्थानेषु समचतुरस्रमेव। संहननं तु न किञ्चिदपि। शुभविहायोगतिसुभगसुस्वरादेयोच्चैर्गोत्राण्यप्रतिपक्षाण्येव। देवनारका अपि सम्यग्दृष्टयो मनुष्यद्विकमेव बध्नन्ति, न तिर्यग्द्विकादिकं। संस्थानेषु समचतुरस्रमेव। संहननेषु वज्रर्षभनाराचमेव। विहायोगत्यादिका अपि शुभा एव नाशुभा इति परावृत्त्यभावात्सम्यग्दृष्टित्यागः। तत्र मनुष्यगतिद्विकस्य पञ्चदशसागरोपमकोटीकोटय उत्कृष्टा स्थितिः । प्रशस्तविहायोगतिसुभगसुस्वरादेयोच्चैर्गोत्रवज्रर्षभनाराचसमचतुरस्राणां तु दश। एताः शुभप्रकृतयः स्वस्वोत्कृष्टस्थितेरारभ्य प्रतिपक्षप्रकृतिभिः सह परावृत्त्य परावृत्त्य तावद्बध्यन्ते यावत्तासामेव प्रतिपक्षप्रकृतीनां सर्वजघन्यान्तःसागरोपमकोटीकोटीलक्षणा स्थितिः । एतेषु स्थितिस्थानेषु परावर्त्तमानमध्यमपरिणाम एतासां जघन्यानुभागं बध्नाति। हुंडसेवार्त्तयोरपि वामनकीलिकयोरुत्कृष्टस्थितेरारभ्य स्वस्वजघन्यस्थितिं यावत्परावृत्तिर्लभ्यते। शेषसंस्थानसंहननानामप्यात्मीयोत्कृष्टस्थितेरारभ्य संभवदितरसंस्थानसंहननैः सह परावृत्तिस्तावद्वभ्यते यावदात्मीयात्मीयजघन्यस्थितिः। एतेषु स्थितिस्थानेषु मिथ्यादृष्टिः परावर्त्तमानमध्यमपरिणामो जघन्यानुभागं बध्नाति। तथाऽरतिशोकयोः प्रमत्तसंयतोऽप्रमत्तसंयमं प्रतिपित्सुर्जघन्यरसानुबन्धस्वामी, तद्बन्धकेषु तस्यातिविशुद्धत्वात् । ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकरूपाणां चतुर्दशानां प्रकृतीनां क्षपकः सूक्ष्मसंपरायान्त्यसमये वर्त्तमानः समयमेकं

तथा, तद्बन्धकेषु तस्य विशुद्धतमत्वात् । पुरुषवेदसंज्वलनचतुष्कयोरनिवृत्तिबादरः क्षपकः स्वबन्धव्यवच्छेदसमये समयमेकं तथा, तस्यापि तद्बन्धकेष्वतिविशुद्धत्वात् । अप्रशस्तवर्णादिचतुष्टयनिद्राप्रचलोपघातहास्यरतिभयजुगुप्सारूपाणामेकादशप्रकृतीनामपूर्वकरणः क्षपणार्हः स्वस्वबन्धव्यवच्छेदसमये समयमेकं तथा, तस्यापि तद्बन्धकेषु परमविशुद्धत्वात् । स्त्यानर्द्धित्रिकमिथ्यात्वानन्तानुबन्धिनामष्टानां कर्मणां सम्यक्त्वं संयमं च युगपत्प्रतिपित्सुर्मिथ्यादृष्टिश्चरमसमये तथा । अप्रत्याख्यानावरणानामविरतसम्यग्दृष्टिः संयमं प्रतिपित्सुः, प्रत्याख्यानावरणानां देशविरतः सर्वविरतिं प्रतिपित्सुस्तथा । कृता स्वामित्वप्ररूपणा, घातिसंज्ञा स्थानसंज्ञा शुभाशुभप्ररूपणा च रसविपाकप्ररूपणायां पूर्वमर्थात् कृतैवेत्युपरम्यते ॥६७॥

तदेवमुक्तोऽनुभागबन्धः, अथ स्थितिबन्धाभिधानावसरः । तत्र चत्वार्यनुयोगद्वाराणि—स्थितिस्थानप्ररूपणा, निषेकप्ररूपणा, अबाधाकण्डकप्ररूपणा, अल्पबहुत्वप्ररूपणा च । तत्र स्थितिस्थानप्ररूपणार्थमाह—

ठिइबंधठाणाइं सुहुमापज्जत्तगस्स थोवाइं । बायरसुहुमेयरबितिचउरिंदियअसण्णसंनीणं ॥ ६८ ॥
संखेज्जगुणाणि कमा असमत्तियरे य बेंदियाइम्मि । णवरिमसंखेज्जगुणाणि संकिलेसा य सव्वत्थ ॥६९॥

व्याख्या—इह जघन्यस्थितेरारभ्योत्कृष्टां स्थितिं यावद्यावन्तः समयास्तावत्प्रमाणानि स्थितिस्थानानि भवन्ति । तानि च स्थितिस्थानानि सूक्ष्मस्यापर्याप्तस्य सर्वस्तोकानि । तेभ्योऽपर्याप्तबादरस्य सङ्ख्येयगुणानि । तेभ्योऽपि सूक्ष्मपर्याप्तस्य सङ्ख्येयगुणानि । तेभ्योऽपि बादरपर्याप्तस्य सङ्ख्येयगुणानि । एतानि च पल्योपमासङ्ख्येयभागगतसमयप्रमाणानि द्रष्टव्यानि । ततोऽपर्याप्तद्वीन्द्रियस्यासङ्ख्येयगुणानि । कुत इति चेदुच्यते—द्वीन्द्रियाणामपर्याप्तानां स्थितिस्थानानि पल्योपमसङ्ख्येय-

ऽागगतसमयप्रमाणानि पाश्चात्यानि च पल्योपमासङ्ख्येयऽागगतसमयप्रमाणानि, ततः पाश्चात्येऽन्योऽमून्यसङ्ख्येयगुणान्येव ऽवन्ति । तेऽन्योऽपि द्वीन्द्रियस्य पर्याप्तस्य स्थितिस्थानानि सङ्ख्येयगुणानि । तेऽन्यस्त्रीन्द्रियस्यापर्याप्तस्य । तेऽन्योऽपि त्रीन्द्रियस्य पर्याप्तस्य । तेऽन्यश्चतुरिन्द्रियस्यापर्याप्तस्य । तेऽन्योऽपि तस्यैव पर्याप्तस्य । तेऽन्योऽसंज्ञिपञ्चेन्द्रियस्यापर्याप्तस्य । तेऽन्योऽपि तस्यैव पर्याप्तस्य । तेऽन्यः संज्ञिपञ्चेन्द्रियस्यापर्याप्तस्य । तेऽन्योऽपि तस्यैव पर्याप्तस्य क्रमेण सङ्ख्येयगुणानि । "असमत्तियर त्ति" असमाप्तानामपर्याप्तानामितरेषां च पर्याप्तानां बादरादीनां स्थितिस्थानानि क्रमात्सङ्ख्येयगुणानीत्यन्वयः । नवरं द्वीन्द्रियादौ द्वीन्द्रियप्रथमभेदेऽपर्याप्तरूपे स्थितिस्थानान्येकेन्द्रियाणामभिधाय तेऽन्योऽसङ्ख्येयगुणानि वक्तव्यानि, एतच्च ऽावितं प्राक् । संक्लेशाश्च सर्वत्र सर्वेषु स्थानेष्वसङ्ख्येयगुणा वक्तव्याः । आस्तां द्वीन्द्रियस्य प्रथमभेदे स्थितिस्थानान्यसङ्ख्येयगुणानीति चार्थः । तथाहि—सूक्ष्मस्यापर्याप्तस्य संक्लेशस्थानानि सर्वस्तोकानि । तेऽन्योऽपर्याप्तबादरस्यासङ्ख्येयगुणानि । तेऽन्यः पर्याप्तसूक्ष्मबादरापर्याप्तपर्याप्तद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिसंज्ञिपञ्चेन्द्रियाणां यथोत्तरमसङ्ख्येयगुणानि । सर्वत्रापि संक्लेशस्थानानामसङ्ख्येयगुणत्वे का युक्तिरिति चेदुच्यते—इह सूक्ष्मस्यापर्याप्तस्य जघन्यस्थितिबन्धारम्भे यानि संक्लेशस्थानानि तेऽन्यः प्रतिसमयमुत्तरोत्तरस्थितिषु विशेषाधिकानि ऽवन्ति । तानि तदुत्कृष्टस्थितिबन्धारम्भेऽसङ्ख्येयगुणानि लऽभ्यन्ते । एवं च यदि सूक्ष्मापर्याप्तस्यापि स्थितिस्थानेष्वतिस्तोकेषु जघन्यस्थितिस्थानसत्कसंक्लेशस्थानापेक्षयोत्कृष्टे स्थितिस्थाने तान्यसङ्ख्येयगुणानि ऽवन्ति, तदा बादरापर्याप्तस्थितिस्थानेषु सूक्ष्मापर्याप्तस्थितिस्थानापेक्षया-

सङ्क्लेयगुणेषु सुतरां भवन्ति । एवमुत्तरत्राप्यसङ्क्लेयगुणत्वं भावनीयं । एवं च प्राक्तनसंक्लेशस्थानानामाद्यापेक्षयैवोत्तरत्रा-ऽसङ्क्लेयगुणत्वमिति न काप्यनुपपत्तिः ॥ ६८-६९ ॥

एमेव विसोहीउं विग्घावरणेसु कोडिकोडीउं । उदही तीसमसाए तऊं थिइमणुयदुगसाए ॥ ७० ॥

व्याख्या—यथा संक्लेशस्थानान्यसङ्क्लेयगुणतया प्रागुक्तान्येवमेवानेन क्रमेणासङ्क्लेयगुणतयैवेत्यर्थः । विशोधयोऽपि विशु-द्धिस्थानान्यपि वक्तव्यानि । यान्येव हि संक्लिश्यमानस्य संक्लेशस्थानानि तान्येव विशुध्यमानस्य विशोधिस्थानानीति नेह भावनाविशेषः । अथोत्कृष्टेतरस्थितिप्रतिपादनार्थमाह—विग्घेत्यादि, विघ्नोऽन्तरायं आवरणं ज्ञानावरणं दर्शनावरणं च, तत्र पञ्चानामन्तरायप्रकृतीनां पञ्चानां ज्ञानावरणप्रकृतीनां नवानां दर्शनावरणप्रकृतीनामसातवेदनीयस्य चोत्कृष्टा स्थिति-स्त्रिंशत्सागरोपमकोटीकोट्यः । इह द्विधा स्थितिः—कर्मतयाऽवस्थानरूपाऽनुभवयोग्या च । तत्राद्यामधिकृत्य जघन्यो-त्कृष्टप्रमाणाभिधानमेतदवगन्तव्यं । अनुभवयोग्या पुनरबाधाकालहीना येषां कर्मणां यावत्यः सागरोपमकोटिकोट्यस्तेषां तावन्ति वर्षशतान्यबाधाकालः, तावन्तं हि कालं तानि कर्माणि स्वोदयतो जीवस्य बाधां नोत्पादयन्ति । तत्र मतिज्ञा-नावरणादीनां त्रिंशत्सागरोपमकोटाकोट्य उत्कृष्टा स्थितिरिति त्रिंशद्वर्षशतान्यबाधाकालोऽबाधाकालहीनश्च कर्मनिषेको भावनीयः । तथा स्त्रीवेदे मनुष्यद्विके मनुष्यगतिमनुष्यानुपूर्वीरूपे सातवेदनीये च पूर्वोक्तस्थितेरर्द्धमुत्कृष्टस्थितितया द्रष्टव्यं । स्त्रीवेदादीनां पञ्चदशसागरोपमकोटाकोट्य उत्कृष्टा स्थितिरित्यर्थः, पञ्चदशवर्षशतान्यबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः ॥ ७० ॥

तिविहे मोहे सत्तरि चत्तालीसा य वीसई य कमा। दस पुरिसे हासरइ देवदुगे खगइ चेठाए ॥७१॥

व्याख्या—त्रिप्रकारे मोहे मोहनीये मिथ्यात्वलक्षणे दर्शनमोहनीये, षोडशकषायलक्षणे कषायमोहनीये, नपुंसकवेदारतिशोकभयजुगुप्सारूपे च नोकषायमोहनीये यथासङ्ख्यमुत्कृष्टा स्थितिः सागरोपमकोटीकोट्यः सप्ततिश्चत्वारिंशद्विंशतिश्च यथासङ्ख्यमेव च सप्त चत्वारि दे च वर्षसहस्रे अबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः। इह नोकषायशब्देन प्रतिनियतप्रकृतीनां ग्रहणमितरासामुक्तवक्ष्यमाणत्वेन सामान्यशब्दस्य विशेषपरत्वादित्यवसेयं। पुरुषे पुरुषवेदे हास्ये रतौ देवद्विके देवगतिदेवानुपूर्वीरूपे, "खगइ त्ति" लुप्तविभक्तिको निर्देशः, चकारः समुच्चयार्थः, तत इष्टायां प्रशस्तायां खगतौ विहायोगतावित्यर्थः, दश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, दश वर्षशतानि चाबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः ॥ ७१ ॥

थिरसुभपंचगउच्चे चेवं संठाणसंघयणमूले। तब्बिइयाइ बिबवुड्ढी अट्ठारससुहुमविगलतिगे ॥७२॥

व्याख्या—स्थिरे, तथा शुभपञ्चके शुभसुभगसुस्वरादेययशःकीर्त्तिरूपे, उच्चैर्गोत्रे च, तथा संस्थानसंहननमूले प्रथमे संस्थाने प्रथमे च संहनन इत्यर्थः, एवं पूर्वोक्तरीत्या दश सागरोपमकोटाकोट्य उत्कृष्टा स्थितिरवगन्तव्येत्यर्थः, दश वर्षशतानि चाबाधा, अबाधाहीनश्च कर्मदलिकनिषेकः। तेषां संस्थानानां संहननानां च मध्ये द्वितीयादिषु द्विवृद्धिः। तथाहि—द्वितीययोः संस्थानसंहननयोर्द्वादशसागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, द्वादश वर्षशतान्यबाधाकालोऽबाधाहीनश्च कर्मदलिकनिषेकः। तृतीययोः संस्थानसंहननयोश्चतुर्दश सागरोपमकोटाकोट्य उत्कृष्टा स्थितिः, चतुर्दश वर्ष-

शतान्यबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः । चतुर्थयोः संस्थानसंहननयोः षोडश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, षोडश वर्षशतान्यबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः । पञ्चमयोः संस्थानसंहननयोरष्टादश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, अष्टादश वर्षशतानि चाबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः । षष्ठयोः संस्थानसंहननयोर्विंशतिः सागरोपमकोटाकोट्य उत्कृष्टा स्थितिः, द्वे वर्षसहस्रे अबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः । "अट्ठारस त्ति" सूक्ष्मत्रिके सूक्ष्मापर्याप्तसाधारणरूपे विकलत्रिके द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिलक्षणेऽष्टादशसागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, अष्टादश वर्षशतान्यबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः ॥ ७२ ॥

तित्थयराहारदुगे अंतो वीसं सणिच्चणामाणं । तेत्तीसुदही सुरणारगाउ सेसाउ पल्लतिगं ॥ ७३ ॥

व्याख्या—तीर्थकरे आहारकद्विके चाहारकशरीराहारकाङ्गोपाङ्गरूपे, "अंतो त्ति" अन्तःकोटाकोट्युत्कृष्टा स्थितिः, अन्तर्मुहूर्त्तमबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः । "सनिच्चणामाणं ति" नीचैर्गोत्रसहितानां शेषनामप्रकृतीनां नरकगतिनरकानुपूर्वीतिर्यग्गतितिर्यगानुपूर्व्येकेन्द्रियजातिपञ्चेन्द्रियजातितैजसकार्मणौदारिकवैक्रियशरीरौदारिकाङ्गोपाङ्गवैक्रियाङ्गोपाङ्गवर्णगन्धरसस्पर्शागुरुलघूपघातपराघातोच्छ्वासातपोद्योताप्रशस्तविहायोगतित्रसस्थावरबादरपर्याप्तप्रत्येकास्थिराशुभदुर्भगदुःस्वरानादेययशःकीर्त्तिनिर्माणलक्षणानां (३६) विंशतिः सागरोपमकोटाकोट्य उत्कृष्टा स्थितिः, विंशतिर्वर्षशतानि चाबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः । अत्र चौदारिकादीनां ये बन्धनसङ्घातास्तेषामपि स्थितिः स्वशरीरतुल्यैवेति दृश्यं । तथा चोक्तं "स्थित्युदयबन्धकालाः सङ्घातबन्धनानां स्वशरीरतुल्या ज्ञेया" इति । सुरनारकायुषोरुत्कृष्टा

स्थितिस्त्रयस्त्रिंशदुदधयः सागरोपमाणि पूर्वकोटित्रिभागाधिक इति शेषः । पूर्वकोटित्रिभागश्चाबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः । शेषायुषोर्मनुष्यतिर्यगायुषोः पल्यत्रिकं पल्योपमत्रयं पूर्वकोटीत्रिभागाधिकमिति शेषः । एतच्च पूर्वकोट्यायुषश्चतुर्गतिगमनयोग्यानुत्कृष्टस्थितिबन्धकांस्तिर्यञ्चनुष्यान् प्रति द्रष्टव्यं, तानेवाश्रित्य यथोक्तोत्कृष्टस्थित्यबाधयोः प्राप्तेः ॥ ७३ ॥

अथासंज्ञिपञ्चेन्द्रियादीन् बन्धकानाश्रित्यायुषामुत्कृष्टां स्थितिमाह—

आउचउक्कुक्कोसो पल्लासंखेज्जभागममणेसु । सेसाण पुव्वकोडी आ(सा)उतिभागो अबाहा सिं ॥७४॥

व्याख्या—अमनस्केषु असंज्ञिपञ्चेन्द्रियेषु पर्याप्तेष्वायुरुत्कृष्टस्थितिबन्धकेषु चतुर्णामप्यायुषां परभवसम्बन्धिनामुत्कृष्टा स्थितिः पल्योपमासङ्ख्येयभागमात्रा पूर्वकोटित्रिभागाधिकेति शेषः । पूर्वकोटित्रिभागश्चाबाधाऽबाधाहीनः कर्मदलिकनिषेकः । शेषाणां चैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाणां पर्याप्तापर्याप्तानामसंज्ञिपञ्चेन्द्रियसंज्ञिपञ्चेन्द्रियाणां चापर्याप्तानामुत्कृष्टायुःस्थितिबन्धकानां परभवायुष उत्कृष्टस्थितिः पूर्वकोटीस्वस्वभवत्रिभागान्न्यधिका वेदितव्या, एषामुत्कृष्टतोऽपि पूर्वकोट्यायुष्केष्वेव नरतिर्यक्षु समुत्पत्तेः । "सिं ति" एषां स्वायुस्त्रिभागः स्वस्वभवत्रिभागोऽबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः ॥ ७४ ॥

सम्प्रत्यायुर्वर्जसर्वकर्मणामबाधामुत्कृष्टां प्रतिपादयन्नाह—

वाससहस्समबाहा कोडाकोडिसगस्स सेसाणं । अणुवाउं अणुवट्टणगाउसु तम्मासिगुक्कोसो ॥ ७५ ॥

व्याख्या—कोटाकोटीदशकस्य दशसागरोपमकोटाकोटीमात्रायाः स्थितेर्वर्षसहस्रमबाधा । शेषाणां पादशचतुर्दशपञ्चदशषोडशाष्टादशविंशतित्रिंशच्चत्वारिंशत्सप्ततीनामनुपातोऽनुसारो विधेयः । यदा दशानां सागरोपमकोटीकोटीनां वर्षसहस्रमबाधा, तदा पादशानां वर्षसहस्रं शतद्वयं चाबाधा । चतुर्दशानां वर्षसहस्रं शतचतुष्टयं चेत्येवं सर्वत्र त्रैराशिकमनुसर्त्तव्यमित्यर्थः । आयुराश्रित्याह—"अणुवट्टणगाउसु उम्मासिगुक्कोसो" अनपवर्त्तनीयायुष्केषु देवनारकासङ्ख्येयवर्षायुष्कतिर्यङ्मनुष्येषु परभवायुरुत्कृष्टस्थितिबन्धकेषु परभवायुष उत्कृष्टाऽबाधा षाण्मासिकी, षण्मासावशेष एवायुषि तेषां परभवायुर्बन्धकत्वात् । केचित्तु युगलधर्मिणां पल्योपमासङ्ख्येयभागप्रमाणामबाधामिच्छन्ति । तदाहुश्चन्द्रर्षिपूज्याः—"पलियासंखिज्जंसं जुगधम्माणं वयंतऽन्ने" । शेषेषु तु स्वायुस्त्रिभागरूपाऽबाधोक्तैव, सापि न नियतैवावतिष्ठते, स्वायुस्त्रिभाग इव स्वायुस्त्रिभागत्रिभागे स्वायुस्त्रिभागत्रिभागत्रिभागेऽपि च परभवायुर्बन्धान्युपगमात् स्वायुर्नवभागसप्तविंशतिभागरूपाया अप्यबाधायाः संभवादिति सम्प्रदायः ॥ ७५ ॥

तदेवमुक्तोत्कृष्टा स्थितिरथ जघन्यामभिधित्सुराह—

जिन्नमुहुत्तं आवरणविग्घदंसणचउक्कलोभंते । बारस सायमुहुत्ता अट्ठ य जसकित्तिउच्चेसु ॥ ७६ ॥

व्याख्या—आवरणानि पञ्च ज्ञानावरणानि, विघ्नाः पञ्चान्तरायप्रकृतयः, दर्शनचतुष्कं चक्षुरचक्षुरवधिकेवलदर्शनावरणरूपं दर्शनावरणचतुष्टयं, लोभान्तो विशेषणव्यत्ययादन्तलोभः संज्वलनलोभ इति यावत्, ततः समाहारद्वन्द्वादेकवचनं । एतेषु जिन्नमुहूर्त्तमन्तर्मुहूर्त्तं जघन्या स्थितिः, अन्तर्मुहूर्त्तमबाधाकालोऽबाधाहीनश्च कर्मदलिकनिषेकः । "साय

त्ति" सातवेदनीयस्य जघन्या स्थितिर्द्वादश मुहूर्त्ताः, अन्तर्मुहूर्त्तं चाबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः। इदं च काषायिक्या एव स्थितेर्जघन्यायाः परिमाणमभिहितं, अन्यथा सातवेदनीयस्य जघन्या स्थितिः समयत्रयमात्रापि सयोगिकेवल्यादौ प्राप्यत इत्यवधेयं। तथा यशःकीर्त्युच्चैर्गोत्रयोरष्टौ मुहूर्त्ता जघन्या स्थितिः, अन्तर्मुहूर्त्तमबाधाऽबाधाहीनश्च कर्मदलिकनिषेकः ॥ ७६ ॥

दो मासा अद्धं संजलणे पुरिस अट्ठ वासाणि। भिन्नमुहुत्तमबाहा सवासिं सवहिं हस्से ॥ ७७ ॥

व्याख्या—संज्वलनानां द्वौ मासावर्द्धं च जघन्या स्थितिः। इदमुक्तं भवति—संज्वलनक्रोधस्य द्वौ मासौ जघन्या स्थितिः, संज्वलनमानस्य मासः, संज्वलनमायायाश्चार्द्धमासः। तथा पुरुषे पुरुषवेदस्याष्टौ वर्षाणि जघन्या स्थितिः। सर्वत्राप्यन्तर्मुहूर्त्तमबाधाऽबाधाकालहीनश्च कर्मदलिकनिषेकः। जघन्याबाधाकालपरिमाणं सूत्रतः प्रतिपादयन्नाह—"भिन्नमुहुत्तं ति" सर्वासामपि प्रकृतीनामुक्तानां वक्ष्यमाणानां च सर्वस्मिन्नपि ह्रस्वे जघन्ये स्थितिबन्धे भिन्नमुहूर्त्तमबाधा द्रष्टव्या, तथैव च प्राक् प्रतिपादिता, वक्ष्यते च ॥ ७७ ॥

सम्प्रत्यायुषो जघन्यस्थितिप्रतिपादनार्थमाह—

खुड्डागभवो आउसु उववायाउसु समा दस सहस्सा। उक्कोसा संखेज्जा गुणहीणमाहारतित्थयरे ॥७८॥

व्याख्या—तिर्यगायुषो मनुष्यायुषश्च जघन्यस्थितिः क्षुल्लकभवः। तस्य किं मानमिति चेदुच्यते—आवलिकानां द्वे शते षट्पञ्चाशदधिके। तथैकस्मिन्मुहूर्त्ते घटिकाद्वयप्रमाणे सप्तत्रिंशच्छतानि त्रिसप्तत्यधिकानि प्राणापानानां भवन्ति।

क्षुल्लकभवग्रहणानि च पञ्चषष्टिसहस्राणि पञ्चशतानि षट्त्रिंशदधिकानि । ततः पञ्चषष्टिसहस्रपञ्चशतषट्त्रिंशल्लक्षणस्य मुहूर्त्तगतक्षुल्लकभवग्रहणराशेर्भाज्यस्य मुहूर्त्तगतप्राणापानराशिना त्रिसप्तत्यधिकसप्तत्रिंशच्छतप्रमाणेन भागे हृते सति यल्लभ्यते तदेकत्र प्राणापाने क्षुल्लकभवग्रहणप्रमाणं भवति । ते च सप्तदश भवाः । तथा यैर्भागहारांकमानैरंशैः क्षुल्लकभवः संपद्यते, ते एकत्र प्राणापानेऽष्टादशस्यापि पञ्चनवत्यधिकत्रयोदशशतप्रमाणा अंशा आयान्ति । अष्टसप्तत्यधिकत्रयोविंशतिशतानि चांशानां न पूर्यन्ते । तदेवं समधिकाः सप्तदश क्षुल्लकभवा एकत्र प्राणापाने भवन्तीति प्रसिद्धं । एतच्च क्षुल्लकभवग्रहणं सर्वेषामप्यौदारिकशरीरिणां भवतीति भगवत्यामपि सिद्धं । यत्पुनरावश्यकटीकायां क्षुल्लकभवग्रहणं वनस्पतिष्वेव प्राप्यत इत्युक्तं तन्मतान्तरमिति बहुश्रुताः संगिरन्ते । अत्रापि "सव्वहिं हस्से" इतिवचनादन्तर्मुहूर्त्तमबाधाऽबाधाकालहीनश्च कर्मदलिकनिषेकः । तथोपपातायुषां देवानां नारकाणां चायुषो जघन्या स्थितिर्दश वर्षसहस्राणि, अन्तर्मुहूर्त्तमबाधाऽबाधाकालहीनश्च कर्मदलिकनिषेकः । तीर्थकराहारकयोर्जघन्यां स्थितिमाह—"उक्कोस त्ति" आहारकशरीराहारकाङ्गोपाङ्गतीर्थकरनाम्नां योत्कृष्टा स्थितिरन्तःसागरोपमकोटाकोटीप्रमाणा प्रागुक्ता सा सङ्ख्येयगुणहीना जघन्या स्थितिर्भवति । साऽपि चान्तःसागरोपमकोटाकोटिप्रमाणैव । ननु तीर्थकरनाम तीर्थकरभवादर्वाक् तृतीयभवे बध्यते, तदुक्तं—"बज्झइ तं तु भगवउ तइयभवोसक्कइत्ताणं" तत्कथं जघन्यतोऽपि अन्तःसागरोपमकोटाकोटीप्रमाणा तस्य स्थितिरुपपद्यते ? मैवं, "बज्झइ तं तु" इत्यादेर्निकाचनापेक्षयैवोक्तत्वात् । तथा चास्यामेवाशङ्कायां विशेषणवत्यां पूज्यैः समाहितं—"जं बज्झइ त्ति भणियं तत्थ णिकाइज्ज त्ति णियमोऽयं । तदवंझफलं णियमा भयणा अणिकाइयावत्थे ॥१॥"

आह—यदि तीर्थकरनाम्नो जघन्यापि स्थितिरन्तःसागरोपमकोटाकोटीप्रमाणा तदा तावत्याः स्थितेस्तिर्यग्जवत्रमणमन्तरेण पूरयितुमशक्यत्वात्तिर्यग्गतावपि तीर्थकरनामसत्ताप्रसङ्गः, तथा चागमविरोधः, आगमे हि तिर्यग्गतौ तीर्थकरनामसत्कर्मा सन् प्रतिषिध्यत इति। नैष दोषः, अत्यन्तनिकाचिततीर्थकरनामसत्ताया एवागमे प्रतिषेधात्। तथा चोक्तं विशेषणवत्यामेव—"तिरिएसु णत्थि तित्थयरणाम संतं ति देसियं समए। कहय तिरिउं ण होही अयरोवम कोऊिकोमीउं ॥ १ ॥ तं पि सुनिकाइयस्सेव तइयजवजाविणो विणिद्दिट्ठं। अणिकाइयंमि वच्चइ सवगईउंवि ण विरोहो ॥ २ ॥" तथा च यत्सुनिकाचितं तदेव तीर्थकरनाम सत्तितिर्यग्गतौ प्रतिषिद्धं, यत्तु प्रभूतस्थितिकमप्यपवर्त्तनाकरणेन लघुस्थितिकं क्रियते, उवर्त्तनया वा तदल्पस्थितिकं सद्बृहत्स्थितिकत्वेन व्यवस्थाप्यते, तस्योवर्त्तनापवर्त्तनासाध्यस्य तिर्यग्गतौ सत्वेऽपि न दोष इति सिद्धं। उक्तं च—"जमिह णिकाइयतित्थं तिरियजवे तं णिसोहियं संतं। इयरम्मि णत्थि दोसो उवट्टोवट्टणासज्झे ॥ १ ॥ अत्र च तीर्थकराहारकद्विकयोरन्तःसागरोपमकोटीकोट्याः सङ्ख्येयजागादारभ्य निकाचयितुमारब्धयोर्यदा सर्वात्मना निकाचना कृता जवति, तदा सुनिकाचितस्य तीर्थकरनाम्न उत्कृष्टा स्थितिः किञ्चिन्न्यूनपूर्वकोटिद्व्याब्यधिकानि त्रयस्त्रिंशत्सागरोपमाणि। तथाहि—तीर्थकरजवादर्वाक् तृतीये जवे पूर्वकोट्यायुषा प्रथमत एव तन्निकाचितं। ततोऽनुत्तरसुरेषु त्रयस्त्रिंशत्सागरोपमस्थितिको देवो जातः। ततोऽपि च्युत्वा चतुरशीतिलक्षपूर्वायुस्तीर्थकरो जायत इति। सुनिकाचितस्याहारकद्विकस्य तु पल्योपमासङ्ख्येयजाग उत्कृष्टा स्थितिः। अल्पनिकाचितयोश्च तीर्थकराहारकद्विकयोरन्तःसागरोपमकोटाकोट्याः सङ्ख्येयतमो जाग उत्कृष्टा स्थितिरिति विवेचितं पञ्चसङ्ग्रहे। अत्रापि चान्तर्मुहूर्त्तमबाधा, उत्कृष्ट-

स्थितावपि चानयोरियत्येवाबाधोक्ता । ततः परं दलिकरचनायाः सन्नावेनावश्यं प्रदेशोदयसंज्ञवः । केचित्तु तीर्थंकरनामकर्मान्तर्मुहूर्त्तादूर्ध्वं कस्यचित्प्रदेशत उदेति, तदुदये चाङ्गैश्वर्यादय ऋद्धिविशेषा अन्यजीवेभ्यो विशिष्टतरास्तस्य संज्ञवन्तीति संज्ञावयन्ति । अत्र च तीर्थंकरनाम्नो जघन्या स्थितिर्दशवर्षसहस्रमात्राऽऽहारकद्विकस्य चान्तर्मुहूर्त्तमात्रा पञ्चसंग्रहे प्रतिपादिताऽस्ति, तच्च ग्रन्थकृदभिप्रायोत्तीर्णमाचार्यान्तरस्य मतान्तरमिति द्रष्टव्यम् ॥ ७८ ॥

उक्तशेषाणां प्रकृतीनां जघन्यस्थितिप्ररूपणायाह—

वग्गुक्कोसठिईणं मिच्छत्तुक्कोसगेण जं लद्धं । सेसाणं तु जहण्णो पल्लासंखेज्जगेणूणो ॥ ७९ ॥

व्याख्या—इह ज्ञानावरणीयप्रकृतिसमुदायो ज्ञानावरणीयवर्गः । दर्शनावरणीयप्रकृतिसमुदायो दर्शनावरणीयवर्गः । वेदनीयप्रकृतिसमुदायो वेदनीयवर्गः । दर्शनमोहनीयप्रकृतिसमुदायो दर्शनमोहनीयवर्गः । कषायमोहनीयप्रकृतिसमुदायः कषायमोहनीयवर्गः । नोकषायमोहनीयप्रकृतिसमुदायो नोकषायमोहनीयवर्गः । नामप्रकृतिसमुदायो नामवर्गः । गोत्रप्रकृतिसमुदायो गोत्रवर्गः । अन्तरायप्रकृतिसमुदायोऽन्तरायवर्गः । एतेषां वर्गाणां या स्वीयस्वीयोत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटिकोट्यादिका, तस्या मिथ्यात्वस्योत्कृष्टया स्थित्या सप्ततिसागरोपमकोटाकोटीलक्षणया भागे हृते यल्लभ्यते पल्योपमासङ्ख्येयभागन्यूनस्तत्प्रमाण उक्तशेषाणां प्रकृतीनां जघन्यः स्थितिबन्धः । तथाहि—दर्शनावरणीयवेदनीययोरुत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटाकोटीप्रमाणा, तस्या मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटाकोट्या भागे हृते शून्यं शून्येन पातयेदिति वचनाल्लब्धास्त्रयः सागरोपमसप्त भागाः ते पल्योपमासङ्ख्येयभागहीना निद्रापञ्चकासातवेदनीययोर्जघन्या स्थितिः ।

एवं मिथ्यात्वस्य सप्त सप्तज्ञागाः पल्योपमासङ्ख्येयज्ञागहीनाः। संज्वलनवर्जानां द्वादशकषायाणां चत्वारः सप्तज्ञागाः पल्योपमासङ्ख्येयज्ञागहीनाः। तथा नोकषायमोहनीयस्य नामकर्मणो गोत्रस्य च स्वस्वोत्कृष्टस्थितेर्विंशतिसागरोपमकोटीकोट्या मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोट्या ज्ञागे हृते लब्धौ सागरोपमस्य द्वौ सप्तज्ञागौ, तौ पल्योपमासङ्ख्येयज्ञागहीनौ, पुरुषवेदवर्जानामष्टानां नोकषायाणां देवद्विकनरकद्विकवैक्रियद्विकाहारकद्विकायशःकीर्त्तितीर्थकरवर्जशेषनामप्रकृतीनां नीचैर्गोत्रस्य च जघन्या स्थितिः वैक्रियषट्कस्य द्वौ सप्तज्ञागौ सहस्रगुणितौ पल्योपमासङ्ख्येयज्ञागहीनौ जघन्या स्थितिरिति ग्रन्थान्तराद्रष्टव्यं, यतस्तस्यजघन्यस्थितिबन्धका असंज्ञिपञ्चेन्द्रिया एव। ते चैतावतीमेव जघन्यां स्थितिं बध्नन्तीति। पञ्चसंग्रहे तु वर्गोत्कृष्टस्थितिर्विज्ञजनीयतया नात्रिप्रेता, किंतु "सेसाणुक्कोसाउं मिच्छत्तठिईइ जं लद्धं" इतिग्रन्थेन स्वस्वोत्कृष्टस्थितेर्मिथ्यात्वोत्कृष्टस्थित्या ज्ञागे हृते यल्लभ्यते तदेव जघन्यस्थितिपरिमाणमुक्तं। तत्र निद्रापञ्चकस्यासातवेदनीयस्य च प्रत्येकमुत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटाकोटिरिति, तस्या मिथ्यात्वोत्कृष्टस्थित्या ज्ञागे ह्रियमाणे शून्यं शून्येन पातयेदिति वचनाल्लब्धास्त्रयः सागरोपमसप्तज्ञागाः, इयती निद्रापञ्चकासातवेदनीययोर्जघन्या स्थितिः। एवं मिथ्यात्वस्य सप्त सप्तज्ञागाः पूर्णं सागरोपममित्यर्थः। आद्यद्वादशकषायाणां चत्वारः सप्तज्ञागाः। सूक्ष्मत्रिकस्य विकलत्रिकस्य चोत्कृष्टा स्थितिरष्टादशसागरोपमकोटीकोट्यः, तस्या मिथ्यात्वस्थित्या ज्ञागे ह्रियमाणे शून्यं शून्येन पात्यते, ततश्छेद्यच्छेदकराश्योरर्द्धनापवर्त्तनातो लब्धाः सागरोपमस्य नव पञ्चत्रिंशज्ञागाः, इयती सूक्ष्मत्रिकविकलत्रिकयोर्जघन्या स्थितिः ॐ। तथा स्त्रीवेदमनुष्यद्विकयोरुत्कृष्टस्थितिः पञ्चदशसागरोपमकोटाकोटिमाना, तस्या मिथ्यात्वस्थित्या ज्ञागे ह्रियमाणे शून्यं शून्येन पातयित्वा छेद्यच्छेदकरा-

श्योः पञ्चनिरपवर्त्तने लब्धास्त्रयः सागरोपमस्य चतुर्दश नागाः, श्यती स्त्रीवेदमनुष्यद्विकयोर्जघन्या स्थितिः $\frac{3}{14}$। तथा स्थिरशुभसुभगसुस्वरादेयहास्यरतिशुभविहायोगतिशुक्लवर्णसुरभिगंधमधुररसमृदुलघुस्निग्धोष्णस्पर्शाद्यसंस्थानसंहननलक्षणप्रकृतिसप्तदशकस्य दश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, तस्या मिथ्यात्वस्थित्या नागहरणे शून्यस्य शून्येन पातने लब्ध एकः सप्तनागः $\frac{1}{7}$, श्यती स्थिरादीनां जघन्या स्थितिः। द्वितीययोः संस्थानसंहननयोर्द्वादशोदधिकोटिकोट्य उत्कृष्टा स्थितिः, तस्या मिथ्यात्वस्थित्या नागहरणे शून्यं शून्येन पातयित्वा ज्ञेयज्ञेदकराश्योरर्द्धेनापवर्त्तने लब्धाः षट् सागरोपमस्य पञ्चत्रिंशन्नागाः $\frac{6}{35}$। तृतीययोः संस्थानसंहननयोरुत्कृष्टस्थितिश्चतुर्दशोदधिकोटीकोट्यः, तस्या मिथ्यात्वस्थित्या नागहारे शून्यस्य शून्येन पातने ज्ञेयज्ञेदकराश्योश्चतुर्दशकेनापवर्त्तने लब्ध एकः सागरोपमस्य पञ्चनागः, श्यती तयोर्जघन्या स्थितिः $\frac{1}{5}$। चतुर्थयोः संस्थानसंहननयोः षोडशार्णवकोटाकोटीमानोत्कृष्टा स्थितिः, तस्या मिथ्यात्वस्थित्या नागहरणविधौ शून्यं शून्येन पातयित्वा ज्ञेयज्ञेदकराश्योरर्द्धेनापवर्त्तने लब्धाः सागरोपमस्याष्टौ पञ्चत्रिंशन्नागाः $\frac{8}{35}$, श्यती तयोर्जघन्या स्थितिः। पञ्चमसंस्थानसंहननयोरष्टादशाब्धिकोटीकोट्य उत्कृष्टा स्थितिः, तस्यां मिथ्यात्वस्थित्या नाज्यमानायां शून्यस्य शून्येन पातने ज्ञेयज्ञेदकराश्योरर्द्धेनापवर्त्तने लब्धा नव पञ्चत्रिंशन्नागाः $\frac{9}{35}$, श्यती तयोर्जघन्या स्थितिः। शेषाणां त्रसबादरपर्याप्तप्रत्येकागुरुलघुपराघातोपघातोच्छ्वासास्थिराशुभदुर्भगदुःस्वरानादेययशःकीर्त्तितिर्यग्द्विकौदारिकद्विकहारिद्रलोहितनीलकृष्णवर्णदुरभिगन्धकषायाम्लकटुतिक्तरसगुरुकर्कशरूक्षशीतस्पर्शपञ्चेन्द्रियजात्येकेन्द्रियजातिनिर्माणातपोद्योताप्रशस्तविहायोगतिचरमसंस्थानसंहननतैजसकार्मणनीचैर्गोत्रारतिशोकभयजुगुप्सानपुंसकवेदस्थावररूपाणामष्टच-

त्वारिंशत्प्रकृतीनां सागरोपमस्य द्वौ सप्तभागौ $\frac{2}{7}$ जघन्या स्थितिः। यद्यपि हारिद्रलोहितादीनामुत्कृष्टस्थितिः सार्द्धद्वादशाब्धिकोटाकोट्यादिमानेत्यधिकृतभागहारविधिना समधिकषट्सागरोपमपञ्चत्रिंशद्भागादिप्रमाणा जघन्यस्थितिर्लभ्यते, तथापि चिरंतनशास्त्रेषु तेषां द्वौ सप्तभागौ जघन्यस्थितितया दृष्टाविति तावेवोक्तौ। इदं च जघन्यस्थितिपरिमाणं पञ्चसङ्ग्रहोक्तं मतान्तरमिति द्रष्टव्यं। परमेतज्जीवाभिगमाद्यनुपाति दृश्यते। तथा च स्त्रीवेदमधिकृत्य तत्र सूत्रं—"इत्थिवेदस्स णं भंते केवइयं कालं बंधठिई पन्नत्ता? गोयमा जहन्नेणं सागरोवमस्स दिवड्ढो सत्तभागो पलिओवमस्स असंखेज्जइभागेण ऊणओ" इत्यादि ॥ ७९ ॥

अथैकेन्द्रियादीनां जघन्योत्कृष्टस्थितिबन्धप्रतिपादनायाह—

एसेगिंदियमहरो सव्वासिं ऊणसंजुओ जेट्ठो। पणवीसा पन्नासा सयं सहस्सं च गुणकारो ॥ ८० ॥
कमसो विगलासन्नीण पज्जसंखेज्जभागहा इयरो। विरए देसजइदुगे सम्मचउक्के य संखगुणो ॥८१॥

व्याख्या—एषोऽनन्तरमेवोक्तः सर्वासां प्रकृतीनां वैक्रियषट्काहारकतीर्थंकरवर्जितानां स्थितिबन्धो महरो जघन्य एकेन्द्रियाणां द्रष्टव्यः। तथाहि—ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणां सागरोपमस्य त्रीन् सप्तभागान् पल्योपमासङ्ख्येयभागहीनान् जघन्यां स्थितिमेकेन्द्रिया बध्नन्ति, न न्यूनां। एवं मिथ्यात्वस्य सागरोपममेकं पल्योपमासङ्ख्येयभागहीनं, कषायमोहनीयस्य चतुरः सागरोपमस्य सप्तभागान् पल्योपमासङ्ख्येयभागहीनान्, नोकषायाणां वैक्रियषट्काहारकद्विकतीर्थंकरवर्जितानां शेषनामप्रकृतीनां गोत्रप्रकृतिद्वयस्य च द्वौ सप्तभागौ पल्योपमासङ्ख्येयभागहीनाविति। स एव जघन्य-

स्थितिबन्धञ्जनेन पल्योपमासङ्ख्येयभागलक्षणेन संयुतः सन्नुत्कृष्टः स्थितिबन्ध एकेन्द्रियाणां वेदितव्यः । अथ विकलेन्द्रियाणामाह—"पणवीस" इत्यादि, एकेन्द्रियसत्क उत्कृष्टे स्थितिबन्धे पञ्चविंशत्यादिना गुणकारः कार्यः, तथागुणितश्च स क्रमशः क्रमेण विकलानां द्वित्रिचतुरिन्द्रियलक्षणानां विकलेन्द्रियाणामसंज्ञिनामसंज्ञिपञ्चेन्द्रियाणां च ज्येष्ठः स्थितिबन्ध इति प्राक्तनमनुषज्यते । तथाहि—एकेन्द्रियाणामुत्कृष्टस्थितिबन्धः पञ्चविंशत्या गुणितो द्वीन्द्रियाणामुत्कृष्टः, स एवैकेन्द्रियोत्कृष्टः स्थितिबन्धः पञ्चाशता गुणितस्त्रीन्द्रियाणामुत्कृष्टः, शतेन गुणितश्चतुरिन्द्रियाणां, सहस्रेण गुणितोऽसंज्ञिपञ्चेन्द्रियाणामिति । एष एव द्वीन्द्रियादीनामुत्कृष्टः स्थितिबन्धः "पल्यसंखेज्जभागह त्ति" पल्यसङ्ख्येयभागं जहातीति पल्यसङ्ख्येयभागहा पल्योपमसङ्ख्येयभागहीन इत्यर्थः, इतरो जघन्यस्थितिबन्धः । पञ्चसंग्रहे तु या जघन्यस्थितिरेकेन्द्रियाणां सा पल्योपमासङ्ख्येयभागाभ्यधिकीकृता पञ्चविंशत्यादिना च गुणिता द्वीन्द्रियादीनामुत्कृष्टा, यथास्थितैव चैकेन्द्रियजघन्यस्थितिः पञ्चविंशत्यादिना गुणिता द्वीन्द्रियादीनां जघन्येत्युक्तमस्ति । तत्त्वं तु केवलिनो विदन्ति ।

सम्प्रति सर्वेषामपि जघन्योत्कृष्टस्थितिबन्धानामल्पबहुत्वमभिधीयते—तत्र यतेः सूक्ष्मसंपरायस्थस्य जघन्यः स्थितिबन्धः सर्वस्तोकः, आन्तर्मौहूर्त्तिकत्वात् । ततो बादरपर्याप्तस्य जघन्यः स्थितिबन्धोऽसङ्ख्येयगुणः । ततः सूक्ष्मपर्याप्तस्य जघन्यः स्थितिबन्धो विशेषाधिकः । ततोऽप्यपर्याप्तबादरस्य जघन्यस्थितिबन्धो विशेषाधिकः । ततोऽप्यपर्याप्तसूक्ष्मस्य जघन्यः स्थितिबन्धो विशेषाधिकः । ततोऽपि तस्यैवापर्याप्तस्य सूक्ष्मस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽप्यपर्याप्तबादरस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽपि सूक्ष्मपर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽपि बादरपर्याप्तस्यो-

त्कृष्टः स्थितिबन्धो विशेषाधिकः । ततो द्वीन्द्रियपर्याप्तस्य जघन्यः स्थितिबन्धः सङ्ख्येयगुणः । ततस्तस्यैवापर्याप्तस्य जघन्यः स्थितिबन्धो विशेषाधिकः । ततो द्वीन्द्रियापर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततो द्वीन्द्रियापर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततस्त्रीन्द्रियपर्याप्तस्य जघन्यः स्थितिबन्धः सङ्ख्येयगुणः । ततस्त्रीन्द्रियापर्याप्तस्य जघन्यः स्थितिबन्धो विशेषाधिकः । ततस्त्रीन्द्रियापर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽपि पर्याप्तत्रीन्द्रियस्योत्कृष्टस्थितिबन्धो विशेषाधिकः । ततश्चतुरिन्द्रियपर्याप्तस्य जघन्यः स्थितिबन्धः सङ्ख्येयगुणः । ततोऽप्यपर्याप्तचतुरिन्द्रियस्य जघन्यः स्थितिबन्धो विशेषाधिकः । ततोऽप्यपर्याप्तचतुरिन्द्रियस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽपि पर्याप्तचतुरिन्द्रियस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽसंज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य जघन्यः स्थितिबन्धः सङ्ख्येयगुणः । ततोऽपि असंज्ञिपञ्चेन्द्रियस्यापर्याप्तस्य जघन्यः स्थितिबंधो विशेषाधिकः । ततोऽपि तस्यैवापर्याप्तस्योत्कृष्टस्थितिबन्धो विशेषाधिकः । ततोऽपि तस्यैव पर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततः संयतस्योत्कृष्टः स्थितिबन्धः सङ्ख्येयगुणः । "विरए" इत्यादि, विरते संयतेऽग्रिमापेक्षया स्तोकः स्थितिबन्धः । तत्र च जघन्य उत्कृष्टश्चान्तरादिकाभिधानक्रमेणोक्त एव । ततः संयतोत्कृष्टस्थितिबन्धादेशयतिद्विके देशविरतद्विके जघन्योत्कृष्टस्थितिबन्धकलक्षणे तथा सम्यक्त्वचतुष्केऽविरतसम्यग्दृष्टौ पर्याप्तेऽपर्याप्ते च प्रत्येकं जघन्योत्कृष्टस्थितिबन्धके स्थितिबन्धो यथोत्तरं सङ्ख्येयगुणो वक्तव्यः । तथाहि—संयतोत्कृष्टस्थितिबन्धादेशविरतस्य जघन्यः स्थितिबन्धः सङ्ख्येयगुणः । ततस्तस्यैवोत्कृष्टः स्थितिबन्धः सङ्ख्येयगुणः । ततोऽविरतसम्यग्दृष्टेः पर्याप्तस्य जघन्यः स्थितिबन्धः सङ्ख्येयगुणः । ततस्तस्यै-

वापर्याप्तस्य जघन्यः स्थितिबन्धः सङ्ख्येयगुणः । ततस्तस्यैवापर्याप्तस्योत्कृष्टः स्थितिबन्धः सङ्ख्येयगुणः । तत्तस्तस्यैव पर्याप्तस्योत्कृष्टः स्थितिबन्धः सङ्ख्येयगुणः ॥ ८१ ॥

सन्नीपज्जत्तियरे अप्पिंतरउं उ (य) कोमिकोमीए । उंदुक्कस्सो सन्निस्स होइ पज्जत्तगस्सेव ॥ ८२ ॥

॥ ठिइबंधो सम्मत्तो ॥

व्याख्या—पर्याप्ताविरतसम्यग्दृष्टेरुत्कृष्टस्थितिबन्धात्संज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य जघन्यः स्थितिबन्धः सङ्ख्येयगुणः । ततोऽपि तस्यैवापर्याप्तस्य जघन्यः स्थितिबन्धः सङ्ख्येयगुणः । ततोऽपि तस्यैव संज्ञिपञ्चेन्द्रियस्यापर्याप्तस्योत्कृष्टः स्थितिबन्धः सङ्ख्येयगुणः । "अप्पिंतरउं उ कोमिकोमीउं त्ति" संयतस्योत्कृष्टस्थितिबन्धादारभ्य यावदपर्याप्तसंज्ञिपञ्चेन्द्रियस्योत्कृष्टः स्थितिबन्ध एष सर्वोऽपि सागरोपमकोटीकोट्या अभ्यन्तर एव परिज्ञापितव्यः । एकेन्द्रियादीनां तु सर्वजघन्यसर्वोत्कृष्ट-स्थितिबन्धमानं प्रागुक्तमेव । ओघेन सामान्येनोत्कृष्टो यः स्थितिबन्ध उक्तः स संज्ञिपञ्चेन्द्रियस्य पर्याप्तस्यैव परिशिष्यते ८२

तदेवं कृता स्थितिस्थानप्ररूपणा । अथ निषेकप्ररूपणावसरः । तत्र द्वे अनुयोगद्वारे—अनन्तरोपनिधा परम्परोपनिधा च । तत्रानन्तरोपनिधामाश्रित्याह—

मोत्तूण समगबाहं पढमाइ ठिईइ बहुतरं दव्वं । एत्तो विसेसहीणं जावुक्कोसंति सव्वेसिं ॥ ८३ ॥

व्याख्या—सर्वस्मिन्नपि कर्मणि बध्यमाने स्वस्वमबाधाकालं मुक्त्वा तदूर्ध्वं दलिकनिक्षेपं करोति । तत्र प्रथमायां

स्थितौ समयलक्षणायां बहुतरं द्रव्यं कर्मदलिकं निषिञ्चति । इतः प्रथमस्थितेरूर्ध्वं द्वितीयादिस्थितिषु समयसमयप्रमाणासु विशेषहीनं विशेषहीनं कर्मदलिकं निषिञ्चति । एवं च तावद्वाच्यं यावत्तत्तत्समयबध्यमानकर्मणामुत्कृष्टा स्थितिश्चरमसमय इत्यर्थः । एष चाबाधां मुक्त्वा दलिकनिषेकविधिरायुर्वर्जकर्मणां ज्ञेयः । आयुषस्तु प्रथमसमयादारभ्य दलिकरचना प्रवर्त्तते । प्रथमसमय एवायुषः प्रभूतदलिकनिषेकः, द्वितीयादिसमयेषु तु यथोत्तरं विशेषहीनो यावच्चरमसमय इति पञ्चसंग्रहोक्तमिति द्रष्टव्यम् ॥ ८३ ॥

कृताऽनन्तरोपनिधाप्ररूपणा । अथ परम्परोपनिधाप्ररूपणायाह—

पल्लासंखियभागं गंतुं दुगुणूणमेव उक्कस्सा । नाणंतराणि पल्लस्स मूलभागो असंखतमो ॥ ८४ ॥

व्याख्या—अबाधाकालादूर्ध्वं प्रथमस्थितौ यन्निषिक्तं कर्मदलिकं तदपेक्षया द्वितीयादिस्थितिषु समयसमयमानासु विशेषहीनं विशेषहीनं विधीयमानं दलिकं पल्योपमासङ्ख्येयभागं गत्वा तावन्मात्रासु स्थितिष्वतिक्रान्तास्वित्यर्थः । द्विगुणोनं भवत्यर्धं भवतीत्यर्थः । तत ऊर्ध्वं भूयोऽपि विशेषहीनं दलिकमारभ्यमानं पल्योपमासङ्ख्येयभागमात्रासु स्थितिष्वतिक्रान्तास्वर्धं भवति । एवमर्धार्धहान्या तावद्वाच्यं यावदुत्कृष्टा स्थितिः स्थितेश्चरमसमय इत्यर्थः । कियन्ति पुनरेवं द्विगुणहानिस्थानानि भवन्तीत्याह—"नाणंतराणि" इत्यादि, नानाप्रकाराणि यान्यन्तराणि अन्तरा जातानि द्विगुणहानिस्थानानि तान्युत्कृष्टस्थितिबन्धे पल्योपमस्य सम्बन्धिनः प्रथमवर्गमूलस्यासङ्ख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणानि भवन्ति । ननु मिथ्यात्वस्योत्कृष्टस्थितेः सप्ततिसागरोपमकोटाकोटीप्रमाणत्वादेतावत्यो हानय उत्पद्यन्तां, आयुषस्तूत्कृष्ट-

स्थितेस्त्रयस्त्रिंशत्सागरोपमप्रमाणत्वात्कथमेतावत्यो हानयो युज्यन्ते इति चेत्सत्यं, असङ्ख्येयतमो भाग इहासङ्ख्येयत्रेदात्मकोऽसङ्ख्यातस्यासङ्ख्यातत्रेदत्रिन्नत्वात् । ततः पल्योपमप्रथमवर्गमूलस्यासङ्ख्येयतमो भाग आयुष्यतीवाल्पतरो गृह्यत इति न दोषः । तथा सर्वाणि द्विगुणहानिस्थानानि स्तोकानि । एकस्मिन् द्विगुणहान्योरन्तरे निषेकस्थानान्यसङ्ख्येयगुणानि ॥८४॥

कृता निषेकप्ररूपणा । सम्प्रत्यबाधाकण्डकं प्ररूपयन्नाह—

मोत्तूण आउगाइं समए समए अबाहहाणीए । पल्लासंखियभागं कंडं कुण अप्पबहुमेसिं ॥ ८५ ॥

व्याख्या—आयूंषि चत्वार्यपि मुक्त्वा शेषाणां सर्वेषामपि कर्मणामबाधाहानौ समये समये पल्योपमासङ्ख्येयलक्षणं कण्डकं कुरु, उत्कृष्टस्थितेः सकाशाद्धीनमिति शेषः । इदमुक्तं भवति—उत्कृष्टायामबाधायां वर्तमानो जीव उत्कृष्टां स्थितिं बध्नाति परिपूर्णामेकसमयहीनां वा यावत्पल्योपमासङ्ख्येयभागहीनां वा । एकसमयहीनायां तूत्कृष्टाबाधायां नियमात्पल्योपमासङ्ख्येयभागहीनामेवोत्कृष्टां स्थितिं बध्नाति । तामप्येकसमयहीनां वा यावत्पल्योपमासङ्ख्येयभागहीनां वा । द्विसमयहीनायां तूत्कृष्टाबाधायां नियमात्कण्डकद्वयहीनामेवोत्कृष्टां स्थितिं बध्नाति । तामप्येकसमयहीनां वा यावत्पल्योपमासङ्ख्येयभागहीनां वा । एवं यावद्भिः समयैरूनाऽबाधा भवति तावद्भिरेव कण्डकैः स्थितिन्यूनता द्रष्टव्या यावज्जघन्याऽबाधा जघन्या च स्थितिरायाति । तदेवमबाधागतसमयहान्या स्थितेः कण्डकहानिः प्ररूपिता । अथाल्पबहुत्वं प्ररूपयन्नाह—"अप्पबहुमेसिं" एषां वक्ष्यमाणानामल्पबहुत्वं वक्तव्यं ॥ ८५ ॥

के ते इति चेत्तानेवाह—

बंधाबाहाणुक्कस्सियरं कंमगअबाहबंधाणं । ठाणाणि एक्कनाणंतराणि अत्थेण कंमं च ॥ ७६ ॥

॥ अबाहाकंमगं ॥

व्याख्या—बन्धाबाधयोरुत्कृष्टेतरे उत्कृष्टः स्थितिबन्धो जघन्यः स्थितिबन्ध उत्कृष्टाऽबाधा जघन्याऽबाधा चेत्यर्थः । कण्मकस्थानान्यबाधास्थानानि स्थितिबन्धस्थानानि च "एक्कनाणंतराणि त्ति" एकं द्विगुणहान्योरन्तरं नानारूपाणि चान्तराणि द्विगुणहानिस्थानरूपाणि । "अत्थेण कंमं च त्ति" जघन्याऽबाधाहीनयोत्कृष्टाबाधया जघन्यस्थितिहीनाया उत्कृष्टस्थितेर्ज्ञागे हृते सति यावान् ज्ञागो लब्ध्यते तावानर्थेन कण्मकमित्युच्यते । अर्थेन यथोक्तलक्षणेन कण्मकमित्यलुक्समासाश्रयणादित्याम्नायिका व्याचक्षते । चः समुच्चये । पञ्चसङ्ग्रहे पुनरेतस्य स्थानेऽबाधाकण्मकस्थानानीत्युक्तं । तत्र चैवं मूलटीकाव्याख्या—अबाधा च कण्मकानि चाबाधाकण्मकं, समाहारो द्वन्द्वः, तस्य स्थानान्यबाधाकण्मकस्थानानि तयोर्द्वयोरपि स्थानसङ्ख्येत्यर्थः । एतेषां दशानां स्थानानामल्पबहुत्वमुच्यते—तत्र संज्ञिपञ्चेन्द्रियेषु पर्याप्तेष्वपर्याप्तेषु वा बन्धकेष्वायुर्वर्जानां सप्तानां कर्मणां सर्वस्तोका जघन्याबाधा, आन्तर्मौहूर्त्तिकत्वात् । ततोऽबाधास्थानानि कण्मकस्थानानि चासङ्ख्येयगुणानि, परस्परं तु तानि तुल्यानि, यतो जघन्याबाधात उत्कृष्टाबाधा चरमसमयमभिव्याप्य यावन्तः समयास्तावन्त्यबाधास्थानानि भवन्ति । तथाहि—जघन्याबाधा एकमबाधास्थानं, सैव समयाधिका द्वितीयं, द्विसमयाधिका तृतीयं, एवं यावदुत्कृष्टाबाधाचरमसमयस्तावद्वाच्यमिति । एतावन्त्येव च कण्मकस्थानानि उत्कृष्टाबाधायाः समयसमय-

हानौ उत्कृष्टस्थितेः कएऊककएऊकहानेरुक्तत्वात् । तेभ्य उत्कृष्टाबाधा विशेषाधिका, जघन्याबाधाया अपि तत्र प्रवेशात् । ततो दलिकनिषेकविधौ द्विगुणहानिस्थानान्यसङ्ख्येयगुणानि, पल्योपमप्रथमवर्गमूलासङ्ख्येयभागगतसमयप्रमाणत्वात् । तत एकस्मिन् द्विगुणहान्योरन्तरे यानि निषेकस्थितिस्थानानि तान्यसङ्ख्येयगुणानि, तेषामसङ्ख्येयपल्योपमवर्गमूलपरिमाणत्वात् तेभ्योऽर्थेन कएऊकमसङ्ख्येयगुणं । तस्माज्जघन्यः स्थितिबन्धोऽसङ्ख्येयगुणः । संज्ञिपञ्चेन्द्रिया हि श्रेणिमनारूढा जघन्यतोऽपि स्थितिबन्धमन्तःसागरोपमकोटीकोटीप्रमाणमेव कुर्वन्तीति । ततोऽपि स्थितिबन्धस्थानानि सङ्ख्येयगुणानि । तत्र ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामेकोनत्रिंशद्गुणानि समधिकानि । मिथ्यात्वमोहनीयस्यैकोनसप्ततिगुणानि समधिकानि । नामगोत्रयोश्चैकोनविंशतिगुणानि समधिकानि । तेभ्य उत्कृष्टा स्थितिर्विशेषाधिका, जघन्यस्थितेरबाधायाश्च तत्र प्रवेशात् । तथा संज्ञिपञ्चेन्द्रियेष्वसंज्ञिपञ्चेन्द्रियेषु वा पर्याप्तेषु प्रत्येकमायुषो जघन्याबाधा सर्वस्तोका । ततो जघन्यः स्थितिबन्धः सङ्ख्येयगुणः, स च क्षुल्लकभवरूपः, ततोऽबाधास्थानानि सङ्ख्येयगुणानि, जघन्याबाधारहितः पूर्वकोटित्रिभाग इति कृत्वा । ततोऽप्युत्कृष्टाबाधा विशेषाधिका जघन्याबाधाया अपि तत्र प्रवेशात् । ततो द्विगुणहानिस्थानान्यसङ्ख्येयगुणानि, पल्योपमप्रथमवर्गमूलासङ्ख्येयभागगतसमयप्रमाणत्वात् । तेभ्योऽप्येकस्मिन् द्विगुणहान्योरन्तरे निषेकस्थानान्यसङ्ख्येयगुणानि प्रागुक्तयुक्तेः । ततः स्थितिबन्धस्थानान्यसङ्ख्येयगुणानि । तेभ्योऽप्युत्कृष्टः स्थितिबन्धो विशेषाधिकः, जघन्यस्थितेरबाधायाश्च तत्र प्रवेशात् । एतत्संज्ञिपञ्चेन्द्रियेष्वसंज्ञिपञ्चेन्द्रियेषु च पर्याप्तेष्वायुषोऽष्टभेदमल्पबहुत्वं । तथा पञ्चेन्द्रियेषु संज्ञिष्वसंज्ञिष्वपर्याप्तेषु चतुरिन्द्रियत्रीन्द्रियद्वीन्द्रियबादरसूक्ष्मैकेन्द्रियेषु च पर्याप्तापर्याप्तेषु प्रत्येकमायुषः सर्वस्तोका जघन्या-

बाधा १। ततो जघन्यस्थितिबन्धः सङ्ख्येयगुणः २। स च क्षुल्लकभवरूपः। ततोऽबाधास्थानानि सङ्ख्येयगुणानि ३। ततोऽप्युत्कृष्टाबाधा विशेषाधिका ४। ततोऽपि स्थितिबन्धस्थानानि सङ्ख्येयगुणानि, जघन्यस्थितिन्यूनपूर्वकोटिप्रमाणत्वात् ५। तत उत्कृष्टस्थितिबन्धो विशेषाधिकः जघन्यस्थितेरबाधायाश्च तत्र प्रवेशादिति ६। षड्भेदमल्पबहुत्वं। तथाऽसंज्ञिपञ्चेन्द्रियचतुरिन्द्रियत्रीन्द्रियद्वीन्द्रियसूक्ष्मबादरैकेन्द्रियेषु पर्याप्तापर्याप्तेष्वायुर्वर्जानां सप्तानां कर्मणां प्रत्येकमबाधास्थानानि कण्डकानि च स्तोकानि, परस्परं च तुल्यानि, आवलिकाऽसङ्ख्येयभागगतसमयप्रमाणत्वात्। ततो जघन्याबाधाऽसङ्ख्येयगुणा, अन्तर्मुहूर्त्तप्रमाणत्वात्। ततोऽप्युत्कृष्टाबाधा विशेषाधिका, जघन्याबाधाया अपि तत्र प्रवेशात्। ततो द्विगुणहानिस्थानान्यसङ्ख्येयगुणानि। तत एकस्मिन् द्विगुणहान्योरन्तरे निषेकस्थानान्यसङ्ख्येयगुणानि। ततोऽर्थेन कण्डकमसङ्ख्येयगुणं। ततोऽपि स्थितिबन्धस्थानान्यसङ्ख्येयगुणानि, एकेन्द्रियान् शेषजीवाँश्चाश्रित्य यथाक्रमं तेषां पल्योपमासङ्ख्येयसङ्ख्येयभागगतसमयप्रमाणत्वात्। ततोऽपि जघन्यः स्थितिबन्धो विशेषाधिकः। ततोऽप्युत्कृष्टस्थितिबन्धो विशेषाधिकः, एकेन्द्रियाणां पल्योपमासङ्ख्येयभागेन शेषजीवानां पल्योपमसङ्ख्येयभागेनान्यधिकत्वादिति ॥ ७६ ॥

तदेवमुक्तमल्पबहुत्वं। अथ स्थितिबन्धाध्यवसायस्थानप्ररूपणा कर्त्तव्या। तत्र त्रीण्यनुयोगद्वाराणि—स्थितिसमुदाहारः प्रकृतिसमुदाहारो जीवसमुदाहारश्च। समुदाहारः प्रतिपादनं। तत्र स्थितिसमुदाहारेऽपि त्रीण्यनुयोगद्वाराणि—प्रगणनाऽनुकृष्टिस्तीव्रमन्दता च। तत्र प्रगणनाप्ररूपणायाह—

ठिइबंधे ठिइबंधे अज्झवसाणाणसंखिया लोगा। हस्सा विसेसवुड्ढी आऊणमसंखगुणवुड्ढी ॥ ७७ ॥

व्याख्या—परत उत्कृष्टस्थितेश्चरमसमयमभिव्याप्य यावन्तः समयास्तावन्ति स्थितिस्थानानि जघन्यस्थितिसहितानि प्रत्येकं भवन्ति । एकैकस्मिंश्च स्थितिस्थाने बध्यमाने तद्बन्धहेतुभूताः कषायिका अध्यवसाया नानाजीवापेक्षयाऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणा भवन्ति । अत्र च द्वेधा प्ररूपणाऽनन्तरोपनिधया परम्परोपनिधया च । तत्रानन्तरोपनिधया प्ररूपणामाह—"हस्सा विसेसवुड्ढी" आयुर्वर्जानां कर्मणां ह्रस्वाज्जघन्यात्स्थितिबन्धात् परतो द्वितीयादिषु स्थितिबन्धस्थानेषु विशेषवृद्धिर्विशेषाधिका वृद्धिरवसेया । तथाहि—ज्ञानावरणस्य जघन्यस्थितौ तद्बन्धहेतुभूता अध्यवसाया नानाजीवापेक्षयाऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणाः, ते चान्यापेक्षया सर्वस्तोकाः, ततो द्वितीयस्थितौ विशेषाधिकाः, ततोऽपि तृतीयस्थितौ विशेषाधिकाः । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः । एवं सर्वेष्वपि कर्मसु वाच्यं । "आजहण्णमसंखगुणवुड्ढी" आयुषां जघन्यस्थितेरारभ्य प्रतिस्थितिबन्धमसङ्ख्येयगुणवृद्धिर्वक्तव्या । तथाहि—आयुषो जघन्यस्थितौ तद्बन्धहेतुभूता अध्यवसाया असङ्ख्येयलोकाकाशप्रदेशप्रमाणाः, ते चान्यापेक्षया सर्वस्तोकाः । ततो द्वितीयस्थितावसङ्ख्येयगुणाः । ततोऽपि तृतीयस्थितावसङ्ख्येयगुणाः । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः । स्यादेतत् इहैकस्यामपि स्थितौ यद्यध्यवसायस्थानान्यसङ्ख्येयानि परस्परविचित्राण्यभ्युपगम्यते तदा स्थितेरपि वैचित्र्यं प्राप्नोति, मैवं, विचित्राणामपि नानाध्यवसायानामविचित्रैकस्थितिजननशक्तिमत्त्वेनोक्तदोषाभावात् । स्थित्यवैचित्र्येऽध्यवसायवैचित्र्यमेव न स्यादिति चेन्न स्थितिहेतुभूताध्यवसायवैचित्र्ये स्थितिवैचित्र्यस्यानियामकत्वात् देशकालरसविभागवैचित्र्यस्यैव तत्र नियामकत्वात् । अस्तु वाऽध्यवसायवैचित्र्यनिबन्धनादेशादिवैचित्र्यादेकस्याः स्थितेरपि वैचित्र्यं, समयसमयमात्रापगमनेन प्रतिसमयमन्यथात्वप्रतिपत्त्या

वाऽसङ्ख्येयसमयात्मिकाया एकस्या अपि स्थितेर्वैचित्र्यं, एकस्यापि वस्तुनः कथञ्चिद्विचित्राविचित्रत्वान्युपगमे स्याद्वादस्यैव शरणत्वात्। तदिदमुक्तं—"असंखलोगखपएसतुल्लया हीणमब्भिमुक्कोसा। ठिइबन्धज्झवसाया ठिइविसेसा असंखिज्जा ॥ १ ॥" इति कृतं प्रसङ्गेन ॥ ७७ ॥

तदेवं कृताऽनन्तरोपनिधया प्ररूपणाऽथ परंपरोपनिधया तामाह—

पल्लासंखियभागं गंतुं दुगुणाणि जाव उक्कस्सा। नाणंतराणि अंगुलमूलच्छेयणमसंखतमो ॥ ७८ ॥

व्याख्या—आयुर्वर्जानां सप्तानां कर्मणां जघन्यस्थितौ यान्यध्यवसायस्थानानि तेभ्यः पल्योपमासङ्ख्येयभागं गत्वा तावन्मात्राः स्थितीरतिक्रम्य यदनन्तरं स्थितिस्थानमायाति तत्र द्विगुणान्यध्यवसायस्थानानि भवन्ति। तेभ्योऽपि पल्योपमासङ्ख्येयभागमात्रस्थित्यतिक्रमानन्तरभाविनि स्थितिस्थाने द्विगुणान्यध्यवसायस्थानानि भवन्ति। एवमुपर्युपरि द्विगुणवृद्धिस्तावद्वाच्या यावदुत्कृष्टा स्थितिः। एकस्मिन् द्विगुणवृद्ध्योरन्तरे स्थितिस्थानानि पल्योपमवर्गमूलान्यसङ्ख्येयानि, नानान्तराणि द्विगुणवृद्धिस्थानानि अङ्गुलवर्गमूलच्छेदनकासङ्ख्येयतमभागप्रमाणानि। अङ्गुलमात्रक्षेत्रगतप्रदेशराशेर्यत्प्रथमं वर्गमूलं तन्मनुष्यप्रमाणहेतुराशिषण्णवतिच्छेदनकविधिना तावच्छिद्यते यावद्भागं न दत्ते। तेषां च छेदनकानामसङ्ख्येयतमे भागे यावन्ति छेदनकानि तावत्सु यावानाकाशप्रदेशराशिस्तावन्ति नानाद्विगुणस्थानानीत्यर्थः। तदेवं कृता प्रगणना। अथानु-

१ पंचसंग्रहे.

कृष्टिर्वाच्या । सा च नास्ति, ज्ञानावरणादिकर्मणां यानि प्राक्तनस्थितिबन्धेऽध्यवसायस्थानानि तेषामग्रेतनस्थितिबन्धे क्लेशोनाप्यनुवृत्त्यभावात् प्रतिस्थितिबन्धमन्यान्याध्यवसायस्थानामामेव सद्भावात् । अतः परं तीव्रमन्दता वक्तुमवसरप्राप्ता, सा स्थाप्या, अग्रे वक्ष्यमाणत्वात् । तदेवमभिहितः स्थितिसमुदाहारः । सम्प्रति प्रकृतिसमुदाहार उच्यते—तत्र च द्वे अनुयोगद्वारे—प्रमाणानुगमोऽल्पबहुत्वं च । तत्र प्रमाणानुगमः सङ्ख्याप्ररूपणं । तत्र ज्ञानावरणीयस्य सर्वेषु स्थितिबन्धेषु कियन्त्यध्यवसायस्थानानि ? उच्यते—असङ्ख्येयलोकाकाशप्रदेशप्रमाणानि । एवं सर्वेषामपि कर्मणां द्रष्टव्यम् ॥ ८८ ॥

इदानीमल्पबहुत्वमाह—

ठिइदीहयाइ कमसो असंखगुणियाणंतगुणणाए । पढमजहन्नुक्कस्सं बिइय जहन्नाइ आचरमा॥८९॥

व्याख्या—स्थितिदीर्घतया क्रमशः क्रमेणाध्यवसायस्थानान्यसङ्ख्येयगुणानि वक्तव्यानि । तथाहि—सर्वस्तोकान्यायुषः स्थितिबन्धाध्यवसायस्थानानि । तेभ्यो नामगोत्रयोरसङ्ख्येयगुणानि । नन्वायुषः स्थितिस्थानेषु यथोत्तरमसङ्ख्येयगुणवृद्धिः, नामगोत्रयोस्तु विशेषाधिकेति कथमायुरपेक्षया नामगोत्रयोरसङ्ख्येयगुणान्यध्यवसायस्थानानीति चेत्सत्यं, आयुषो जघन्यस्थितौ यावन्त्यध्यवसायस्थानानि तेभ्यो नामगोत्रयोर्जघन्यस्थितावतीव प्रभूतानि नामगोत्रयोः स्थितिस्थानानि । अपि चायुषः स्थितिस्थानापेक्षयाऽतिप्रभूतानीति न कश्चिद्दोषः । नामगोत्रस्थितिबन्धाध्यवसायस्थानेभ्यो ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणां स्थितिबन्धाध्यवसायस्थानान्यसङ्ख्येयगुणानि, पल्योपमासङ्ख्येयभागमात्रस्थित्यतिक्रमे द्विगुणवृद्धिलाभादेकस्यापि पल्योपमस्यान्तेऽसङ्ख्येयगुणत्वसिद्धौ दशसागरोपमकोटीकोट्यन्ते सुतरामसङ्ख्येयगुणत्वसिद्धेः । तेभ्योऽपि

कषायमोहनीयस्थितिबन्धाध्यवसायस्थानान्यसङ्ख्येयगुणानि । तेभ्योऽपि दर्शनमोहनीयस्थितिबन्धाध्यवसायस्थानान्यसङ्ख्येयगुणानि । उक्तः प्रकृतिसमुदाहारः । अथ स्थितिसमुदाहारे या प्राक् तीव्रमन्दता नोक्ता सा कथ्यते—"अणंतगुणाए" इत्यादि, प्रथमायां स्थितौ जघन्यं स्थितिबन्धाध्यवसायस्थानं । ततस्तस्यामेवोत्कृष्टं । ततो द्वितीयस्थितौ जघन्यं । एवमाद्याचरमादुत्कृष्टस्थितौ चरमस्थितिबन्धाध्यवसायस्थानं यावत्क्रमेणानन्तगुणतया वक्तव्यं । तथाहि—ज्ञानावरणीयस्य जघन्यस्थितौ जघन्यं स्थितिबन्धाध्यवसायस्थानं सर्वमन्दानुभावं । ततस्तस्यामेव जघन्यस्थितावुत्कृष्टमध्यवसायस्थानमनन्तगुणं । ततो द्वितीयस्थितौ जघन्यमध्यवसायस्थानमनन्तगुणं । ततस्तस्यामेव द्वितीयस्थितावुत्कृष्टमनन्तगुणं । एवं प्रतिस्थिति जघन्यमुत्कृष्टं चानन्तगुणं तावद्वाच्यं यावदुत्कृष्टायां स्थितौ चरमं स्थितिबन्धाध्यवसायस्थानमनन्तगुणं । तदेवं स्थितिप्रकृतिसमुदाहारौ निरवशेषावुक्तौ ॥ ८९ ॥

अथ जीवसमुदाहारमभिधित्सुराह—

बंधंता धुवपगडी परित्तमाणंग सुहाण तिविहरसं । चउतिगबिट्ठाणगयं विवरीयतिगं च असुभाणं॥९०॥

व्याख्या—ध्रुवप्रकृतीर्ज्ञानावरणीयपञ्चकदर्शनावरणीयनवकमिथ्यात्वषोडशकषायभयजुगुप्सातैजसकार्मणवर्णगन्धरसस्पर्शागुरुलघूपघातनिर्माणान्तरायपञ्चकलक्षणाः सप्तचत्वारिंशद्ध्रुवबन्धिन्यः परावर्त्तमानकशुभप्रकृतीनां सातवेदनीयदेवगतिमनुजगतिपञ्चेन्द्रियजातिवैक्रियाहारकौदारिकशरीराद्यसंस्थानसंहननाङ्गोपाङ्गत्रयमनुजानुपूर्वीदेवानुपूर्वीपराघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतित्रसादिदशकतीर्थंकरनामनरकायुर्वर्जायुस्त्रयोच्चैर्गोत्रलक्षणानां चतुस्त्रिंशत्सङ्ख्यानां चतुःस्थानगतं

त्रिस्थानगतं द्विस्थानगतं चेति त्रिविधं त्रिप्रकारं रसं बध्नन्ति । यदि च ता एव ध्रुवप्रकृतीर्बध्नन्तोऽसातवेदनीयवेदत्रयहास्यरत्यरतिशोकनरकायुर्नरकद्विकतिर्यग्द्विकाद्यजातिचतुष्टयानाद्यसंस्थानसंहननाप्रशस्तविहायोगतिस्थावरादिदशकनीचैर्गोत्ररूपा एकोनचत्वारिंशत्सङ्ख्याः परावर्त्तमाना अशुभप्रकृतीर्बध्नन्ति, तदा तासामनुभागं विपरीतं त्रिकं यस्य स विपरीतत्रिकस्तं बध्नन्ति । इह ध्रुवप्रकृतीनां जघन्यां स्थितिं बध्नन् शुभप्रकृतीनां बन्धप्राप्तानामनुभागं चतुःस्थानगतं बध्नाति । अशुभप्रकृतीनां तु द्विस्थानगतं । अजघन्यां च ध्रुवप्रकृतीनां स्थितिं बध्नन् शुभप्रकृतीनामशुभप्रकृतीनां च यथायोगं बन्धप्राप्तानां त्रिस्थानगतमनुभागं बध्नन्ति । उत्कृष्टानां च ध्रुवप्रकृतीनां स्थितिं बध्नन् शुभप्रकृतीनां द्विस्थानगतं, अशुभप्रकृतीनां च चतुःस्थानगतं रसं बध्नाति । ततः शुभप्रकृतिगतरसत्रैविध्यक्रमापेक्षयाऽशुभप्रकृतिरसत्रैविध्यक्रमवैपरीत्यमुक्तम् ॥ ९० ॥

अथ के शुभप्रकृत्यादीनां चतुःस्थानगतरसादिबन्धका इत्याह—

सव्वविसुद्धा बंधंति मज्झिमा संकिलिट्ठतरगा य । धुवपगडि जहन्नठिइं सव्वविसुद्धा उ बंधंति ॥ ९१ ॥

व्याख्या—ये सर्वविशुद्धा जन्तवस्ते परावर्तमानशुभप्रकृतीनां चतुःस्थानगतरसं बध्नन्ति । ये पुनर्मध्यमपरिणामास्ते त्रिस्थानगतं । संक्लिष्टतरपरिणामास्तु द्विस्थानगतं । एवं च ये तद्योग्यभूमिकानुसारेण सर्वशुद्धाः परावर्तमानाशुभप्रकृतीर्ब-

१ अत्रार्थे मलयगिरिटीकाऽवलोकनीया ।

भन्ति, ते तासां रसं द्विस्थानगतं बध्नन्ति, मध्यमपरिणामास्त्रिस्थानगतं, संक्लिष्टतरपरिणामास्तु चतुःस्थानगतमित्यर्थतः सिद्धं द्रष्टव्यं । ये सर्वविशुद्धाः शुभप्रकृतीनां चतुःस्थानकं रसं बध्नन्ति ते ध्रुवप्रकृतीनां जघन्यां स्थितिं बध्नन्ति ॥ ९१ ॥

तिठाणे अजहण्णं बिठाणे जिठ्ठगं सुहाण कमा । सठाणे उ जहन्नं अजहण्णुक्कोसमियरासिं ॥ ९२ ॥

व्याख्या—तिठाणे इति षष्ठ्यर्थे सप्तमी । परावर्तमानशुभप्रकृतीनां त्रिस्थानगतस्य रसस्य ये बन्धकास्ते ध्रुवप्रकृतीनामजघन्यां मध्यमां स्थितिं बध्नन्ति । "बिठाणे त्ति" शुभप्रकृतीनां द्विस्थानगतरसस्य ये बन्धकास्ते ध्रुवप्रकृतीनां ज्येष्ठामुत्कृष्टां स्थितिं बध्नन्ति । तथा इतरासां परावर्तमानाशुभप्रकृतीनां ये द्विस्थानगतं रसं बध्नन्ति ते ध्रुवप्रकृतीनां जघन्यां स्थितिं स्वस्थाने स्वविशुद्धभूमिकानुसारेणेत्यर्थः, बध्नन्ति । परावर्तमानाशुभप्रकृतिगतद्विस्थानकरसबन्धहेतुविशुद्ध्यनुविधायिनीं जघन्यां स्थितिं बध्नन्ति, न त्वतिजघन्यामित्यर्थः । ध्रुवप्रकृतीनामतिजघन्यस्थितिबन्धस्यैकान्तविशुद्धौ संभवात्, तदानीं च परावर्तमानाशुभप्रकृतीनां बन्धाभावात् । ये च परावर्तमानाशुभप्रकृतीनां त्रिस्थानगतस्य रसस्य बन्धकास्ते ध्रुवप्रकृतीनामजघन्यां स्थितिं बध्नन्ति । तथा ये परावर्तमानाशुभप्रकृतीनां चतुःस्थानगतं रसं बध्नन्ति ते ध्रुवप्रकृतीनां स्थितिमुत्कृष्टां बध्नन्ति ॥ ९२ ॥

इह द्विधा जीवप्ररूपणा—अनन्तरोपनिधया परंपरोपनिधया च । तत्रानन्तरोपनिधया प्ररूपणामाह—

थोवा जहन्निगा(या)ए होंति विसेसाहिगोदहिसयंति । जीवा विसेसहीणा उदहिसयपुहुत्त मो जाव९३

व्याख्या—परावर्तमानशुभप्रकृतीनां चतुःस्थानगतरसबन्धकाः सन्तो ध्रुवप्रकृतीनां जघन्यस्थितौ बन्धकत्वेन वर्तमाना

जीवाः स्तोकाः । द्वितीयस्यां स्थितौ विशेषाधिकाः । ततोऽपि तृतीयस्यां विशेषाधिकाः । एवं तावद्विशेषाधिका वाच्या यावदुदधिशतानि प्रभूतानि सागरोपमशतान्यतिक्रान्तानि भवन्तीत्यर्थः । ततः परं विशेषहीनास्तावद्वाच्या यावत्समय-समयापगमनेन विशेषहानावपि "उदहिसयपुहुत्तं ति" प्रभूतानि सागरोपमशतानि भवन्ति । "मो" इति पादपूरणे । पृथक्त्वशब्दार्थश्चात्र बहुत्वं, "पुहुत्तसद्दो बहुत्तवाइत्ति" चूर्णिकृद्वचनात् ॥ ९३ ॥

एवं तिठाणकरा बिठाणकरा य आ सुभुक्कोसा । असुभाणं बिठाणे तिचउठाणे य उक्कोसा ॥९४॥

व्याख्या—एवमुक्तप्रकारेण द्विस्थानकरास्त्रिस्थानकराश्चाशुभोत्कर्षाच्छुभप्रकृतीनामुत्कृष्टस्थितिं यावद्वाच्याः । तथाहि—परावर्तमानानां शुभप्रकृतीनां त्रिस्थानगतं रसं बध्नन्तः सन्तो ध्रुवप्रकृतीनां स्वप्रायोग्यजघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । द्वितीयस्यां स्थितौ विशेषाधिकाः । ततस्तृतीयस्यां स्थितौ विशेषाधिकाः । एवं तावद्वाच्यं यावत्प्रभूतानि सागरोपमशतान्यतियन्ति । ततः परं विशेषहीना विशेषहीनास्तावद्वाच्या यावद्विशेषहानावपि प्रभूतानि सागरोपमशता-न्यतिक्रामन्ति । तथा परावर्तमानानां शुभप्रकृतीनां द्विस्थानगतं रसं बध्नन्तो ध्रुवप्रकृतीनां स्वप्रायोग्यजघन्यस्थितौ बन्ध-कत्वेन वर्तमाना जीवाः स्तोकाः । द्वितीयस्यां स्थितौ विशेषाधिकाः । ततोऽपि तृतीयस्यां विशेषाधिकाः । एवं तावद्वाच्यं यावत्प्रभूतानि सागरोपमशतान्यतियन्ति । ततः परं विशेषहीना विशेषहीनास्तावद्वाच्या यावद्विशेषहानावपि प्रभूतानि सागरोपमशतानि यान्ति । परावर्तमानशुभप्रकृतीनां द्विस्थानगतरसबन्धकाश्चैवं तावद्वाच्या यावत्तासामुत्कृष्टा स्थितिः यावदुत्कृष्टस्थितिगतद्विस्थानरसबन्धका लभ्यन्त इत्यर्थः । "असुभाणं ति" अशुभपरावर्तमानप्रकृतीनां प्राग्दर्शितदिशा-

ऽऽदौ द्विस्थानगतरसबन्धका वाच्याः । ततस्त्रिस्थानगतरसबन्धकाः । ततश्चतुःस्थानगतरसबन्धकाः । ते च तावद्वाच्या यावदुत्कृष्टा स्थितिः । तथाहि—अशुभपरावर्तमानप्रकृतीनां द्विस्थानरसबन्धकाः सन्तो ध्रुवप्रकृतीनां जघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । ततो द्वितीयस्यां स्थितौ विशेषाधिकाः । ततोऽपि तृतीयस्यां विशेषाधिकाः । एवं तावद्वाच्या यावत्प्रभूतानि सागरोपमशतानि गच्छन्ति । ततः परं विशेषहीना विशेषहीनास्तावद्वाच्या यावद्विशेषहानावपि प्रभूतानि सागरोपमशतानि यान्ति । तथाऽशुभपरावर्तमानप्रकृतीनां त्रिस्थानरसबन्धकाः सन्तो ध्रुवप्रकृतीनां स्वप्रायोग्यजघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । ततो द्वितीयादिस्थितिषु यथोक्तावधि विशेषाधिका विशेषहीनाश्च प्राग्वद्वाच्याः । तथाऽशुभपरावर्तमानप्रकृतीनां चतुःस्थानगतरसबन्धकाः सन्तो ध्रुवप्रकृतीनां स्वप्रायोग्यजघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । ततः प्रभूतानि सागरोपमशतानि यावद्विशेषवृद्धिर्वाच्या । ततः परं विशेषहानिरपि तावदेव वाच्या । अशुभपरावर्तमानप्रकृतीनामेवं चतुःस्थानगतरसबन्धकास्तावद्वाच्या यावत्तासामुत्कृष्टा स्थितिरुत्कृष्टस्थितिगतचतुःस्थानबन्धका इत्यर्थः ॥ ९४ ॥

तदेवं कृताऽनन्तरोपनिधया प्ररूपणा, अथ परम्परोपनिधया तामाह—

पल्लासंखियमूलाणि गंतुं दुगुणा य दुगुणहीणा य। नाणंतराणि पल्लस्स मूलभागो असंखतमो ॥९५॥

व्याख्या—परावर्तमानप्रकृतीनां शुभानां चतुःस्थानकमशुभानां वा द्विस्थानकरसं बध्नन्तो ये ध्रुवप्रकृतीनां जघन्यस्थितिबन्धकत्वेन वर्तन्ते जीवास्तदपेक्षया जघन्यस्थितेः परतः पल्यासङ्ख्येयमूलानि पल्योपमस्यासङ्ख्येयेषु वर्गमूलेषु यावन्तः

समयास्तावत्प्रमाणानि स्थितिस्थानानीत्यर्थः, गत्वाऽतिक्रम्यापरस्मिन् स्थितिस्थाने बन्धकत्वेन वर्तमाना जीवा द्विगुणा भवन्ति । ततः पुनरपि पल्योपमासङ्ख्येयवर्गमूलप्रमाणस्थित्यतिक्रमेऽनन्तरस्थितिस्थाने द्विगुणा भवन्ति । एवं द्विगुणास्तावच्याः यावत्प्रभूतानि सागरोपमशतान्यतिक्रामन्ति । ततः परं पल्योपमासङ्ख्येयवर्गमूलप्रमाणाः स्थितीरतिक्रम्यापरस्मिन् स्थितिस्थाने विशेषवृद्धिगतचरमस्थितौ बन्धकत्वेन वर्तन्ते ये जीवास्तदपेक्षया द्विगुणहीना भवन्त्यर्धा भवन्तीत्यर्थः । ततः पुनरपि तावतीः स्थितीरतिक्रम्यापरस्मिन् स्थितिस्थाने द्विगुणा भवन्ति । एवं तावच्च्यं यावद्द्विगुणहानिवक्तव्यतायामपि प्रभूतानि सागरोपमशतान्यतियन्ति । एवं परावर्तमानप्रकृतीनां शुभानां त्रिस्थानकरसबन्धका द्विस्थानकरसबन्धकाश्च । तथाऽशुभपरावर्तमानप्रकृतीनां द्विस्थानकरसबन्धकास्त्रिस्थानकरसबन्धकाश्चतुःस्थानकरसबन्धकाश्चोपयुज्य वाच्याः । एकस्मिन् द्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा स्थितिस्थानानि पल्योपमस्यासङ्ख्येयेषु वर्गमूलेषु यावन्तः समयास्तावत्प्रमाणानि नानान्तराणि नानारूपद्विगुणवृद्धिद्विगुणहानिलक्षणानि पल्योपमस्य सम्बन्धिनः प्रथमवर्गमूलस्यासङ्ख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणानि भवन्ति । नानाद्विगुणवृद्धिद्विगुणहानिस्थानानि स्तोकानि । तेभ्य एकस्मिन् द्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा स्थितिस्थानान्यसङ्ख्येयगुणानि ॥ ९५ ॥

बन्धविशिष्टेषु रसभेदेषु संज्ञाविशेषमाह—

अणगारप्पाउग्गा बिठाणगया उ दुविहपगईणं । सागारा सव्व वि हेठा थोवाणि जवमझा ॥९६॥
गाणाणि चउठाणे संखेज्जगुणाणि उवरिमेवंति । तिठाणे बिठाणे सुभाणि एगंतमीसाणि ॥ ९७ ॥

उवरिं मिस्साणि जहन्नगो सुन्नाणं तउ विसेसहिउं। होइ सुन्नाण जहन्नो संखेज्जगुणाणि ठाणाणि ९८
बिठाणे जवमप्पा हेठा एगंत मीसगाणुवरिं । एवं तिचउठाणे जवमप्पाउं य कायठिई ॥ ९९ ॥
अंतो कोडाकोडी सुन्नबिठाण जवमप्पउं उवरिं । एगंतगा विसिठा सुन्नजिठा कायठिइजेठा ॥१००॥

व्याख्या—द्विविधानामपि शुभ्राानामशुभ्रानां वा परावर्त्तमानप्रकृतीनां रसा अनाकारप्रायोग्या बन्धमधिकृत्य तथाविधमन्दपरिणामयोग्यत्वादनाकारोपयोगयोग्यताव्यवहारविषया इत्यर्थः, नियमाद्विस्थानगता एव, नान्ये । तुरेवकारार्थः "तुः स्याद्भेदेऽवधारणे" इति नामानुशासनात् । साकारा बन्धमधिकृत्य तीव्रपरिणामयोग्यत्वेन साकारोपयोगयोग्यत्वव्यवहारविषयाः पुनः सर्वत्रापि द्विस्थानादौ प्राप्यन्ते द्विस्थानगतास्त्रिस्थानगताश्चतुःस्थानगताश्च रसा बन्धमाश्रित्य साकारोपयोगयोग्या उच्यन्ते इत्यर्थः । अत्र त्रिस्थानका द्विस्थानकाश्च रसाः केवलसाकाराः, द्विस्थानकास्तूभयरूपा इति संज्ञाभेदः फलितः । इदानीं सर्वस्थितिस्थानानामल्पबहुत्वमाह—"हेठा" इत्यादि, परावर्तमानशुभ्रप्रकृतीनां चतुःस्थानकरसे यद्यवमध्यं तस्मादधः स्थितिस्थानानि सर्वस्तोकानि । तेभ्यश्चतुःस्थानकरसयवमध्यस्यैवोपरि स्थितिस्थानानि सङ्ख्येयगुणानि एवमध उपरि च त्रिस्थानेऽपि वक्तव्यं । तथाहि—चतुःस्थानकरसयवमध्यस्योपरि यानि स्थितिस्थानानि तेभ्यः परावर्तमानशुभ्रप्रकृतीनां त्रिस्थानकयवमध्यादधः स्थितिस्थानानि सङ्ख्येयगुणानि । तेभ्योऽपि त्रिस्थानकरसयवमध्यस्योपरि स्थितिस्थानानि सङ्ख्येयगुणानि । तेभ्योऽपि परावर्तमानशुभ्रप्रकृतीनां द्विस्थानकरसयवमध्यादधः स्थितिस्थानानि एकान्त-

साकारोपयोगयोग्यानि सङ्क्षेयगुणानि । तेभ्योऽपि द्विस्थानकरसयवमध्यादधः पाश्चात्येभ्य ऊर्ध्वं स्थितिस्थानानि मिश्राणि साकारानाकारोपयोगयोग्यानि सङ्क्षेयगुणानि । तेभ्योऽपि द्विस्थानकरसयवमध्यस्योपरि मिश्राणि स्थितिस्थानानि सङ्क्षेयगुणानि । तेभ्योऽपि शुभानां परावर्तमानप्रकृतीनां जघन्यः स्थितिबन्धः सङ्क्षेयगुणः । ततोऽप्यशुभपरावर्तमानप्रकृतीनां जघन्यः स्थितिबन्धो विशेषाधिको भवति । ततोऽप्यशुभपरावर्तमानप्रकृतीनामेव द्विस्थानकरसयवमध्यादधः एकान्तसाकारोपयोगयोग्यानि स्थितिस्थानानि सङ्क्षेयगुणानि । ततस्तासामेव द्विस्थानकरसयवमध्यादधः पाश्चात्येभ्य ऊर्ध्वं मिश्राणि स्थितिस्थानानि सङ्क्षेयगुणानि । तेभ्योऽपि तासामेवाशुभपरावर्तमानप्रकृतीनां द्विस्थानकरसयवमध्यादुपरि मिश्राणि स्थितिस्थानानि सङ्क्षेयगुणानि । तेभ्योऽप्युपरि एकान्तसाकारोपयोगयोग्यानि स्थितिस्थानानि सङ्क्षेयगुणानि । तेभ्योऽपि तासामेव परावर्तमानाशुभप्रकृतीनां त्रिस्थानकरसयवमध्यादधः स्थितिस्थानानि सङ्क्षेयगुणानि । तेभ्योऽपि त्रिस्थानकरसयवमध्यस्योपरि स्थितिस्थानानि सङ्क्षेयगुणानि । तेभ्योऽप्यशुभपरावर्तमानप्रकृतीनामेव चतुःस्थानकरसयवमध्यादधः स्थितिस्थानानि सङ्क्षेयगुणानि । तेभ्योऽपि चतुःस्थानकरसयवमध्यादुपरि कायस्थितिः सङ्क्षेयगुणा । यतः स्थितिस्थानादपवर्तनाकरणेनोत्कृष्टां स्थितिं याति, ततस्तावती स्थितिर्कायस्थितिरित्युच्यते । ततोऽपि सागरोपमाणामन्तःकोटाकोटीसङ्क्षेयगुणा । ततोऽपि परावर्तमानशुभप्रकृतीनां द्विस्थानकरसयवमध्यस्योपरि यानि मिश्राणि स्थितिस्थानानि तेषामुपर्येकान्तसाकारोपयोगयोग्यानि स्थितिस्थानानि सङ्क्षेयगुणानि । तेभ्योऽपि परावर्तमानशुभप्रकृतीनामुत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽप्यशुभपरावर्तमानप्रकृतीनां बद्धा कायस्थितिर्विशेषाधिका । यतः स्थितिस्थानान्मण्डुकप्लुतिन्यायेन

मायां फालां दत्त्वा या स्थितिर्बध्यते ततः प्रभृति तदन्ता तावती स्थितिर्बध्या मायस्थितिरुच्यते । सा चोत्कर्षतोऽन्तः सागरोपमकोटाकोट्यूनसकलकर्मस्थितिप्रमाणा ज्ञातव्या यतोऽन्तःसागरोपमकोटाकोटीप्रमाणं स्थितिबन्धं कृत्वैव पर्याप्तसंज्ञिपञ्चेन्द्रिय उत्कृष्टां स्थितिं बध्नातीत्यन्तःकोटाकोटेरूर्ध्वमेव मयनं भवतीति । ततोऽपि परावर्तमानाशुभप्रकृतीनामुत्कृष्टः स्थितिबन्धो विशेषाधिकः, मायाधस्तनस्थितेरपि तत्र प्रवेशात् ॥ ९६–९७–९८–९९–१०० ॥

सम्प्रत्यस्मिन् विषये जीवानामल्पबहुत्वमाह—

संखेज्जगुणा जीवा कमसो एएसु दुविहपगईणं। असुभाणं तिठाणे सव्वुवरि विसेसउ अहिगा ॥१०१॥

व्याख्या—एतेषु द्वित्रिचतुःस्थानकरसेषु द्विविधप्रकृतीनां वर्तमानाः क्रमशः क्रमेण शुभानां पश्चानुपूर्व्याऽशुभानां चा दौ पूर्वानुपूर्व्येत्यर्थः । जीवाः सङ्ख्येयगुणा वाच्याः । नवरमशुभानां त्रिस्थानं सर्वोपरि वाच्यं । तत्र च जीवा विशेषाधिका वाच्याः । तथाहि—सर्वस्तोकाः परावर्तमानशुभप्रकृतीनां चतुःस्थानकरसबन्धका जीवाः । तेभ्यस्त्रिस्थानकरसबन्धकाः सङ्ख्येयगुणाः । तेभ्योऽपि द्विस्थानकरसबन्धकाः सङ्ख्येयगुणाः । तेभ्योऽपि परावर्तमानाशुभप्रकृतीनां द्विस्थानकरसबन्धकाः सङ्ख्येयगुणाः । तेभ्योऽपि चतुःस्थानकरसबन्धकाः सङ्ख्येयगुणाः । तेभ्योऽपि त्रिस्थानकरसबन्धका विशेषाधिकाः । तदेवं कृता सप्रसङ्गं स्थितिबन्धनिरूपणा । साद्यादिप्ररूपणां चात्रेत्थं कुर्वन्ति—इहायुर्वर्जानां सप्तानां मूलप्रकृतीनामजघन्यः स्थितिबन्धश्चतुर्धा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—मोहनीयवर्जानां षण्णां मूलप्रकृतीनां जघन्यः स्थितिबन्धः क्षपकस्य सूक्ष्मसंपरायस्य स्वगुणस्थानचरमसमये प्राप्यते । स च तदानीमेव भवतीति सादिः । द्वितीयसमये बन्ध-

व्यवच्छेदादपगच्छतीत्यध्रुवः । एतादृशाज्जघन्यस्थितिबन्धादन्यः सर्वोऽप्यजघन्यः । स चोपशान्तमोहे न भवति, ततः प्रतिपाते च भूयोऽपि भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवावभव्यभव्यापेक्षया । मोहनीयस्य जघन्यः स्थितिबन्धः क्षपकस्यानिवृत्तिबादरसंपरायस्य चरमसमये, स चैकसामयिक इति साद्यध्रुवः, ततोऽन्यः सर्वोऽप्यजघन्यः, स चोपशमश्रेण्यां सूक्ष्मसंपराये न भवति, ततः प्रतिपाते च भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ प्राग्वत् । वेदनीयस्य चात्र सांपरायिकस्थितिबन्धापेक्षया सादित्वं भाव्यं, अन्यथा द्विसामयिकस्थितिबन्धस्तस्योपशान्तमोहादावपि प्राप्यत इति । जघन्योत्कृष्टानुत्कृष्टाश्च स्थितिबन्धाः सप्तानामपि साद्यध्रुवाः । तत्र जघन्यः साद्यध्रुवतया प्रागेव भावितः । उत्कृष्टश्चासौ सर्वसंक्लिष्टे संज्ञिमिथ्यादृष्टौ कियत्कालं प्राप्यते, तदनन्तरमनुत्कृष्टः, भूयोऽपि कालान्तर उत्कृष्ट इति भावप्येतौ पर्यायलभ्यत्वात्साद्यध्रुवौ । आयुषि जघन्यादयश्चत्वारोऽपि साद्यध्रुवाः प्रतिपत्तव्याः, आयुर्बन्धस्य प्रतिनियतकालभावित्वात् । उत्तरप्रकृतिषु ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयसंज्वलनचतुष्टयरूपाणामष्टादशप्रकृतीनामजघन्या स्थितिः साद्यादितया चतुर्विधा । तथाहि—ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयानां जघन्यस्थितिबन्धः क्षपकस्य सूक्ष्मसंपरायस्य स्वगुणस्थानचरमसमये वर्तमानस्य, संज्वलनचतुष्टयस्य क्षपकस्यानिवृत्तिबादरसंपरायस्य स्वस्वबन्धव्यवच्छेदसमये, स चैकसामयिक इति साद्यध्रुवः, ततोऽन्यः सर्वोऽप्यजघन्यः, स चोपशान्तमोहे न भवति, ततः प्रतिपाते च भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ प्राग्वत् । एतासामेव जघन्योत्कृष्टानुत्कृष्टाः स्थितयः साद्यध्रुवाः । तत्र जघन्याऽनन्तरमेव भाविता, उत्कृष्टानुत्कृष्टा च संज्ञिमिथ्यादृष्टौ पर्यायेण लभ्यते, सर्वसंक्लिष्टे उत्कृष्टा,

तस्मिन्नेव मध्यमपरिणामे चानुत्कृष्टेति द्वे अपि साद्यध्रुवे । उक्ताष्टादशशेषाणां प्रकृतीनां सर्वा अपि जघन्याजघन्योत्कृष्टानुत्कृष्टाः स्थितयः साद्यध्रुवाः । तथाहि—निद्रापञ्चकमिथ्यात्वाद्यद्वादशकषायभयजुगुप्सातैजसकार्मणवर्णादिचतुष्टयागुरुलघूपघातनिर्माणरूपाणामेकोनत्रिंशत्प्रकृतीनां जघन्यः स्थितिबन्धः सर्वविशुद्धे बादरैकेन्द्रिये पर्याप्तेऽन्तर्मुहूर्त्तं यावद्बन्ध्यते । तदनन्तरं तस्मिन्नेवाध्यवसायपरावृत्तेर्मन्दपरिणामेऽजघन्यः । पुनरपि कालान्तरे तस्मिन्नन्यस्मिन् वा नवे प्रतिपन्नविशुद्धौ जघन्य इति साद्यध्रुवावेतौ । उत्कृष्टः सर्वसंक्लिष्टे संज्ञिमिथ्यादृष्टावनुत्कृष्टश्च मध्यमपरिणामे तस्मिन्निति तावपि पर्यायलब्ध्यत्वात्साद्यध्रुवौ । शेषाणामध्रुवबन्धिनीनां चाध्रुवबन्धित्वादेव चत्वारोऽपि विकल्पाः साद्यध्रुवा ज्ञेयाः । स्वामित्वचिन्तायां तीर्थकरनाम्नो मनुष्यो नरकबद्धायुष्को नरकं जिगमिषुर्मिथ्यात्वप्रतिपत्तिप्राक्समये उत्कृष्टस्थितिबन्धकः, उत्कृष्टस्थितेरुत्कृष्टसंक्लेशेनैव बन्धात्, तद्बन्धकेषु चास्यैवातिसंक्लिष्टत्वात् । आहारकद्विकस्याप्रमत्तयतिः प्रमत्ताभिमुखस्तथा । अमरायुषः प्रमत्तः संयतः पूर्वकोट्यायुरप्रमत्तभावाभिमुखः स्वायुःशेषतृतीयभागाद्यसमये वर्त्तमानस्तथा । पूर्वकोटित्रिभागस्य द्वितीयादिसमयेषु बध्नतो नोत्कृष्टमायुर्बध्यतेऽबाधायाः परिगलितत्वेन मध्यमत्वप्राप्तेरित्याद्यसमयग्रहणं । शुभ्रेयं स्थितिर्विशुद्ध्या बध्यत इति अप्रमत्तभावाभिमुखत्वग्रहणं । शेषाणां षोडशोत्तरशतसङ्ख्यप्रकृतीनां मिथ्यादृष्टिः सर्वपर्याप्तिपर्याप्तः सर्वसंक्लिष्ट उत्कृष्टस्थितिबन्धस्वामी । अत्र सर्वसंक्लिष्टत्वं प्रायोवृत्त्योच्यते, यावता तिर्यङ्मनुष्यायुषी उत्कृष्टे तत्प्रायोग्यविशुद्धो बध्नातीति द्रष्टव्यं, तयोः शुभस्थितिकत्वेन विशुद्धिजन्यत्वात् । ननु यदि विशुद्ध्येदमायुर्द्वयं बध्यते तदा मिथ्यादृष्टेः सास्वादनो विशुद्धतर इति स कस्मादेतदुत्कृष्टस्थितिबन्धकत्वेन नोच्यते ? न च वाच्यं तिर्यङ्मनुष्यायुषी

सास्वादनो न बध्नात्येवेति तिर्यगायुषो बन्धो, मनुष्यायुष उदयः, तिर्यङ्मनुष्यायुषी सती । एष विकल्पो मिथ्यादृष्टेः सास्वादनस्य वा । मनुष्यायुषो बन्धो, मनुष्यायुष उदयः, मनुष्यमनुष्यायुषी सती । एषोऽपि विकल्पो मिथ्यादृष्टेः सास्वादनस्य वेति सप्ततिकाटीकायामभिधानात् इति चेदत्र प्रतिविधीयते—सत्यामपि सामान्यतो मनुष्यतिर्यगायुर्बन्धानुज्ञायामसङ्क्षेयवर्षायुष्कयोग्यमुत्कृष्टं प्रस्तुतायुर्बध्यं सास्वादनो न बध्नाति, तस्य गुणप्रतिपातान्निमुखत्वेन गुणान्निमुखविशुद्धमिथ्यादृष्टेः सकाशाद्विशुद्ध्याधिक्यासिद्धेः । अत्र च विशेषचिन्तायां विकलत्रिकसूक्ष्मत्रिकदेवायुर्वर्जायुस्त्रिकसुरद्विकवैक्रियद्विकनरकद्विकलक्षणानां पञ्चदशप्रकृतीनामुत्कृष्टस्थितिं तिर्यङ्मनुष्या एव मिथ्यादृष्टयः प्रतिनियतसमये बध्नन्ति । देवनारका ह्येतास्तिर्यङ्मनुष्यायुर्वर्जा भवप्रत्ययादेव न बध्नन्ति । तिर्यङ्मनुष्यायुषी अपि त्रिपल्योपमलक्षणे उत्कृष्टे ते न बध्नन्ति । तस्मात्तिर्यङ्मनुष्यायुषोरुत्कृष्टस्थितिबन्धकास्तिर्यङ्मनुष्या एव पूर्वकोट्यायुषस्तत्प्रायोग्यविशुद्धा द्रष्टव्याः । सम्यग्दृष्टेरतिविशुद्धमिथ्यादृष्टेश्च देवायुर्बन्ध एव स्यादिति मिथ्यादृष्टित्वतत्प्रायोग्यविशुद्धविशेषणद्वयं । नारकायुषः पुनरेत एव तत्प्रायोग्यसंक्लिष्टा वाच्याः, अत्यन्तशुद्धस्यात्यन्तसंक्लिष्टस्य चायुर्बन्धस्य सर्वथा निषेधात् । नरकद्विकवैक्रियद्विकयोश्चैत एव सर्वसंक्लिष्टा उत्कृष्टस्थितिबन्धकाः । विकलजातित्रिकसूक्ष्मत्रिकयोस्तु तत्प्रायोग्यसंक्लिष्टा द्रष्टव्याः । अतिसंक्लिष्टा ह्येतत्प्रकृतिबन्धमुल्लङ्घ्य नरकप्रायोग्यमेव बध्नीयुः । विशुद्धास्तु विशुद्धितारतम्यात्पञ्चेन्द्रियतिर्यक्प्रायोग्यं वा मनुष्यप्रायोग्यं वा देवप्रायोग्यं वा बध्नीयुरिति तत्प्रायोग्यसंक्लेशग्रहणं । देवद्विकस्यापि तत्प्रायोग्यसंक्लिष्टा द्रष्टव्याः, अतिसंक्लिष्टानामधोवर्तिमनुष्यादिप्रायोग्यबन्धसंभवात् । विशुद्धौ पुनरुत्कृष्टबन्धाभावादिति । स्थावरैकेन्द्रियजात्यातपानामीशानान्ता

देवा उत्कृष्टस्थितिबन्धकाः । ततः परे देवा नैकेन्द्रियप्रायोग्यबन्धका इति तन्निषेधः । तिर्यङ्मनुष्यास्त्वेतावति संक्लेशे वर्तमाना एतद्बन्धमतिक्रम्य नरकप्रायोग्यमेव बध्नन्तीति तेषामपि निषेधः । तिर्यग्द्विकौदारिकद्विकोद्योतसेवार्त्तसंहननानां सुरनारका उत्कृष्टस्थितिबन्धकाः । मनुष्यतिर्यञ्चो ह्येतद्बन्धार्हसंक्लेशे वर्तमाना एतासां षट्प्रकृतीनामुत्कृष्टतोऽप्यष्टादशकोटाकोटिलक्षणां मध्यमां स्थितिं बध्नन्ति, न तु विंशतिकोटाकोटीलक्षणामुत्कृष्टां अधिकसंक्लेशे वर्तमानास्तु नरकयोग्यमेव बध्नीयुरिति तद्व्युदासः । देवनारकास्त्वतिसंक्लिष्टा अपि तिर्यग्गतिप्रायोग्यमेव बध्नन्तीति तेषां ग्रहणं । अत्र च सामान्योक्तावपि सेवार्त्तसंहननौदारिकोपाङ्गयोरुत्कृष्टस्थितिबन्धकाः सनत्कुमारादिदेवा द्रष्टव्याः, नेशानान्ताः । ते हि तत्प्रायोग्यसंक्लेशे वर्तमानाः प्रकृतप्रकृत्योरुत्कृष्टतोऽप्यष्टादशकोटाकोटीलक्षणां मध्यमामेव स्थितिं बध्नन्ति । सर्वोत्कृष्टसंक्लेशाश्चैकेन्द्रियप्रायोग्यमेव बध्नन्ति । न चैते प्रकृती एकेन्द्रियप्रायोग्यान्तर्भूते इति । उक्ताष्टाविंशतिप्रकृतिभ्यः शेषाणां द्विनवतिसङ्ख्यप्रकृतीनां मिथ्यादृष्टयश्चतुर्गतिका अप्युत्कृष्टस्थितिबन्धकाः । तत्र वर्णचतुष्कतैजसकार्मणागुरुलघुनिर्माणोपघातभयजुगुप्सामिथ्यात्वकषायषोडशकज्ञानावरणपञ्चकदर्शनावरणनवकान्तरायपञ्चकलक्षणानां सप्तचत्वारिंशतो ध्रुवबन्धिनीनामध्रुवबन्धिनीनामपि मध्येऽसातारतिशोकनपुंसकवेदपञ्चेन्द्रियजातिहुंडसंस्थानपराघातोच्छ्वासाशुभविहायोगतित्रसचतुष्कास्थिरषट्कनीचैर्गोत्रलक्षणानां विंशतेः प्रकृतीनां सर्वोत्कृष्टसंक्लेशेनोत्कृष्टां स्थितिं चतुर्गतिका अपि मिथ्यादृष्टयो बध्नन्ति । शेषाणां त्वध्रुवबन्धिनीनां सातरतिहास्यस्त्रीपुंवेदमनुष्यद्विकप्रथमसंस्थानसंहननपञ्चकप्रशस्तविहायोगतिस्थिरषट्कोच्चैर्गोत्रलक्षणानां पञ्चविंशतिप्रकृतीनां तद्बन्धकेषु तत्प्रायोग्यसंक्लिष्टा उत्कृष्टस्थितिबन्धका इति ज्ञेयं ।

आहारकद्विकजिननाम्नोरपूर्वकरणरूपकस्तद्बन्धस्य चरमस्थितिबन्धे वर्तमानो जघन्यस्थितिबन्धकः, तद्बन्धकेषु अस्यैवातिविशुद्धत्वात्, तिर्यङ्मनुष्यदेवायुर्वर्जकर्मणां च जघन्यस्थितेर्विशुद्धिप्रत्ययत्वात् । संज्वलनचतुष्टयपुरुषवेदानामनिवृत्तिबादररूपकस्तद्बन्धस्य यथास्वं चरमस्थितिबन्धे वर्तमानो जघन्यस्थितिबन्धकः, तद्बन्धकेष्वस्यैवातिविशुद्धत्वात् । ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकसातवेदनीययशःकीर्त्युच्चैर्गोत्राणां सूक्ष्मसंपरायरूपकश्चरमस्थितिबन्धे वर्तमानो जघन्यस्थितिबन्धकः, तद्बन्धकेष्वस्यैवातिविशुद्धत्वात् । वैक्रियषट्कस्यासंज्ञी तिर्यक्पञ्चेन्द्रियः सर्वपर्याप्तिपर्याप्तस्तथा, तस्यैव सागरोपमसहस्रद्वयप्रमाणाया एतज्जघन्यस्थितेर्बन्धकत्वात् । एता हि प्रकृतयो नरकदेवलोकप्रायोग्याः, तत्र च देवनारकासंज्ञिमनुष्यैकेन्द्रियविकलेन्द्रिया नारकेषु देवलोकेषु (च) नोत्पद्यन्त एवेति तेषामेतद्बन्धासंभवः । तिर्यङ्मनुष्यास्तु स्वभावादेव प्रकृतप्रकृतिषट्कस्थितिं मध्यमामुत्कृष्टां वा कुर्वन्तीति तेऽपीहोपेक्षिताः । आयुषश्चतुर्विधस्यापि संज्ञ्यसंज्ञी च जघन्यस्थितिबन्धस्वामी । तत्र देवनारकायुषोः पञ्चेन्द्रियतिर्यङ्मनुष्या मनुष्यतिर्यगायुषोः पुनरेकेन्द्रियादयो जघन्यस्थितिबन्धस्वामिनो द्रष्टव्याः । उक्तशेषाणां पञ्चाशीतिप्रकृतीनां बादरपर्याप्तस्तद्बन्धकेषु सर्वविशुद्ध एकेन्द्रियो जघन्यां स्थितिं करोति । अन्ये ह्येकेन्द्रियास्तथाविधविशुद्ध्यभावाद्बृहत्तरां स्थितिं निर्वर्तयन्ति । विकलेन्द्रियपञ्चेन्द्रियेषु शुद्धिरधिकाऽपि लभ्यते, केवलं तेऽपि स्वभावादेव प्रस्तुतप्रकृतीनां महतीं स्थितिमुपकल्पयन्तीति शेषव्युदासेन यथोक्तैकेन्द्रियस्यैव ग्रहणमिति ॥ १०१ ॥

एवं बंधणकरणे परूविए सह हि बंधसयगेणं । बंधविहाणाऽभिगमो सुहमभिगंतुं लहुं होइ ॥१०२॥

॥ बंधकरणं समत्तं ॥

व्याख्या—एवममुना प्रकारेण बन्धनकरणे बन्धशतकेन शतकाख्येन ग्रन्थेन सह प्ररूपिते सति । अनया च वचनभङ्ग्या शतककर्मप्रकृत्योरेककर्तृकता समुच्चयेनोभयग्रन्थार्थज्ञानस्यावश्योपयोगित्वं चावेदितं भवति । बन्धविधानस्य पूर्वगतस्याभिगमोऽवबोधः सुखमधिगन्तुं सुखेन प्राप्तुं, इष्यमाणस्येति शेषः, लघु शीघ्रं भवति ॥ १०१ ॥

विवृतं बन्धनकरणं कर्मप्रकृतौ गभीरभावायाम् । श्रीनयविजयबुधानां कृपयैव यशोविजयसुधिया ॥ १ ॥

उक्तं बन्धनकरणं । अथोद्देशक्रमेण सङ्क्रमकरणं वक्तुमवसरप्राप्तं । सङ्क्रमश्च प्रकृतिस्थित्यनुभागप्रदेशविषयभेदाच्चतुर्धा । तत्र प्रथमतः सङ्क्रमसामान्यलक्षणमाह—

सो संकमो त्ति वुच्चइ जंबंधणपरिणओ पउगेण । पगयंतरत्थदलियं परिणमयइ तयणुभावे जं ॥ १ ॥

व्याख्या—इह जीवो यद्बन्धनपरिणतो यस्याः प्रकृतेर्बन्धकत्वेन परिणतः । अनेनेदं सूच्यते—यदुत जीवकर्मणोस्तथा तथा बध्यबन्धकभावे परस्परं सव्यपेक्षत्वमिति । उक्तं च—"जीवपरिणामहेऊ कम्मत्ता पोग्गला परिणमंति । पोग्गलकम्मणिमित्तं जीवो वि तहेव परिणमइ ॥ १ ॥" इति बध्यमाने कर्मणि जीवस्य तथाविधाध्यवसायद्वारा प्राग्बद्धकर्मणश्च तथाविधविपाकोदयद्वारा मिथः सहकारित्वमित्यस्या निर्गलितोऽर्थः । प्रयोगेण संक्लेशाख्येन विशोध्याख्येन वा

वीर्यविशेषेण प्रकृत्यन्तरं प्रकृतबध्यमानप्रकृतिभिन्ना प्रकृतिः तत्रस्थं(दलिकं) । तदनुभावे, सप्तम्यास्तृतीयार्थत्वाद्बध्यमानप्रकृतिस्वभावेन यत्परिणमयति स सङ्क्रम उच्यते, बध्यमानासु प्रकृतिषु मध्येऽबध्यमानप्रकृतिदलिकं प्रक्षिप्य बध्यमानप्रकृतिरूपतया तस्य परिणमनं यद् यच्च बध्यमानानामेव भिन्नप्रकृतीनां दलिकस्येतरेतररूपतया परिणमनं तत्सर्वं सङ्क्रम इति भावः । तत्र बध्यमानप्रकृतिष्वबध्यमानप्रकृतीनां सङ्क्रमो यथा—सातवेदनीये बध्यमानेऽसातवेदनीयस्य, उच्चैर्गोत्रे वा नीचैर्गोत्रस्येत्यादि । बध्यमानानां परस्परं सङ्क्रमो यथा—बध्यमाने मतिज्ञानावरणीये बध्यमानस्यैव श्रुतज्ञानावरणस्य, श्रुतज्ञानावरणे वा बध्यमाने बध्यमानस्यैव मतिज्ञानावरणस्य सङ्क्रम इत्यादि ॥ १ ॥

एतच्च बन्धगर्भितं सङ्क्रमलक्षणं दर्शनत्रिकव्यतिरेकेण द्रष्टव्यमित्यभिप्रायवानाह—

सुद्धसु वेगे दिट्ठिदुगं बंधेण विणा वि सुद्धदिट्ठिस्स । परिणमयइ जीसे तं पगईइ पडिग्गहो एसा ॥२॥

व्याख्या—शुद्धदृष्टेः सम्यग्दृष्टेर्द्वयोः सम्यक्त्वसम्यग्मिथ्यात्वयोराधारभूतयोर्मिथ्यात्वमेकस्मिंश्च सम्यक्त्वे सम्यग्मिथ्यात्वं बन्धं विनापि सङ्क्रामति । इह हि मिथ्यात्वस्यैव बन्धः, न सम्यक्त्वसम्यग्मिथ्यात्वयोः, यतो मिथ्यात्वपुञ्जा एवौपशमिकसम्यक्त्वानुगतेन विशोधिस्थानेन त्रिधा क्रियन्ते—शुद्धा अर्धविशुद्धा अविशुद्धाश्च । तत्र विशुद्धाः सम्यक्त्वं, अर्धविशुद्धाः सम्यग्मिथ्यात्वं, अविशुद्धाश्च मिथ्यात्वमिति । ततो विशुद्धसम्यग्दृष्टिः सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रहणरूपबन्धाभावेऽपि मिथ्यात्वं सङ्क्रमयति । सम्यग्मिथ्यात्वं च सम्यक्त्वे । एतदतिरिक्तस्थल एव बन्धः पतद्ग्राहकतावच्छेदक इत्यर्थः । उक्तं सङ्क्रमसामान्यलक्षणं । अथ यासु प्रकृतिषु प्रकृत्यन्तरस्थं दलिकं सङ्क्रमयति तासां संज्ञाविशेषमाह—

"परिणमयइ" इत्यादि, यस्यां प्रकृतावाधारभूतायां तत्प्रकृत्यन्तरस्थं दलिकं परिणमयति आधाररूपप्रकृतिरूपतामापादयति एषा प्रकृतिराधारभूता सङ्क्रम्यमाणप्रकृत्याधारत्वात् पतद्ग्रह इव पतद्ग्रह उच्यते ॥ २ ॥

अथ लक्षणद्वारा सामान्यतः प्रतिपाद्यमानः सङ्क्रमोऽतिप्रसक्त इति तत्रापवादमाह—

मोहदुगाउगमूलपगईणं न परोप्परम्मि संकमणं । संकमबंधुदउव्वट्टणालिगाईणऽकरणाइं ॥ ३ ॥

व्याख्या—मोहद्विकस्य दर्शनमोहनीयचारित्रमोहनीयलक्षणस्य तथाऽऽयुषां चतुर्णामपि मूलप्रकृतीनां च ज्ञानावरणीयदर्शनावरणीयादिलक्षणानां परस्परं सङ्क्रमो न भवति । इदमुपलक्षणं, तेन यस्मिन् दर्शनमोहनीये यो जन्तुरवतिष्ठते स तदन्यत्र न सङ्क्रमयति । यथा मिथ्यादृष्टिर्मिथ्यात्वं, सम्यग्मिथ्यादृष्टिः सम्यग्मिथ्यात्वं, सम्यग्दृष्टिः सम्यक्त्वं, तथा सासादनाः सम्यग्मिथ्यादृष्टयश्च न किमपि दर्शनमोहनीयं क्वापि सङ्क्रामयन्ति, अविशुद्धदृष्टित्वात्, बन्धाभावे च दर्शनमोहनीयसङ्क्रमस्य विशुद्धदृष्टेरेवागमोक्तत्वात् । तथा मिश्रे सम्यक्त्वं न सङ्क्रमयतीत्यपि द्रष्टव्यं । उक्तं च—"नियनियदिट्ठि न केइ दुइयं तइया न दंसणतिगं पि । मीसम्मि न सम्मत्तं ति" । अन्यच्च परप्रकृतिषु सङ्क्रान्तं दलिकमावलिकामात्रं कालं यावदुद्वर्तनादिसकलकरणायोग्यमवगन्तव्यं, न केवलं सङ्क्रान्तं, अपि तु बन्धाद्यावलिकागतमपि तथेत्याह—संकमे इत्यादि, सङ्क्रमावलिकागतं बन्धावलिकागतमुदयावलिकागतमुद्वर्तनावलिकागतं, आदिशब्दादुपशान्तं च मोहनीयं दर्शनमोहनीयत्रयवर्जितमित्येतानि सर्वाण्यप्यकरणानि सकलकरणायोग्यान्यवसेयानि । दर्शनत्रिकं तूपशान्तमपि सङ्क्रमयतीति द्रष्टव्यम् ॥ ३ ॥

तदेवमुक्तोऽनतिप्रसक्तः सङ्क्रमविधिः । अथ क्रमोत्क्रमाविशेषेण सङ्क्रमे प्राप्ते नियममाह—

अंतरकरणम्मि कए चरित्तमोहे णुपुव्विसंकमणं । अन्नत्थ सेसियाणं च सव्वहिं सव्वहा बंधे ॥ ४ ॥

व्याख्या—अन्तरकरणविधिरग्रे वक्ष्यते । तत्रोपशमश्रेण्यां चारित्रमोहनीयोपशमनायैकविंशतेः प्रकृतीनां, क्षपकश्रेण्यां तु कषायाष्टकक्षपणानन्तरं त्रयोदशप्रकृतीनामन्तरकरणे कृते सति चारित्रमोहे पुरुषवेदसंज्वलनचतुष्टयलक्षणे । अत्र शेषाणां बन्धाभावाच्चारित्रमोहशब्देनैता एव पञ्च प्रकृतयो गृह्यन्ते । तत्रानुपूर्व्या परिपाट्या सङ्क्रमणं भवति, न त्वनानुपूर्व्या । तथाहि—पुरुषवेदं संज्वलनक्रोधादावेव सङ्क्रमयति, नान्यत्र । संज्वलनक्रोधमपि संज्वलनमानादावेव, न तु पुरुषवेदे । संज्वलनमानमपि संज्वलनमायादावेव, न तु संज्वलनक्रोधादौ । संज्वलनमायामपि संज्वलनलोभ एव, न तु सज्वलनमानादौ । संज्वलनलोभस्त्वसङ्क्रान्त एव तिष्ठति । "अन्नत्थ त्ति" अन्तरकरणादन्यत्र पञ्चानामपि पुरुषवेदादिप्रकृतीनां । शेषाणां पुनः प्रकृतीनां "सव्वहिं ति" सर्वस्मिन्नप्यवस्थाविशेषेऽन्तरकरणावस्थायामन्यत्र वेत्यर्थः । सर्वथा सर्वैः प्रकारैः क्रमेणोत्क्रमेण वा सङ्क्रमोऽवगन्तव्यः । किं सर्वदैव ? नेत्याह—बन्धे बन्धकाले, न त्वन्यदा, बन्धाभावे बन्धगर्भितसङ्क्रमलक्षणस्यैवाभावादित्यर्थः ॥ ४ ॥

तदेवं सङ्क्रमसामान्यलक्षणविध्यपवादनियमा उक्ताः । अथ यदुक्तं यस्याः प्रकृतेर्बन्धः सा प्रकृत्यन्तरदलिकसङ्क्रमं प्रति पतद्ग्रह इति, तत्र सामान्यातिप्रसक्तावपवादमाह—

तिसु आवलियासु समऊणियासु अपडिग्गहा उ संजलणा।
दुसु आवलियासु पढमठिईइ सेसासु वि य वेउं ॥ ५ ॥

व्याख्या—अन्तरकरणे कृते प्रथमस्थितौ तिसृष्वावलिकासु समयोनासु सतीषु चत्वारोऽपि संज्वलना अपतद्ग्रहाः, अन्तरकरणे कृते प्रथमस्थितौ समयोनावलिकात्रिकशेषायां सत्यां बध्यमानेष्वपि संज्वलनेषु प्रकृत्यन्तरदलिकं न सङ्क्रामति, तेन ते तदानीं पतद्ग्रहा न भवन्तीत्यर्थः । तथान्तरकरणे कृते सति द्वयोरावलिकयोः प्रथमस्थितिसत्कयोः सत्योर्वेदः पुरुषवेदः पतद्ग्रहो न भवति, न किमपि तत्र प्रकृत्यन्तरदलिकं सङ्क्रामतीत्यर्थः । स्त्रीनपुंसकवेदयोस्तदानीं बन्धाभावादेवापतद्ग्रहत्वसिद्धेर्वेदशब्देनेह पुंवेद एव गृह्यते । अपि च मिथ्यात्वे क्षपिते सति सम्यग्मिथ्यात्वस्य पतद्ग्रहता न भवति । मिश्रे हि मिथ्यात्वदलिकमेव सङ्क्रामति, नान्यत् , तच्च मिथ्यात्वं क्षीणं, ततः सङ्क्रम्यमाणदलिकाभावात्तत्रापतद्ग्रहत्वसिद्धिरिति । तथा मिथ्यात्वसम्यग्मिथ्यात्वयोः क्षपितयोः सम्यक्त्वस्य न पतद्ग्रहता, सम्यक्त्वे मिथ्यात्वसम्यग्मिथ्यात्वयोरेव सङ्क्रमसंभवात् , तदुभयक्षये सङ्क्रम्यमाणप्रकृत्यसंभवेन पतद्ग्रहत्वायोगात् । तथा सम्यक्त्वसम्यग्मिथ्यात्वयोरुद्वलितयोर्मिथ्यात्वस्य न पतद्ग्रहता । मिथ्यात्वे हि सम्यक्त्वं सम्यग्मिथ्यात्वं वा सङ्क्रामति, न चारित्रमोहनीयमपि, दर्शनमोहनीयचारित्रमोहनीययोः परस्परं सङ्क्रमप्रतिषेधात् । सम्यक्त्वसम्यग्मिथ्यात्वे चोद्वलिते इति सङ्क्रमाभावादपतद्ग्रहतेत्येतत्सर्वमनुक्तमपि पञ्चसङ्ग्रहाद्द्रष्टव्यम् ॥ ५ ॥

सम्प्रति साद्यनादिप्ररूपणामाह—

साई अणाई धुव अधुवा य सव्वधुवसंतकम्माणं । साई अ अधुवसेसा मिच्छावेयणीयनीएहिं ॥ ६ ॥

व्याख्या—सम्यक्त्वसम्यग्मिथ्यात्वनरकद्विकमनुजद्विकदेवद्विकवैक्रियसप्तकाहारकसप्तकतीर्थकरोच्चैर्गोत्रलक्षणाश्चतुर्विंशतिप्रकृतयोऽध्रुवसत्ताका आयुश्चतुष्टयं च । शेषं पुनस्त्रिंशदुत्तरं प्रकृतिशतं ध्रुवसत्कर्म । ततोऽपि सातासातवेदनीयनीचैर्गोत्रमिथ्यात्वरूपं प्रकृतिचतुष्टयमपसार्यते, ततोऽवशिष्टाः सर्वा ध्रुवसत्कर्मप्रकृतयः षड्विंशत्युत्तरशतसङ्ख्याः सङ्क्रममधिकृत्य साद्यादिरूपतया चतुर्विधा अपि भवन्ति । तथाहि—अमूषां ध्रुवसत्कर्मप्रकृतीनां सङ्क्रमविषयप्रकृतिबन्धव्यवच्छेदे सति सङ्क्रमो न भवति, ततः पुनरपि तासां सङ्क्रमविषयप्रकृतीनां स्वबन्धहेतुसंपर्कतो बन्धारम्भे सति भवति, ततोऽसौ सादिः । तत्तद्बन्धव्यवच्छेदस्थानमप्राप्तस्य पुनरनादिः । अभव्यस्य ध्रुवः, कदाचिदपि व्यवच्छेदाभावात् । भव्यस्य पुनरध्रुवः, कालान्तरे व्यवच्छेदसंभवात् । शेषाश्चतुर्विंशतिरध्रुवसत्कर्मप्रकृतयः मिथ्यात्ववेदनीयनीचैर्गोत्रैः सह सङ्क्रममाश्रित्य साद्यध्रुवा अवगन्तव्याः । तथाहि—अध्रुवसत्कर्मणामध्रुवसत्कर्मत्वादेव सङ्क्रमः साद्यध्रुवोऽवगन्तव्यः । सातासातवेदनीयनीचैर्गोत्राणां तु परावर्तमानत्वात् । तथाहि—साते बध्यमानेऽसातस्य सङ्क्रमः, असाते च बध्यमाने सातस्य, नान्यदा । तथोच्चैर्गोत्रे बध्यमाने नीचैर्गोत्रस्य सङ्क्रमः, नीचैर्गोत्रे च बध्यमाने उच्चैर्गोत्रस्य । तत एषां सङ्क्रमः सादिरध्रुवश्चेति । मिथ्यात्वस्य सङ्क्रमो विशुद्धसम्यग्दृष्टेर्भवति । विशुद्धसम्यग्दृष्टित्वं च कादाचित्कं, ततस्तस्य सङ्क्रमः साद्यध्रुव एवेति । स्यादेतत्, कासां प्रकृतीनां किं सङ्क्रमपर्यवसानस्थानं येन तत ऊर्ध्वमभवन् प्रतिपाते च पुनरपि भवन् सङ्क्रमः सुज्ञानः स्यात् ?

उच्यते—सातवेदनीयस्य सङ्क्रमका मिथ्यादृष्ट्यादयः प्रमत्तपर्यवसाना ज्ञेयाः, न परे, परतो ह्यसातवेदनीयं न बध्यते, किं तु सातवेदनीयमेव । ततोऽसातस्यैव साते बध्यमाने सङ्क्रमो ऽवति, न सातस्येति । अनन्तानुबन्धिनां मिथ्यादृष्ट्यादयोऽप्रमत्तसंयतपर्यवसानाः सङ्क्रमकाः, न परे, परतस्तेषामुपशान्तत्वेन क्षीणत्वेन वा सङ्क्रमस्याऽभावात् । यशःकीर्तेर्मिथ्यादृष्ट्यादयोऽपूर्वकरणान्ताः सङ्क्रमका ऽवन्ति, न परे, परतस्तस्याः केवलाया एव बन्धेन पतद्ग्रहत्वस्यैवाऽभावात् । अनन्तानुबन्धिवर्जषोडशकषायनोकषायाणां मिथ्यादृष्ट्यादयोऽनिवृत्तिबादरसंपरायपर्यवसानाः सङ्क्रमकाः, परतस्तेषामुपशान्तत्वेन क्षीणत्वेन वा सङ्क्रमाऽभावात् । मिथ्यात्वसम्यग्मिथ्यात्वयोरविरतसम्यग्दृष्ट्यादय उपशान्तमोहपर्यवसानाः सङ्क्रमकाः, न परे, परतस्तयोः सत्ताया एवाऽभावात् । सासादनाः सम्यग्मिथ्यादृष्टयश्च न किमपि दर्शनमोहनीयं क्वापि सङ्क्रमयन्ति । मिथ्यादृष्टिस्तु मिथ्यात्वं स्वाधारभूतं स्वभावादेव न सङ्क्रमयतीत्यविरतसम्यग्दृष्ट्यादय इत्युक्तं । सम्यग्मिथ्यात्वस्य पुनर्मिथ्यादृष्टिरपि सङ्क्रमको ऽवति । तथा सम्यक्त्वस्य मिथ्यादृष्टिरेव सङ्क्रमकः, नान्यः। यतः सम्यक्त्वं मिथ्यात्वे वर्तमानः सङ्क्रमयति, न सासादने मिश्रे वा । मिथ्यात्वे च वर्तमानो मिथ्यादृष्टिरेव । तथोच्चैर्गोत्रस्य मिथ्यादृष्टिसासादना एव सङ्क्रमकाः, नान्ये, अन्येषां नीचैर्गोत्राबन्धकत्वात्, नीचैर्गोत्रबन्धकाल एव च तत्सङ्क्रमाभ्युपगमात् । उक्तशेषाणां च मतिज्ञानावरणीयादिप्रकृतीनां सूक्ष्मसंपरायपर्यवसाना मिथ्यादृष्ट्यादयः सङ्क्रमकाः, न परे, परतो बन्धाभावेन पतद्ग्रहप्रकृत्यभावात् ॥६॥

तदेवं कृता सङ्क्रममधिकृत्य साद्यादिप्ररूपणा । अथ पतद्ग्रहत्वमधिकृत्य तां चिकीर्षुराह—

मिच्छत्तजढा य पडिग्गहम्मि सव्वधुवबंधपगईउ । णेया चउव्वियप्पा साई अधुवा य सेसाउ ॥ ७ ॥

व्याख्या—पतद्ग्रहे पतद्ग्रहविषये "मिच्छत्तजढा य त्ति" मिथ्यात्वरहिताः सर्वा अपि ध्रुवबन्धिन्यः प्रकृतयो ज्ञानावरणपञ्चकदर्शनावरणनवकषोडशकषायभयजुगुप्सातैजससप्तकवर्णादिविंशतिनिर्माणागुरुलघूपघातान्तरायपञ्चकलक्षणाः सप्तषष्टिश्चतुर्विकल्पाः साद्यनादिध्रुवाध्रुवरूपचतुर्भेदा ज्ञेयाः । तथाहि—एतासां ध्रुवबन्धिनीनां स्वस्वबन्धव्यवच्छेदे सति पतद्ग्रहत्वं न भवति, न किमपि प्रकृत्यन्तरदलिकं तत्र सङ्क्रामतीत्यर्थः । पुनः स्वबन्धहेतुसाम्राज्याद्बन्धारम्भे पतद्ग्रहत्वं भवतीति तत्सादि । तत्तद्बन्धव्यवच्छेदस्थानमप्राप्तस्य पुनरनादि । ध्रुवाध्रुवत्वे अभव्याभव्यापेक्षया भावनीये । शेषास्त्वध्रुवबन्धिन्योऽष्टाशीतिसङ्ख्याः प्रकृतयोऽध्रुवबन्धित्वादेव पतद्ग्रहत्वमधिकृत्य साद्यध्रुवा भावनीयाः । मिथ्यात्वस्य पुनर्ध्रुवबन्धित्वेऽपि यस्य सम्यक्त्वसम्यक्त्वमिथ्यात्वे विद्येते स एव ते तत्र सङ्क्रमयति नान्य इति तस्य साद्यध्रुवपतद्ग्रहता द्रष्टव्या ॥७॥

तदेवमेकैकप्रकृतीनां सङ्क्रमपतद्ग्रहत्वयोः साद्यनादिप्ररूपणा कृता । अथ प्रकृतिस्थानेषु तामतिदिशन्नाह—

पगईठाणे वि तहा पडिग्गहो संकमो य बोद्धव्वो। पढमंतिमपगडीणं पंचसु पंचएह दो वि भवे॥८॥

व्याख्या—यथा एकैकस्याः प्रकृतेः पतद्ग्रहः सङ्क्रमश्च साद्यादिरूपतयोक्तस्तथा प्रकृतिस्थानेष्वपि बोद्धव्यः । द्वित्रादीनां प्रकृतीनां समुदायः प्रकृतिस्थानं । तत्रैकैकां प्रकृतिं बुद्ध्या गृहीत्वा प्रकृतिसङ्क्रमपतद्ग्रहौ यथोच्येते तथा समुदायविवक्षायां प्रकृतिस्थानसङ्क्रमपतद्ग्रहावपि वाच्याविति नातिविशेष इति भावः । वस्तुस्थित्या तु यदैका प्रकृतिरेकस्यां प्रकृतौ सङ्क्रामति यथा सातमसातेऽसातं वा साते तदा प्रकृतिसङ्क्रमः, यस्यां तु संक्रामति सा प्रकृतिपतद्ग्रहः १ । यदा प्रभूताः प्रकृतय एकस्यां सङ्क्रामन्ति यथा यशःकीर्त्तावेकस्यां शेषनामप्रकृतयः तदा प्रकृतिस्थानसङ्क्रमः प्रकृतिपतद्ग्रहः २ । यदा तु

प्रऋतासु प्रकृतिष्वेका सङ्क्रामति यथा मिथ्यात्वं सम्यक्त्वसम्यग्मिथ्यात्वयोस्तदा प्रकृतिस्थानपतद्ग्रहः प्रकृतिसङ्क्रमः ३ । यदा तु प्रऋतासु प्रऋताः सङ्क्रामन्ति तदा प्रकृतिस्थानसङ्क्रमः प्रकृतिस्थानपतद्ग्रह इति ऽष्टव्यं ४ । इत्थं च प्रकृतिस्थानसङ्क्रमपतद्ग्रहयोः साद्यादिप्ररूपणामतिदेशेनैव कृत्वा प्रतिकर्म सङ्क्रमपतद्ग्रहविषयस्थानसङ्ख्या निरुरूपयिषुराह—पढमंतिमेत्यादि, प्रथमप्रकृतेर्ज्ञानावरणीयस्यान्तिमप्रकृतेरन्तरायस्य सम्बन्धिनीनां प्रत्येकं पञ्चानामपि प्रकृतीनां पञ्चस्वपि प्रकृतिषु ऽावपि सङ्क्रमपतद्ग्रहऽावौ ऽवतः । इदमुक्तं ऽवति—ज्ञानावरणान्तराययोरेकमेव पञ्चप्रकृत्यात्मकं सत्तास्थानं सङ्क्रमस्थानं चैकमेव च पञ्चप्रकृत्यात्मकं बन्धस्थानं पतद्ग्रहस्थानं चेति । इमौ च सङ्क्रमपतद्ग्रहऽावौ साद्यादिरूपतया चतुःप्रकारौ । तथाहि—ऽपशान्तमोहगुणस्थाने तयोरऽावात्ततः प्रतिपाते च पुनः संऽावात्सादी । तत्स्थानमप्राप्तस्य पुनरनादी । ध्रुवाध्रुवावऽाव्यऽाव्यापेक्षयेति ॥ ८ ॥

णवगन्तक्कचउक्के णवगं छक्कं च चउसु बिइयम्मि। अन्नयरिस्से अन्नयरा विय वेयणीयगोएसु ॥ ९ ॥

व्याख्या—द्वितीये दर्शनावरणीये नवकषट्कचतुष्केषु नवकं सङ्क्रामति षट्कं च चतसृषु प्रकृतिषु। तथा च दर्शनावरणे नवकषट्कचतुष्कलक्षणानि त्रीण्येव सत्तास्थानानि त्रीण्येव बन्धस्थानानि पतद्ग्रहस्थानानि च, द्वे च सङ्क्रमस्थाने नवकं षट्कं चेति फलितं । तत्र नवकरूपे पतद्ग्रहे मिथ्यादृष्टयः सासादनाश्च नवविधदर्शनावरणीयबन्धका नवकमपि सङ्क्रमयन्ति । अयं च नवकरूपः पतद्ग्रहः साद्यादिरूपतया चतुःप्रकारः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—सम्यग्मिथ्यादृष्ट्यादिगुणस्थानेषु न ऽावति, ततः प्रतिपाते च ऽावति, ततोऽसौ सादिः । अत्यक्तमिथ्यात्वस्यानादिः । ध्रुवाध्रुवावऽाव्यऽाव्या-

पेक्षया । तथा सम्यग्मिथ्यादृष्टिगुणस्थानकादारभ्यापूर्वकरणस्य सङ्ख्येयतमं भागं यावन्नवविधदर्शनावरणीयसत्कर्माणः षड्विधदर्शनावरणीयबन्धकाः षट्कं नवकं सङ्क्रमयन्ति । अयं षट्करूपपतद्ग्रहः कादाचित्कत्वात्साद्यध्रुवः । तथाऽपूर्वकरणस्य सङ्ख्येयतमे भागे निद्राप्रचलयोर्बन्धव्यवच्छेदे तत ऊर्ध्वं सूक्ष्मसंपरायचरमसमयं यावदुपशमश्रेण्यां नवविधदर्शनावरणीयसत्कर्माणश्चतुर्विधदर्शनावरणीयबन्धकाश्चतुष्कं नवकं सङ्क्रमयन्ति । अयमपि चतुष्करूपः पतद्ग्रहः साद्यध्रुवः कादाचित्कत्वात् । एतत्पतद्ग्रहत्रिकप्रतियोगी नवकरूपः सङ्क्रमः साद्यादिभेदेन चतुर्विधः सूक्ष्मसंपरायात्परत उपशान्तमोहे न भवति, ततः प्रतिपाते च भवतीति सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । क्षपकश्रेण्यां पुनरनिवृत्तिकरणाद्भायाः सङ्ख्येयतमे भागेऽवशिष्टे सति स्त्यानर्द्धित्रिकक्षयात्परतः सूक्ष्मसंपरायचरमसमयं यावत् षड्विधदर्शनावरणीयसत्कर्माणश्चक्षुरादिदर्शनावरणीयचतुष्टयं बध्नन्तस्तस्मिन् दर्शनावरणचतुष्के षट्कं सङ्क्रमयन्ति । इमावपि सङ्क्रमपतद्ग्रहौ कादाचित्कत्वात्साद्यध्रुवौ । अतः परं तु न सङ्क्रमो नापि पतद्ग्रहत्वं बन्धाभावात् । अत एव चतुष्करूपं तृतीयमपि सङ्क्रमस्थानं न लभ्यते । वेदनीये गोत्रे चान्यतरस्यां प्रकृतौ बध्यमानायामन्यतराऽबध्यमाना प्रकृतिः सङ्क्रामति । तेन या यत्र सङ्क्रामति सा तस्याः पतद्ग्रहः, इतरा च सङ्क्रमस्थानं । तत्र मिथ्यादृष्ट्यादिसूक्ष्मसंपरायान्तानां सातबन्धकानां सातासातसत्कर्मणां सातवेदनीयं पतद्ग्रहः, असातं संक्रमस्थानं । असातबन्धकानां तु मिथ्यादृष्ट्यादीनां प्रमत्तान्तानां सातासातसत्कर्मणामसातवेदनीयं पतद्ग्रहः, सातवेदनीयं तु सङ्क्रमस्थानं । इमौ च सातासातरूपौ सङ्क्रमपतद्ग्रहौ परावर्तमानत्वात्साद्यध्रुवौ । तथा मिथ्यादृष्ट्यादीनां सूक्ष्मसंपरायान्तानामुच्चैर्गोत्रबन्धकानामुच्चनीचैर्गोत्रसत्कर्मणामुच्चैर्गोत्रं पत-

ह्रहः, नीचैर्गोत्रं सङ्क्रमस्थानं । नीचैर्गोत्रबन्धकानां तु मिथ्यादृष्टिसासादनानामुच्चनीचैर्गोत्रसत्कर्मणां नीचैर्गोत्रं पतद्ग्रहः, उच्चैर्गोत्रं तु सङ्क्रमस्थानं । एतावप्युच्चनीचैर्गोत्ररूपौ सङ्क्रमपतद्ग्रहौ परावर्तमानत्वादेव साद्यध्रुवौ ॥ ए ॥

अट्ठचउरहिगवीसं सत्तरसं सोलसं च पन्नरसं । वज्जिय संकमठाणाइ होंति तेवीसइं मोहे ॥ १० ॥

व्याख्या—मोहनीये पञ्चदश सत्तास्थानानि—अष्टाविंशतिः सप्तविंशतिः षड्विंशतिः चतुर्विंशतिः त्रयोविंशतिः द्वाविंशतिः एकविंशतिः त्रयोदश द्वादश एकादश पञ्च चतस्रः तिस्रः द्वे एका चेति । तत्राष्टाविंशतिश्चतुर्विंशतिश्च सत्तास्थानेऽन्निहिताऽपि सङ्क्रमे न प्राप्यते, ततः सत्तास्थानमध्ये तद्द्वयं सप्तदशषोडशपञ्चदशस्थानानि च वर्जयित्वैकद्वित्रिचतुःपञ्चषट्सप्ताष्टनवदशकैकादशद्वादशत्रयोदशचतुर्दशाष्टादशैकोनविंशतिविंशत्येकविंशतिद्वाविंशतित्रयोविंशतिपञ्चविंशतिषड्विंशतिसप्तविंशतिलक्षणानि त्रयोविंशतिसङ्ख्यानि सङ्क्रमस्थानानि भवन्ति । तथाहि—अष्टाविंशतिसत्कर्मणो मिथ्यादृष्टेर्मिथ्यात्वं सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति मिथ्यात्वव्यतिरिक्ताः शेषाः सप्तविंशतिः सङ्क्रामन्ति । तत्र चारित्रमोहनीयं पञ्चविंशतिप्रकृत्यात्मकं परस्परं सङ्क्रामति । सम्यक्त्वसम्यग्मिथ्यात्वे च मिथ्यात्वे । तथा सम्यक्त्वे उद्वलिते सप्तविंशतिसत्कर्मणो मिथ्यादृष्टेर्मिथ्यात्वं विना षड्विंशतिः सङ्क्रामन्ति । मिथ्यात्वं सम्यग्मिथ्यात्वस्य पतद्ग्रह इति तत्त्यज्यते । सम्यग्मिथ्यात्वेऽप्युद्वलिते षड्विंशतिसत्कर्मणः पञ्चविंशतिः । अथवाऽनादिमिथ्यादृष्टेः षड्विंशतिसत्कर्मणः पञ्चविंशतिः, मिथ्यात्वस्य स्थानाभावेन सङ्क्रमाभावात् । अथवौपशमिकसम्यग्दृष्टेरष्टाविंशतिसत्कर्मणः सम्यक्त्वलाभादावलिकाया ऊर्ध्वं वर्तमानस्य सम्यक्त्वं मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रहः, तेन सम्यक्त्वे पतद्ग्रहीभूतत्वेन त्यक्ते शेषा सप्तविंशतिः

सङ्क्रमे प्राप्यते । तस्यैव चौपशमिकसम्यग्दृष्टेरष्टाविंशतिसत्कर्मण आवलिकाया अभ्यन्तरे वर्तमानस्य सम्यग्मिथ्यात्वं सम्यक्त्वे न सङ्क्रामति, यतो मिथ्यात्वपुञ्जका एव सम्यक्त्वानुगतविशोधिप्रभावेण सम्यग्मिथ्यात्वलक्षणं परिणामान्तरमापादिताः, न च परिणामविशेषोऽत्र संक्रमः, अन्यप्रकृतिरूपतया परिणामान्तरापादनस्यैव सङ्क्रमलक्षणत्वात् । सङ्क्रमावलिकागतं च सकलकरणायोग्यमिति सम्यक्त्वलाभादावलिकाया अभ्यन्तरे वर्तमानेन सम्यग्मिथ्यात्वं सम्यक्त्वे न सङ्क्रम्यते, किं तु केवलं मिथ्यात्वमेव । ततः सम्यग्मिथ्यात्वेऽप्यपसारिते षड्विंशतिः सङ्क्रामति । चतुर्विंशतिस्तु सङ्क्रमे न प्राप्यते, चतुर्विंशतिसत्कर्मणः सम्यग्दृष्टेर्मिथ्यात्वं गतस्य तत्प्रत्ययेन भूयोऽप्यनन्तानुबन्धिनां बन्धेन लब्धसत्ताकानामपि बन्धावलिकागतस्य सकलकरणायोग्यत्वेन सङ्क्रमाभावात् । मिथ्यात्वस्य च सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रहत्वेनापसारणे त्रयोविंशतेरेव सङ्क्रमः परिशेषात् । अथवा चतुर्विंशतिसत्कर्मणः सम्यग्दृष्टेः सम्यक्त्वं मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रहइति तदपसारणे शेषास्त्रयोविंशतिः सङ्क्रामन्ति । तस्यैव मिथ्यात्वे क्षपिते द्वाविंशतिः । अथवोपशमश्रेणीस्थस्यौपशमिकसम्यग्दृष्टेश्चारित्रमोहनीयस्यान्तरकरणे कृते पुंवेदसंज्वलनचतुष्टययोरानुपूर्व्या सङ्क्रमाभिधानादनन्तानुबन्धिचतुष्टयस्य च विसंयोजितत्वादुपशान्तत्वाद्वा सङ्क्रमाभावात् सम्यक्त्वस्य च मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रहत्वेन त्यागात्संज्वलनलोभानन्तानुबन्धिचतुष्टयसम्यक्त्वेष्वष्टाविंशतेरपनीतेषु द्वाविंशतिः सङ्क्रामति । तस्यैव नपुंसकवेदे ऽपशान्ते एकविंशतिः, द्वाविंशतिसत्कर्मणो वा सम्यक्त्वं स्थानाभावान्न क्वापि सङ्क्रामतीत्येकविंशतिः, यद्वा क्षपकश्रेण्यां वर्तमानस्य क्षपकस्य यावदष्टानां कषायाणां न क्षयस्तावदेकविंशतिः सङ्क्रमे प्राप्यते । औपशमिकसम्यग्दृष्टेः प्रागुक्ताया एकविंशतेर्मध्यात्

स्त्रीवेदे उपशान्ते शेषा विंशतिः सङ्क्रामति, यदा क्षायिकसम्यग्दृष्टेरुपशमश्रेणीं प्रतिपन्नस्य चारित्रमोहनीयस्यान्तरकरणे कृते संज्वलनलोभस्योक्तयुक्त्या सङ्क्रमाभावादेव विंशतिः सङ्क्रमे लभ्यते। ततो नपुंसकवेदे उपशान्ते एकोनविंशतिः। स्त्रीवेदे चोपशान्तेऽष्टादश। औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्ताया विंशतेः षट्सु नोकषायेषूपशान्तेषु शेषाश्चतुर्दश सङ्क्रामन्ति। ततः पुरुषवेदे उपशान्ते त्रयोदश, यदा क्षपकश्रेणीस्थस्य क्षपकस्य सम्बन्धिन्या एकविंशतेः कषायाष्टकक्षये त्रयोदश। तस्यैव क्षपकस्य चारित्रमोहनीयस्यान्तरकरणे कृते संज्वलनलोभस्य सङ्क्रमाभावात् द्वादश, अथवा क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्तान्योऽष्टादशभ्यो नोकषायषट्के उपशान्ते द्वादश सङ्क्रामन्ति। ततः पुरुषवेदे उपशान्ते एकादश, क्षपकस्य वा प्रागुक्तान्यो द्वादशभ्यो नपुंसकवेदे क्षीणेऽवशिष्टा एकादश सङ्क्रामन्ति, यदौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां प्रागुक्तान्यस्त्रयोदशभ्योऽप्रत्याख्यानप्रत्याख्यानावरणक्रोधद्विके उपशान्ते एकादश सङ्क्रामन्ति। क्षपकश्रेण्यामेकादशभ्यः स्त्रीवेदे क्षीणे शेषा दश सङ्क्रामन्ति, औपशमिकसम्यग्दृष्टेर्वा उपशमश्रेण्यां वर्तमानस्यैकादशभ्यः संज्वलनक्रोधे उपशान्ते, शेषा दश सङ्क्रामन्ति। क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्तान्य एकादशभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणक्रोधद्वये उपशान्ते नव सङ्क्रामन्ति। तस्यैव संज्वलने क्रोधेऽप्युपशान्तेऽष्टौ, यदौपशमिकसम्यग्दृष्टेरुपशमश्रेणीस्थस्य प्रागुक्तान्यो दशभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणमानद्वये उपशान्तेऽष्टौ सङ्क्रामन्ति। तस्यैव संज्वलनमाने उपशान्ते सप्त। क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्तान्योऽष्टभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणमानद्वये उपशान्ते षट्। तस्यैव संज्वलनमाने उपशान्ते पञ्च, यदौपशमिकसम्यग्दृष्टेरुपशमश्रेणी-

स्थस्य प्रागुक्तान्यः सप्तप्रकृतिभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणमायाद्विके उपशान्ते पञ्च । तस्यैव संज्वलनमायायामुपशान्तायां चतस्रः, यदा क्षायिकसम्यग्दृष्टेः क्षपकस्य प्रागुक्तान्यो दशभ्यो नोकषायषट्कक्षये शेषाश्चतस्रः प्रकृतयः सङ्क्रामन्ति । तस्यैव पुरुषवेदे क्षीणे तिस्रः, अथवा क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्तान्यः पञ्चभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणमायाद्विके उपशान्ते शेषास्तिस्रः सङ्क्रामन्ति । तस्यैव संज्वलनमायायामुपशान्तायां द्वे, अथवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्तान्यश्चतसृभ्यः प्रकृतिभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणलोभद्विके उपशान्ते शेषे द्वे प्रकृती सङ्क्रामतः, यदा क्षायिकसम्यग्दृष्टेः क्षपकस्य प्रागुक्तान्यस्तिसृभ्यः संज्वलनक्रोधे क्षीणे द्वे सङ्क्रामतः । तस्यैव संज्वलनमाने क्षीणे एका । तदेवं भावितानि त्रयोविंशतिसङ्क्रमस्थानानि । एतेषु मध्ये पञ्चविंशतिप्रकृतिकं सङ्क्रमस्थानं साद्यादिरूपतया चतुःप्रकारं । तथाहि—अष्टाविंशतिसत्कर्मणः सम्यक्त्वसम्यग्मिथ्यात्वयोरुद्वलनया भवदेतत्सादि । अनादिमिथ्यादृष्टेरनादि । अध्रुवध्रुवता तु भव्याभव्यापेक्षयेति । शेषाणि तु सङ्क्रमस्थानानि कादाचित्कत्वात्साद्यध्रुवाणि ॥ १० ॥

कृता मोहनीये सङ्क्रमासङ्क्रमस्थानप्ररूपणा । अथ पतद्ग्रहापतद्ग्रहस्थानप्ररूपणार्थमाह—

सोलस बारसगट्ठग वीसग तेवीसगाइगे दुग च । वज्जिय मोहस्स पडिग्गहा उ अट्ठारस हवंति ॥११॥

व्याख्या—मोहनीये बन्धस्थानानि दशोक्तानि—द्वाविंशतिरेकविंशतिः सप्तदश त्रयोदश नव पञ्च चतस्रस्तिस्रो द्वे एका च । तत्र पतद्ग्रहस्थानानि षोडश द्वादशाष्टौ विंशतित्रयोविंशत्यादयश्च षट् त्रयोविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः

सप्तविंशतिरष्टाविंशतिश्चेत्येतानि स्थानानि वर्जयित्वा शेषाण्येकद्वित्रिचतुःपञ्चषट्सप्तनवदशैकादशत्रयोदशचतुर्दशपञ्चदशसप्तदशाष्टादशैकोनविंशत्येकविंशतिद्वाविंशतिलक्षणान्यष्टादश भवन्ति । तत्र मिथ्यादृष्टेरष्टाविंशतिसत्कर्मणो मिथ्यात्वस्य सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रहतया त्यागे शेषाः सप्तविंशतिर्मिथ्यात्वषोडशकषायान्यतरवेदभयजुगुप्साहास्यरतियुगलारतिशोकयुगलान्यतरयुगललक्षणायां द्वाविंशतौ सङ्क्रामति । तस्यैव सम्यक्त्वे उद्वलिते सप्तविंशतिसत्कर्मणो मिथ्यात्वस्य सम्यग्मिथ्यात्वपतद्ग्रहतया त्यागेन षड्विंशतिः प्रागुक्तायां द्वाविंशतौ सङ्क्रामति । तस्यैव मिथ्यादृष्टेः सम्यग्मिथ्यात्वोद्वलनायां षड्विंशतिसत्कर्मणो मिथ्यात्वे न किमपि सङ्क्रामतीति पतद्ग्रहत्वाद्भ्रष्टे तस्मिन् द्वाविंशतेरपनीते एकविंशतिप्रकृतिसमुदायात्मके पतद्ग्रहे पञ्चविंशतिः सङ्क्रामति । यदाऽनादिमिथ्यादृष्टेः षड्विंशतिसत्कर्मणो मिथ्यात्वे न किमपि सङ्क्रामति न वा तत्रान्या प्रकृतिरिति सङ्क्रमप्रतियोग्यनुयोगिन्नावपरिज्ञष्टे मिथ्यात्वेऽपनीते शेषा पञ्चविंशतिरेकविंशतौ सङ्क्रामति । तथा चतुर्विंशतिसत्कर्मणो मिथ्यात्वं गतस्य तत्प्रत्ययेन बद्ध्वा अप्यनन्तानुबन्धिनो बन्धावलिकां यावत्सङ्क्रमानर्हा इति तान् मिथ्यात्वं च सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रहमात्रतया वर्जयित्वा शेषास्त्रयोविंशतिप्रकृतयः प्रागुक्तद्वाविंशतौ सङ्क्रामन्ति । तदेवं मिथ्यादृष्टेर्द्वाविंशतिपतद्ग्रहे सप्तविंशतिषड्विंशतित्रयोविंशतिरूपास्त्रयः सङ्क्रमा लभ्यन्ते । एकविंशतिपतद्ग्रहे चैकः पञ्चविंशतिसङ्क्रमः, शेषः सङ्क्रमः पतद्ग्रहो वा मिथ्यादृष्टेर्न भवति । सासादनसम्यग्दृष्टेस्तु शुद्धदृष्टित्वाज्जावादर्शनमोहनीयत्रयस्य सङ्क्रमाज्जाव इत्यस्य सर्वदैकविंशतिरूपे पतद्ग्रहे पञ्चविंशतिरेव सङ्क्रामति । सम्यग्मिथ्यादृष्टेरपि शुद्धदृष्टित्वाज्जावादर्शनत्रयसङ्क्रमाज्जाव इत्यष्टाविंशतिसत्कर्मणः सप्तविंशतिसत्कर्मणो वा तस्य पञ्चविंशतिः ।

चतुर्विंशतिसत्कर्मणस्तु तस्यैकविंशतिर्द्वादशकषायपुरुषवेदत्रयजुगुप्सान्यतरयुगलक्षणसप्तदशप्रकृतिसमुदायरूपे पतद्ग्रहे सङ्क्रामति । अविरतदेशविरतप्रमत्ताप्रमत्तेषु सङ्क्रमतौल्याद्युगपत्पतद्ग्रहा उच्यन्ते । तत्रौपशमिकसम्यग्दृष्टीनामेतेषां सम्यक्त्वलाभप्रथमसमयादारभ्य यावदावलिकामात्रं तावत् सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रहतैव भवति, न सङ्क्रम इति शेषा षड्विंशतिरविरतानां द्वादशकषायपुरुषवेदत्रयजुगुप्सान्यतरयुगलसम्यक्त्वसम्यग्मिथ्यात्वरूपे एकोनविंशतिपतद्ग्रहे, देशविरतानामन्त्याष्टकषायपुरुषवेदत्रयजुगुप्सान्यतरयुगलसम्यक्त्वसमग्मिथ्यात्वलक्षणे पञ्चदशपतद्ग्रहे, प्रमत्ताप्रमत्तानां संज्वलनचतुष्टयपुरुषवेदसम्यक्त्वसम्यग्मिथ्यात्वत्रयजुगुप्साऽन्यतरयुगलरूपे एकादशपतद्ग्रहे सङ्क्रामति । तेषामेवाविरतसम्यग्दृष्ट्यादीनामावलिकायाः परतः सम्यग्मिथ्यात्वं सङ्क्रमे पतद्ग्रहे च लभ्यत इति सप्तविंशतिः प्रागुक्तेषु त्रिषु पतद्ग्रहेषु सङ्क्रामति । तेषामेवाविरतसम्यग्दृष्ट्यादीनामनन्तानुबन्ध्युद्वलने चतुर्विंशतिसत्कर्मणां क्षायोपशमिकसम्यक्त्ववतां सम्यक्त्वं पतद्ग्रह एवेतिकृत्वा शेषा त्रयोविंशतिः प्रागुक्तेष्वेकोनविंशत्यादिषु त्रिषु पतद्ग्रहेषु सङ्क्रामति । ततो मिथ्यात्वे क्षपिते सति सम्यग्मिथ्यात्वं न पतद्ग्रही भवति, मिथ्यात्वं च न सङ्क्रमप्रतियोगी भवतीति शेषा द्वाविंशतिरविरतदेशविरतसंयतानां यथासङ्ख्यमष्टादशचतुर्दशदशरूपेषु पतद्ग्रहेषु सङ्क्रामति । ततः सम्यग्मिथ्यात्वे क्षपिते सम्यक्त्वं न सङ्क्रमे नापि पतद्ग्रहभावे लभ्यत इत्येकविंशतिरविरतादीनां यथासङ्ख्यं सप्तदशत्रयोदशनवकरूपेषु पतद्ग्रहेषु सङ्क्रामति । अथौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य सङ्क्रममाश्रित्य पतद्ग्रहविधिरुच्यते—तत्र चतुर्विंशतिसत्कर्मणः सम्यक्त्वं मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रह एवेति तत्त्यागे शेषा त्रयोविंशतिः पुंवेदसंज्वलनचतुष्टयसम्यक्त्वसम्यग्मिथ्यात्वरूपे सप्तक-

पतद्ग्रहे सङ्क्रामति । तस्यैवोपशमश्रेण्यामन्तरकरणे कृते संज्वलनलोभस्य न सङ्क्रम इति तत्त्यागे शेषा द्वाविंशतिः प्रागुक्त एव सप्तकपतद्ग्रहे सङ्क्रामति । तस्यैव नपुंसकवेदे उपशान्ते सप्तकपतद्ग्रहे एकविंशतिः । ततः स्त्रीवेदे उपशान्ते विंशतिः । ततः पुरुषवेदस्य प्रथमस्थितौ समयोनावलिकाद्विकशेषायां पुरुषवेदः पतद्ग्रहो न भवति, ततः प्रागुक्तात्सप्तकात्पुरुषवेदेऽपनीते शेषे षट्करूपे पतद्ग्रहे प्रागुक्ता विंशतिः सङ्क्रामति । ततः षट्सु नोकषायेषूपशान्तेषु शेषाश्चतुर्दश प्रकृतयः प्रागुक्त एव षट्करूपे पतद्ग्रहे सङ्क्रामन्ति । ताश्च तावत्सङ्क्रामन्ति यावत्समयोनमावलिकाद्विकं । ततः पुरुषवेदे उपशान्ते शेषास्त्रयोदश षट्करूपे पतद्ग्रहे सङ्क्रामन्ति । ताश्च तावद्यावदन्तर्मुहूर्त्तं । ततः संज्वलनक्रोधस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनक्रोधोऽपि पतद्ग्रहो न भवतीति प्रागुक्तषट्कात्तदपनयने शेषे पञ्चकरूपपतद्ग्रहे ता एव त्रयोदश प्रकृतयः सङ्क्रामन्ति । ततोऽप्रत्याख्यानप्रत्याख्यानावरणक्रोधद्विके उपशान्ते शेषा एकादश प्रागुक्त एव पञ्चकपतद्ग्रहे सङ्क्रामन्ति । ताश्च तावद्यावत्समयोनावलिकाद्वयं । ततः संज्वलनक्रोधे उपशान्ते शेषा दश प्रकृतयस्तस्मिन्नेव पञ्चकपतद्ग्रहे तावत्सङ्क्रामन्ति यावदन्तर्मुहूर्त्तं । ततः संज्वलनमानस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमानस्याप्यपतद्ग्रहीभाव इति पञ्चकात्तदपनयने शेषे चतुष्करूपे पतद्ग्रहे ता एव दश प्रकृतयः सङ्क्रामन्ति । ताश्च तावद्यावत्समयोनावलिकाद्वयं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणरूपे मानद्वये उपशान्ते शेषा अष्टौ प्रकृतयश्चतुष्करूपे एव पतद्ग्रहे सङ्क्रामन्ति । ततः संज्वलनमाने उपशान्ते सप्त, ताश्च सप्त चतुष्करूपे पतद्ग्रहेऽन्तर्मुहूर्त्तं कालं यावत्सङ्क्रामन्ति । ततः संज्वलनमायायाः प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमायापि न पतद्ग्रही भवतीति चतुष्कात्तदपनयने शेषे त्रिकरूपे पतद्ग्रहे

पूर्वोक्ताः सप्त सङ्क्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाधिकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणरूपमायाधिके उपशान्ते शेषाः पञ्च प्रकृतयस्त्रिकरूपे पतद्ग्रहे सङ्क्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाधिकं । ततः संज्वलनमायायामुपशान्तायां शेषाश्चतस्रः सङ्क्रामन्ति । ताश्च तावद्यावदन्तर्मुहूर्त्तं । ततोऽनिवृत्तिबादरसंपरायचरमसमयेऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणलोभाधिके उपशान्ते शेषे मिथ्यात्वसम्यग्मिथ्यात्वलक्षणे द्वे एव प्रकृती सङ्क्रामतः । अनयोश्च सङ्क्रमो न संज्वलनलोभे संभवति, दर्शनमोहनीयचारित्रमोहनीययोः परस्परं सङ्क्रमप्रतिषेधात् , ततस्तस्यापि पतद्ग्रहता न भवतीति द्वयोरेव ते द्वे सङ्क्रामतः । तत्र मिथ्यात्वं सम्यक्त्वसम्यग्मिथ्यात्वयोर्द्वयोः सङ्क्रामति, सम्यग्मिथ्यात्वं तु सम्यक्त्व एवेति विवेकः । तदयमौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां सङ्क्रमपतद्ग्रहविधिरुक्तः । अथ क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां सङ्क्रमपतद्ग्रहविधिरुच्यते—तत्र क्षीणसप्तक एकविंशतिसत्कर्मा सन् क्षायिकसम्यग्दृष्टिरुपशमश्रेणिं प्रतिपद्यते । तस्य चान्तर्मुहूर्त्तं कालं यावत्पुरुषवेदसंज्वलनचतुष्टयरूपे पञ्चकपतद्ग्रहे एकविंशतिः सङ्क्रामति । ततोऽन्तरकरणे कृते सति संज्वलनलोभस्य सङ्क्रमो न भवतीत्येकविंशतेस्तस्मिन्नपनीते शेषा विंशतिः पञ्चकपतद्ग्रहे सङ्क्रामति, सा चान्तर्मुहूर्त्तं कालं यावत् । ततो नपुंसकवेदे उपशान्ते एकोनविंशतिः, साप्यन्तर्मुहूर्त्तं कालं यावत् । ततः स्त्रीवेदे उपशान्ते शेषा अष्टादश प्रकृतयस्तस्मिन्नेव पञ्चकपतद्ग्रहे सङ्क्रामन्ति, ता अप्यन्तर्मुहूर्त्तं यावत् । ततः पुरुषवेदस्य प्रथमस्थितौ समयोनावलिकाधिकशेषायामपतद्ग्रहीभवतीति पुरुषवेदेऽपनीते चतुष्करूपे पतद्ग्रहे ता एवाष्टादश प्रकृतयः सङ्क्रामन्ति । ततो नोकषायषट्के उपशान्ते शेषा द्वादश प्रकृतयस्तस्मिन्नेव चतुष्कपतद्ग्रहे सङ्क्रामन्ति, ताश्च तावद्यावत्समयोनमावलिकाधिकं । ततः

पुरुषवेदे उपशान्ते एकादश चतुष्कपतद्ग्रहेऽन्तर्मुहूर्त्तं यावत्सङ्क्रामन्ति । ततः संज्वलनक्रोधस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायामपतद्ग्रहीभवतः संज्वलनक्रोधस्यापसारणे शेषे त्रिकरूपे पतद्ग्रहे प्रागुक्तानामेकादशप्रकृतीनां सङ्क्रमः, स च तावद्यावत्समयोनमावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे क्रोधद्विके उपशान्ते शेषा नव प्रकृतयः प्रागुक्तत्रिकरूपे पतद्ग्रहे सङ्क्रामन्ति समयोनावलिकाद्विकं यावत् । ततः संज्वलनक्रोधे उपशान्तेऽष्टौ त्रिकरूपे पतद्ग्रहेऽन्तर्मुहूर्त्तं यावत्सङ्क्रामन्ति । ततः संज्वलनमानस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमानस्याप्यपतद्ग्रहीभूतस्यापनयने शेषे द्विकरूपे पतद्ग्रहे प्रागुक्ता अष्टौ प्रकृतयः समयोनमावलिकाद्विकं यावत्सङ्क्रामन्ति । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मानद्विके उपशान्ते षट् द्विकपतद्ग्रहे समयोनमावलिकाद्विकं सङ्क्रामन्ति । ततः संज्वलनमाने उपशान्ते पञ्च द्विकपतद्ग्रहेऽन्तर्मुहूर्त्तं यावत्सङ्क्रामन्ति । ततः संज्वलनमायायाः प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमायायामप्यपतद्ग्रहीभवन्त्यां संज्वलनलोभ एव एकस्मिंस्ताः पञ्च सङ्क्रामन्ति समयोनावलिकाद्विकं यावत् । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मायाद्विके उपशान्ते तिस्रः प्रकृतयः संज्वलनलोभे समयोनमावलिकाद्विकं यावत्सङ्क्रामन्ति । ततः संज्वलनमायायामुपशान्तायां शेषे द्वे अप्रत्याख्यानप्रत्याख्यानावरणलोभलक्षणे प्रकृती संज्वलनलोभेऽन्तर्मुहूर्त्तं यावत्सङ्क्रामतः । ततोऽनिवृत्तिबादरसंपरायचरमसमये ते अप्युपशान्ते इति न किमपि क्वापि सङ्क्रामति । तदयं क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां सङ्क्रमपतद्ग्रहविधिरुक्तः । अथ क्षायिकसम्यग्दृष्टेः क्षपकश्रेण्यामयमभिधीयते—तत्र क्षायिकसम्यग्दृष्टिरेकविंशतिसत्कर्मा क्षपकश्रेणिं प्रतिपद्यते, तस्य चानिवृत्तिबादरसंपरायगुणस्थानं प्राप्तस्य पुंवेदसंज्वलनचतुष्ट-

यरूपे पञ्चकपतद्ग्रहे प्रथमत एकविंशतिप्रकृतीनां सङ्क्रमः । ततोऽष्टसु कषायेषु क्षीणेष्वन्तर्मुहूर्त्तं यावत्त्रयोदशानां ततोऽन्तरकरणे कृते संज्वलनलोभस्यासङ्क्रम इति द्वादशानां तस्मिन्नेव पञ्चकपतद्ग्रहेऽन्तर्मुहूर्त्तं यावत्सङ्क्रमः । ततो नपुंसकवेदे क्षीणे एकादशानां तावत्कालमेव । ततः स्त्रीवेदे क्षीणे दशानामन्तर्मुहूर्त्तमेव तस्मिन्नेव पञ्चकपतद्ग्रहे सङ्क्रमः । ततः पुरुषवेदस्य प्रथमस्थितौ समयोनावलिकाद्विकशेषायां पुरुषवेदस्यापतद्ग्रहतेति शेषे चतुष्करूपे पतद्ग्रहे तासामेव दशानां समयोनमावलिकाद्विकं यावत्सङ्क्रमः । ततो नोकषायषट्कक्षये शेषाणां चतसृणां प्रकृतीनां तस्मिन्नेव चतुष्करूपे पतद्ग्रहे सङ्क्रमः। ततः पुरुषवेदः क्षीयते, तत्समये च संज्वलनक्रोधस्यापि पतद्ग्रहता न भवतीति तदुत्सारणे शेषासु तिसृषु तिसृणां सङ्क्रमः, स चान्तर्मुहूर्त्तं यावत् । ततः समयोनावलिकाद्विकेन कालेन संज्वलनक्रोधः क्षीयते, तत्समये च संज्वलनमानस्यापि पतद्ग्रहता न भवतीति शेषयोर्द्वयोः प्रकृत्योर्द्वयोरेव सङ्क्रमः, स चान्तर्मुहूर्त्तं यावत् । ततः समयोनावलिकाद्विकेन कालेन संज्वलनमानोऽपि क्षीयते, तत्समये एव च संज्वलनमायायाः पतद्ग्रहता त्यज्यते । तत एकस्यामेव संज्वलनलोभलक्षणायां प्रकृतौ संज्वलनमायालक्षणैका प्रकृतिः सङ्क्रामति, सा चान्तर्मुहूर्त्तं यावत् । तत आवलिकाद्विकेन कालेन संज्वलनमायापि क्षीयते । तत ऊर्ध्वं न किमपि क्वापि सङ्क्रामति । एतेषु च पतद्ग्रहेषु एकविंशतिरूपः पतद्ग्रहः साद्यादिरूपतया चतुर्विधः । तथाहि—सादिमिथ्यादृष्टेः सम्यक्त्वसम्यग्मिथ्यात्वयोरुद्वलितयोः सतोः षड्विंशतिसत्कर्मणः एकविंशतिरूपः पतद्ग्रहः सादिः । अनादिमिथ्यादृष्टेः षड्विंशतिसत्कर्मणोऽनादिः । ध्रुवाध्रुवावभव्याभव्यापेक्षया । शेषास्तु पतद्ग्रहाः कादाचित्कत्वादेव साद्यध्रुवाः ॥ ११ ॥

सम्प्रति यथोक्तपतद्ग्रहेषु सङ्क्रमस्थानसंकलनामाह—

छवीससत्तवीसाए संकमो होइ चउसु ठाणेसु । बावीसपन्नरसगे इक्कारसइगुणवीसाए ॥ १२ ॥

व्याख्या—द्वाविंशतौ पञ्चदशके एकादशके एकोनविंशतौ चेति चतुर्षु स्थानेषु पतद्ग्रहलक्षणेषु षड्विंशतिसप्तविंशत्योः सङ्क्रमो भवति । तत्र द्वाविंशतौ मिथ्यादृष्टेः, पञ्चदशके देशविरतस्य, एकादशके प्रमत्ताप्रमत्तयोः, एकोनविंशतावविरतसम्यग्दृष्टेः ॥ १२ ॥

सत्तरसइक्कवीसासु संकमो होइ पन्नवीसाए । णियमा चउसु गईसुं णियमा दिट्ठी कए तिविहे ॥१३॥

व्याख्या—सप्तदशैकविंशत्योः पञ्चविंशतेः सङ्क्रमो भवति । तत्र सप्तदशके मिश्रदृष्टेरेकविंशतौ च मिथ्यादृष्टेः सासादनस्य च । अयं च पञ्चविंशतेः सप्तदशैकविंशत्योः सङ्क्रमो नियमाच्चतसृष्वपि गतिषु प्राप्यते, नियमाच्च दृष्टौ दर्शनमोहनीयप्रकृतौ त्रिविधायां कृतायां वेदितव्यः । "कए तिविहे त्ति" पुंस्त्वनिर्देशः प्राकृतत्वात् । एतच्च सप्तदशके सासादनैकविंशतौ च पञ्चविंशतिसङ्क्रममाश्रित्य ज्ञेयं, त्रिधाकृतदर्शनमोहनीयस्यैव मिश्रसासादनत्वसंभवात् । मिथ्यादृष्टेस्त्वेकविंशतौ पञ्चविंशतिसङ्क्रमोऽनादिमिथ्यात्ववतोऽपि भवतीत्यवसेयम् ॥ १३ ॥

बावीसपन्नरसगे सत्तगएक्कारसिगुणवीसासु । तेवीसाए णियमा पंच वि पंचिंदिएसु भवे ॥ १४ ॥

व्याख्या—द्वाविंशतिपञ्चदशसप्तकैकादशैकोनविंशतिरूपेषु पञ्चसु पतद्ग्रहेषु त्रयोविंशतेः सङ्क्रमो भवति । तत्र द्वावि-

शतौ मिथ्यादृष्टेः, पञ्चदशके देशविरतस्य, सप्तके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, एकादशके प्रमत्ताप्रमत्तयोः, एकोनविंशतावविरतसम्यग्दृष्टेः । एतानि च पञ्च पतद्ग्रहस्थानानि पञ्चेन्द्रियेष्वेव भवन्ति ॥ १४ ॥

चोद्दसगदसगसत्तगअट्ठारसगे य होइ बावीसा । णियमा मणुयगईए णियमा दिट्ठी कए दुविहे ॥१५॥

व्याख्या—चतुर्दशके दशके सप्तकेऽष्टादशके च द्वाविंशतिः सङ्क्रामति । तत्र चतुर्दशके देशविरतस्य, दशके प्रमत्ताप्रमत्तयोः, सप्तके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, अष्टादशकेऽविरतसम्यग्दृष्टेः । एषा च द्वाविंशतिर्नियमान्मनुजगतौ भवति, नान्यत्र, नियमाच्च दृष्टौ द्विविधायां कृतायां सम्यक्त्वसम्यग्मिथ्यात्वयोरेव सतोरित्यर्थः ॥ १५ ॥

तेरसगणवगसत्तगसत्तरसगपणगएक्कवीसासु । एक्कावीसा संकमइ सुद्धसासाणमीसेसु ॥ १६ ॥

व्याख्या—त्रयोदशकनवकसप्तकसप्तदशकपञ्चकैकविंशतिरूपेषु षट्सु पतद्ग्रहेष्वेकविंशतिः सङ्क्रामति । केष्वित्याह—शुद्धसासादनमिश्रेषु शुद्धेषु विशुद्धदृष्टिष्वविरतसम्यग्दृष्ट्यादिषु सासादनमिश्रेषु द्वितीयतृतीयगुणस्थानवर्तिषु । तत्र त्रयोदशके देशविरतस्य, नवके प्रमत्ताप्रमत्तयोः, सप्तके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, सप्तदशकेऽविरतसम्यग्दृष्टेर्मिश्रदृष्टेश्च, पञ्चके क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां क्षपकश्रेण्यां वा वर्तमानस्य, एकविंशतौ सासादनस्य । इह यन्मते चतुर्विंशतिसत्कर्मोपशमश्रेणीतः पतन्मिथ्यात्वाभिमुखः सासादन इष्यते, तन्मते सासादनस्यैकविंशतावेकविंशतिः सङ्क्रमेऽभिहिता, अन्यथा तु सासादनेऽनन्तानुबन्ध्युदयसाहित्यनियमात् । तत्रैकविंशतौ पञ्चविंशतिरेव सङ्क्रमे प्राप्यत इति, तथैव प्रागुक्तम् ॥ १६ ॥

एत्तो अविसेसा संकमंति उवसामगे व खवगे वा। उवसामगेसु वीसा य सत्तगे छक्क पणगे वा ॥१७॥

व्याख्या—इत ऊर्ध्वमविशेषाः सप्तदश सङ्क्रमाः सङ्क्रामन्ति उपशमके क्षपके वा। तत्र विंशतिः सप्तके षट्के पञ्चके चोपशमकेषु सङ्क्रमयोग्या लभ्यते, तत्रापि सप्तके षट्के चौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्त्तमानस्य, पञ्चके क्षायिकसम्यग्दृष्टेस्तथाभूतस्य ॥ १७ ॥

पंचसु एगुणवीसा अट्ठारस पंचगे चउक्के य। चोद्दस छसु पगडीसुं तेरसगं छक्कपणगम्मि ॥ १८ ॥

व्याख्या—पञ्चसु पञ्चके एकोनविंशतिः सङ्क्रामति। सा च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। तथा तस्यैवाष्टादश पञ्चके चतुष्के वा सङ्क्रामन्ति। तथा चतुर्दश षट्सु प्रकृतिषु सङ्क्रामन्ति। ताश्चौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। तथा त्रयोदशकं षट्के पञ्चके च सङ्क्रामति। तत्र षट्के औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, पञ्चके क्षपकश्रेण्याम् ॥१८॥

पंच चउक्के बारस एक्कारस पंचगे तिगचउक्के। दसगं चउक्कपणगे णवगं च तिगम्मि बोद्धव्वं ॥ १९ ॥

व्याख्या—पञ्चके चतुष्के च द्वादश सङ्क्रामन्ति। ताश्च पञ्चके क्षपकश्रेण्यां, चतुष्के क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। तथा एकादश पञ्चके त्रिके चतुष्के च सङ्क्रामन्ति। तत्र पञ्चके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां क्षपकश्रेण्यां च वर्तमानस्य, त्रिके चतुष्के च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां। तथा दशकं चतुष्के पञ्चके च सङ्क्रामति तत्रौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य क्षपकश्रेण्यां च। तथा नवकं त्रिके सङ्क्रमयोग्यं बोद्धव्यं। तच्च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य ॥ १९ ॥

अट्ठ दुगतिगचउक्के सत्त चउक्के तिगे य बोद्धवा । छक्कं दुगम्मि णियमा पंच तिगे एक्कगदुगे य ॥२०॥

व्याख्या—अष्टौ द्विके त्रिके चतुष्के च सङ्क्रामन्ति । तत्र द्विके त्रिके चोपशमश्रेण्यां वर्तमानस्य क्षायिकसम्यग्दृष्टेः, चतुष्के औपशमिकसम्यग्दृष्टेः । तथा सप्त त्रिके चतुष्के च बोद्धव्याः । ताश्च त्रिके चतुष्के चौपशमिकसम्यग्दृष्टेरेवोपशमश्रेण्यां वर्तमानस्य ज्ञातव्याः । तथा षट्कं द्विक एव नियमाद्भवति । तच्च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य । तथा पञ्च त्रिके एकके द्विके च सङ्क्रामन्ति । तत्र त्रिके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, द्विके एकके च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्याम् ॥ २० ॥

चत्तारि तिगचउक्के तिन्नि तिगे एक्कगे य बोद्धवा । दोसु दु एक्काए वि य एक्का एक्काइ बोद्धवा ॥२१॥

व्याख्या—चतस्रस्त्रिके चतुष्के च सङ्क्रामन्ति । तत्र त्रिके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, चतुष्के क्षपकश्रेण्यां । तथा तिस्रस्त्रिक एकके च बोद्धव्याः । तत्र त्रिके क्षपकश्रेण्यां, एकके क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां । तथा द्वे प्रकृती द्वयोरेकस्यां च सङ्क्रामतः । तत्र द्वयोः क्षपकश्रेण्यां औपशमिकसम्यग्दृष्टेश्चोपशमश्रेण्यां, एकस्यां तु क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां । तथैका प्रकृतिरेकस्यां बोद्धव्या । सा च क्षपकश्रेण्यामेव । तदेवमेतानि पतद्ग्रहेषु सङ्क्लिष्टानि सङ्क्रमस्थानानि संवेधचिन्तायां पट्टकादौ प्रस्तार्य परिभावनीयानि ॥ २१ ॥

सम्प्रति पतद्ग्रहेषु सङ्क्रमस्थानसङ्कलने मार्गणोपायानाह—

अणुपुव्विअणाणुपुव्वी ऊणमऊणे य दिट्ठिमोहम्मि। उवसामगे य खवगे य संकमे मग्गणोवाया ॥२२॥

व्याख्या—पतद्ग्रहेषु सङ्क्रमे सङ्क्रमस्थाने सङ्क्रमयितुमिष्यमाणे एते मार्गणोपायाः। तद्यथा—किमिदं सङ्क्रमस्थानमानुपूर्व्या सङ्क्रमे समापतितमाहोश्विदनानुपूर्व्योऽन्यतर वा ?। तथा क्षीणे दृष्टिमोहे उताहो अक्षीणे यद्योऽन्यतर। तथोपशमके किं वा क्षपके उऽन्यतर वेति ?॥ २२॥

तदेवमुक्तो मोहनीयस्य प्रपञ्चतः सङ्क्रमपतद्ग्रहविधिः। सम्प्रति नामकर्मणोऽभिधीयते—तत्र नामकर्मणो द्वादश सत्तास्थानानि। तद्यथा—त्र्युत्तरशतं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिः, एतत्प्रथमसंज्ञं सत्ताचतुष्कं। तत्र सकलप्रकृतिसमुदायस्त्र्युत्तरशतं। तदेव तीर्थकररहितं द्व्युत्तरशतं। त्र्युत्तरशतमेवाहारकसप्तकरहितं षण्णवतिः। द्व्युत्तरशतमाहारकसप्तकरहितं पञ्चनवतिः। क्षपकश्रेण्यां प्रथमसत्ताचतुष्कान्नरकगतिनरकानुपूर्वीतिर्यग्गतितिर्यगानुपूर्व्यौद्यजातिचतुष्टयस्थावरसूक्ष्मसाधारणातपोद्योतलक्षणासु त्रयोदशसु प्रकृतिषु क्षीणासु यथाक्रमं द्वितीयं सत्ताचतुष्कं नवतिरेकोननवतिस्त्र्यशीतिर्द्व्यशीतिश्च। तथा पञ्चनवतेर्देवद्विके उद्वलिते त्रिनवतिः। तस्या अपि वैक्रियसप्तकनरकद्विकयोरुद्वलितयोश्चतुरशीतिः। अस्या अपि मनुजद्विके उद्वलिते द्व्यशीतिः। एतच्च सत्तात्रिकमध्रुवसंज्ञं। यद्यपीह द्वितीयसत्ताचतुष्के च द्व्यशीतिर्भिन्नभिन्नतया व्यवस्थिता तथापि सङ्ख्यातौल्यादेकमेवेदं सत्तास्थानं गण्यते। तदेवं संजातेषु दशसु सत्तास्थानेषु द्वितीयसत्ताचतुष्कस्थे नवतित्र्यशीतिरूपे सत्तास्थाने सङ्क्रमे न प्राप्येते, शेषाणि तु सर्वाणि प्राप्यन्त इत्यष्टौ सङ्क्रमस्थानानि भवन्ति। नवाष्टरूपे चान्ये द्वे सत्तास्थाने अयोग्यवस्थाचरमसमये प्राप्येते। ततो द्वादश सत्तास्थानानि पूर्यन्ते, परं ते सङ्क्रमे न प्राप्येते, अयोग्यवस्थायां बन्धाभावेन पतद्ग्रहाभावाद्बध्यमानप्रकृतेरेव पतद्ग्रहत्वात्पतद्ग्रहे सत्येव च सङ्क्रमसंभवात्। सत्तास्थानबाह्यानि

च चत्वार्यन्यानि सङ्क्रमस्थानानि भवन्ति—एकोत्तरशतं चतुर्नवतिरष्टाशीतिरेकाशीतिश्च । तदेवं द्वादश सत्तास्थानानि द्वादशैव सङ्क्रमस्थानानीति लब्धं । तच्चाह—

तिउगेगसयं छप्पणचउतिगणउई य इगुणणउई य। अट्ठचउछुक्किक्कसीई संकमा बारस य छट्ठे ॥ २३ ॥

व्याख्या—षष्ठे नामकर्मणि द्वादश सङ्क्रमस्थानानि । तद्यथा—त्र्युत्तरशतं द्व्युत्तरशतं एकोत्तरशतं षण्णवतिः पञ्चनवतिः चतुर्नवतिः त्रिनवतिः एकोननवतिः अष्टाशीतिः चतुरशीतिः द्व्यशीतिः एकाशीतिश्चेति । तत्र सर्वप्रकृतिसमुदायस्त्र्युत्तरशतं । तदेव तीर्थकरवर्जं यशःकीर्तिवर्जं वा द्व्युत्तरशतं । उच्चयवर्जमेकोत्तरशतं । त्र्युत्तरशतमेवाहारकसप्तकरहितं षण्णवतिः । द्व्युत्तरशतं च तथाभूतं पञ्चनवतिः । सा यशःकीर्तिरहिता चतुर्नवतिः । पञ्चनवतिरेव देवगतिदेवानुपूर्व्योरुद्वलितयोस्त्रिनवतिः, यद्वा नरकगतिनरकानुपूर्वीरहिता त्रिनवतिः । त्र्युत्तरशताच्चयोदशप्रकृतिक्षये यशःकीर्तौ चापनीतायामेकोननवतिः । सैव तीर्थकररहिताऽष्टाशीतिः । त्रिनवतेर्वैक्रियसप्तकनरकद्विकयोरुद्वलितयोश्चतुरशीतिः । ततो मनुजगतिमनुजानुपूर्व्योरुद्वलितयोर्द्व्यशीतिः, षण्णवतेर्वा त्रयोदशप्रकृतिक्षये यशःकीर्तौ चापनीतायां द्व्यशीतिः । सैव तीर्थकररहितैकाशीतिः । एतानि नाम्नः सङ्क्रमस्थानानि ॥ २३ ॥

अथ पतद्ग्रहस्थानान्याह—

तेवीसा पणवीसा छव्वीसा अट्ठवीसिगुणतीसा । तीसिगतीसेक्का वि य पडिग्गहा अट्ठ णामस्स ॥ २४ ॥

व्याख्या—नाम्नो ह्यष्टौ बन्धस्थानानि—त्रयोविंशतिः पञ्चविंशतिः षड्विंशतिः अष्टाविंशतिः एकोनत्रिंशत् त्रिंशत् एकत्रिंशत् एका च। एतान्येव चाष्टौ पतद्ग्रहस्थानानि भवन्ति ॥ २४ ॥

सम्प्रति काः प्रकृतयः कुत्र सङ्क्रामन्तीत्याह—

एक्कगदुगसय पणचउणउई ता तेरसूणिया वा वि। परभवियबंधुवुच्छेय उवरि सेढीइ इक्कम्मि ॥ २५ ॥

व्याख्या—पारभविकीनां परभववेद्यानां नामप्रकृतीनां देवगतिप्रायोग्यैकत्रिंशदादीनां बन्धव्यवच्छेदे सत्युपरि द्वयोरपि श्रेण्योरुपशमकक्षपकश्रेणिरूपयोरेकस्यां यशःकीर्तिलक्षणायां प्रकृतौ बध्यमानायामष्टौ सङ्क्रमस्थानानि सङ्क्रामन्ति। तद्यथा—एकोत्तरशतं द्व्युत्तरशतं पञ्चनवतिश्चतुर्नवतिः। ता इति तान्येवानन्तरोदितानि चत्वारि सङ्क्रमस्थानानि त्रयोदशन्यूनानि चत्वारि भवन्ति—अष्टाशीतिरेकोननवतिर्ह्यशीतिरेकाशीतिश्चेति। यशःकीर्तिवर्जप्रथमसत्ताचतुष्कं द्वितीयसत्ताचतुष्कं च यशःकीर्तावेकस्यां सङ्क्रामतीत्यर्थः। तत्र यशःकीर्तिर्बध्यमाना पतद्ग्रह इति सर्वत्र सङ्क्रमाभ्युत्सार्यत इति त्र्युत्तरशतसत्कर्मणः शेषं द्व्युत्तरशतं यशःकीर्तिपतद्ग्रहे सङ्क्रामति। द्व्युत्तरशतसत्कर्मण एकोत्तरशतं, षण्णवतिसत्कर्मणः पञ्चनवतिः, पञ्चनवतिसत्कर्मणश्चतुर्नवतिः। त्रयोदशप्रकृतिक्षये च त्र्युत्तरशतसत्कर्मणः शेषा एकोननवतिर्यशःकीर्तौ सङ्क्रामति। द्व्युत्तरशतसत्कर्मणोऽष्टाशीतिः, षण्णवतिसत्कर्मणो ह्यशीतिः, पञ्चनवतिसत्कर्मणश्चैकाशीतिरिति बोध्यम् ॥ २५ ॥

एकत्रिंशत्प्रकृतिसमुदायरूपे पतद्ग्रहे प्रथमसत्ताचतुष्कलक्षणानि चत्वारि सङ्क्रमस्थानानि भवन्ति। तथा चाह—

तिगदुगसय छप्पंचगणउई य जइस्स एक्कतीसाए। एगंतसेढिजोगो वज्जिय तीसिगुणतीसासु ॥ २६ ॥

व्याख्या—यतेरप्रमत्तस्यापूर्वकरणस्य च देवगतिपञ्चेन्द्रियजातिवैक्रियशरीरसमचतुरस्रसंस्थानवैक्रियाङ्गोपाङ्गदेवानुपूर्वी-पराघातोच्छ्वासप्रशस्तविहायोगतित्रसदशकतैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणतीर्थकराहारकद्विकलक्षणामेकत्रिंशतं बध्नतस्तस्यामेकत्रिंशति एकत्रिंशत्प्रकृतिसमुदायरूपे पतद्ग्रहे त्र्युत्तरशतं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिरिति चत्वारि सङ्क्रमस्थानानि सङ्क्रामन्ति । तत्र त्र्युत्तरशतं तीर्थकराहारकनाम्नोर्बन्धावलिकायामपगतायामेकत्रिंशत्प्रकृतिपतद्ग्रहे सङ्क्रामति । तीर्थकरनाम्नः पुनर्बन्धावलिकायामनपगतायां द्व्युत्तरशतं । आहारकसप्तकस्य तु बन्धावलिकायामनपगतायां षण्णवतिः । तीर्थकराहारकसप्तकयोः पुनर्बन्धावलिकायामनपगतायां पञ्चनवतिः । त्रिंशत्येकोनत्रिंशति च प्रथमसत्ताचतुष्का-ध्रुवसंज्ञसत्तात्रिकलक्षणानि सप्त सङ्क्रमस्थानानि सङ्क्रामन्ति । तथा चाह—एगंतेत्यादि एकान्तेन श्रेणियोग्यानि यानि सङ्क्रमस्थानान्येकोत्तरशतचतुर्नवत्येकोननवत्यष्टाशीत्येकाशीतिरूपाणि । एतानि हि श्रेणावेव वर्तमानेन यशःकीर्तावेकस्या-मेव बध्यमानायां सङ्क्रम्यमाणानि प्राप्यन्ते, नान्यत्र, ततस्तानि वर्जयित्वा शेषाणि त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवति-त्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि सप्त सङ्क्रमस्थानानि त्रिंशदेकोनत्रिंशत्पतद्ग्रहयोः प्राप्यन्ते । तत्र त्र्युत्तरशतकर्मणो देवस्य सम्यग्दृष्टेस्तैजसकार्मणवर्णादिचतुष्कागुरुलघुनिर्माणोपघातपञ्चेन्द्रियजात्यौदारिकशरीरौदारिकोपाङ्गाद्यसंस्थानसंहन-नमनुजगतिमनुजानुपूर्वीत्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगसुस्वरादेययशःकीर्त्ययशःकीर्त्यन्यतर-पराघातोच्छ्वासप्रशस्तविहायोगतितीर्थकरलक्षणां मनुजगतिप्रायोग्यां तीर्थकरनामसहितां त्रिंशतं बध्नतस्त्र्युत्तरशतं तस्मिन् त्रिंशत्पतद्ग्रहे सङ्क्रामति । द्व्युत्तरशतसत्कर्मणोऽप्रमत्तसंयतस्यापूर्वकरणस्य वा देवगतिपञ्चेन्द्रियजातिवैक्रियशरीरसमचतुर-

त्रसंस्थानवैक्रियाङ्गोपाङ्गदेवानुपूर्वीपराघातोच्छ्वासप्रशस्तविहायोगतित्रसदशकतैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्मा-णाहारकद्विकलक्षणां देवगतिप्रायोग्यां त्रिंशतं बध्नतो ध्रुत्तरशतं तस्मिन् त्रिंशत्पतद्ग्रहे सङ्क्रामति । अथवा ध्रुत्तरशतस-त्कर्मणामेकेन्द्रियादीनामुद्योतसहितां द्वीन्द्रियादिप्रायोग्यां तैजसकार्मणागुरुलघूपघातनिर्माणवर्णादिचतुष्कतिर्यग्गतितिर्य-गानुपूर्वीद्वीन्द्रियाद्यन्यतमजातित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगदुःस्वरानादेययशःकीर्त्ययशः-कीर्त्यन्यतरौदारिकशरीरौदारिकाङ्गोपाङ्गान्यतमसंस्थानान्यतमसंहननाप्रशस्तविहायोगतिपराघातोद्योतोच्छ्वासलक्षणां त्रिंशतं बध्नतां ध्रुत्तरशतं तस्मिंस्त्रिंशत्पतद्ग्रहे सङ्क्रामति । षण्णवतिसत्कर्मणां देवनारकाणां मनुजगतिप्रायोग्यां तीर्थकरनामसहितां प्रागुक्तां त्रिंशतं बध्नतां त्रिंशत्पतद्ग्रहे षण्णवतिः सङ्क्रामति । पञ्चनवतिसत्कर्मणामप्रमत्तापूर्वकरणसंयतानामाहारकद्विकस-हितां प्रागुक्तां देवगतिप्रायोग्यां त्रिंशतं बध्नतामाहारकसप्तकस्य बन्धावलिकायामनपगतायां पञ्चनवतिस्त्रिंशत्पतद्ग्रहे सङ्क्रा-मति । अथवा पञ्चनवतिसत्कर्मणामेकेन्द्रियादीनां द्वीन्द्रियादिप्रायोग्यां प्रागुक्तामुद्योतसहितां त्रिंशतं बध्नतां पञ्चनवति-स्त्रिंशत्पतद्ग्रहे सङ्क्रामति । त्रिनवतिसत्कर्मणां चतुरशीतिसत्कर्मणां ध्रुवाशीतिसत्कर्मणां चैकेन्द्रियादीनां विकलेन्द्रियपञ्चे-न्द्रियतिर्यग्गतिप्रायोग्यां प्रागुक्तामुच्छ्वाससहितां त्रिंशतं बध्नतां यथाक्रमं त्रिनवतिश्चतुरशीतिर्ध्रुवाशीतिश्च त्रिंशत्पतद्ग्रहे सङ्क्रा-मति । एकोनत्रिंशत्पतद्ग्रहेऽप्येतान्येव सप्त सङ्क्रमस्थानानि भवन्ति । तत्र त्र्युत्तरशतसत्कर्मणामविरतसम्यग्दृष्टिदेशविरत-प्रमत्तसंयतानां देवगतिप्रायोग्यां तीर्थकरनामसहितां देवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिवैक्रियद्विकपराघातोच्छ्वासप्रशस्तविहा-योगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगसुस्वरादेययशःकीर्त्ययशःकीर्त्यन्यतरसमचतुरस्रसंस्था-

नतैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणतीर्थकरलक्षणामेकोनत्रिंशतं बध्नतां त्र्युत्तरशतमेकोनत्रिंशत्पतद्ग्रहे सङ्क्रामति । एतेषामेवाविरतादीनां त्रयाणां प्रागुक्तामेकोनत्रिंशतं बध्नतां तीर्थकरनाम्नो बन्धावलिकायामनपगतायां ध्रुत्तरशतं तस्मिन्नेकोनत्रिंशत्पतद्ग्रहे सङ्क्रामति । एकेन्द्रियादीनां वा ध्रुत्तरशतसत्कर्मणां द्वीन्द्रियादिप्रायोग्यां प्रागुक्तां त्रिंशतमुद्योतरहितां बध्नतामेकोनत्रिंशत्पतद्ग्रहे ध्रुत्तरशतं सङ्क्रामति । अविरतसम्यग्दृष्टिदेशविरतप्रमत्तसंयतानां षण्णवतिसत्कर्मणां प्रागुक्ताया देवगतिप्रायोग्यायास्त्रिंशत आहारकद्विकापनयनेन जिननाम्नश्च तत्र प्रक्षेपेण निष्पन्नामेकोनत्रिंशतं बध्नतां षण्णवतिस्तस्मिन्नेकोनत्रिंशत्पतद्ग्रहे सङ्क्रामति । अथवा नैरयिकस्य तीर्थकरनामसत्कर्मणो मिथ्यादृष्टेरपर्याप्तावस्थायां वर्तमानस्य मनुजगतिमनुजानुपूर्वीपञ्चेन्द्रियजातित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगदुर्भगान्यतरादेयानादेयान्यतरयशःकीर्त्ययशःकीर्त्यन्यतरषट्कान्यतमसंस्थानषट्कान्यतमसंहननवर्णादिचतुष्कागुरुलघूपघाततैजसकार्मणनिर्माणौदारिकशरीरौदारिकाङ्गोपाङ्गसुस्वरदुःस्वरान्यतरपराघातोच्छ्वासान्यतरविहायोगतिलक्षणामेकोनत्रिंशतं बध्नतः षण्णवतिरेकोनत्रिंशति सङ्क्रामति । अविरतसम्यग्दृष्टीनां देशविरतानां प्रमत्तसंयतानां वा षण्णवतिसत्कर्मणां प्रागुक्तां तीर्थकरनामसहितां देवगतिप्रायोग्यामेकोनत्रिंशतं बध्नतां तीर्थकरनामकर्मणो बन्धावलिकायामनपगतायामेकोत्रिंशति पञ्चनवतिः सङ्क्रामति । पञ्चनवतिसत्कर्मणामेकेन्द्रियादीनां वा द्वीन्द्रियादिप्रायोग्यां प्रागुक्तां त्रिंशतमुद्योतहीनां कृत्वैकोनत्रिंशतं बध्नतां तस्यामेवैकोनत्रिंशति पञ्चनवतिः सङ्क्रामति । त्रिनवतिचतुरशीतिद्व्यशीतयस्तु त्रिंशत्पतद्ग्रहे यथोक्तास्तथैवात्रापि भावनीयाः ॥ २६ ॥

आद्यवर्जितं प्रथमं सत्तास्थानचतुष्कमाद्ये ६ अध्रुवसंज्ञे चेत्येवं पञ्च सङ्क्रमस्थानान्यष्टाविंशतिपतद्ग्रहे सङ्क्रामन्ति । तथा चाह—

अट्ठावीसाए ते बासीईतिसयवज्जिया पंच । ते च्चिय बासीइजुया सेसेसुं छन्नउइ य वज्जा ॥ २७ ॥

॥ पगइसंकमो समत्तो ॥

व्याख्या—अष्टाविंशतावपि तान्येव प्रागुक्तानि द्व्यशीतित्र्युत्तरशतवर्जितानि द्व्युत्तरशतषण्णवतिपञ्चनवतित्रिनवतिचतुरशीतिरूपाणि पञ्च सङ्क्रमस्थानानि सङ्क्रामन्ति । तत्र मिथ्यादृष्टेर्नरकगतिप्रायोग्यां नरकगतिनरकानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियाङ्गोपाङ्गहुंडसंस्थानपराघातोच्छ्वासाप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतर(प्रेत्यकास्थिराशुभ)दुर्भगदुःस्वरानादेययशःकीर्तिवर्णादिचतुष्कागुरुलघूपघाततैजसकार्मणनिर्माणलक्षणां,मिथ्यादृष्टेः सम्यग्दृष्टेर्वा देवगतिप्रायोग्यां तैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणदेवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियाङ्गोपाङ्गसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगसुस्वरादेययशःकीर्त्ययशःकीर्त्यन्यतरलक्षणामष्टाविंशतिं बध्नतो द्व्युत्तरशतसत्कर्मणो द्व्युत्तरशतमष्टाविंशतिपतद्ग्रहे सङ्क्रामति । तथा मनुष्यस्य तीर्थकरनामसत्कर्मणः पूर्वमेव नरके बद्धायुष्कस्य नरकगमनाभिमुखस्य सतो मिथ्यात्वं प्रपन्नस्य नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतः षण्णवतिसत्कर्मणोऽष्टाविंशतिपतद्ग्रहे षण्णवतिः सङ्क्रामति । पञ्चनवतिभावना द्व्युत्तरशतस्येव कार्या, नवरं द्व्युत्तरशतस्थाने पञ्चनवतिरित्युच्चारणीयं । तथा मिथ्यादृष्टेस्त्रिनवतिसत्कर्मणो देवगतिप्रायोग्यां पूर्वोक्तामः

ष्टाविंशतिं बध्नतो वैक्रियसप्तकदेवगतिदेवानुपूर्वीणां बन्धावलिकायाः परतो वर्तमानस्य त्रिनवतिरष्टाविंशतौ सङ्क्रामति। अथवा पञ्चनवतिसत्कर्मणो देवगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो देवगतिदेवानुपूर्व्योर्बन्धावलिकाया अन्यन्तरे वर्तमानस्य त्रिनवतिरष्टाविंशतौ सङ्क्रामति। यद्वा त्रिनवतिसत्कर्मणो मिथ्यादृष्टेर्नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो नरकगति-नरकानुपूर्वीवैक्रियसप्तकानां बन्धावलिकायाः परतो वर्तमानस्य त्रिनवतिरष्टाविंशतौ सङ्क्रामति। अथवा पञ्चनवतिसत्कर्मणो मिथ्यादृष्टेर्नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो नरकगतिनरकानुपूर्व्योर्बन्धावलिकाया अन्यन्तरे वर्तमानस्य त्रिनवतिरष्टाविंशतौ सङ्क्रामति। तथा त्रिनवतिसत्कर्मणो मिथ्यादृष्टेर्देवगतिप्रायोग्यामष्टाविंशतिं बध्नतो देवगतिदेवानुपूर्वी-वैक्रियसप्तकानां बन्धावलिकाया अन्यन्तरे वर्तमानस्य चतुरशीतिरष्टाविंशतौ सङ्क्रामति। अथवा त्रिनवतिसत्कर्मणो मिथ्यादृष्टेर्नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो नरकगतिनरकानुपूर्वीवैक्रियसप्तकानां बन्धावलिकाया अन्यन्तरे वर्तमानस्य चतुरशीतिरष्टाविंशतौ सङ्क्रामति। तीर्थकरनामोपलक्षितसत्तास्थानरहितप्रथमचतुष्काध्रुवसत्तात्रिकलक्षणानि पञ्च सङ्क्रमस्थानानि षड्विंशत्यादिपतद्ग्रहेषु भवन्ति। तथा चाह—"ते च्चियेत्यादि" शेषेषु षड्विंशतिपञ्चविंशतित्रयोविंश-तिलक्षणेषु पतद्ग्रहेषु तान्येव पूर्वोक्तानि द्व्युत्तरशतादीनि षण्णवतिरहितानि द्व्यशीतियुतानि पञ्च सङ्क्रमस्थानानि सङ्क्रा-मन्ति। तथाहि—द्व्युत्तरशतं पञ्चनवतिस्त्रिनवतिश्चतुरशीतिर्द्व्यशीतिश्च। इत्थं ह्यध्रुवसत्तात्रिकं पूर्यते। प्रथमचतुष्काच्च द्व्युत्तरशतषण्णवतिलक्षणस्थानद्वयं जिननामोपलक्षितमपगच्छतीति यथोक्तानि पञ्च भवन्ति। तत्रैकेन्द्रियादीनां नैरयिकव-र्जितानां द्व्युत्तरशतसत्कर्मणां पञ्चनवतिसत्कर्मणां च तैजसकार्मणागुरुलघूपघातनिर्माणवर्णादिचतुष्कैकेन्द्रियजातिद्वीन्द्रियसं-

स्थानौदारिकशरीरतिर्यग्गतितिर्यगानुपूर्वीस्थावरबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगानादेयायशःकीर्तिपराघातोच्छ्वासातपोद्योतान्यतररूपामेकेन्द्रियप्रायोग्यां षड्विंशतिं बध्नतां द्व्युत्तरशतं पञ्चनवतिश्च तस्यामेव षड्विंशतौ सङ्क्रामति । तथा तेषामेवैकेन्द्रियादीनां देववर्जानां त्रिनवतिसत्कर्मणां देवनारकवर्जानां चतुरशीतिसत्कर्मणां च तामेव पूर्वोक्तां षड्विंशतिं बध्नतां त्रिनवतिश्चतुरशीतिश्च तस्यामेव षड्विंशतौ सङ्क्रामति । तथा तेषामेवैकेन्द्रियादीनां देवनारकमनुष्यवर्जानां द्व्यशीतिसत्कर्मणां तामेव पूर्वोक्तां षड्विंशतिं बध्नतां द्व्यशीतिस्तस्यामेव षड्विंशतौ सङ्क्रामति । अथ पञ्चविंशतिपतद्ग्रहे तान्येव पञ्च सङ्क्रमस्थानानि चिन्त्यन्ते—तत्रैकेन्द्रियपर्याप्तप्रायोग्यां पूर्वोक्तामेव षड्विंशतिमातपेनोद्योतेन वा रहितां पञ्चविंशतिं बध्नतामेकद्वित्रिचतुरिन्द्रियादीनां द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिसत्कर्मणां यथासङ्ख्यं तस्यामेव पञ्चविंशतौ द्व्युत्तरशतं पञ्चनवतिस्त्रिनवतिश्चतुरशीतिर्द्व्यशीतिश्च सङ्क्रामति । अथवाऽपर्याप्तविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुजप्रायोग्यां तैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणद्वीन्द्रियाद्यन्यतमजातिहुंडसंस्थानसेवार्तसंहननौदारिकशरीरौदारिकाङ्गोपाङ्गतिर्यग्गतितिर्यगानुपूर्वीत्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगानादेयायशःकीर्तिलक्षणां पञ्चविंशतिं बध्नतामेकद्वित्रिचतुःपञ्चेन्द्रियतिरश्चां द्व्युत्तरशतादिसत्कर्मणां पञ्चविंशतौ द्व्युत्तरशतादीनि पञ्च सङ्क्रमस्थानानि सङ्क्रामन्ति । तथाऽपर्याप्तैकैकेन्द्रियप्रायोग्यां वर्णादिचतुष्कागुरुलघूपघातनिर्माणतैजसकार्मणौदारिकशरीरहुंडसंस्थानैकेन्द्रियजातितिर्यग्गतितिर्यगानुपूर्वीबादरसूक्ष्मान्यतरस्थावरापर्याप्तप्रत्येकसाधारणान्यतरास्थिराशुभदुर्भगानादेयायशःकीर्तिलक्षणां त्रयोविंशतिं बध्नतामेकद्वित्रिचतुःपञ्चेन्द्रियतिरश्चां द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिस-

त्कर्मणां यथासङ्ख्यं ध्रुवोत्तरशतादीनि पञ्च सङ्क्रमस्थानानि सङ्क्रामन्ति । अत्र कश्चिदाशङ्कते—ननु सङ्क्रम्यमाणप्रकृतेर्दलिकं परमाण्वात्मकं यत्पतद्ग्रहप्रकृतिरूपतया परिणम्यते, नायं प्रकृतिसङ्क्रमः, किं तु प्रदेशसङ्क्रम एव । अथ प्रकृतिः स्वभावस्तत्सङ्क्रमः प्रकृतिसङ्क्रम इत्युच्यते तदयुक्तं, स्वभावस्यान्यत्र सङ्क्रमयितुमशक्यत्वात् । तत इत्थं विचार्यमाणः प्रकृतिसङ्क्रमो नोपपद्यते इति तत्प्रतिपादनं सकलमप्यभिप्रेतचित्रारोपणप्रायं । एवं स्थित्यनुभागसङ्क्रमावपि नोपपद्येते । स्थितिर्नाम नियतकालविशिष्टमवस्थानं । न च कालोऽन्यत्र सङ्क्रमयितुं शक्यते, अमूर्त्तत्वात् । अनुभागोऽपि रस उच्यते, स च परमाणूनां गुणः, गुणश्च गुणिनमन्तरेणान्यत्र नेतुमशक्यः, गुणिनां च परमाणूनां सङ्क्रमे प्रदेशसङ्क्रम एव प्रसज्यत इति न कश्चिदन्यः सङ्क्रमो युक्त इति । अत्रोच्यते—न हि वयं स्वभावस्थितिरसा विवक्षितपरमाणुभ्यः समाकृष्य परमाण्वन्तरेषु प्रक्षिप्यन्ते इत्येवं प्रकृतिसङ्क्रमादीनाचक्ष्महे, येन पूर्वोक्तदोषावकाशः स्यात्, किं तु स्वभावादित्रयाधारभूतपरमाणुरूपप्रदेशेषु परप्रकृतिषु सङ्क्रम्यमाणेषु सङ्क्रम्य च परप्रकृतिरूपतामापाद्यमानेषु पतद्ग्रहप्रकृतिरूपतापादनं प्रकृतिसङ्क्रमः, पतद्ग्रहप्रकृतिरूपतयैव नियतकालविशिष्टस्यावस्थानस्यापादनं स्थितिसङ्क्रमः, पतद्ग्रहप्रकृत्यनुयायिरसापादनं त्वनुभागसङ्क्रमः, परमाणूनां च प्रक्षेपणं प्रदेशसङ्क्रम इत्येवं स्वपरिणामविशेषरूपा एव प्रकृतिसङ्क्रमादय इष्यन्त इत्यदोष इति । अत एवैते परस्पराविनाभाविनः । तदुक्तं पञ्चसङ्ग्रहमूलटीकायां—"अमी प्रकृतिस्थित्यनुभागप्रदेशेषु सङ्क्रमा बन्धा उदया वा समकालं प्रवर्त्तन्त इति" । केवलं युगपदभिधातुं न शक्यन्ते, वाचः क्रमवर्त्तित्वात् । ततो यो यदा सङ्क्रमे वक्तुमिष्यते स तदानीं बुद्ध्या पृथक्कृत्वा सप्रपञ्चमुच्यत इति सर्वमुपपन्नं । ननु दलिकरसानां धर्मिद्वारा पृथिवीजलयोरिव मूर्त्तत्वादन्यभावसङ्क्रमणमस्तु,

कालश्चामूर्त्त इति तस्यान्यत्रावसङ्क्रमणमयुक्तं, मैवं, न खलु कालस्य सङ्क्रमणमस्माभिरिष्यते, किं तु स्थितेः, स्थितिश्चाप्रच्युतिलक्षणमवस्थानं, तच्च पूर्वमन्यप्रकृतिरूपतयाऽऽसीत्, सम्प्रति त्वन्यप्रकृतिरूपतया यदवस्थानापादनं स स्थितिसङ्क्रमः। न चायमनुपपन्नः, प्रत्यक्षसिद्धत्वात्। तथाहि—तृणादिपरमाणवः पूर्वं तृणादिरूपत्वेन स्थिताः, ततो लवणाकरेषु निपतिताः कालक्रमेण लवणरूपतयाऽवतिष्ठन्त इति। अस्तु वा स्थितिकालस्यैव सङ्क्रमणं, तदपि ऋतुसङ्क्रमणवददुष्टमेव। यथा हि वृक्षादिषु स्वभावतः क्रमेण देवतादिप्रयोगतो युगपदपि वा सर्वेऽपि ऋतवः सङ्क्रामन्ति, तत्तत्कार्यपुष्पफलादिदर्शनात्, तथेहापि जीवप्रयोगतः कर्मपरमाणुषु सातादिरूपताहेतुं कालमुपमृद्यासातादिरूपताहेतुः कालसङ्क्रमान्न विरुध्यत, इत्यदोष इति कृतं प्रसङ्गेन। तदेवमुक्तः प्रकृतिसङ्क्रमः ॥ २७ ॥

सम्प्रति स्थितिसङ्क्रमाभिधानावसरः। तत्र चैतेऽर्थाधिकाराः, तद्यथा—भेदो विशेषलक्षणं उत्कृष्टस्थितिसङ्क्रमप्रमाणं जघन्यस्थितिसङ्क्रमप्रमाणं साद्यादिप्ररूपणा स्वामित्वप्ररूपणा चेति। तत्र भेदविशेषलक्षणे प्रतिपादयन्नाह—

ठिइसंकमो त्ति वुच्चइ मूलुत्तरपगइतो उ जा हि ठिई। उव्वट्टिया व उव्वट्टिया व पगइं णिया वन्नं॥२८॥

व्याख्या—इह "मूलुत्तरपगइउं" इत्यत्र "हर्म्यात्प्रेक्षते" इत्यत्रेव ह्यब्लोपे पञ्चमी। ततोऽयमर्थः—हि स्फुटं मूलप्रकृतीरष्टसङ्ख्या उत्तरप्रकृतीश्चाष्टपञ्चाशदधिकशतसङ्ख्या आश्रित्य या स्थितिरुद्वर्त्तिता ह्रस्वीभूता सती दीर्घीकृताऽपवर्तिता वा दीर्घीभूता सती ह्रस्वीभूता कृताऽन्यां वा प्रकृतिं नीता पतद्ग्रहप्रकृतिस्थितिषु नीत्वा निवेशितेत्यर्थः, स स्थितिसङ्क्रम उच्यते। इदमुक्तं भवति—द्विविधः स्थितिसङ्क्रमः—मूलप्रकृतिविषय उत्तरप्रकृतिविषयश्च। आद्योऽष्टधा, तद्यथा—ज्ञाना-

वरणीयस्य यावदन्तरायस्य । द्वितीयोऽष्टपञ्चाशदधिकशतधा, तद्यथा—मतिज्ञानावरणीयस्य यावद(द्वीर्या)न्तरायस्य । तदेवं "मूलुत्तरपगईउ" इत्यनेन भेद उक्तः । "उवट्टिया व" इत्यादिना तु विशेषलक्षणं त्रिप्रकारं, तत्र कर्मपरमाणूनां ह्रस्वस्थितिकालतामपनीय दीर्घकालतया व्यवस्थापनं उद्वर्तना, तेषामेव दीर्घस्थितिकालतामपनीय ह्रस्वस्थितिकालतया व्यवस्थापनमपवर्तना, सङ्क्रम्यमाणप्रकृतिस्थितीनां पतद्ग्रहप्रकृतौ नीत्वा निवेशनं प्रकृत्यन्तरनयनं, स्थितीनां चान्यत्र निवेशनं स्थितियुक्तपरमाणुद्वाराऽवसेयं, स्थितेः साद्यादन्यत्र नेतुमशक्यत्वात् । इदं च विशेषलक्षणं सामान्यलक्षणमनुरुध्यैव प्रवर्तते, न तु तदपोह्यापि । ततो मूलप्रकृतीनां मिथः सङ्क्रमप्रतिषेधात्तासां प्रकृत्यन्तरनयनलक्षणः स्थितिसङ्क्रमो न भवति, किंतु द्वावेवोद्वर्तनापवर्तनालक्षणौ सङ्क्रमौ, उत्तरप्रकृतीनां तु त्रयोऽपि सङ्क्रमाः संभवन्तीति द्रष्टव्यम् ॥ २८ ॥

तदेवं प्रतिपादिते भेदविशेषलक्षणे । अथोत्कृष्टस्थितिसङ्क्रमपरिमाणप्रतिपादनार्थमाह—

तीसासत्तरि चत्तालीसा वीसुदहिकोडिकोडीणं । जेट्ठो आलिगदुगहा सेसाण वि आलियतिगूणो॥२९॥

व्याख्या—इह सर्वासां प्रकृतीनां बन्धमाश्रित्योत्कृष्टा स्थितिः प्रागेव बन्धनकरणे प्रदर्शिता । अत्र तु सङ्क्रमे उत्कृष्टा स्थितिश्चिन्त्यमाना द्विधा प्राप्यते—बन्धोत्कृष्टा सङ्क्रमोत्कृष्टा च । तत्र बन्धादेव या स्थितिरुत्कृष्टा सा बन्धोत्कृष्टा, या तु बन्धेऽबन्धे वा सति सङ्क्रमादुत्कृष्टा स्थितिर्लभ्यते सा सङ्क्रमोत्कृष्टा । तत्र यासामुत्तरप्रकृतीनां स्वस्वमूलप्रकृत्यपेक्षया स्थितेर्न्यूनता न भवति, किं तु तुल्यतैव, ता बन्धोत्कृष्टाः, ताश्च सप्तनवतिः—ज्ञानावरणपञ्चकं दर्शनावरणनवकं अन्तरायपञ्चकं आयुश्चतुष्टयं असातवेदनीयं नरकद्विकं तिर्यग्द्विकं एकेन्द्रियजातिः पञ्चेन्द्रियजातिः तैजससप्तकं औदारिकसप्तकं वैक्रि-

यसप्तकं नीलतिक्तवर्जमशुभवर्णादिसप्तकं अगुरुलघुपराघातोपघातोच्छ्वासातपोद्योतानि निर्माणं षष्ठसंस्थानसंहनने अशुभविहायोगतिः स्थावरनाम त्रसचतुष्कं अस्थिरषट्कं नीचैर्गोत्रं षोडश कषाया मिथ्यात्वं चेति । शेषास्त्वेकषष्टिः सङ्क्रमोत्कृष्टाः ताश्चेमाः—सातवेदनीयं सम्यक्त्वं सम्यग्मिथ्यात्वं नव नोकषाया आहारकसप्तकं शुभवर्णाद्येकादशकं नीलं तिक्तं देवद्विकं मनुजद्विकं द्वित्रिचतुरिन्द्रियजातयः अनन्त्यानि पञ्च संस्थानानि संहननानि च प्रशस्तविहायोगतिः सूक्ष्मं साधारणं अपर्याप्तं स्थिरषट्कं तीर्थकरोच्चैर्गोत्राणि च । तत्र बन्धोत्कृष्टानां मतिज्ञानावरणीयादिमिथ्यात्वषोडशकषायनरकद्विकादीनां यथाक्रमं त्रिंशत्सप्ततिचत्वारिंशद्विंशतिसागरोपमकोटीकोटिस्थितिकानां ज्येष्ठ उत्कृष्टस्थितिसङ्क्रमः "आवलियदुगह त्ति" आवलिकाद्विकहीनः । तथाहि—स्थितिर्बध्वा सती बन्धावलिकायामतीतायां सत्यां सङ्क्रामति । तत्राप्युदयावलिकासकलकरणायोग्येतिकृत्वोदयावलिकात उपरितनी सङ्क्रामति, उदयावलिकामात्रं त्वसङ्क्रान्तमेवावतिष्ठते । ततो बन्धोत्कृष्टानामुत्कृष्टस्थितिसङ्क्रम आवलिकाद्विकहीन एव प्राप्यते । इहोदयवतीनामनुदयवतीनां वा प्रकृतीनामुदयसमयादारभ्यावलिकामात्रा स्थितिरुदयावलिकेति पूर्वग्रन्थेषु व्यवह्रियते । अत्र च मिथ्यात्वस्य सप्ततिसागरोपमकोटाकोटिस्थितिकस्योत्कृष्टः स्थितिसङ्क्रमो यद्यप्यावलिकाद्विकहीन उक्तस्तथाप्यन्तर्मुहूर्त्तोनोऽवगन्तव्यः, यतो मिथ्यात्वस्योत्कृष्टां स्थितिं बद्ध्वा जघन्यतोऽप्यन्तर्मुहूर्त्तं मिथ्यात्व एव तिष्ठति, ततः सम्यक्त्वं प्रतिपद्य मिथ्यात्वस्य स्थितिमन्तर्मुहूर्त्तोनां सम्यक्त्वे सम्यग्मिथ्यात्वे च सङ्क्रमयति, ततोऽन्तर्मुहूर्त्तोन एवास्योत्कृष्टः स्थितिसङ्क्रमो लभ्यत इति । सत्तरीत्युपादानं च सूत्रेऽशेषाणामपि बन्धोत्कृष्टानां बाहुल्येनावलिकाद्विकहीनोत्कृष्टस्थितिसङ्क्रमव्याप्तिप्रदर्शनार्थं । शेषाणां सङ्क्रमोत्कृष्टानामावलिकात्रि-

कहीन उत्कृष्टस्थितिसङ्क्रमः । तथाहि—बन्धावलिकायामतीतायां सत्यामावलिकात उपरितनी स्थितिः सर्वाप्यन्यत्र प्रकृत्यन्तरे आवलिकाया उपरि सङ्क्रामति । तत्र च सङ्क्रान्ता सत्यावलिकामात्रं कालं यावत्सकलकरणायोग्येतिकृत्वा सङ्क्रमावलिकातिक्रमे उदयावलिकात उपरितनी स्थितिः ततोऽप्यन्यत्र प्रकृत्यन्तरे सङ्क्रामति । ततः सङ्क्रमोत्कृष्टानामुत्कृष्टः स्थितिसङ्क्रम आवलिकात्रिकहीन एव । तथाहि—नरकद्विकस्य विंशतिसागरोपमकोटाकोटिप्रमाणामुत्कृष्टां स्थितिं बध्वा बन्धावलिकात्यये आवलिकात उपरितनीं सर्वामपि तां स्थितिं मनुजद्विकं बध्नँस्तत्र मनुजद्विके सङ्क्रमयति । तत्र च सङ्क्रान्ता सत्यावलिकामात्रं कालं सकलकरणायोग्येति सङ्क्रमावलिकात्यये उदयावलिकात उपरितनीं तां देवद्विकं बध्नँस्तत्र सङ्क्रमयति । एवमन्यासामपि सङ्क्रमोत्कृष्टानामुत्कृष्टस्थितिसङ्क्रमे आवलिकात्रिकहीनत्वं भावनीयं ॥ २९ ॥

तदेवं बन्धे सति यासां सङ्क्रमाऽुत्कृष्टा स्थितिस्तासां प्रकृतीनामिदमुत्कृष्टस्थितिसङ्क्रमपरिमाणमुक्तम् । अथ यासां बन्धेन विना केवलात्सङ्क्रमादेवोत्कृष्टा स्थितिर्लभ्यते तासामुत्कृष्टस्थितिसङ्क्रमपरिमाणं निरूपयन्नाह—

मिच्छत्तस्सुक्कोसो निन्नमुहुत्तूणगो उ सम्मत्ते । मिस्सेवंतोकोडाकोडी आहारतित्थयरे ॥ ३० ॥

व्याख्या—मिथ्यात्वस्योत्कृष्टः स्थितिसङ्क्रमो निन्नमुहूर्त्तोनः । तथा सम्यक्त्वे सम्यक्त्वस्य सम्यक्त्वे मिश्रे वा मिश्रस्योत्कृष्टस्थितिसङ्क्रमो निन्नमुहूर्त्तोनः । तुशब्दस्याधिकार्थसंसूचकत्वादावलिकाद्विकहीनश्च द्रष्टव्यः । इयमत्र भावना—दर्शनमोहनीयत्रयसत्कर्मा मिथ्यादृष्टिरुत्कृष्टसंक्लेशे वर्तमानो मिथ्यात्वस्योत्कृष्टां स्थितिं बध्वा ततोऽन्तर्मुहूर्त्तमात्रानन्तरं मिथ्यात्वात्प्रतिपत्य विशुध्धिमासादयन् सम्यक्त्वं प्रतिपद्यते । ततो मिथ्यात्वस्य सप्ततिसागरोपमकोटाकोटिलक्षणामुत्कृष्टां स्थिति-

मन्तर्मुहूर्त्तोनां सम्यक्त्वे सम्यग्मिथ्यात्वे च सङ्क्रमयति, सा च तत्र सङ्क्रान्ता सती आवलिकामात्रं यावत्सकलकरणायोग्या। ततः सङ्क्रमावलिकायामतीतायामुदयावलिकात उपरितनीं सम्यक्त्वस्थितिमपवर्तनाकरणेन स्वस्थाने सङ्क्रमयति, सम्यग्मिथ्यात्वस्थितिमपि संक्रमावलिकायामतीतायामुदयावलिकात उपरितनीं सम्यक्त्वे सङ्क्रमयत्यपवर्तनाकरणेन स्वस्थाने च। तदेवं मिथ्यात्वस्यान्तर्मुहूर्त्तोनः सम्यक्त्वसम्यग्मिथ्यात्वयोस्त्वन्तर्मुहूर्त्तावलिकाद्विकहीन उत्कृष्टस्थितिसङ्क्रम इति स्थितं। ननु दर्शनत्रयसत्कर्मा मिथ्यादृष्टिः स एव यः पूर्वं सम्यग्दृष्टिर्भूत्वा प्रतिपतितस्तस्य च मिथ्यात्वोत्कृष्टस्थितिबन्धो न संभवति, "बंधेण न वोलइ कयावि" इत्यागमाद्भिन्नग्रन्थेः पतितस्यापि कोटाकोट्यधिकबन्धनिषेधात्, ततः सर्वमिदं निर्मूलमिति चेन्न, "बंधेण न वोलइ" इत्यस्य सिद्धान्तमतत्वात्, कार्मग्रन्थिकैः सम्यग्दृष्टेः पतितस्य मिथ्यात्वमागतस्योत्कृष्टस्थितिबन्धस्याप्यभ्युपगमात्, तस्य तथाविधरसाभावादेव विशेषसमर्थनादिति न कश्चिद्दोषः। इह तीर्थकरनाम्न आहारकसप्तकस्य चोत्कृष्टः स्थितिबन्धोऽन्तःसागरोपमकोटाकोटिप्रमाणः, सत्कर्माप्येतेषामेतावदेव। ततः किमेताः प्रकृतयो बन्धोत्कृष्टा उत सङ्क्रमोत्कृष्टा इति संशये सत्याह—"अंतो" इत्यादि, आहारके आहारकसप्तके तीर्थकरे च सङ्क्रमतः स्थितिसत्कर्मान्तःसागरोपमकोटाकोटी। अत एताः सङ्क्रमोत्कृष्टा द्रष्टव्याः। यद्यपि बन्धेऽप्येतासामन्तःसागरोपमकोटाकोटिप्रमाणं स्थितिसत्कर्म प्रतिपादितं तथापि बन्धोत्कृष्टायाः स्थितेः सकाशात् सङ्क्रमोत्कृष्टा स्थितिः सङ्ख्येयगुणा द्रष्टव्या, "बंधठिईउ संतकम्मठिई संखेज्जगुण त्ति" चूर्णिकृद्वचनात्। ननु नामकर्मण उत्कृष्टा स्थितिर्विंशतिसागरोपमकोटाकोटिप्रमाणा तत आहारकसप्तके तीर्थकरे च सङ्क्रमादुत्कृष्टा स्थितिः प्राप्यमाणा बन्धावलिकोदयावलिकारहिता विंशतिसागरोपमको-

टाकोटिप्रमाणैव लभ्यते, तत्कथमुच्यते तीर्थकराहारकसप्तकयोः सङ्क्रमतोऽप्युत्कृष्टा स्थितिरन्तःकोटाकोटिप्रमाणेति चेन्मैवं, अनयोः प्रकृत्यन्तरस्य स्थितिर्बन्धकाले सङ्क्रामति, नान्यदा, बन्धश्चानयोर्विशुद्धसम्यग्दृष्टेर्विशुद्धसंयतस्य च, विशुद्धसम्यग्दृष्टीनां विशुद्धसंयतानां च स्थितिसत्कर्म सर्वेषामपि कर्मणामायुर्वर्जानामन्तःसागरोपमकोटाकोटिप्रमाणं, नाधिकं, ततः सङ्क्रमोऽप्येतावन्मात्र एव भवति, नाधिक इति दोषाभावात्। उक्तं च पञ्चसंग्रहे—"तित्थयराहाराणं संकमणे बंध संतएसुं पि। अंतोकोडाकोडी तहा वि ता संकमुक्कोसा ॥ १ ॥ एवइय संतया जं सम्मद्दिट्ठीण सव्वकम्मेसु त्ति"। "एवइयसंतय त्ति" एतावत्येवान्तःकोटाकोटीप्रमाणैव सत्ता ॥ ३० ॥

सम्प्रति सर्वासां प्रकृतीनां बन्धोत्कृष्टानां सङ्क्रमोत्कृष्टानां वा सङ्क्रमकाले यावती स्थितिः प्राप्यते तावतीं निर्दिशति—

सव्वासिं जट्ठिइगो सावलिगो सो अहाउगाणं तु। बंधुक्कस्सुक्कसो साबाहूणिई य जट्ठिइगो ॥ ३१ ॥

व्याख्या—सर्वासां प्रकृतीनां सङ्क्रमो यत्स्थितिकः सङ्क्रमकाले या स्थितिर्विद्यते सा यत्स्थितिरित्युच्यते, ततो या स्थितिर्विद्यते यस्य स तथेति बहुव्रीहिः, स सावलिक आवलिकया सहितो द्रष्टव्यः, यः प्रागुक्तः संक्रमः स आवलिकया सहितः सन् यावान् भवति तावती सङ्क्रमकाले सर्वा स्थितिरित्यर्थः। ततो बन्धोत्कृष्टानामावलिकाहीना सङ्क्रमोत्कृष्टानां त्वावलिकाद्विकहीना सङ्क्रमकाले सर्वा स्थितिर्ज्ञातव्या। तथाहि—संक्लेशादिकारणवशत उत्कृष्टां स्थितिं बद्ध्वा बन्धावलिकातिक्रमे उदयावलिकात उपरितनी स्थितिः सङ्क्रमयितुमारभ्यते, ततो बन्धोत्कृष्टानामेकावलिकाहीना संक्रमोत्कृष्टानां तु बन्धावलिकासङ्क्रमावलिकयोरतीतयोरुदयावलिकातः परावर्तमाना

स्थितिरन्यत्र सङ्क्रम्यते, तेन सङ्क्रमोत्कृष्टानामावलिकाद्विकहीना सङ्क्रमकाले सर्वा स्थितिरवाप्यते। आयुषां तूत्कृष्ट इत्युत्कृष्टस्थितिसंज्ञवो बन्धोत्कृष्ट एव, न सङ्क्रमोत्कृष्टः, यतो न तेषां परस्परं सङ्क्रमः संज्ञवति, स च यत्स्थितिकः। आयुषां साबाधाऽबाधया सहिता सर्वा स्थितिरवगन्तव्या, केवलं "बंधुक्कस्साण आवलिगूणा ठिई जट्ठिइ त्ति" वचनाद्बन्धावलिकोना ऽष्टव्या। इहायुषो व्याघातज्ञाविन्यपवर्त्तना नियमाऽुदये सति प्रवर्तते, ततो न तामधिकृत्येह यत्स्थितिनिरूपणं। या तु निर्व्याघातज्ञाविन्यपवर्तना साऽनुदयेऽपि बन्धावलिकातिक्रमे सर्वदा प्रवर्तते। अपि च बन्धे प्रवर्तमान एव सति प्रथमादिसमयबद्धानां क्षतानां बन्धावलिकातिक्रमे ऽवर्तनापि ज्ञवति, ततो निर्व्याघातज्ञाव्यपवर्त्तनारूपे ऽवर्तनारूपे च स्वस्थानसङ्क्रमे यत्स्थितिरायुष आवलिकाहीना साबाधा सर्वा स्थितिर्ज्ञावनीया। तदेवमुक्तमुत्कृष्टस्थितिसङ्क्रमपरिमाणम् ३१

अथ जघन्यस्थितिसङ्क्रमपरिमाणप्रतिपादनावसरः। जघन्यस्थितिसङ्क्रमश्च द्विधा—स्वप्रकृतौ परप्रकृतौ च। ऽज्ञयत्रापुदयावलिकायां योऽन्तिमः संक्षोज्ञः स जघन्यः स्थितिसङ्क्रमस्तेनोदयावलिकाया बहिर्ज्ञागेऽपि यः प्रक्षेपः स जघन्यः स्थितिसङ्क्रमो न ज्ञवतीति सिद्धं। एतच्च लक्षणं निऽाद्विकातिरेकेण वेदितव्यं। तत्र स्वप्रकृतौ जघन्यस्थितिसङ्क्रमपरिमाणप्रतिपादनार्थमाह—

आवरणविग्घदंसणचऊक्कसोज्ञंतवेयगाऊणं। एगा ठिई जहन्नो जट्ठिइ समयाहिगावलिगा ॥ ३२ ॥

व्याख्या—"आवरण त्ति" पञ्चानां ज्ञानावरणीयप्रकृतीनां, "विग्घ त्ति" पञ्चानामन्तरायप्रकृतीनां, दर्शनचतुष्कस्य चक्षुरचक्षुरवधिकेवलदर्शनावरणलक्षणस्य, "सोज्ञंत त्ति" संज्वलनलोज्ञस्य, "वेयग त्ति" वेदकसम्यक्त्वस्य, चतुर्णां

चायुषां, सर्वसङ्ख्यया विंशतिप्रकृतीनां स्वस्वसत्ताव्यवच्छेदसमये समयाधिकावलिकाशेषायां स्थितौ उदयावलिका सकलकरणायोग्येतिकृत्वा तस्या उपरितनी समयमात्रा स्थितिरपवर्त्तनसङ्क्रमेणाधस्तन उदयावलिकात्रिभागे समयाधिके सङ्क्रामति, एष समयमात्रो जघन्यस्थितिसङ्क्रमो यत्स्थितिः, सर्वसङ्क्रमस्थितिपरिमाणमत्र समयाधिकावलिका ॥ ३२ ॥

निद्दादुगस्स एगा आवलियदुगं असंखभागो अ । जट्ठिइहासछक्के संखेज्जाउं समाउं उ ॥ ३३ ॥

व्याख्या—निद्राद्विकस्य निद्राप्रचलालक्षणस्य जघन्यस्थितिसङ्क्रमः स्वसङ्क्रमान्ते स्वस्थितेरुपरितनी एका समयमात्रा स्थितिः, साऽधस्तन्या आवलिकायास्त्रिभागे समयाधिके निक्षिप्यते, तदानीं च यत्स्थितिः सर्वा स्थितिरावलिकाद्विकं तृतीयस्याश्चावलिकाया असङ्ख्येयो भागः। अत्रायं वस्तुस्वभावः—यन्निद्राद्विकस्यावलिकाऽसङ्ख्येयभागाधिकावलिकाद्विकशेषायां स्थितावुपरितनी समयमात्रैका स्थितिः सङ्क्रामति, न तु मतिज्ञानावरणीयादीनामिव समयाधिकावलिकाशेषायामिति। अथ यासां परप्रकृतिषु पतद्ग्रहभूतासु संज्वली जघन्यः स्थितिसङ्क्रमस्ताः प्रतिपादयति—"हासच्छक्के"इत्यादि, हास्येनोपलक्षितं षट्कं हास्यषट्कं हास्यरत्यरतिशोकभयजुगुप्सालक्षणं, तस्य क्षपकेणापवर्तनाकरणेन सङ्ख्येयवर्षप्रमाणा स्थितिः कृता, ततः सा स्वनिर्लेपनावसरे संज्वलनक्रोधे प्रक्षिप्यमाणो जघन्यः स्थितिसङ्क्रमः ॥ ३३ ॥

सोणमुहुत्ता जट्ठिइ जहन्नबंधो उ पुरिससंजलणे । जट्ठिइ सगुणजुत्तो आवलियदुगूणगो तत्तो ॥ ३४ ॥

व्याख्या—सङ्क्रमणकाले सैव सङ्ख्येयवर्षप्रमाणा स्थितिः सोनमुहूर्त्तान्तर्मुहूर्त्तेनाभ्यधिका यत्स्थितिः सर्वा स्थितिः । तथाहि अन्तरकरणे वर्त्तमानस्तां सङ्ख्येयवर्षप्रमाणां स्थितिं संज्वलनक्रोधे सङ्क्रमयति । अन्तरकरणे च कर्मदलिकं न वि(वे)द्यते, किंतु

तत ऊर्ध्वं, ततोऽन्तरकरणकालेनाऽन्यधिका सङ्ख्येयवर्षप्रमाणा स्थितिर्हास्यषट्कस्य जघन्यस्थितिसङ्क्रमकाले यत्स्थितिः । इमां च सङ्ख्येयवर्षप्रमाणां स्थितिमपवर्तनाकरणेनापवर्त्य संज्वलनक्रोधस्योदयावलिकायां प्रक्षिपतीति प्रतिपत्तव्यं, अन्यथा स्थितेः प्रभूतत्वादुदयावलिकाया बहिर्भागेऽपि प्रक्षेपः स्यात्, तथा चान्यप्रकृतेरुदयावलिकायां योऽन्तिमः संक्षोभः स जघन्यः स्थितिसङ्क्रम इति वचनं विरुध्येत । पुरुषवेदस्य संज्वलनानां च यो जघन्यः स्थितिबन्धः प्रागुक्तः, तद्यथा—पुरुषवेदस्याष्टौ संवत्सराणि, संज्वलनक्रोधस्य मासद्वयं, संज्वलनमानस्य मासः, संज्वलनमायाया अर्धमासः, स एव जघन्यः स्थितिबन्धोऽबाधाकालोनस्तेषां जघन्यः स्थितिसङ्क्रमः । अबाधारहिता हि स्थितिरन्यत्र सङ्क्रामति, तत्रैव कर्मदलिकसंज्ञावादबाधाकालोनायाः कर्मस्थितेरेव कर्मनिषेकरूपत्वात् । जघन्यस्थितिबन्धे चान्तर्मुहूर्त्तप्रमाणैवाबाधा । न च जघन्यस्थितिसङ्क्रमणकालेऽबाधाकालमध्ये प्राग्बद्धं सत्कर्म प्राप्यते, तस्य तदानीं सर्वस्यापि क्षीणत्वात्, ततः पुरुषवेदादीनामन्तर्मुहूर्त्तोना स्वस्वा जघन्यस्थितिर्जघन्यस्थितिसङ्क्रमः, तदानीं चैतेषां यत्स्थितिः स्वकीयेनोनेनाबाधाकालक्षणेनान्तर्मुहूर्त्तेन युक्तो जघन्यः स्थितिबन्धः । ततः पुनरप्यावलिकाद्विकेनोनो द्रष्टव्यः । आवलिकाद्विकोनत्वं कथमिति चेदुच्यते—बन्धव्यवच्छेदानन्तरं बन्धावलिकायामतीतायां चरमसमयबद्धाः पुरुषवेदादिप्रकृतिलताः सङ्क्रमयितुमारभ्यन्ते, आवलिकामात्रेण च कालेन ताः सङ्क्रम्यन्ते, सङ्क्रमावलिकाचरमसमये च जघन्यः स्थितिसङ्क्रमः प्राप्यते । ततो बन्धावलिकासङ्क्रमावलिकारहित एवाबाधासहितो जघन्यस्थितिबन्धो जघन्यस्थितिसङ्क्रमकाले सर्वा स्थितिः ॥ ३४ ॥

केवलिसत्कर्मणां जघन्यस्थितिसङ्क्रमप्ररूपणार्थमाह—

जोगंतिगाणमंतोमुहुत्तिउं सेसियाण पल्लस्स । भागो असंखियतमो जहिण्णो आवलिगाइ सह ॥३५॥

व्याख्या—"जोगंतियाण अं(णमं)तोमुहुत्तिउं" योगिनि सयोगिकेवलिनि सङ्क्रममाश्रित्यान्तो यासां ता योग्यन्तिका नरकद्विकतिर्यग्द्विकाद्यजातिचतुष्टयस्थावरसूक्ष्मसाधारणातपोद्योतवर्जाः शेषा नाम्नो नवतिप्रकृतयः सातासातवेदनीयोच्चैर्गोत्रनीचैर्गोत्राणि च, तासां जघन्यस्थितिसङ्क्रमोऽन्तर्मुहूर्त्तप्रमाणः । तथाहि—एतासां सयोगिकेवलिचरमसमयेऽन्तर्मुहूर्त्तप्रमाणा स्थितिर्विद्यते, सा च तस्मिन्नेव समये सर्वापवर्तनयाऽपवर्त्यायोग्यवस्थाप्रमाणा क्रियते, अयोग्यवस्था चान्तर्मौहूर्त्तिकी, केवलमिदमन्तर्मुहूर्त्तं लघुतरमवसेयं, सर्वापवर्तनया चापवर्त्यते स्थितिरुदयावलिकया रहितोदयावलिकया सकलकरणायोग्यत्वेनानपवर्तनीयत्वात्, ततोऽपवर्त्यमानोदयावलिकारहिता सा जघन्यस्थितिसङ्क्रमः, तया च सहितापवर्तनारूपजघन्यस्थितिसङ्क्रमकाले तासां यत्स्थितिः । नन्वासां प्रकृतीनामयोगिकेवलिनि समयाधिकावलिकाशेषायां स्थितौ वर्तमाने जघन्यस्थितिसङ्क्रमः कुतो नोच्यते क्षीणकषाय इव मतिज्ञानावरणीयादीनां ? उच्यते—अयोगिकेवलिनः सकलसूक्ष्मबादरयोगरहितत्वेन निष्क्रियस्य करणमात्राप्रवर्तकत्वात् । शेषाः प्रकृतीरधिकृत्याह—"सेसियाण" इत्यादि, उक्तशेषाणां प्रकृतीनां स्त्यानर्द्धित्रिकमिथ्यात्वसम्यग्मिथ्यात्वानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणनपुंसकस्त्रीवेदनरकद्विकतिर्यग्द्विकाद्यजातिचतुष्टयस्थावरसूक्ष्मातपोद्योतसाधारणलक्षणानां द्वात्रिंशत्सङ्ख्यानां स्वस्वरूपणकाले यश्चरमसंज्वलनः पल्योपमासङ्ख्येयभागमात्रः, स जघन्यः स्थितिसङ्क्रमः, यत्स्थितिकस्तु स्वकालीनः सर्वस्थितियुक्तस्तु सङ्क्रम आवलिकया सह युक्तो वेदितव्यः ।

श्यं च यत्स्थितिः स्त्रीनपुंसकवेदावतिरिच्यान्निहिता ज्ञष्टव्या, यतः स्त्रीनपुंसकवेदवर्जानां शेषप्रकृतीनामेकामधस्तादावलिकां मुक्त्वा शेषमुपरितनं पल्योपमासङ्ख्येयभागमात्रं चरमखण्डमन्यत्र सङ्क्रमयति, ततस्तासां जघन्यस्थितिसङ्क्रमकाले यत्स्थितिः स एव जघन्यस्थितिसङ्क्रम आवलिकयाऽन्यधिको भवति। स्त्रीनपुंसकवेदयोस्तु चरमं स्थितिखण्डमन्तरकरणे स्थिते न सङ्क्रम्यते, अन्तरकरणे च कर्मदलिकं न वि(वे)द्यते, किं तु तत ऊर्ध्वं। अन्तरकरणं चान्तर्मुहूर्त्तप्रमाणं, ततोऽन्तर्मुहूर्त्तयुक्तो जघन्यस्थितिसङ्क्रमस्तयोर्यत्स्थितिः संभवतीति ॥ ३५ ॥

तदेवमुक्तं जघन्यस्थितिसङ्क्रमपरिमाणं सम्प्रति साद्यनादिप्ररूपणावसरः। सा च द्विधा—मूलप्रकृतीनामुत्तरप्रकृतीनां च। तत्र मूलप्रकृतीनां साद्यनादिप्ररूपणामाह—

मूलठिई अजहन्नो सत्तण्ह तिहा चउव्विहो मोहे। सेसविगप्पा तेसिं दुविगप्पा संकमे होंति ॥३६॥

व्याख्या—मूलस्थितिसङ्क्रमे मोहनीयवर्जानां सप्तानां कर्मणामजघन्यः स्थितिसङ्क्रमस्त्रिधा—अनादिर्ध्रुवोऽध्रुवश्चेति। तथाहि—ज्ञानावरणदर्शनावरणान्तरायाणां क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य जघन्यः स्थितिसङ्क्रमो भवति। नामगोत्रवेदनीयायुषां तु सयोगिकेवलिचरमसमयेऽन्तर्मुहूर्त्तप्रमाण उदयावलिकारहितो जघन्यस्थितिसङ्क्रमः संभवति। स च सादिरध्रुवश्च। तस्मादन्यः सर्वोऽपि स्थितिसङ्क्रमोऽजघन्यः, स चानादिः। ध्रुवोऽभव्यानां, भव्यानामध्रुवः। मोहे मोहनीयेऽजघन्यः स्थितिसङ्क्रमश्चतुर्विधः—सादिरनादिर्ध्रुवोऽध्रुवश्चेति। तथाहि—मोहनीयस्य जघन्यः स्थितिसङ्क्रमः क्षपकसूक्ष्मसंपरायस्य समयाधिकावलिकायां शेषायां भवति, ततोऽसौ सादिरध्रुवः। तस्माच्च जघ-

न्यादन्यः सर्वोऽप्यजघन्यः, स च क्षायिकसम्यग्दृष्टेरुपशान्तमोहगुणस्थानके न भवति, ततः प्रतिपाते च भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः । अध्रुवध्रुवौ भव्याभव्यापेक्षया । शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणाः तेषां कर्मणां त्रिविकल्पा भवन्ति सादयोऽध्रुवाश्च । तथाहि—उत्कृष्टां स्थितिं बध्नन्नेवोत्कृष्टस्थितिसङ्क्रमं करोति, स्थितिं चोत्कृष्टामुत्कृष्टसंक्लेशवर्ती बध्नाति, उत्कृष्टसंक्लेशश्च सर्वदा न लभ्यते, किंत्वन्तरान्तरा । उत्कृष्टस्थितिबन्धसङ्क्रमाभावकाले चानुत्कृष्टइत्येतौ द्वावपि साद्यध्रुवौ, जघन्यश्च साद्यध्रुवः प्रागेव भावितः ॥ ३६ ॥

अथोत्तरप्रकृतीनां साद्यनादिप्ररूपणामाह—

धुवसंतकम्मिगाणं तिहा चउहा चरित्तमोहाणं । अजहन्नो सेसेसु य दुहेतरासिं च सव्वत्थ ॥ ३७ ॥

व्याख्या—नरकद्विकमनुजद्विकदेवद्विकवैक्रियसप्तकाहारकसप्तकतीर्थकरनामसम्यक्त्वसम्यग्मिथ्यात्वोच्चैर्गोत्रायुश्चतुष्टयः लक्षणा अष्टाविंशतिरध्रुवसत्कर्मिकाः प्रकृतयः । ततः शेषं त्रिंशदुत्तरं शतं ध्रुवसत्कर्मिकाणां भवति । ततोऽपि चारित्रमोहनीयप्रकृतयः पञ्चविंशतिरपनीयन्ते, पृथग्वक्ष्यमाणत्वात् । ततः शेषस्य पञ्चोत्तरशतस्य स्वस्वरूपणपर्यवसाने जघन्य स्थितिसङ्क्रमो भवति, स च सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः, स चानादिः, ध्रुवश्चाभव्यापेक्षया, भव्यापेक्षया चाध्रुव इति त्रिधा । चारित्रमोहनीयप्रकृतीनां पञ्चविंशतेरजघन्यः स्थितिसङ्क्रमश्चतुर्धा—सादिरनादिर्ध्रुवोऽध्रुवश्चेति । तथाहि—उपशमश्रेणावुपशान्तानां तासां सङ्क्रमाभाव उपशमश्रेणितः प्रतिपाते च पुनरप्यजघन्यः स्थितिसङ्क्रम आरभ्यत इत्यसौ सादिः, तत्स्थानमप्राप्तस्यानादिः । अध्रुवध्रुवौ भव्याभव्यापेक्षया । शेषेषूत्कृष्टानुत्कृष्टजघन्येषु द्विधा विकल्पः

सादिरध्रुवश्चेति । तत्रोत्कृष्टानुत्कृष्टयोर्भावना मूलप्रकृतिवत्कार्या । जघन्यस्थितिसङ्क्रमस्तु स्वस्वक्षयावसरे प्राप्यत इत्यसौ सादिरध्रुवश्च । इतरासामध्रुवसत्कर्मणामष्टाविंशतिसङ्ख्यानां प्रागुक्तानां सर्वत्रापि सर्वेष्वपि जघन्याजघन्योत्कृष्टानुत्कृष्टेषु सङ्क्रमेषु त्रिधा विकल्पः—सादिरध्रुवश्चेति । सा च साद्यध्रुवताऽध्रुवसत्कर्मत्वादेवावसेया ॥ ३७ ॥

अथ क्रमप्राप्तं स्वामित्वमभिधेयं । तच्च त्रिधा—उत्कृष्टस्थितिसङ्क्रमस्वामित्वं जघन्यस्थितिसङ्क्रमस्वामित्वं च । तत्राद्य मधिकृत्याह—

बंधाउं उक्कस्सो जासिं गंतूण आवलिगं परउं । उक्कस्स सामिउं संकमेण जासिं दुगं तासिं ॥ ३८ ॥

व्याख्या—यासां प्रकृतीनां बन्धादुत्कृष्टः स्थितिबन्धो भवति, तासां त एवोत्कृष्टस्थितिबन्धका देवनैरयिकतिर्यग्मनुष्या बन्धावलिकां गत्वा परतो बन्धावलिकायामतीतायामित्यर्थः, उत्कृष्टस्वामिन उत्कृष्टस्थितिसङ्क्रमस्वामिनः । यासां पुनरुत्कृष्टा स्थितिः सङ्क्रमेण प्राप्यते, तासां त्रिकं बन्धावलिकासङ्क्रमावलिकालक्षणं गत्वा परत उत्कृष्टस्थितिसङ्क्रमस्वामिनो भवन्ति ॥ ३८ ॥

तस्संतकम्मगो बंधिऊण उक्कस्सियं मुहुत्तंता । सम्मत्तमीसगाणं आवलिगा सुद्धदिट्ठीउं ॥ ३९ ॥

व्याख्या—तत्सत्कर्मा सम्यक्त्वसम्यग्मिथ्यात्वसत्कर्मा मिथ्यादृष्टिर्बध्वोत्कृष्टां सप्ततिकोटाकोटिसागरोपमप्रमाणां ततोऽन्तर्मुहूर्त्तादनन्तरं मिथ्यात्वात् प्रतिपत्य सम्यक्त्वमालम्बते, स शुद्धदृष्टिरन्तर्मुहूर्त्तोनामुत्कृष्टां मिथ्यात्वस्थितिं सम्यक्त्वे सम्यग्मिथ्यात्वे च सङ्क्रमयति । ततः सङ्क्रमावलिकायामतीतायामुदयावलिकात उपरितनीं स्थितिमपवर्तनाकरणेन

स्वस्थाने सङ्क्रमयति । सम्यग्मिथ्यात्वस्थितिं च सम्यक्त्वे सङ्क्रमयत्यपवर्तयति च । ततो दर्शनमोहत्रयस्याप्युत्कृष्टस्थिति-सङ्क्रमस्वामी सम्यग्दृष्टिरेव ॥ ३९ ॥

उक्त उत्कृष्टस्थितिसङ्क्रमस्वामी । अथ जघन्यस्थितिसङ्क्रमस्वामिनिरूपणां चिकीर्षुराह—

दंसणचउक्कविग्घावरणं समयाहियालिगा जओ।णिद्दाणा(ण आ)वलिगदुगे आवलियअसंखतमसेसे

व्याख्या—दर्शनचतुष्कं चक्षुरचक्षुरवधिकेवलदर्शनावरणीयलक्षणं विघ्नाः पञ्चान्तराया आवरणानि पञ्च ज्ञानावरणानि, एतावतीनां प्रकृतीनां समयाधिकावलिकाशेषे वर्तमानः "जओ त्ति" क्षीणकषायवीतरागछद्मस्थो जघन्यस्थिति-सङ्क्रमस्वामी । तथा निद्रयोर्निद्राप्रचलयोः स एवावलिकाद्विके तृतीयस्याश्चावलिकाया असङ्ख्येयतमे भागे शेषे वर्तमानो जघन्यस्थितिसङ्क्रमस्वामी ॥ ४० ॥

समयाहिगालिगाए सेसाए वेयगस्स कयकरणे। सक्कवगचरमखंडगसंछुभणे दिट्ठिमोहाणं ॥ ४१ ॥

व्याख्या—कृतकरणो दर्शनमोहनीयक्षपणाय प्रवर्तितकरणो मनुष्यो जघन्यतोऽपि वर्षाष्टकस्योपरिवर्तमानो मिथ्यात्वसम्यग्मिथ्यात्वे क्षपयित्वा सम्यक्त्वं सर्वापवर्तनयाऽपवर्त्य क्षपितशेषसम्यक्त्वश्चतुर्गतिको भूत्वा चतसृणां गतीनामन्यतमस्यां गतौ गत्वा वेदकसम्यक्त्वस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमान उदयावलिकात उपरितनीं समयमात्रां स्थितिमपवर्तनासङ्क्रमेणाधस्तने स्वोदयावलिकात्रिभागे समयाधिके प्रक्षिपँश्चतसृणामन्यतमस्यां गतौ वर्तमानस्तस्य जघन्य-स्थितिसङ्क्रमस्वामी । दृष्टिमोहयोर्मिथ्यात्वसम्यग्मिथ्यात्वयोर्मनुष्योऽविरतसम्यग्दृष्टिर्देशविरतः प्रमत्तोऽप्रमत्तो वा स्वक-

पकः क्षपणकाले सर्वापवर्तनेनापवर्त्य कृतस्य चरमखण्डस्य पल्योपमासङ्ख्येयभागमात्रस्य "संबुज्झणे त्ति" प्रक्षेपणे जघन्यस्थितिसङ्क्रमस्वामी ॥ ४१ ॥

समउत्तरावलियाए लोभे सेसाइ सुहुमरागस्स । पढमकसायाण विसंजोयणसंछोभणाए उ ॥ ४२ ॥

व्याख्या—समयोत्तरावलिकायां शेषायां लोभे सप्तम्याः षष्ठ्यर्थत्वात् संज्वलनलोभस्य सूक्ष्मरागस्य सूक्ष्मसंपरायस्योदयावलिकात उपरितन्याः समयमात्रायाः स्थितेरपवर्तनासङ्क्रमेणाधस्तने स्वोदयावलिकात्रिभागे समयाधिके प्रक्षेपाज्जघन्यस्थितिसङ्क्रम इति स एव तज्जघन्यस्थितिसङ्क्रमस्वामी। प्रथमकषायाणामनन्तानुबन्धिनां विसंयोजने विनाशने या चरमा पल्योपमासङ्ख्येयभागमात्रा संछोभना प्रक्षेपणं तत्र वर्तमानश्चतुर्गतिकानामन्यतमः सम्यग्दृष्टिर्जघन्यस्थितिसङ्क्रमस्वामी ॥ ४२ ॥

चरमसजोगे जा अत्थि तासि सो चेव सेसिगाणं तु। खवगक्कमेण अणियट्टि बायरो वेयगो वेए ॥ ४३ ॥

व्याख्या—सयोगे सयोगिकेवलिनि याश्चतुर्नवतिसङ्ख्याः प्रागुक्ताः प्रकृतयस्तासां स एव सयोगिकेवली चरमापवर्तने वर्तमानो जघन्यस्थितिसङ्क्रमस्वामी । शेषाणां तु स्त्यानर्द्धित्रिकनामत्रयोदशकाष्टकषायनवनोकषायसंज्वलनक्रोधमानमायालक्षणानां षट्त्रिंशत्प्रकृतीनां क्षपणक्रमेण चरमे पल्योपमासङ्ख्येयभागमात्रे संछोभे वर्तमानोऽनिवृत्तिबादरो जघन्यस्थितिसङ्क्रमस्वामी भवति । "वेदे त्ति" वेदस्य वेदकः स्वोदये वर्तमानः क्षपकोऽनिवृत्तिबादरश्चरमसङ्क्रमं कुर्वन् जघन्यस्थितिसङ्क्रमस्वामी वेदितव्यः । अन्येन हि वेदेन क्षपकश्रेणिमारूढस्य वेदान्तरस्य जघन्यस्थितिसङ्क्रमो न लभ्यते, येन वेदेन क्षपकश्रेण्यारोहस्तस्यैव वेदस्योदयोदीरणापवर्तनादिनिर्बह्व्याः स्थितेर्बहूनां च पुञ्जानां परिशटनात् । एवं हि नपुंसकवेदेन

यद्यपि क्षपकश्रेणिमारूढः स्त्रीवेदनपुंसकवेदौ युगपत् क्षपयति तथापि नपुंसकवेदस्यैव जघन्यस्थितिसङ्क्रमः प्राप्यते, न स्त्रीवेदस्य, उदयोदीरणयोरन्यावात्, स्त्रीवेदेन च प्रतिपन्नो नपुंसकवेदक्षयानन्तरमन्तर्मुहूर्त्तेन कालेन स्त्रीवेदं क्षपयति। पुरुषवेदेनापि च प्रतिपन्नस्य यद्यप्येतावानेव कालो लभ्यते तथापि तस्य स्त्रीवेदसत्कोदयोदीरणे न भवत इत्येतावता कालेन स्त्रीवेदप्रतिपन्नस्यैवोदयोदीरणाभ्यां बह्व्याः स्थितेस्तुल्यमानत्वात् तस्यैव स्त्रीवेदजघन्यस्थितिसङ्क्रमः, न शेषस्य। तथा पुरुषवेदेन क्षपकश्रेणिं प्रतिपन्नो हास्यादिषट्कक्षयानन्तरं पुरुषवेदं क्षपयति, अन्यथा तु हास्यादिषट्कसहितं उदितस्य च वेदस्योदीरणाया अपि प्रवृत्तेः प्रभूता स्थितिस्तुल्यतीति पुरुषवेदस्यापि पुरुषवेदारूढस्यैव जघन्यस्थितिसङ्क्रमो न शेषस्य। आयुषां तु चतुर्णां स्वस्वभवव्यवच्छेदसमये समयाधिकावलिकायां शेषायां वर्तमानः समयमात्रामुपरितनीं स्थितिं स्वस्वोदयावलिकात्रिभागेऽधस्तने समयाधिके प्रक्षिपन् जघन्यस्थितिसङ्क्रमस्वामी द्रष्टव्यः ॥ ४३ ॥

तदेवमुक्तः स्थितिसङ्क्रमः। अथानुभागसङ्क्रमाभिधानावसरः। तत्र चैतेऽर्थाधिकारास्तद्यथा—भेदः स्पर्द्धकप्ररूपणा विशेषलक्षणप्ररूपणा उत्कृष्टानुभागसङ्क्रमप्ररूपणा जघन्यानुभागसङ्क्रमप्ररूपणा साद्यनादिप्ररूपणा स्वामित्वं चेति। तत्र भेदप्ररूपणामाह—

मूलुत्तरपगइगउं अणुभागो संकमो जहा बंधे। फड्डगणिद्देसो सिं सव्वेयरघायऽघाईणं ॥ ४४ ॥

॥११५॥

व्याख्या—अनुभागेऽनुभागविषये सङ्क्रमो मूलोत्तरप्रकृतिगतो मूलप्रकृत्यनुभागसङ्क्रम उत्तरप्रकृत्यनुभागसङ्क्रमश्चेति द्विविध इत्यर्थः। ते च मूलोत्तरप्रकृतिभेदा यथा बन्धे बन्धशतकेऽभिहितास्तथाऽत्रापि द्रष्टव्याः। कृता भेदप्ररूपणा,

स्पर्द्धकप्ररूपणामाह—"फड्डुगेत्यादि," आसां सर्वघातिनीनां देशघातिनीनामघातिनीनां च प्रकृतीनां स्पर्धकनिर्देशो यथा शतके कृतस्तथाऽत्रापि कर्तव्यः। इह चैतत्प्ररूपणा पीठिकायामेव कृतेति नेह भूयस्तन्यते ॥ ४४ ॥

दर्शनमोहनीयस्पर्धकप्ररूपणां विशेषजिज्ञापयिषयाऽऽह—

सव्वेसु देसघाईसु सम्मत्तं तदुवरिं तु वा मिस्सं। दारुसमाणस्साणंतमो त्ति मिच्छत्तमुप्पिमउं ॥ ४५ ॥

व्याख्या—इह दर्शनमोहनीयसत्कर्म प्रतीत्य द्विविधानि रसस्पर्धकानि भवन्ति देशघातीनि सर्वघातीनि च। तत्र यानि देशघातिस्पर्धकान्येकस्थानिकरसानि द्विस्थानिकरसानि वा तेषु सर्वेष्वपि सम्यक्त्वं। यत्र देशघातीनिस्पर्धकानि निष्ठितानि तदुपरि तु मिश्रं सम्यग्मिथ्यात्वस्य स्पर्धकानि भवन्ति। तानि च कियद्भवन्ति ?, वाशब्दस्य यावदित्यर्थस्य भिन्नक्रमस्येह योजनात्, यावत् दारुसमान इति "लतादार्वस्थिशैलाख्या एकस्थानादयो रसाः" इतिग्रन्थशैल्या द्विस्थानको रसस्तस्य सम्बन्धिनां स्पर्धकानामनन्ततमो भागो गतो भवतीति। ततो यत्र सम्यग्मिथ्यात्वस्पर्धकानि निष्ठितान्यत उपरि द्विस्थानकत्रिस्थानकचतुःस्थानकरसोपेतानि स्पर्धकानि सर्वाण्यपि मिथ्यात्वस्योपढौकन्ते ॥ ४५ ॥

कृता स्पर्धकप्ररूपणा। अथ विशेषलक्षणप्ररूपणामाह—

तइयपयं उव्वट्टिया व उव्वट्टिया व अविभागा। अणुभागसंकमो एस अन्नपगइं णिया वावि ॥ ४६ ॥

व्याख्या—तत्रानुभागसङ्क्रमेऽर्थपदं विशेषनिर्धारणमिदं यदुतोद्वर्तिताः प्रभूतीकृता यद्वाऽपवर्तिता ह्रस्वीकृता अथवान्यां प्रकृतिं नीता अन्यप्रकृतिस्वभावेन परिणमिता अविभागा अनुभागा एष सर्वोऽप्यनुभागसङ्क्रमः। तत्र मूलप्रकृ-

तीनामुद्वर्तनापवर्तनरूपौ द्वावेव सङ्क्रमौ, नान्यप्रकृतिनयनरूपस्तृतीयोऽपि, तासां मिथः सङ्क्रमाभावात्, उत्तरप्रकृतीनां तु त्रयोऽपि संभवन्ति ॥ ४६ ॥

उक्तं विशेषलक्षणं, अथोत्कृष्टानुभागसङ्क्रमप्रमाणप्रतिपादनार्थमाह—

दुविहपमाणे जेट्ठो सम्मत्ते देसघाइ दुट्ठाणे । नरतिरियाऊ आयवमिस्से वि य सव्वघाइम्मि ॥ ४७ ॥

व्याख्या—द्विविधे प्रमाणे स्थानप्रमाणे घातित्वप्रमाणे च ज्येष्ठ उत्कृष्टोऽनुभागसङ्क्रमः सम्यक्त्वस्य देशघातिनि द्विस्थानके रसस्पर्द्धके सङ्क्रम्यमाणे वेदितव्यः, सम्यक्त्वस्य घातित्वमाश्रित्य देशघातिस्थानमाश्रित्य च सर्वोत्कृष्टं द्विस्थानकरसोपेतं स्पर्धकपटलं यदा सङ्क्रामति तदा तस्योत्कृष्टोऽनुभागसङ्क्रम इत्यर्थः, अस्यैकस्थानकोऽनुभागो जघन्यत्वादेव त्यज्यते, त्रिस्थानचतुःस्थानकौ च न भवत एव । तथा नरायुस्तिर्यगायुरातपसम्यग्मिथ्यात्वानां स्थानं प्रतीत्य सर्वोत्कृष्टद्विस्थानकरसोपेते घातित्वमाश्रित्य सर्वघातिनि रसस्पर्धके उत्कृष्टोऽनुभागसङ्क्रमः, नरतिर्यगायुरातपसम्यग्मिथ्यात्वानां सर्वोत्कृष्टं द्विस्थानकरसोपेतं सर्वघातिरसस्पर्धकं यदा सङ्क्रामति तदा स तेषामुत्कृष्टोऽनुभागसङ्क्रम इत्यर्थः । अत्र सम्यग्मिथ्यात्वस्य रसः सर्वोऽपि सर्वघाती द्विस्थानिकश्च विद्यते,न शेष इति शेषसङ्क्रमप्रतिषेधः । आतपमनुष्यतिर्यगायुषां तु "दुतिचउठाणाउ सेसाउ" इतिवचनात् द्वित्रिचतुःस्थानकरससंभवेऽपि तथास्वाभाव्यात्त्रिस्थानकचतुःस्थानकरसस्पर्धकानामुद्वर्तनापवर्तनाप्रकृत्यन्तरनयनरूपस्त्रिप्रकारोऽपि सङ्क्रमो न भवतीति द्विस्थानकस्यैव ग्रहणं, ज्ञापकं चात्रैतद्वचनमेव, सर्वघातिप्रकृत्यन्तररससम्बन्धाच्चैतेषां रसः सर्वघाती, न त्वघाती । ततो देशघात्यघातिरसप्रतिषेध इति द्रष्टव्यम् ॥ ४७ ॥

सेसासु चउठाणे मंदो सम्मत्तपुरिससंजलणे । एगठाणे सेसासु सव्वघाइंमि दुठाणे ॥ ४८ ॥

व्याख्या—शेषाणामुक्तव्यतिरिक्तानां प्रकृतीनां स्थानमाश्रित्य सर्वोत्कृष्टश्चतुःस्थानको घातित्वमाश्रित्य सर्वघाती रसः स्वीयः साहचर्यजनितो वा यदा सङ्क्रामति तदा स तासामुत्कृष्टोऽनुभागसङ्क्रमः । उक्तमुत्कृष्टानुभागसङ्क्रमप्रमाणं । अथ जघन्यानुभागसङ्क्रमप्रमाणं प्रतिपादयति—"मंदो" इत्यादि, सम्यक्त्वस्य पुरुषवेदस्य संज्वलनानां चैकस्थानके रसे सङ्क्रामति सति मन्दो जघन्यानुभागसङ्क्रमो ज्ञेयः । इदमुक्तं भवति—सम्यक्त्वस्य सर्वशुद्ध एकस्थानको रसो यदा सङ्क्रामति तदा स तस्य जघन्यानुभागसङ्क्रमः । पुरुषवेदसंज्वलनानां च क्षपणकाले यानि समयोनावलिकाद्विकबद्धान्येकस्थानकरसोपेतानि सर्वजघन्यस्पर्धकानि, तानि यदा सङ्क्रामन्ति तदा स तेषां जघन्यानुभागसङ्क्रमः । शेषासूक्तव्यतिरिक्तासु सर्वासु प्रकृतिषु सर्वघातिनि द्विस्थानकरसोपेते स्पर्धके सङ्क्रामति जघन्यानुभागसङ्क्रमः । सम्यक्त्वपुंवेदसंज्वलनचतुष्टयातिरिक्तशेषप्रकृतीनां घातित्वमाश्रित्य सर्वघातीनि, स्थानमाश्रित्य द्विस्थानकरसोपेतानि सर्वजघन्यानि रसस्पर्धकानि यदा सङ्क्रामन्ति तदा स तासां जघन्यानुभागसङ्क्रम इत्यर्थः । यद्यपि मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणान्तरायपञ्चकानामेकस्थानकोऽपि रसो बन्धे प्राप्यते तथापि क्षयकाले पूर्वबद्धद्विस्थानकरसस्यापि सङ्क्रमादेकस्थानकस्य शुद्धस्यासङ्क्रमात् सङ्क्रमविषयतयैकस्थानकरसस्यानभिधानम् ॥ ४८ ॥

उक्तं जघन्यानुभागसङ्क्रमपरिमाणं । अथ साद्यनादिप्ररूपणा कार्या । सा च मूलोत्तरप्रकृतिविषयतया द्विधा । तत्र मूलप्रकृतीनां साद्यनादिप्ररूपणामाह—

अजहण्णो तिण्ह तिहा मोहस्स चउव्विहो अहाउस्स। एवमणुक्कोसो सेसिगाण तिविहो अणुक्कस्सो॥ ४९

व्याख्या—ज्ञानावरणदर्शनावरणान्तरायलक्षणानां त्रयाणां कर्मणामजघन्योऽनुभागस्त्रिधा—अनादिरध्रुवो ध्रुवश्चेति। तथाहि—एतेषां जघन्यानुभागसङ्क्रमः क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ प्राप्यते, स च सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यजघन्यः, स चानादिः। अध्रुवध्रुवौ भव्याभव्यापेक्षया। मोहनीयस्याजघन्यानुभागसङ्क्रमश्चतुर्विधः—सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि—मोहनीयस्य जघन्यानुभागसंक्रमः समयाधिकावलिकाशेषायां स्थितौ सूक्ष्मसंपरायस्य क्षपकस्य भवति, स च सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यजघन्यः। स च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्योपशान्तमोहगुणस्थानके न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः। तत्स्थानमप्राप्तस्यानादिः। ध्रुवाध्रुवौ पूर्ववत्। अथायुषोऽनुत्कृष्टोऽनुभागसङ्क्रम एवं मोहनीयाजघन्यानुभागसङ्क्रमवच्चतुर्विधः—साद्यनादिध्रुवाध्रुवभेदात्। तथाहि—अप्रमत्तः सुरायुष उत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायाः परतः सङ्क्रमयितुमारभमाणस्तं तावत्सङ्क्रमयति यावदनुत्तरसुरभवे स्थितस्य त्रयस्त्रिंशत्सागरोपमाण्यतिगच्छन्ति, आवलिकामात्रा स्थितिरवतिष्ठते। ततोऽन्य आयुषोऽनुभागसङ्क्रमः सर्वोऽप्यनुत्कृष्टः, स च सादिः। तत्स्थानमप्राप्तस्यानादिः। ध्रुवाध्रुवौ पूर्ववत्। शेषाणां नामगोत्रवेदनीयानां अनुत्कृष्टोऽनुभागसङ्क्रमस्त्रिविधः—अनादिरध्रुवो ध्रुवश्च। तथाहि—सूक्ष्मसंपरायेण क्षपकेण स्वगुणस्थानचरमसमये नामगोत्रवेदनीयानां सर्वोत्कृष्टोऽनुभागो बध्यते, बन्धावलिकायामतीतायां यावत्सयोगिचरमसमयस्तावत्सङ्क्रम्यते। स च सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यनुत्कृष्टः, स चादेरभावादनादिः। ध्रुवाध्रुवौ पूर्ववत्॥ ४९॥

सेसा मूलप्पगइसु दुविहा अह उत्तरा अजहन्नो। सत्तरसण्ह चउद्धा तिविगप्पो सोलसण्हं तु ॥५०॥

व्याख्या—मूलप्रकृतिषूक्तशेषा विकल्पा द्विधा प्ररूपणीयाः, तद्यथा—सादयो ऽध्रुवाश्च। तत्र चतुर्णां घातिकर्मणामुत्कृष्टानुत्कृष्टजघन्येषु जघन्यः सादिरध्रुवश्च भावित एव। उत्कृष्टो मिथ्यादृष्टेः प्रतिनियतकाल एव भवति, अन्यदा तु तस्याप्यनुत्कृष्ट इत्येतौ साद्यध्रुवौ। शेषाणां चतुर्णामघातिकर्मणां जघन्याजघन्योत्कृष्टेषु मध्ये उत्कृष्टो भावित एव। जघन्यः सूक्ष्मस्यापर्याप्तस्यैकेन्द्रियस्य हतप्रभूतानुभागसत्कर्मणो लभ्यते, नान्यस्य। प्रभूतानुभागसत्कर्मघाताभावे तु तस्याप्यजघन्यः, किं पुनरन्यस्येत्येतावपि साद्यध्रुवौ। कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा। सम्प्रत्युत्तरप्रकृतीनां साद्यनादिप्ररूपणामाह—अहेत्यादि, अथोत्तरासूत्तरप्रकृतिषु मध्ये सप्तदशानां प्रकृतीनामनन्तानुबन्धिचतुष्टयसंज्वलनचतुष्टयनोकषायनवकलक्षणानामजघन्योऽनुभागसङ्क्रमश्चतुर्धा साद्यनादिध्रुवाध्रुवभेदात्। तथाहि—एतासामनन्तानुबन्धिवर्जानां त्रयोदशानां स्वस्वक्षयपर्यवसानावसरे जघन्यस्थितिसङ्क्रमकाले जघन्यानुभागसङ्क्रमः प्राप्यते। अनन्तानुबन्धिनां तूद्वलनासङ्क्रमेणोद्वल्य भूयोऽपि मिथ्यात्वप्रत्ययतो बद्धानां बन्धावलिकातिक्रमे द्वितीयावलिकाद्यसमये जघन्यानुभागसङ्क्रमो लभ्यते। एतदन्यस्तु सर्वोऽप्येतासां सप्तदशप्रकृतीनामजघन्यः, स चोपशमश्रेण्यामुपशान्तानामेतासां न भवति, ततः प्रतिपाते च भवतीति सादिः। तत्स्थानमप्राप्तस्यानादिः। अध्रुवध्रुवौ भव्याभव्यापेक्षया। तथा ज्ञानावरणपञ्चकस्त्यानर्द्धित्रिकवर्जदर्शनावरणषट्कान्तरायपञ्चकलक्षणानां षोडशप्रकृतीनामजघन्यानुभागसङ्क्रमस्त्रिविकल्पस्त्रिप्रकारः—अनादिर-

ध्रुवो ध्रुवश्चेति । तथाहि—एतासां षोडशप्रकृतीनां जघन्यानुभागसङ्क्रमः क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य प्राप्यते, ततोऽन्यः सर्वोऽप्यजघन्यः, तस्य चादिर्नास्तीत्यनादिः । अध्रुवध्रुवौ प्राग्वत् ॥ ५० ॥

तिविहो तत्तीसाए उक्कोसोऽह णवगस्स य चउऊ । एयासिं सेसा सेसिगाण सव्वे य दुविगप्पा ॥ ५१ ॥

व्याख्या—सातवेदनीयपञ्चेन्द्रियजातितैजससप्तकसमचतुरस्रसंस्थानशुक्ललोहितहारिद्रसुरभिगन्धकषायाम्लमधुरमृदुलघूष्णशीतलस्निग्धवर्णाद्येकादशकागुरुलघूच्छ्वासपराघातप्रशस्तविहायोगतित्रसदशकनिर्माणोच्चैर्गोत्राणां षट्त्रिंशत्प्रकृतीनामनुत्कृष्टोऽनुभागसङ्क्रमस्त्रिविधोऽनादिध्रुवाध्रुवत्वेदात् । तथाहि—एतासां षट्त्रिंशत्प्रकृतीनां स्वस्वबन्धव्यवच्छेदकाले क्षपक उत्कृष्टमनुभागं बध्नाति । बन्धावलिकात्यये च तं सङ्क्रमयितुमारभते । तं च तावत्सङ्क्रमयति यावत्सयोगिकेवलिचरमसमयः । ततः क्षपकसयोगिकेवलिवर्जस्य सर्वस्यानुत्कृष्ट एवासामनुभागः सङ्क्रामति । स चानादिः, आदेरभावात् । ध्रुवाध्रुवावभव्यभव्यापेक्षया । अथशब्दस्तथार्थे, नवकस्योद्योतवज्रर्षभनाराचसंहननौदारिकसप्तकौदारिकशरीरस्यानुत्कृष्टोऽनुभागसङ्क्रमश्चतुर्विधः साद्यनादिध्रुवाध्रुवत्वेदात् । तथाहि—एतासामुद्योतवर्जानामष्टानां प्रकृतीनां सम्यग्दृष्टिर्देवोऽत्यन्तविशुद्धपरिणाम उत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायामतीतायां तं सङ्क्रमयति । उद्योतनाम्नस्तु सप्तमनरकक्षितेर्नैरयिको मिथ्यादृष्टिः सम्यक्त्वं प्रतिपित्सुरुत्कृष्टमनुभागं बध्नाति । बन्धावलिकात्यये च तं सङ्क्रमयति जघन्येनान्तर्मुहूर्त्तं उत्कर्षतो द्वे षट्षष्टी सागरोपमाणां यावत् । इह यद्यपि सप्तमनरकपृथिव्यामन्तिमेऽन्तर्मुहूर्त्तेऽवश्यं मिथ्यात्वं गच्छति, तथाऽप्यग्रेतनभवेऽन्तर्मुहूर्त्तानन्तरं यः सम्यक्त्वं प्रतिपत्स्यते स इह गृह्यते । ततोऽन्तराले स्तोकं मिथ्यात्वकालमविवक्षितत्वात् द्वे

षट्षष्टी सागरोपमाणामुच्येते । तत उत्कृष्टात् प्रतिपतितस्यानुत्कृष्टः, स च सादिः । तत्स्थानमप्राप्तस्यानादिः । अध्रुवध्रुवौ भव्याभव्यापेक्षया । एतासां सप्तदशषोऽशषट्त्रिंशन्नवकरूपाणां प्रकृतीनामुक्तशेषविकल्पाः सप्तदशाद्यतिरिक्तानां च शेषप्रकृतीनामशीतिसङ्ख्यानां सर्वेऽपि विकल्पा द्विविकल्पा द्विप्रकारा ज्ञातव्याः, साद्यध्रुवभेदात् । तथाहि—सप्तदशानां षोऽशानां चोत्कृष्टोऽनुभागसङ्क्रमो मिथ्यादृष्टेरुत्कृष्टसंक्लेशे वर्तमानस्य प्राप्यते । शेषकालं तु तस्याप्यनुत्कृष्ट एवेत्येतौ द्वावपि साद्यध्रुवौ । जघन्यस्तु भाजित एव । तथा षट्त्रिंशत्प्रकृतीनां नवकस्य च जघन्योऽनुभागसङ्क्रमः सूक्ष्मैकेन्द्रियस्य हतप्रभूतानुभागसत्कर्मणः प्राप्यते, प्रभूतानुभागसत्कर्मघाताभावे तु तस्मिन्नप्यजघन्य इत्येतौ साद्यध्रुवौ । उत्कृष्टस्तु भाजित एव । शेषाणां प्रकृतीनां संज्ञिपञ्चेन्द्रियपर्याप्ते शुभानां वैक्रियसप्तकदेवद्विकौच्चैर्गोत्रातपतीर्थकराहारकसप्तकमनुजद्विकनरसुरतिर्यगायुर्लक्षणानां चतुर्विंशतिसङ्ख्यानां विशुद्धौ अशुभानां च स्त्यानर्द्धित्रिकासातवेदनीयदर्शनमोहनीयत्रयाप्रत्याख्यानप्रत्याख्यानावरणकषायनरकायुर्नरकद्विकतिर्यग्द्विकाद्यजातिचतुष्टयानाद्यसंस्थानसंहननाशुभवर्णादिनवकाप्रशस्तविहायोगत्युपघातस्थावरदशकनीचैर्गोत्ररूपाणां षट्पंचाशत्सङ्ख्यानां संक्लेशे उत्कृष्टोऽनुभागबन्धो लभ्यते, तथाविधविशुद्धिसंक्लेशाभावे त्वनुत्कृष्टः । तथैव सङ्क्रमावप्युत्कृष्टानुत्कृष्टाविति साद्यध्रुवावेतौ । जघन्यानुभागसङ्क्रमस्तु सूक्ष्मैकेन्द्रिये हतप्रभूतानुभागसत्कर्मणि लभ्यते । प्रभूतानुभागसत्कर्मघाताभावे तु तस्मिन्नप्यजघन्यस्तत एतावपि साद्यध्रुवौ ॥ ५१ ॥

कृता साद्यनादिप्ररूपणा । अथ स्वामित्वकथनावसरः । तच्च द्विधा—उत्कृष्टानुभागसङ्क्रमस्वामित्वं जघन्यानुभागसङ्क्रमस्वामित्वं च । तत्रोत्कृष्टानुभागसङ्क्रमस्वामित्वं निरूपयिषुस्तत्कालप्रमाणनियममादावाह—

उक्कोसगं पबंधिय आवलियमइच्छिऊण उक्कस्सं । जाव ण घाएइ तयं संकमइ आमुहुत्तंता ॥ ५१ ॥

व्याख्या—मिथ्यादृष्टिरुत्कृष्टमनुभागं बद्ध्वा, आवलिकामिति बन्धावलिकामतिक्रम्य तस्याः परत इत्यर्थः, उत्कृष्टमनुभागं तावत्सङ्क्रमयति यावन्न घातयति विनाशयति । कियन्तं कालं यावन्न विनाशयतीति चेदुच्यते—आमुहूर्त्तादन्तर्मुहूर्त्तं यावदित्यर्थः । परतो मिथ्यादृष्टिः शुभप्रकृतीनामनुभागं संक्लेशेनाशुभप्रकृतीनां तु विशुद्ध्याऽवश्यं विनाशयति ॥ ५१ ॥

अथोत्कृष्टसङ्क्रमस्वामी प्रतिपाद्यते—

असुभाणं अन्नयरो सुहुम अपज्जत्तगाइ मिच्छो उ । वज्जिअ असंखवासाउए य मणुउव्वाए य ॥ ५२ ॥

व्याख्या—अशुभानां प्रकृतीनां ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयाष्टाविंशतिविधमोहनीयनरकद्विकतिर्यग्द्विकाद्यजातिचतुष्टयानाद्यसंस्थानसंहननानीलकृष्णदुरभितिक्तकटुकरूक्षशीतकर्कशगुरूपघाताप्रशस्तविहायोगतिस्थावरदशकनीचैर्गोत्रान्तरायपञ्चकलक्षणानामष्टाशीतिसङ्ख्यानामन्यतरः सूक्ष्मापर्याप्तादिः । आदिशब्दात् पर्याप्तसूक्ष्मपर्याप्तापर्याप्तबादरद्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञितिर्यक्पञ्चेन्द्रियमनुष्यदेवनारकपरिग्रहः । एतदन्यतरो मिथ्यादृष्टिरुत्कृष्टमनुभागसङ्क्रमं करोति । अविशेषोक्तौ नियममाह—केवलं येऽसङ्ख्येयवर्षायुषो मनुष्यतिर्यञ्चो ये च मनुष्योपपातानामानतप्रमुखा देवाः स्वभावाच्च्युत्वा मनुष्येष्वेवोत्पद्यन्ते इतिकृत्वा तान् वर्जयित्वा । एते हि मिथ्यादृष्टयोऽपि सन्तो न प्रागुक्ताशुभप्रकृतीनामुत्कृष्टमनुभागं बध्नन्ति, तीव्रसंक्लेशाभावात् । तत एतासामुत्कृष्टानुभागसङ्क्रमोऽप्येतेषां न भवतीत्येतद्वर्जनम् ॥ ५२ ॥

सव्वत्थ आयवुज्जोयमणुयगइ पंचगाण आऊणं । समयाहिगालिगा सेसिगत्ति सेसाण जोगंता ॥ ५४ ॥

व्याख्या—सर्वत्र सर्वेषु सूक्ष्मापर्याप्तादिनैरयिकान्तेषु असङ्ख्येयवर्षायुस्तिर्यग्मनुष्यमनुष्योपपातदेवसहितेषु मिथ्यादृष्टिषु सम्यग्दृष्टिषु वाऽऽतपस्योद्योतस्य मनुजगतिमनुजानुपूर्व्यौदारिकद्विकवज्रर्षभसंहननलक्षणस्य मनुजगतिपञ्चकस्य च, अत्रौदारिकद्विकोक्तिर्नञ्क्याऽप्यौदारिकसप्तकं गृह्यते, तथैव विवक्षणात् । ततः सर्वसङ्ख्यया द्वादशानां प्रकृतीनां उत्कृष्टानुभागसङ्क्रमो ज्ञातव्यः । तथाहि—सम्यग्दृष्टिः शुभप्रकृतीनामनुभागं न विनाशयति, किंतु विशेषतो द्वे षट्षष्टी सागरोपमाणां यावदनुवर्तयति । तत उत्कर्षत एतावन्तं कालमियतीनां प्रकृतीनामुत्कृष्टमनुभागमविनाश्य पश्चात्सर्वत्र यथायोगमुत्पद्यते । ततो मिथ्यादृष्टिष्वप्यनन्तरोक्तप्रकृतीनामुत्कृष्टोऽनुभागसङ्क्रमोऽन्तर्मुहूर्त्तं यावदवाप्यत इति । आतपोद्योतयोश्चोत्कृष्टोऽनुभागो मिथ्यादृष्टिनैव बध्यते इति तत्र तयोरुत्कृष्टानुभागसङ्क्रमो नासंभवी । स च मिथ्यात्वात्प्रतिपत्य सम्यक्त्वं गते सम्यग्दृष्टावपि प्राप्यते, सम्यग्दृष्टेः सतः शुभप्रकृतित्वेन तयोरुत्कृष्टानुभागाविनाशकत्वात् । ततो द्वे षट्षष्टी अपि सागरोपमाणां यावदुत्कर्षतस्तयोस्तत्र सङ्क्रमो द्रष्टव्यः । तथा चतुर्णामप्यायुषां सम्यग्दृष्टयो मिथ्यादृष्टयो वोत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायामतीतायां सङ्क्रमयन्ति तावद्यावत्समयाधिकावलिकाशेष इति । तत आयुषामुत्कृष्टानुभागसङ्क्रमस्वामिनः सम्यग्दृष्टयो मिथ्यादृष्टयो वा प्राप्यन्ते । शेषाणां तु शुभप्रकृतीनां सातवेदनीयदेवद्विकपञ्चेन्द्रियजातिवैक्रियसप्तकाहारकसप्तकतैजससप्तकसमचतुरस्रसंस्थानशुक्ललोहितहारिद्रवर्णसुरभिगन्धकषायाम्लमधुररसमृदुलघुस्निग्धोष्णस्पर्शप्रशस्तविहायोगत्युच्छ्वासागुरुलघुपराघातत्रसदशकनिर्माणतीर्थकरोच्चैर्गोत्रलक्षणानां चतुःपञ्चाशत्सङ्ख्यानां स्वस्व-

बन्धव्यवच्छेदसमये उत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायाः परतस्तावदुत्कृष्टानुभागसङ्क्रमो यावत्सयोगिकेवलिचरमसमयः। तथा चैतासामुत्कृष्टानुभागसङ्क्रमस्वामिनः स्वबन्धव्यवच्छेदस्योपरितनगुणस्थानस्था जीवा योग्यन्ताः सयोगिकेवलिपर्यवसाना द्रष्टव्याः ॥ ५४ ॥

तदेवमुक्त उत्कृष्टानुभागसङ्क्रमस्वामी। अथ जघन्यानुभागसङ्क्रमस्वामिनमभिधित्सुर्जघन्यानुभागसङ्क्रमसंभवज्ञानोपायमाह–

खवगस्संतरकरणे अकए घाईण सुहुमकम्मुवरिं। केवलिणो णंतगुणं असन्निउ सेसअसुभाणं ॥ ५५ ॥

व्याख्या—यावदन्तरकरणं न विधीयते तावत्क्षपकस्य सर्वघातिनीनां देशघातिनीनां वा प्रकृतीनां संबन्ध्यनुभागः सूक्ष्मकर्मण उपरि भवति, सूक्ष्मैकेन्द्रियसत्कादनुभागसत्कर्मणोऽनन्तगुणो भवति। अन्तरकरणे तु कृते सति सूक्ष्मैकेन्द्रियसम्बन्धिनोऽप्यनुभागसत्कर्मणो हीनो भवति। तथा शेषाणामप्यघातिनीनामशुभप्रकृतीनामसातवेदनीयानाद्यसंस्थानसंहननकृष्णनीलदुरभिगन्धतिक्तकटुगुरुकर्कशरूक्षशीतोपघाताप्रशस्तविहायोगतिदुर्भगदुःस्वरानादेयास्थिराशुभापर्याप्तायशःकीर्त्तिनीचैर्गोत्रलक्षणानां त्रिंशत्सङ्ख्यानामनुभागसत्कर्म केवलिनः "असन्निउ त्ति" असंज्ञिपञ्चेन्द्रियसम्बन्धिनोऽनुभागसत्कर्मणोऽनन्तगुणं ज्ञातव्यं। तथा च सति सर्वघातिनीनां देशघातिनीनां च प्रकृतीनां जघन्यानुभागसङ्क्रमसंभवोऽन्तरकरणे कृते सति क्षपकस्यैव। शेषाणां तूक्तरूपाशुभप्रकृतीनां जघन्यानुभागसङ्क्रमसंभवो न सयोगिकेवलिनि, किंतु केवल्यपेक्षयाऽनन्तभागकल्पतदनुभागस्य हतप्रभूतानुभागसत्कर्मणः सूक्ष्मैकेन्द्रियादेर्द्रष्टव्यः ॥ ५५ ॥

इह "संकमइआमुहूत्तंता" इति यत्प्रागुक्तं, तत्र सम्यग्दृष्टयो मिथ्यादृष्टयो वाऽन्तर्मुहूर्त्तानन्तरं सर्वप्रकृतीनामनुत्नाग-मवश्यं घ्नन्तीति प्रसज्यते तदपवदन्नाह—

सम्मद्दिठी ण हणइ सुहाणुत्नागं असम्मदिठी वि । सम्मत्तमीसगाणं उक्कस्सं वज्जिया खवणं॥५६॥

व्याख्या—इह याः शुत्नाः प्रकृतयः सातवेदनीयसुरद्विकनरद्विकपञ्चेन्द्रियजात्याद्यसंस्थानसंहननौदारिकसप्तकवैक्रि-यसप्तकाहारकसप्तकतैजससप्तकशुत्नवर्णाद्येकादशकागुरुलघुपराघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतित्रसदशकनिर्माणतीर्थ-करोच्चैर्गोत्रपञ्चकृष्णाः षट्षष्टिसङ्ख्यास्तासां सर्वासामपि शुत्नमनुत्नागमुत्कर्षतो ये षट्षष्टी सागरोपमाणां यावत्सम्यग्दृष्टिर्न हन्ति न विनाशयति, असम्यग्दृष्टिर्मिथ्यादृष्टिः, अपिशब्दात्सम्यग्दृष्टिश्च, सम्यक्त्वसम्यग्मिथ्यात्वयोरुत्कृष्टमनुत्नागं न विनाशयति क्षपणं क्षपणकालं वर्जयित्वा, क्षपणकाले सम्यग्दृष्टिरेव सम्यक्त्वसम्यग्मिथ्यात्वयोरुत्कृष्टमनुत्नागं विनाशय-तीति क्षपणकालो वर्ज्यते । तदिदमुक्तं पञ्चसङ्ग्रहे—"सम्मद्दिठी ण हणइ सुत्नाणुत्नागं दुवे वि दिठीणं । सम्मत्तमीसगाणं उक्कोसं हणइ खवगो वि ॥ १ ॥" इति, अत्र "दुवे वि त्ति" द्वावपि सम्यग्दृष्टिमिथ्यादृष्टी "खवगो वि त्ति" अपेरवधा-रणार्थत्वात् किं तु क्षपक एवेत्यर्थः । मिथ्यादृष्टिस्तु सर्वासामपि शुत्नप्रकृतीनां संक्लेशेन, अशुत्नप्रकृतीनां तु विशुद्ध्यान्त-र्मुहूर्त्तात्परत उत्कृष्टमनुत्नागमवश्यं विनाशयतीत्युक्तमेव प्रागिति।कृता जघन्यानुत्नागसङ्क्रमस्वामित्वप्रतिपादनाय त्नावना॥५६

अथ जघन्यानुत्नागसङ्क्रमस्वामित्वमेवाह—

अंतरकरणा उवरिं जहन्नठिइसंकमो उ जस्स जहिं । घाईण णियगचरमरसखंडगे दिठिमोहदुगे॥५७॥

व्याख्या—अन्तरकरणादुपरि घातिकर्मप्रकृतीनां मध्ये यस्याः प्रकृतेर्यत्र गुणस्थानके जघन्यस्थितिसङ्क्रम उक्तस्तस्यास्तत्र जघन्यानुभागसङ्क्रमोऽपि वक्तव्यः। इदमुक्तं भवति—अन्तरकरणे कृते सत्यनिवृत्तिबादरसंपरायः क्षपको नोकषायनवकसंज्वलनचतुष्टयानां क्षपणक्रमेण जघन्यस्थितिसङ्क्रमणकाले जघन्यमनुभागं सङ्क्रमयति। ज्ञानावरणपञ्चकान्तरायपञ्चकस्त्यानर्द्धित्रिकवर्जितदर्शनावरणषट्कानां क्षीणकषायः समयाधिकावलिकाशेषायां स्थितौ वर्तमानो जघन्यमनुभागं सङ्क्रमयति। दर्शनमोहनीयत्रिकस्य सम्यक्त्वसम्यग्मिथ्यात्वरूपस्य क्षपणकाले निजकचरमरसखण्डे स्वस्वचरमरसखण्डसङ्क्रमणकाले जघन्यानुभागसङ्क्रमो भवति ॥ ५७ ॥

आऊण जहन्नठिइ बंधे जावत्थि संकमो ताव। उवलणतित्थसंजोयणा य पढमावलियं गंतुं ॥ ५८॥

व्याख्या—चतुर्णामप्यायुषां जघन्यां स्थितिं बध्वा बन्धावलिकायाः परतो यावदस्ति सङ्क्रमः समयाधिकावलिकाशेषसर्वस्वकालपर्यन्तं तावज्जघन्यानुभागसङ्क्रमः प्राप्यते। जघन्यस्थितिबन्धनियतो जघन्यानुभागबन्ध इति जघन्यस्थितिग्रहणं। तथा नरकद्विकमनुजद्विकदेवद्विकवैक्रियसप्तकाहारकसप्तकोच्चैर्गोत्रक्षपणानामेकविंशत्युद्वलनप्रकृतीनां तीर्थकरस्य संयोजनाकषायाणां च जघन्यमनुभागं बध्वा प्रथमावलिकां बन्धावलिकाक्षपणां गत्वाऽतिक्रम्य बन्धावलिकायाः परत इत्यर्थः, जघन्यमनुभागं सङ्क्रमयति। कः सङ्क्रमयतीति चेदुच्यते—वैक्रियसप्तकदेवद्विकनरकद्विकानामसंज्ञिपञ्चेन्द्रियो, मनुष्यद्विकोच्चैर्गोत्रयोः सूक्ष्मनिगोदः, आहारकसप्तकस्याप्रमत्तः, तीर्थकरस्याविरतसम्यग्दृष्टिः, अनन्तानुबन्धिनां पश्चात्कृतसम्यक्त्वो मिथ्यादृष्टिः ॥ ५८ ॥

सेसाण सुहुम हयसंतकम्मगो तस्स हेट्ठउं जाव। बंधइ तावं एगिंदिउं व णेगिंदिउं वा वि ॥ ५९॥

व्याख्या—शेषाणामुक्तोऽरितानां शुभानामशुभानां च प्रकृतीनां सप्तनवतिसङ्ख्यानां यः सूक्ष्मैकेन्द्रियो वायुकायिकोऽग्निकायिको वा हतं सङ्क्रमेण नाशितं सत्कर्म प्रभूतानुभागसत्कर्म येन स तथा । तस्य स्वसम्बन्ध्यनुभागसत्कर्मणोऽधस्तात् ततः स्तोकतरमित्यर्थः, अनुभागं यावद्बध्नाति तावदेकेन्द्रियस्तस्मिन्नन्यस्मिन् वा भवे एकेन्द्रियत्वे वर्तमानोऽनेकेन्द्रियो वेति स एवैकेन्द्रियो हतप्रभूतानुभागसत्कर्मा भवान्तरे द्वीन्द्रियादिभावे वर्तमानो यावद्बृहत्तरमनुभागं न बध्नाति तावत्तमेव जघन्यमनुभागं सङ्क्रमयति ॥ ५९ ॥

तदेवमभिहितोऽनुभागसङ्क्रमः, सम्प्रति प्रदेशसङ्क्रमो वक्तुमवसरप्राप्तः, तत्र चामी अर्थाधिकाराः—सामान्यलक्षणं १, भेदः २, साद्यनादिप्ररूपणा ३, उत्कृष्टप्रदेशसङ्क्रमस्वामी, ४, जघन्यप्रदेशसङ्क्रमस्वामी च ५ । तत्र सामान्यलक्षणं भेदं च प्रतिपादयन्नाह—

जं दलियमन्नपगइं णिज्जइ सो संकमो पएसस्स । उव्वलणो विज्झाउं अहापवत्तो गुणो सव्वो ॥ ६० ॥

व्याख्या—यत्सङ्क्रमयोग्यं दलिकं कर्मद्रव्यमन्यप्रकृतिं नीयते स्वभिन्नपतद्ग्रहप्रकृतिरूपतया परिणम्यते स प्रदेशसङ्क्रमः। सामान्यलक्षणप्रतिपादनमेतत् । स पञ्चधा—उद्वलनसङ्क्रमो विध्यातसङ्क्रमो यथाप्रवृत्तसङ्क्रमो गुणसङ्क्रमः सर्वसङ्क्रमश्चेति, भेदप्रतिपादनमेतत् ॥ ६० ॥

तत्र यथोद्देशं निर्देश इत्यादावुद्वलनासङ्क्रमलक्षणमभिधीयते—इहानन्तानुबन्धिचतुष्कसम्यक्त्वसम्यग्मिथ्यात्वसुरद्वि-

कनरकद्विकवैक्रियसप्तकाहारकसप्तकमनुजद्विकोच्चैर्गोत्रलक्षणानां सप्तविंशतिप्रकृतीनां प्रथमतः पल्योपमासङ्ख्येयभागमात्रं स्थितिखण्डमन्तर्मुहूर्त्तेन कालेनोत्कीर्यते घनदलान्वितस्याद्यपदलस्योत्तारणमुत्किरणं तदेव चोद्वलनं व्यपदिश्यते । ततो द्वितीयं स्थितिखण्डं पल्योपमासङ्ख्येयभागमात्रमेवान्तर्मुहूर्त्तेन कालेनोत्कीर्यते । केवलं प्रथमात् स्थितिखण्डाद्विशेषहीनं । ततोऽपि तृतीयं स्थितिखण्डं पल्योपमासङ्ख्येयभागमात्रं द्वितीयात् स्थितिखण्डाद्विशेषहीनमन्तर्मुहूर्त्तेन कालेनोत्कीर्यते । एवं प्रत्येकमन्तर्मुहूर्त्तेन कालेनोत्कीर्यमाणानि पल्योपमासङ्ख्येयभागमात्राणि स्थितिखण्डानि पूर्वपूर्वस्थितिखण्डापेक्षया विशेषहीनानि तावद्वाच्यानि यावद्द्विचरमं स्थितिखण्डं । एतानि च सर्वाण्यनन्तरोपनिधया स्थित्यपेक्षया पूर्वपूर्वस्थितिखण्डाद्यथोत्तरमुत्तराणि विशेषहीनानि । परंपरोपनिधया च प्रथमस्थितिखण्डापेक्षया कानिचित्स्थितिखण्डान्यसङ्ख्येयभागहीनानि कानिचित्सङ्ख्येयभागहीनानि कानिचित्सङ्ख्येयगुणहीनानि कानिचिदसङ्ख्येयगुणहीनानीत्येवं चतुःस्थानपतितानि। प्रदेशपरिमाणचिन्तायां त्वनन्तरोपनिधया पूर्वपूर्वस्थितिखण्डादुत्तरोत्तरस्थितिखण्डानि यथाक्रमं विशेषाधिकदलिकानि । परंपरोपनिधया तु प्रथमात्स्थितिखण्डाद्दलिकमपेक्ष्य किञ्चित्स्थितिखण्डमसङ्ख्येयभागाधिकं किञ्चित्सङ्ख्येयभागाधिकं किञ्चित्सङ्ख्येयगुणाधिकं किञ्चिदसङ्ख्येयगुणाधिकमित्येवं चतुःस्थानपतितानि । स्थितिखण्डानामुत्किरणविधिश्चायं—प्रथमसमये स्तोकं दलिकमुत्कीर्यते, द्वितीयसमये ततोऽसङ्ख्येयगुणं, ततोऽपि तृतीयसमयेऽसङ्ख्येयगुणं, एवं तावद्वाच्यं यावत्स्वस्वान्तर्मुहूर्त्तचरमसमयः । गुणकारश्चात्र पल्योपमासङ्ख्येयभागलक्षणो द्रष्टव्यः । तच्चोत्कीर्णदलिकं किञ्चित्स्वस्थाने किञ्चिच्च परस्थाने प्रक्षिप्यते । तत्र कुत्र कियान् प्रक्षेप इति चेदुच्यते—प्रथमे स्थितिखण्डे प्रथमसमये यत्कर्मदलिकमन्यप्रकृतिषु

प्रक्षिप्यते तत्सर्वस्तोकं, यत्स्वस्थान एवाधस्तात् क्षिप्यते तत्ततोऽसङ्ख्येयगुणं । ततोऽपि यद्वितीये समये स्वस्थाने प्रक्षिप्यते तदसङ्ख्येयगुणं । परप्रकृतिषु पुनः प्रक्षिप्यमाणं प्रथमसमयपरस्थानप्रक्षिप्तादिशेषहीनं । ततोऽपि यत्तृतीये समये स्वस्थाने प्रक्षिप्यते तद्वितीयसमयस्वस्थानप्रक्षिप्तादसङ्ख्येयगुणं । यत्पुनः परप्रकृतिषु प्रक्षिप्यते तद्वितीयसमयपरस्थानप्रक्षिप्तादिशेषहीनं । एवं तावदुक्तव्यं यावदन्तर्मुहूर्त्तचरमसमयः । एवं सर्वेष्वपि स्थितिखण्डेषु द्विचरमस्थितिखण्डान्तेषु भावनीयं । चरमस्थितिखण्डं द्विचरमस्थितिखण्डात् स्थित्यपेक्षयाऽसङ्ख्येयगुणं प्रथमस्थितिखण्डाच्च दलिकापेक्षयाऽसङ्ख्येयगुणं, स्थित्यपेक्षयाऽसङ्ख्येयभागकल्पं । उक्तं च पञ्चसंग्रहे—"असंखगुणयं तु अंतिमयं" । अस्य प्रतीकस्य व्याख्या यथा—अन्तिमखण्डं द्विचरमखण्डात् स्थित्यपेक्षयाऽसङ्ख्येयगुणं । तुशब्दस्याधिकार्थसंसूचनादन्तिमस्थितिखण्डं प्रथमस्थितिखण्डापेक्षया दलिकमधिकृत्यासङ्ख्येयगुणं स्थित्यपेक्षया त्वसङ्ख्येयभागकल्पमिति । तदपि चरमस्थितिखण्डमन्तर्मुहूर्त्तेन कालेनोत्कीर्यते तस्य च यत्प्रदेशाग्रं तदुदयावलिकागतं मुक्त्वा शेषं सर्वमपि परस्थाने प्रक्षिप्यते, तच्च प्रथमसमये स्तोकं, द्वितीयादिसमयेषु यथोत्तरमसङ्ख्येयगुणं प्रक्षिप्यते यावच्चरमसमयः । चरमसमये तु यत्परप्रकृतिषु दलिकं प्रक्षिप्यते स सर्वसङ्क्रम उच्यते, सङ्क्रमार्हस्य दलिकस्य सर्वस्यापि निर्लेपात् । तत्र यावत्प्रमाणं द्विचरमस्थितिखण्डसत्कं कर्मदलिकं चरमसमये परप्रकृतिषु सङ्क्रम्यते तावत्प्रमाणं चेच्चरमस्थितिखण्डस्य कर्मदलिकं प्रतिसमयमपह्रियते तदा तच्चरमं स्थितिखण्डमसङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिर्निर्लिप्यते । इयं कालतो मार्गणा । क्षेत्रतस्त्वियं मार्गणा—यावत्प्रमाणं द्विचरमस्थितिखण्डसत्कं कर्मदलिकं परप्रकृतिषु सङ्क्रम्यते तावत्प्रमाणमेकत्र चरमस्थितिखण्डकर्मदलिकमपह्रियते, अन्यत्रैक आकाशप्रदेशे, एवं तुल्यवदुन्नया-

पहारे क्रियमाणे चरमस्थितिखण्डमङ्गुलमात्रक्षेत्रगतप्रदेशराशेरसङ्ख्येयतमेन भागेनापहृतं भवति, चरमस्थितिखण्डे द्विचरमस्थितिखण्डसत्कपरस्थानप्रक्षिप्यमाणदलिकपुञ्जप्रमाणानि खण्डान्यङ्गुलासङ्ख्येयतमभागवर्त्याकाशप्रदेशप्रमाणानि भवन्तीत्यर्थः। यावत्प्रमाणं पुनर्द्विचरमस्थितिखण्डसत्कं कर्मदलिकं स्वस्थाने सङ्क्रम्यते तावत्प्रमाणस्य चरमस्थितिखण्डकर्मदलिकस्य प्रतिसमयमपहारे तच्चरमं स्थितिखण्डं पल्योपमासङ्ख्येयभागमात्रगतैः समयैर्निर्लेपीभवति। उक्तमुद्वलनासङ्क्रमलक्षणं। एतदेव योजयन्नाहारकसप्तकस्योद्वलनासङ्क्रमकारके तत्करणप्रक्रियामाह—

आहारतणू(ओ)ऽन्तिमुहुत्ता अविरइगउं पउव्वलए। जा अविरइउं त्ति उव्वलइ पल्लभागे असंखतमे६१

व्याख्या—आहारकतनूः, बहुवचनमाहारकसप्तकसंग्रहपरं, तदाहारकसप्तकसत्कर्माऽविरतिं विरत्यभावं गतः सन् "अन्तिमुहुत्ता" इति अन्तर्मुहूर्त्तात्परतः प्रोद्वलयति। कियता कालेनोद्वलयतीति जिज्ञासायामाह—यावदविरतोऽविरतिभागी। इतिस्तावदर्थे, तावदुद्वलयति, तथा चाविरतिप्रत्ययाहारकसप्तकस्योद्वलना भवतीति प्रतिपादितं भवति। अविरतिश्चाहारकवतोऽविरतीभूतस्यापार्धपुद्गलपरावर्त्तं यावदपि लभ्यते, ततो नियममाह—पल्यस्य पल्योपमस्यासङ्ख्येयतमे भागे तावन्मात्रेण कालेन सर्वमुद्वलयतीत्यर्थः॥ ६१॥

अंतोमुहुत्तमद्धं पल्लासंखेज्जमेत्तठिइखंडं। उक्किरइ पुणो वि तहा ऊणूणमसंखगुणहीणं जा॥ ६२॥

व्याख्या—अन्तर्मुहूर्त्तप्रमाणामद्धां यावदन्तर्मुहूर्त्तेन कालेनेत्यर्थः। पल्योपमासङ्ख्येयभागमात्रं स्थितिखण्डमुत्किरति। एष प्रथमस्थितिखण्डस्य विधिः। ततः पुनरपि तथा तेनैव प्रकारेणान्तर्मुहूर्त्तेन कालेनोत्तरोत्तरं पल्योपमासङ्ख्येयभागमात्रं

खण्डं पूर्वस्मात्पूर्वस्मादूनमूनतरमुत्किरति । एवं तावद्वाच्यं यावद्द्विचरमस्थितिखण्डं । तच्च प्रथमस्थितिखण्डापेक्षयाऽसङ्क्षेयगुणहीनम् ॥ ६२ ॥

तं दलियं सट्ठाणे समए समए असंखगुणियाए । सेढीइ परट्ठाणे विसेसहाणीइ संबुन्नइ ॥ ६३ ॥

व्याख्या—तदुत्कीर्यमाणं दलिकं समये समये स्वस्थानेऽसंख्येयगुणितया श्रेण्या संबुन्नति प्रक्षिपति, परस्थाने परप्रकृतौ तद्विशेषहान्या । तथाहि—प्रथमसमये परप्रकृतौ स्तोकं प्रक्षिप्यते, स्वस्थान एवाधस्तात् ततोऽसङ्क्षेयगुणं । ततोऽपि द्वितीयसमये स्वस्थाने यत्प्रक्षिप्यते तदसङ्क्षेयगुणं । परप्रकृतिषु च यत्प्रक्षिप्यते तदाद्यसमयपरस्थानप्रक्षिप्तादिशेषहीनं । एवं प्रतिसमयं तावद्वाच्यं यावदन्तर्मुहूर्त्तचरमसमयः । एष प्रथमस्थितिखण्डस्योत्किरणविधिः । एवमन्येषामपि द्विचरमान्तानां द्रष्टव्यः ॥ ६३ ॥

जं दुचरमस्स चरमे अन्नं संकमइ तेण सव्वं पि । अंगुलअसंखभागेण हीरए एस उव्वलणा ॥ ६४ ॥

व्याख्या—द्विचरमस्थितिखण्डस्य चरमसमये यत्कर्मदलिकमन्यां प्रकृतिं सङ्क्रमयति तेन मानेन तावत्प्रमाणेन दलिकेनेत्यर्थः, यदि चरमस्थितिखण्डमपह्रियते तदा कालतोऽसङ्क्षेयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियते । क्षेत्रतः पुनरङ्गुलमात्रक्षेत्रासङ्क्षेयतमेन भागेन । एषा ह्यदलविषयाहारकसप्तकस्य चरमस्थितिखण्डे उद्वलना ॥ ६४ ॥

एतद्विधिवक्तव्यतामाह—

चरममसंखेज्जगुणं अणुसमयमसंखगुणियसेढीए । देइ परट्ठाणेवं संबुन्नंतीणमवि कसिणो ॥ ६५ ॥

व्याख्या—द्विचरमस्थितिखण्डाच्चरमस्थितिखण्डं स्थित्यपेक्षयाऽसङ्ख्येयगुणं । तथा तस्य चरमखण्डस्य यत्प्रदेशाग्रं तदुदयावलिकागतं मुक्त्वा शेषं सर्वं परस्थाने परप्रकृतिष्वनुसमयमसङ्ख्येयगुणया श्रेण्या प्रक्षिपति । तथाहि—प्रथमसमये स्तोकं द्वितीयसमयेऽसङ्ख्येयगुणं, तृतीयसमयेऽसङ्ख्येयगुणं, एवं यावच्चरमसमयः । एवममुना प्रकारेण परप्रकृतौ प्रक्षिप्यमाणानां, अपिः संज्ञावने, चरमसमये कृत्स्नो निरवशेषः सङ्क्रमो भवति स सर्वसङ्क्रमोऽवसेयः । एतेन सर्वसङ्क्रमो लक्षितः ॥६५॥

अथ वेदकसम्यक्त्वादीनामुद्वलनासङ्क्रमकारकानाह—

एवं मिच्छदिट्ठिस्स वेयगं मिस्सगं तउ पन्ना । एगिंदियस्स सुरदुगमउ सवेउव्वि णिरयदुगं ॥ ६६ ॥

व्याख्या—अष्टाविंशतिसत्कर्मा मिथ्यादृष्टिः प्रथमत एवमुक्तप्रकारेण सम्यक्त्वमुद्वलयति । ततः पश्चात्सम्यग्मिथ्यात्वं । तथैकेन्द्रिय आहारकसप्तकवर्जपञ्चनवतिप्रकृतिसत्कर्मा देवगतिदेवानुपूर्व्यौ पूर्वोक्तेन विधिना युगपदुद्वलयति । ततोऽनन्तरं वैक्रियसप्तकं नरकद्विकं च युगपदुद्वलयति ॥ ६६ ॥

सुहुमतसेगो उत्तममउ य णरदुगमहानियट्टिम्मि । उत्तीसाए णियगे संजोयणदिट्ठिजुअले य ॥६७॥

व्याख्या—सूक्ष्मत्रसस्तेजस्कायिको वायुकायिकश्चोत्तममुत्तमगोत्रमुच्चैर्गोत्रान्निधं पूर्वोक्तेन विधिनोद्वलयति । अतश्च पश्चान्नरद्विकं मनुजगतिमनुजानुपूर्वीलक्षणं । तदेवं मिथ्यादृष्टेरुद्वलना प्रतिपादिता । अथ सम्यग्दृष्टेः सा प्रतिपाद्यते—"अह त्ति" अथशब्दोऽधिकारान्तरसूचकः, प्राक्तनीनां प्रकृतीनामुद्वलना पल्योपमासङ्ख्येयभागमात्रकालभाविनी मिथ्यादृष्टिकर्तृका च वक्ष्यमाणप्रकृत्युद्वलना चान्तर्मुहूर्त्तमात्रकालभाविनी सम्यग्दृष्टिकर्तृका चेत्येतदधिकारान्तरं । अनिवृत्ताव-

निवृत्तिबादरसंपराये षट्त्रिंशत्प्रकृतीनामुद्वलना । तथाहि—क्षपकोऽनिवृत्तिबादरसंपरायः स्त्यानार्द्धित्रिकनामत्रयोदशक-मध्यमाष्टकषायनोकषायनवकसंज्वलनक्रोधमानमायालक्षणाः षट्त्रिंशत्प्रकृतीः स्वस्वक्षपणकालेऽन्तर्मुहूर्त्तेन कालेनोद्वलय-तीति निजके स्वक्षपकेऽविरतसम्यग्दृष्ट्यादावित्यर्थः । सप्तम्याः षष्ठ्यर्थत्वात् संयोजनानामनन्तानुबन्धिनां दृष्टियुगलस्य च मिथ्यात्वसम्यग्मिथ्यात्वलक्षणस्य पूर्वोक्तविधिनोद्वलनाऽन्तर्मुहूर्त्तेन कालेनावगन्तव्या ॥ ६७ ॥

तदेवमुक्त उद्वलनासङ्क्रमोऽथ विध्यातसङ्क्रमलक्षणमाह—

जासि ण बंधो गुणभवपच्चयउं तासि होइ विप्पाउं । अंगुलअसंखभागेणवहारो तेण सेसस्स ॥ ६८ ॥

व्याख्या—यासां प्रकृतीनां गुणप्रत्ययतो भवप्रत्ययतो वा बन्धो न भवति तासां विध्यातसङ्क्रमोऽवसेयः । कास्ताद्दश्यः प्रकृतयः कुत्र च तासां विध्यातसङ्क्रम इति चेदुच्यते—इह या मिथ्यादृष्टिगुणस्थानान्ताः षोडश प्रकृतयस्तासां सासाद-नादिषु गुणप्रत्ययतो बन्धो न भवति । सासादनान्तानां पञ्चविंशतिप्रकृतीनां सम्यग्मिथ्यादृष्ट्यादिषु, अविरतसम्यग्दृ-ष्ट्यन्तानां दशानां देशविरतादिषु, देशविरतान्तानां चतसृणां प्रमत्तादिषु, प्रमत्तान्तानां षण्णामप्रमत्तादिषु गुणप्रत्ययतो बन्धो न भवति, ततस्तासां तत्र तत्र विध्यातसङ्क्रमः प्रवर्तते । तथा वैक्रियसप्तकदेवद्विकनरकद्विकैकद्वित्रिचतुरिन्द्रियजातिस्थावर-सूक्ष्मसाधारणपर्याप्तातपलक्षणा विंशतिप्रकृतीर्नैरयिकास्तद्बन्धहेतुमिथ्यात्वादिसत्त्वेऽपि भवप्रत्ययादेव न बध्नन्ति । नरक-द्विकदेवद्विकवैक्रियसप्तकद्वित्रिचतुरिन्द्रियजातिसूक्ष्मपर्याप्तसाधारणलक्षणाः सप्तदश प्रकृतीः समस्ता अपि देवा भवप्रत्य-यतो न बध्नन्ति, एकेन्द्रियजात्यातपस्थावरनामानि तु सनत्कुमारादयः । संहननषट्कानाद्यसंस्थानपञ्चकनपुंसकवेदमनु-

जदि कौदारिकसप्तकतिर्यगेकान्तप्रायोग्यस्थावरादिप्रकृतिदशकदुर्भगादित्रिकनीचैर्गोत्राप्रशस्तविहायोगतिप्रकृतीरसङ्ख्येयवर्षायुषः । ये च यद्यदबन्धकास्तेषां तास्ताः प्रकृतयो विध्यातसङ्क्रमयोग्याः । दलिकप्रमाणं निरूपयति—"अंगुलेत्यादि" यावत्प्रमाणं कर्मदलिकं प्रथमसमये विध्यातसङ्क्रमेण परप्रकृतिषु प्रक्षिप्यते तेन मानेन शेषस्य दलिकस्यापहारे क्रियमाणेऽङ्गुलस्यासङ्ख्येयतमेन भागेनापहारो भवति । यावत्प्रमाणं प्रथमसमयकर्मदलिकं विध्यातसङ्क्रमेण प्रकृत्यन्तरे प्रक्षिप्यते तावत्प्रमाणैः खण्डैः शेषं सर्वमपि तत्प्रकृतिगतं दलिकमपहियमाणमेकतस्तदेकखण्डं दलिकराशिरन्यतश्चैक आकाशप्रदेश इत्येवमङ्गुलमात्रक्षेत्रासङ्ख्येयतमभागवृत्त्याकाशप्रदेशैरपहियते । इयं क्षेत्रतो निरूपणा । कालतस्त्वसङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपहियते । अयं च विध्यातसङ्क्रमो यथाप्रवृत्तसङ्क्रमावसाने प्रायोऽवसेयः ॥ ६८ ॥

इदानीं गुणसङ्क्रमस्य लक्षणमाह—

गुणसंकमो अबज्झंतिगाण असुभाणपुव्वकरणाई । बंधे अहापवत्तो परित्तिउ वा अबंधे वि ॥ ६९ ॥

व्याख्या—अपूर्वकरणादयोऽपूर्वकरणगुणस्थानकप्रभृतयोऽबध्यमानानामशुभप्रकृतीनां सम्बन्धि कर्मदलिकं प्रतिसमयमसङ्ख्येयगुणश्रेण्या यद्बध्यमानासु प्रकृतिषु प्रक्षिपन्ति स गुणसङ्क्रमः गुणेन प्रतिसमयमसङ्ख्येयलक्षणेन गुणकारेण सङ्क्रमो गुणसङ्क्रम इति । तथाहि—मिथ्यात्वातपनारकायुर्वर्जानां मिथ्यादृष्टियोग्यानां त्रयोदशानामनन्तानुबन्धितिर्यगायुरुद्योतवर्जानां च सासादनयोग्यानामेकोनविंशतिप्रकृतीनां तथा मध्यमाष्टकषायस्थिराशुभायशःकीर्त्तिशोकारत्यसातवेदनीयानां सर्वसङ्ख्यया षट्चत्वारिंशत्प्रकृतीनामशुभानामबध्यमानानामपूर्वकरणादारभ्य गुणसङ्क्रमो भवति । मिथ्यात्वमनन्तानुबन्धि-

नश्चापूर्वकरणगुणस्थानादर्वागेवाविरतसम्यग्दृष्ट्यादयः क्षपयन्ति। आतपोद्योतयोश्च शुभत्वान्न गुणसङ्क्रमः, अशुभप्रकृतीनामेव तत्संभवात्। आयुषां च परप्रकृतौ सङ्क्रम एव नेति मिथ्यात्वादिप्रकृतीनामिह वर्जनं। निद्राद्विकोपघाताशुभवर्णादिनवकहास्यरतित्रयजुगुप्सानां त्वपूर्वकरणे स्वस्वबन्धव्यवच्छेदादारभ्य गुणसङ्क्रमो ज्ञातव्यः। अपूर्वकरणादयोऽपूर्वकरणप्रवृत्तप्रभृतयोऽशुभप्रकृतीनामबध्यमानानां दलिकमसङ्ख्येयगुणश्रेण्या बध्यमानासु प्रकृतिषु यत्प्रक्षिपति स गुणसङ्क्रम इत्यपरोऽर्थः। तेन क्षपणकाले मिथ्यात्वसम्यग्मिथ्यात्वानन्तानुबन्धिनामप्यपूर्वकरणरूपात्करणादारभ्य प्रवर्तमानो गुणसङ्क्रमो न विरुध्यते। लक्षितो गुणसङ्क्रमः, अथ यथाप्रवृत्तसङ्क्रमं लक्षयन्नाह—"बंधे "इत्यादि, ध्रुवबन्धिनीनां प्रकृतीनां बन्धे सति यथाप्रवृत्तसङ्क्रमः प्रवर्त्तते। "परित्तिउ व त्ति" परावर्तमानप्रकृतिसम्बन्धी यथाप्रवृत्तसङ्क्रमोऽबन्धेऽपि वा भवति आस्तां बन्धे इत्यपिशब्दार्थः। इयमिह भावना—सर्वेषामपि संसारस्थानां जीवानां ध्रुवबन्धिनीनां बन्धे परावर्तमानप्रकृतीनां तु स्वस्वभवबन्धयोग्यानां बन्धेऽबन्धे वा यथाप्रवृत्तसङ्क्रमो भवति। तत्र ध्रुवबन्धिनीनामध्रुवबन्धिनीनां वा यदि तत्काले प्रभूतं दलं बध्यमानं प्राप्यते। कासाञ्चिदध्रुवबन्धिनीनां तद्भवबन्धयोग्यानां तदानीमबन्धेऽपि यदि प्राग्बद्धं प्रभूतं दलिकं प्राप्यते तर्हि प्रभूतं दलं सङ्क्रमयति। स्तोकं चेत्प्राप्यते तदा स्तोकं सङ्क्रमयति। तच्च जघन्ययोगे वर्तमानो जघन्यं दलिकं मध्यमे मध्यममुत्कृष्टे चोत्कृष्टमिति यथाप्रवृत्त्या सङ्क्रमयतीत्यस्य यथाप्रवृत्तसङ्क्रम इत्यन्वर्थं नाम गीयते। एतेषु पञ्चसु सङ्क्रमेषु कः कं बाधित्वा प्रवर्त्तते इति चेदुच्यते—यथाप्रवृत्तं सङ्क्रमं प्रवर्तमानं स्वहेतुसम्पर्कसामर्थ्येन बाधि-

त्वा विध्यातसङ्क्रमो गुणसङ्क्रमो वा भवति । सर्वसङ्क्रमोऽप्युद्वलनासङ्क्रमस्य चरमखण्डे चरमप्रक्षेप इति सोऽप्युद्वलनासङ्क्रमं बाधित्वा प्रवर्त्तत इति ज्ञेयम् ॥ ६९ ॥

साम्प्रतमेतैरेवोद्वलनासङ्क्रमविध्यातसङ्क्रमगुणसङ्क्रमयथाप्रवृत्तसङ्क्रमैरपहारकालस्याल्पबहुत्वमाह—

थोवोवहारकालो गुणसंकमणे असंखगुणणाए । सेसस्सहापवत्ते विज्झाउव्वलणणामे य ॥ ७० ॥

व्याख्या—उद्वलनासङ्क्रमाभिधानावसरे यत्पूर्वं चरमखण्डमभिहितं तदिह शेषमित्युच्यते, तस्य शेषस्य यदि गुणसङ्क्रममानेनापहारः क्रियते ततोऽन्तर्मुहूर्त्तमात्रेण कालेन सकलमपि तदपह्रियते, ततो गुणसङ्क्रमेणापहारकालः सर्वस्तोकः । ततो यथाप्रवृत्तसङ्क्रमेणापहारकालोऽसङ्ख्येयगुणः, यतस्तदेव चरमखण्डं यथाप्रवृत्तसङ्क्रमेणापह्रियमाणं पल्योपमासङ्ख्येयभागमात्रेण कालेनापह्रियत इति । ततो विध्यातसङ्क्रमेणापहारकालोऽसङ्ख्येयगुणः, यतस्तदेव चरमखण्डं विध्यातसङ्क्रमेणापह्रियमाणमसङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियत इति । ततोऽप्युद्वलनासङ्क्रमेणापहारकालोऽसङ्ख्येयगुणः, यत उद्वलनासङ्क्रमेणेहापहारकाले मीयमाने चरमखण्डं द्विचरमस्थितिखण्डस्य चरमसमये यत्परप्रकृतौ प्रक्षिप्यते तेन मानेनापह्रियमाणं ग्राह्यं । तथापहारे च तदतिप्रभूताभिरसङ्ख्येयोत्सर्पिण्यवसर्पिणीभिरपह्रियते । ततः पाश्चात्यादयमुद्वलनासङ्क्रमेणापहारकालोऽसङ्ख्येयगुणः । विध्यातसङ्क्रमेणोद्वलनासङ्क्रमेण वाऽपहारः क्षेत्रतोऽङ्गुलासङ्ख्येयभागेन द्रष्टव्यः, केवलमुद्वलनासङ्क्रमेणापहारो बृहत्तराङ्गुलेन । इह पूर्वं यथाप्रवृत्तसङ्क्रमस्य कालो नाभिहितः । उद्वलनासङ्क्रमेऽपि यद्द्विचरमं स्थितिखण्डं तस्य चरमसमये स्वस्थाने यत्कर्मदलिकं प्रक्षिप्यते तेन मानेन शेषस्य चरमस्थितिखण्डस्यापहारकालो नोक्तः ॥ ७० ॥

ततस्तन्निरूपणायाह—

पल्लासंखियभागेणहापवत्तेण सेसगवहारो । उवलणेण य थिबुउं अणुइन्नाए उ जं उदये ॥ ७१ ॥

व्याख्या—उवलनासङ्क्रमे यच्चरमं स्थितिखण्डं तस्य यदि यथाप्रवृत्तसङ्क्रममानेनापहारः क्रियते तर्हि पल्योपमासङ्ख्येयभागमात्रेण कालेन निःशेषापहारो भवति । उवलनासङ्क्रमे द्विचरमखण्डस्य चरमप्रक्षेपे यत्स्वस्थाने दलिकं प्रदीयते तावत एव यथाप्रवृत्तसङ्क्रमप्रक्षेपप्रमाणत्वात् । उवलनासङ्क्रमेणापि द्विचरमस्थितिखण्डस्य चरमसमये यत् स्वस्थाने प्रक्षिप्यते दलिकं तेन मानेन चरमस्थितिखण्डस्यापहारकालः पल्योपमासङ्ख्येयभागमात्रलक्षणो ज्ञातव्यः इत्येतौ द्वावपि स्वस्थानप्रक्षेपरूपेण तुल्यौ । पूर्वं तु परस्थानप्रक्षेपरूपेणोवलनासङ्क्रमो ग्राह्य इत्युक्तमेव । इत्थमेव प्रदर्शितं पञ्चसङ्ग्रहे—"जं दुचरिमस्स चरमे सपरट्ठाणेसु देइ समयम्मि । ते भागे जहकमसो अहापवत्तुवलणमाणे ॥१॥" इति, इहान्योऽपि षष्ठः स्तिबुकसङ्क्रमोऽस्ति, परं न तेन सङ्क्रमकरणविशेष आक्षिप्यते, करणस्य सलेश्यवीर्यरूपत्वात्, स्तिबुकसङ्क्रमेण सङ्क्रमस्य च लेश्यातीतस्यायोगिकेवलिनोऽपि भगवतो द्विचरमसमये द्विसप्ततिप्रकृतीनां प्रतिपादनात् । न च स्तिबुकसङ्क्रमेण सङ्क्रान्तं दलिकं सर्वथा पतद्ग्रहप्रकृतिरूपतया परिणमत इति न यथोक्तसङ्क्रमस्वभावोऽसौ, तथापि सङ्क्रमशब्देनायमप्युच्यत इति सङ्क्रमप्रस्तावात्तं लक्षयन्नाह—"थिबुगो अणुइन्नाए उ जं उदए" अनुदीर्णाया अनुदयप्राप्तायाः सत्कं यत्कर्मदलिकं सजातीयप्रकृतावुदयप्राप्तायां समानकालस्थितौ सङ्क्रमयति, सङ्क्रमय्य (थित्वा) चानुभवति यथा मनुजगतावुदयप्राप्तायां शेषं गतित्रयं एकेन्द्रियजातौ जातिचतुष्टयमित्यादि । यथा वा क्षपणकाले संज्वलनक्रोधादीनां शेषीभूता आवलिकाः

संज्वलनमानादावेष स्तिबुकसङ्क्रमः । उक्तं च—"अनुदीर्णमुदीर्णान्तस्तुल्यकालं प्रतिग्रहणम् । दलिकं सङ्क्रमं याति, येन स स्तिबुको मतः ॥ १ ॥" इति, एष एव च प्रदेशानुभवो गीयते ॥ ७१ ॥

तदेवमुक्तं लक्षणं भेदश्च । अथ साद्यनादिप्ररूपणा कर्तव्या । तत्र मूलप्रकृतीनां परस्परं सङ्क्रमो न भवतीत्युत्तरप्रकृतीनामेव तां चिकीर्षुराह—

धुवसंकम अजहन्नो णुक्कोसो तासि वा विवज्जित्तु । आवरणणवगविग्घं उरालियसत्तगं चेव ॥७२॥
साइयमाई चउहा सेसविगप्पा य सेसियाणं च । सव्वविगप्पा णेया साइग अधुवा पएसम्मि॥७३॥

व्याख्या—ध्रुवसत्कर्मणां षड्विंशत्युत्तरशतसङ्ख्यानामजघन्यः प्रदेशसङ्क्रमः साद्यादिः—सादिरनादिर्ध्रुवोऽध्रुवश्चेति चतुर्धा । तत्र क्षपितकर्मांशः क्षपणोद्यतो ध्रुवसत्कर्मप्रकृतीनां सर्वासामपि जघन्यप्रदेशसङ्क्रमं करोति, स च सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः, स चोपशमश्रेण्यां बन्धव्यवच्छेदे न भवति, ततः प्रतिपाते च भवतीति सादिः । तत्स्थानमप्राप्तस्थानादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । अनुत्कृष्टोऽपि प्रदेशसङ्क्रमो ध्रुवसत्कर्मणामावरणनवकं ज्ञानावरणपञ्चकदर्शनावरणचतुष्कलक्षणं, तथान्तरायपञ्चकमौदारिकसप्तकं च वर्जयित्वा शेषस्य पञ्चोत्तरप्रकृतिशतस्य चतुर्धा । तथाहि—सर्वासामपि प्रकृतीनां गुणितकर्मांशे क्षपणार्थमभ्युद्यते उत्कृष्टः प्रदेशसङ्क्रमो लभ्यते, नान्यत्र, ततोऽसौ सादिरध्रुवश्च । तस्मादन्यः सर्वोऽप्यनुत्कृष्टः, स चोपशमश्रेण्यां व्यवच्छिद्य ततः प्रतिपाते भवतीति सादिः, तत्स्थानमप्राप्तस्थानादिः । ध्रुवाध्रुवौ पूर्ववत् । शेषविकल्पाः पञ्चोत्तरशतस्य जघन्य उत्कृष्टश्च, ज्ञानावरणीयाद्येकविंशतिप्रकृतीनां च जघन्योत्कृष्टानुत्कृष्टा

इत्येते सादयोऽध्रुवाश्च । तत्र पञ्चोत्तरशतस्य जघन्य उत्कृष्टश्च साद्यध्रुवतया भावित एव । ज्ञानावरणीयादीनां चोत्कृष्टः प्रदेशसङ्क्रमो गुणितकर्मांशे मिथ्यादृष्टौ कदाचिदेव प्राप्यते, शेषकालं त्वनुत्कृष्ट इत्येतौ द्वावपि साद्यध्रुवौ। जघन्यस्तु साद्यध्रुवतया भावित एव । शेषप्रकृतीनां च सर्वेऽप्युत्कृष्टानुत्कृष्टजघन्याजघन्यविकल्पा अध्रुवसत्कर्मत्वान्मिथ्यात्वस्य ध्रुवसत्कर्मणोऽपि पतद्ग्रहप्राप्तेरध्रौव्यान्नीचैर्गोत्रसातासातवेदनीयानां तु परावर्तमानत्वात्सादयोऽध्रुवाश्चावगन्तव्याः॥ ७२ ॥ ७३ ॥ तदेवं कृता साद्यनादिप्ररूपणा। अथोत्कृष्टप्रदेशसङ्क्रमस्वामित्वमभिधेयं। तच्च गुणितकर्मांशे लभ्यत इति तं लक्ष्ययन्नाह—

जो बायरतसकालेणूणं कम्मठिइं तु पुढवीए । बायरपज्जत्तापज्जत्तगदीहेयरद्धासु ॥ ७४ ॥
जोगकसाउक्कस्सो बहुसो णिच्चमवि आउबंधं च । जोगजहण्णेणुवरिल्लठिइणिसेगं बहुं किच्चा ॥७५॥

व्याख्या—यो बादरत्रसानां द्वीन्द्रियादीनां, तेजोवायुकायिकरूपसूक्ष्मत्रसव्यवच्छेदार्थं बादरग्रहणं, कालेन पूर्वकोटिपृथक्त्वाभ्यधिकसागरोपमसहस्रद्वयप्रमाणेन कायस्थितिकालेनोनां कर्मस्थितिं मोहनीयकर्मस्थितिं सप्ततिसागरोपमकोटाकोटिप्रमाणां यावत् पृथिव्यां बादरे बादरपृथिवीकायभवेषु स्थित्वा। कथं स्थित्वेत्याह—पर्याप्तापर्याप्तकयोर्दीर्घेतराद्धे, सप्तमी द्वितीयार्थे दीर्घाद्धां पर्याप्तभवेषु,इतराद्धां स्तोकाद्धामपर्याप्तभवेषु, प्रभूतेषु पर्याप्तभवेषु स्तोकेषु चापर्याप्तभवेषु स्थित्वेत्यर्थः। तथा बहुशोऽनेकवारं योगकषायोत्कृष्ट उत्कृष्टेषु योगस्थानेषु उत्कृष्टेषु च कषायिकेषु संक्लेशपरिणामेषूषित्वेत्यर्थः। इह शेषैकेन्द्रियेभ्यो बादरपृथिवीकायिकः प्रभूतायुष्कस्तेनाव्यवच्छिन्नं तस्य प्रभूतकर्मपुद्गलोपादानं बलवत्तयाऽतीव वेदनासहिष्णुतया च तस्य प्रभूतकर्मपुद्गलपरिशाटाभावः, असहिष्णुरेव वेदनाकरालितस्तथा तथा प्रयोगेण प्रभूतकर्मपुद्गलान्

परिशातयतीत्येवमालोच्य बादरपृथिवीकायिकग्रहणं कृतं । अपर्याप्तभवग्रहणं च परिपूर्णकायस्थितिपरिग्रहाय, तेषां चापर्याप्तकभवानां स्तोकानां पर्याप्तकभवानां च प्रभूतानां ग्रहणं प्रभूतकर्मपुद्गलपरिशाटाभावज्ञापनाय । अन्यथा हि निरन्तरोत्पद्यमानम्रियमाणेषु बहुपुद्गलपरिशाटो लभ्यते, न च तेनेह प्रयोजनं । उत्कृष्टेषु योगस्थानेषु च वर्तमानः प्रभूतं कर्मदलिकमादत्ते, उत्कृष्टसंक्लेशपरिणामश्चोत्कृष्टां स्थितिं बध्नाति, प्रभूतमुद्वर्तयति, स्तोकं चापवर्तयतीति योगकषायोत्कृष्टग्रहणं । तथा नित्यं सर्वकालं भवे भवे जघन्ययोगे वर्तमानस्तेनायुर्बन्धं कृत्वा उत्कृष्टे ह्यायुःप्रायोग्ये योगे वर्तमानः प्रभूतायुःपुद्गलानादत्ते । उत्कृष्टेन योगेन प्रभूतानायुःपुद्गलानाददानश्च तथास्वाभाव्याज्ज्ञानावरणीयस्य प्रभूतान् पुद्गलान् परिशाटयति, न च तेनेह प्रयोजनमिति जघन्ययोगग्रहणं । तथोपरितनीषु स्थितिषु निषेकं कर्मदलिक न्यासं बहुस्वभूमिकानुसारेणातिप्रभूतं कृत्वा एवं बादरपृथ्वीकायिकेषु बादरत्रसकायस्थितिन्यूनाः सप्ततिसागरोपमकोटाकोटीः संसृत्य ततो निर्गच्छति, निर्गत्य च बादरत्रसकायेषु द्वीन्द्रियादिषु समुत्पद्यते ॥ ७४–७५ ॥

बायरतसेसु तक्कालमेवमंते य सत्तमखिईए । सव्वलहुं पज्जत्तो जोगकसायाहिउ बहुसो ॥ ७६ ॥

व्याख्या—बादरत्रसेषु चैवं प्रभूतस्तोकपर्याप्तापर्याप्तभवावस्थानाद्युपरितनस्थितिबहुनिषेककरणान्तेन पूर्वोक्तेन तत्कालं बादरत्रसकायस्थितिकालं पूर्वकोटिपृथक्त्वाभ्यधिकसागरोपमसहस्रद्वयप्रमाणं परिभ्रमणेन संपूर्य यावतो वारान् सप्तमीं नरकावनिं गन्तुमर्हस्तावतो वाराँस्तत्र गत्वाऽन्तिमे भवे सप्तमपृथ्वीनारकत्वेन वर्तमान इह दीर्घजीवित्वं योगकषायोत्कटता च लभ्यत इति यावत्संभवं सप्तमनरकपृथ्वीगमनग्रहणं । तथा सप्तमक्षितौ नारकभवे सर्वेभ्योऽप्यन्येभ्यो नारकेभ्यो

लघु शीघ्रं पर्याप्तः पर्याप्तभावमुपगतः । इहापर्याप्तापेक्षया पर्याप्तोऽसङ्ख्येयगुणयोगो लभ्यते । तथा च तस्याति-प्रभूतकर्मपुद्गलोपादानसंभवः, तेन चेह प्रयोजनमिति सर्वलघुपर्याप्त इत्युक्तं । बहुशश्चानेकवारं तस्मिन्नन्त्यसप्तमनरक-पृथ्वीनारकभवेऽपि योगकषायाधिको भूत्वा उत्कृष्टानि योगस्थानान्युत्कृष्टाँश्च कषायिकान् परिणामविशेषान् गच्छन्नित्यर्थः ७६

जोगजवमज्झउवरिं मुहुत्तमच्छित्तु जीवियवसाणे । तिचरिमबिचरिमसमए पूरित्तु कसायउक्कस्सं ॥७७॥
जोगुक्कस्सं चरिमदुचरिमे समए य चरिमसमयम्मि । संपुन्नगुणियकम्मो पगयं तेणेह सामित्ते ॥७८॥

व्याख्या—योगयवमध्यस्याष्टसामायिकानां योगस्थानानामुपरि अन्तर्मुहूर्त्तं जीवितावसाने स्थित्वाऽन्तर्मुहूर्त्तावशेषे आ-युषि योगयवमध्यस्योपरि असङ्ख्येयगुणवृद्ध्याऽन्तर्मुहूर्त्तं यावत्प्रवर्धमानो भूत्वेत्यर्थः । भवस्य त्रिचरमे द्विचरमे च समये वर्तमान उत्कृष्टं कषायिकसंक्लेशस्थानं पूरयित्वा त्रयः समयाश्चरमा यस्माद्यत आरभ्यान्तिमः समयस्तृतीयो भवतीति यावत् स त्रिचरमः । एवं द्वौ चरमौ यस्मात्स द्विचरम इति व्युत्पत्तिः । चरमे द्विचरमे च समये योगस्थानमपि चोत्कृष्टं पूरयित्वा इहोत्कृष्टो योग उत्कृष्टश्च संक्लेशो युगपदेकमेव समयं यावत्प्राप्यते नाधिकमिति विषमसमयोद्भवोत्कृष्टयोगोत्कृष्ट-कषायस्थानग्रहणं । त्रिचरमे द्विचरमे च समये उत्कृष्टसंक्लेशग्रहणं प्रभूतोद्वर्तनास्वल्पापवर्तनासंपत्तये । द्विचरमे चरमे च समये उत्कृष्टयोगग्रहणं संपूर्णप्रदेशोपचयसंभवाय । एवं कृत्वा नारकभवस्य चरमसमये संपूर्णगुणितकर्मांशः संपद्यते, तेन च संपूर्णगुणितकर्मांशेनेहोत्कृष्टप्रदेशसङ्क्रमस्वामित्वे प्रकृतमधिकृतम् ॥ ७७–७८ ॥

तदेवमुक्तो गुणितकर्मांशः, सम्प्रति स्वामित्वमभिधीयते—

तत्तो उवट्टित्ता आवलिगासमय तप्पवत्थस्स । आवरणविग्घचोद्दसगोरालियसत्तगुक्कस्सो ॥ ७९ ॥

व्याख्या—तस्य गुणितकर्मांशस्य ततः सप्तमपृथ्वीरूपान्नरकादुद्धृत्य पर्याप्तपञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नस्य तप्पवस्थस्य तस्मिन् पर्याप्तसंज्ञिपञ्चेन्द्रियभवे तिष्ठतः "आवलिगासमय त्ति" लुप्तसप्तम्यन्तनिर्देशः, आद्यतप्पवावलिकाया उपरितने चरमसमय इत्यर्थः । ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकौदारिकसप्तकलक्षणानामेकविंशतिप्रकृतीनामुत्कृष्टप्रदेशसङ्क्रमो भवति । यत एतासां कर्मप्रकृतीनां नारकभवान्त्यसमये उत्कृष्टयोगेनातिप्रभूतं दलिकमात्तं, तच्च बन्धावलिकायामतीतायां सङ्क्रम्यते, अन्यत्र चैतावत्प्रभूतं कर्मदलिकमुक्तप्रक्रियालभ्यं न लभ्यते, तत आवलिकान्तसमये तप्पवस्थस्येत्युक्तम् ॥ ७९ ॥

कम्मचउक्के असुभाण बप्पमाणीण खवग(सुहुम)रागंते । संछोभणम्मि णियगे चउवीसाए नियट्टिस्स८०

व्याख्या—कर्मचतुष्के दर्शनावरणवेदनीयनामगोत्रलक्षणे या अशुभाः प्रकृतयः सूक्ष्मसंपरायत्वेऽबध्यमानाः प्रकृतयो निद्राद्विकासातवेदनीयानाद्यसंहननसंस्थानाशुभवर्णादिनवकोपघाताप्रशस्तविहायोगत्यपर्याप्तास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्त्तिनीचैर्गोत्रलक्षणा द्वात्रिंशत् तासां गुणितकर्मांशस्य क्षपकस्य सूक्ष्मसंपरायस्यान्ते चरमसमये उत्कृष्टः प्रदेशसङ्क्रमो भवति । तथा मध्यमकषायाष्टकस्त्यानर्द्धित्रिकतिर्यग्द्विकद्वित्रिचतुरिन्द्रियजातिसूक्ष्मसाधारणनोकषायषट्करूपाणां चतुर्विंशतिप्रकृतीनां "णियगे त्ति" स्वस्वचरमसंछोभेऽनिवृत्तिबादरस्य गुणितकर्मांशस्य क्षपकस्योत्कृष्टः प्रदेशसङ्क्रमो भवति ८०

तत्तो अणंतरागयसमयाउक्कस्स सायबंधद्धं । बंधिय असायबंधालिगंतसमयम्मि सायस्स ॥ ८१ ॥

व्याख्या—ततो नरकजवादनन्तरजवे समागतः समयादिति प्रथमसमयादारभ्योत्कृष्टं बन्धाद्धामुत्कृष्टं बन्धकालं यावदित्यर्थः, सातवेदनीयं बध्ध्वाऽसातवेदनीयं बध्नाति। ततोऽसातवेदनीयबन्धावलिकान्त्यसमये सातवेदनीयं सकलमपि बन्धावलिकातीतं जवतीति बध्यमानेऽसातवेदनीये तदा सातं यथाप्रवृत्तसङ्क्रमेण सङ्क्रमयतः सातस्योत्कृष्टप्रदेशसङ्क्रमो लभ्यते ८१

संठोजणाए दोएहं मोहाणं वेयगस्स खणसेसे। उप्पाइय सम्मत्तं मिच्छत्तगए तमतमाए ॥ ८२ ॥

व्याख्या—द्वयोर्मोहयोर्मिथ्यात्वसम्यग्मिथ्यात्वरूपयोः संठोजणायां स्वस्वचरमसंठोजे क्षपकस्य सर्वसङ्क्रमेणोत्कृष्टः प्रदेशसङ्क्रमो जवति। तथा क्षणशेषेऽन्तर्मुहूर्त्तावशेषे आयुषि तमस्तमायां सप्तमनरकपृथिव्यां वर्तमान औपशमिकं सम्यक्त्वमुत्पाद्य दीर्घेण च गुणसङ्क्रमकालेन वेदकसम्यक्त्वपुञ्जं समापूर्य सम्यक्त्वात्पतित्वा मिथ्यात्वं प्रपद्यमानस्तत्प्रथमसमय एव वेदकसम्यक्त्वस्य मिथ्यात्वे उत्कृष्टप्रदेशसङ्क्रमं करोति ॥ ८२ ॥

जिन्नमुहुत्ते सेसे तच्चरिमावस्सगाणि किच्चेत्थ। संजोअणा विसंजोअगस्स संठोजणा एसिं ॥ ८३ ॥

व्याख्या—स गुणितकर्मांशः सप्तमक्षितौ वर्त्तमानो जिन्नमुहूर्त्ते शेषे आयुषि तच्चरमावश्यकानि तस्मिन् जवे यानि चरमावश्यकानि योगयवमध्याधुपरि मुहूर्त्तावस्थानादिलक्षणानि तानि कृत्वेह तस्याः सप्तमपृथिव्या उद्धृत्यानन्तरजवे सम्यक्त्वमुत्पाद्य वेदकसम्यग्दृष्टिः सन् संयोजनाननन्तानुबन्धिनो विसंयोजयति। विसंयोजना क्षपणा। तत एतस्य संयोजनाविसंयोजकस्यैषामनन्तानुबन्धिनां चरमसंठोजे सर्वसङ्क्रमेणोत्कृष्टः प्रदेशसङ्क्रमो जवति ॥ ८३ ॥

ईसाणागयपुरिसस्स इत्थियाए व अट्ठवासाए। सासपुहुत्तप्पहिए णपुंसगे सवसंकमणे ॥ ८४ ॥

व्याख्या—ईशानदेवो गुणितकर्मांशः संक्लेशपरिणामेनैकेन्द्रियप्रायोग्यं बध्नन्नपुंसकवेदं भूयो भूयो बद्ध्वा ततश्च्युतः सन् स्त्री वा पुरुषो वा जातो यो मासपृथक्त्वान्यधिकवर्षाष्टकेऽतिक्रान्ते क्षपणायोद्यतते, तस्य नपुंसकवेदं क्षपयतश्चरमसंक्षोभे सर्वसङ्क्रमेण नपुंसकवेदस्योत्कृष्टः प्रदेशसङ्क्रमः ॥ ७४ ॥

इत्थीए भोगभूमीसु जीविय वासाणसंखियाणि तओ । हस्सठिइं देवयत्ता सव्वलहुं सव्वसंकोभे ॥ ७५ ॥

व्याख्या—यो भोगभूमिषु भूयो भूयोऽसङ्ख्येयानि वर्षाणि यावत्संक्लेशेन स्त्रीवेदं बध्ध्वापूर्य च प्रकृत्यन्तरदलिकसङ्क्रमेण पल्योपमासङ्ख्येयभागे गते सत्यकालमृत्युना मृत्वा ह्रस्वस्थितिं दशवर्षसहस्रप्रमाणां देवायुषो बध्ध्वा देवत्वेनोत्पन्नस्तत्रापि तमेव स्त्रीवेदमापूर्य स्वायुःक्षये मनुजेषु मध्येऽन्यतरवेदसहितो जातः । ततो लघु शीघ्रं क्षपणायोद्यतस्तस्य स्त्रीवेदस्य क्षपणसमये चरमसंक्षोभे "सव्व त्ति" सर्वसङ्क्रमेणोत्कृष्टः प्रदेशसङ्क्रमो भवति । इहेत्थमेव स्त्रीवेदस्योत्कृष्टापूरणोत्कृष्टप्रदेशसङ्क्रमसंभवः केवलबोधे(ज्ञाने)नोपलब्धो नान्यथेति नान्या युक्तिर्मृग्या । इयमेव युक्तिरुत्तरत्रापि यथायोगमनुसर्त्तव्या ॥७५॥

वरिसधरित्थिं पूरिय सम्मत्तमसंखवासियं लहिय । गंता मिच्छत्तमउं जहन्नदेवठिइं भोच्चा ॥ ७६ ॥

व्याख्या—वर्षधरो नपुंसकवेदस्तमीशानदेवलोके भूयो भूयो बन्धेन दलिकान्तरसङ्क्रमणेन च प्रभूतकालमापूर्य स्वायुःक्षये ततश्च्युत्वा सङ्ख्येयवर्षायुष्केषु समुत्पद्य पुनरसङ्ख्येयवर्षायुष्केषु गत्वा तत्रासङ्ख्येयानि वर्षाणि यावत्स्त्रीवेदमापूर्य ततोऽसङ्ख्येयानि वर्षाणि यावत्सम्यक्त्वं लब्धाऽऽसाद्य तद्धेतुकं च पुरुषवेदं तावन्ति वर्षाणि बध्नँस्तत्र स्त्रीवेदनपुंसकवेदयोर्दलिकं निरन्तरं सङ्क्रमयति । ततः पल्योपमासङ्ख्येयभागमात्रं सर्वायुःकालं जीवित्वा पर्यन्ते च मिथ्यात्वं गत्वा ततो जघन्य-

स्थितिषु दशवर्षसहस्रप्रमाणस्थितिषु देवेषु मध्ये समुत्पद्यते। तत्र च समुत्पन्नः सन्नन्तर्मुहूर्त्तेन कालेन सम्यक्त्वं प्रतिपद्यते ॥८६॥

आगंतुं लहु पुरिसं संबुन्नमाणस्स पुरिसवेअस्स। तस्सेव सगे कोहस्स माणमायाणमवि कसिणो ८७

व्याख्या—तां देवस्थितिं भुक्त्वा ततो देवभवाच्च्युत्वा मनुष्येष्वागत्य माससप्तकाभ्यधिके वर्षाष्टकेऽतिक्रान्ते लघु शीघ्रं क्षपणायोद्यतते, तस्य पुरुषवेदं चरमसंक्षोभे संबुन्नतस्तस्योत्कृष्टप्रदेशसङ्क्रमो भवति, केवलमेष बन्धव्यवच्छेदादर्वागावलिकाद्विकेन कालेन यद्बद्धं पुरुषवेददलिकं तदतीव स्तोकमिति कृत्वा तत्परित्यज्य शेषस्य द्रष्टव्यः। तथा तस्यैव पुरुषवेदोत्कृष्टप्रदेशसङ्क्रमस्वामिनः संज्वलनक्रोधस्य संसारपरिभ्रमणेनोपचितस्य क्षपणकाले प्रकृत्यन्तरदलिकानां गुणसङ्क्रमेण प्रचुरीकृतस्य स्वके आत्मीये चरमसंक्षोभे उत्कृष्टः प्रदेशसङ्क्रमो भवति। अत्रापि बन्धव्यवच्छेदादर्वागावलिकाद्विकमानेन कालेन यद्बद्धं तन्मुक्त्वा शेषस्य चरमसंक्षोभे उत्कृष्टः प्रदेशसङ्क्रमो द्रष्टव्यः। एवं मानमाययोरपि वाच्यम् ॥ ८७ ॥

चउरुवसमित्तु खिप्पं लोभजसाणं ससंकमस्संते। सुहुधुवबंधिगणामाणावलिगं गंतु बंधंता ॥ ८८ ॥

व्याख्या—अनेकभवभ्रमणेन चतुरो वारान् मोहनीयमुपशमय्य चतुर्थवारोपशमनानन्तरं शीघ्रमेव क्षपकश्रेणिं प्रतिपन्नस्य गुणितकर्मांशस्य स्वसङ्क्रमस्यान्ते चरमसंक्षोभ इत्यर्थः, संज्वलनलोभयशःकीर्त्योरुत्कृष्टप्रदेशसङ्क्रमो भवति। उपशमश्रेणिप्रतिपन्नेन प्रकृत्यन्तरदलिकानां प्रभूतानां गुणसङ्क्रमेण प्रक्षेपात्संज्वलनलोभयशःकीर्त्योर्निरन्तरमापूरणं भवतीति तत्प्रतिपत्तये चतुरुपशमश्रेणिप्रतिपत्तिग्रहणं। आसंसारं परिभ्रमतश्च जन्तोरुत्कर्षतोऽपि चतुर्वारमेव मोहोपशमः स्यादिति नाधिकग्रहणं। तथा संज्वलनलोभस्य चरमसंक्षोभोऽन्तरकरणचरमसमये द्रष्टव्यो न परतः, परतस्तत्सङ्क्रमासंभवात्,

अन्तरकरणे कृते चारित्रमोहनीयप्रकृतीनामानुपूर्व्यैव सङ्क्रमोपदेशाद्यशःकीर्तेरपूर्वकरणगुणस्थानके त्रिंशत्प्रकृतिबन्धव्यवच्छेदसमये ज्ञातव्यः, परतस्तस्याः पतद्ग्रहाभावेन सङ्क्रमाभावात् । शुभध्रुवबन्धिनामप्रकृतीनां तैजससप्तकशुक्ललोहितहारिद्रसुरभिगन्धकषायाम्लमधुरमृदुलघुस्निग्धोष्णागुरुलघुनिर्माणलक्षणानां विंशतिसङ्ख्यानां चतुःकृत्वो मोहनीयोपशमानन्तरं बन्धान्ताद्बन्धव्यवच्छेदादूर्ध्वमावलिकां गत्वा आवलिकायाः परतो यशःकीर्तौ प्रक्षिप्यमाणानामुत्कृष्टः प्रदेशसङ्क्रमो लभ्यते । गुणसङ्क्रमेण सङ्क्रान्तस्य प्रकृत्यन्तरदलिकस्यावलिकायां व्यतीतायामेवान्यत्र सङ्क्रमणयोग्यत्वाद्बन्धान्तादावलिकां गत्वेत्युक्तम् ॥ ८८ ॥

निरुसमा य थिरसुभा सम्मद्दिट्ठिस्स सुभधुवाउं वि । सुभसंघयणजुआउं बत्तीससउंदहि चियाउं ८९

व्याख्या—स्निग्धलक्षणस्पर्शसमे स्थिरशुभनामनी द्रष्टव्ये, यथाऽनन्तरं शुभध्रुवबन्धिनामप्रकृत्यन्तर्गतस्य स्निग्धस्पर्शस्योत्कृष्टप्रदेशसङ्क्रमभावना कृता तथैवैतयोरपि कर्तव्येत्यर्थः । अध्रुवबन्धित्वादनयोः पृथगुपादानं । सम्यग्दृष्टेः शुभध्रुवबन्धिन्योऽपि पञ्चेन्द्रियजात्याद्यसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसचतुष्कसुभगत्रिकलक्षणा द्वादश शुभसंहननयुता वज्रर्षभनाराचसंहननसहिताः । वज्रर्षभनाराचं हि न सम्यग्दृष्टेर्ध्रुवबन्धि, मनुजतिर्यग्भवे वर्तमानस्य सम्यग्दृष्टेर्देवगतिप्रायोग्यस्यैव बन्धसंभवेन संहननबन्धानुपपत्तेरिति पृथगुक्तं । द्वात्रिंशदधिकसागरोपमशतचिता उत्कृष्टप्रदेशसङ्क्रमयोग्याः । तथाहि—षट्षष्टिसागरोपमाणि यावत्सम्यक्त्वमनुपालयन्नेता बध्नाति, ततोऽन्तर्मुहूर्त्तं कालं यावत्सम्यग्मिथ्यात्वमनुभूय भूयोऽपि सम्यक्त्वं प्रतिपद्य तदनुभवन् षट्षष्टिसागरोपमाणि यावदेताः प्रकृतीर्बध्नाति । तदेवं द्वात्रिंशं शतं

सागरोपमाणां सम्यग्दृष्टिर्ध्रुवा आपूर्य, वज्रर्षभनाराचसंहननं तु मनुष्यभवहीनं यथासंभवमुत्कृष्टं कालमापूर्यापूर्वकरण-गुणस्थाने बन्धव्यवच्छेदानन्तरमावलिकामात्रं कालमतिक्रम्य यशःकीर्तौ ध्रुवाः संक्रमयँस्तासामुत्कृष्टप्रदेशसङ्क्रमं करोति, गुणसङ्क्रमेण लब्धस्य प्रकृत्यन्तरदलिकराशेरप्यतिप्रभूतस्य सङ्क्रमावलिकातीतस्य तदानीं सङ्क्रमसंभवात् । वज्रर्षभनाराच-संहननस्य तु सुरभवाच्च्युतः सन् सम्यग्दृष्टिः सुरगतिप्रायोग्यं बध्नन्नावलिकामात्रमतिक्रम्योत्कृष्टप्रदेशसङ्क्रमं करोति ॥८९॥

पूरित्तु पुव्वकोमीपुहुत्त संठोभगस्स णिरयदुगं । देवगईणवगस्स य सगबंधंतालिगं गंतुं ॥ ९० ॥

व्याख्या—नरकद्विकं नरकगतिनरकानुपूर्वीलक्षणं पूर्वकोटिपृथक्त्वं यावत्पूरयित्वा, पूर्वकोट्यायुष्कतिर्यग्भवसप्तके भूयो भूयो बन्धेनापूर्येत्यर्थः । ततोऽष्टमे भवे मनुष्यो भूत्वा क्षपकश्रेणिमारुह्यान्यत्र तत्सङ्क्रमयन् चरमसंस्थाने सर्वसङ्क्रमेण तस्योत्कृष्टं प्रदेशसङ्क्रमं करोति । तथा देवगतिदेवानुपूर्वीवैक्रियसप्तकलक्षणं देवगतिनवकं पूर्वकोटिपृथक्त्वं यावदापूर्याष्टमे भवे क्षपकश्रेणिं प्रतिपन्नः सन् बन्धान्तात्स्वबन्धव्यवच्छेदानन्तरमावलिकां गत्वाऽऽवलिकामात्रं कालमतीत्य यदा तद्यशःकीर्त्तौ प्रक्षिप्यते तदा प्रकृत्यन्तरदलिकानामपि गुणसङ्क्रमोपनीतानां सङ्क्रमावलिकातिक्रान्तत्वेन सङ्क्रम इति तस्यो-त्कृष्टप्रदेशसङ्क्रमो भवति ॥ ९० ॥

सव्वचिरं सम्मत्तं अणुपालिय पूरइत्तु मणुयदुगं । सत्तमखिइणिग्गयगे पढमे समए णरदुगस्स ॥९१॥

व्याख्या—सर्वचिरं सर्वोत्कृष्टं कालमन्तर्मुहूर्त्तोनानि त्रयस्त्रिंशत्सागरोपमाणीत्यर्थः, सम्यक्त्वमनुपाल्य नारकसप्तमपृ-थिव्यां वर्तमानः सम्यक्त्वप्रत्ययं तावन्तं कालं मनुजद्विकं पूरयित्वा बध्वा चरमेऽन्तर्मुहूर्त्ते मिथ्यात्वं गतस्तन्निमित्तं तिर्य-

ग्विकं बध्नन् गुणितकर्मांशः सप्तमपृथिव्या निर्गत्य प्रथमसमय एव मनुजद्विकं यथाप्रवृत्तसङ्क्रमेण तस्मिँस्तिर्यग्द्विके बध्यमाने सङ्क्रमयति यस्तस्य मनुजद्विकस्योत्कृष्टप्रदेशसङ्क्रमो भवति ॥ ९१ ॥

थावरतज्जायायावुज्जोयाउं णपुंसगसमाउं । आहारगतित्थयरं थिरसममुक्कस्ससगकालं ॥ ९२ ॥

व्याख्या—स्थावरनाम, तज्जातिस्तस्य स्थावरस्य जातिरेकेन्द्रियजातिरित्यर्थः, आतपनाम,उद्योतनाम, एताश्चतस्रः प्रकृतयो नपुंसकसमास्तदुत्कृष्टप्रदेशसङ्क्रमभावनासमभावना इत्यर्थः । तथाऽऽहारकसप्तकं तीर्थकरनाम च स्थिरसमं वक्तव्यं, केवलं तदुत्कृष्टस्वकबन्धकालं यावदापूर्यमाणं वक्तव्यं। तत्राहारकसप्तकस्य स्वबन्धकाल उत्कृष्टो देशोनां पूर्वकोटिं यावत्संयममनुपालयतो यावानप्रमत्ततताकालस्तावान् सर्वोऽप्यवसेयः । तीर्थकरनाम्नश्च सपूर्वकोटित्र्याधिकानि त्रयस्त्रिंशत्सागरोपमाणि, तत एतावन्तं कालं तयोरापूरणं कृत्वा क्षपकश्रेणिं प्रतिपद्य बन्धव्यवच्छेदानन्तरमावलिकामात्रमतिक्रम्य यदा यशःकीर्त्तौ तयोः सङ्क्रमं करोति तदा तदुत्कृष्टप्रदेशसङ्क्रमलाभः ॥ ९२ ॥

चउरुवसमित्तु मोहं मिच्छत्तगयस्स णीयबंधंता । उच्चागोउक्कस्सो तत्तो लहु सिप्पउं होइ ॥ ९३ ॥

व्याख्या—यश्चतुःकृत्वो मोहमुपशमयँस्तत्काले उच्चैर्गोत्रमेव बध्नन्नुच्चैर्गोत्रे नीचैर्गोत्रसत्कानि दलिकानि गुणसङ्क्रमेण सङ्क्रमयति। चतुःकृत्वश्च मोहोपशमो भवघ्नेन भवति "मोहोपशम एकस्मिन् भवे द्विः स्यात्" इतिवचनात् । ततस्तृतीये भवे मिथ्यात्वं गतः सन्नीचैर्गोत्रं बध्नाति,तच्च बध्नँस्तत्रोच्चैर्गोत्रं सङ्क्रमयति। ततो भूयः सम्यक्त्वमासाद्योच्चैर्गोत्रं बध्नँस्तत्र नीचैर्गोत्रं

सङ्क्रमयति । एवं तस्य मुहुर्मुहुरुच्चैर्गोत्रं नीचैर्गोत्रं च बध्नतो नीचैर्गोत्रबन्धव्यवच्छेदानन्तरं लघु शीघ्रमेव "सिग्घउ त्ति" सेत्स्यतो नीचैर्गोत्रबन्धान्त्यसमये उच्चैर्गोत्रस्य गुणसङ्क्रमबन्धाभ्यामुपचितस्योत्कृष्टः प्रदेशसङ्क्रमो भवति ॥ ९३ ॥

तदेवमभिहितमुत्कृष्टप्रदेशसङ्क्रमस्वामित्वं, अथ जघन्यप्रदेशसङ्क्रमस्वामित्वमभिधेयं । तच्च क्षपितकर्मांशे प्रायो लभ्यत इति तत्स्वरूपं निरूपयति—

पल्लासंखियभागूण कम्मठिइमच्छिउं णिगोएसु । सुहुमेसु भवियजोगं जहन्नगं कट्टु णिग्गम्म ॥ ९४ ॥
जोग्गेसुऽसंखवारे सम्मत्तं लभिय देसविरइं च । अट्ठक्खुत्तो विरइं संजोअणहा तइयवारे ॥ ९५ ॥
चउरुवसमित्तु मोहं लहुं खवंतो भवे खवियकम्मो । पाएण तहिं पगयं पकुच्च काउं वि सविसेसं ॥ ९६ ॥

व्याख्या—यो जीवः पल्योपमासङ्ख्येयभागेनोनां कर्मस्थितिं सप्ततिसागरोपमकोटाकोटिप्रमाणां यावत् पल्योपमासङ्ख्येयभागोनसप्ततिसागरोपमकोटाकोटिप्रमाणं कालं यावदित्यर्थः । सूक्ष्मनिगोदेषु सूक्ष्मानन्तकायिकेषु मध्ये स्थित्वा, सूक्ष्मनिगोदा हि स्वल्पायुषो भवन्ति, ततस्तेषां निरन्तरप्रभूतजन्ममरणवेदनार्त्तत्वेन प्रभूतपुद्गलपरिशाटः स्यादिति सूक्ष्मनिगोदग्रहणं । सोऽपि शेषनिगोदजीवानपेक्ष्यात्यल्पकषायोऽत्यल्पयोगश्च गृह्यते, मन्दकषायतायां स्वल्पतरां स्थितिं बध्नाति स्तोकां चोद्वर्तयति । मन्दयोगतायां च नवकर्मपुद्गलोपादानमतिस्तोकं भवतीति कृत्वा । ईदृशः सूक्ष्मनिगोदो भूत्वा भव्यप्रायोग्यजघन्यकल्पं प्रदेशसञ्चयं कृत्वा, ततः सूक्ष्मनिगोदेभ्यो निर्गत्य योग्येषु सम्यक्त्वदेशविरतिसर्वविरतियोग्येषु त्रसेषु

मध्ये समुत्पद्य पल्योपमासङ्ख्येयभागमध्येऽसङ्ख्यवारान् यावत्सम्यक्त्वं तावत एव वारान् किञ्चिदूनान् देशविरतिं च लब्ध्वा । कथं लब्ध्वेति चेदुच्यते—सूक्ष्मनिगोदेभ्यो निर्गत्य बादरपृथ्वीकायिकेषु मध्ये समुत्पन्नस्ततोऽन्तर्मुहूर्त्तेन कालेन निर्गत्य मनुष्येषु पूर्वकोट्यायुष्केषु मध्ये समुत्पन्नः, तत्रापि शीघ्रमेव माससप्तकानन्तरं योनिनिर्गमनेन जातोऽष्टवार्षिकः सन् संयमं प्रतिपन्नः । ततो देशोनां पूर्वकोटिं यावत्संयममनुपाल्य स्तोकशेषे जीविते मिथ्यात्वं प्राप्तः । ततो मिथ्यात्वसहित एव मृत्वा दशवर्षसहस्रप्रमाणस्थितिषु देवेषु मध्ये देवत्वेनोत्पन्नः । ततोऽन्तर्मुहूर्त्तमात्रे गते सम्यक्त्वं प्राप्नोति । ततो दशवर्षसहस्राणि जीवित्वा तावन्तं च कालं सम्यक्त्वमनुपाल्यान्ते मिथ्यात्वेन कालं गतः सन् बादरपृथ्वीकायिकेषु समुत्पन्नः । ततोऽन्तर्मुहुर्त्तेन ततोऽप्युद्धृत्य मनुष्येषु समुत्पद्यते । ततः पुनरपि सम्यक्त्वं देशविरतिं वा प्रतिपद्यते । एवं देवमनुष्यभवेषु सम्यक्त्वादि गृह्णन् मुञ्चंश्च तावद्वाच्यो यावत्पल्योपमासङ्ख्येयभागमात्रकालमध्ये सङ्ख्यातीतान् वारान् यावत्सम्यक्त्वलाभः स्वल्पकालिकश्च देशविरतिलाभो भवति । सम्यक्त्वादिप्रतिपत्तिकाले बहुप्रदेशाः प्रकृतीरल्पप्रदेशाः करोतीति बहुशः सम्यक्त्वादिप्रतिपत्तिग्रहणं । एतेषु च सम्यक्त्वादियोग्येषु भवेष्वष्टकृत्वोऽष्टौ वारान् यावद्विरतिमिति सर्वविरतिं लभते । "तइयवारे त्ति" तावत एव वारानष्टौ वारानित्यर्थः । "संयोजणहा" अनन्तानुबन्धिविघातको भूत्वा, उक्तं च—"अणजवलणं च अट्ठवारा" इति । तथा चतुरो वारान्मोहनीयमुपशमय्य ततोऽन्यस्मिन् भवे लघु शीघ्रं कर्माणि क्षपयन् क्षपितकर्मांश उच्यते, तेन च क्षपितकर्मांशेनेह जघन्यप्रदेशसङ्क्रमस्वामित्वचिन्तायां प्रायेण बाहुल्येन प्रकृतमधिकारः । काश्चित्पुनः प्रकृतीरधिकृत्य सविशेषं भणिष्यामि ॥ ९४–९५–९६ ॥

तत्र जघन्यप्रदेशसङ्क्रमस्वामित्वं पृथक् पृथक् विवृणोति—

आवरणसत्तगम्मि उ सहोहिणा तं विणोहिजुगलम्मि । णिद्दादुगंतराइयहासचउक्के य बंधंते ॥ ९७ ॥

व्याख्या—सहावधिना वर्तते यो जीवस्तस्येति गम्यं, आवरणसप्तके सप्तम्याः षष्ठ्यर्थत्वादवधिज्ञानावरणरहितज्ञानावरणचतुष्टयावधिदर्शनावरणरहितदर्शनावरणत्रयरूपावरणसप्तकस्य स्वस्वबन्धव्यवच्छेदसमये यथाप्रवृत्तसङ्क्रमेण जघन्यः प्रदेशसङ्क्रमो भवति, अवधिज्ञानमुत्पादयता प्रभूताः कर्मपुद्गलाः परिशाटिताः, तत एतासां स्वस्वबन्धव्यवच्छेदसमये स्तोका एव पुद्गलाः प्राप्यन्ते । जघन्यप्रदेशसङ्क्रमेण चाधिकार इत्यवधिना सह यो वर्तत इत्युक्तं । तथा तमवधिं विनाऽवधिज्ञानावधिदर्शनरहितस्येत्यर्थः, अवधियुगलस्यावधिज्ञानावरणावधिदर्शनावरणरूपस्य स्वस्वबन्धव्यवच्छेदसमये जघन्यः प्रदेशसङ्क्रमो भवति । अवधिज्ञानमवधिदर्शनं चोत्पादयतः क्षयोपशमप्राबल्यादवधिज्ञानावधिदर्शनावरणकर्मपुद्गला अतीव रूक्षा जायन्ते, ततो बन्धव्यवच्छेदकालेऽपि प्रभूताः परिशटन्ति । तथा च सति जघन्यप्रदेशसङ्क्रमाभाव इति तं विनेत्युक्तं । "निद्द त्ति" निद्राद्विकस्य निद्राप्रचलारूपस्यान्तरायपञ्चकस्य हास्यचतुष्टयस्य च हास्यरतिभयजुगुप्सालक्षणस्य सर्वसङ्ख्ययैकादशप्रकृतीनां स्वबन्धान्तसमये यथाप्रवृत्तसङ्क्रमेण जघन्यः प्रदेशसङ्क्रमो भवति । निद्राद्विकहास्यचतुष्टययोर्बन्धव्यवच्छेदानन्तरं गुणसङ्क्रमेण सङ्क्रमो जायते, ततः प्रभूतं दलिकं लभ्यते, अन्तरायपञ्चकस्य तु बन्धव्यवच्छेदानन्तरं पतद्ग्रहाप्राप्तेः सङ्क्रम एव न संभवति, ततो बन्धान्तसमयग्रहणम् ॥ ९७ ॥

सायस्स णुवसमित्ता असायबंधाण चरमबंधंते । खवणाए लोभस्स वि अपुव्वकरणालिगा अंते ॥ ९८ ॥

व्याख्या—अनुपशमय्योपशमश्रेण्या मोहोपशममकृत्वाऽसातबन्धानां मध्ये यश्चरमोऽसातबन्धस्तस्यान्तिमसमये वर्तमानस्य क्षपणायोद्यतस्य सातस्य जघन्यः प्रदेशसङ्क्रमो ज्ञवति, परतो हि सातस्य पतद्ग्रहतैव ज्ञवति, न सङ्क्रमः, मोहनीयोपशममकृत्वा क्षपणोद्यतस्यापूर्वकरणाद्धायाः प्रथमावलिकाया अन्तसमये संज्वलनलोज्ञस्य जघन्यः प्रदेशसङ्क्रमः, परतो गुणसङ्क्रमलब्धस्यातिप्रज्ञूतस्य दलिकस्य सङ्क्रमावलिकातिक्रान्तस्य सङ्क्रमसंज्ञवाज्जघन्यप्रदेशसङ्क्रमाज्ञावः ॥ ९८ ॥

अयरठ्ठावठ्ठिइगं गालिय थीवेयथीणगिद्धितिगे । सगखवणद्धापवत्तस्संते एमेव मिछत्ते ॥ ९९ ॥

व्याख्या—सागरोपमाणां षट्षष्टिछिकं यावत्सम्यक्त्वं परिपाट्य स्त्रीवेदस्त्यानर्द्धित्रिकलक्षणाः प्रकृतीर्गालयित्वा सम्यक्त्वप्रज्ञावेण तासां सम्बन्धि प्रज्ञूतं कर्मदलिकं परिशाट्येत्यर्थः । ततः किञ्चिन्न्यूनेषाणां तासां क्षपणायोद्यतस्य यथाप्रवृत्तकरणान्तिमसमये विध्यातसङ्क्रमेण जघन्यः प्रदेशसङ्क्रमो ज्ञवति । परतोऽपूर्वकरणे गुणसङ्क्रमेण प्रज्ञूतकर्मदलिकसङ्क्रमसंज्ञवाज्जघन्यप्रदेशसङ्क्रमालाज्ञ इति यथाप्रवृत्तकरणांतसमयग्रहणं । एवमेव मिथ्यात्वेऽपि ज्ञावनीयं । मिथ्यात्वस्यापि सागरोपमाणां षट्षष्टिछिकं यावत्सम्यक्त्वानुपालनेन गालयित्वा किञ्चिन्न्यूनेषीकृतस्य क्षपणोद्यतस्य स्वकीययथाप्रवृत्तकरणान्तसमये विध्यातसङ्क्रमेण जघन्यप्रदेशसङ्क्रमः । परतस्तु गुणसङ्क्रमप्राप्तेः स न प्राप्यत इत्येवोपयुज्य वाच्यमित्यर्थः ॥ ९९ ॥

हस्सगुणसंकमद्धाइ पूरइत्ता समीससम्मत्तं । चिरसम्मत्ता मिछत्तगयस्सुव्वलणथोगे सिं ॥ १०० ॥

व्याख्या—ह्रस्वगुणसङ्क्रमाद्धया स्तोककालेन गुणसङ्क्रमेण समिश्रं सम्यक्त्वं सम्यक्त्वसम्यग्मिथ्यात्वे इत्यर्थः, पूरयित्वा मिथ्यात्वदलेन ये षट्षष्टी सागरोपमाणां सम्यक्त्वं धृत्वेयता चिरेण प्रज्ञूतेन कालेन सम्यक्त्वान्मिथ्यात्वं गतस्य पल्योपमासंख्येयभागन्यूनसागरोपमसहस्रद्वयसत्कस्य मिथ्यात्वस्य उद्वलनस्थानके वर्तमानस्य क्षपणायोद्यतस्य सम्यक्त्वसम्यग्मिथ्यात्वयोः जघन्यः प्रदेशसङ्क्रमः, परतो गुणसङ्क्रमलब्धस्यातिप्रज्ञूतस्य दलिकस्य सङ्क्रमावलिकातिक्रान्तस्य सङ्क्रमसंज्ञवाज्जघन्यप्रदेशसङ्क्रमाज्ञावः ॥ १०० ॥

पमासङ्ख्येयजागमात्रेण कालेन ते सम्यक्त्वसम्यग्मिथ्यात्वे उद्वलयतः । स्तोके उद्वलनसङ्क्रमे द्विचरमखण्डस्य चरमसमये मिथ्यात्वरूपपरस्थाने दलिकप्रक्षेपरूपस्तयोर्जघन्यप्रदेशसङ्क्रमो जवति ॥ १०० ॥

संजोअणाण चउरुवसमित्तु संजोयइत्तु अप्पद्धं । अयरछावट्ठिदुगं पालिय सकहप्पवत्तंते ॥ १०१ ॥

व्याख्या—चतुरो वारान् मोहनीयमुपशमय्य चारित्रमोहनीयप्रकृतीरुपशमयन् स्थितिघातरसघातगुणश्रेणिगुणसङ्क्रमैस्तासां प्रजूतान् पुञ्जान् परिशाटयतीति चतुर्वारं मोहोपशमग्रहणं । ततो मिथ्यात्वं गत्वाऽल्पाद्धामल्पकालं यावत्संयोजनान् संयोज्यानन्तानुबन्धिनो बद्ध्वा बध्यमानेषु तेषु चतुर्वारं मोहोपशमेन स्थितिघातादिनिर्घातितत्वेन स्तोकमेव चारित्रमोहनीयदलिकं सङ्क्रमय्य ततोऽन्तर्मुहूर्त्ते गते पुनरपि सम्यक्त्वमासाद्य द्वे षट्षष्टी सागरोपमाणां यावत्तदनुपाल्य योऽनन्तानुबन्धिक्षपणायोद्यतते तस्य स्वकयथाप्रवृत्तकरणान्तसमये तेषामनन्तानुबन्धिनां विध्यातसङ्क्रमेण जघन्यप्रदेशसङ्क्रमो जवति । परतोऽपूर्वकरणे गुणसङ्क्रमप्रवृत्तेस्तदप्राप्तिः ॥ १०१ ॥

अठकसायासाए असुजधुवबंधि अथिरतिगे य । सव्वलहुं खवणाए अहापवत्तस्स चरमम्मि ॥ १०२ ॥

व्याख्या—अष्टानां कषायाणां मध्यमानामसातवेदनीयस्याशुजध्रुवबन्धिनीनां कुवर्णादिनवकोपघातलक्षणानामस्थिरत्रिकस्यास्थिराशुजायशःकीर्त्तिसंज्ञस्य सर्वसङ्ख्यया द्वाविंशतिप्रकृतीनां "सव्वलहुं ति" सर्वेज्योऽन्येन्यः शीघ्रमेव क्षपणायोत्थितस्य कषायाष्टकरहितस्य मासपृथक्त्वाधिकेष्वष्टसु वर्षेष्वतिक्रान्तेषु, कषायाष्टकं प्रति च देशोनां पूर्वकोटिं याव-

त्संयममनुपाट्य क्षपणायोद्यतस्येत्यर्थः । पञ्चसङ्ग्रहमूलटीकायां तु सर्वा अप्येताः प्रकृतीरधिकृत्य देशोनां पूर्वकोटिं यावत्संयममनुपाट्येत्युक्तं । एवं क्षपकश्रेणिं प्रतिपन्नस्य यथाप्रवृत्तकरणचरमसमये कषायाष्टकस्य विध्यातसङ्क्रमेण शेषाणां च यथाप्रवृत्तसङ्क्रमेण जघन्यः प्रदेशसङ्क्रमो भवति ॥ १०२ ॥

पुरिसे संजलणतिगे य घोलमाणेण चरमबद्धस्स । सगअंतिमे असाएण समं अरईइ(य)सोए य ॥१०३॥

व्याख्या—पुरुषवेदस्य संज्वलनत्रिकस्य च क्रोधमानमायारूपस्य क्षपणार्थमुद्यतेन क्षपकश्रेणिं प्रतिपन्नेन स्वस्वबन्धान्तसमये "घोलमाणेणं ति" घोलमानेन जघन्ययोगिना सता यद्बद्धं दलिकं तस्य चरमसंक्रोन्ने जघन्यप्रदेशसङ्क्रमो भवति। आसां हि चतसृणामपि प्रकृतीनां बन्धव्यवच्छेदसमये समयोनावलिकाधिकबद्धं मुक्त्वा अन्यत् प्रदेशसत्कर्म न विद्यते। तदपि च प्रतिसमयं स गुणसङ्क्रमेण समयोनावलिकाधिकमात्रेण कालेन क्षयमुपगच्छति तावद्यावच्चरमसमयबद्धस्यासङ्क्षेयो भागः शेषोऽवतिष्ठते । ततस्तं सर्वसङ्क्रमेण सङ्क्रमयतो जघन्यः प्रदेशसङ्क्रम इति । अरतिशोकावसातसमौ असातवेदनीयवदेवारतिशोकौ जघन्यप्रदेशसङ्क्रममाश्रित्य भावनीयावित्यर्थः ॥ १०३ ॥

वेउव्वेक्कारसगं उव्वलिअं बंधिऊण अप्पद्धं । जेट्ठठिई णिरयाऊ उव्वट्टित्ता अबंधित्तु ॥ १०४ ॥

थावरगयस्स चिरउव्वलणे एयस्स एवमुच्चस्स । मणुअदुगस्स य तेउसु वाउसु वा सुहुमबध्धाणं ॥१०५॥

व्याख्या—वैक्रियैकादशकं सुरद्विकनरकद्विकवैक्रियसप्तकलक्षणं एकेन्द्रियभवे वर्तमानेनोद्वलितं भूयस्तत्पञ्चेन्द्रियत्वं

प्राप्तेन सताऽल्पाद्धमल्पकालमन्तमुहूर्त्तं यावदित्यर्थः । बद्ध्वा ततो ज्येष्ठस्थितिस्त्रयस्त्रिंशत्सागरोपमायुष्को नारकः सप्तमपृथिव्यां जातस्तत्र तावन्तं कालं यावद्यथासंज्ञवं तदैक्रियैकादशकमनुज्झ्य ततो नरकादुद्धृत्य पञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पद्य तत्र तदैक्रियैकादशकमबद्ध्वा स्थावरेष्वेकेन्द्रियेषु मध्ये यः समुत्पन्नस्तस्य चिरया पल्योपमाङ्ख्येयज्ञागमात्रकालयोद्वलनया तदुद्वलयतो द्विचरमखण्डस्य चरमसमये यः प्रकृत्यन्तरे दलिकसंक्रोज्ञः स तस्य जघन्यप्रदेशसङ्क्रमः । एयस्सेत्यादि एतस्यैवानन्तरोक्तजीवस्य प्रागुक्तविधिना तेजोवायुषु मध्ये समागतस्य सूक्ष्मैकेन्द्रियज्ञवे वर्तमानेन यद्बद्धमुच्चैर्गोत्रं मनुजद्विकं च ते चिरोद्वलनयोद्वलयतो द्विचरमखण्डस्य चरमसमये परप्रकृतौ यद्दलिकं सङ्क्रामति स तयोर्जघन्यप्रदेशसङ्क्रमः । इयमिह प्रणाली—मनुजद्विकमुच्चैर्गोत्रं चादौ तेजोवायुज्ञवे वर्तमानेनोद्वलितं ज्ञूयः सूक्ष्मैकेन्द्रियज्ञवं प्राप्तेनान्तर्मुहूर्त्तं यावद्बद्धं, ततः पञ्चेन्द्रियज्ञवं गत्वा सप्तमपृथिव्यां नारको जात उत्कृष्टायुष्कः, तत उद्धृत्य पञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नः, इयन्तं च कालं तदबद्ध्वा प्रदेशसङ्क्रमेण चानुज्ञूय तेजोवायुषु मध्ये समागतस्तस्य मनुजद्विकमुच्चैर्गोत्रं च चिरोद्वलनयोद्वलयतो द्विचरमस्थितिखण्डचरमसमये परप्रकृतौ दलिकप्रक्षेपे तज्जघन्यप्रदेशसङ्क्रमसंज्ञव इति ॥ १०४ ॥ १०५ ॥

हस्सं कालं बंधिय विरउ आहारसत्तगं गंतुं। (नुज्जो) अविरइ महुव्वलंतस्स जा थोव उव्वलणा ॥१०६॥

व्याख्या—ह्रस्वं कालं स्तोकं कालं यावद्विरतोऽप्रमत्तसंयतः सन्नाहारकसप्तकं बध्ध्वा कर्मोदयवैचित्र्याद्भूयोऽप्यविरतिं गतो यस्तस्य तां गत्वाऽन्तर्मुहूर्त्तात्परतो महोद्वलनया पल्योपमासङ्ख्येयज्ञागप्रमाणकालयोद्वलनयोद्वलयतः सतो या स्तोकोद्वलना द्विचरमखण्डचरमसमये परप्रकृतिषु प्रक्षेपरूपा साहारकसप्तकस्य जघन्यप्रदेशसङ्क्रमः ॥ १०६ ॥

तेवठिसयं उदहीण स चउपल्लाहिगं अबंधित्ता। अंते अहापवत्तकरणस्स उज्जोयतिरियदुगे ॥ १०७ ॥

व्याख्या—त्रिषष्ट्यधिकं शतमुदधीनां सागरोपमाणां चतुःपल्याधिकं च यावत् स क्षपितकर्मांशः सर्वजघन्यतिर्यग्द्विकोद्योतसत्कर्मोद्योतं तिर्यग्द्विकं चाबध्ध्वा यथाप्रवृत्तकरणस्यान्ते चरमसमये उद्योततिर्यग्द्विकयोर्जघन्यं प्रदेशसङ्क्रमं करोति। कथमुक्तकालं यावदबन्ध इति चेदित्थं—स क्षपितकर्मांशस्त्रिपल्योपमायुष्केषु मनुजेषु समुत्पन्नस्तत्र देवद्विकमेव बध्नाति, न तिर्यग्द्विकं, नाप्युद्योतं, तत्र चान्तर्मुहूर्त्तावशिष्टायुष्कः सन् सम्यक्त्वमवाप्य ततोऽप्रतिपतितसम्यक्त्व एव पल्योपमस्थितिको देवो जातः। तत्र च सम्यक्त्वप्रत्ययादेतदबन्धः। ततोऽप्यप्रतिपतितसम्यक्त्वो देवभवाच्च्युत्वा मनुष्येषु समुत्पन्नः, ततस्तेनैवाप्रतिपतितेन सम्यक्त्वेन समन्वित एकत्रिंशत्सागरोपमस्थितिको ग्रैवेयकदेवो जातः। तत्र चोत्पत्त्यनन्तरमन्तर्मुहूर्त्तादूर्ध्वं मिथ्यात्वं गतः। तत्र भवप्रत्ययादेवैतदबन्धः। ततोऽन्तर्मुहूर्त्तावशेषे आयुषि भूयोऽपि सम्यक्त्वं प्रतिपद्यते। ततः सागरोपमाणां द्वे षट्षष्टी यावन्मनुष्यानुत्तरसुरादिभवेषु सम्यक्त्वमनुवर्त्तमानः सम्यक्त्वाध्धाया अन्तर्मुहूर्त्ते शेषे शीघ्रमेव क्षपणायोद्यतते। ततोऽमुना प्रकारेण त्रिषष्ट्यधिकं सागरोपमाणां शतं चतुःपल्याधिकं यावत्तिर्यग्द्विकोद्योतबन्धाभावो भवतीति ॥ १०७ ॥

इग विगलिंदियजोग्गा अट्ठ अपज्जत्तगेण सह तासिं। तिरियगईसम णवरं पंचासीऊदहिसयं तु ॥१०८॥

व्याख्या—एकेन्द्रियविकलेन्द्रिययोग्या या अष्टौ प्रकृतय एकद्वित्रिचतुरिन्द्रियजातिस्थावरातपसूक्ष्मसाधारणलक्षणास्तासामपर्याप्तकसहितानां नवानां प्रकृतीनां तिर्यग्गतिसमं जघन्यप्रदेशसङ्क्रमस्थानं वक्तव्यं। नवरमत्र पञ्चाशीत्यधिकं

सागरोपमशतं चतुःपञ्चाधिकं यावदबध्ध्वेति वक्तव्यं। कथमियन्तं कालं यावदबन्ध इति चेदुच्यते—इह क्षपितकर्मांशो द्वाविंशतिसागरोपमस्थितिकः षष्ठपृथिव्यां नारको जातः। तत्रैताः प्रकृतीर्नवप्रत्ययादेवाबध्ध्वा पर्यन्तान्तर्मुहूर्त्ते सम्यक्त्वमासाद्य मनुष्येष्वप्रतिपतितसम्यक्त्व एवोत्पद्य देशविरतिमासाद्य चतुःपञ्चोपमस्थितिकः सौधर्मदेवो भूत्वाऽप्रतिपतितसम्यक्त्व एव मनुष्येषूत्पद्य संपूर्णसंयमं परिपाल्य नवमग्रैवेयक एकत्रिंशत्सागरोपमस्थितिको देवोऽजनि। तत्र चान्तर्मुहूर्त्तोर्ध्वं मिथ्यात्वं गतोऽपि नवप्रत्ययादेवैताः प्रकृतीर्न बध्नाति। ततः पर्यन्तान्तर्मुहूर्त्ते सम्यक्त्वमवाप्याप्रतिपतितसम्यक्त्वो मनुष्येषूत्पद्य सर्वविरतिमनुपाल्य वारत्रयं विजयादिषु गमनेन षट्षष्टिसागरोपमाणि सम्यक्त्वकालं पूरयित्वा मनुष्येष्वन्तर्मुहूर्त्तं सम्यग्मिथ्यात्वमनुभूय तदन्तरितं द्वितीयं षट्षष्टिप्रमाणं सम्यक्त्वकालं वारत्रयमच्युतगमनेन पूरयति। तदेवं सम्यक्त्वमनुपाल्य तस्याः सम्यक्त्वाद्धाया अन्तर्मुहूर्त्ते शेषे क्षपणायोद्यतते। एवं पञ्चाशीत्यधिकं सागरोपमशतं चतुःपञ्चाधिकं प्रागुक्तनवप्रकृतीनां बन्धाभावः। इह भावनायां सम्यक्त्वात्प्रच्युतस्य मिश्रगमनं यदुच्यते तत्कार्मग्रन्थिकमतेनाविरुद्धं। सैद्धान्तिकानां तु न सम्मतमिदं। यत उक्तं कल्पभाष्ये—"मिच्छत्ता संकंती अविरुद्धा होइ सम्ममीसेसु। मीसाउं वा दोसुं सम्मा मिच्छं न उण मीसं" ॥ १ ॥ ति ॥ इति ॥ १०८ ॥

उत्तीसाइ सुभाणं सेढिमणारुहिय सेसगविहीहिं। कट्टु जहन्नं खवणं अपुव्वकरणालिगा अंते ॥ १०९ ॥

व्याख्या—श्रेणिमनारुह्योपशमश्रेणिमकृत्वा शेषैर्विधिभिः क्षपितकर्मांशसत्कैः षट्त्रिंशत्सङ्ख्यानां पञ्चेन्द्रियजात्याद्यसंस्थानाद्यसंहननतैजससप्तकप्रशस्तविहायोगतिशुक्लोहितहारिद्रसुरभिगन्धकषायाम्लमधुरमृदुलघुस्निग्धोष्णागुरुलघुपराघा-

तोच्छ्वासत्रसदशकनिर्माणलक्षणानां जघन्यं प्रदेशाग्रं कृत्वा क्षपणं कर्तुमुद्यतस्य क्षपितकर्मांशस्यापूर्वकरणसत्कप्रथमावलिकान्तसमये तासां जघन्यः प्रदेशसङ्क्रमो भवति । तत ऊर्ध्वं तु सङ्क्रमेण लब्धस्यातिप्रभूतस्य दलिकस्य सङ्क्रमावलिकातिक्रान्तत्वेन सङ्क्रमसंभवात्स न प्राप्यते । पञ्चसंग्रहे तु—"पणतीसाएँ सुभाणं अपुव्वकरणालिगा अंते त्ति" प्रतीकेन वज्रर्षभनाराचवर्जितानां पञ्चत्रिंशत्प्रकृतीनामेवापूर्वकरणप्रथमावलिकान्ते जघन्यप्रदेशसङ्क्रम उक्तः, वज्रर्षभनाराचसंहननस्य तु स्वबन्धव्यवच्छेदसमये तन्मूलटीकायां स उक्त इति ॥ १०९ ॥

सम्मद्दिट्ठिअजोग्गाण सोलसण्हं पि असुभपगडीणं । थीवेएण सरिसगं णवरं पढमं तिपल्लेसु ॥ ११० ॥

व्याख्या—सम्यग्दृष्टेरयोग्यानां षोडशानामप्यशुभप्रकृतीनामनाद्यसंस्थानसंहननाप्रशस्तविहायोगतिदुर्भगदुःस्वरानादेयनपुंसकवेदनीचैर्गोत्रलक्षणानां स्त्रीवेदेन समं वक्तव्यं । नवरमेतासां जघन्यप्रदेशसङ्क्रमस्वामी प्रथमं त्रिपल्योपमायुष्केषु मनुष्येषु मध्ये समुत्पन्नो वाच्यः, अन्तर्मुहूर्त्ते चायुषि शेषे प्राप्तसम्यक्त्वः, शेषं तथैव वाच्यम् ॥ ११० ॥

नरतिरियाण तिपल्लस्संते ओरालियस्स पाउग्गा । तित्थयरस्स य बंधा जहन्नउ आलिगं गंतु ॥ १११ ॥

व्याख्या—नरतिरश्चां त्रिपल्योपमस्यान्ते औदारिकस्य प्रायोग्याः प्रकृतय औदारिकसप्तकलक्षणा जघन्यप्रदेशसङ्क्रमयोग्याः । एषात्र भावना—यो जीवः सर्वान्यजीवापेक्षया सर्वजघन्यौदारिकसप्तकसत्कर्मा सन् त्रिपल्योपमायुष्केषु तिर्यङ्मनुष्येषु मध्ये समुत्पन्नस्तस्यौदारिकसप्तकमनुभवतो विध्यातसङ्क्रमेण तत्परप्रकृतौ सङ्क्रमयतश्च स्वायुषश्चरमसमये तस्यौदारिकसप्तकस्य जघन्यः प्रदेशसङ्क्रमो भवति । तीर्थकरनामकर्मणो बन्धं कुर्वता यत्प्रथमसमये बद्धं दलिकं तद्बन्धावलि-

कातीतं सद्यदा परप्रकृतिषु यथाप्रवृत्तसङ्क्रमेण सङ्क्रम्यते तदा तस्य जघन्यप्रदेशसङ्क्रमः ॥ ११ ॥ तदेवमुक्तः प्रदेशसङ्क्रमः, तदुक्तौ च समर्थितं सङ्क्रमकरणम् ॥

॥ इति कर्मप्रकृतौ सङ्क्रमकरणं समाप्तम् ॥

अथोद्देशक्रमेणोद्वर्त्तनापवर्त्तने वक्तुमवसरप्राप्ते, ते च द्वे अपि स्थित्यनुभागविषये । तत्र प्रथमतः स्थितेरुद्वर्त्तनामाह—

उव्वट्टणा ठिईए उदयावलियाइ बाहिरठिईणं । होइ अबाहा अइत्थावणाउ जा वलिया हस्सा ॥ १ ॥

व्याख्या—स्थितेरुद्वर्त्तनोदयावलिकाया बाह्यानां स्थितीनां ज्ञेया, उदयावलिकायाः सकलकरणायोग्यत्वेन प्रतिषेधात् । अपि च बध्यमानप्रकृतेरबाधा या तुल्या हीना वा पूर्वबद्धप्रकृतीनां स्थितिर्नोद्वर्त्तनीया सोत्पाद्य तत ऊर्ध्वं बध्यमानप्रकृतेरबाधाया उपरि न निक्षिप्यत इत्यर्थः, अबाधाकालान्तःप्रविष्टत्वात् । या पुनरबाधाकालादुपरितनी सा स्थितिपर्यन्तमुद्वर्त्यत एव । तदेवमबाधान्तःप्रविष्टाः सर्वा अपि स्थितय ऊर्ध्वमुद्वर्त्तनामधिकृत्यातिक्रमणीया भवन्ति त्याज्या भवन्तीत्यर्थः । अतिक्रमणीयस्थितिप्रमाणमाह—भवत्यबाधाऽतीत्थापनाऽतिक्रमणीयेत्यर्थः । तथा चाबाधान्तर्गतं कर्मदलिकं नोद्वर्त्तनायोग्यं, किं त्वबाधायाः परत एवेति, यैवोत्कृष्टाऽबाधा सैवोत्कृष्टाऽतीत्थापनेति, तत एकादिसमयहीनयाऽबाधया हीनहीनतराऽतीत्थापना तावद्याच्या यावज्जघन्याबाधान्तर्मुहूर्त्तप्रमाणा जघन्यातीत्थापना । ततोऽपि जघन्यतराऽतीत्थापना यावदावलिकानामोदयावलिका तावद्याच्या उदयावलिकान्तर्गतानां स्थितीनामनुद्वर्त्तनीयत्वप्रतिपादनात् । ननु "आबंधा उक्कट्ठइ त्ति" वचनाद्बन्धे सत्येवोद्वर्त्तना प्रवर्तिष्यते, तत उदयावलिकागताः स्थितयोऽबाधान्तर्गतत्वेनैव

नोद्वर्त्तिष्यन्ते, किं तासां पृथग्ग्रहणेन ? मैवं, अबाधान्तर्गतानां स्थितीनामबाधाया उपर्येवोत्पाद्य निक्षेपप्रतिषेधात्, अबाधाया मध्ये पुनस्तासां वक्ष्यमाणक्रमेणोद्वर्त्तनानिक्षेपप्रवृत्त्यविरोधात्, तत एवमुदयावलिकान्तर्गतानामप्युद्वर्त्तना प्रसक्तेति तन्निराकरणेनाप्रसक्तप्रतिषेधः ॥ १ ॥

सम्प्रति निक्षेपनिरूपणायाह—

आवलियअसंखभागाइ जाव कम्मठिइ त्ति णिक्खेवो । समउत्तरावलिआए सावाहाए भवे ऊणे ॥ २ ॥

व्याख्या—इह निक्षेपो द्विधा जघन्य उत्कृष्टश्च । तत्रावलिकाया असङ्ख्येयभागमात्रासु स्थितिषु यः कर्मदलिकनिक्षेपः स जघन्यः, तथाहि—सर्वोत्कृष्टात् स्थित्यग्रादध आवलिकामावलिकाया असङ्ख्येयं च भागमवतीर्य याऽधस्तनी स्थितिरायाति तस्या दलिकमतीत्थापनारूपमावलिकामतिक्रम्योपरितनीष्वेवावलिकाया असङ्ख्येयभागभाविनीषु निक्षिप्यते, नावलिकाया मध्येऽपि, आवलिकां मुक्त्वैवाधस्तनस्थितीनामुपरि सङ्क्रमणस्वाभाव्यात्, ततोऽसावेतावान् जघन्यो दलिकनिक्षेपविषयः । एवं च सत्यावलिकाया असङ्ख्येयतमेन भागेनाधिकास्वावलिकामात्रासु स्थितिषूद्वर्त्तनं न भवतीति सिद्धं । तथा च सत्युत्कृष्टस्थितिबन्धे उद्वर्त्तनायोग्याः स्थितयो बन्धावलिकामबाधामुपरितनीं चावलिकामसङ्ख्येयभागाधिकां मुक्त्वा शेषा एव द्रष्टव्याः, बन्धावलिकायाः सकलकरणायोग्यत्वेनाबाधायाश्च प्रागतीत्थापनात्वप्रतिपादनेन बन्धावलिकान्तर्गतानामबाधान्तर्गतानां च स्थितीनामुद्वर्त्तनायोग्यत्वात्, असङ्ख्येयभागाधिकावलिकामात्रभाविनीनां चोपरितनीनां स्थितीनां प्रागुक्तयुक्तेरेव तथात्वात् । तत्र यदावलिकामावलिकाया असङ्ख्येयभागं चोपरितनस्थानादधोऽवतीर्य स्थिती-

याऽधस्तनी स्थितिरुद्वर्त्यते तदा समयाधिक आवलिकाया असङ्ख्येयभागो निक्षेपविषयः । यदा तु तृतीया स्थितिरुद्वर्त्यते तदा द्विसमयाधिकः । एवं समयप्रवृद्ध्या वर्धमानो दलिकनिक्षेपस्तावद्याव्यो यावदुत्कृष्टो भवति । तस्य च प्रमाणं समयाधिकावलिकयाऽबाधया च हीना सर्वा कर्मस्थितिः । तथाहि—अबाधाया उपरि स्वस्थितीनामुद्वर्त्तना भवति, तत्राप्यबाधोपरितनस्य स्थितिस्थानस्योद्वर्त्यमानस्य दलिकमबाधाया उपरि निक्षिप्यते, न तु तन्मध्येऽपि, उद्वर्त्यमानदलिकस्योद्वर्त्यमानस्थितेरूर्ध्वमेव निक्षेपात् । तत्राप्युद्वर्त्यमानस्थितेरुपर्यावलिकामात्राः स्थतीरतिक्रम्योपरितनीषु स्थितिषु सर्वासु दलिकनिक्षेपो भवति । ततोऽतीक्ष्णापनावलिकामुद्वर्त्यमानां समयमात्रां स्थितिमबाधां च वर्जयित्वा शेषा सर्वाऽपि स्थितिरुत्कृष्टो दलिकनिक्षेपविषय इति।अयमुत्कृष्टो दलिकनिक्षेपविषयोऽबाधाया उपरितनं समयमात्रमुद्वर्त्यमानं स्थितिस्थानं प्रतीत्य प्राप्यते । सर्वोपरितनं तु स्थितिस्थानमुद्वर्त्यमानं प्रतीत्य जघन्यो दलिकनिक्षेपविषयो लभ्यते । उक्तं च पञ्चसङ्ग्रहे—"आबाहोवरि ठाणगदलं पडुच्चेह परमणिक्केवो । चरिमुव्वट्टणठाणं पडुच्च इह जायइ जहन्नो ॥ १ ॥" इति ॥ २ ॥

णिव्वाघाएणेवं वाघाए संतकम्महिगबंधे । आवलिअसंखभागाइ होइ अइत्थावणा णवरि ॥ ३ ॥

व्याख्या—एवमेषोऽव्याघाते दलिकनिक्षेपविधिरुक्तः, व्याघाते पुनरेवं—प्राक्तनस्थितिसत्कर्मापेक्षयाऽन्यधिकाभिनवकर्मबन्धरूपे आवलिकाऽसङ्ख्येयभागादिकाऽतीक्ष्णापना भवति, निक्षेपोऽप्यावलिकागतासङ्ख्येयभागादिः । नवरमिति पुनरर्थे भिन्नक्रमेण योज्यते, तच्च योजितमेव । अयमिह भावार्थः—प्राक्तनसत्कर्मस्थित्यपेक्षया समयादिनाऽन्यधिको योऽभिनवकर्मबन्धः स इह व्याघातोऽभिप्रेतः, तत्रातीक्ष्णापना जघन्यावलिकाऽसङ्ख्येयभागमात्रा । तथाहि—प्राक्तनसत्कर्मस्थितेः

समयमात्राधिकेऽजिनवकर्मबन्धे सति प्राक्तनकर्मणश्चरमा वा द्विचरमा वा स्थितिर्नोद्वर्त्यते । एवं यावदावलिकाऽन्यस्याश्चावलिकाया असङ्क्षेयतमो भाग इति । एवं समयद्वयेन समयत्रयेण यावदावलिकाया असङ्क्षेयतमेनापि भागेनाभ्यधिकेऽजिनवकर्मबन्धे द्रष्टव्यं । यदा पुनर्द्वाभ्यामावलिकाया असङ्क्षेयतमाभ्यां भागाभ्यामधिको नूतनः कर्मबन्धो जायते तदा प्राक्तनसत्कर्मणोऽन्त्यस्थितिरुद्वर्त्यते, उद्वर्त्य चावलिकाया आद्यमसङ्क्षेयभागमतिक्रम्य द्वितीयेऽसङ्क्षेयतमे भागे निक्षिप्यते, एतावतीज्ञापनानिक्षेपौ जघन्यौ । यदा तु समयाधिकाभ्यां द्वाभ्यामावलिकाया असङ्क्षेयतमाभ्यां भागाभ्यामधिकोऽजिनवकर्मबन्धस्तदावलिकायाः प्रथममसङ्क्षेयतमं भागं समयाधिकमतिक्रम्य द्वितीयेऽसङ्क्षेयतमे भागे निक्षिप्यते । एवमजिनवकर्मबन्धस्य समयादिवृद्ध्यावतीज्ञापना प्रवर्धते, सा च तावद्यावदावलिका परिपूर्णा भवति, निक्षेपस्त्वेतावत्यतीज्ञापनाविधौ तावन्मात्र एव भवति । तत ऊर्ध्वं पुनरपि नवकर्मबन्धवृद्धौ निक्षेप एव केवलो वर्धते, नातीज्ञापना । उक्तं च—"आवलिदोसंखंसा जइ वड्ढइ अहिणवो उ तिइबंधो । उवट्टइ तो चरमा एवं जावलिय अइच्छवणा ॥ १ ॥ अइच्छावणालिआए पुण्णाए वड्ढइ त्ति णिरक्केवो" । यावच्चाजिनवकर्मबन्धः प्राक्तनस्थितिसत्कर्मणः सकाशादावलिकाया असङ्क्षेयतमभागाभ्यां द्वाभ्यामधिको न भवति, तावत्प्राक्तनसत्कर्मणश्चरमस्थितेरध आवलिकामसङ्क्षेयभागाधिकामुल्लङ्घ्य ततोऽधस्तनीरेव स्थितीरुद्वर्त्तयति । तत्राप्यसङ्क्षेयभागाधिकामावलिकामतिक्रम्य तदनन्तरमेवाधस्तनीं स्थितिमुद्वर्त्तयन्नावलिकामतिक्रम्योपरितने आवलिकाया असङ्क्षेयतमे भागे निक्षिपति, द्वितीयां चाधस्तनीं स्थितिमुद्वर्त्तयन् समयाधिकेऽसङ्क्षेयतमे भागे निक्षिपतीत्येवंप्रकारेण भावनीयं । अल्पबहुत्वमुच्यते—सर्वस्तोकौ जघन्यातीज्ञापनाजघन्य-

निक्षेपौ, मिथश्च तुल्यौ, द्वयोरप्यावलिकासत्कासङ्क्षेयतमभागमात्रत्वात् । ताभ्यामुत्कृष्टातीच्छापनाऽसङ्क्षेयगुणा, तस्या उत्कृष्टाबाधारूपत्वात् । ततोऽप्युत्कृष्टो निक्षेपोऽसङ्क्षेयगुणः, समयाधिकयाऽऽवलिकयाऽबाधया च हीना या सर्वकर्मस्थितिस्तत्प्रमाणत्वात् । ततोऽपि सर्वा कर्मस्थितिर्विशेषाधिका, उत्कृष्टनिक्षेपान्यूनीकृतस्थितेः पूरणात् ॥ ३ ॥

तदेवमुक्ता स्थित्युद्वर्त्तना, अथ स्थित्यपवर्त्तनामाह—

उव्वट्टंतो य ठिइं उदयावलिबाहिरा ठिइविसेसा । णिक्खिवइ तइयभागे समयहिगे सेसमइवइय ॥ ४ ॥
वड्ढो तत्तोऽइच्छावणाउ जावालिगा दुवइ पुन्ना । ते णिक्खेवो समयाहिगालिग दुगूणकम्मठिई ॥ ५ ॥

व्याख्या—स्थितिमपवर्त्तयन्नुदयावलिकाया बाह्यान् स्थितिविशेषान् समयमात्रद्विसमयमात्रादिस्थितिभेदानपवर्त्तयति । ते चापवर्त्यमानाः स्थितिविशेषास्तावद्वक्तव्यन्ते यावद्बन्धावलिकोदयावलिकाहीना सर्वा कर्मस्थितिः । तानपवर्त्यमानान् स्थितिविशेषान् कुत्र निक्षिपतीत्याह—निक्षिपत्यावलिकायास्त्रिभागे तृतीये भागे समयाधिके, शेषं समयोनमुपरितनं त्रिभागद्वयमतिक्रम्य । अयमिह भावार्थः—उदयावलिकाया उपरितनी या समयमात्रा स्थितिस्तस्या दलिकमपवर्त्तयन्नुदयावलिकाया उपरितनौ द्वौ त्रिभागौ समयोनावतिक्रम्याधस्तने समयाधिके तृतीये भागे निक्षिपति, एष जघन्यो निक्षेपो जघन्या चातीच्छापना । यदा चोदयावलिकाया उपरितनी द्वितीया स्थितिरपवर्त्यते तदातीच्छापना प्रागुक्तप्रमाणा समयाधिका भवति, निक्षेपस्तु तावन्मात्र एव । यदा तूदयावलिकाया उपरितनी तृतीया स्थितिरपवर्त्यते तदा प्रागुक्तमानातिच्छापना द्विसमयाधिका भवति (द्वौ त्रिभागौ समयद्वयाधिकावतीच्छापना भवतीत्यर्थः) निक्षेपस्तु तावानेव । एवमती-

ज्ञापना प्रतिसमयं तावद्वर्धयितव्या यावदावलिका परिपूर्यते । निक्षेपविषयाणां च स्थितीनां समयाधिक आवलिकात्रिभाग एवानुवर्त्तते, ततः परमतीच्छापना सर्वत्र तावन्मात्रैव प्रवर्त्तते, निक्षेपस्तु वर्धते तावद्यावद्बन्धावलिकातीच्छापनावलिकारहिताऽपवर्त्यमानस्थितिसमयरहिता च सकलापि कर्मस्थितिः, यतो बन्धावलिकायामतीतायां सत्यां कर्मापवर्त्तयितुमारभ्यते । तत्रापि च सर्वोपरितनस्थितिस्थानापवर्त्तनारंभे आवलिकामात्रमधोऽवतीर्याधस्तनेषु सर्वेष्वपि स्थितिस्थानेषु निक्षेप इत्युत्कृष्टो निक्षेपो यथोक्तप्रमाण उपपद्यत इति । उक्तं च पञ्चसंग्रहे—"समयाहि अइच्छवणा बंधावलियाय मोत्तु णिरवेवो । कम्मठिइं बंधोदय आवलिया मोत्तु उवट्टे ॥ १ ॥" समयाधिकामतीच्छापनावलिकां बन्धावलिकां च मुक्त्वा शेषासु सर्वास्वपि स्थितिष्वपवर्त्तनायामुत्कृष्टो निक्षेपो भवति । तथा बन्धावलिकामुदयावलिकां च मुक्त्वा शेषां सर्वामपि कर्मस्थितिमपवर्त्तयतीत्येतदर्थः । तदेवमुदयावलिकाया उपरितनं समयमात्रं स्थितिस्थानमपवर्त्यमानं प्रतीत्य यथोक्तसमयाधिकावलिकात्रिभागमानो यो निक्षेपः प्राप्यते स सर्वजघन्यः, सर्वोपरितनं च स्थितिस्थानमपवर्त्यमानं प्रतीत्य यथोक्तरूप उत्कृष्टो निक्षेप इति स्थितम् ॥ ४-५ ॥

एष निर्व्याघातेऽपवर्त्तनाविधिरुक्तोऽथ व्याघाते तमाह—

वाघाए समऊणं कंरुगमुक्कस्सिया अइच्छवणा । मायठिई किंचूणा ठिइकंडुक्कस्सगपमाणं ॥ ६ ॥

व्याख्या—अत्र व्याघातो नाम स्थितिघातः । उक्तं च—"ठिइघाउ एत्थ होइ वाघाउ" । तस्मिन् क्रियमाणे सति समयोनं कण्डकमात्रमुत्कृष्टातीच्छापना । उपरितनेन समयमात्रेण स्थितिस्थानेनापवर्त्यमानेन सहाधस्तात्कण्डकमतिक्रम्यते,

ततस्तेन विना समयोनं कएकमेवोत्कृष्टातीव्रापना ऩवतीति । कएकमानं किमिति चेदुच्यते—तस्याः स्थितेरारभ्य तस्या एव प्रकृतेरुत्कृष्टस्थितिबन्ध ऊत्प्लुत्य विधीयते । ततः प्रभृति सर्वाऽपि स्थितिर्भायस्थितिरिति परिऩाष्यते । सा किञ्चिदूना स्थितिः कएकस्योत्कृष्टं प्रमाणं । पञ्चसंग्रहटीकायां त्वेवं व्याख्यातं—भायस्थितिरुत्कर्षतः किञ्चिदूना किञ्चिदूनकर्मप्रमाणा । तथाहि—अन्तःकोटाकोटीप्रमाणं स्थितिबन्धं कृत्वा पर्याप्तसंज्ञिपञ्चेन्द्रिय ऊत्कृष्टसंक्लेशवशादुत्कृष्टां स्थितिं विधत्त इति सा भायस्थितिः किञ्चिदूनकर्मस्थितिप्रमाणा कएकस्योत्कृष्टं प्रमाणमिति । एतच्चोत्कृष्टं कएकमेकद्व्यादिसमयन्यूनमपि कएकमुच्यते । एवं हीयमानं यावत्पल्योपमासङ्ख्येयभागमात्रप्रमाणं ऩवति, तज्जघन्यकएकं । इदमेव समयोनं जघन्या व्याघातेऽतीव्रापना । सम्प्रत्यल्पबहुत्वमुच्यते—तत्रापवर्त्तनायां जघन्यो निक्षेपः सर्वस्तोकः, तस्य समयाधिकावलिकात्रिभागप्रमाणत्वात् । ततोऽपि जघन्यातीव्रापना द्विगुणा त्रिसमयोना । त्रिसमयोनद्विगुणत्वं कथमवसेयमिति चेदुच्यते—व्याघातमन्तरेण जघन्यातीव्रापनाऽऽवलिकात्रिभागद्वयं समयोनं ऩवति । आवलिका चासत्कल्पनया त्रिंशत्समयप्रमाणा कल्प्यते । ततस्त्रिभागद्वयमेकस्थानीयं समयोनमेकोनविंशतिसमयप्रमाणं । निक्षेपोऽपि जघन्यः समयाधिकावलिकात्रिभागरूपोऽसत्कल्पनया एकादशसमयप्रमाणो द्विगुणीकृतस्त्रिसमयोनः, एतावानेव ऩवतीति । ततोऽपि व्याघातं विनोत्कृष्टाऽतीव्रापना विशेषाधिका, तस्याः परिपूर्णावलिकाप्रमाणत्वात् । ततो व्याघाते ऊत्कृष्टातीव्रापनाऽसङ्ख्येयगुणा, तस्याः किञ्चिदूनभायस्थितिकएकप्रमाणत्वात् । ततोऽप्युत्कृष्टो निक्षेपो विशेषाधिकः, तस्य समयाधिकावलिकाद्विकोनसकलकर्मस्थितिप्रमाणत्वात् । ततः सर्वा कर्मस्थितिर्विशेषाधिका । सम्प्रत्युद्वर्त्तनापवर्त्तनयोः संयोगेनाल्पबहुत्वमु-

च्यते—तत्रोद्वर्त्तनायां जघन्यातीत्थापनानिक्षेपौ व्याघातजाविनौ सर्वस्तोकौ, स्वस्थाने तु परस्परं तुल्यौ, आवलिकाया असङ्ख्येयभागमात्रत्वात् । ततोऽपवर्त्तनायां जघन्यो निक्षेपोऽसङ्ख्येयगुणः, तस्य समयाधिकावलिकात्रिभागमात्रत्वात् । ततोऽप्यपवर्त्तनायामेव जघन्यातीत्थापना द्विगुणा त्रिसमयोना । अत्र भावना कृतैव । ततोऽप्यपवर्त्तनायामेव व्याघाताभावभाविन्युत्कृष्टातीत्थापना विशेषाधिका, तस्याः परिपूर्णावलिकाप्रमाणत्वात् । तत उद्वर्त्तनायामुत्कृष्टातीत्थापना सङ्ख्येयगुणा, तस्या उत्कृष्टाबाधारूपत्वात् । ततोऽपवर्त्तनायां व्याघाते उत्कृष्टातीत्थापनाऽसङ्ख्येयगुणा, तस्याः किञ्चिदूनभायस्थितिप्रमाणत्वात् । तत उद्वर्त्तनायामुत्कृष्टो निक्षेपो विशेषाधिकः । ततोऽप्यपवर्त्तनायामुत्कृष्टो निक्षेपो विशेषाधिकः । ततोऽपि सर्वा स्थितिर्विशेषाधिका ॥ ६ ॥

तदेवमुक्ता स्थित्यपवर्त्तना, साम्प्रतमनुभागोद्वर्त्तनापवर्त्तने वाच्ये, तत्रादावनुभागोद्वर्त्तनामाह—

चरमं णोवट्टिज्जइ जावाणंताणि फड्डगाणि तउं । उस्सक्किय उक्कड्डइ एवं उव्वट्टणाईउं ॥ ७ ॥

व्याख्या—चरमं स्पर्धकं नोद्वर्त्यते, नापि द्विचरमादीनि, यावच्चरमात्स्पर्धकादधोऽनन्तानि स्पर्धकानि नोद्वर्त्यन्ते । यो जघन्यो निक्षेप आवलिकाया असङ्ख्येयभागः सर्वोपरितनो या चावलिकामात्राऽतीत्थापना तत्स्थितिस्थानगतानि सर्वाण्यप्यनन्तानि स्पर्धकानि नोद्वर्त्यन्त इति रहस्यं, किंतु तेभ्योऽवष्टक्याधस्तादवतीर्य यानि स्पर्धकानि समयमात्रस्थितिगतानि लभ्यन्ते तान्युद्वर्त्तयति । तानि चोद्वर्त्यावलिकामात्रस्थितिगतान्यनन्तानि स्पर्धकान्यतिक्रम्योपरितनेष्वेवावलिकासत्कासङ्ख्येयभागमात्रगतेषु स्पर्धकेषु निक्षिपति । ततोऽप्यधोऽवतीर्य यदा द्वितीयसमयमात्रस्थितिगतानि स्पर्धकान्युद्वर्त्त-

यति तदाऽऽवलिकामात्रस्थितिगतानि स्पर्धकान्यतिक्रम्योपरितनेषु समयाधिकावलिकासत्कासङ्ख्येयभागमात्रगतस्पर्धकेषु निक्षिपति। एवं यथा यथाऽधोऽवतीर्यते तथा तथा निक्षेपो वर्धमानः प्राप्यते। अतीत्यापना पुनः सर्वत्राप्यावलिकामात्रस्थितिगतान्येव स्पर्धकानि। कियान् पुनरुत्कृष्टो निक्षेपविषय इति चेत्समयाधिकबन्धावलिकाऽबाधागतानि मुक्त्वा शेषाणि स्पर्धकानि। तथाहि—अबाधागतानि स्पर्धकानि नोद्वर्त्यन्ते, उद्वर्त्यमानानि च समयमात्रस्थितिगतानि स्पर्धकानि न तत्रैव निक्षिप्यन्ते, आवलिकामात्रगतानि त्वतीत्यापना, तत एतदतिरिक्तानि सर्वाणि स्पर्धकान्युत्कृष्टनिक्षेपविषय इति। अत्रैवाल्पबहुत्वमुच्यते—सर्वस्तोको जघन्यनिक्षेपः, तस्यावलिकासत्कासङ्ख्येयभागगतस्पर्धकप्रमाणत्वात्। ततोऽतीत्यापनाऽनन्तगुणा, निक्षेपविषयस्पर्धकेभ्य आवलिकामात्रस्थितिगतानां स्पर्धकानामनन्तगुणत्वात्। तत उत्कृष्टो निक्षेपोऽनन्तगुणः। ततोऽपि सर्वोऽनुभागो विशेषाधिक इति। तदेवमुक्तानुभागोद्वर्त्तना, अथानुभागापवर्तनामतिदिशन्नाह—एवमुद्वर्तनादितः एवमुद्वर्त्तनाप्रकारेणापवर्तनाऽप्यनुभागविषया वाच्या, केवलमादित आरभ्य। तथाहि—प्रथमं स्पर्धकं नापवर्त्यते, नापि द्वितीयं, नापि तृतीयं, एवं तावदभिधेयं यावदुदयावलिकामात्रस्थितिगतानि स्पर्धकानि भवन्ति। तेभ्य उपरितनानि तु स्पर्धकान्यपवर्त्यन्ते। तत्र यदोदयावलिकात उपरि समयमात्रस्थितिगतानि स्पर्धकान्यपवर्तयति तदा समयोनावलिकात्रिभागद्वयगतानि स्पर्धकान्यतिक्रम्याधस्तनेषु समयाधिकावलिकात्रिभागगतेषु स्पर्धकेषु निक्षिपति। यदा तूदयावलिकाया उपरि द्वितीयसमयमात्रस्थितिगतानि स्पर्धकान्युद्वर्त्यन्ते तदा प्रागुक्तातीत्यापना समयमात्रस्थितिगतैः स्पर्धकैरधिका भवति, निक्षेपस्तु तावानेव। एवं समयसमयवृद्ध्याऽतीत्यापना तावत्प्रवर्धनीया यावदा-

वल्लिका पूर्णा भवति । ततः परमतीत्थापना सर्वत्रापि तावन्मात्रैव, निक्षेपस्तु वर्धते, एवं च निर्व्याघाते द्रष्टव्यं, व्याघाते त्वनुभागकण्डकं समयमात्रस्थितिगतस्पर्धकन्यूनमतीत्थापना द्रष्टव्या । अत्राल्पबहुत्वमुच्यते—सर्वस्तोको जघन्यनिक्षेपः । ततो जघन्यातीत्थापनाऽनन्तगुणा । ततो व्याघातजाविन्यतीत्थापनाऽनन्तगुणा । तत उत्कृष्टमनुभागकण्डकं विशेषाधिकं, समयगतैः स्पर्धकैरतीत्थापनातोऽधिकत्वात् । ततः उत्कृष्टो निक्षेपो विशेषाधिकः । ततोऽपि सर्वोऽनुभागो विशेषाधिकः ॥ ७ ॥

सम्प्रति द्वयोरप्युद्वर्त्तनापवर्त्तनयोरल्पबहुत्वं सूत्रकृदाह—

थोवं पएसगुणहाणिअंतरं दुसु जहन्ननिक्खेवो । कमसो अनंतगुणिया दुसु वि अइत्थावणा तुल्ला ॥८॥
वाघाएणणुभागकंडगमेक्काइ वग्गणाऊणं । उक्कस्सो णिक्खेवो ससंतबंधो य सविसेसो ॥ ९ ॥

व्याख्या—एकस्यां स्थितौ यानि स्पर्धकानि तानि क्रमेण स्थापयित्वा गण्यन्ते । तथाहि—सर्वजघन्यं रसस्पर्धकमादौ, ततो विशेषाधिकरसं द्वितीयं ततोऽपि विशेषाधिकरसं तृतीयं, एवं यावत्सर्वोत्कृष्टरसमन्ते । तत्रादिस्पर्धकादारभ्योत्तरोत्तरस्पर्धकानि प्रदेशापेक्षया विशेषहीनानि, अन्तिमस्पर्धकादारभ्य पुनरधोऽधः क्रमेण प्रदेशापेक्षया विशेषाधिकानि । एतेषां मध्ये एकस्मिन् द्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा वर्तमानं स्पर्धकपटलं सर्वस्तोकं । अथवा प्रागुक्तस्य स्नेहप्रत्ययस्पर्धकस्यानुभागद्विगुणवृद्ध्यन्तरेऽनुभागद्विगुणहान्यन्तरे वा यदनुभागकदम्बकं तत्सर्वस्तोकं । ततो "दुसु त्ति" द्वयोरप्युद्वर्त्तनापवर्त्तनयोर्जघन्यो निक्षेपोऽनन्तगुणः, स्वस्थाने तु तुल्यः । यद्यप्युद्वर्त्तनायां जघन्यो निक्षेप आवलिकाऽसङ्ख्ये-

यत्रागगतस्पर्धकपटलप्रमाणोऽपवर्त्तनायां च समयाधिकावलिकात्रिभागगतस्पर्धकजातमानस्तथाऽप्यादिमस्थितिषु स्तोकान्येव स्पर्धकानि लभ्यन्ते, अन्तिमस्थितिषु च प्रभूतानीति स्पर्धकसङ्ख्यापेक्षया द्वयोरपि निक्षेपस्य तौल्यमविरुद्धं। इयमेव भावनाऽतीत्थापनायामुत्कृष्टनिक्षेपेऽपि च विधेया। क्रमश इति चाद्यापेक्षया योजनीयं, न तु द्वयोस्तुल्यत्वेनाभिमतयोर्मध्ये। ततो द्वयोरप्यतीत्थापनाऽव्याघातबहिर्भूतानन्तगुणा, स्वस्थाने तु द्वे अपि परस्परं तुल्ये। ततो व्याघातेनोत्कृष्टातीत्थापनात्वेनोपजायमानं यदनुभागकण्डकमेकया वर्गणया एकसमयमात्रस्थितिगतस्पर्धकसन्ततिरूपयोनं तदनन्तगुणं। तत उद्वर्त्तनापवर्त्तनयोरुत्कृष्टो निक्षेपो विशेषाधिकः, स्वस्थाने तु द्वावप्युत्कृष्टनिक्षेपौ परस्परं तुल्यौ। ततः ससद्बन्धः पूर्वबद्धोत्कृष्टस्थित्यनुभागसत्कर्मसहित उत्कृष्टस्थित्यनुभागबन्धः सविशेषो विशेषाधिकः, समयाधिकातीत्थापनावलिकागतैः पूर्वबद्धैर्बध्यमानैश्च स्पर्धकैरधिकत्वात् ॥ ८-९ ॥

सम्प्रत्युद्वर्त्तनापवर्त्तनयोः कालनियमं विषयनियमं चाह—

आबंधा उक्कड्ढइ सविहिमोकड्ढणा ठिइरसाणं। किट्टीवज्जो उभयं किट्टिसु उवट्टणा एक्का ॥ १० ॥

व्याख्या—आबन्धाद्बन्धं यावदुत्कर्षयति यावद्बन्धस्तावदेवोद्वर्त्तना भवति, न परतोऽपीत्यर्थः। तथा सर्वत्र बन्धकालेऽबन्धकाले वाऽपकर्षणाऽपवर्त्तना स्थितिरसानां प्रवर्तते, कालनियमोऽयं। यद्वा आबन्धादिति यावन्मात्रः स्थितिबन्धस्तावन्मात्रस्य स्थितिसत्कर्मणः स्थित्युद्वर्त्तनानुभागोद्वर्त्तना च भवति, उपरितनस्य तु न भवति। अपकर्षणाऽपवर्तना

पुनः सर्वत्र बन्धप्रमाणादर्वाक् परतो वा स्थित्यनुभागयोर्भवतीत्यर्थः । तथा किट्टीकृतवर्जे कर्मदलिके उभयमुद्वर्तनापवर्तनालक्षणं भवति किट्टीकृतेषु तु कर्मस्वपवर्तनैव केवला प्रवर्तते नोद्वर्तनेति विषयनियमोऽयम् ॥ १० ॥

॥ इति कर्मप्रकृतिटीकायामुद्वर्त्तनापवर्त्तने समाप्ते ॥

तदेवमुक्ते उद्वर्तनापवर्तने, अथोद्देशक्रमागतोदीरणा वक्तव्या । तत्र चैतेऽर्थाधिकाराः—लक्षणं, भेदः, साद्यनादिप्ररूपणा, स्वामित्वं, उदीरणाप्रकृतिस्थानानि, तत्स्वामित्वं चेति । तत्रादौ लक्षणभेदप्ररूपणार्थमाह—

जं करणेणोकड्ढिय उदए दिज्जइ उदीरणा एसा । पगइठिइअणुभागप्पएसमूलुत्तरविभागा ॥ १ ॥

व्याख्या—अत्र पूर्वार्धेन लक्षणमुत्तरार्धेन च भेदोऽभिधीयते । तत्र यत्परमाणवात्मकं दलिकं करणेन योगसंज्ञवीर्यविशेषेण कषायसहितेन तद्रहितेन वा उदयावलिकाबहिर्वर्तिनीभ्यः स्थितिभ्योऽपकृष्योदये दीयते उदयावलिकायां प्रक्षिप्यते । एषोदीरणा । सा चतुर्विधा । तथाहि—प्रकृत्युदीरणा स्थित्युदीरणाऽनुभागोदीरणा प्रदेशोदीरणा च । पुनरेकैका द्विविधा—मूलप्रकृतिविषयोत्तरप्रकृतिविषया च । तत्र मूलप्रकृतिविषयाऽष्टधा उत्तरप्रकृतिविषया चाष्टपञ्चाशदधिकशतभेदा । तथा चाह—प्रकृतिस्थित्यनुभागप्रदेशमूलोत्तरविभागा प्रकृतिस्थित्यनुभागप्रदेशैर्मूलप्रकृत्युत्तरप्रकृतिभेदैश्च कृत्वा विभागो यस्याः सा तथा । यद्यप्युदीरणायामुदयसमकक्षतया प्रकृतीनां द्वाविंशं शतं कर्मस्तवटीकादावुक्तं, इह त्वष्टपञ्चाशं शतं, तथापि तत्र बन्धादीनां पृथग्न विवक्षा, इह तु पृथग्विवक्षेति न दोष इति भावनीयम् ॥ १ ॥

तदेवमुक्तौ लक्षणभेदौ, अथ साद्यनादिप्ररूपणा कर्तव्या । सा च द्विधा—मूलोत्तरप्रकृतिविषयभेदात् । तत्र प्रथमतो मूलप्रकृतिविषयां तामाह—

मूलपगईसु पंचण्ह तिहा दोण्हं चउव्विहा होइ। आउस्स साइ अधुवा दसुत्तर सउत्तरासिं पि ॥ २ ॥

व्याख्या—मूलप्रकृतिषु मध्ये पञ्चानां ज्ञानावरणदर्शनावरणनामगोत्रान्तरायरूपाणामुदीरणा त्रिधा त्रिप्रकारा,तद्यथा—अनादिर्ध्रुवाऽध्रुवा च। तथाहि—ज्ञानावरणदर्शनावरणान्तरायाणां यावत्क्षीणमोहगुणस्थानकस्य सम(या)धिकावलिका नावशिष्यते, नामगोत्रयोस्तु यावत्सयोगिचरमसमयस्तावत्सर्वजीवानामुदीरणाऽवश्यंभाविनीति अनादिरेषामुदीरणा । ध्रुवाऽभव्यानां, अध्रुवा भव्यानामिति । तथा द्वयोर्वेदनीयमोहनीययोरुदीरणा चतुर्विधा । तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च । तत्र वेदनीयस्य प्रमत्तगुणस्थानकं यावदुदीरणा, न परतः। मोहनीयस्य सूक्ष्मसंपरायगुणस्थानकं यावन्न परतः । ततोऽप्रमत्तादिगुणस्थानकेभ्यः प्रतिपततो वेदनीयस्योपशान्तमोहगुणस्थानकाच्च प्रतिपततो मोहनीयस्योदीरणा सादिः, तत्तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवे पूर्ववत् । आयुषः पुनरुदीरणा सादिरध्रुवा च। तथाहि—आयुषः पर्यन्तावलिकायां नियमादुदीरणा न भवति, ततोऽध्रुवा, परभवोत्पत्तिप्रथमसमय एव च भूयः प्रवर्त्तते, ततः सादिरिति । तदेवं कृता मूलप्रकृतिषु साद्यनादिप्ररूपणाऽथोत्तरप्रकृतिषु तां विधित्सुराह—दसुत्तरेत्यादि,उत्तरासामप्युत्तरप्रकृतीनामपि दशोत्तरशतसङ्ख्यानां ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयमिथ्यात्वतैजससप्तकवर्णादिविंशतिस्थिरास्थिरशुभाशुभागुरुलघुनिर्माणान्तरायपञ्चकरूपाष्टचत्वारिंशद्ध्रुवसर्वशेषप्रकृतीनामित्यर्थः । उदीरणा सादिरध्रुवा च, सा च साद्यध्रुवताऽध्रुवोदयत्वादेव सिद्धा ॥ २ ॥

मिच्छत्तस्स चउऊ तिहा य आवरणविग्घचोद्दसगे । थिरसुन्नसेयरउवघायवज्ज धुवबंधिणामे य ॥ ३ ॥

व्याख्या—मिथ्यात्वस्योदीरणा चतुर्विधा, तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च । तत्र सम्यक्त्वप्रतिपत्तौ मिथ्यात्वस्योदयाऽभावान्नोदीरणा । ततः पतित्वा मिथ्यात्वप्राप्तौ पुनरपि भवति, ततोऽसौ सादिः । सम्यक्त्वमप्राप्तस्यानादिः । अभव्यानां ध्रुवा, भव्यानामध्रुवा । तथा ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकरूपाणां चतुर्दशप्रकृतीनामुदीरणा त्रिप्रकाराऽनादिर्ध्रुवाऽध्रुवा चेति । तथाहि—एतासां ध्रुवोदयत्वादनादिरुदीरणाऽभव्यानाश्रित्य ध्रुवा भव्यानां तु क्षीणमोहगुणस्थानके आवलिकाशेषे व्यवच्छेदादध्रुवा । तथा स्थिरशुभे सेतरे अस्थिराशुभसहिते, तयोर्विशेषणस्य परनिपातआर्षत्वात्, उपघातवर्जानां शेषनामध्रुवबन्धिनीनां च तैजससप्तकागुरुलघुवर्णादिविंशतिनिर्माणलक्षणानां सर्वसङ्ख्यया त्रयस्त्रिंशत्सङ्ख्यानामुदीरणा त्रिधाऽनादिर्ध्रुवाऽध्रुवा चेति । तत्रानादित्वं ध्रुवोदयत्वात्, ध्रुवाऽभव्यानां, अध्रुवा भव्यानां, सयोगिकेवलिचरमसमये व्यवच्छिद्यमानत्वात् ॥ ३ ॥

तदेवं कृता साद्यनादिप्ररूपणा, अथ स्वामित्वप्ररूपणा कार्या, तत्र मूलप्रकृत्युदीरणास्वामिनमाह—

घाईणं छउमत्था उदीरणा रागिणो अ मोहस्स । तइआऊण पमत्ता जोगंता उ त्ति दोण्हं च ॥ ४ ॥

व्याख्या—घातिप्रकृतीनां ज्ञानावरणदर्शनावरणान्तरायरूपाणां सर्वेऽपि छद्मस्थाः क्षीणमोहान्ता उदीरकाः । मोहनीयस्य तु रागिणो बादरलोभवन्तः सूक्ष्मसंपरायान्ता उदीरकाः । तृतीयस्य वेदनीयकर्मण आयुषश्च प्रमत्ताः प्रमत्तगुणस्थानान्ताः सर्वेऽप्युदीरकाः । केवलमायुषः पर्यन्तावलिकायां नोदीरका भवन्तीति द्रष्टव्यं । तथा द्वयोर्नामगोत्रयोर्योग्यन्ताः

सयोगिकेवलिपर्यवसानाः सर्वेऽप्युदीरकाः । इतिशब्दो भिन्नक्रमो गाथान्ते योजनीयः, स च मूलप्रकृत्युदीरणाभिधान-परिसमाप्तिद्योतकः ॥ ४ ॥

तदेवं मूलप्रकृत्युदीरणास्वाम्यभिहितः, अथोत्तरप्रकृत्युदीरणास्वामिनमाह—

विग्घावरणधुवाणं छउमत्था जोगिणो उ धुवगाणं । उवघायस्स तणुत्था तणुकिट्टीणं तणुरागा ॥ ५ ॥

व्याख्या—विघ्नाः पञ्चाऽन्तरायप्रकृतयः, आवरणानि ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयरूपाणि तेषां चतुर्दशानां ध्रुवोदयकर्मणां सर्वे छद्मस्था उदीरकाः । तथा "धुवगाणं ति" नामध्रुवोदयानां त्रयस्त्रिंशत्सङ्ख्यानां तैजससप्तकवर्णादिविंशतिस्थिरास्थिरशुभाशुभागुरुलघुनिर्माणरूपाणां योगिनः सयोगिकेवलिपर्यन्ता उदीरकाः । उपघातनाम्नस्तनुस्थाः शरीरपर्याप्त्या पर्याप्ता उदीरकाः । तनुकिट्टीनां सूक्ष्मकिट्टीनामर्थाद्बोधसत्कानां तनुकरागाः सूक्ष्मसंपराया यावच्चरमावलिका न भवति तावदुदीरकाः ॥ ५ ॥

तसबायरपज्जत्तगसेयरगइजाइदिट्ठिवेयाणं । आऊण य तन्नामा पत्तेगियरस्स य तणुत्था ॥ ६ ॥

व्याख्या—त्रसबादरपर्याप्तानां सेतराणां सप्रतिपक्षाणां स्थावरसूक्ष्मापर्याप्तसहितानामित्यर्थः, तथा गतीनां चतसृणां, जातीनां पञ्चानां, दृष्टीनां तिसृणां मिथ्यात्वसम्यक्त्वमिश्रदृष्टिलक्षणानां, वेदानां त्रयाणां, आयुषां च चतुर्णां, सर्वसङ्ख्यया पञ्चविंशतिप्रकृतीनां यथास्वं तन्नामानस्तत्तत्प्रकृतिनिष्पन्ननामान उदीरकाः । तथाहि—त्रसनाम्नस्त्रसा बादरनाम्नो बादराः, ते च शरीरेऽपान्तराले गतौ च वर्तमाना उदीरकाः । एवं सर्वेषामपि भावनीयं । तथा प्रत्येकनाम्न इतरस्य च

साधारणनाम्नस्तनुस्थाः शरीरपर्याप्त्या पर्याप्ता इत्यर्थः । यथाक्रमं प्रत्येकशरीरिणः साधारणशरीरिणश्च सर्वे उदीरकाः ।६॥

आहारगणरतिरिया सरीरउगवेयगे पमुत्तूणं । उरालाए एवं तउवंगाए तसजियाउं ॥ ७ ॥

व्याख्या—आहारका उंजोलोमप्रक्षेपाहाराणामन्यतमाहारग्राहिणो ये नरा मनुष्यास्तिर्यञ्चश्च । "उरालाए त्ति" औदारिकशरीरनाम्नः, उपलक्षणादौदारिकबन्धनचतुष्टयस्यौदारिकसङ्घातनस्य चोदीरकाः । किमविशेषेण सर्वेऽपि ? नेत्याह—शरीरद्विकमाहारकवैक्रियलक्षणं तद्वेदकान् तत्स्थान् परित्यज्य । ते ह्यौदारिकशरीरनामोदय एव न वर्तन्त इति सुतरां न तदुदीरका इति त्यज्यन्ते । तथा एवमुक्तप्रकारेण, "तउवंगाए त्ति" तदङ्गोपाङ्गनाम्न औदारिकाङ्गोपाङ्गनाम्नस्त एवोदीरका ज्ञातव्याः । केवलं ते त्रसजीवा एव, न स्थावरा अपि, तेषां तदुदयाभावात् । उक्तं च—"आहारी उत्तरतणु नरतिरि तब्वेयए पमुत्तूणं । उदीरंति उरालं ते चेव तसा उवंगं से ॥ १ ॥" अत्राहारीत्याहारकशरीरिणः "उत्तरतणु त्ति" वैक्रियशरीरिणो देवान्नारकाँश्च नरतिरश्चोऽपि तद्वेदकान् प्रमुच्येति पूर्वार्धार्थः ॥ ७ ॥

वेउव्वियाइ सुरणेरइया आहारगा णरो तिरिउं । सन्नी बायरपवणो य लब्धिपज्जत्तगो हुज्जा ॥ ८ ॥

व्याख्या—वैक्रियशरीरनाम्न उपलक्षणाद्वैक्रियबन्धनचतुष्टयस्य वैक्रियसङ्घातनस्य च सुरा नैरयिका वाऽऽहारका उंजोलोमान्यतमाहारग्राहिण आहारपर्याप्ता इतियावत् । यश्च नरस्तिर्यङ् वा संज्ञिवैक्रियलब्धिसंपन्नो यश्च बादरपवनो वैक्रियनामोदयी लब्धिपर्याप्तको वैक्रियशरीरलब्ध्या पर्याप्तो भवेत्ते सर्वेऽप्युदीरकाः॥ ८ ॥

वेउव्विउवंगाए तणुतुल्ला पवणबायरं हिच्चा । आहारगाए विरउं विउव्वयंतो पमत्तो य ॥ ९ ॥

व्याख्या—वैक्रियोपाङ्गनाम्न उदीरकास्तनुतुल्या वैक्रियशरीरतुल्या ज्ञातव्याः, ये वैक्रियनाम्न उदीरका उक्तास्ते एवास्यापि ज्ञेया इत्यर्थः। केवलं बादरपवनं बादरवायुकायिकं हित्वा परित्यज्य शेषा द्रष्टव्याः। "आहारगाए त्ति" आहारकशरीरनाम्न उपलक्षणादाहारकबन्धनस्याहारकसङ्घातस्य च विरतः संयतः विकुर्वन्नाहारकशरीरं कुर्वन् प्रमत्तः प्रमादजावमुपगतः सन्नुदीरको जवति। उक्तं च—"आहारसत्तगस्स वि कुणइ पमत्तो विकुवंतो त्ति" ॥ ए ॥

उण्हं संघाणाणं संघयणाणं च सगलतिरियनरा । देहत्था पज्जत्ता उत्तमसंघयणिणो सेढी ॥ १० ॥

व्याख्या—सकलाः पञ्चेन्द्रियास्तिर्यञ्चो नराश्च शरीरपर्याप्त्या पर्याप्ता देहस्थाः शरीरनामोदये वर्तमानाः षण्णां संस्थानानां षण्णां च संहननानामुदीरका जवन्ति। इह येषामुदयस्तेषामेवोदीरणा प्रवर्तत इति यदा यत्संस्थानं संहननं वोदयप्राप्तं जवति तत्तदोदीर्यते नान्यदन्यदेति द्रष्टव्यं। तथोत्तमसंहनिनो वज्रर्षजनाराचसंहनिनः श्रेणिः क्षपकश्रेणिर्जवति, न शेषसंहनिनः, तेन क्षपकश्रेण्यारूढा वज्रर्षजनाराचसंहननमेवोदीरयन्ति, न शेषसंहननानि, उदयाजावादित्यवसेयम् ॥ १० ॥

चउरंसस्स तणुत्था उत्तरतणु सगलजोगजूमिगया । देवा इयरे हुंमा तसतिरियणरा य बेवट्ठा ॥११॥

व्याख्या—चतुरस्रस्यैव समचतुरस्रसंस्थानस्यैव तनुस्थाः शरीरपर्याप्त्या पर्याप्ता उत्तरतनव आहारकोत्तरवैक्रियशरीरिणो मनुष्यास्तिर्यञ्चश्च सकलाः पञ्चेन्द्रिया जोगजूमिगता देवाश्चोदीरका जवन्ति। इतरे उक्तशेषा एकेन्द्रियविकलेन्द्रियनैरयिका अपर्याप्ताश्च पञ्चेन्द्रियतिर्यङ्मनुष्याः शरीरस्था हुण्डसंस्थानस्योदीरका जवन्ति, त्रसतिर्यङ्नराश्च, अत्रापीतरे इत्य-

नुवृत्त्या योज्यते, तत इतरे उक्तशेषास्त्रसा द्वीन्द्रियादयः पञ्चेन्द्रियतिर्यङ्मनुष्याश्च सेवार्ताः सेवार्तसंहननोदयभाजः सेवार्तसंहननस्योदीरकाः । विकलेन्द्रियेषु लब्ध्यपर्याप्तेष्वेव च पञ्चेन्द्रियतिर्यङ्मनुष्येषु सेवार्तोदीरणानियमान्निधानतात्पर्यकमेतदन्येषां प्रागुक्तत्वात् । उक्तं च—"सेवट्टगं तु वियला अपज्जत्ता" ॥ ११ ॥

संघयणाणि ण उत्तरतणूसु तन्नामगा भवंतरगा । आणुपुव्वीणं परघायस्स उ देहेण पज्जत्ता ॥ १२ ॥

व्याख्या—उत्तरतनुषु वैक्रियाहारकशरीरेषु नरतिर्यग्द्वयेऽपि संहननानि न भवन्ति, षण्णां संहननानामेकतरद(म)पि संहननं न भवतीत्यर्थः । तेन ते उदयाभावादेकस्यापि संहननस्योदीरका न भवन्ति । उक्तं च—"वेउव्विय आहारग उदये न णरा वि हुंति संघयणी" । अत्रापिना (अपिशब्देन) वैक्रियशरीरिणस्तिर्यञ्चो गृह्यन्ते । तथानुपूर्वीणां नरकानुपूर्व्यादीनां चतसृणां तन्नामकाः तत्तदानुपूर्वीपर्यायघटितनारकादिनामानो भवान्तरगा भवान्तरालगतौ वर्तमाना उदीरका बोद्धव्याः । तथाहि—नरकानुपूर्व्या नारको भवान्तरालगतौ वर्तमान उदीरकः, तिर्यङ् तिर्यगानुपूर्व्या इत्यादि । तथा पराघातनाम्नः शरीरपर्याप्त्या पर्याप्ताः सर्वेऽप्युदीरकाः ॥ १२ ॥

बायरपुढवी आयावस्स य वज्जित्तु सुहुमसुहुमतसे । उज्जोयस्स य तिरिउ उत्तरदेहो य देवजई ॥ १३ ॥

व्याख्या—आतापनाम्नो बादरपृथ्वीकायिक उदीरकः । चशब्दस्यानुक्तसमुच्चयार्थत्वात् सोऽपि पर्याप्तो द्रष्टव्यः । तथा सूक्ष्मान् सूक्ष्मैकेन्द्रियान् सूक्ष्मत्रसाँश्च तेजोवायुकायिकान् द्विविधानपि वर्जयित्वा शेषास्तिर्यञ्चः पृथिव्यम्बुवनस्पतयो विकलेन्द्रियाः पञ्चेन्द्रियाश्च लब्धिपर्याप्ता उद्योतनाम्नो यथासंभवमुदीरकाः । तथोत्तरदेहे उत्तरशरीरे यथासंभवं वैक्रिये

आहारके च वर्तमानो देवो यतिश्चोद्योतनाम्न उदीरको भवति । उक्तं च—"पुढवीआउवणस्सइ बायरपज्जत्तउत्तरतणू य। विगलपणिंदियतिरिया उज्जोउदीरगा भणिया ॥ १ ॥" इति ॥ १३ ॥

सगलो य इठखगइ उत्तरतणुदेवनोगभूमिगया । इठसराइ तसो वि य इयरासि तसा सणेरइया ॥ १४ ॥

व्याख्या—सकलः पञ्चेन्द्रियस्तिर्यङ्मनुष्यो वा शरीरपर्याप्तिपर्याप्त उदितप्रशस्तविहायोगतिः, तथोत्तरस्यां तनौ वैक्रियशरीररूपायां वर्तमानाः सर्वे तिर्यङ्मनुष्याः, तथा सर्वे देवाः सर्वे च भोगभूमिगता इष्टखगतेः प्रशस्तविहायोगतेरुदीरकाः । तथेष्टस्वरनाम्नः सुस्वरनाम्नस्त्रसा द्वीन्द्रियादयः, अपिशब्दात्प्रागुक्ताश्च पञ्चेन्द्रियादयो भाषापर्याप्त्या पर्याप्ता यथायोगमुदीरकाः । तथेतरयोरप्रशस्तविहायोगतिदुःस्वरनाम्नोस्त्रसा विकलेन्द्रिया यथासंभवं केचन च पञ्चेन्द्रियतिर्यङ्मनुष्याः सनैरयिका नैरयिकसहिता उदीरकाः ॥ १४ ॥

ऊसासस्स सराण य पज्जत्ता आणपाणभासासु । सव्वेसुणुस्सासो भासा वि य जा ण रुंभंति ॥ १५ ॥

व्याख्या—उच्छ्वासस्य स्वरयोश्चानप्राणभाषापर्याप्तिभ्यां पर्याप्ताः सर्वेऽप्युदीरकाः । यथासङ्क्षेन योजनात् सप्तम्याश्च तृतीयार्थत्वात् उच्छ्वासनाम्नः प्राणापानपर्याप्त्या पर्याप्ताः सुस्वरदुःस्वरयोश्च भाषापर्याप्त्या पर्याप्ता उदीरका द्रष्टव्या इत्यर्थः । यद्यपि स्वरयोरुदीरकाः प्रागेवोक्तास्तथापि भाषापर्याप्त्या पर्याप्ता एवोदीरका इति विशेषोद्योतनाय पुनरुपादानं । तथा सर्वज्ञानां केवलिनामुच्छ्वासभाषे यावन्न निरोधमुपगच्छतस्तावदुदीर्येते, तन्निरोधानन्तरं तूदयाभावादेव नोदीरणा ॥ १५ ॥

देवो सुन्नगाइज्जाण गप्पवक्कंतिउ अ कित्तीए । पज्जत्तो वज्जित्ता ससुहुम णेरइयसुहुमतसे ॥ १६ ॥

व्याख्या—"देवो" इत्यादौ जात्यपेक्षमेकवचनं, केचिद्देवाः केचित्तिर्यञ्चमनुष्या गर्भव्युत्क्रान्ताः सुन्नगादेयनाम्नोरुदीरकाः, ये तदुदयजाजो भवन्ति । तथा सूक्ष्मैकेन्द्रियसहितान्नैरयिकान् सूक्ष्मत्रसाँश्च वर्जयित्वा शेषाः पर्याप्तकनामोदये वर्तमाना यशःकीर्तेरुदीरकाः ॥ १६ ॥

गोउत्तमस्स देवा णरा य वइणो चउण्हमियरासिं । तव्वइरित्ता तित्थगरस्स उ सव्वसुआइ भवे ॥ १७ ॥

व्याख्या—सर्वे देवा नरा अपि केचिदुच्चैःकुलसमुत्पन्ना व्रतिनश्च नीचैर्गोत्रोत्पन्ना अपि पञ्चमहाव्रतजारोहणवृषजा उच्चैर्गोत्रस्योदीरकाः । तथेतरासां चतसृणां प्रकृतीनां दुर्भगानादेययशःकीर्तिनीचैर्गोत्राणां तद्व्यतिरिक्ता भणितोद्धरिता बोद्धव्याः । तत्र दुर्भगानादेययोरेकेन्द्रियविकलेन्द्रियसंमूर्छिमतिर्यञ्चमनुष्यनैरयिकाः, अयशःकीर्तेश्च सर्वे सूक्ष्माः सर्वे च नैरयिकाः सर्वे च सूक्ष्मत्रसाः सर्वेऽप्यपर्याप्तकनामकर्मोदये वर्तमानाः, नीचैर्गोत्रस्य तु सर्वे नैरयिकाः सर्वे तिर्यञ्चः विशिष्टकुलोत्पन्नान् व्रतिनश्च विहाय सर्वेऽपि मनुष्याश्चोदीरका द्रष्टव्याः । तीर्थकरनाम्नस्तु सर्वज्ञतायां सत्यां भवेदुदीरणा, नान्यदा, उदयाभावात् ॥ १७ ॥

इंदियपज्जत्तीए दुसमयपज्जत्तगा उ पाउग्गा । णिद्दापयलाणं खवगखीणरागे परिच्चज्ज ॥ १८ ॥

व्याख्या—इन्द्रियपर्याप्त्या पर्याप्ताः सन्तो द्वितीयसमयादारभ्येन्द्रियपर्याप्त्यनन्तरसमयादारभ्येत्यर्थः, निद्राप्रचलयोरुदीरणाप्रायोग्या भवन्ति । सर्वत्राविशेषप्राप्तौ नियममाह—क्षीणरागान् क्षपकाँश्च परित्यज्य । उदीरणा ह्युदया-

विनाऽऽविनी, न च क्षीणरागक्षपकयोर्निद्राप्रचलोदयः संऽभवति, "णिद्दाउगस्स उदयउ खीणा खवगे परिच्चज्जे त्ति" वचनप्रामाण्यात्। ततस्तान् वर्जयित्वा शेषा निद्राप्रचलयोरुदीरका बोद्धव्याः। एतच्च सत्कर्मग्रन्थादिप्रसिद्धं ग्रन्थकृन्मतं। ये तु कर्मस्तवकारादयः क्षपकक्षीणमोहयोरपि निद्राद्विकस्योदयमिच्छन्ति तन्मते उदये सत्युदीरणाया अवश्यंऽभावात् क्षीणरागमन्तावलिकाऽऽविनं मुक्त्वा तदारतः सर्वेऽपि जीवा इन्द्रियपर्याप्त्या पर्याप्ता निद्राप्रचलयोरुदीरका द्रष्टव्याः। तदुक्तं तन्मतानुसारेणैव पञ्चसङ्ग्रहे—"मोत्तूण खीणरागं इंदियपज्जत्तगा उदीरंति। निद्दापयला" इति ॥१८॥

णिद्दाणिद्दाईणं असंखवासाउ मणुयतिरिया य। वेउव्वाहारतणू वज्जित्ता अप्पमत्ते य ॥ १९ ॥

व्याख्या—असङ्ख्येयवर्षायुषो मनुष्यतिरश्चो वैक्रियशरीरिण आहारकशरीरिणोऽप्रमत्तसंयताँश्च मुक्त्वा शेषाः सर्वेऽपि निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धीनामुदीरकाः ॥ १९ ॥

वेयणियाण पमत्ता ते ते बंधंतगा कसायाणं। हासाईऽछक्कस्स य अपुव्वकरणस्स चरमंते ॥ २० ॥

व्याख्या—वेदनीययोः सातासातरूपयोः प्रमत्ताप्रमत्तगुणस्थानकपर्यन्ताः सर्वेऽप्युदीरकाः, नान्ये, अन्येषामतिविशुद्धत्वेन सातासातोदीरणायोग्याध्यवसायस्थानाऽऽवात्। तथा ये ये येषां येषां कषायाणां बन्धकास्ते ते तेषां तेषां कषायाणामुदीरकाः "जे वेयइ से बंधइ" इतिवचनात् वेद्यमानानामेव कषायाणां बन्धसंऽभवात् उदये च सत्युदीरणासंऽभव इति युक्तमुक्तं ते ते बध्नन्तः कषायाणामुदीरका इति। तत्रानन्तानुबन्धिनां सासादनान्ता अप्रत्याख्यानकषायाणामविरतसम्यग्दृष्ट्यन्ताः प्रत्याख्यानावरणकषायाणां देशविरतान्ता लोऽभवर्जानां संज्वलनानां स्वबन्धं यावत्संज्वलनलोऽभस्य

च बादरस्यानिवृत्तिबादरसंपरायान्ता उदीरकाः । किट्टीकृतस्य तु लोभस्य सूक्ष्मसंपराया उदीरका इत्युक्तं प्रागेव । हास्यादिषट्कस्य तु अपूर्वकरणगुणस्थानकान्ता उदीरकाः ॥ २० ॥

जा ऊण खणो पढमो सुहरइहासाणमेवमियराणं । देवा णेरइया वि य नवठिइं के वि णेरइया ॥२१॥

व्याख्या—यावत्प्रथमः ऊणः किञ्चिदूनो भवति यावत्प्रथममन्तर्मुहूर्त्तं भवतीत्यर्थः । तावन्नियमाद्देवाः सुख (सातवेदनीय) रतिहास्यानामुदीरकाः । एवं किञ्चिदूनं प्रथमक्षणं यावन्नैरयिका इतरासामसातवेदनीयारतिशोकप्रकृतीनां नियमादुदीरकाः । आदिमान्तर्मुहूर्तादूर्ध्वं तु देवा नारकाश्च प्रत्येकं परिवर्तनविधिना षण्णामपि प्रकृतीनामुदीरका भवन्ति । तत्र नारकाणां सातवेदनीयाद्युदयसंभवस्तीर्थकरजन्मादाववसेयः । देवानां त्वसातवेदनीयाद्युदयसंभवः परगुणमत्सरविषादाप्रियविप्रयोगस्वच्यवनादौ । केचित्पुनर्नैरयिकाः सकलामपि भवस्थितिं यावदसातवेदनीयारतिशोकानामुदीरका भवन्ति २१

एवमेकैकप्रकृत्युदीरणास्वामित्वमुक्तं, अथ प्रकृत्युदीरणास्थानान्याह—

पंचण्हं च चउण्हं तिइएक्काइ जा दसण्हंति । तिगहीणाइ मोहे मिच्छे सत्ताइ जाव दस ॥ २२ ॥

व्याख्या—द्वितीयकर्मणि दर्शनावरणीये पञ्चानां चतसृणां वा प्रकृतीनां युगपदुदीरणा भवति । तत्र चतसृणां चक्षुरचक्षुरवधिकेवलदर्शनावरणरूपाणां ध्रुवा उदयस्थानामुदीरणा । एतासां मध्ये निद्रापञ्चकान्यतरप्रकृतिप्रक्षेपे च पञ्चानामुदीरणा । तथा मोहे मोहनीये एकादिका त्रिकहीनोदीरणा तावद्द्रष्टव्या यावद्दशानां, मोहनीयस्योदीरणायामेकादीनि त्रिकहीनानि दशान्तानि नव प्रकृतिस्थानानि भवन्तीत्यर्थः १-२-४-५-६-७-८-९-१० । एषामुदीरणास्थानानां

स्वामिनमाह—" मिच्छे " इत्यादि, मिथ्यादृष्टौ सप्तादीनि यावद्दशेति दशपर्यन्तानि चत्वार्युदीरणास्थानानि भवन्ति सप्ताष्टौ नव दश चेति । तत्र मिथ्यात्वमप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनक्रोधादीनामन्यतमे क्रोधादयः सजातीयकषायाणां सर्वेषां युगपदुदयात् युगपदुदीरणा, विजातीयानां तु क्रोधमानादीनां युगपदुदयाभावादेव नोदीरणेति त्रयाणां क्रोधानां त्रयाणां वा मानानां तिसृणां वा मायानां त्रयाणां वा लोभानां युगपदुदीरणेत्यन्यतमे त्रयो गृह्यन्ते । तथा त्रयाणां वेदानामन्यतमो वेदः, तथा हास्यरत्यरतिशोकरूपयोर्युगलयोरन्यतरद्युगलं । एताः सप्त प्रकृतयो मिथ्यादृष्टौ ध्रुवोदीरणाः । अत्र भङ्गाश्चतुर्विंशतिः । तथाहि—द्वयोर्युगलयोः परावर्तनेनैकैको भङ्गो लभ्यते ततो द्वौ भङ्गौ जातौ, तौ च प्रत्येकं त्रिष्वपि वेदेषु प्राप्येते इति द्वौ त्रिगुणितौ षड् भवन्ति, ते च प्रत्येकं क्रोधादिषु चतुर्षु प्राप्यन्त इति षट् चतुर्भिर्गुणिताश्चतुर्विंशतिरिति । एतस्मिन्नेव सप्तके भये वा जुगुप्सायां वाऽनन्तानुबन्धिनि वा क्षिप्तेऽष्टानामुदीरणा । तत्र प्रत्येकमेकैकचतुर्विंशतिप्राप्तेर्भङ्गानां तिस्रश्चतुर्विंशतयो द्रष्टव्याः । ननु मिथ्यादृष्टेरनन्तानुबन्ध्युदयरहितस्याप्राप्तेरुदये च सत्यवश्यमुदीरणेत्यनन्तानुबन्धिरहितानां सप्तानामष्टानां वोदीरणाभिधानमसङ्गतमिति चेन्न, यः सम्यग्दृष्टिरादावनन्तानुबन्धिविसंयोजनां कृत्वैव विश्रान्तस्तादृशसामग्र्यभावान्मिथ्यात्वादिक्षयाय नोद्युक्तवान्, कालान्तरे च मिथ्यात्वं गतस्तत्प्रत्ययतो भूयोऽप्यनन्तानुबन्धिनो बध्नाति, तेषां च बन्धावलिकां यावदुदयो न भवति, तदभावाच्च नोदीरणेत्यनन्तानुबन्धिना रहितो(ताया अ)दीरणाया अपि मिथ्यादृष्टेः संभवात्, बन्धावलिकात्यये चोदये संभवाद्भवत्येवोदीरणा । ननु कथं बन्धसमयादारभ्यावलिकायामतीतायामुदयोऽपि संभवति यावताऽबाधाकालस्य क्षये सत्युदयः, स च

जघन्यतोऽप्यनन्तानुबन्धिनामन्तर्मुहूर्त्तप्रमाण इति' नायं दोषः, यतो बन्धसमयादारभ्य तेषां तावत्सत्ता भवति, सत्तायां च सत्यां पतद्ग्रहता, तस्यां च सत्यां शेषचारित्रमोहनीयप्रकृतिदलिकसङ्क्रान्तिः, सङ्क्रान्तस्य च तस्य स्वबन्धावलिकारूपसङ्क्रम्यमाणदलिकसङ्क्रमावलिकायामतीतायामुदयः, उदये च सत्युदीरणा । ततो बन्धसमयादनन्तरमावलिकायामतीतायामुदीरणाभिधानं न विरुध्यत इति । तथा तस्मिन्नेव सप्तके भयजुगुप्सयोरथवा भयानन्तानुबन्धिनोर्यदा जुगुप्सानन्तानुबन्धिनोर्मिलितयोः प्रक्षिप्तयोर्नवानामुदीरणा । अत्राप्युक्तरीत्यैकैकविकल्पे भङ्गानां चतुर्विंशतिः प्राप्यत इति तिस्रश्चतुर्विंशतयो द्रष्टव्याः । तस्मिन्नेव सप्तके भयजुगुप्सानन्तानुबन्धिषु मिलितेषु प्रक्षिप्तेषु दशानामुदीरणा । अत्रैकैव भङ्गानां चतुर्विंशतिः ॥ २२ ॥

तदेवं मिथ्यादृष्टौ मोहनीयस्योदीरणास्थानान्युक्तानि । अथ सासादनादिषु तान्याह—

सासणमिस्से णव अविरए य छाइ परम्मि पंचाइ। अट्ठ विरए य चउराइ सत्त छच्चोवरिल्लम्मि ॥२३॥

व्याख्या—सासादनसम्यग्दृष्टौ सम्यग्मिथ्यादृष्टौ च सप्तादीनि नवपर्यन्तानि त्रीणि त्रीण्युदीरणास्थानानि भवन्ति सप्ताष्टौ नव चेति । तत्र सासादनसम्यग्दृष्टावनन्तानुबन्ध्यादीनामन्यतमे (मानः) चत्वारः क्रोधादिकाः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलमित्येताः सप्त नियमादुदीर्यन्ते । अत्र प्रागुक्तनीत्या भङ्गानामेका चतुर्विंशतिः । तथाऽस्मिन्नेव सप्तके भये जुगुप्सायां वा क्षिप्तायामष्टानामुदीरणा । अत्र द्वे चतुर्विंशती भङ्गानां । भयजुगुप्सयोर्युगपत् क्षेपे च नवानामुदीरणा । तत्र भङ्गानामेका चतुर्विंशतिः । सम्यग्मिथ्यादृष्टावनन्तानुबन्धिवर्जानां त्रयाणां क्रोधादीनाम-

न्यतमवेदस्यान्यतमयुगलस्य सम्यग्मिथ्यात्वस्य चेति सर्वसङ्ख्यया सप्तानामुदीरणा ध्रुवा। अत्र प्राग्वदेव नङ्गानामेका चतुर्विंशतिः। तथाऽत्रैव सप्तके नयजुगुप्सयोरन्यतरप्रक्षेपेऽष्टानामुदीरणा। अत्र नङ्गानां द्वे चतुर्विंशती। नयजुगुप्सयोर्युगपत्प्रक्षेपे च नवानामुदीरणा। अत्र चैका चतुर्विंशतिर्नङ्गानां। तथाऽविरतेऽविरतसम्यग्दृष्टौ षण्मादीनि नवपर्यन्तानि चत्वार्युदीरणास्थानानि षट् सप्ताष्टौ नव चेति। तत्रौपशमिकसम्यग्दृष्टेः क्षायिकसम्यग्दृष्टेर्वाऽविरतस्यानन्तानुबन्धिवर्जान्यतमक्रोधादित्रयान्यतमवेदान्यतरयुगलषण्णानां षण्णां प्रकृतीनामुदीरणा ध्रुवा। अत्र प्रागिव नङ्गानामेका चतुर्विंशतिः। अस्मिन्नेव षट्के नयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिन् प्रक्षिप्ते सप्तानामुदीरणा। अत्र नङ्गानां तिस्रश्चतुर्विंशतयः। तस्मिन्नेव षट्के नयजुगुप्सयोर्यद्वा नयवेदकसम्यक्त्वयोर्यद्वा जुगुप्सावेदकसम्यक्त्वयोर्युगपत्प्रक्षेपेऽष्टानामुदीरणा। अत्राप्येकैकस्मिन् विकल्पे नङ्गानां चतुर्विंशतिः प्राप्यत इति तिस्रश्चतुर्विंशतयः। नयजुगुप्सावेदकसम्यक्त्वेषु युगपत्क्षिप्तेषु नवानामुदीरणा। अत्र नङ्गानामेका चतुर्विंशतिः। परस्मिन्नविरतसम्यग्दृष्ट्युत्तरे देशविरते पञ्चादीनि "अष्ट त्ति" अष्टान्तानि चत्वार्युदीरणास्थानानि। तथाहि—पञ्च षट् सप्ताष्टौ चेति। तत्र तृतीयचतुर्थकषायस्थान्यतमक्रोधादित्रयान्यतमवेदान्यतमयुगलषण्णानां पञ्चानां प्रकृतीनां देशविरतस्य ध्रुवोदीरणा। इयं चौपशमिकसम्यग्दृष्टेः क्षायिकसम्यग्दृष्टेर्वाऽवसेया। अत्र प्राग्वन्नङ्गानामेका चतुर्विंशतिः। नयजुगुप्सावेदकसम्यक्त्वानामन्यतमप्रक्षेपे तु षण्णामुदीरणा नङ्गानां च तिस्रश्चतुर्विंशतयः, एकैकप्रक्षेपविकल्पे चतुर्विंशतिप्राप्तेः। तस्मिन्नेव पञ्चके नयजुगुप्सयोर्यद्वा जुगुप्सावेदकसम्यक्त्वयोर्यद्वा नयवेदकसम्यक्त्वयोर्युगपत्प्रक्षेपे सप्तानामुदीरणा। अत्रापि तिस्रश्चतुर्विंशतयो नङ्गानां। नयजुगुप्सावेदकसम्यक्त्वानां युगप-

त्प्रक्षेपे चाष्टानामुदीरणा। अत्र चैका चतुर्विंशतिर्ज्ञानां। विरते प्रमत्तेऽप्रमत्ते च चतुरादीनि "सत्त त्ति" सप्तपर्यन्तानि चत्वार्युदीरणास्थानानि भवन्ति चत्वारि पञ्च षट् सप्त चेति। तत्र संज्वलनान्यतमैकक्रोधाद्यन्यतमवेदान्यतमयुगललक्षणानां चतसृणां प्रकृतीनां क्षायिकसम्यक्त्ववत औपशमिकसम्यक्त्ववतो वा प्रमत्तस्याप्रमत्तस्य वोदीरणा ध्रुवा। अत्रैका भङ्गानां चतुर्विंशतिः। अस्मिन्नेव चतुष्के भयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिन् प्रक्षिप्ते पञ्चानामुदीरणा। अत्र भङ्गानां तिस्रश्चतुर्विंशतयः। तथा तस्मिन्नेव चतुष्के भयजुगुप्सयोरथवा भयवेदकसम्यक्त्वयोरथवा जुगुप्सावेदकसम्यक्त्वयोर्युगपत्प्रक्षेपे षण्णामुदीरणा। अत्रापि तिस्रश्चतुर्विंशतयो भङ्गानां। भयजुगुप्सावेदकसम्यक्त्वानां युगपत्प्रक्षेपे च सप्तानामुदीरणा। अत्र चैका चतुर्विंशतिर्ज्ञानां। "उच्चोवरिल्लम्मि त्ति" विरताऽपरितनेऽपूर्वकरणे चतुरादीनि षट्पर्यन्तानि त्रीण्युदीरणास्थानानि भवन्ति चतस्रः पञ्च षट् चेति। तत्र संज्वलनान्यतमैकक्रोधाद्यन्यतमवेदान्यतमयुगललक्षणानां चतसृणां प्रकृतीनामपूर्वकरणे उदीरणा ध्रुवा। अत्रैका भङ्गानां चतुर्विंशतिः। अस्मिन्नेव चतुष्के भये जुगुप्सायां वा क्षिप्तायां पञ्चानामुदीरणा। अत्र द्वे चतुर्विंशती भङ्गानां। भयजुगुप्सयोर्युगपत्क्षेपे तु षण्णामुदीरणा। अत्र चैका चतुर्विंशतिर्ज्ञानां। एताश्चतुर्विंशतयः प्रमत्ताप्रमत्तचतुर्विंशतिकातोऽभिन्ना इति न पृथगग्रे गणयिष्यन्ते ॥ २३ ॥

अणियट्टिम्मि दुगेगं लोभो तणुरागिगे चउवीसा। एक्कगछक्केक्कारस दस सत्त चउक्क एक्काउं ॥ २४ ॥

व्याख्या—अनिवृत्तिबादरे द्वे उदयस्थाने द्वे प्रकृती एका चेति। तत्र संज्वलनैकतमक्रोधाद्यन्यतमवेदलक्षणे द्वे। अत्र वेदत्रयेण संज्वलनचतुष्टयेन च द्वादश भङ्गाः। वेदानां क्षये उपशमे वा एकतमसंज्वलनक्रोधाद्युदीरणैव प्रवर्तते। तत्र

चत्वारो ज्ञङ्गाः । तनुरागे तनुरागस्य सूक्ष्मलोज्ञकिट्टीरनुज्ञवतः सूक्ष्मसंपरायस्य लोज्ञ एवैको मोहनीयप्रकृतिषूदीरणायोग्यो ज्ञवति । अत्र चतुरादिषु दशान्तेषूदीरणास्थानेषु चतुर्विंशतिसङ्ख्यां विरतान्तानामाह—"चउवीसा" इत्यादि, दशोदीरणायामेका चतुर्विंशतिः, नवोदीरणायां षट्, अष्टोदीरणायामेकादश, सप्तोदीरणायां दश, षडुदीरणायां सप्त, पञ्चकोदीरणायां चतस्रः, चतुरुदीरणायामेकेति । एताश्च प्रागेव ज्ञाविताः, संकलनमात्रं त्वेतत् ॥ २४ ॥

तदेवमुक्तानि मोहनीयस्योदीरणास्थानानि, अथ नामकर्मणस्तान्याह—

एगबियालापण्णाइ सत्तपन्नंत गुणिसु नामस्स । नव सत्त तिन्नि अट्ठ य चउपंच य अप्पमत्ते दो ॥२५॥
एक्कं पंचसु एक्कम्मि अट्ठ ठाणक्कमेण ज्ञंगा वि । एक्कग तीसेक्कारस इगवीस सबार तिसई य ॥२६॥
इगवीसा चउसया चउहि अहिया णव सया य एगहिया ।
अणुणुत्तराणि चोद्दस सयाणि गुणणउइ पंचसइ (या) ॥ २७ ॥

व्याख्या—एकचत्वारिंशत् द्विचत्वारिंशत्, ततः पञ्चाशदादयः सप्तपञ्चाशत्—पञ्चाशदेकपञ्चाशत् द्विपञ्चाशत्त्रिपञ्चाशच्चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत्सप्तपञ्चाशच्चेति नामकर्मण उदीरणास्थानानि दश ज्ञवन्ति । तत्र तैजससप्तकं वर्णादिविंशतिरगुरुलघु स्थिरास्थिरे शुज्ञाशुज्ञे निर्माणमित्येतास्त्रयस्त्रिंशत्प्रकृतयो ध्रुवोदीरणाः । तत्र नरगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुज्ञगादेययशःकीर्तिरूपेऽष्टके द्विप्ते एकचत्वारिंशज्ज्ञवति । एतस्य चैकचत्वारिंशद्भंगस्य सयोगिकेवली

केवलिसमुद्घातकार्मणकाययोगे वर्तमान उदीरको भवति। एषैव चैकचत्वारिंशज्जिननामसहिता द्विचत्वारिंशद्भवति। तस्याश्च तीर्थकरकेवली केवलिसमुद्घाते कार्मणकाययोगस्थ उदीरकः। एकचत्वारिंशद्वर्गे औदारिकसप्तकषण्मन्यतमसंस्थानवज्रर्षभनाराचसंहननोपघातप्रत्येकलक्षणैकादशकक्षेपे द्विपञ्चाशद्भवति। अत्र षड्भिः संस्थानैः षड्भङ्गाः। ते च वक्ष्यमाणसामान्यमनुष्यभङ्गान्तर्गता द्रष्टव्याः। एवमग्रेऽपि। एनां द्विपञ्चाशतं समुद्घाते औदारिकमिश्रकाययोगस्थः सयोगी केवल्युदीरयति। अत्रैव तीर्थकरनामक्षेपे त्रिपञ्चाशत्। केवलमिह संस्थानमाद्यमेवाभिधातव्यं। अस्या उदीरकस्तीर्थकरकेवली समुद्घाते औदारिकमिश्रकाययोगे वर्तमानो द्रष्टव्यः। उक्तद्विपञ्चाशद्वर्गे पराघातोच्छ्वासप्रशस्ताप्रशस्तविहायोगत्यन्यतरसुस्वरदुःस्वरान्यतरलक्षणचतुष्टयक्षेपे षट्पञ्चाशद्भवति। एतां च सयोगिकेवल्यौदारिककाययोगे वर्तमान उदीरयति। उक्तत्रिपञ्चाशद्वर्गे च पराघातोच्छ्वासप्रशस्तविहायोगतिसुस्वरप्रक्षेपात्सप्तपञ्चाशद्भवति। तां च सयोगिकेवली तीर्थकर औदारिककाययोगे वर्तमान उदीरयति। सप्तपञ्चाशदेव वाग्योगनिरोधे षट्पञ्चाशद्भवति। उच्छ्वासेऽपि निरुद्धे पञ्चपञ्चाशत्। अतीर्थकरकेवलिनः प्रागुक्ता षट्पञ्चाशद्वाग्योगनिरोधे कृते पञ्चपञ्चाशद्भवति। उच्छ्वासेऽपि च रुद्धे चतुःपञ्चाशत्। अत्र द्विपञ्चाशच्चतुःपञ्चाशद्वर्जेषु शेषेषु षट्सु प्रत्येकमेकैकः सामान्यमनुष्यवैलक्षण्येन विशेषभङ्गो लभ्यत इति सर्वसङ्ख्यया केवलिनां षड्भङ्गाः। तत्रैकचत्वारिंशद्वर्गेऽतीर्थकृत एको भङ्गः, शेषेषु तु पञ्चसु तीर्थकृतः। तदेवमुक्तानि केवलिनामुदीरणास्थानानि।

सम्प्रत्येकेन्द्रियाणामुच्यन्ते—एकेन्द्रियाणामुदीरणास्थानानि पञ्च—द्विचत्वारिंशत् पञ्चाशदेकपञ्चाशत् द्विपञ्चाशत्त्रिपञ्चाशच्चेति। तत्र तिर्यग्गतितिर्यगानुपूर्व्यौ स्थावरनामैकेन्द्रियजातिर्बादरसूक्ष्मयोरेकतरं पर्याप्तापर्याप्तयोरेकतरं दुर्भगम-

नादेयं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयः प्रागुक्तान्निर्ध्रुवोदीरणान्निस्त्रयस्त्रिंशत्सङ्ख्यान्निः सह मिश्रिता द्विचत्वारिंशद्भवति । अत्र त्रङ्गपञ्चकं, तथाहि—बादरसूक्ष्मान्यां प्रत्येकं पर्याप्तापर्याप्तान्यामयशःकीर्त्या सह चत्वारो त्रङ्गाः, बादरपर्याप्तयशःकीर्तिन्निश्चैक इति सूक्ष्मेणापर्याप्तेन च सह यशःकीर्तेरुदयो न त्रवति, तदत्रावाच्च नोदीरणेति तदाश्रितविकल्पात्त्रावः । एषा द्विचत्वारिंशदन्तरात्रगतावावसेया । ततः शरीरस्थस्यौदारिकशरीरौदारिकसङ्घातौदारिकबन्धनचतुष्टयहुण्डसंस्थानोपघातप्रत्येकसाधारणान्यतररूपनवकक्षेपे तिर्यगानुपूर्व्याश्चापनयने पञ्चाशद्भवति । अत्र त्रङ्गा दश, तथाहि—बादरपर्याप्तस्य प्रत्येकसाधारणान्यां यशःकीर्त्ययशःकीर्तिन्यां च चत्वारो त्रङ्गाः, बादरापर्याप्तस्य प्रत्येकसाधारणान्यामयशःकीर्तिनियतान्यां द्वौ, सूक्ष्मस्य च पर्याप्तापर्याप्तप्रत्येकसाधारणैरयशःकीर्तिनियतैश्चत्वार इति । बादरवायुकायिकस्य वैक्रियं कुर्वत औदारिकषट्कस्थाने वैक्रियषट्कमवगन्तव्यं, ततश्च तस्यापि पञ्चाशत एवोदीरणा त्रवति, केवलमिह बादरपर्याप्तप्रत्येकायशःकीर्तिपदैरेक एव त्रङ्गः । तैजसकायिकवायुकायिकयोर्हि साधारणयशःकीर्त्युदयात्रावात्तदुदीरणात्राव इति तदाश्रितत्रङ्गाप्राप्तिः । तदेवं पञ्चाशद्वर्गे सर्वसङ्ख्यैकादश त्रङ्गाः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते एकपञ्चाशद्भवति, अत्र च त्रङ्गाः षट्—बादरस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्तिपदैश्चत्वारः, सूक्ष्मस्य च प्रत्येकसाधारणान्यामयशःकीर्तिनियतान्यां द्वाविति । बादरवायुकायिकस्य च वैक्रियं कुर्वतः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते प्रागुक्ता पञ्चाशदेकपञ्चाशद्भवतीति । त्रङ्गश्चात्र प्राग्वदेक एवेति । सर्वसङ्ख्यैकपञ्चाशति सप्त त्रङ्गाः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते द्विपञ्चाशद्भवति । अत्रापि प्राग्वत् षड्त्रङ्गाः । यदा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते

आतपोद्योतयोरन्यतरस्मिन्नुदितेऽपि द्विपञ्चाशद्भवति, तत्रापि भङ्गाः षट्—बादरस्योद्योतेन सहितस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्तिपदैश्चत्वारः, आतपसहितस्य च प्रत्येकं यशःकीर्त्ययशःकीर्तिपदैर्द्वौ भङ्गाविति। बादरवायुकायिकस्य वैक्रियं कुर्वतः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते प्रागुक्ता एकपञ्चाशत् द्विपञ्चाशद्भवति, तत्र प्राग्वदेक एव भङ्गः। तैजसकायिकवायुकायिकयोर्ह्यातपोद्योतयशःकीर्तीनामुदयाभावाऽनुदीरणाभाव इति तदाश्रितभङ्गाप्राप्तिः। सर्वाग्रेण द्विपञ्चाशति त्रयोदश भङ्गाः। तथा प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासान्वितायां द्विपञ्चाशति आतपोद्योतान्यतरक्षेपे त्रिपञ्चाशद्भवति। अत्र ये प्रागातपोद्योतान्यतरयुक्तायां द्विपञ्चाशत्युक्तास्त एव षड्भङ्गाः। सर्वसङ्ख्यया चैकेन्द्रियाणां भङ्गा द्विचत्वारिंशत्।

द्वीन्द्रियाणामुदीरणास्थानानि षट्—द्विचत्वारिंशत् द्विपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति। तत्र तिर्यग्गतितिर्यगानुपूर्व्यौ द्वीन्द्रियजातित्रसनाम बादरनाम पर्याप्तापर्याप्तयोरेकतरं दुर्भगमनादेयं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयः प्रागुक्ताभित्रयस्त्रिंशत्सङ्ख्याभिर्ध्रुवोदीरणाभिः सह द्विचत्वारिंशद्भवति। एषा च द्विचत्वारिंशदपान्तराल्गताववसेया। अत्र च भङ्गत्रयी—अपर्याप्तकनामोदयेऽयशःकीर्त्या सहैको भङ्गः, पर्याप्तकनामोदये च यशःकीर्त्ययशःकीर्तिभ्यां द्वाविति। ततः शरीरस्थस्यौदारिकसप्तकहुण्डसंस्थानान्त्यसंहननोपघातप्रत्येकरूपैकादशप्रकृतिक्षेपे तिर्यगानुपूर्व्योश्चोत्सारणे द्विपञ्चाशद्भायते। अत्र च प्राग्वदेव भङ्गत्रयी। ततः शरीरपर्याप्त्या पर्याप्तस्य विहायोगतिपराघातप्रक्षेपे चतुःपञ्चाशत्, अत्र यशःकीर्त्ययशःकीर्तिभ्यां द्वौ भङ्गौ। ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते पञ्चपञ्चाशत्। अत्रापि प्राग्वद् द्वौ भङ्गौ। अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशत्।

अत्रापि प्राग्वद् द्वौ भङ्गौ । सर्वाग्रेण पञ्चपञ्चाशति चतुर्भङ्गी । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां पञ्चपञ्चाशति सुस्वरदुःस्वरयोरेकतरप्रक्षेपे षट्पञ्चाशत् । अत्र सुस्वरदुःस्वरयशःकीर्त्ययशःकीर्तिपदैश्चत्वारो भङ्गाः । यदा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते षट्पञ्चाशद्भवति । अत्र यशःकीर्त्ययशःकीर्तिभ्यां द्वौ भङ्गौ । सर्वाग्रेण षट्पञ्चाशति षड्भङ्गी । ततो भाषापर्याप्त्या पर्याप्तस्य स्वरसहितायां षट्पञ्चाशत्युद्योतनामक्षेपे सप्तपञ्चाशद्भवति । अत्र सुस्वरदुःस्वरयशःकीर्त्ययशःकीर्तिपदैश्चत्वारो भङ्गाः । सर्वे भङ्गा द्वीन्द्रियाणां द्वाविंशतिः । एवं त्रीन्द्रियचतुरिन्द्रिययोरपीयन्त्येवोदीरणास्थानानीयन्त एव च भङ्गा भावनीयाः । सर्वाग्रेण विकलेन्द्रियाणां भङ्गाः षट्षष्टिः ।

तिर्यक्पञ्चेन्द्रियाणां वैक्रियलब्धिविकलानां षडुदीरणास्थानानि—द्विचत्वारिंशत् द्विपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । तत्र तिर्यग्गतितिर्यगानुपूर्व्यौ पञ्चेन्द्रियजातित्रसबादरे पर्याप्तापर्याप्तयोरेकतरं सुभगादेययुगलदुर्भगानादेययुगलयोरेकतरयुगलं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयस्त्रयस्त्रिंशद्ध्रुवोदीरणाभिः सह द्विचत्वारिंशद्भवति । एषा चान्तरालगतौ द्रष्टव्या । अत्र भङ्गाः पञ्च, तत्र पर्याप्तकनामोदये सुभगादेययुगलदुर्भगानादेययुगलयशःकीर्त्ययशःकीर्तिपरावर्तनैश्चत्वारो भङ्गाः, अपर्याप्तकनामोदयस्थस्य तु दुर्भगानादेययशःकीर्तिभिरेक एवेति । इह सुभगादेययोर्दुर्भगानादेययोर्वा मिलितयोर्युगपदेवोदय इति पञ्चभङ्गसन्निधानं । अपरे त्वाहुः—नानयोर्युगपदुदयभावनियमोऽन्यथाऽपि दर्शनात् । ततः पर्याप्तकनामोदये वर्तमानस्य सुभगादेयदुर्भगानादेययशःकीर्त्ययशःकीर्तिभिरष्टभङ्गी, अपर्याप्तकनामोदये तु दुर्भगानादेययशःकीर्तिभिरेक एव भङ्गः । सर्वाग्रेण द्विचत्वारिंशति नव भङ्गाः । ततः

शरीरस्थस्यौदारिकसप्तकषण्णामन्यतमसंस्थानषण्णामन्यतमसंहननोपघातप्रत्येकलब्धीनामेकादशकक्षेपे तिर्यगानुपूर्व्याश्चोत्सारणे द्विपञ्चाशत्। तत्र नङ्गानां पञ्चचत्वारिंशं शतं। तथाहि—पर्याप्तस्य षड्भिः संस्थानैः षड्भिः संहननैः सुभगादेयदुर्भगानादेययुगलद्वयेन यशःकीर्त्ययशःकीर्तिभ्यां च परस्परं गुणने नङ्गानां चतुश्चत्वारिंशं शतं, अपर्याप्तस्य चान्त्यसंस्थानसंहननदुर्भगानादेययशःकीर्तिभिरेक इति। ये तु सुभगादेययोर्दुर्भगानादेययोर्वा केवलयोरप्युदयमिच्छन्ति तन्मतेन नङ्गानां द्विपञ्चाशति द्विशत्येकोननवत्यधिका ज्ञातव्या। तत्र पर्याप्तस्य षड्भिः संस्थानैः षड्भिः संहननैः सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां द्वे शते अष्टाशीत्यधिके, अपर्याप्तस्य तु प्रागुक्तस्वरूप एक इति। ततः शरीरपर्याप्त्या पर्याप्तस्य द्विपञ्चाशति पराघातप्रशस्ताप्रशस्तविहायोगत्यन्यतरप्रक्षेपे चतुःपञ्चाशत्। अत्र च यत्पर्याप्तानां प्राक् चतुश्चत्वारिंशं नङ्गशतमुक्तं, तदेव विहायोगतिद्विकेन द्विगुणितं कर्तव्यं। तथा च सत्यत्र नङ्गानां द्विशत्यष्टाशीत्यधिका, मतान्तरेण तु पञ्चशती षट्सप्तत्यधिका। ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासक्षेपे पञ्चपञ्चाशत्। अत्र प्रागिव नङ्गानां द्विशत्यष्टाशीत्यधिका। मतान्तरेण तु पञ्चशती षट्सप्तत्यधिका। अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशन्नवति। अत्रापि नङ्गानां द्विशत्यष्टाशीत्यधिका, मतान्तरेण तु पञ्चशती षट्सप्तत्यधिका। सर्वसङ्ख्यया पञ्चपञ्चाशति स्वमते नङ्गानां पञ्चशती षट्सप्तत्यधिका, मतान्तरेण तु द्विपञ्चाशदधिकान्येकादश शतानि। ततो भाषापर्याप्त्या पर्याप्तस्य सुस्वरदुःस्वरान्यतरप्रक्षेपे षट्पञ्चाशत्। तत्र स्वमतेनोच्छ्वासेन लब्धे द्वे शते अष्टाशीत्यधिके, स्वरद्विकेन गुणिते सती पञ्च शतानि षट्सप्तत्यधिकानि भवन्ति। मतान्तरेण तु नङ्गानां द्विपञ्चाशदधिकान्येकादश शतानि। अथवा

प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते षट्पञ्चाशत्, तत्र च स्वमते भङ्गानां त्रिंशत्यष्टाशीत्यधिका प्राग्वत्, मतान्तरेण च पञ्चशती षट्सप्तत्यधिका। सर्वसङ्ख्यया षट्पञ्चाशति स्वमतेन भङ्गानामष्टशती चतुःषष्ट्यधिका, मतान्तरेण तु सप्तदशशत्यष्टाविंशत्यधिका। ततः स्वरसहितायां षट्पञ्चाशति उद्योतनाम्नि क्षिप्ते सप्तपञ्चाशत्। तत्र भङ्गाः स्वरसहितायां षट्पञ्चाशति मतद्वयेन यावन्त उक्तास्तावन्त एव ५७६।११५२। तथा तेषामेव तिर्यक्पञ्चेन्द्रियाणां वैक्रियं कुर्वतामुदीरणास्थानानि पञ्च भवन्ति—एकपञ्चाशत् त्रिपञ्चाशच्चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति। तत्र वैक्रियसप्तकमाद्यसंस्थानमुपघातं प्रत्येकमिति प्रकृतिदशकमपनीततिर्यगानुपूर्वीकं तिर्यक्पञ्चेन्द्रिययोग्यचित्वारिंशति क्षिप्तमेकपञ्चाशत्प्रकृतिवर्गं निष्पादयति। अत्र सुभगादेययुगलदुर्भगानादेययुगलयशःकीर्त्ययशःकीर्तिपदैश्चत्वारो भङ्गाः। मतान्तरेण तु सुभगदुर्भगान्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च प्रत्येकेन सहाष्टौ भङ्गाः। ततः शरीरपर्याप्त्या पर्याप्तस्य पराघातप्रशस्तविहायोगतिक्षेपे त्रिपञ्चाशत्। अत्र प्राग्वत् स्वमते चत्वारो भङ्गाः, मतान्तरे त्वष्टौ। ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासनाम्नि प्रक्षिप्ते चतुःपञ्चाशत्। अत्रापि स्वमते प्राग्वच्चतुर्भङ्गी, मतान्तरे त्वष्टभङ्गी। अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते चतुःपञ्चाशत्। अत्र स्वमते चतुर्भङ्गी, मतान्तरेण त्वष्टभङ्गी। सर्वाग्रेण चतुःपञ्चाशति स्वमतेनाष्टौ, मतान्तरेण तु षोडश भङ्गाः। ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां चतुःपञ्चाशति स्वरप्रक्षेपे पञ्चपञ्चाशत्। अत्रापि स्वमते भङ्गाश्चत्वारः, मतान्तरेऽष्टौ। सर्वाग्रेण पञ्चपञ्चाशत्यष्टौ भङ्गाः स्वमते, मतान्तरे तु षोडश। ततः स्वरसहितायां पञ्चपञ्चाशत्युद्योते क्षिप्ते षट्पञ्चाशत्। अत्रापि भङ्गाः स्वमते चत्वारः, मतान्तरेऽष्टौ। सर्वस-

ङ्खया वैक्रियं कुर्वतां तिर्यक्पञ्चेन्द्रियाणां नङ्का अष्टाविंशतिः, मतान्तरेण षट्पञ्चाशत् । सर्वतिर्यक्पञ्चेन्द्रियाणां स्वमतेन नङ्काश्चतुर्विंशतिशतानि द्व्यशीत्यधिकानि, मतान्तरेणैकोनपञ्चाशन्नतानि द्विषष्ट्यधिकानि ।

अथ मनुष्याणामुदीरणास्थानान्युच्यन्ते—तत्र केवलिनां प्रागेवोक्तानि, अन्येषां तु पञ्च,तथाहि—द्विचत्वारिंशत् द्विपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । एतानि सर्वाण्यपि यथा तिर्यक्पञ्चेन्द्रियाणां प्रागुक्तानि तथैव नाव्यानि । नवरं तिर्यग्गतितिर्यगानुपूर्व्योः स्थाने मनुष्यगतिमनुष्यानुपूर्व्यौ वाच्ये । पञ्चपञ्चाशत् षट्पञ्चाशच्चोद्योतरहिता वाच्या, वैक्रियाहारकलब्धिशालिसंयतान् विहायान्येषां मनुष्याणामुद्योतोदयाभावात् । नङ्का अपि सर्वत्रोद्योतविनाकृतास्तथैव मतद्वयेऽपि वाच्याः । तथाहि—स्वमतेन द्विचत्वारिंशति पञ्चकं, द्विपञ्चाशति पञ्चचत्वारिंशं शतं, चतुःपञ्चाशति द्विशत्यष्टाशीत्यधिका, पञ्चपञ्चाशत्यपि द्विशत्यष्टाशीत्यधिका, षट्पञ्चाशति पञ्चशती षट्सप्तत्यधिका । परमते तु यथाक्रमं नव, द्वे शते एकोननवत्यधिके, पञ्च शतानि षट्सप्तत्यधिकानि, पुनरपि पञ्च शतानि षट्सप्तत्यधिकानि, एकादश शतानि च द्विपञ्चाशदधिकानि । वैक्रियं कुर्वतामपि मनुष्याणामुदीरणास्थानानि पञ्च भवन्ति, तथाहि—एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । तत्रैकपञ्चाशत्त्रिपञ्चाशच्च यथा प्राग्वैक्रियकारितिर्यक्पञ्चेन्द्रियाणामुक्ता तथाऽत्रापि ज्ञेया । चतुःपञ्चाशत्युच्छ्वाससहितायां प्राग्वत् स्वमते चतुर्नङ्की, मतान्तरे त्वष्टनङ्की । उत्तरवैक्रियं कुर्वतां च चारित्रिणामुद्योतनामोदयमेति नान्येषां । ततस्तत्सहितायां चतुःपञ्चाशति शुभ एवैको नङ्कः, चारित्रिणां दुर्भगानादेययशःकीर्त्युदयाभावात् । सर्वाग्रेण चतुःपञ्चाशति स्वमते पञ्चनङ्की, मतान्तरेण तु नवनङ्की । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहि-

तायां चतुःपञ्चाशति सुस्वरप्रक्षेपे पञ्चपञ्चाशत्। अत्रापि प्राग्वत् स्वमतेन चतुर्नवकी, मतान्तरेण त्वष्टनवकी। अथवा संयतानां स्वरेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशत्। अत्रैकः शुभ एव नवकः। सर्वाग्रेण पञ्चपञ्चाशति स्वमते पञ्चनवकी, मतान्तरे तु नवनवकी। सुस्वरसहितायां पञ्चपञ्चाशत्युद्योतक्षेपे षट्पञ्चाशत्, अस्यां चैक एव प्रशस्तो नवकः। सर्वाग्रेण वैक्रियमनुष्याणां स्वमतेनैकोनविंशतिर्नवकाः, मतान्तरेण पञ्चत्रिंशत्। अथाहारकं कुर्वतामुदीरणास्थानान्युच्यन्ते—आहारकसंयतानामुदीरणास्थानानि पञ्च, तथाहि—एकपञ्चाशत्त्रिपञ्चाशच्चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति। तत्राहारकसप्तकमाद्यसंस्थानमुपघातं प्रत्येकमिति प्रकृतिदशकमपनीतमनुष्यानुपूर्वीकं मनुष्यगतिप्रायोग्यद्विचत्वारिंशति क्षिप्तमेकपञ्चाशत्प्रकृतिवर्गनिष्पादकं। अत्र च सर्वाण्यपि पदानि प्रशस्तानीत्येक एव नवकः। ततः शरीरपर्याप्त्या पर्याप्तस्य प्रशस्तविहायोगतिपराघातप्रक्षेपे त्रिपञ्चाशत्, नवकोऽत्राप्येक एव। ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते चतुःपञ्चाशत्। अत्राप्येक एव नवकः। अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते चतुःपञ्चाशत्। अत्राप्येक एव नवकः। सर्वसङ्ख्यया चतुःपञ्चाशति द्वौ नवकौ। ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां चतुःपञ्चाशति सुस्वरप्रक्षेपे पञ्चपञ्चाशन्नवति। नवकोऽत्राप्येक एव। अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशत्। अत्राप्येक एव नवकः। सर्वाग्रेण पञ्चपञ्चाशति द्वौ नवकौ। ततो भाषापर्याप्त्या पर्याप्तस्य स्वरसहितायां पञ्चपञ्चाशत्युद्योते क्षिप्ते षट्पञ्चाशन्नवति। नवकोऽत्राप्येक एव। सर्वसङ्ख्ययाऽऽहारकशरीरिणां सप्त नवकाः। तदेवं मनुष्यान-

पेक्ष्य सामान्यमनुष्यवैक्रियशरीर्याहारकशरीरिकेवलिनां ञङ्गाः सर्वसङ्ख्यया त्रयोदश शतानि चतुस्त्रिंशदधिकानि । परमतेन तु षड्विंशतिशतानि पञ्चाशदधिकानि ।

देवानामुदीरणास्थानानि षट्—द्विचत्वारिंशत् एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । तत्र देवगतिदेवानुपूर्व्यौ पञ्चेन्द्रियजातिः त्रसबादरपर्याप्तानि सुञ्गादेययोर्दुर्ञ्गानादेययोश्चैकतरयुगलं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयो ध्रुवोदीरणाञ्जिस्त्रयस्त्रिंशत्सङ्ख्याञ्जिर्भिश्रिता द्विचत्वारिंशद्वर्गनिष्पादिका ञवन्ति । अत्र सुञ्गादेययुगलदुर्ञ्गानादेययुगलयशःकीर्त्ययशःकीर्तिञ्जिश्चत्वारो ञङ्गाः,मतान्तरेण तु सुञ्गदुर्ञ्गाञ्यामादेयानादेयाञ्यां यशःकीर्त्ययशःकीर्तिञ्यां चाष्टौ ञङ्गाः । ततः शरीरस्थस्य वैक्रियसप्तकाद्यसंस्थानोपघातप्रत्येकलक्षणप्रकृतिदशकस्य क्षेपे देवानुपूर्व्याश्चापनयने एकपञ्चाशञ्ञवति । अत्रापि प्राग्वत्स्वमतेन चतुर्ञङ्गी, मतान्तरेणाष्टञङ्गी । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघातप्रशस्तविहायोगतिक्षेपे त्रिपञ्चाशत् । अत्रापि प्राग्वत्स्वमतेन चतुर्ञङ्गी, मतान्तरेणाष्टञङ्गी, देवानामप्रशस्तविहायोगत्युदयाञ्जावात् तदाश्रितञङ्गाप्राप्तिः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते चतुःपञ्चाशत् । अत्रापि स्वमते चतुर्ञङ्गी, मतान्तरेणाष्टञङ्गी । यदा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते ञद्योतनाञ्नि तूदिते चतुःपञ्चाशत् । अत्रापि स्वमते चत्वारो, मतान्तरे त्वष्टौ ञङ्गाः । सर्वसङ्ख्यया चतुःपञ्चाशति स्वमतेनाष्टौ, मतान्तरेण च षोडश ञङ्गाः । ततो ञाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां चतुःपञ्चाशति सुस्वरे क्षिप्ते पञ्चपञ्चाशत् । अत्रापि स्वमते चत्वारो, मतान्तरे त्वष्टौ ञङ्गाः । यदा प्राणापानपर्याप्तस्य स्वरस्यानुदये ञद्योतनाञ्नस्तूदये पञ्चपञ्चाशत् । अत्रापि स्वमते चत्वारो मतान्तरे त्वष्टौ

ऽङ्गाः । सर्वाग्रेण पञ्चपञ्चाशति स्वमतेनाष्टौ मतान्तरेण षोडश । ततो भाषापर्याप्त्या पर्याप्तस्य सुस्वरसहितायां पञ्चपञ्चाशत्युद्योतक्षेपे षट्पञ्चाशत् । अत्रापि स्वमते चत्वारो मतान्तरेऽष्टौ ऽङ्गाः । सर्वसङ्ख्यया देवानां स्वमतेन द्वात्रिंशदङ्गाः मतान्तरेण चतुःषष्टिः ।

नैरयिकाणामुदीरणास्थानानि पञ्च, तथाहि—द्विचत्वारिंशदेकपञ्चाशत्त्रिपञ्चाशच्चतुःपञ्चाशत् षट्पञ्चाशच्चेति । तत्र नरकगतिनरकानुपूर्व्यौ पञ्चेन्द्रियजातित्रसबादरपर्याप्तदुर्भगानादेययशःकीर्तय इत्येता नव प्रकृतयस्त्रयस्त्रिंशद्ध्रुवोदीरणाभिर्मिश्रिता द्विचत्वारिंशद्भवति । अत्र सर्वाणि पदान्यप्रशस्तानीत्येक एव ऽङ्गः । ततः शरीरस्थस्य वैक्रियसप्तकदुष्टसंस्थानोपघातप्रत्येकलब्धिदशप्रकृतिक्षेपे नरकानुपूर्व्यपनयने एकपञ्चाशत् । अत्राप्येक एव ऽङ्गः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाताप्रशस्तविहायोगतिप्रक्षेपे त्रिपञ्चाशत् । अत्राप्येक एव ऽङ्गः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते चतुःपञ्चाशत् । अत्राप्येक एव ऽङ्गः । ततो भाषापर्याप्त्या पर्याप्तस्य दुःस्वरे क्षिप्ते पञ्चपञ्चाशत् । अत्राप्येक एव ऽङ्गः । सर्वसङ्ख्यया नैरयिकाणां पञ्च ऽङ्गाः । तदेवमुक्तानि नामकर्मण उदीरणास्थानानि ।

अथैतान्येव गुणस्थानकेषु योजयन्नाह—"गुणिसु णामस्स" इत्यादि, मिथ्यादृष्टिप्रभृतिषु सयोगिकेवलिपर्यन्तेषु गुणिषु गुणस्थानकेषु यथासङ्ख्यं नवादिसङ्ख्यान्युदीरणास्थानानि भवन्ति । तत्र मिथ्यादृष्टेर्नवोदीरणास्थानानि । तथाहि—द्विचत्वारिंशत् १ पञ्चाशत् २ एकपञ्चाशत् ३ त्रिपञ्चाशत् ४ चतुःपञ्चाशत् ५ पञ्चपञ्चाशत् ६ षट्पञ्चाशत् ७ सप्तपञ्चाशत् ८ चेति । अमूनि च सर्वाण्यपि मिथ्यादृष्टीनेकेन्द्रियादीनधिकृत्य स्वयं भाव्यानि । सासादनसम्यग्दृष्टेः सप्तोदी-

रणास्थानानि । तथाहि—द्विचत्वारिंशत् पञ्चाशत् एकपञ्चाशत् द्विपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । तत्र बादरैकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवानां सासादनसम्यग्दृशामन्तरालगतौ द्विचत्वारिंशदवसेया । तथा पञ्चाशदेकेन्द्रियाणां शरीरस्थानां । देवानां शरीरस्थानामेकपञ्चाशत् । विकलेन्द्रियतिर्यक्पञ्चेन्द्रियनराणां शरीरस्थानां द्विपञ्चाशत् । पर्याप्तानां सुरनैरयिकाणां सासादनसम्यक्त्वस्थानां पञ्चपञ्चाशत् । तिर्यक्पञ्चेन्द्रियमनुष्यदेवानां पर्याप्तानां षट्पञ्चाशत् । पर्याप्ततिर्यक्पञ्चेन्द्रियाणां उद्योतोदयिनां सप्तपञ्चाशत् । सम्यग्मिथ्यादृष्टेस्त्रीण्युदीरणास्थानानि—पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशत् चेति । तत्र देवनैरयिकाणां पञ्चपञ्चाशत् । तिर्यग्नृदेवानां षट्पञ्चाशत् । तिर्यक्पञ्चेन्द्रियाणामुद्योतोदयिनां सप्तपञ्चाशत् । अविरतसम्यग्दृष्टेरष्टावुदीरणास्थानानि द्विचत्वारिंशदेकपञ्चाशदादीनि सप्त च । तत्र नैरयिकसुरतिर्यक्पञ्चेन्द्रियनराणां द्विचत्वारिंशत् । देवनैरयिकाणामेकपञ्चाशत् । तिर्यक्पञ्चेन्द्रियमनुष्याणां द्विपञ्चाशत् । नैरयिकसुरवैक्रियतिर्यग्नराणां त्रिपञ्चाशत् । देवनैरयिकतिर्यक्पञ्चेन्द्रियवैक्रियतिर्यग्नराणां चतुःपञ्चाशत् । एषामेव पञ्चपञ्चाशदपि । देवतिर्यक्पञ्चेन्द्रियमनुष्याणां षट्पञ्चाशत् । तिर्यक्पञ्चेन्द्रियाणामुद्योतोदयिनां सप्तपञ्चाशत् । देशविरतस्योदीरणास्थानानि षट्—एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । तत्रैकपञ्चाशत्त्रिपञ्चाशच्चतुःपञ्चाशत्पञ्चपञ्चाशच्च तिर्यङ्मनुष्याणां वैक्रियशरीरस्थानामवसेया । तेषामेव स्वभावस्थानां वैक्रियशरीरिणां च षट्पञ्चाशत् । सप्तपञ्चाशत्तिर्यक्पञ्चेन्द्रियाणामुद्योतसहितानां । प्रमत्तसंयतानां पञ्चोदीरणास्थानानि—एकपञ्चाशत्त्रिपञ्चाशदादीनि चत्वारि च । पञ्चाप्येतानि वैक्रियशरीरिणामाहारकशरीरिणां वा । षट्पञ्चाशत्त्वौदारिकस्थानामपि ।

अप्रमत्तसंयतानां पञ्चपञ्चाशत् षट्पञ्चाशच्चेति द्वे उदीरणास्थाने । तत्र षट्पञ्चाशदौदारिकस्थानां, वैक्रियाहारकस्थानामपि केषाञ्चित्संयतानां सर्वपर्याप्त्या पर्याप्तानां कियत्कालमप्रमत्तत्वमपि प्राप्यत इति तेषां द्वे उदीरणास्थाने । अपूर्वकरणादिषु पञ्चसु गुणस्थानेष्वेकं षट्पञ्चाशल्लक्षणमुदीरणास्थानं । तच्चौदारिकस्थानामवसेयं । एकस्मिन् सयोगिकेवलिगुणस्थानकेऽष्टावुदीरणास्थानानि—एकचत्वारिंशत् द्विचत्वारिंशत् द्विपञ्चाशदादीनि षट् चेति । एतानि च प्रागेव भावितानि । तदेवं गुणस्थानेषु नाम्न उदीरणास्थानानि भावितानि । अथ कस्मिन्नुदीरणास्थाने कति भङ्गाः प्राप्यन्त इति संचिकटयिषुराह—"ठाणक्कमेण" इत्यादि, स्थानक्रमेणैकचत्वारिंशदाद्युदीरणास्थानक्रमेण भङ्गा अपि वक्ष्यमाणरीत्या ज्ञेयाः । तथाहि—एकचत्वारिंशत्येको भङ्गः, स चातीर्थकृत्केवलिनः । द्विचत्वारिंशति त्रिंशद्भङ्गाः, तत्र नैरयिकानधिकृत्यैकः, एकेन्द्रियानधिकृत्य पञ्च, विकलेन्द्रियानधिकृत्य प्रत्येकं त्रिकप्राप्तेर्नव, तिर्यक्पञ्चेन्द्रियान्मनुष्याँश्चाधिकृत्य पञ्च पञ्च, जिनमधिकृत्यैकः, सुरानधिकृत्य चत्वार इति । मतान्तरेण तु तिर्यक्पञ्चेन्द्रियान्मनुष्याँश्चाश्रित्य नव नव, देवानधिकृत्य चाष्टौ भङ्गाः प्राप्यन्त इति द्विचत्वारिंशति द्विचत्वारिंशद्भङ्गाः । पञ्चाशत्येकादश भङ्गाः, ते चैकेन्द्रियेष्वेव प्राप्यन्तेऽन्यत्र पञ्चाशतोऽप्राप्तेः । एकपञ्चाशत्येकविंशतिर्भङ्गाः । तत्र नैरयिकेष्वेकः, एकेन्द्रियेषु सप्त, वैक्रियतिर्यक्पञ्चेन्द्रियनरेषु चत्वारश्चत्वारः, आहारकशरीरिसंयतेष्वेकः, देवेषु चत्वार इति । मतान्तरेण तु वैक्रियतिर्यङ्मनुष्यदेवेषु प्रत्येकमष्टावष्टौ भङ्गाः प्राप्यन्त इति त्रयस्त्रिंशद्भङ्गाः । "सबार तिसई य त्ति" सप्तादश द्वादशाधिका त्रिशती भङ्गानां द्विपञ्चाशत्यवसेया। तत्रैकेन्द्रियानधिकृत्य त्रयोदश, विकलेन्द्रियेषु प्रत्येकं त्रिकत्रिकप्राप्तेर्नव भवन्ति, तिर्यक्पञ्चेन्द्रियेषु पञ्चचत्वारिंशं शतं,

मनुष्येष्वपि पञ्चचत्वारिंशं शतमिति । मतान्तरेण तु नङ्गानां षट्शती द्विपञ्चाशति वेदितव्या, तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु च प्रत्येकं नङ्गानामेकोननवत्यधिकशतत्रयप्राप्तेः । त्रिपञ्चाशत्येकविंशतिर्नङ्गाः, तत्र नैरयिकेष्वेकः, एकेन्द्रियेषु षट्, वैक्रिय-तिर्यक्पञ्चेन्द्रियेषु चत्वारः, वैक्रियमनुष्येष्वपि चत्वारः, आहारकशरीरिणस्त्वधिकृत्यैकः, तीर्थकरेऽप्येकः, देवेषु च चत्वार इति । अत्रापि मतान्तरेण वैक्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवेषु प्रत्येकमष्टावष्टौ नङ्गा इति त्रिपञ्चाशति त्रयस्त्रिंशन्नङ्गाः । चतुःपञ्चाशति नङ्गानां षडुत्तराणि षट् शतानि, तथाहि—नैरयिकेष्वेकः, विकलेन्द्रियेषु प्रत्येकं द्विकद्विकप्राप्तेः षट्, स्वभावस्थेषु तिर्यक्पञ्चेन्द्रियमनुष्येषु प्रत्येकं द्वे शते अष्टाशीत्यधिके, वैक्रियतिर्यक्पञ्चेन्द्रियेष्वष्टौ, वैक्रियमनुष्येषु चत्वारः, संयतान् वैक्रियशरीरिण आश्रित्योद्योतेन सहैकः, आहारकशरीरिषु संयतेषु द्वौ, देवेष्वष्टाविति । मतान्तरे तु प्राकृततिर्यक्पञ्चेन्द्रियेषु पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियतिर्यक्पञ्चेन्द्रियेषु षोडश, सामान्यमनुष्येषु पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियमनुष्येषु नव, देवेषु च षोडश नङ्गाः प्राप्यन्ते, शेषं तु तथैवेति चतुःपञ्चाशति द्व्यधिकानि द्वादश शतानि । पञ्चपञ्चाशति नङ्गानां नव शतान्येकाधिकानि । तथाहि—नैरयिकेष्वेकः, द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियेषु प्रत्येकं चतुष्कप्राप्तेर्द्वादश, स्वभावस्थेषु तिर्यक्पञ्चेन्द्रियेषु पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियशरीरिष्वष्टौ, मनुष्येषु स्वभावस्थेषु द्वे शते अष्टाशीत्यधिके, वैक्रियशरीरिषु चत्वारः वैक्रियसंयतेषूद्योतेन सहैकः, आहारकशरीरिषु द्वौ, तीर्थकरे एकः, देवेष्वष्टाविति । मतान्तरे तु तिर्यक्पञ्चेन्द्रियेषु नङ्गानां द्विपञ्चाशं शतैकादशकं, वैक्रियतिर्यक्पञ्चेन्द्रियेषु षोडशकं, मनुष्येषु स्वभावस्थेषु षट्सप्तत्यधिकं शतपञ्चकं, वैक्रियमनुष्येषु नवकं, देवेषु च षोडशकं प्राप्यते, शेषं तथैवेति पञ्चपञ्चाशति पञ्चा-

शीत्यधिकानि सप्तदश शतानि । षट्पञ्चाशति भङ्गानां चतुर्दशशत्येकोनसप्तत्यधिका । तथाहि—विकलेन्द्रियेषु प्रत्येकं षड्भङ्गप्राप्तेरष्टादश, तिर्यक्पञ्चेन्द्रियेषु स्वभावस्थेषु अष्टशती चतुःषष्ट्यधिका, वैक्रियशरीरिषु चत्वारः, मनुष्येषु पञ्चशती षट्सप्तत्यधिका, वैक्रियशरीरिसंयतेषूद्योतेन सहैकः, आहारकशरीरिष्वेकः, तीर्थंकरेऽप्येकः, देवेषु च चत्वार इति । मतान्तरे तु तिर्यक्पञ्चेन्द्रियेषु सप्तदश शतान्यष्टाविंशत्यधिकानि, वैक्रियतिर्यक्पञ्चेन्द्रियेष्वष्टौ, मनुष्येषु द्विपञ्चाशदधिकैकादश शतानि, देवेषु चाष्टौ भङ्गाः प्राप्यन्ते, शेषं तथैवेति षट्पञ्चाशत्येकोनत्रिंशच्छतानि सप्तदशाधिकानि भङ्गानां भवन्ति । सप्तपञ्चाशति भङ्गानां पञ्चशत्येकोननवत्यधिका । तथाहि—विकलेन्द्रियेषु प्रतिभेदं चतुष्कप्राप्तेर्द्वादश, तिर्यक्पञ्चेन्द्रियेषु पञ्चशती षट्सप्तत्यधिका, तीर्थंकरे चैक इति । अत्रापि मतान्तरेण तिर्यक्पञ्चेन्द्रियेषु द्विपञ्चाशदधिकैकादशशतभङ्गप्राप्तेः सर्वाग्रेण सप्तपञ्चाशति पञ्चषष्ट्यधिकैकादशशती भङ्गानां भवति ॥ २५–२६–२७ ॥

अथ गतीराश्रित्य स्थानप्ररूपणामाह—

पण णव णवग छक्काणि गइसु ठाणाणि सेसकम्माणं । एगेगमेव णेयं साहित्तेगेगपगईउ ॥ २८ ॥

व्याख्या—निरयगतावुदीरणास्थानानि पञ्च । तथाहि—द्विचत्वारिंशदेकपञ्चाशत् त्रिपञ्चाशदादीनि त्रीणि च । तिर्यग्गतावेकचत्वारिंशद्भङ्गानि नवाप्युदीरणास्थानानि । मनुजगतावपि सयोगिकेवल्यादीनाश्रित्य पञ्चाशद्भङ्गानि नव । देवगतावपि द्विचत्वारिंशदेकपञ्चाशत्त्रिपञ्चाशदादीनि चत्वारि चेति षट् । एतानि सर्वाण्यपि प्राग्भावितान्येव । तदेवमुक्तानि प्रपञ्चेन नाम्न उदीरणास्थानानि । अथ शेषकर्मणां तान्याह—"सेसकम्माणं" इत्यादि, शेषकर्मणां ज्ञानावरणवेदनीया-

युर्गोत्रान्तरायाणामुदीरणास्थानमेकैकमवसेयं । तथाहि—ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मकमेकैकमुदीरणास्थानं । वेदनीयायुर्गोत्राणां त्वनुद्भूयमानैकैकप्रकृत्यात्मकं । न ह्यमीषां द्वित्र्यादिप्रकृतयो युगपदुदीर्यन्ते, युगपदुदयाभावात् । एतच्चामीषामेकैकमुदीरणास्थानं एकैकप्रकृत्युदीरणायाः स्वामित्वं 'साधयित्वा' निश्चित्य गुणस्थानकेषु निरयादिगतिषु च स्वयमेव ज्ञेयम् ॥ २८ ॥

तदेवमुक्ता प्रकृत्युदीरणा, अथ स्थित्युदीरणाऽभिधेया । तत्र चैतेऽर्थाधिकाराः—लक्षणं भेदः साद्यनादिप्ररूपणाऽद्धाच्छेदः स्वामित्वं चेति । तत्र लक्षणभेदौ प्रतिपादयन्नाह—

संपत्तिए य उदए पउंगउं दिस्सए उईरणा सा । सेवीकाठिइहिंतो जाहिंतो तत्तिगा एसा ॥ २९ ॥

व्याख्या—इह द्विविध उदयः संप्राप्त्युदयोऽसंप्राप्त्युदयश्च । तत्र यस्य कर्मदलिकस्य कालक्रमेणोदयहेतुद्रव्यक्षेत्रादिसामग्रीसंपत्तावनुद्भूयमानस्योदयः स संप्राप्त्युदयः, यत्पुनरकालप्राप्तं कर्मदलिकमुदीरणाख्यवीर्यविशेषेणाकृष्य कालप्राप्तेन दलिकेन सहानुद्भूयते सोऽसंप्राप्त्युदयः । एषैव चोदीरणा । तथा चाह—या स्थितिरकालप्राप्तापि 'प्रयोगतः' उदीरणाप्रयोगेण संप्राप्त्युदये प्रक्षिप्ता दृश्यते केवलचक्षुषा सा स्थित्युदीरणा, लक्षणनिर्देशोऽयम् । सेवीकास्थितिभ्य उदीरणाप्रायोग्याभ्यो 'यकाभ्यो' यावतीभ्य आवलिकाद्विकहीनोत्कृष्टस्थितिसमयप्रमाणाभ्यः प्रयोगविशेषेणाकृष्य संप्राप्त्युदये दीयते "तत्तिग त्ति" तावती तावद्भेदप्रमाणा एषा स्थित्युदीरणा । अयं भावः—इह भेदकल्पनायोग्याः स्थितयः पूर्वपुरुषपरिभाषया सेवीका इत्युच्यते, सेव्यन्ते भेदकल्पनां प्रत्याश्रीयन्ते इति सेवीका इत्यौणादिकव्युत्पत्तेः । ताश्च

द्विधा—उदीरणायाः प्रायोग्या अप्रायोग्याश्च । तत्र बन्धसङ्क्रमोदयावलिकात्रयगता अप्रायोग्याः, करणासाध्यत्वात् । शेषाश्च सर्वा अपि प्रायः प्रायोग्याः । तत्रोदये सति यासां प्रकृतीनामुत्कृष्टबन्धसंज्ञवस्तासामुत्कर्षत आवलिकाद्विकहीना सर्वाप्युत्कृष्टा स्थितिरुदीरणाप्रायोग्योदयोत्कृष्टबन्धानां प्रकृतीनां बन्धावलिकात्यय एवोदयावलिकाबहिर्वर्तिनीनां सर्वासामेवोदीरणाप्रवृत्तेः । अनुदयोत्कृष्टबन्धानां तु स्थितय उदीर्यमाणस्थितिदलिकसहज्ञाविकालप्राप्तदलिकानुज्ञवसंज्ञवानतिक्रमेणोदीरणाप्रायोग्याः आवलिकाद्विकहीनायाश्चोत्कृष्टस्थितेर्यावन्तः समयास्तावन्त उदीरणाया ज्ञेदाः । तथाहि—उदयावलिकाया उपरिवर्तिनी समयमात्रा स्थितिः कस्यचिदुदीरणाप्रायोग्या यस्य तावत्येव शेषीज्ञूता तिष्ठति । एवं कस्यापि द्विसमयमात्रा, कस्यापि त्रिसमयमात्रा । एवं तावद्वाच्यं यावदावलिकाद्विकहीना कस्याप्युत्कृष्टा स्थितिरिति । ज्ञेदनिर्देशोऽयम् ॥ २९ ॥

अथ साद्यनादिप्ररूपणा कार्या, सा द्विधा—मूलप्रकृतिविषयोत्तरप्रकृतिविषया च । तत्राद्यं साद्यनादिप्ररूपणार्थमाह—

मूलठिई अजहन्ना मोहस्स चउव्विहा तिहा सेसा । वेयणिआउणुहा सेसविगप्पा य सव्वासिं ॥ ३० ॥

व्याख्या—इह मूलस्थितिशब्दौ द्वावपि लुप्तषष्ठीविज्ञक्तिकौ । ततोऽयमर्थः—मूलप्रकृतीनां मध्ये मोहस्य स्थितेरुदीरणाऽजघन्या चतुर्विधा—सादिरनादिर्ध्रुवाऽध्रुवा चेति । तथाहि—मोहनीयस्य जघन्या स्थित्युदीरणा सूक्ष्मसंपरायरूपकस्य स्वगुणस्थाने समयाधिकावलिकाशेषे ज्ञवति, ततोऽन्यत्र सर्वत्राप्यजघन्या, सा चोपशान्तमोहे न ज्ञवति, ततः प्रतिपाते च ज्ञवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाऽज्ञव्यानां, अध्रुवा ज्ञव्यानां । शेषा ज्ञानावरणदर्शनावरण-

नामगोत्रान्तरायाणां स्थित्युदीरणाऽजघन्या त्रिधा—अनादिर्ध्रुवाऽध्रुवा चेति। तथाहि—ज्ञानावरणदर्शनावरणान्तरायाणां जघन्या स्थित्युदीरणा क्षीणकषायस्य स्वगुणस्थाने समयाधिकावलिकाशेषे भवति, शेषकालं त्वजघन्या, सा चानादिः सदैव भावात्। ध्रुवाध्रुवे पूर्ववत्। नामगोत्रयोस्तु जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये, सा च सादिरध्रुवा च, ततोऽन्या सर्वाऽप्यजघन्या, सा चानादिः सदा भावात्, ध्रुवाध्रुवे पूर्ववत्। वेदनीयायुषोरजघन्या स्थित्युदीरणा त्रिधा, तथाहि—वेदनीयस्य जघन्या स्थित्युदीरणैकेन्द्रियस्य सर्वाल्पस्थितिसत्कर्मणो लभ्यते, ततस्तस्यैव समयान्तरे वर्धमान-स्थितिसत्कर्मणोऽजघन्या, ततः पुनरपि जघन्येति जघन्याऽजघन्या च सादिरध्रुवा च, आयुषोऽजघन्या स्थित्युदीरणा पर्यन्तावलिकायां न भवति, परभवोत्पत्तिप्रथमसमये च भवतीति सादिरध्रुवा च। तथा सर्वासां प्रकृतीनां शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणा त्रिधा सादयोऽध्रुवाश्चेति। तथाहि—सर्वेषामप्यायुर्वर्जकर्मणामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टे-रुत्कृष्टसंक्लेशवतः कियत्कालं प्राप्यते, समयान्तरेऽध्यवसायपरावृत्तेः, तस्याप्यनुत्कृष्टा समयान्तरे, भूयोऽप्युत्कृष्टा संक्लेश-विशुद्धयोः प्रायः प्रतिसमयं परावृत्तेः। ततो द्वे अपि साद्यध्रुवे। जघन्याया त्रिप्रकारत्वं च प्रागेव भावितं। आयुषां तु विकल्पत्रयेऽपि युक्तिः प्रायः प्राक्तन्येवावसेया ॥ ३० ॥

तदेवं कृता मूलप्रकृतिविषया साद्यनादिप्ररूपणा, अथोत्तरप्रकृतिविषयां तां चिकीर्षुराह—

मिच्छत्तस्स चउद्धा अजहन्ना धुवउदीरगाण तहा। सेसविगप्पा दुविहा सव्वविगप्पा य सेसाणं ॥ ३१ ॥

व्याख्या—मिथ्यात्वस्याजघन्या स्थित्युदीरणा चतुर्धा—साद्यनादिध्रुवाध्रुवभेदात्। तत्र मिथ्यादृष्टेराद्यसम्यक्त्वमुत्पादयतो

मिथ्यात्वस्याद्यस्थितौ समयाधिकावलिकाशेषायां जघन्या स्थित्युदीरणा, सा च सादिरध्रुवा च। सम्यक्त्वाच्च पततोऽजघन्या, सा च सादिः। तत्स्थानमप्राप्तस्यानादिः। ध्रुवाध्रुवे अभव्याभव्यापेक्षया। तथा ध्रुवोदीरणानां ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकतैजससप्तकवर्णादिविंशतिस्थिरास्थिरशुभाशुभागुरुलघुनिर्माणाख्यानामजघन्या स्थित्युदीरणा त्रिधाऽनादिध्रुवाध्रुवभेदात्। तथाहि—ज्ञानावरणान्तरायपञ्चकदर्शनावरणचतुष्काणां क्षीणकषायस्य स्वगुणस्थाने समयाधिकावलिकाशेषे जघन्या स्थित्युदीरणा, सा च सादिरध्रुवा च। शेषा सर्वाऽप्यजघन्या, सा चानादिः, सदैव भावात्। ध्रुवाध्रुवे पूर्ववत्। तैजससप्तकादित्रयस्त्रिंशन्नामप्रकृतीनां जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये, सा च सादिरध्रुवा च। ततोऽन्या सर्वाऽप्यजघन्या, सा चानादिः। ध्रुवाध्रुवे प्राग्वत्। एतासामेव मिथ्यात्वाद्यष्टचत्वारिंशत्प्रकृतीनां शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणा त्रिविधाः साद्यध्रुवभेदात्, यत एतासामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टेरुत्कृष्टसंक्लेशे वर्तमानस्य कियत्कालं लभ्यते, समयान्तरे च तस्याप्यनुत्कृष्टेति द्वे अप्येते साद्यध्रुवे। जघन्या तु प्रागेव भावितेति। शेषाणां दशोत्तरशतसङ्ख्यानां सर्वे विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपा त्रिविधाः साद्यध्रुवभेदात्, तथात्वं चाध्रुवोदयत्वादेव भाव्यम्॥ ३१॥

कृता साद्यनादिप्ररूपणा, अथाऽऽह्नेदं स्वामित्वं च प्रतिपादयन्नाह—

अऽऽह्नेउं सामित्तं पि य ठिइसंकमे जहा णवरं। तव्वेइसु निरयगईइ वा वि तिसु हेट्ठिमखिइसु॥ ३२॥

व्याख्या—अऽऽह्नेदः स्वामित्वं च यथा स्थितिसङ्क्रमे प्रोक्तं तथैवात्राप्यवसेयं। नवरमयं भेदः—सङ्क्रमकरणे तदवेदि-

ष्वपि स्थितिसङ्क्रम उक्तः, उदयाऽभावेऽपि सङ्क्रमोपपत्तेः। उदीरणा त्वेषां तद्भेदिष्वेव द्रष्टव्या, उदयाऽभावे उदीरणाया अभावात्। इदमतिसंक्षिप्योक्तमिति किञ्चिद्विवृतत्योच्यते—तत्र स्वोदयबन्धोत्कृष्टानां ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयतैजससप्तकवर्णादिविंशतिनिर्माणास्थिराशुभागुरुलघुमिथ्यात्वकषायषोडशकत्रसचतुष्कदुर्भगचतुष्कवैक्रियसप्तकपञ्चेन्द्रियजातिद्विकौपघातपराघातोच्छ्वासातपोद्योताशुभविहायोगतिनीचैर्गोत्ररूपाणां षण्णवतिप्रकृतीनां बन्धावलिकायामतीतायामुदयावलिकात उपरितनी सर्वाऽपि स्थितिरुदीरणाप्रायोग्या तानि कर्माणि वेदयमानानां वेदितव्या। बन्धावलिकारहिता च सर्वा स्थितिर्यत्स्थितिः। इहावलिकाद्विकरूपोऽभ्याह्नेदस्तदुदयवन्त उदीरणास्वामिनः। उदये सति सङ्क्रमोत्कृष्टस्थितिकानां तु मनुजगतिसातवेदनीयस्थिरादिषट्कहास्यादिषट्कवेदत्रयशुभविहायोगतिप्रथमसंस्थानपञ्चकप्रथमसंहननपञ्चकोच्चैर्गोत्ररूपाणामेकोनत्रिंशत्प्रकृतीनामावलिकात्रिकहीना सर्वा स्थितिरुदीरणाप्रायोग्या तानि कर्माणि वेदयमानानां वेदितव्या, अत्र बन्धावलिकासङ्क्रमावलिकारहिता सर्वा स्थितिर्यत्स्थितिः, इहावलिकात्रिकरूपोऽभ्याह्नेदस्तदुदयवन्त उदीरणास्वामिनः। एवमग्रेऽपि यावान् यावानुदीरणानर्हः कालस्तावाँस्तावानभ्याह्नेदस्तदुदयवन्तश्चोदीरणास्वामिनोऽवसेयाः। तथा सप्ततिसागरोपमकोटीकोटीप्रमाणां मिथ्यादृष्टिर्मिथ्यात्वस्थितिं बद्ध्वाऽन्तर्मुहूर्त्तं यावन्मिथ्यात्व एव स्थित्वा सम्यक्त्वं प्रतिपद्यते। ततः सम्यक्त्वे सम्यग्मिथ्यात्वे चान्तर्मुहूर्त्तोनां मिथ्यात्वस्थितिं सकलामपि सङ्क्रमयति, सङ्क्रमावलिकायां चातीतायां तदुदीरणा प्रवर्त्तते, ततः सङ्क्रमावलिकातिक्रमेऽपि साऽन्तर्मुहूर्त्तोनैवेति सम्यक्त्वमनुभवतः सम्यक्त्वस्यान्तर्मुहूर्त्तोना सप्ततिसागरोपमा कोटाकोटीप्रमाणोत्कृष्टा स्थितिरुदीरणायोग्या। ततः कश्चित्सम्यक्त्वेऽप्यन्तर्मु-

हूर्त्तं स्थित्वा सम्यग्मिथ्यात्वं गच्छति । ततः सम्यग्मिथ्यात्वमनुभवतः सम्यग्मिथ्यात्वस्यान्तर्मुहूर्त्तविकोना सप्ततिसागरोपमकोटाकोटिप्रमाणोत्कृष्टा स्थितिरुदीरणायोग्या । उक्तं च—"अंतोमुहुत्तहीणा सम्मे मीसेहिं (य) दोहि मिच्छस्स" । मिथ्यात्वस्योत्कृष्टस्थितिरन्तर्मुहूर्त्तोना सम्यक्त्वे, मिश्रे च द्वाभ्यामन्तर्मुहूर्त्ताभ्यामूनोदीरणायोग्येत्येतदर्थः । तथाऽऽहारकसप्तकं स्वयोग्योत्कृष्टसंक्लेशेनाप्रमत्तेन सतोत्कृष्टस्थितिकं बद्ध्वा तत्कालोत्कृष्टस्थितिकस्वमूलप्रकृत्यभिन्नप्रकृत्यन्तरदलिकं च तत्र सङ्क्रमय्य सर्वोत्कृष्टान्तःसागरोपमकोटाकोटिस्थितिकं करोति । ततो बन्धानन्तरमन्तर्मुहूर्त्तमतिक्रम्याहारकशरीरं कर्तुमुद्यतते, तच्च कुर्वन् लब्ध्युपजीवनौत्सुक्यभावेन प्रमादं भजते, ततस्तस्य प्रमत्तस्य सत आहारकशरीरं कुर्वत आहारकसप्तकस्यान्तर्मुहूर्त्तोनोत्कृष्टा स्थितिरुदीरणायोग्या, अत्र प्रमत्तस्याहारकशरीरारम्भकत्वादुत्कृष्टस्थित्युदीरणास्वामी प्रमत्तसंयत एव द्रष्टव्यः । अवशिष्टप्रकृतीनां सूत्रकृदेव विशेषमाचष्टे—"निरयगईइ वा वि" इत्यादि नरकगतेरपिशब्दान्नरकानुपूर्व्याश्च तिर्यक्पञ्चेन्द्रियो मनुष्यो वोत्कृष्टां स्थितिं बद्ध्वोत्कृष्टस्थितिबन्धानन्तरं चान्तर्मुहूर्त्ते व्यतीते तिसृष्वधस्तनपृथिवीषु मध्येऽन्यतरस्यां समुत्पत्स्यते, तस्य प्रथमसमये नरकगतेरन्तर्मुहूर्त्तहीना सर्वाऽपि स्थितिर्विंशतिसागरोपमकोटाकोटीमानोदीरणायोग्या भवति । नरकानुपूर्व्याश्चान्तरालगतौ समयत्रयं यावदुत्कृष्टा स्थितिरुदीरणायोग्या । इह नरकगत्यादीनामुत्कृष्टा स्थितिः कृष्णलेश्यापरिणामेनैव बध्यते, तद(ऊ)पेतश्च कालं कृत्वा नरकेषूत्पद्यमानो जघन्यादिभावेन पञ्चमपृथिव्यादित्रय एवोत्पद्यत इतीहाधस्तनपृथिवीत्रयग्रहणप्रयोजनम् ॥ ३२ ॥

देवगइदेवमणुआणुपुवि आयाव विगलसुहुमतिगे । अंतोमुहुत्तभग्गा तावइअं तदुक्कस्सं ॥ ३३ ॥

व्याख्या—देवगतिदेवानुपूर्वीमनुष्यानुपूर्वीणामातपस्य विकलत्रिकस्य द्वित्रिचतुरिन्द्रियजातिरूपस्य सूक्ष्मत्रिकस्य च सूक्ष्मापर्याप्तसाधारणस्य स्वस्वोदये वर्त्तमाना अन्तर्मुहूर्त्तजन्या उत्कृष्टस्थितिबन्धाध्यवसायानन्तरमन्तर्मुहूर्त्तमात्रव्यवधानजाज इत्यर्थः, तावदूनामन्तर्मुहूर्त्तोनां तदुत्कृष्टां देवगत्यादीनामुत्कृष्टां स्थितिमुदीरयन्ति। अत्रेयं जावना—इह कश्चित्परिणामविशेषेण नरकगतेरुत्कृष्टां स्थितिं विंशतिसागरोपमकोटाकोटिप्रमाणां बद्ध्वा ततः शुजपरिणामविशेषसंपत्त्या देवगतेरुत्कृष्टां स्थितिं दशसागरोपमकोटीकोटीप्रमाणां बद्धुमारजते, तस्यां देवगतिस्थितौ बध्यमानायां स्वबन्धकालरूपावलिकाया उपरि बन्धावलिकाहीनामुपरितनीं सर्वामपि नरकगतिस्थितिं सङ्क्रमयति, ततो देवगतेरपि विंशतिसागरोपमकोटीकोटीप्रमाणा स्थितिरावलिकामात्रहीना जायते, देवगतिं च बध्नन् जघन्येनाप्यन्तर्मुहूर्त्तं यावद्बध्नाति, बन्धानन्तरं च कालं कृत्वाऽनन्तरसमये देवो जातः, देवत्वं चानुजवतस्तस्य देवगतेरन्तर्मुहूर्त्तोना विंशतिसागरोपमकोटाकोटीप्रमाणोत्कृष्टस्थितिरुदीरणायोग्या जवति, आवलिकाद्विकान्तर्मुहूर्त्तोनत्वेऽप्यावलिकाप्रदेपकृतबृहत्तरान्तर्मुहूर्त्तोनत्वमविरुद्धमेवेति नावलिकोनत्वमपि पृथग्गृहीतं, एवं देवानुपूर्व्या अपि वाच्यं। तथा कश्चित्संक्लेशविशेषेण नरकानुपूर्व्या उत्कृष्टां स्थितिं विंशतिसागरोपमकोटाकोटीप्रमाणां बद्ध्वा ततः शुजपरिणामविशेषेण मनुष्यानुपूर्व्या उत्कृष्टां स्थितिं पञ्चदशसागरोपमकोटाकोटीमानां बद्धुमारजते, तस्यां मनुष्यानुपूर्वीस्थितौ बध्यमानायामावलिकात उपरितनीं बन्धावलिकाहीनां सकलामपि नरकानुपूर्वीस्थितिं सङ्क्रमयति, ततो मनुष्यानुपूर्व्या अपि स्थितिरावलिकामात्रहीनविंशतिसागरोपमकोटाकोटिप्रमाणा जाता। मनुष्यानुपूर्वीं च बध्नन् जघन्येनाप्यन्तर्मुहूर्त्तं यावद्बध्नाति, तच्चान्तर्मुहूर्त्तं सङ्क्रमलब्धोत्कृष्टस्थितेस्रुट्यति, ततो बन्धानन्तरं

कालं कृत्वा मनुष्यानुपूर्वीमनुभवतस्तस्या उत्कृष्टस्थितिरन्तर्मुहूर्त्तोनविंशतिसागरोपमकोटाकोटिप्रमाणोदीरणा योग्या। ननु मनुष्यगतिमनुष्यानुपूर्व्योरुभयोरपि बन्धेन पञ्चदशसागरोपमकोटीकोट्य उत्कृष्टा स्थितिः प्राप्यते, न त्वेकस्या अपि विंशतिः, तत उभयोरपि सङ्क्रमोत्कृष्टत्वाविशेषात् कथं मनुष्यगतेरिव मनुष्यानुपूर्व्या अपि नावलिकात्रिकहीनोत्कृष्टा स्थितिरुदीरणायोग्येष्यते ? इति चेन्मैवं, मनुष्यानुपूर्व्या अनुदयसङ्क्रमोत्कृष्टत्वात्, अनुदयसङ्क्रमोत्कृष्टानां च जघन्यतोऽप्यन्तर्मुहूर्त्तोनाया एवोत्कृष्टस्थितेरुदीरणायोग्यत्वात्, मनुष्यगतेस्तूदयसङ्क्रमोत्कृष्टत्वेन तस्या आवलिकात्रिकहीनोत्कृष्टस्थितेरेवोदीरणायोग्यत्वसंभवात्। एवमातपादीनामप्यन्तर्मुहूर्त्तोनोत्कृष्टस्थितेरुदीरणायोग्यत्वं भावनीयं। नन्वनुदयसङ्क्रमोत्कृष्टस्थितिप्रकृतीनामन्तर्मुहूर्त्तोना भवदुत्कृष्टस्थितिरुदीरणायोग्या, आतपनाम्नस्तु बन्धोत्कृष्टत्वेन बन्धोदयावलिकाधिकरहितैवोत्कृष्टस्थितिरुदीरणायोग्या भवतीति कथमुच्यतेऽन्तर्मुहूर्त्तोनेति ? उच्यते, इह देव एवोत्कृष्टसंक्लेशवानेकेन्द्रियैकयोग्यानामातपस्थावरैकेन्द्रियजातीनामुत्कृष्टां स्थितिं बध्नाति नान्यः, स च तां बद्ध्वा तत्रैव देवभवेऽन्तर्मुहूर्त्तं यावत्तिष्ठति, ततः कालं कृत्वा बादरपृथ्वीकायिकेषूत्पद्य शरीरपर्याप्त्या पर्याप्तः सन्नातपनामोदये वर्तमानस्तदुदीरयति, ततस्तस्यैवमन्तर्मुहूर्त्तहीनैवोत्कृष्टस्थितिरुदीरणायोग्या भवतीति। आतपग्रहणं चोपलक्षणं, तेनान्यासामपि स्थावरैकेन्द्रियजातिनरकद्विकतिर्यग्द्विकौदारिकसप्तकान्त्यसंहननिद्रापञ्चकरूपाणामेकोनविंशतिप्रकृतीनामनुदये बन्धोत्कृष्टानामन्तर्मुहूर्त्तोनोत्कृष्टस्थितिरुदीरणायोग्या ज्ञातव्या। तत्र स्थावरैकेन्द्रियजातिनरकद्विकानां भावना जातैव, शेषाणां क्रियते—तत्र नारकस्तिर्यग्द्विकौदारिकसप्तकान्त्यसंहननानामुत्कृष्टां स्थितिं बद्ध्वा ततो मध्यमपरिणामः सँस्तत्रैवान्तर्मुहूर्तं स्थित्वा तिर्यक्षूत्पन्न

उत्कृष्टामुदीरणां करोति, निद्रापञ्चकस्य चानुदये उत्कृष्टसंक्लेशेनोत्कृष्टस्थितिं बद्ध्वा ततोऽन्तर्मुहूर्त्तात्यये निद्रोदये उत्कृष्टामुदीरणां करोतीति ॥३३॥

तित्थयरस्स वि पल्लासंखेज्जइमे जहन्नगे इत्तो। थावरजहन्नसंतेण समं अहि(ही)गं व बंधंतो ॥ ३४ ॥
गंतूणावलिमेत्तो कसायबारसगजयजुगुंछाणं। णिद्दाइपंचगस्स य आयावुज्जोयणामस्स ॥ ३५ ॥

व्याख्या—तीर्थकरस्य पूर्वं शुभैरध्यवसायैरपवर्त्यापवर्त्य शेषीकृते पल्योपमासङ्ख्येयभागमात्रे सयोगिकेवलिनः प्रथमसमये उत्कृष्टोदीरणा प्रवर्तते सर्वदैवोत्कर्षतोऽपीयन्मात्रैव स्थितिरुदीरणायोग्या तीर्थकरनाम्नः प्राप्यते, नाधिका, उक्तं च—"हयसेसा तित्थठिई पल्लासंखिज्जमित्तिया जाया। तीसे सजोगिपढमे समए उदीरणुक्कोसा ॥ १ ॥" आयुषां तु चतुर्णामपि स्वस्वोत्कृष्टस्थितिबन्धादूर्ध्वमुदयाद्यसमये उत्कृष्टा स्थित्युदीरणा। तदेवमभिहितमुत्कृष्टस्थित्युदीरणास्वामित्वं, अथ जघन्यस्थित्युदीरणास्वामित्वनिरूपणं प्रतिजानीते—"जहन्नगे इत्तो" इत ऊर्ध्वं 'जघन्ये' जघन्यस्थित्युदीरणायां स्वामित्वमभिधीयते। प्रतिज्ञातमेवाह—'थावरे'त्यादि, स्थावरस्य सतो यज्जघन्यमतिहीनं 'सदिति' स्थितिसत्कर्म तेन सममीषन्मात्रेणाधिकं वाऽभिनवं कर्म बध्नन् स एव सर्वजघन्यस्थितिसत्कर्मा स्थावरो बन्धावलिकां गत्वा बन्धावलिकायां व्यतीतायामित्यर्थः, आद्यद्वादशकषायभयजुगुप्सानिद्रापञ्चकातपोद्योतनाम्नामेकविंशतिप्रकृतीनां जघन्यां स्थित्युदीरणां करोति। इहातपोद्योतरहितानामेकोनविंशतिप्रकृतीनां ध्रुवबन्धित्वादातपोद्योतयोस्त्वप्रतिपक्षत्वात्प्रकारान्तरेणान्यत्र जघन्यतरस्थित्युदीरणाया अप्राप्तेर्यथोक्तस्वरूप एकेन्द्रिय एवासां प्रकृतीनां जघन्यस्थित्युदीरणास्वामी प्रोक्तः ॥ ३४ ॥ ३५ ॥

एगिंदियजोग्गाणं इयरा बंधित्तु आलिगं गंतुं । एगिंदियागए तद्विईए जाईणमवि एवं ॥ ३६ ॥

व्याख्या—एकेन्द्रिययोग्यानामेकेन्द्रियाणामेवोदीरणां प्रति योग्यानामेकेन्द्रियजातिस्थावरसूक्ष्मसाधारणनामप्रकृतीनामेकेन्द्रियो जघन्यस्थितिसत्कर्मा । इतरा एकेन्द्रियजातिप्रतिपक्षा द्वित्रिचतुरिन्द्रियजातीः स्थावरसूक्ष्मसाधारणप्रतिपक्षाश्च त्रसबादरप्रत्येकप्रकृतीर्बद्ध्वा तत एकेन्द्रियजात्यादिप्रकृतीर्बध्नन्नावलिकां बन्धावलिकामतिक्रम्य बन्धावलिकायाश्चरमसमये एकेन्द्रियजात्यादीनां जघन्यां स्थित्युदीरणां करोति । इहेयं भावना—एकेन्द्रियः सर्वजघन्यस्थितिसत्कर्मा द्वीन्द्रियादिजातीः सर्वा अपि क्रमेण बद्ध्वा तदनन्तरमेकेन्द्रियजातिं बद्धुमारभते, तद्बन्धावलिकान्तसमये प्राग्बद्धाया एकेन्द्रियजातेर्जघन्यां स्थित्युदीरणां करोति । इह बन्धावलिकानन्तरसमये बन्धावलिकाप्रथमसमयबद्धानामपि लतानामुदीरणाप्राप्तेर्जघन्या स्थित्युदीरणा न प्राप्यते इति बन्धावलिकान्तसमयग्रहणं । प्रतिपक्षभूतप्रकृतिबन्धोपादानं च तद्बन्धे यावान् कालः संभवति तावन्यूनतयैकेन्द्रियजातिस्थित्युदीरणायाः स्तोकतरत्वप्रतिपत्तये, एवं स्थावरसूक्ष्मसाधारणेष्वपि प्रतिपक्षत्रसबादरप्रत्येकबन्धान्तरिततया भावना कर्तव्या । "एगिंदियागए त्ति" जातीनामपि द्वीन्द्रियादिजातीनामपि एवं प्रागुक्तप्रकारेणैकेन्द्रियादागतस्य तत्स्थितिकस्यैकेन्द्रियप्रायोग्यजघन्यस्थितिकस्य जघन्या स्थित्युदीरणा भवति । तथाहि—एकेन्द्रियो जघन्यस्थितिसत्कर्मैकेन्द्रियभवादुद्वृत्य द्वीन्द्रियेषूत्पन्नः, ततः पूर्वबद्धां द्वीन्द्रियजातिमनुभवितुमारभते, अनुभवाद्यसमयादारभ्यैव चैकेन्द्रियजातिं भाधीयसा कालेन बद्धुं प्रवृत्तः, ततस्तथैव त्रिचतुःपञ्चेन्द्रियजातीः क्रमेण बध्नाति, एवं च बृहदन्तर्मुहूर्त्तचतुष्कमपगच्छति, ततो द्वीन्द्रियजातिं बद्धुमारभते, ततो बन्धावलिकान्तसमये तस्या द्वीन्द्रियजा-

तेरेकेन्द्रियजवार्जितस्थितिसत्कर्मापेक्षयाऽन्तर्मुहूर्त्तचतुष्टयबन्धावलिकान्यूनाया जघन्यां स्थित्युदीरणां करोति । एवं त्रीन्द्रियचतुरिन्द्रियजात्योरपि जावना कार्या ॥ ३६ ॥

वेयणियणोकसायासमत्तसंघयणपणगणीयाणं। तिरियदुग अजसदूजगणाएज्जाणं च सन्निगए ॥ ३७ ॥

व्याख्या—वेदनीयस्य सातासातयोर्नोकषायाणां हास्यरत्यरतिशोकानां शेषाणां वक्ष्यमाणत्वात् असमाप्तस्यापर्याप्तकनाम्नः संहननपञ्चकस्य वज्रर्षजनाराचवर्जानां पञ्चानां संहननानां नीचैर्गोत्रस्य तिर्यग्द्विकस्य तिर्यग्गतितिर्यगानुपूर्वीरूपस्य तथाऽयशःकीर्तिदुर्भगानादेयानां सर्वसङ्ख्ययाऽष्टादशप्रकृतीनां संज्ञिपञ्चेन्द्रिये जघन्या स्थित्युदीरणा । जावनात्वियम्—एकेन्द्रियो जघन्यस्थितिसत्कर्मा एकेन्द्रियजवाऽुद्वृत्य पर्याप्तसंज्ञिपञ्चेन्द्रियमध्ये समुत्पन्न उत्पत्तिप्रथमसमयादारज्य सातवेदनीयमनुजवन् बृहत्तरान्तर्मुहूर्त्तं यावदसातवेदनीयं बध्नाति, ततो जूयोऽपि सातं बद्धुमारजते, ततो बन्धावलिकान्तसमये पूर्ववद्ध्रस्य सातवेदनीयस्य जघन्यस्थित्युदीरको जवति, एवमसातस्यापि दृश्यं, केवलं सातस्थानेऽसातमसातस्थाने च सातं वाच्यं, हास्यरत्योः सातवदरतिशोकयोरसातवज्जावना कार्या । अपर्याप्तकनाम्न एकेन्द्रियस्य जघन्यस्थितिसत्कर्मण एकेन्द्रियजवाऽुद्वृत्यापर्याप्तसंज्ञिपञ्चेन्द्रियमध्ये समुत्पन्नस्योत्पत्तिप्रथमसमयादारज्य पर्याप्तकनाम बृहत्तरान्तर्मुहूर्त्तकालेन बद्ध्वा जूयोऽप्यपर्याप्तकनाम बध्नतो बन्धावलिकान्तसमये प्राग्वद्ध्रस्य जघन्यस्थित्युदीरकत्वं द्रष्टव्यं । संहननपञ्चकस्य तु मध्ये वेद्यमानसंहननवर्जशेषसंहननानां प्रत्येकमतिदीर्घबन्धकालं, ततश्च वेद्यमानसंहननस्य बन्धमजिधाय बन्धावलिकान्तसमये जघन्या स्थित्युदीरणा वाच्या । नीचैर्गोत्रमसातवद्वाच्यं । तथा यस्तैजसकायिको

वायुकायिको वा बादरः सर्वजघन्यस्थितिसत्कर्मा पर्याप्तसंज्ञिपञ्चेन्द्रियतिर्यङ्मध्ये समुत्पद्य बृहत्तरमन्तर्मुहूर्त्तं यावन्मनुजगतिं बध्नाति, तद्बन्धानन्तरं च तिर्यग्गतिं बद्धुमारभते । ततो बन्धावलिकान्तसमये तस्य प्राग्बद्धतिर्यग्गतेर्जघन्यस्थित्युदीरकत्वं द्रष्टव्यं । एवं तिर्यगानुपूर्व्या अपि वाच्यं, नवरं तस्या जघन्यस्थित्युदीरणाऽन्तरालगतौ तृतीयसमये वाच्या । अयशःकीर्तिदुर्भगानादेयानां च भावनाऽसातवत्कार्या । विरोधिप्रकृतीनां बन्धश्चेहायशःकीर्तिदुर्भगानादेयाख्यानां द्रष्टव्यः ॥३७॥

अमणागयस्स चिरठिइअंते सुरणिरयगइउवंगाणं। अणुपुव्वीतिसमइगे णराण एगिंदियागयगे॥३८॥

व्याख्या—अमनस्कादसंज्ञिपञ्चेन्द्रियाऽऽदृत्य देवेषु नारकेषु वा समागतस्य सुरगतिनिरयगतिवैक्रियाङ्गोपाङ्गनाम्नां चिरस्थित्यन्ते स्वस्वायुर्दीर्घस्थित्यन्ते जघन्या स्थित्युदीरणा । इदमुक्तं भवति—असंज्ञिपञ्चेन्द्रियः सर्वजघन्यां सुरगत्यादि स्थितिं बद्ध्वा बन्धानन्तरं दीर्घकालं तत्रैव स्थित्वा भवक्षयादेवेषु नारकेषु वा मध्ये पल्योपमासङ्ख्येयभागप्रमाणायुःस्थितिः संजातः, तस्य देवस्य नारकस्य वा स्वस्वायुश्चरमसमये वर्तमानस्य यथायोगं देवगतिनरकगतिवैक्रियाङ्गोपाङ्गनाम्नां जघन्या स्थित्युदीरणा भवति । तथा तस्यैवासंज्ञिपञ्चेन्द्रियस्य स्वभवक्षयादेवभवस्य नारकभवस्य वाऽपान्तरालगतौ वर्तमानस्यानुपूर्व्या देवानुपूर्व्या नरकानुपूर्व्याश्च यथायोगं "तिसमइगे त्ति" तृतीयसमये जघन्यस्थित्युदीरकत्वं वाच्यं । "नराण त्ति" नराणामानुपूर्व्या एकेन्द्रियागतस्यैकेन्द्रियस्य सर्वजघन्यमनुष्यानुपूर्वीस्थितिसत्कर्मणः स्वभवाऽऽदृत्य मनुष्यभवे समुत्पद्यमानस्यान्तरालगतौ तृतीयसमये जघन्यस्थित्युदीरकत्वं वाच्यम् ॥ ३८ ॥

समयाहिगालिगाए पढमठिईए उ सेसवेलाए। मिच्छत्ते वेएसु य संजलणासु वि य सम्मत्तं॥३९॥

व्याख्या—अन्तरकरणे कृते सत्यधस्तनी स्थितिः प्रथमा स्थितिरित्युच्यते, उपरितनी तु द्वितीया, ततः प्रथमस्थितेः शेषवेलायां समयाधिकावलिकाप्रमाणायां मिथ्यात्वस्य वेदानां च त्रयाणामपि संज्वलनानां च चतुर्णामपि सम्यक्त्वस्यापि च जघन्या स्थित्युदीरणा भवति। केवलं सम्यक्त्वसंज्वलनलोभयोः क्षये उपशमे च जघन्या स्थित्युदीरणा वाच्या। शेषाणां तु क्षपकश्रेण्यामेव। उक्तं च—"उवसमे वि दुसु" द्वयोः सम्यक्त्वलोभयोरुपशमे, अपिशब्दात्क्षयेऽपीत्येतदर्थः॥३९॥

पल्लासंखियभागूणुदही एगिंदियागए मिस्से। बेसत्तभागवेउव्वियाइ पवणस्स तस्संते ॥ ४० ॥

व्याख्या—पल्यासङ्ख्येयभागोनोदधेः पल्योपमासङ्ख्येयभागेन न्यूनं यदेकसागरोपमं तावन्मात्रसम्यग्मिथ्यात्वस्थितिसत्कर्मण एकेन्द्रियागतस्यैकेन्द्रियभवाद्धृत्य संज्ञिपञ्चेन्द्रियमध्ये समायातस्य यतः समयादारभ्यान्तर्मुहूर्त्तानन्तरं सम्यग्मिथ्यात्वस्योदीरणा निवर्तिष्यते तस्मिन् समये सम्यग्मिथ्यात्वं प्रतिपन्नस्य चरमसमये सम्यग्मिथ्यात्वस्य जघन्या स्थित्युदीरणा, एकेन्द्रियसम्बन्धिजघन्यस्थितिसत्कर्मणः सकाशादधो वर्तमानं च सम्यग्मिथ्यात्वं नोदीरणायोग्यं, तदधस्तनस्थितिके तस्मिन् सत्यवश्यं मिथ्यात्वोदयसंभवेन तदुद्वलनस्यैव संभवात्। तथा यैः सप्तभिर्भागैः सागरोपमं भवति तौ द्वौ सप्तभागौ स्थितिरूपौ यस्य वैक्रियस्य वैक्रियशरीरवैक्रियसंघातवैक्रियबन्धनचतुष्टयरूपस्य वैक्रियषट्कस्य तद्द्विसप्तभागवैक्रियं, तदपि प्राक्तनानुवृत्त्या पल्योपमासङ्ख्येयभागोनं गृह्यते, तस्य स्त्रीत्वनिर्देशः प्राकृतत्वात्। पवनस्य बादरवायुकायिकस्य वैक्रियस्यान्ते पर्यन्तसमये जघन्या स्थित्युदीरणा। इयमत्र भावना—बादरवायुकायिकः पल्योपमासङ्ख्येयभागहीनसागरोपमद्विसप्तभागप्रमाणवैक्रियषट्कजघन्यस्थितिसत्कर्मा बहुशो वैक्रियं निर्माय चरमे वैक्रियारम्भे चरमसमये वर्त-

मानो जघन्यस्थित्युदीरणां करोति । तदनन्तरसमये च वैक्रियषट्कमेकेन्द्रियसम्बन्धिजघन्यसत्कर्मापेक्षया स्तोकतरमिति कृत्वोदीरणायोग्यं न भवति, किं तूपलनयोग्यम् ॥ ४० ॥

चउरुवसमेत्तु पेज्जं पच्छा मिच्छं खवित्तु तेत्तीसा । उक्कस्ससंजमऊा अंते सुतणूउवंगाणं ॥ ४१ ॥

व्याख्या—बहुशो भवभ्रमणेन चतुरो वारान् "पेज्जं ति" मोहनीयमुपशमय्य ततः पश्चान्मिथ्यात्वमुपलक्षणात्सम्यक्त्वं सम्यग्मिथ्यात्वं च क्षपयित्वा, "तेत्तीस त्ति" सर्वार्थसिद्धे त्रयस्त्रिंशत्सागरोपमस्थितिको देवो जातः, ततो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नः, ततो वर्षाष्टकानन्तरमुत्कृष्टाद्वा देशोनां पूर्वकोटिं यावत्संयममनुपालितवान्, ततोऽन्ते देशोनपूर्वकोटिपर्यन्ते आहारकशरीरं कृत्वा सुतनोराहारकशरीरस्य, तथोपाङ्गानामाहारकोपाङ्गानां, बहुवचनादाहारकबन्धनचतुष्टयाहारकसंघातग्रहः, एतस्याहारकसप्तकस्य जघन्यां स्थित्युदीरणां करोति । इह मोहोपशमं कुर्वन् शेषनामप्रकृतीनां स्थितिघातादिभिः प्रभूतं स्थितिसत्कर्म घातयति, देवभवे चापवर्तनाकरणेनापवर्तयति । तत आहारकसप्तकबन्धकाले स्तोकमेव स्थितिसत्कर्म तत्र सङ्क्रामतीति चतुःकृत्वो मोहोपशमस्योत्कृष्टस्थितिकदेवभवस्य च ग्रहणं, देशोनपूर्वकोटिप्रमाणेन चारित्रकालेन चाहारकसप्तकस्थितिसत्कर्म प्रभूतं क्षयमुपयातीति देशोनपूर्वकोट्युपादानम् ॥ ४१ ॥

उउमत्तखीणरागे चोद्दससमयाहिगालिगठिईए । सेसाणुदीरणंते जिन्नमुहुत्तो ठिईकालो ॥ ४२ ॥

व्याख्या—उद्मस्थक्षीणरागस्य ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकलक्षणानां चतुर्दशप्रकृतीनां समयाधिकावलिकाशेषायां स्थितौ जघन्या स्थित्युदीरणा । शेषाणां च मनुजगतिपञ्चेन्द्रियजात्याद्यसंहननौदारिकसप्तकसंस्थानष-

द्वीपघातपराघातोच्छ्वासविहायोगतिद्विकत्रसचतुष्कसुभगचतुष्कतीर्थकरोच्चैर्गोत्रदुःस्वररूपाणां द्वात्रिंशत्प्रकृतीनां प्रागुक्तानां नामध्रुवोदीरणानां च त्रयस्त्रिंशत्प्रकृतीनां सर्वसङ्ख्यया पञ्चषष्टिप्रकृतीनां सयोगिकेवलिचरमसमये जघन्या स्थित्युदीरणा। तस्याश्च स्थितिकालो भिन्नमुहूर्त्तमन्तर्मुहूर्त्तमित्यर्थः। आयुषामप्युदीरणान्ते जघन्या स्थित्युदीरणा द्रष्टव्या ॥ ४२ ॥

तदेवमुक्ता स्थित्युदीरणा, सम्प्रत्यनुभागोदीरणावसरः। तत्र चेमेऽर्थाधिकाराः—संज्ञाप्ररूपणा, शुभाशुभप्ररूपणा, विपाकप्ररूपणा, प्रत्ययप्ररूपणा, साद्यनादिप्ररूपणा, स्वामित्वप्ररूपणा चेति। तत्र संज्ञाशुभाशुभविपाकप्ररूपणा ग्रन्थान्तरोक्त्याऽतिदिशन्नाह—

अणुभागुदीरणाए सन्ना य सुभासुभा विवागो य। अणुभागबंधि भणिया नाणत्तं पच्चया चेमे ॥ ४३ ॥

व्याख्या—अनुभागोदीरणायां संज्ञा शुभाशुभा विपाकाश्च यथा शतकग्रन्थेऽनुभागबन्धाभिधानावसरे भणितास्तथाऽत्रापि द्रष्टव्याः। अयं चार्थः पीठिकायामुक्तप्रायः। नानात्वं विशेषो यत्तत्र शतकाख्यग्रन्थेऽनुभागबन्धे नोक्तं तदिह वक्ष्ये। तथा तत्र बन्धमाश्रित्यान्ये एव मिथ्यात्वादयः प्रत्यया उक्ताः, इह तूदीरणामाश्रित्यान्ये एवेमे वक्ष्यमाणा ज्ञातव्याः ॥ ४३ ॥

मीसं दुठाणे सव्वघाइदुठाणएगठाणे य। सम्मत्तमंतरायं च देसघाई अचक्खू य ॥ ४४ ॥

व्याख्या—मिश्रं सम्यग्मिथ्यात्वं स्थानसंज्ञामधिकृत्य द्विस्थानकं द्विस्थानकरसोपेतं, घातिसंज्ञामधिकृत्य सर्वघाति, सम्यक्त्वं पुनरुत्कृष्टोदीरणामधिकृत्य द्विस्थानकरसे, जघन्योदीरणां त्वधिकृत्यैकस्थानके, घातिसंज्ञामधिकृत्य च देशघाति

वेदितव्यं । एतच्च तत्र सर्वथा नोक्तं, यतस्तत्रानुत्नागबन्धमाश्रित्य शुत्नाशुत्नप्ररूपणा कृता । न च सम्यक्त्वसम्यग्मिथ्यात्वयोर्बन्धः संत्नवति, तत एतद्गर्जिता एवाशुत्नप्रकृतयस्तत्रोक्ताः । उदीरणा त्वेतयोरपि त्नवतीतीह तयोर्विशेषेणोपादानं । तथाऽन्तरायं पञ्चप्रकारं अचक्षुर्दर्शनं चोत्कृष्टामनुत्नागोदीरणामधिकृत्य सर्वोत्कृष्टे द्विस्थानकरसे, जघन्यां त्वधिकृत्यैकस्थानके द्विस्थानके च कस्मिंश्चिदू घातिसंज्ञामधिकृत्य च देशघाति वेदितव्यं, बन्धं प्रतीत्य त्वेकद्वित्रिचतुःस्थानकत्नेदाच्चतुःप्रकारेऽपि रसे प्राप्यते ॥ ४४ ॥

गणेसु चउसु अपुमं दुठाणे कक्कसं च गुरुअं च । अणुपुव्वीउं तीसं णरतिरिएगंतजोग्गा य ॥ ४५ ॥

व्याख्या—अपुमान्नपुंसकवेदोऽनुत्नागोदीरणायामेकद्वित्रिचतुःस्थानकरूपेषु चतुर्ष्वपि स्थानेषु ज्ञेयः । तत्रोत्कृष्टामनुत्नागोदीरणामधिकृत्य चतुःस्थानकेऽनुत्कृष्टां त्वधिकृत्य चतुःस्थानके त्रिस्थानके द्विस्थानके एकस्थानके च ज्ञेयः । बन्धं प्रतीत्य पुनरयमेकस्थानकवर्जे त्रिप्रकारे रसे प्रोक्तः । अथ बन्धाऽत्नावे नपुंसकवेदस्यैकस्थानको रसः कथमुदीरणायां प्राप्यते ? उच्यते—क्षपणकाले रसघातं कुर्वतस्तस्यैकस्थानकस्यापि रसस्य संत्नवात् । तथा कर्कशनाम गुरुनाम च बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च प्राप्यते, इह त्वनुत्नागोदीरणायां द्विस्थानके । तथाऽऽनुपूर्व्यश्चतस्रोऽपि नरतिरश्चामुदयं प्रत्येकान्तयोग्याश्च त्रिंशत्प्रकृतयस्तिर्यग्द्विकनरद्विकाद्यजातिचतुष्टयौदारिकसप्तकमध्यमसंस्थानचतुष्कसंहननषट्कातपस्थावरसूक्ष्मापर्याप्तसाधारणलक्षणा बन्धं प्रत्येकस्थानकवर्जत्रिप्रकारे रसे प्राप्यमाणा अप्युत्कृष्टामनुत्कृष्टां चोदीरणामधिकृत्येह द्विस्थानक एव रसे ज्ञेयाः ॥ ४५ ॥

वेया एगठाणे दुठाणे वा अचक्खु चक्खू य । जस्स त्थि एगमवि अक्खरं तु तस्सेगठाणाणि ॥ ४६ ॥

व्याख्या—वेदौ स्त्रीवेदपुरुषवेदावनुभागोदीरणामुत्कृष्टामधिकृत्य द्विस्थानकेऽनुत्कृष्टां त्वधिकृत्य द्विस्थानके एकस्थानके वाऽवगन्तव्यौ । एवमचक्षुर्दर्शनावरणं चक्षुर्दर्शनावरणं च । बन्धं प्रतीत्य पुनः स्त्रीवेदश्चतुःस्थानके त्रिस्थानके द्विस्थानके च । पुरुषवेदोऽचक्षुर्दर्शनावरणे चक्षुर्दर्शनावरणे चैकद्वित्रिचतुःस्थानकभेदेन चतुःप्रकारेऽपि । ननु "देसघाई अचक्खू य त्ति" प्रागेवोक्तमिति किमर्थं पुनरिहाचक्षुर्दर्शनावरणमुपात्तं ? उच्यते—सदृशप्रकृत्यधिकारादिह संपातायातमेतत्, घातिसंज्ञानियमार्थं प्रागभिधानमिह तु रसस्थानोभयनियमार्थमिति तु मलयगिरिचरणाः । यस्य जीवस्यैकमप्यक्षरं सर्वपर्यायैः परिज्ञातं वर्तते तस्य संपूर्णश्रुताक्षरस्य श्रुतकेवलिनो मतिश्रुतावधि (ज्ञानावरणावधि) दर्शनावरणप्रकृतीनामनुभागोदीरणायामेकस्थानको रसः प्राप्यते, संज्वलनानां तु बन्धेऽनुभागोदीरणायां चैकद्वित्रिचतुःप्रकारोऽपि रसः प्राप्यते ॥४६॥

मणनाणं सेससमं मीसं सम्मत्तमवि य पावेसु । ठाणवमियहीणा संतुक्कस्सा उदीरणया ॥ ४७ ॥

व्याख्या—मनःपर्यायज्ञानं शेषैः कर्मभिः समं वेदितव्यं । अयं भावः—यथा शेषकर्मणामनुभागोदीरणा चतुस्त्रिद्विस्थानकविषया प्रवर्तते तथा मनःपर्यायज्ञानावरणस्यापि द्रष्टव्या । तत्रोत्कृष्टा चतुःस्थाने, अनुत्कृष्टा तु चतुःस्थानके त्रिस्थानके द्विस्थानके वा । बन्धे तु मनःपर्यायज्ञानावरणस्य चतुःप्रकारोऽपि रसो भवति, शेषकर्मणां त्वेकस्थानकं विना त्रिप्रकारः । तानि च शेषकर्माण्यमूनि—केवलज्ञानावरणं केवलदर्शनावरणं निद्रापञ्चकं सातासातवेदनीये मिथ्यात्वं द्वादश कषाया षड् नोकषायाः नरकगत्यायुषी देवगत्यायुषी पञ्चेन्द्रियजातिस्तैजससप्तकं वैक्रियसप्तकमाहारकसप्तकमाद्या-

न्त्यसंस्थाने वर्णपञ्चकं गन्धद्विकं रसपञ्चकं स्निग्धरूक्षमृदुलघुशीतोष्णरूपं स्पर्शषट्कमगुरुलघूपघातं पराघातं उच्छ्वासोद्यो-
तविहायोगतिद्विकानि त्रसचतुष्कं स्थिरादिषट्कमस्थिरादिषट्कं निर्माणं तीर्थकरं गोत्रद्विकं चेति । एतासां चैकोत्तरशतस-
ङ्ख्यानां शेषकर्मप्रकृतीनामुत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानको रसोऽनुत्कृष्टां त्वधिकृत्य चतुःस्थानकस्त्रिस्थानको
द्विस्थानकश्च । तथा म तिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणसंज्वलनचतुष्टयनोकषायनवकानामु-
त्कृष्टानुभागोदीरणामधिकृत्य रसः सर्वघाती, अनुत्कृष्टां त्वधिकृत्य देशघाती सर्वघाती च । उक्तं च—"देसोवघाइयाणं
उदए देसो व होइ सवो वा । देसोवघाइउं च्चिय अचक्खुसम्मत्तविग्घाणं ॥ १ ॥ अत्रोदय इत्यसंप्राप्त्युदये उदीरणाया-
मित्यर्थः । तथा केवलज्ञानावरणकेवलदर्शनावरणनिद्रापञ्चकमिथ्यात्वद्वादशकषायाणामुत्कृष्टामनुत्कृष्टां वाऽनुभागोदीर-
णामधिकृत्य रसः सर्वघात्येव । सातासातवेदनीयायुश्चतुष्टयसकलनामप्रकृतिगोत्रद्विकानामुत्कृष्टामनुत्कृष्टां वोदीरणामधि-
कृत्य रसः सर्वघातिप्रतिभागः । शुभाशुभत्वे विशेषमाह—मिश्रं सम्यग्मिथ्यात्वं सम्यक्त्वमपि चानुभागोदीरणामधिकृत्य
पापेषु पापकर्मस्वधिगन्तव्यं । अनयोर्घातिकर्मतया रसस्याशुभत्वात् । शेषप्रकृतयस्तु यथा शतकग्रन्थेऽनुभागबन्धे शुभा-
शुभतयाऽभिहितास्तथाऽत्रापि वक्तव्याः । अथ कीदृशेऽनुभागसत्कर्मणि वर्तमाने उत्कृष्टानुभागोदीरणां करोतीत्युच्यते—
अनुभागसत्कर्मणः षट्स्थानपतितहीनादप्युत्कृष्टाऽनुभागोदीरणा प्रवर्तते । इदमुक्तं भवति—यत्सर्वोत्कृष्टमनुभागसत्कर्म
तस्मिन्ननन्तभागहीने वाऽसङ्ख्येयभागहीने वा सङ्ख्येयभागहीने वा सङ्ख्येयगुणहीने वाऽसङ्ख्येयगुणहीने वाऽनन्तगुणहीने
वोत्कृष्टानुभागोदीरणा प्रवर्तते । यतोऽनन्तानन्तानां स्पर्धकानामनुभागे क्षपितेऽप्यनन्तानन्तान्युत्कृष्टरसानि पश्चादव-

तिष्ठन्ते, ततो मूलानुभागसत्कर्मापेक्षयाऽनन्तगुणहीनेऽनन्तभागेऽपि हतशेषे सति यद्युत्कृष्टानुभागोदीरणा लभ्यते तदा किं वाच्यमसङ्ख्येयगुणहीनादावनुभागसत्कर्मणि सतीति ॥ ४७ ॥

अथ विपाके विशेषमाह—

विरियंतरायकेवलदंसणमोहणीयणाणवरणाणं । असमत्तपज्जएसु य सव्वदव्वेसु उ विवागो ॥ ४८ ॥

व्याख्या—वीर्यान्तरायकेवलदर्शनावरणाष्टाविंशतिविधमोहनीयपञ्चविधज्ञानावरणानां सर्वसङ्ख्यया पञ्चत्रिंशत्प्रकृतीनामसमस्तपर्यायेषु सर्वद्रव्येषु सर्वजीवद्रव्येषु विपाकः । तथाहि—इमा वीर्यान्तरायाद्याः पञ्चत्रिंशत्प्रकृतयः सकलमपि जीवद्रव्यमुपभुञ्जन्ति पर्यायाँस्तु न सर्वानपि, यथा मेघैः सर्वात्मनाऽऽच्छादितयोरपि सूर्याचन्द्रमसोस्तत्प्रभा सर्वथा नापनेतुं शक्यते तथैताभिः सर्वात्मनाऽऽवृतेऽपि जीवद्रव्ये तत्पर्यायाः सर्वथा नापनेतुं शक्यन्त इति भावनीयम् ॥ ४८ ॥

गुरुलहुगाणंतपएसिएसु चक्खुस्स रूविदव्वेसु । उहिस्स गहणधारणजोग्गे सेसंतरायाणं ॥ ४९ ॥

व्याख्या—चक्षुषश्चक्षुर्दर्शनावरणस्य गुरुलघुकेष्वनन्तप्रादेशिकेषु स्कन्धेषु विपाकोऽवधिदर्शनावरणस्य रूपिद्रव्येषु शेषान्तरायाणां वीर्यान्तरायव्यतिरिक्तानां दानलाभभोगोपभोगान्तरायाणां ग्रहणधारणयोग्येषु पुद्गलद्रव्येषु विपाको न शेषेषु । यावानेव हि चक्षुर्दर्शनादीनां विषयस्तावानेव तदुपघातककर्मणामित्युक्तरूपविषयनियमाविरोधः । शेषप्रकृतीनां तु पुद्गलविपाकादिर्यथा प्राग्निहितस्तथैवावगन्तव्यः ॥ ४९ ॥

अथ प्रत्ययस्य प्ररूपणा कर्तव्या । प्रत्ययश्चोदीरणायाः कषायेण सहितोऽसहितो वा योगसंज्ञो वीर्यविशेषः । स च

परिणामजनवकृतजेदाद्विधा । तत्र परिणामप्रत्ययोऽपि द्विधा—सगुणानां निर्गुणानां च परिणत्या सगुणपरिणामकृतो निर्गुणपरिणामकृतश्चेति । एतदुजयजेदसंसूचितपरिणामप्रत्ययमधिकृत्याह—

वेउव्वियतेयगकम्मवन्नरसगंधणिद्धलुक्खाउ । सीउण्हथिरसुजेयरअगुरुलहूउ य णरतिरिए ॥ ५० ॥

व्याख्या—वैक्रियसप्तकं "तेयगकम्म त्ति" कार्मणसमभिव्याहृततैजसशब्देन तैजससप्तकं गृह्यते । तथा वर्णपञ्चकं रसपञ्चकं स्निग्धरूक्षे शीतोष्णे स्थिरशुजे इतरे अस्थिराशुजे अगुरुलघु च, एताः प्रकृतयोऽनुजागोदीरणामधिकृत्य नरतिर्यक्षु परिणामप्रत्ययाः । वैक्रियसप्तकं हि नरतिरश्चां गुणविशेषसमुत्थलब्धिप्रत्ययं, ततस्तदुदीरणापि तेषां गुणपरिणामप्रत्यया । तैजससप्तकादिप्रकृतयस्तु तिर्यग्नरैरन्यथाऽन्यथाविपरिणमय्योदीर्यन्त इति तासामपि प्रकृतीनामनुजागोदीरणा तिर्यङ्नराणां परिणामप्रत्ययेति ॥ ५० ॥

सम्प्रति यासां प्रकृतीनामनुजागोदीरणा न गुणागुणपरिणामकृता नापि जवकृता ता निर्दिदिक्षुराह—

चउरंसमउअलहुआ, परघाउज्जोयइट्ठखगइसरा । पत्तेगतणू उत्तरतणूसु दोसु वि य तणू तइया ॥५१॥

व्याख्या—समचतुरस्रसंस्थानमृदुलघुपराघातोद्योतप्रशस्तविहायोगतिसुस्वरप्रत्येकाख्या अष्टौ प्रकृतयः "तणू त्ति" अनुजागोदीरणामधिकृत्य तनुपरिणामप्रत्यया "उत्तरतणूसु दोसु वि त्ति" उत्तरतन्वोर्वैक्रियाहारकलक्षणयोर्द्वयोरपि करणपरिणामे सतीत्यर्थः, उत्तरवैक्रिये आहारके वा क्रियमाणे, तद्बलादेव समचतुरस्रादीनामनुजागोदीरणा प्रवर्तमाना, न गुणागुणपरिणामकृता, नापि जवकृता, किंतूत्तरवैक्रियादिशरीरपरिणामकृतेत्यर्थः । केवलगुणपरिणाममधिकृत्याह—

"तणू तइया" इत्यादि, तृतीया तनुराहारकशरीरं, उपलक्षणादाहारकसप्तकं अनुभागोदीरणामधिकृत्य गुणपरिणामप्रत्ययं, एतच्हि गुणपरिणामेनैव भवतीत्येतदुदीरणापि गुणपरिणामप्रत्ययैवेति ॥ ५१ ॥

देसविरयविरयाणं सुभगाएज्जजसकित्तिउच्चाणं । पुव्वाणुपुव्विगाए असंखभागो थियाईणं ॥ ५२ ॥

व्याख्या—देशविरतानां विरतानां च सुभगादेययशःकीर्त्युच्चैर्गोत्राणामनुभागोदीरणा गुणपरिणामकृता । तथाहि—सुभगादिविरोधिदुर्भगादिप्रकृत्युदययुक्तोऽपि यो देशविरतिं सर्वविरतिं वा प्रतिपद्यते, तस्यापि देशविरत्यादिगुणमहिम्ना सुभगादिप्रकृतीनामेवोदयपूर्वमुदीरणा प्रवर्तत इति । तथा "थियाईणं ति" स्त्रीवेदादीनां नवानां नोकषायाणां पूर्वानुपूर्व्याऽतिजघन्यानुभागस्पर्धकादारभ्य क्रमेणेत्यर्थः, असङ्ख्येयो भागो देशविरतानां सर्वविरतानां च प्रत्येकमुदीरणायोग्यो गुणपरिणामकृतो वेदितव्यः, परतस्त्वनुभागो नोदीरणामेति । पञ्चसङ्ग्रहे त्वेतेषां जघन्यानुभागस्पर्धकादारभ्यानन्ता भागा उदीरणायोग्या गुणपरिणामकृता उक्ताः । तथा च तद्गाथा—"सुभगाइउच्चगोयं गुणपरिणामा उ देसमाईणं । अइहीणफड्डगाउ णंतंसो णोकसायाणं ॥ १ ॥" ॥ ५२ ॥

तित्थयरं घाईणि य परिणामप्पच्चयाणि सेसाउं । भवपच्चइया पुवुत्ता वि य पुवुत्तसेसाणं ॥ ५३ ॥

व्याख्या—तीर्थकरं घातिकर्माणि च पञ्चविधज्ञानावरणनवविधदर्शनावरणनोकषायवर्जमोहनीयपञ्चविधान्तरायरूपाणि अनुभागोदीरणामधिकृत्य तिर्यङ्मनुष्याणां परिणामप्रत्ययानि । परिणामो ह्यन्यथाभावनयनं । तत्र तिर्यञ्चो मनुष्या वा गुणप्रत्ययेनान्यथा बद्ध्वा अप्यन्यथा परिणमय्योदीरयन्तीत्येता एकोनत्रिंशत्प्रकृतय उदीरणायां गुणपरिणामप्रत्यया

इति भावः । भवप्रत्यया आह—"सेसाउ" इत्यादि, शेषाः प्रकृतयः सातासातवेदनीयायुश्चतुष्टयगतिचतुष्टयजातिपञ्चकौदारिकसप्तकसंहननषट्कानाद्यसंस्थानपञ्चककर्कशगुरुस्पर्शानुपूर्वीचतुष्टयोपघातातपोद्योतप्रशस्तविहायोगतित्रसस्थावरबादरसूक्ष्मपर्याप्तापर्याप्तसाधारणदुर्भगदुःस्वरानादेययशःकीर्त्तिनिर्माणनीचैर्गोत्ररूपाः षट्पञ्चाशत्सङ्ख्या अनुभागोदीरणामधिकृत्य भवप्रत्यया वेदितव्याः, एतासामनुभागोदीरणाया गुणप्रत्ययत्वाभावेन भवप्रत्ययत्वात् । तथा पूर्वोक्ता अपि प्रकृतयः पूर्वोक्तशेषाणां प्रागुक्ततिर्यङ्मनुष्यव्यतिरिक्तानां भवप्रत्ययोदीरणा ज्ञातव्याः । तथाहि—देवनारकैर्व्रततरहितैश्च तिर्यङ्मनुष्यैर्नवानां नोकषायाणां पश्चानुपूर्व्या उत्कृष्टानुभागस्पर्धकादारभ्येत्यर्थः, असङ्ख्येया अनुभागा उदीर्यन्ते भवप्रत्ययादेव । तथा वैक्रियसप्तकतैजससप्तकवर्णपञ्चकगन्धद्विकरसपञ्चकस्निग्धरूक्षशीतोष्णस्पर्शस्थिरास्थिरशुभाशुभागुरुलघुप्रकृतीनां देवा नारकाश्चानुभागं भवप्रत्ययादेवोदीरयन्ति । तथा समचतुरस्रसंस्थानस्य भवधारणीये शरीरे वर्तमाना देवा भवप्रत्ययादनुभागोदीरणां कुर्वन्ति । मृदुलघुस्पर्शपराघातोद्योतप्रशस्तविहायोगतिसुस्वरप्रत्येकनाम्नामुत्तरवैक्रियशरीरिणो विहाय शेषाणां भवप्रत्ययादनुभागोदीरणा प्रवर्तते । सुभगादेययशःकीर्त्युच्चैर्गोत्राणामनुभागोदीरणा गुणहीनस्य भवप्रत्यया, गुणवतां तु गुणप्रत्यया । तथा सर्वेषां घातिकर्मणामनुभागोदीरणा देवनारकाणां भवप्रत्यया । शेषभावना तु सुगमेति । पञ्चसङ्ग्रहे त्वेवमुक्तम्—"जा जम्मि भवे णियमा उदीरए ताउ भवणिमित्ताउ । परिणामपच्चयाउ सेसाउसईससवन्न ॥ १ ॥ " अस्या अर्थः—याः प्रकृतीर्यस्मिन् भवे नियमान्निश्चयेनोदीरयन्ति ता भवनिमित्ता भवप्रत्ययोदीरणा इति भावः । तत्र नरकभवप्रत्यया नरकत्रिकस्योदीरणा, देवभवप्रत्यया देवत्रिकस्य, तिर्यग्भवप्रत्यया तिर्यक्त्रिकाद्यजातिचतु-

ष्टयस्थावरसूक्ष्मसाधारणातपनाम्नां, मनुष्यभवप्रत्यया मनुष्यत्रिकस्य । शेषा एताभ्यो विंशतिप्रकृतिभ्यो व्यतिरिक्ताः परिणामप्रत्ययोदीरणाः । ताश्च ध्रुवोदया एव, यतः सती विद्यमाना सोदीरणा सर्वेषु भवेषु, सा चैतासामुदीरणा निर्गुणपरिणामा द्रष्टव्येति । न चैतदपि विरुद्धं, विवक्षाभेदेनेत्थमप्युक्तेर्युक्तत्वादिति । किं च सर्वा अपि प्रकृतयो यथायोगं भव एवोदीर्यन्ते, तिर्यग्गतियोग्यास्तिर्यग्भवे, मनुष्यगतियोग्या मनुष्यभवे, नरकगतियोग्या नरकभवे, देवगतियोग्याश्च देवभवे इत्यतः सर्वा अपि भवप्रत्ययोदीरणा । यद्वा सर्वा अपि प्रकृतीस्तत्तत्परिणामवशेन प्रभूतरसाः सतीरल्परसाः कृत्वाऽल्परसाश्च सतीः प्रभूतरसाः कृत्वोदीरयन्ति सर्वेऽपि जीवा इति सर्वा अपि प्रकृतयः परिणामप्रत्ययोदीरणा वेदितव्याः । उक्तं च—"भवपच्चइया सव्वा तहेव परिणामपच्चइया" तस्मादत्र विचित्रोक्तौ विवक्षाभेद एव शरणमिति भावनीयम्॥९३॥

तदेवं कृता प्रत्ययप्ररूपणाऽथ साद्यनादिप्ररूपणा कर्तव्या, सा च द्विधा—मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र प्रथमतो मूलप्रकृतिविषयां तां कुर्वन्नाह—

घाईणं अजहन्ना दोण्हमणुक्कोसिया य तिविहा उ । वेयणिएणुक्कस्सा अजहन्ना मोहणीए य ॥ ५४ ॥
साइअणाई धुव अधुवा उ तस्सेसगा उ दुविगप्पा । आउस्स साइ अधुवा सव्वविगप्पा उ विन्नेया ॥५५॥

व्याख्या—मोहनीयरहितानां त्रयाणां घातिकर्मणामजघन्यानुभागोदीरणा त्रिविधा—अनादिर्ध्रुवाऽध्रुवा चेति । एषां हि क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ जघन्यानुभागोदीरणा भवति, सा च सादिरध्रुवा च । शेषकालं त्वजघन्या, सा चानादिर्ध्रुवोदीरणेति कृत्वा, ध्रुवाध्रुवे अभव्याभव्यापेक्षया । तथा द्वयोर्नामगोत्रयोरनुत्कृष्टानुभागोदी-

रणा त्रिविधाऽनादिर्ध्रुवाऽध्रुवा चेति। अनयोर्ह्युत्कृष्टानुभागोदीरणा सयोगिकेवलिनि, सा च सादिरध्रुवा च, शेषकालं त्वनुत्कृष्टा, सा चानादिर्ध्रुवोदीरणत्वात्, ध्रुवाध्रुवे प्राग्वत्। तथा वेदनीयेऽनुत्कृष्टा मोहनीये चाजघन्यानुभागोदीरणा सादिरनादिरध्रुवा ध्रुवा च। तथाहि—उपशमश्रेण्यां सूक्ष्मसंपरायगुणस्थाने यद्बद्धं सातवेदनीयं तस्य सर्वार्थसिद्धविमानप्राप्तौ प्रथमसमये योदीरणा प्रवर्तते सोत्कृष्टा, सा च सादिरध्रुवा च। ततोऽन्या सर्वाऽप्यनुत्कृष्टा, सा चाप्रमत्तगुणस्थानादौ न भवति, ततः प्रतिपाते च भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवे प्राग्वत्। तथा मोहनीयस्य जघन्यानुभागोदीरणा सूक्ष्मसंपरायरूपकस्य समयाधिकावलिकाशेषायां स्थितौ, सा च सादिः, तदनन्तरसमये चाभावादध्रुवा, शेषकालं चाजघन्या, सा चोपशान्तमोहगुणस्थाने न भवति, ततः प्रतिपाते च भवतीति सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवे प्राग्वत्। तच्चैषा उक्तव्यतिरिक्ता भेदाः सादयोऽध्रुवाश्चेति द्विविकल्पाः। तथाहि—चतुर्णां घातिकर्मणामुत्कृष्टानुत्कृष्टे अनुभागोदीरणे मिथ्यादृष्टौ पर्यायेण प्राप्यमाणत्वात्साद्यध्रुवे, जघन्या चाजघन्यावसरे एव भाविता। तथा नामगोत्रवेदनीयानां जघन्याजघन्ये अनुभागोदीरणे मिथ्यादृष्टौ पर्यायेण प्राप्यमाणत्वात् साद्यध्रुवे, उत्कृष्टा चानुत्कृष्टावसरे एव भाविता। आयुषां तु सर्वेऽपि विकल्पा अध्रुवोदीरणत्वादेव साद्यध्रुवाः ॥ ५४–५५ ॥

तदेवं कृता मूलप्रकृतिविषया साद्यादिप्ररूपणाऽथोत्तरप्रकृतिविषयां तामाह—

मउलहुआणुक्कस्सा चउविहा तिण्हमवि य अजहन्ना। णाइयधुवा य अधुवा वीसाए होय णुक्कोसा ॥५६॥
तेवीसाए अजहण्णा वि य एयासि सेसगविगप्पा। सव्वविगप्पा सेसाण वावि अधुवा य साईया ॥ ५७ ॥

व्याख्या—मृदुलघुस्पर्शयोरनुत्कृष्टानुभागोदीरणा चतुर्विधा सादिरनादिर्ध्रुवाऽध्रुवा चेति । अनयोर्ह्युत्कृष्टानुभागोदीरणाऽऽहारकशरीरस्थस्य मुनेर्भवति, सा च सादिरध्रुवा च । ततोऽन्या सर्वाऽप्यनुत्कृष्टा, सापि चाहारकशरीरमुपसंहरतः सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवे प्राग्वत् । तथा त्रयाणां मिथ्यात्वगुरुकर्कशानामजघन्यानुभागोदीरणाऽपि चतुर्विधा सादिरनादिर्ध्रुवाऽध्रुवा चेति । तत्र सम्यक्त्वसंयमौ युगपत्प्रतिपित्सोर्मिथ्यात्वस्य जघन्यानुभागोदीरणा, सा च साद्यध्रुवा समयमात्रत्वात्, ततोऽन्या सर्वाऽप्यजघन्या, सा च सम्यक्त्वात्प्रतिपततः सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवे प्राग्वत् । कर्कशगुरुस्पर्शयोर्जघन्यानुभागोदीरणा केवलिसमुद्घातान्निवर्तमानस्य षष्ठसमये भवति, सा चैकसामयिकीति साद्यध्रुवा । ततोऽन्या सर्वाऽप्यजघन्या । साऽपि केवलिसमुद्घातान्निवर्तमानस्य सप्तमे समये भवन्ती सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवे प्राग्वत् । तथा तैजससप्तकमृदुलघुवर्जशुभवर्णाद्येकादशकागुरुलघुस्थिरशुभनिर्माणलक्षणानां विंशतिप्रकृतीनामनुत्कृष्टानुभागोदीरणाऽनादिर्ध्रुवाऽध्रुवा चेति त्रिविधा । यत एतासामुत्कृष्टानुभागोदीरणा सयोगिकेवलिचरमसमये, ततोऽन्या सर्वाऽप्यनुत्कृष्टा, सा चानादिर्ध्रुवोदीरणत्वात्, ध्रुवाध्रुवे प्राग्वदिति । तथा त्रयोविंशतिप्रकृतीनां ज्ञानावरणपञ्चकदर्शनावरणचतुष्ककृष्णनीलदुरभिगन्धतिक्तकटुरूक्षशीतास्थिराशुभान्तरायपञ्चकरूपाणामजघन्यानुभागोदीरणाऽप्यनादिध्रुवाध्रुवभेदेन त्रिधा । यत आसां स्वस्वोदीरणान्ते जघन्यानुभागोदीरणा, सा च साद्यध्रुवा, ततोऽन्या सर्वाऽप्यजघन्या, सा चानादिर्ध्रुवोदीरणत्वात्, ध्रुवाध्रुवे प्राग्वत् । एतासामुक्तप्रकृतीनां शेषविकल्पा मृदुलघुविंशतीनां जघन्याजघन्योत्कृष्टा मिथ्यात्वगुरुकर्कशत्रयोविंशतीनां चोत्कृष्टानुत्कृष्टजघन्याः सादयोऽध्रुवाश्च भव-

न्ति । तथाहि—मृदुलघुविंशतीनां जघन्याजघन्ये अनुभागोदीरणे कर्कशगुरुमिथ्यात्वत्रयोविंशतीनां चोत्कृष्टानुत्कृष्टे मिथ्यादृष्टौ पर्यायेण प्राप्यमाणत्वात्साद्यध्रुवे । उत्कृष्टा जघन्या च क्रमाद्द्वयविषया प्रागेव भाविता । शेषाणामुक्तव्यतिरिक्तानां दशोत्तरशतसङ्ख्यानां सर्वेऽपि विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपा अध्रुवोदयत्वादेव साद्यध्रुवाः ॥ ५६–५७॥

कृता साद्यनादिप्ररूपणाऽथ स्वामित्वं वक्तव्यं, तच्च द्विधा—उत्कृष्टोदीरणाविषयं जघन्योदीरणाविषयं च । तत्राद्यस्वामित्वमाह—

दाणाइ अचक्खूणं जेट्ठा आइम्मि हीणलद्धिस्स । सुहुमस्स चक्खुणो पुण तेइंदियसव्वपज्जत्ते ॥ ५८ ॥

व्याख्या—सूक्ष्मस्य सूक्ष्मैकेन्द्रियस्य हीनलब्धिकस्य सर्वस्तोकदानाद्यचक्षुर्दर्शनविज्ञानलब्धियुक्तस्यादौ प्रथमसमये वर्तमानस्यान्तरायपञ्चकाचक्षुर्दर्शनावरणरूपाणां षण्णां प्रकृतीनामुत्कृष्टानुभागोदीरणा भवति । चक्षुर्दर्शनावरणस्य पुनस्त्रीन्द्रियस्य सर्वाग्निः पर्याप्तनिः पर्याप्तस्य पर्याप्तचरमसमये उत्कृष्टानुभागोदीरणा दानान्तरायादिकृतलब्ध्यपकर्षस्य चक्षुर्दर्शनावरणकृतलब्धिप्रतिबन्धस्य च परमकाष्ठायाः प्रतिनियतसमय एव संभवात्तदुपादानं ॥ ५८ ॥

णिद्दाइपंचगस्स य मज्झिमपरिणामसंकिलिट्ठस्स । अपुमाइ असायाणं णरए जेट्ठठिइ समत्तो ॥५९॥

व्याख्या—मध्यमपरिणामस्य तत्प्रायोग्यसंक्लेशवतः सर्वपर्याप्तिपर्याप्तस्य निद्रापञ्चकस्योत्कृष्टानुभागोदीरणाऽतिविशुद्धस्यातिसंक्लिष्टस्य वा निद्रापञ्चकस्योदय एव न भवतीति कृत्वा मध्यमपरिणामग्रहणं । तथाऽपुमादीनां नपुंसकवेदादीनां

नपुंसकवेदारतिशोकभयजुगुप्सानामसातस्य चोत्कृष्टानुभागोदीरणास्वामी नैरयिको ज्येष्ठस्थितिक उत्कृष्टायुष्कः समाप्तः सर्वपर्याप्तिपर्याप्तः सर्वसंक्लिष्टो ज्ञातव्यः ॥ ५९ ॥

पंचिंदियतसबायरपज्जत्तगसायसूसरगईणं । वेउव्वुस्सासाण य देवो जेट्ठठिइ समत्तो ॥ ६० ॥

व्याख्या—देवो ज्येष्ठस्थितिकस्त्रयस्त्रिंशत्सागरोपमायुः समाप्तः सर्वपर्याप्तिभिः पर्याप्तः सर्वविशुद्धः पञ्चेन्द्रियजातित्रसबादरपर्याप्तसातवेदनीयसुस्वरदेवगतिवैक्रियसप्तकोच्छ्वासरूपाणां पञ्चदशप्रकृतीनामुत्कृष्टानुभागोदीरणास्वामी ॥ ६० ॥

सम्मत्तमीसगाणं से काले गिण्हिहित्ति मिच्छत्तं । हस्सरईण य सहसारगस्स पज्जत्तदेवस्स ॥ ६१ ॥

व्याख्या—"से काले त्ति" अनन्तरसमये यो मिथ्यात्वं ग्रहीष्यति तस्य सर्वसंक्लिष्टस्य सम्यक्त्वसम्यङ्मिथ्यात्वयोर्यथासंभवमुदये सत्युत्कृष्टानुभागोदीरणा। तथा सहस्रारदेवस्य सर्वाभिः पर्याप्तिभिः पर्याप्तस्य हास्यरत्योरुत्कृष्टानुभागोदीरणा

गइदुगुव्वघायाणिट्ठखगइनीयाण दुहचउक्कस्स । णिरउक्कस्स समत्ते असमत्ताए णरस्संते ॥ ६२ ॥

व्याख्या—नैरयिक उत्कृष्टस्थितौ वर्तमानः सर्वपर्याप्तिपर्याप्तः सर्वोत्कृष्टसंक्लेशयुक्तो नरकगतिहुण्डसंस्थानोपघाताप्रशस्तविहायोगतिनीचैर्गोत्राणां "दुहचउक्कस्स त्ति" दुर्भगचतुष्कस्य दुर्भगदुःस्वरानादेययशःकीर्त्तिरूपस्य सर्वसङ्ख्यया नवानां प्रकृतीनामुत्कृष्टानुभागोदीरणास्वामी। तथाऽपर्याप्तकनाम्नो मनुष्योऽपर्याप्तश्चरमसमये वर्तमानः सर्वसंक्लिष्ट उत्कृष्टानुभागोदीरणास्वामी। अपर्याप्तकसंज्ञितिर्यक्पञ्चेन्द्रियादपर्याप्तमनुष्योऽतिसंक्लिष्ट इति मनुष्यग्रहणम् ॥ ६२ ॥

करकगुरुसंघयणाथीपुमसंगाणतिरियणामाणं । पंचिंदिउं तिरिक्खो अट्ठमवासे ठवासाऊ ॥ ६३ ॥

व्याख्या—कर्कशगुरुस्पर्शयोः संहननानामादिवर्जानां पञ्चानां स्त्रीपुरुषवेदयोः संस्थानानामाद्यन्तवर्जानां चतुर्णां तिर्यङ्नाम्नश्च तिर्यग्गतेः सर्वसङ्ख्यया चतुर्दशप्रकृतीनां तिर्यक्संज्ञिपञ्चेन्द्रियोऽष्टवर्षायुरष्टमे वर्षे वर्तमानः सर्वसंक्लिष्ट उत्कृष्टानुभागोदीरणास्वामी ॥ ६३ ॥

मणुउरालियवज्जरिसहाण मणुउं तिपल्लपज्जत्तो । नियगठिई उक्कस्सो पज्जत्तो आउगाणं पि ॥६४॥

व्याख्या—मनुष्यस्त्रिपल्यः पट्योपमत्रयप्रमाणायुष्कः पर्याप्तः सर्वाग्निः पर्याप्तनिग्निः सर्वविशुद्धो मनुष्यगत्यौदारिकसप्तकवज्रर्षभनाराचसंहननानां सर्वसङ्ख्यया नवप्रकृतीनामुत्कृष्टानुभागोदीरणास्वामी । तथा सर्वोत्कृष्टनिजस्थितौ वर्तमानः पर्याप्तः सर्वपर्याप्तनिग्निः सर्वविशुद्धस्त्रयाणामायुषां नरकायुषस्तु सर्वसंक्लिष्ट उत्कृष्टानुभागोदीरको भवति ॥ ६४ ॥

हस्सठिई पज्जत्ता तणामा विगलजाइसुहुमाणं । थावरनिगोयएगिंदियाणमवि बायरो णवरि ॥६५॥

व्याख्या—ह्रस्वस्थितिकाः पर्याप्ताः स्वनामानो द्वीन्द्रियादिजातिसूक्ष्मनामकर्मपर्याप्तनिष्पन्ननामानो विकलेन्द्रियजातीनां सूक्ष्मनाम्नश्चोत्कृष्टानुभागोदीरकाः । द्वित्रिचतुरिन्द्रियाः सर्वजघन्यस्थितिकाः सर्वपर्याप्तिपर्याप्ताः सर्वसंक्लिष्टा द्वित्रिचतुरिन्द्रियजातिनाम्नां सूक्ष्माश्च तादृशाः सूक्ष्मनाम्न उत्कृष्टानुभागोदीरका इति संमुखोऽर्थः । ह्रस्वस्थितौ वर्तमानाः सर्वसंक्लिष्टा भवन्तीति कृत्वा तदुपादानं । तथा स्थावरसाधारणैकेन्द्रियजातिनाम्नां जघन्यस्थितौ वर्तमानो बादर एकेन्द्रियः

सर्वपर्याप्तिपर्याप्तः सर्वसंक्लिष्टस्तत्र स्थावरनाम्नः स्थावरः साधारणनाम्नः साधारण एकेन्द्रियजातेर्वाप्युत्कृष्टानुभागोदीरणास्वामिनौ भवतः । बादरस्य महान् संक्लेशो भवतीति इह बादरोपादानम् ॥ ६५ ॥

आहारतणू पज्जत्तगस्स (गोय) चउरंसमउयलहुगाणं । पत्तेयखगइपरघायाहारतणूण य विसुद्धो ॥६६॥

व्याख्या—समचतुरस्रसंस्थानमृदुलघुस्पर्शप्रत्येकप्रशस्तविहायोगतिपराघाताहारकसप्तकानां सर्वसङ्ख्यया त्रयोदशप्रकृतीनामाहारकशरीरी संयतः पर्याप्तः सर्वपर्याप्तिभिः सर्वविशुद्ध उत्कृष्टानुभागोदीरणास्वामी ॥ ६६ ॥

उत्तरविउव्विय जई उज्जोयस्सायवस्स खरपुढवी । णियगगईणं भणिया तइए समए णुपुव्वीणं ॥६७॥

व्याख्या—उत्तरवैक्रिये वर्तमानो यतिः सर्वपर्याप्तिपर्याप्तः सर्वविशुद्ध उद्योतनाम्न उत्कृष्टानुभागोदीरणास्वामी । तथा खरपृथ्वीकायिक उत्कृष्टायां स्थितौ वर्तमानः सर्वपर्याप्तिपर्याप्तः सर्वविशुद्ध आतपनाम्न उत्कृष्टानुभागोदीरणास्वामी । तथा नरसुरानुपूर्व्यौर्विशुद्धा निरयतिर्यगानुपूर्व्योः संक्लिष्टा निजकगतीनां तृतीये समये वर्तमाना उत्कृष्टानुभागोदीरणास्वामिनः ॥ ६७ ॥

जोगंते सेसाणं सुभाणमियरासि चउसु वि गईसु । पज्जत्तुक्कमिस्सस्सोहीणमणोहिलद्धिस्स ॥ ६८॥

व्याख्या—योगिनः सयोगिकेवलिनोऽन्ते सर्वापवर्तनरूपे वर्तमानस्य शेषाणां भणितोऽरितानां शुभप्रकृतीनां तैजससप्तकमृदुलघुवर्जशुभवर्णाद्येकादशकागुरुलघुस्थिरशुभसुभगादेययशःकीर्तिनिर्माणोच्चैर्गोत्रतीर्थकरप्रकृतीनां पञ्चविंशतिसङ्ख्यानामुत्कृष्टानुभागोदीरणा भवति । इतरासां चाशुभप्रकृतीनां मतिश्रुतमनःपर्यायकेवलज्ञानकेवलदर्शनावरणमिथ्या-

त्वषोरुशकषायकर्कशगुरुवर्जशेषकुवर्णादिसप्तकास्थिराशुभरूपाणामेकत्रिंशत्प्रकृतीनां चतसृष्वपि गतिषु मिथ्यादृष्टेः सर्वपर्याप्तिपर्याप्तस्योत्कटसंक्लेशवत उत्कृष्टानुभागोदीरणा भवति । तथाऽवधिज्ञानावरणावधिदर्शनावरणयोरनवधिलब्धिकस्यावधिलब्धिरहितस्योत्कृष्टानुभागोदीरणा भवति । तस्यैव चतुर्गतिकस्य मिथ्यादृष्टेः अवधिलब्धियुक्तस्य हि प्रभूतोऽवधिज्ञानदर्शनावरणानुभागः क्षीयत इत्युत्कृष्टो न लभ्यते, ततोऽनवधिलब्धिकस्येत्युक्तम् ॥ ६८ ॥

तदेवमुक्तमुत्कृष्टोदीरणास्वामित्वमथ जघन्योदीरणास्वामित्वं प्रतिपादयन्नाह—

सुयकेवलिणो मइसुयचक्खुअचक्खूणुदीरणा मंदा । विउलपरमोहिगाणं मणनाणोहीदुगस्सावि ॥६९॥

व्याख्या—मतिश्रुतज्ञानावरणचक्षुरचक्षुर्दर्शनावरणानां श्रुतकेवलिनश्चतुर्दशपूर्विणः क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य मन्दा जघन्यानुभागोदीरणा भवति । तथा क्षीणकषायस्य विपुलमतिमनःपर्यायज्ञानभृतः समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य मनःपर्यायज्ञानावरणस्य जघन्यानुभागोदीरणा । तथा परमावधियुक्तस्य क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्यावधिज्ञानावधिदर्शनावरणयोर्जघन्यानुभागोदीरणा ॥ ६९ ॥

खवणाय विग्घकेवलसंजलणाणं च णोकसायाणं । सगसगउदीरणंते णिद्दापयलाणमुवसंते ॥ ७० ॥

व्याख्या—क्षपणायोत्थितस्यान्तरायपञ्चककेवलज्ञानकेवलदर्शनावरणसंज्वलनचतुष्टयनोकषायनवकरूपाणां विंशतिप्रकृतीनां स्वकस्वकोदीरणान्ते जघन्यानुभागोदीरणा भवति । तत्रान्तरायपञ्चककेवलज्ञानकेवलदर्शनावरणानां क्षीणकषायस्य संज्वलनानां वेदानां च त्रयाणामनिवृत्तिबादरस्य स्वस्वोदीरणापर्यवसाने संज्वलनलोभस्य सूक्ष्मसंपरायस्य षण्णां

नोकषायाणामपूर्वकरणगुणस्थानकचरमसमये जघन्यानुभागोदीरणा, निद्राप्रचलयोरुपशान्तमोहे तस्य सर्वविशुद्धत्वात्[1] ७०

णिद्दाणिद्दाईणं पमत्तविरए विसुज्झमाणम्मि । वेयगसम्मत्तस्स उ सगखवणोदीरणाचरमे ॥ ७१ ॥

व्याख्या—निद्रानिद्रादीनां निद्रानिद्राप्रचलाप्रचलास्त्यानर्धीनां प्रमत्तविरतस्य विशुध्यमानस्याप्रमत्तभावाभिमुखस्य जघन्यानुभागोदीरणा प्रवर्तते । तथा वेदकसम्यक्त्वस्य क्षायोपशमिकसम्यक्त्वस्य क्षायिकसम्यक्त्वमुत्पादयतो मिथ्यात्वसम्यग्मिथ्यात्वक्षपणानन्तरं स्वकक्षपणकाले उदीरणा चरमे चरमोदीरणाया समयाधिकावलिकाशेषायां स्थितौ सत्यां प्रवर्तमानायां जघन्यानुभागोदीरणा भवति । सा च चतुर्गतिकानामन्यतमस्य विशुध्यमानस्य वेदितव्या ॥ ७१ ॥

से काले सम्मत्तं ससंजमं गिण्हउं य तेरसगं । सम्मत्तमेव मीसे आऊण जहन्नगठिईसु ॥ ७२ ॥

व्याख्या—सेऽनन्तरे काले द्वितीयसमये यः सम्यक्त्वं ससंयमं ग्रहीष्यति तस्य त्रयोदशानां मिथ्यात्वानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणरूपाणां प्रकृतीनां जघन्यानुभागोदीरणा भवति । अत्रायं सम्प्रदायः—योऽनन्तरसमये सम्यक्त्वसंयमौ युगपत्प्रतिपद्यते तस्य मिथ्यादृष्टेर्मिथ्यात्वानन्तानुबन्धिनां जघन्यानुभागोदीरणाऽविरतसम्यग्दृष्टिश्च सन् योऽनन्तरसमये संयमं प्रतिपत्स्यते तस्याप्रत्याख्यानकषायाणां[2], देशविरतश्च सन् यः संयमं प्रतिपत्स्यते तस्य प्रत्याख्यानावरणकषायाणामिति, मिथ्यादृष्ट्यपेक्षया ह्यविरतसम्यग्दृष्टिरनन्तगुणविशुद्धः, ततोऽपि देशविरतोऽनन्तगुणविशुद्ध इत्युक्तक्रमेणैवासां जघन्यानुभागोदीरणासंभवः । उक्तं च—"सम्मपडिवत्तिकाले पंचण्ह वि संजमस्स चउचउसु" । तथा यः सम्यग्म-

१ जघन्यानुभागोदीरणेति गम्यं. २ जघन्यानुभागोदीरणेति गम्यं.

थ्यादृष्टिर्यदनन्तरसमये सम्यक्त्वमेव प्रतिपत्स्यते, तस्य तत्समये सम्यग्मिथ्यात्वस्य जघन्यानुभागोदीरणा । सम्यग्मिथ्यादृष्टिस्तथाविधविशुद्ध्यभावात्सम्यक्त्वसंयमौ युगपन्न प्रतिपद्यते, किंतु केवलं सम्यक्त्वमेवेति तदेव केवलमुक्तं । तथा चतुर्णामायुषां निजनिजजघन्यस्थितौ वर्तमानो जघन्यमनुभागमुदीरयति, तत्र त्रयाणामायुषां संक्लेशादेव जघन्यस्थितिबन्धात्तत्रैव जघन्यानुभाग इत्यतिसंक्लिष्टो जघन्यानुभागोदीरकः, नरकायुषस्तु विशुद्धिमहिम्ना जघन्यः स्थितिबन्धो जघन्यानुभागलाभोऽपि तत्रैवेत्यतिविशुद्धो जघन्यानुभागोदीरकः ॥ ७२ ॥

पोग्गलविवागियाणं भवाइसमए विसेसमवि चासिं। आइतणूणं दोण्हं सुहुमो वाऊ अ अप्पाऊ ॥७३॥

व्याख्या—पुद्गलविपाकिनीनां सर्वासामपि भवादिसमये जघन्यानुभागोदीरणा । एतच्च सामान्यवचनं । ततोऽमुकस्या अमुक उदीरक इत्येवंरूपं विशेषमपि चासां प्रकृतीनां वक्ष्यामि । प्रतिज्ञातमेवाह—"आईत्यादि" आद्ययोर्द्वयोस्तन्वोरौदारिकवैक्रियरूपयोर्यथासङ्ख्यं सूक्ष्मो वायुश्चाद्यायुर्जघन्यानुभागोदीरकः । इह शरीरग्रहणं बन्धनसङ्घातोपलक्षणं, तेनायमर्थः—औदारिकशरीरौदारिकसङ्घातौदारिकबन्धनचतुष्टयरूपस्यौदारिकषट्कस्यापर्याप्तसूक्ष्मैकेन्द्रियो, वायुकायिको वैक्रियषट्कस्य च पर्याप्तबादरो वायुकायिकोऽद्यायुर्जघन्यानुभागोदीरक इति । उक्तं च—"उरलस्स सुहुमापज्जो वाऊ बायरपज्जत्तवेउव्वे" । इति ॥ ७३ ॥

बेइंदियअप्पाउग णिरय चिरट्ठिइ असन्निणो वावि । अंगोवंगाणाहारगाइ जइणोऽप्पकालम्मि ॥७४॥

व्याख्या—द्वयोरङ्गोपाङ्गयोरौदारिकाङ्गोपाङ्गवैक्रियाङ्गोपाङ्गनाम्नोर्यथाक्रममद्यायुर्द्वीन्द्रियस्तथाऽसंज्ञिभवाद्धृत्य जातो

नारकश्चिरस्थितिको जघन्यानुभागोदीरको भवति । इहेयं भावना—द्वीन्द्रियोऽपर्याप्तौदारिकाङ्गोपाङ्गनाम्न उदयप्रथमसमये जघन्यमनुभागमुदीरयति । तथाऽसंज्ञिपञ्चेन्द्रियः पूर्वोद्वलितवैक्रियाङ्गोपाङ्गं स्तोककालं बद्ध्वा स्वस्थितियोग्यतानुसारेण चिरस्थितिको नैरयिको जातः, तस्यातिसंक्लिष्टस्य वैक्रियाङ्गोपाङ्गनाम्न उदयाद्यसमये वर्तमानस्य जघन्यानुभागोदीरणा । द्वीन्द्रियस्याऽपर्याप्तकत्वं नैरयिकस्य च चिरस्थितिकत्वं संक्लेशनिमित्तमिति संक्लेशव्यक्तये तथोपादानं । तथा "आहारगाए त्ति" स्त्रीत्वनिर्देशोऽयं सौत्रः, तत आहारकस्योपलक्षणादाहारकसप्तकस्य यतेराहारकशरीरं कुर्वतः संक्लिष्टस्याऽपे काले प्रथमे समये इत्यर्थः जघन्यानुभागोदीरणा ॥ ७४ ॥

अमणो चउरंससुभाण पज्ज चिरसगठिइ सेसे । संघयणाण य मणुउ हुंडुवघायाणमवि सुहुमो॥७५॥

व्याख्या—अमना असंज्ञिपञ्चेन्द्रियोऽपर्याप्तिसंक्लिष्टः प्रथमसमयतद्भवस्थ आहारकः समचतुरस्रसंस्थानवज्रर्षभनाराचसंहननयोर्जघन्यानुभागोदीरकः । अपर्याप्तग्रहणं संक्लेशप्रतिपत्तये । तथाऽसंज्ञिपञ्चेन्द्रिय एव "सगचिरठिइ त्ति" स्वायुरुत्कृष्टस्थितौ वर्तमानो भवप्रथमसमये शेषे, अत्र षष्ठ्यर्थे सप्तमी, जातौ चैकवचनं । तदयमर्थः—शेषाणां हुंडवर्जानां चतुर्णां संस्थानानां जघन्यमनुभागमुदीरयति । तथा शेषाणां संहनानां सेवार्तवज्रर्षभनाराचवर्जानां पूर्वकोट्यायुर्मनुष्य आहारकः स्वभवप्रथमसमये वर्तमानो जघन्यमनुभागमुदीरयति । इह दीर्घायुर्ग्रहणं विशुद्धिप्रतिपत्तये तिर्यक्पञ्चेन्द्रियापेक्षया च प्रायो मनुष्या अपवर्ता इति मनुष्योपादानं । तथा सूक्ष्मैकेन्द्रियः सुदीर्घायुःस्थितिक आहारकः प्रथमसमये हुंडोपघातनाम्नोर्जघन्यानुभागोदीरकः ॥ ७५ ॥

सेवट्टस्स बिइंदिय बारसवासस्स मज्झलहुगाणं। सन्नि विसुद्धाणाहारगस्स वीसा अइकिलिट्ठो ॥ ७६ ॥

व्याख्या—द्वीन्द्रियस्य द्वादशवर्षायुषो द्वादशे वर्षे वर्तमानस्य सेवार्तसंहननसत्कजघन्योदीरणास्वामित्वं। तथा मृदुलघुस्पर्शयोः संज्ञिपञ्चेन्द्रियस्य स्वभूमिकानुसारेणातिविशुद्धस्यानाहारकस्य जघन्यानुभागोदीरणास्वामित्वं। तथा तैजससप्तकमृदुलघुवर्जशुभवर्णाद्येकादशकागुरुलघुस्थिरशुभनिर्माणरूपाणां विंशतिप्रकृतीनामतिसंक्लिष्टोऽन्तरालगतौ वर्तमानोऽनाहारको मिथ्यादृष्टिर्जघन्यानुभागोदीरणास्वामी ज्ञातव्यः ॥ ७६ ॥

पत्तेयमुरालसमं इयरं हुंडेण तस्स परघाउं। अप्पाउयस्स आयावुज्जोआणमवि तज्जोगो ॥ ७७ ॥

व्याख्या—प्रत्येकनामौदारिकसमं वक्तव्यं, औदारिकस्येव प्रत्येकनाम्नोऽपि सूक्ष्मैकेन्द्रियः प्रथमसमये वर्तमानो जघन्यानुभागोदीरको ज्ञातव्य इत्यर्थः। तथेतरत्साधारणनाम हुण्डेन समं वक्तव्यं, यथा सूक्ष्मैकेन्द्रियस्याहारकस्य प्रथमसमये हुण्डनाम्नो जघन्यानुभागोदीरणा प्रागुक्ता तथा साधारणनाम्नोऽपि वाच्येत्यर्थः। तथा तस्य सूक्ष्मैकेन्द्रियस्य शीघ्रपर्याप्तस्याल्पायुषोऽतिसंक्लिष्टस्य पर्याप्तिचरमसमये वर्तमानस्य पराघातनाम्नो जघन्यानुभागोदीरणा। तथाऽऽतपोद्योतनाम्नोस्तद्योग्यः पृथिवीकायिकः शरीरपर्याप्त्या पर्याप्तः प्रथमे समये वर्तमानः संक्लिष्टो जघन्यानुभागोदीरकः ॥ ७७ ॥

जाणावज्जीकरणं तिन्नगरस्स णवगस्स जोगंते। कक्कडगुरूणमंते णियत्तमाणस्स केवलिणो ॥ ७८ ॥

व्याख्या—आयोजिकाकरणं नाम केवलिसमुद्घातादर्वाग्भवति, तत्र आ मर्यादया केवलिदृष्ट्या योजनमतिशुभयोगानामायोजिका तस्याः करणं आयोजिकाकरणं। केचिदावर्जितकरणमित्याहुः, तत्रायमर्थः—आवर्जितो नामाभि-

मुखीकृतः, तथा च वक्तारो भवन्ति—आवर्जितोऽयं जनो मया संमुखीकृत इत्यर्थः । ततश्च तथाभव्यत्वेनावर्जितस्य सिद्धिगमनं प्रत्यभिमुखीकृतस्य करणमुदीरणावलिकायां कर्मप्रक्षेपणरूपं शुभयोगव्यापारणं आवर्जितकरणं । अपरे त्वावश्यककरणमिति पठन्ति । तत्रायमर्थः—आवश्यकेनावश्यभावेन करणमावश्यककरणं । तथाहि—समुद्घातं केचित्कुर्वन्ति केचिच्च न कुर्वन्ति, इदं तु सर्वेऽपि केवलिनः कुर्वन्तीति । तच्चायोजिकाकरणमसङ्ख्येयसमयात्मकमन्तर्मुहूर्त्तप्रमाणं । यदाह भगवानार्यश्यामः—"कइ समइए णं भंते आवज्जियाकरणे पन्नत्ते ? गोयमा असंखेज्जसमइए अंतोमुहुत्तिए पन्नत्ते" । तद्यावन्नाद्याप्यारभ्यते तावत्तीर्थकरकेवलिनस्तीर्थकरनाम्नो जघन्यानुभागोदीरणा, आयोजिकाकरणे ह्यनुभागोदीरणा बह्वी प्रवर्तत इत्यर्वाग्ग्रहणं । तथा नवकस्य नीलकृष्णदुरभिगन्धतिक्तकटुशीतरूक्षास्थिराशुभरूपस्य योग्यन्ते सयोगिकेवलिचरमसमये जघन्यानुभागोदीरणा, एतदुदीरकमध्येऽस्यैव सर्वविशुद्धत्वात् । कर्कशगुरुस्पर्शयोस्तु केवलिसमुद्घातान्निवर्तमानस्य केवलिनो मिथःसंहारसमये जघन्यानुभागोदीरणा ॥ ७८ ॥

सेसाण पगइवेई मज्झिमपरिणामपरिणउ हुज्जा । पच्चयसुभासुभा वि य चिंतिय णेउं विवागे य॥७९॥

व्याख्या—शेषाणां सातासातवेदनीयगतिचतुष्कजातिपञ्चकानुपूर्वीचतुष्कोच्छ्वासखगतिद्विकत्रसस्थावरबादरसूक्ष्मपर्याप्तापर्याप्तसुभगदुर्भगसुस्वरदुःस्वरादेयानादेययशःकीर्त्ययशःकीर्त्युच्चैर्गोत्रनीचैर्गोत्रलक्षणानां चतुस्त्रिंशत्प्रकृतीनां तत्तत्प्रकृत्युदये वर्तमानाः सर्वेऽपि जीवा मध्यमपरिणामपरिणता जघन्यानुभागोदीरणास्वामिनो भवन्ति । अथ सर्वत्र सामान्येन जघन्योत्कृष्टानुभागोदीरणास्वामित्वपरिज्ञानोपायमुपदिशति—"पच्चय त्ति" प्रत्ययं परिणामप्रत्ययभवप्रत्ययलक्षणं तथा प्रकृतीनां शुभ-

त्वमशुभत्वं च विपाकाँश्च पुद्गलविपाकादीन् चिन्तयित्वा सम्यक् परिज्ञाय जघन्योत्कृष्टानुभागोदीरणास्वामी यथावज्ज्ञेयः, तथाहि—परिणामप्रत्ययानुभागोदीरणा प्राय उत्कृष्टा, भवप्रत्यया तु जघन्या, शुभानां च संक्लेशे प्रायो जघन्यानुभागोदीरणाऽशुभानां च विशुद्धौ, विपर्यासे तूत्कृष्टा, पुद्गलादिविपाकानां पुद्गलादिप्रत्ययोत्कर्षे उत्कृष्टाऽऽद्यसमये तु जघन्येत्यादि परिभाव्य तत्तत्प्रकृत्युदयवति जघन्योत्कृष्टानुभागोदीरणास्वामित्वं निर्धारणीयमिति ॥ ७९ ॥

तदेवमुक्ताऽनुभागोदीरणाऽथ प्रदेशोदीरणाऽभिधातव्या । तत्र द्वावर्थाधिकारौ—साद्यनादिप्ररूपणा स्वामित्वप्ररूपणा च । साद्यनादिप्ररूपणा च द्विधा मूलोत्तरप्रकृतिविषयभेदात् । तत्र मूलप्रकृतिविषयां साद्यनादिप्ररूपणां तावदाह—

पंचण्हमणुक्कोसा तिहा पएसे चउव्विहा दोण्हं । सेसविगप्पा दुविहा सव्वविगप्पा य आउस्स ॥८०॥

व्याख्या—मोहायुर्वेदनीयवर्जानां पञ्चानां मूलप्रकृतीनां प्रदेशे प्रदेशविषयानुत्कृष्टोदीरणा त्रिविधाऽनादिध्रुवाध्रुवभेदात् । तथाहि—एतासामुत्कृष्टा प्रदेशोदीरणा गुणितकर्मांशे स्वस्वोदीरणान्ते लभ्यते, सा च साद्यध्रुवा, ततोऽन्या सर्वाऽप्यनुत्कृष्टा, सा चानादिर्ध्रुवोदीरणत्वात् । ध्रुवाध्रुवे अभव्याभव्यापेक्षया । तथा द्वयोर्वेदनीयमोहनीययोरनुत्कृष्टा प्रदेशोदीरणा चतुर्विधा साद्यनादिध्रुवाध्रुवभेदात् । तथाहि—वेदनीयस्योत्कृष्टा प्रदेशोदीरणा प्रमत्तयतेरप्रमत्तभावाभिमुखस्य सर्वविशुद्धस्य, मोहनीयस्य तु स्वोदीरणान्ते सूक्ष्मसंपरायस्येति, द्वयोरप्येषा साद्यध्रुवा, ततोऽन्या सर्वाऽप्यनुत्कृष्टा, सा च वेदनीयस्य प्रमत्तगुणस्थानान्मोहनीयस्य चोपशान्तमोहगुणस्थानात् पततः सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवे प्राग्वत् । एतासां सप्तानामपि मूलप्रकृतीनां शेषविकल्पा जघन्याजघन्योत्कृष्टा द्विविधाः साद्यध्रुवभेदात् । तथाहि—

एतासां सप्तानामपि जघन्याजघन्ये प्रदेशोदीरणे मिथ्यादृष्टावतिसंक्लेशपरिणामभावाभावाभ्यां परावर्तमाने प्राप्येते इति साद्यध्रुवे । उत्कृष्टा च प्रागेव भाविता । आयुषश्च सर्वेऽपि विकल्पा अध्रुवोदीरणत्वादेव साद्यध्रुवाः ॥ ८० ॥

उत्तरप्रकृतीनां साद्यादिप्ररूपणार्थमाह—

मिच्छत्तस्स चउद्धा सगयालाए तिहा अणुक्कोसा । सेसविगप्पा दुविहा सव्वविगप्पा य सेसाणं ॥८१॥

व्याख्या—मिथ्यात्वस्यानुत्कृष्टा प्रदेशोदीरणा चतुर्विधा—साद्यनादिध्रुवाध्रुवभेदात् । तथाहि—अनन्तरसमये संयमसहितं सम्यक्त्वं प्रतिपित्सोर्मिथ्यादृष्टेर्मिथ्यात्वस्योत्कृष्टा प्रदेशोदीरणा, सा चैकसामयिकीति साद्यध्रुवा, ततोऽन्या सर्वाऽप्यनुत्कृष्टा, साऽपि सम्यक्त्वात्प्रतिपततो भवन्ती सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवे प्राग्वत् । तथा सप्तचत्वारिंशतः प्रकृतीनामनुत्कृष्टा प्रदेशोदीरणा त्रिविधाऽनादिध्रुवाध्रुवभेदात् । तथाहि—ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयरूपचतुर्दशप्रकृतीनां क्षीणकषायस्य गुणितकर्मांशस्य स्वस्वोदीरणान्ते उत्कृष्टा प्रदेशोदीरणा, सा च साद्यध्रुवा, ततोऽन्या सर्वाऽप्यनुत्कृष्टा, सा चानादिर्ध्रुवोदीरणत्वात्, ध्रुवाध्रुवे प्राग्वत् । तथा तैजससप्तकवर्णादिविंशतिस्थिरास्थिरशुभाशुभागुरुलघुनिर्माणलक्षणानां त्रयस्त्रिंशत्प्रकृतीनां गुणितकर्मांशस्य सयोगिकेवलिनश्चरमसमये उत्कृष्टा प्रदेशोदीरणा, सा च सादिरध्रुवा च, ततोऽन्या सर्वाऽप्यनुत्कृष्टा, सा चानादिर्ध्रुवोदीरणत्वात्, ध्रुवाध्रुवे प्राग्वत् । आसां शेषविकल्पा जघन्याजघन्योत्कृष्टरूपा द्विविधा साद्यध्रुवभेदात् । तथाहि—सर्वासामप्युक्तप्रकृतीनां मिथ्यादृष्टावतिसंक्लेशपरिणामे तत्प्रच्य-

वने च जघन्याजघन्ये परावृत्त्या प्राप्येते इति साद्यध्रुवे । उत्कृष्टा च प्रागेव भाविता । शेषाणां च दशोत्तरशतप्रकृतीनां सर्वेऽपि विकल्पा जघन्याजघन्योत्कृष्टानुत्कृष्टा अध्रुवोदीरणत्वादेव त्रिविधाः सादयोऽध्रुवाश्चेति ॥ ८१ ॥

कृता साद्यादिप्ररूपणाऽथ स्वामित्वमभिधेयं । तच्चोत्कृष्टप्रदेशोदीरणास्वामित्वं जघन्यप्रदेशोदीरणास्वामित्वं चेति द्विविधं । तत्राद्यं तावदाह—

अणुभागुदीरणाए जहन्नसामी पएसजेट्ठाए । घाईणं अप्पयरो उहीण विणोहिलंभेण ॥ ८२ ॥

व्याख्या—घातिकर्मणां सर्वेषामप्यनुभागोदीरणायां यो यो जघन्यानुभागोदीरणास्वामी प्रागुक्तः स स एवोत्कृष्टप्रदेशोदीरणास्वामी गुणितकर्मांशो ज्ञातव्यः । नवरमन्यतर इति श्रुतकेवलीतरो वाऽवधिज्ञानावधिदर्शनावरणयोरवधिलब्धिहीन उत्कृष्टप्रदेशोदीरको भाव्यः । इदमतीव संक्षिप्तमिति वितत्य व्याख्यायते—अवधिज्ञानदर्शनावरणवर्जज्ञानावरणपञ्चकदर्शनावरणचतुष्टयानां क्षीणकषायस्य श्रुतकेवलिन इतरस्य वा गुणितकर्मांशस्य समयाधिकावलिकाशेषायां स्थितावुत्कृष्टा प्रदेशोदीरणा । अवधिज्ञानदर्शनावरणयोः पुनरवधिलब्धिरहितस्य तस्यैव तदा सा । निद्राप्रचलयोरुपशान्तकषायस्य, स्त्यानर्द्धित्रिकस्य प्रमत्तसंयतेऽप्रमत्तभावाभिमुखे, मिथ्यात्वानन्तानुबन्धिकषायाणामनन्तरसमये ससंयमं सम्यक्त्वं प्रतिपित्सोर्मिथ्यादृष्टेश्चरमसमये,सम्यग्मिथ्यात्वस्य सम्यक्त्वप्रतिपत्त्यव्यवहितप्राक्समये,ऽप्रत्याख्यानावरणकषायाणामनन्तरसमये सर्वविरतिं प्रतिपित्सोरविरतसम्यग्दृष्टेः, प्रत्याख्यानावरणानां तादृशस्य देशविरतस्य, संज्वलनक्रोधमान-

मायानां तत्तद्वेदकस्य स्वस्वोदयपर्यवसाने, वेदत्रयसंज्वलनलोभयोस्तत्तद्वेदकस्य क्षपकस्य समयाधिकावलिकाचरमसमये, हास्यादिषट्कस्यापूर्वकरणचरमसमये, सर्वत्र गुणितकर्मांशस्योत्कृष्टा प्रदेशोदीरणा ज्ञाव्या ॥ ८२ ॥

वेयणियाणं गहिही से काले अप्पमायमिइ विरउं। संघयणपणगतणुदुगउज्जोआ अप्पमत्तस्स ॥८३॥

व्याख्या—"से काले" अनन्तरसमये योऽप्रमादं ग्रहीष्यत्यप्रमत्तगुणस्थानं प्राप्स्यति स प्रमत्तो विरतो वेदनीययोः सातासातरूपयोरुत्कृष्टप्रदेशोदीरको ज्ञवति, तस्य सर्वविशुद्धत्वात्। तथाऽप्रमत्तस्य प्रथमवर्जसंहननपञ्चकवैक्रियसप्तकाहारकसप्तकोद्योतनाम्नामुत्कृष्टा प्रदेशोदीरणा ॥ ८३ ॥

देवणिरयाउआणं जहन्नजेट्ठठिई गुरुअसाए। इयराऊण वि अट्ठमवासे णेयोऽट्ठवासाउं ॥ ८४ ॥

व्याख्या—देवनारकायुषोर्यथाक्रमं देवनारकौ दशवर्षसहस्रत्रयस्त्रिंशत्सागरोपमलक्षणजघन्योत्कृष्टस्थितिकौ गुरुदुःखोदये वर्तमानावुत्कृष्टप्रदेशोदीरकौ, प्रज्ञूतदुःखानुज्ञवे प्रज्ञूतायुःपुद्गलपरिशाट इति तदुपादानं, तन्मूलातिसंक्लेशसमर्थनाय च स्थितिव्यत्यासग्रहणं। इतरायुषोस्तिर्यङ्मनुष्यायुषोर्यथासङ्ख्यं तिर्यङ्मनुष्यावष्टवर्षायुषौ अष्टमे वर्षे वर्तमानौ गुरुदुःखोदययुक्तावुत्कृष्टप्रदेशोदीरकौ ॥ ८४ ॥

एगंततिरियजोग्गा णियगविसिट्ठेसु तह अपज्जत्ता। संमुच्छिममणुअंते तिरियगई देसविरयस्स ॥८५॥

व्याख्या—एकान्तेन तिरश्चामेवोदयं प्रति या योग्याः प्रकृतयः ता एकान्ततिर्यग्योग्याः आद्यजातिचतुष्टयातपस्थावरसूक्ष्मसाधारणलक्षणा अष्टौ निजकविशिष्टेषु स्वस्वप्रकृतिविशिष्टेषूत्कृष्टप्रदेशोदीरणाः प्राप्यन्ते। तथाहि—एकेन्द्रियजा-

तिस्थावरनाम्नोर्बादरपृथ्वीकायिके सर्वविशुद्धे, आतपनाम्नः खरबादरपृथ्वीकायिके, सूक्ष्मस्य पर्याप्तसूक्ष्मे, साधारणविकलेन्द्रियजातिनाम्नां तत्तन्नामसु पर्याप्तेषु सर्वविशुद्धेषूत्कृष्टा प्रदेशोदीरणा भवतीति । तथाऽपर्याप्तनाम्नः संमूर्छिममनुष्योऽपर्याप्तश्चरमसमये वर्तमान उत्कृष्टप्रदेशोदीरकः । तथा तिर्यग्गतेरुत्कृष्टा प्रदेशोदीरणा देशविरतस्य तिरश्चस्तस्य सर्वविशुद्धत्वात् ॥७५॥

अणुपुव्विगइदुगाणं सम्मद्दिट्ठी य दूभगाईणं । णीयस्स य से काले गहिही विरइं ति सो चेव ॥७६॥

व्याख्या—चतसृणामानुपूर्वीणां तत्तद्गतौ तृतीयसमये सर्वविशुद्धः सम्यग्दृष्टिरुत्कृष्टप्रदेशोदीरकः । केवलं नरतिर्यगानुपूर्व्योः क्षायिकसम्यग्दृष्टिर्वाच्यः, देवनारकगत्योरपि स एव क्षायिकसम्यग्दृष्टिरुत्कृष्टप्रदेशोदीरकः । पञ्चसङ्ग्रहे तु—"अणुपुव्विगईण खाइउ सम्मो त्ति" अविशेषेणैवोक्तं अविशेषेणैव च व्याख्यातं । तथाऽनन्तरसमये यः सर्वविरतिं ग्रहीष्यति स एवाविरतसम्यग्दृष्टिः दुर्भगादीनां दुर्भगदुःस्वरानादेययशःकीर्तीनां नीचैर्गोत्रस्य चोत्कृष्टप्रदेशोदीरकः ॥ ७६ ॥

जोगंतुदीरगाणं जोगंते सरदुगाणपाणूणं । णियगंते केवलिणो सव्वविसुद्धो य सव्वासिं ॥ ७७ ॥

व्याख्या—योगी सयोगिकेवली अन्ते चरमसमये उदीरको यासां ता योग्यन्तोदीरकास्तासां नरगतिपञ्चेन्द्रियजात्यौदारिकसप्तकतैजससप्तकसंस्थानषट्काद्यसंहननवर्णादिविंशत्यगुरुलघूपघातपराघातविहायोगतिद्विकत्रसचतुष्कस्थिरास्थिरशुभाशुभसुभगादेययशःकीर्तिनिर्माणतीर्थकरोच्चैर्गोत्राणां द्विषष्टिप्रकृतीनां सयोगिकेवली चरमसमये उत्कृष्टप्रदेशोदीरकः । तथा स्वरद्विकप्राणापानयोर्निजकान्ते स्वस्वनिरोधकाले केवलिन उत्कृष्टा प्रदेशोदीरणा । इह सर्वकर्मणामुत्कृष्टप्रदेशोदीरणायां परिभाषेयम्—यः स्वस्वोदीरणाधिकारी स तत्तत्कर्मणः सर्वविशुद्ध उत्कृष्टप्रदेशोदीरणास्वामी ज्ञातव्यः, आयु-

व्यतिरेकेण चान्यत्र सर्वत्रापि गुणितकर्मांशः, तेन दानान्तरायादिपञ्चकस्याप्युत्कृष्टा प्रदेशोदीरणा गुणितकर्मांशे क्षीणकषाये समयाधिकावलिकाशेषस्थे द्रष्टव्या ॥ ८७ ॥

तदेवमुक्तमुत्कृष्टप्रदेशोदीरणास्वामित्वं अथ जघन्यप्रदेशोदीरणास्वामित्वमाह—

तप्पगउदीरगइसंकिलिट्ठभावो उ सव्वपगईणं । णेउं जहन्नसामी अणुभागुत्तो य तिण्हयरे ॥ ८८ ॥

व्याख्या—तत्तत्प्रकृत्युदीरकोऽतिसंक्लिष्टभावः क्षपितकर्मांशः सर्वप्रकृतीनां स्वस्वयोग्यानां जघन्यप्रदेशोदीरणास्वामी ज्ञेयः । तत्रावधिज्ञानावरणवर्जज्ञानावरणीयचतुष्कावधिदर्शनावरणवर्जदर्शनावरणीयत्रयसातासातवेदनीयमिथ्यात्वषोडशकषायनोकषायनवकलक्षणानां पञ्चत्रिंशत्प्रकृतीनां मिथ्यादृष्टिः सर्वपर्याप्तिपर्याप्तः सर्वसंक्लिष्टः, निद्रापञ्चकस्य च तत्प्रायोग्यसंक्लेशयुक्तो जघन्यप्रदेशोदीरणास्वामी । तथा सम्यक्त्वसम्यग्मिथ्यात्वयोरनन्तरसमये मिथ्यात्वं प्रतिपित्सुरतिसंक्लिष्टो जघन्यप्रदेशोदीरणास्वामी । तथा गतिचतुष्टयपञ्चेन्द्रियजात्यौदारिकसप्तकवैक्रियसप्तकतैजससप्तकसंस्थानषट्कसंहननषट्कवर्णादिविंशतिपराघातोपघातागुरुलघूच्छ्वासोद्योतविहायोगतिद्विकत्रसचतुष्कस्थिरषट्कास्थिरषट्कनिर्माणगोत्रद्विकान्तरायपञ्चकरूपाणामेकोननवतिसङ्ख्यानां प्रकृतीनां संज्ञी पर्याप्तः सर्वोत्कृष्टसंक्लेशवान् जघन्यप्रदेशोदीरणास्वामी । आहारकसप्तकस्य चाहारकशरीरी तत्प्रायोग्यसंक्लेशयुक्तः, आनुपूर्वीणामपि तत्प्रायोग्यसंक्लेशयुक्तः, आतपस्यातिसंक्लिष्टः खरबादरपृथ्वीकायिकः, एकेन्द्रियजातिस्थावरसाधारणनाम्नामेकेन्द्रियः सर्वोत्कृष्टसंक्लेशयुक्तः, सूक्ष्मनाम्नः सूक्ष्मैकेन्द्रियः सर्वसंक्लिष्टो जघन्यप्रदेशोदीरणास्वामी । अपर्याप्तकनाम्नोऽपर्याप्तकमनुष्यः सर्वसंक्लिष्टश्चरमसमये वर्तमानस्तथा द्वित्रिचतुरिन्द्रियजातीन

द्वित्रिचतुरिन्द्रियाः सर्वसंक्लिष्टा जघन्यप्रदेशोदीरकाः । तीर्थकरनाम्नो य एव जघन्यानुभागोदीरणास्वाम्युक्तः स एव जघन्यप्रदेशोदीरणास्वाम्यपि ज्ञेयः । तीर्थकरकेवल्यायोजिकाकरणारम्भात्प्राक् तीर्थकरनाम्नो जघन्यप्रदेशोदीरको ज्ञेय इत्यर्थः

उदीणमोहिजुत्ते अइसुहवेईयआउगाणं तु । पढमस्स जहन्नठिई सेसाणुक्कोसगठिईसु ॥ ८९ ॥

व्याख्या—अवधिज्ञानावरणावधिदर्शनावरणयोरवधिलब्धियुक्तः सर्वसंक्लिष्टो जघन्यप्रदेशोदीरणास्वामी । अवधिद्विकोत्पत्तौ बहुपुद्गलपरिक्षय इत्यवधिलब्धिग्रहणं । तथा चतुर्णामप्यायुषां स्वस्वभूमिकौचित्येनातीव सुखमनुभवन् जघन्यप्रदेशोदीरको भवति, तत्र प्रथमस्य नरकायुषो जघन्यस्थितौ दशवर्षसहस्रप्रमाणायां वर्तमानो नैरयिकस्तथा, यतोऽसौ शेषनारकापेक्षयाऽतिशयेन सुखी । शेषाणां तिर्यङ्मनुष्यदेवायुषामुत्कृष्टस्थितौ वर्तमानाः स्वस्वौचित्येन परमसुखिनो यथाक्रमं तज्जघन्यप्रदेशोदीरणास्वामिनो ज्ञातव्याः ॥ ८९ ॥

॥ इति कर्मप्रकृतिटीकायामुदीरणाकरणं समाप्तम् ॥

तदेवमुक्ता सप्रपञ्चमुदीरणाऽथोपशमनाभिधानावसरः । तत्र चैतेऽर्थाधिकाराः—प्रथमसम्यक्त्वोत्पादप्ररूपणा, देशविरतिलाभप्ररूपणा, सर्वविरतिलाभप्ररूपणा, अनन्तानुबन्धिविसंयोजना, दर्शनमोहनीयक्षपणा, दर्शनमोहनीयोपशमना, चारित्रमोहनीयोपशमना, देशोपशमना च सप्रभेदेति । तत्रेदमुपशमनाकरणं सर्वात्मना व्याख्यातुमशक्यमिति यदंशे स्वस्य व्याख्यानाशक्तिस्तदंशे तज्ज्ञातृणां बहुमानमाविर्भावयितुमाचार्यो नमस्कारं चिकीर्षुराह—

करणकयाऽकरणा वि य दुविहा उवसामणेह बिइयाए। अकरणअणुइन्नाए अणुउगधरे पणिवयामि ॥१॥

व्याख्या—इह द्विविधोपशमना करणकृताऽकरणकृता च। तत्र करणं यथाप्रवृत्तापूर्वानिवृत्तिकरणसाध्यः क्रियाविशेषस्तेन कृता करणकृता, तद्विपरीताऽकरणकृता या यथाप्रवृत्तादिकरणं विनापि वेदनानुज्ञवादिकारणैः संसारिणां गिरिनदीपाषाणवृत्तताप्रख्योपजायते। इदं च करणकृताकरणकृतत्वरूपं वैविध्यं देशोपशमनाया एव, न सर्वोपशमनायास्तस्याः करणेऽन्य एव ज्ञावात्। उक्तं च पञ्चसङ्ग्रहमूलटीकायां—"देशोपशमना करणकृता करणरहिता च, सर्वोपशमना तु करणकृतैवेति"। अस्याश्च द्वितीयाया अकरणकृतोपशमनाया अकरणोपशमनानुदीर्णोपशमनालक्षणनामधेयत्रयज्ञाजः सम्प्रत्यनुयोगो व्यवच्छिन्नस्तत्तत्स्तज्ज्ञातॄन् विशिष्टप्रतिज्ञाकलिताँश्चतुर्दशपूर्वविदोऽनुयोगधरान् प्रणिपतामि, तस्मादिह करणकृतोपशमनयाऽधिकार इति सिद्धम् ॥ १ ॥

साऽपि द्विविधेत्याह—

सव्वस्स य देसस्स य करणुवसमणा दुसन्नि इक्किक्का। सव्वस्स गुणपसत्था देसस्स वि तासि विवरीया॥२॥

व्याख्या—करणकृतोपशमना द्विविधा सर्वस्य देशस्य च सर्वविषया देशविषया चेत्यर्थः। एकैका द्विसंज्ञा नामधेयत्रययुक्ता, तद्यथा—सर्वस्य सर्वोपशमना गुणप्रशस्ता गुणोपशमनाप्रशस्तोपशमनालक्षणनामत्रयवती, देशस्य च देशोपशमना च ताभ्यां विपरीताऽगुणोपशमनाऽप्रशस्तोपशमनालक्षणनामत्रयवतीत्यर्थः ॥ २ ॥

सव्वुवसमणा मोहस्सेव उ तस्सुवसमक्किया जोग्गो। पंचिंदिय उ सन्नी पज्जत्तो लद्धितिगजुत्तो ॥ ३ ॥

पुव्विं पि विसुज्झंतो गंठियसत्ताणइक्कमिय सोहिं । अन्नयरे सागारे जोगे य विसुद्धलेसासु ॥ ४ ॥
ठिइ सत्तकम्ममंतो कोडाकोडिं करित्तु सत्तण्हं । दुट्ठाणं चउठाणे असुभसुभाणं च अणुभागं ॥ ५ ॥
बंधंतो धुवपगडी भवपाउग्गा सुभा अणाऊ उ । जोगवसा य पएसं उक्कस्सं मज्झिम जहन्नं ॥ ६ ॥
ठिइबंधऽपूरे एवबंधं पल्लसंखभागूणं । असुभसुभाणणुभागं अणंतगुणहाणिवुड्ढीहिं ॥ ७ ॥
करणं अहापवत्तं अपुव्वकरणमणियट्टिकरणं च । अंतोमुहुत्तियाइं भवसंतरं च लहइ कमा ॥ ८ ॥

व्याख्या—इह सर्वोपशमना मोहस्यैव, शेषाणां तु कर्मणां देशोपशमना भवति । तत्र तस्य मोहनीयस्य सर्वोपशमनाक्रियायोग्यः पञ्चेन्द्रियः संज्ञी सर्वाग्निः पर्याप्तिभिः पर्याप्त इत्येवं पञ्चेन्द्रियत्वसंज्ञित्वपर्याप्तत्वरूपेण लब्धित्रिकेण युक्तः, यद्वोपशमलब्ध्युपदेशश्रवणलब्धिकरणत्रयहेतुप्रकृष्टयोगलब्धिरूपलब्धित्रिकयुक्तः पूर्वमपि करणकालादन्तर्मुहूर्त्तं कालं यावत्प्रतिसमयमनन्तगुणवृद्धविशुद्ध्याविशुध्यमानो ग्रन्थिकसत्त्वानामभवसिद्धिकानां शोधिमतिक्रम्य वर्तमानस्ततोऽनन्तगुणविशुद्ध इत्यर्थः । तथाऽन्यतरस्मिन्मत्यज्ञाने श्रुताज्ञाने विभङ्गज्ञाने वा साकारे साकारोपयोगे योगे चान्यतरस्मिन् मनोयोगे वाग्योगे काययोगे वा वर्तमानः, तथा विशुद्धलेश्यासु विशुद्धानां लेश्यानामन्यतमस्यां विशुद्धलेश्यायां वर्तमानो जघन्यपरिणामेन तेजोलेश्यायां, मध्यमपरिणामेन पद्मलेश्यायामुत्कृष्टपरिणामेन च शुक्ललेश्यायामित्यर्थः । तथाऽऽयुर्वर्जानां सप्तानां कर्मणां स्थितिमन्तःसागरोपमकोटाकोटिप्रमाणां कृत्वाऽशुभानां कर्मणामनुभागं चतुःस्थानकं सन्तं द्विस्था-

नकं कुर्वन् शुभानां च कर्मणां द्विस्थानकं सन्तं चतुःस्थानकं कुर्वन्, तथा ध्रुवप्रकृतीर्ज्ञानावरणपञ्चकदर्शनावरणनवकमिथ्यात्वकषायषोडशकभयजुगुप्सातैजसकार्मणवर्णगन्धरसस्पर्शागुरुलघूपघातनिर्माणान्तरायपञ्चकरूपाः सप्तचत्वारिंशत्स्वस्वभवयोग्याः परावर्तमानमध्यस्थाः शुभा एव बध्नँस्ता अप्यायुर्वर्जा एव, अतिविशुद्धपरिणामो हि नायुर्बन्धमारभत इति तद्वर्जनं। भवप्रायोग्या इति वदता चैवं सूच्यते—यदुत तिर्यङ्मनुष्यो वा प्रथमसम्यक्त्वमुत्पादयन् देवगतिप्रायोग्याः शुभाः प्रकृतीर्देवद्विकपञ्चेन्द्रियजातिवैक्रियद्विकाद्यसंस्थानपराघातोच्छ्वासप्रशस्तखगतित्रसदशकसातवेदनीयोच्चैर्गोत्ररूपा एकविंशतिसङ्ख्या बध्नाति। देवो नैरयिको वा प्रथमसम्यक्त्वमुत्पादयन् मनुजगतिप्रायोग्या मनुजद्विकपञ्चेन्द्रियजातिप्रथमसंस्थानप्रथमसंहननौदारिकद्विकपराघातोच्छ्वासप्रशस्तखगतित्रसदशकसातवेदनीयोच्चैर्गोत्ररूपा द्वाविंशतिसङ्ख्या बध्नाति। केवलं यदि सप्तमपृथ्वीनारकः प्रथमसम्यक्त्वमुत्पादयति तदा तिर्यग्द्विकनीचैर्गोत्राणि वाच्यानि, शेषं तथैवेति। तथा बध्यमानप्रकृतीनां स्थितिमन्तःसागरोपमकोटाकोटिप्रमाणामेव बध्नन्नाधिकां योगवशाच्च प्रदेशाग्रमुत्कृष्टं मध्यमं जघन्यं च बध्नन् जघन्ययोगे वर्तमानो जघन्यं मध्यमे मध्यममुत्कृष्टे चोत्कृष्टमितिरीत्या तथा स्थितिबन्धे परिपूर्णे सत्यन्यं स्थितिबन्धं प्राक्तनस्थितिबन्धापेक्षया पल्योपमसङ्ख्येयभागन्यूनं कुर्वन् तस्मिन्नपि पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमसङ्ख्येयभागन्यूनं कुर्वन् एवमन्यमन्यं स्थितिबन्धं पूर्वापेक्षया पल्योपमसङ्ख्येयभागन्यूनं कुर्वन् अशुभानां च प्रकृतीनां बध्यमानानामनुभागं द्विस्थानकं बध्नँस्तमपि प्रतिसमयमनन्तगुणहीनं, शुभानां च चतुःस्थानकं बध्नँस्तमपि प्रतिसमयमनन्तगुणवृद्धं करणकालात्पूर्वमन्तर्मुहूर्त्तं कालं यावदीदृशेतिकर्तव्यताव्यापृतो भूत्वा करणं परिणामविशेषलक्षणं यथाप्रवृत्तं करोति,

ततोऽपूर्वकरणं, ततोऽप्यनिवृत्तिकरणं, एतानि च त्रीण्यपि करणानि प्रत्येकमान्तर्मौहूर्त्तिकानि, करणत्रयकालोऽप्यन्तर्मुहूर्त्तप्रमाण एव, एतत्करणत्रयनिष्पादनक्रमादनन्तरं चतुर्थीमुपशान्ताद्धां लभते, साऽपि चान्तर्मौहूर्त्तिकी द्रष्टव्या ॥ ३-४-५-६-७-८ ॥

करणानामेव स्वरूपं विशदीकुर्वन्नाह—

अणुसमयं वड्ढंतो अज्झवसाणाणऽणंतगुणणाए । परिणामठाणाणं दोसु वि लोगा असंखिज्जा ॥ए॥

व्याख्या—अनुसमयं समये समयेऽध्यवसानानामनन्तगुणनया विशुद्ध्या प्रवर्धमानो यावत्करणसमाप्तिर्न्नवति तावन्निरन्तरं वर्धते । कियन्ति पुनरध्यवसायस्थानानि प्रत्येकं करणेषु लभ्यन्ते इति चेदुच्यते—द्वयोरपि यथाप्रवृत्तापूर्वकरणयोः परिणामस्थानानामनुसमयमसङ्ख्येया लोका भवन्ति । तथाहि—यथाप्रवृत्तकरणप्रथमसमये विशोधिस्थानानि नानाजीवापेक्षयाऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि, ततो द्वितीयसमये विशेषाधिकानि, ततोऽपि तृतीयसमये विशेषाधिकानि, एवं चरमसमयं यावद्वाच्यं । एवमेवापूर्वकरणेऽपि द्रष्टव्यं । अमूनि च यथाप्रवृत्तापूर्वकरणसम्बन्धीन्यध्यवसायस्थानानि स्थाप्यमानानि विषमचतुरस्रं क्षेत्रमास्तृणन्ति, तयोरुपर्यनिवृत्तिकरणाध्यवसायस्थानानि मुक्तावलीसंस्थानानि स्थाप्यानि, उपर्युपरि चामून्यनुचिन्त्यमानानि अनन्तगुणवृद्ध्या वर्धमानान्यवगन्तव्यानि, तिर्यक् च षट्स्थानपतितानि ॥ ए ॥

मंदविसोही पढमस्स संखभागाहि पढमसमयम्मि । उक्कस्सं उप्पिमहो एक्केक्कं दोण्ह जीवाणं ॥ १० ॥
आचरमाउ सेसुक्कोसं पुव्वप्पवत्तमिति णामं । बीयस्स बीयसमए जहण्णमवि णंतरुक्कस्सा ॥ ११ ॥

व्याख्या—इह द्वौ पुरुषौ युगपत्करणप्रतिपन्नौ बुद्धावारोप्येते, एकः सर्वजघन्यया श्रेण्या प्रतिपन्नोऽपरस्तु सर्वोत्कृष्टया विशोधिश्रेण्या । तत्र प्रथमस्य पुरुषस्य प्रथमसमये मन्दा सर्वजघन्या विशोधिः सर्वस्तोका, ततो द्वितीयसमये जघन्या विशोधिरनन्तगुणाऽनन्तगुणवृद्धविशोधिस्थानयुक्तेत्यर्थः । ततोऽपि तृतीयसमये जघन्या विशोधिरनन्तगुणा, एवं तावद्वाच्यं यावद्यथाप्रवृत्तकरणस्य सङ्ख्येयो भागो गतो भवति । ततः प्रथमसमये द्वितीयस्य जीवस्योत्कृष्टं विशोधिस्थानमनन्तगुणं वाच्यं । ततोऽपि जघन्यस्थानाद्यतः पश्चाद्वर्तितं तत उपरितनी जघन्या विशोधिरनन्तगुणा । ततो द्वितीये समये उत्कृष्टा विशोधिरनन्तगुणा । तत उपरि जघन्या विशोधिरनन्तगुणा । एवमुपर्यधश्चैकैकं विशोधिस्थानं द्वयोर्जीवयोरनन्तगुणतया तावद्वाच्यं यावच्चरमसमये जघन्या विशोधिः । तत आ चरमाच्चरममभिव्याप्य यानि चरमसङ्ख्येयभागगतान्यनुक्तानि शेषाण्युत्कृष्टानि विशोधिस्थानानि तानि निरन्तरमनन्तगुणानि वक्तव्यानि । तदेवं समाप्तं यथाप्रवृत्तकरणं, अस्य च पूर्वप्रवृत्तमिति द्वितीयं नाम, शेषकरणाभ्यां पूर्वं प्रवृत्तत्वात् । अत्र च स्थितिघातो रसघातो गुणश्रेणिर्गुणसङ्क्रमो वा न प्रवर्तते, तद्योग्यविशुद्ध्यभावात्, केवलमुक्तरूपा विशोधिरेवानन्तगुणा प्रवर्तते । यानि चाप्रशस्तानि कर्माण्यत्र स्थितो बध्नाति तेषामनुभागं द्विस्थानकं बध्नाति, यानि च शुभानि बध्नाति तेषामनुभागं चतुःस्थानकं । स्थितिबन्धेऽपि च पूर्णे पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमा (म) सङ्ख्येयभागन्यूनं करोति । अथापूर्वकरणमभिधत्ते—विइयस्सेत्यादि, द्वितीयस्यापूर्वकरणस्य द्वितीयसमये जघन्यमपि विशोधिस्थानमनन्तरोत्कृष्टात्प्रथमसमयभाविन उत्कृष्टाद्विशोधिस्थानादनन्तगुणं वाच्यं । इदमुक्तं भवति—इह यथाप्रवृत्तकरण इवादितो निरन्तरं जघन्यानि विशोधिस्थानान्यनन्त-

गुणतया न वाच्यानि, किंतु प्रथमसमये जघन्या विशोधिः प्रथमतः सर्वस्तोका वाच्या, सापि यथाप्रवृत्तचरमसमयजाव्युत्कृष्टविशोधिस्थानादनन्तगुणा । ततः प्रथमसमय एवोत्कृष्टा विशोधिरनन्तगुणा । ततोऽपि द्वितीयसमये जघन्या विशोधिरनन्तगुणा । ततोऽपि तस्मिन्नेव द्वितीयसमये उत्कृष्टा विशोधिरनन्तगुणा । एवं प्रतिसमयं जघन्योत्कृष्टा अनन्तगुणा विशोधयस्तावद्वाच्या यावच्चरमसमये उत्कृष्टा विशोधिरिति ॥ १०-११ ॥

णिव्वयणमपि तउ से ठिइरसघायठिइबंधगद्धा य । गुणसेढी वि य समगं पढमे समए पवत्तंति ॥१२॥

व्याख्या—ततः "से" तस्यापूर्वकरणस्य निर्वचनं निश्चितमन्वर्थानुयायि वचनं प्रतिपादनीयं । तद्यथा—अपूर्वाण्यनिनवानि करणानि स्थितिघातरसघातगुणश्रेणिस्थितिबन्धादीनां निर्वर्तनानि यस्मिँस्तदपूर्वकरणं । अत्र हि स्थितिघातो रसघातः स्थितिबन्धाद्धा गुणश्रेणिरपि चेत्येते चत्वारः पदार्था अभिनवाः समकं युगपत्प्रथमसमय एव प्रवर्तन्ते ॥ १२ ॥

तत्र स्थितिघात(तं)प्रतिपिपादयिषुराह—

उदहिपुहुत्तुक्कस्सं ठियरं पल्लस्स संखतमभागो । ठिइकंडगमणुभागाणणंतभागा मुहुत्तंतो ॥ १३ ॥
अणुभागकंडगाणं बहुहिं सहस्सेहिं पूरए इक्कं । ठिइकंडसहस्सेहिं तेसि बीयं समाणेइ ॥ १४ ॥

व्याख्या—स्थितिसत्कर्मणोऽग्रिमभागादुत्कर्षत उदधिपृथक्त्वं प्रभूतसागरोपमशतप्रमाणं जघन्येन च पल्योपमसङ्ख्येयभागमात्रं स्थितिकण्डकमुत्किरति खण्डयतीत्यर्थः । उत्कीर्य च याः स्थितीरधो न खण्डयति तत्र तद्दलिकं प्रक्षिपति, अन्तर्मुहूर्त्तेन च कालेन तत्स्थितिकण्डकमुत्कीर्यते । उक्तं च—"उक्कोसेणं बहुसागराणि इयरेण पल्लसंखंसं । ठिइअग्गाउ

घायइ अंतमुहुत्तेण ठिइकंडगं ॥ १ ॥" ततः पुनरप्यधस्तात्पल्योपमसङ्ख्येयभागमात्रं स्थितिकण्डकमन्तर्मुहूर्त्तेन कालेनोत्किरति, प्रागुक्तरीत्यैव च निक्षिपति । एवमपूर्वकरणाद्धायां प्रभूतानि स्थितिखण्डसहस्राणि व्यतिक्रामति । इत्थं चापूर्वकरणस्याद्यसमये यत्स्थितिकर्मासीत्तत्तस्यैवान्त्यसमये सङ्ख्येयगुणहीनं जातं । अथ रसघातोऽभिधीयते—अणुभागेत्यादि, अनुभागानां रसप्रकृतीनां यदनुभागसत्कर्म तस्यानन्ततमं भागं मुक्त्वा शेषाननन्तान् भागाननुभागस्यान्तर्मुहूर्त्तेन कालेन निःशेषानपि विनाशयति, ततो भूयोऽपि तस्य मुक्तस्यानन्ततमस्य भागस्यानन्ततमं भागं मुक्त्वा शेषाननुभागभागानन्तर्मुहूर्त्तेन कालेन नाशयति, एवं अनेकान्यनुभागखण्डसहस्राण्येकस्मिन् स्थितिखण्डे व्यतिक्रामन्ति, तेषां च स्थितिखण्डानां सहस्रैर्द्वितीयमपूर्वकरणं समानयति परिसमापयति । अथ स्थितिबन्धाद्धा भण्यते—अपूर्वकरणस्य प्रथमसमयेऽन्य एवापूर्वः पल्योपमसङ्ख्येयभागहीनः स्थितिबन्ध आरभ्यते । स्थितिघातस्थितिबन्धयोश्च युगपदेवारब्धयोर्युगपदेव परिनिष्ठा भवति । तथा च स्थितिबन्धाद्धा कालतः सङ्ख्यया च स्थितिघाततुल्या प्रवर्तते । उक्तं च—"करणाईइ अपुव्वो जो बंधो सो न होइ जा अण्णो । बंधगअद्धा सा तुल्लिगाउ ठिइकंडगद्धाए ॥ १ ॥" इति ॥ १३–१४ ॥

अधुना गुणश्रेणिस्वरूपमाह—

गुणसेढी णिक्खेवो समए समए असंखगुणणाए । अद्धाउगातिरित्तो सेसे सेसे य णिक्खेवो ॥ १५ ॥

व्याख्या—यत्स्थितिकण्डकं घातयति तन्मध्याद्दलिकं गृहीत्वोदयसमयादारभ्यान्तर्मुहूर्त्तचरमसमयं यावत्प्रतिसमयमसङ्ख्येयगुणनया निक्षिपति । उक्तं च—"उवरिल्लठिईहिंतो घित्तूणं पुग्गले उ सो खिवइ । उदयसमयम्मि थोवे तत्तो

अ असंखगुणिए ज ॥ १ ॥ बीयम्मि खिवइ समए तइए तत्तो असंखगुणिए ज । एवं समए समए अंतमुहुत्तं तु जा पुन्नं ॥ २ ॥" एष प्रथमसमयगृहीतदलिकनिक्षेपविधिः । एवमेव द्वितीयादिसमयगृहीतानामपि दलिकानां निक्षेपविधिर्द्रष्टव्यः। किंच—गुणश्रेणिरचनाय प्रथमसमयादारभ्य गुणश्रेणिचरमसमयं यावद्वेद्यमाणं दलिकं यथोत्तरमसङ्ख्येयगुणं द्रष्टव्यं । उक्तं च—"दलियं तु गिण्हमाणो पढमे समयम्मि थोवयं गिण्हे । उवरिल्लठिईहिंतो बीयम्मि असंखगुणियं तु ॥ १ ॥ गिण्हइ समए दलियं तइए समए असंखगुणियं तु । एवं समए समए जा चरिमो अंतसमउ त्ति ॥ २ ॥" इहान्तर्मुहूर्त्तप्रमाणो निक्षेपकालो दलरचनारूपगुणश्रेणिकालश्चापूर्वकरणानिवृत्तिकरणाद्धाद्विकात् किञ्चिदधिको द्रष्टव्यः, तावत्कालमध्ये चाधस्तनाधस्तनोदयक्षणे वेदनतः क्षीणे शेषक्षणेषु दलिकं रचयति, न पुनरुपरि गुणश्रेणिं वर्धयति । उक्तं च—"सेढीइ कालमाणं पुण्ह य करणाण समहियं जाण । खिज्जइ सा उदएणं जं सेसं तम्मि णिक्खेवो ॥ १ ॥" त्ति सूत्रगाथाक्षरयोजना त्वियम्—गुणश्रेण्यां निक्षेपः समये समयेऽसङ्ख्येयगुणनया पूर्वपूर्वसमयापेक्षयोत्तरोत्तरसमये वृद्ध्यात्मकया, सोऽपि च निक्षेपोऽद्धाद्विकातिरिक्तः अपूर्वकरणानिवृत्तिकरणकालाभ्यां मनागधिककालमानः, तथाऽपूर्वकरणानिवृत्तिकरणसमयेष्वनुभवतः क्रमशः क्षीयमाणेषु सत्सु गुणश्रेणिदलिकनिक्षेपः शेषे शेषे भवत्युपरि च न वर्धते ॥ १५ ॥

अधुनाऽनिवृत्तिकरणस्वरूपमाह—

अणियट्टिम्मि वि एवं तुल्ले काले समा तउ नामं। संखेज्जइमे सेसे जिन्नमुहुत्तं अहो मुच्चा ॥ १६ ॥
किंचूणमुहुत्तसमं ठिइबंधद्धाइ अंतरं किच्चा । आवलिदुगेक्कसेसे आगाल उदीरणा समिया ॥ १७॥

व्याख्या—यथापूर्वकरणप्रथमसमयादारभ्य स्थितिघातादयो युगपत्प्रवर्तमाना उक्ताः, एवमनिवृत्तिकरणेऽपि वक्तव्याः। तथा तुल्ये समाने काले यतः समा सर्वेषामपि तत्प्रविष्टानां विशोधिर्भवति, न विषमा, ततो नाम सान्वर्थं वक्तव्यमनिवृत्तिकरणमिति। इदमुक्तं भवति—अनिवृत्तिकरणस्य प्रथमसमये ये वृत्ता ये वर्तन्ते ये च वर्तिष्यन्ते तेषां सर्वेषामप्यन्यूनाधिकत्वेन समा विशोधिः, द्वितीयसमयेऽपि वृत्तवर्तमानवर्तिष्यमाणानां समा विशोधिः प्रथमसमयभाविविशोध्यपेक्षया त्वनन्तगुणा, एवमनिवृत्तिकरणचरमसमयं यावद्भाव्यं। तदेवमस्मिन् करणे प्रविष्टानां जीवानां तुल्यकालानामध्यवसायानां मिथो निवृत्तिस्तिर्यक्षट्स्थानपतितवैषम्यलक्षणा नास्तीत्यनिवृत्तकरणमिति नाम। ऊर्ध्वमुखी त्वध्यवसायस्थानानामनन्तगुणवृद्धिः सर्वेषु समयेषु विद्यते, अनिवृत्तिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्स्वेकस्मिँश्च संख्येयतमे भागे शेषे तिष्ठति मिथ्यात्वस्यान्तरकरणं करोति, अन्तरकरणं नामोदयलक्षणादुपरि मिथ्यात्वस्थितिमन्तर्मुहूर्त्तमानामतिक्रम्योपरितनीं च विष्कम्भयित्वा मध्येऽन्तर्मुहूर्त्तमानं तत्प्रदेशवेद्यदलिकाभावकरणं, तन्निष्पादनकालोऽप्यन्तरकरणकाल एव यथा तन्तुसंयोजनादिकालः पटकरणकालः, सोऽप्यन्तर्मुहूर्त्तप्रमाणः प्रथमस्थितेः किञ्चिदूनोऽभिनवस्थितिबन्धाद्धया समानः। तथाहि—प्रथमस्थित्यन्तरकरणे द्वे अप्यन्तर्मुहूर्त्तप्रमाणे युगपदारभ्यते, अन्तरकरणप्रथमसमय एव चान्यं स्थितिबन्धं मिथ्यात्वस्यारभ्य स्थितिबन्धान्तरकरणे युगपदेव परिसमापयति, अन्तरकरणे च क्रियमाणे गुणश्रेणिसम्बन्धिनः संख्येया भागाः प्रथमद्वितीयस्थित्याश्रितास्तिष्ठन्ति, एकं तु गुणश्रेणेः संख्येयतमं भागमन्तरकरणदलिकेन सहोत्किरति विनाशयतीत्यर्थः। तदुत्किरणविधिश्चायम्—यदुतान्तरकरणस्थितेर्मध्याद्दलिकं कर्मपरमाणवात्मकं गृहीत्वा गृही-

त्वा प्रथमस्थितौ प्रक्षिपति उपरि द्वितीयस्थितौ च, एवं प्रतिसमयं तावत्प्रक्षिपति यावदन्तरकरणदलिकं सकलमपि क्षीयते, अन्तर्मुहूर्त्तेन च कालेन सकलतद्दलिकक्षय इति । इहान्तरकरणादधस्तनी स्थितिः प्रथमा स्थितिरित्युच्यते, उपरितनी तु द्वितीया । तत्र प्रथमस्थितौ वर्तमान उदीरणाप्रयोगेण प्रथमस्थितिसत्कं दलिकं समाकृष्य यदुदयसमये प्रक्षिपति सोदीरणा, यत्तु द्वितीयस्थितेः सकाशादुदीरणाप्रयोगेण समाकृष्योदये प्रक्षिपति तस्या उदीरणाया अप्यागाल इति विशेषप्रतिपत्तये नामान्तरं पूर्वसूरिभिरुच्यते । उदयोदीरणाभ्यां च प्रथमस्थितिमनुभवँस्तावद्गच्छति यावदावलिकाद्विकं शेषं तिष्ठति, तस्मिँश्च स्थिते आगालः शान्तो भवति निवर्तत इत्यर्थः । ततः परं केवलैवोदीरणा प्रवर्तते, साऽपि तावद्यावदावलिकाशेषो न भवति । तस्यां च शेषीभूतायामुदीरणाऽपि शान्ता भवति । ततः केवलेनैवोदयेन तामावलिकामनुभवति । तस्यामपि चापगतायामुदयोऽपि मिथ्यात्वस्य निवर्तते, तद्दलिकाभावात्, ततो मिथ्यात्वोदयनिवृत्तावुपशमाख्यायां प्रविशति, तस्यां चोपशमाख्यायां प्रविष्टस्य सतः प्रथमसमय एव मोहबीजमौपशमिकं सम्यक्त्वमुपजायते । उक्तं च—"आवलिमेत्तं उदएण वेइअं गाइ उवसमअाए । उवसमियं तत्थ भवे सम्मत्तं मोहबीयं जं ॥ १ ॥" इयं चोपशान्ताद्धा परिनिष्ठितान्तरकरणाऽपि, तदिदमुक्तं अन्तरकरणप्रथमसमय एवौपशमिकं सम्यक्त्वमवाप्नोति,मिथ्यात्वदलिकवेदनाभावादिति ॥ १६–१७ ॥

उक्तमेवार्थं सूत्रकृदाह—

मिछत्तुदए खीणे लभेइ सम्मत्तमोवसमियं सो । लंभेण जस्स लब्भइ आयहियमलद्धपुव्वं जं ॥ १८॥

व्याख्या—मिथ्यात्वस्योदये क्षीणे सति स जीव उक्तेन प्रकारेणौपशमिकं सम्यक्त्वं लभते, यस्य सम्यक्त्वस्य लाभेन यदात्महितमलब्धपूर्वमर्हदादितत्त्वप्रतिपत्त्यादि तल्लभ्यते ॥ १८ ॥

तं कालं बीयठिइं तिहाणुभागं तु (भागेणं) देसघाइच्च । सम्मत्तं सम्मिस्सं मिच्छत्तं सव्वघाईउं ॥ १९ ॥

व्याख्या—तस्मिन् काले यतोऽनन्तरसमये औपशमिकसम्यग्दृष्टिर्भविष्यति तस्मिन् प्रथमस्थितिचरमसमय इत्यर्थः, मिथ्यादृष्टिः सन् द्वितीयस्थितिगतं दलिकमनुभागभेदेन त्रिधा करोति शुद्धमर्द्धविशुद्धमविशुद्धं चेति । तत्र शुद्धं सम्यक्त्वं, तच्च देशघाति, देशघातिरसान्वितत्वात्, अर्धविशुद्धं सम्यग्मिथ्यात्वं, अशुद्धं च मिथ्यात्वं, एतदुभयमपि सर्वघाति, सर्वघातिरसान्वितत्वात् । "सम्मिस्सं" मिश्रसहितं मिथ्यात्वं सर्वघातीत्यक्षरार्थः ॥ १९ ॥

पढमे समए थोवो सम्मत्ते मीसए असंखगुणो । अणुसमयमवि य कमसो जिन्नमुहुत्ता हि विज्झाउ ॥२०॥

व्याख्या—औपशमिकसम्यक्त्वलाभप्रथमसमयादारभ्य मिथ्यात्वदलिकं सम्यक्त्वसम्यग्मिथ्यात्वयोः सङ्क्रमयति । तद्विधिश्चायम्—प्रथमे समये स्तोको दलिकनिक्षेपः सम्यक्त्वे । ततो मिश्रेऽसङ्ख्येयगुणः । ततोऽपि द्वितीयसमये सम्यक्त्वेऽसङ्ख्येयगुणः । ततोऽपि तस्मिन्नेव द्वितीयसमये सम्यग्मिथ्यात्वेऽसङ्ख्येयगुणः । एवमनुसमयं क्रमशः क्रमेण तावद्वाच्यं यावदन्तर्मुहूर्त्तं । एष च सङ्क्रमोऽन्तरकरणस्थितेनौपशमिकसम्यक्त्वलक्षणप्रशस्तगुणान्वितेन क्रियत इति गुणसङ्क्रम उच्यते । तथा चोक्तम्—"गुणसंकमेण एसो संकमो होइ सम्ममीसेसु । अंतरकरणम्मि ठिउं कुणइ जउं सप्पसत्थगुणो ॥ १ ॥" जिन्नमुहूर्त्तात्गुणसङ्क्रमसम्बन्धिनश्च परतो विध्यातसङ्क्रमः प्रवर्तते ॥ २० ॥

ठिइरसघाउ गुणसेढी वि य तावं ति आउवज्जाणं । पढमठिईए एगदुगावलिसेसम्मि मिछत्ते ॥ २१ ॥

व्याख्या—यावद्गुणसङ्क्रमस्तावदायुर्वर्जानां सप्तानां कर्मणां स्थितिघातो रसघातो गुणश्रेणिरपि च प्रवर्तते । गुणसङ्क्रमे च निवर्तमाने स्थितिघातरसघातगुणश्रेणयोऽपि निवर्तन्ते । मिथ्यात्वस्य तु प्रथमस्थितौ यावदेकावलिका शेषा न भवति तावत् स्थितिघातरसघातौ भवतः । आवलिकायां तु शेषीभूतायां स्थितौ तौ निवर्तेते । यावच्च प्रथमस्थितावावलिके शेषे न भवतः तावन्मिथ्यात्वस्य गुणश्रेणिरपि प्रवर्त्तते, आवलिकाद्विके तु शेषीभूते गुणश्रेणिर्निवर्तते, तदेवमन्तरकरणे प्रविष्टः सन् प्रथमसमयादारभ्यौपशमिकसम्यग्दृष्टिस्तावदभूद्यावदन्तर्मुहूर्त्तम् ॥ २१ ॥

अथ तदन्ते यत्करोति तदाह—

उवसंतद्धा अंते विहिणा उक्कड्ढियस्स दलियस्स । अप्पबसाणणुरूवस्सुदउ तिसु एक्कतरयस्स ॥ २२ ॥

व्याख्या—औपशमिकसम्यक्त्वाद्धाया अन्ते पर्यन्ते किञ्चित्समधिकावलिकाशेषे वर्तमानस्त्रयाणामपि द्वितीयस्थितिगतानां सम्यक्त्वादिपुञ्जानां दलिकमध्यवसायविशेषेण समाकृष्यान्तरकरणपर्यन्तावलिकायां प्रक्षिपति । तत्र प्रथमसमये प्रभूतं, द्वितीयसमये स्तोकं, तृतीयसमये स्तोकतरं, एवं तावद्वाच्यं यावदावलिकाचरमसमयः । तानि चैवं प्रक्षिप्यमाणानि दलिकानि गोपुच्छसंस्थानसंस्थितानि भवन्ति । तत आवलिकामात्रे कालेऽन्तरकरणस्य शेषे सति विधिनाऽनुपदोक्तेन "उक्कड्ढियस्स त्ति" अवतारितस्य दलिकस्य सम्यक्त्वादिपुञ्जत्रयाणामेकतरसम्बन्धिन उदयो भवति । किंविशिष्टस्येत्याह—

अध्यवसायानुरूपस्य यदि तदानीं शुभ्रः परिणामस्तदा सम्यक्त्वदलिकस्योदयः, मध्यमश्चेत्तदा सम्यग्मिथ्यात्वदलिकस्या-शुभ्रश्चेत्तदा मिथ्यात्वदलिकस्येति भावः ॥ २२ ॥

सम्मत्त पढमलंभो सव्वोवसमे तहा विगिट्ठो य । भालिगसेसाइ परं आसाणं कोइ गच्छिज्जा ॥ २३ ॥

व्याख्या—एष औपशमिकसम्यक्त्वप्रथमलाभो मोहनीयस्य सर्वोपशमाद्भवति, नान्यथा । तथा प्रथमस्थित्यपेक्षया विप्रकृष्टबृहत्तरान्तर्मुहूर्त्तकालप्रमाणश्च । अस्मिँश्च सम्यक्त्वे लभ्यमाने कश्चित्सम्यक्त्वेन समं देशविरतिं सर्वविरतिं वा प्रतिपद्यते । आह च शतकचूर्णिकृत्—"उवसमसम्मद्दिट्ठी अंतरकरणे ठिउं कोइ, देसविरइं पि लभेइ, कोइ पमत्तापमत्तभावं पि, सासायणो पुण ण किं पि लभेइ त्ति" । अस्यां च सम्यक्त्वाद्धायां जघन्यतः समयमात्रशेषायामुत्कर्षतः षडावलिकाशेषायां कश्चिदासादनं गच्छेत्सासादनभावं प्रतिपद्येत । तदनन्तरं च नियमान्मिथ्यात्वं प्रतिपद्यते । औपशमिकसम्यग्दृष्टिश्च तावदवगन्तव्यो यावदन्तरकरणेऽवतिष्ठते । उक्तं च—"उवसंतदंसणो सो अंतरकरणे ठिउं जाव" ॥ २३ ॥

अथ सम्यग्दृष्टिस्वरूपमाह—

सम्मद्दिट्ठी णियमा उवइट्ठं पवयणं तु सद्दहइ । सद्दहइ असब्भावं अजाणमाणो गुरुणिउंगा ॥ २४ ॥

व्याख्या—सम्यग्दृष्टिर्जीवो गुरुभिरुपदिष्टं प्रवचनं नियमाद्यथावत् श्रद्धत्त एव । तुरेवकारार्थो भिन्नक्रमश्च । यः पुनः सम्यग्दृष्टिरप्यसद्भावमसद्भूतं प्रवचनं श्रद्दधाति सोऽवश्यमजानन् स्वयं परिज्ञानविकलः सन् यद्वा गुरोस्तथाविधसम्यक्परिज्ञानविकलस्य मिथ्यादृष्टेर्वा जमालिप्रख्यस्य नियोगादाज्ञापारतन्त्र्यात्, नान्यथा । अत्र च साहजिकमज्ञानं ज्ञानावर-

णविपाकोदयसान्निध्यमात्राद्उपजायमानं न सम्यक्त्वप्रतिबन्धकं। गुरुनियोगजनितं तु मध्यस्थस्य विनेयस्य नानामतदर्शिनो मिथ्यात्वप्रदेशोदयमहिम्ना विप्रतिपत्त्युपनीतप्रवचनार्थसंशयरूपं सम्यक्त्वप्रतिबन्धान्निमुखमपि तमेव सच्चमित्याद्यालम्बनरूपोत्तेजकप्रज्ञावान्न सम्यक्त्वं प्रतिबद्धुमलमित्यज्ञानाद्गुरुनियोगाद्यदाऽसद्भूतार्थश्रद्धानेऽपि ज्ञावतो जिनाज्ञाप्रामाण्याद्युपगन्तुर्न शुद्धात्मपरिणामरूपसम्यक्त्वोपघात इति ज्ञावनीयं। एतेन यदुच्यते केनचित् परपक्षनिश्रितस्य सर्वथा सम्यक्त्वं न ज्ञवत्येवेति तदपास्तं द्रष्टव्यं, अनन्निनिविष्टस्य मिथ्यादृष्टिनिश्रयाऽपि तदुपनीतासद्भूतार्थश्रद्धानस्यास्वारसिकत्वेन स्वारसिकजिनवचनश्रद्धानाविरोधित्वात्। अन्निनिविष्टस्य तु स्वपक्षपतितस्य परपक्षपतितस्य वा मिथ्यादृष्टित्वानपायादित्यलं प्रपञ्चेन ॥ २४ ॥

मिथ्यादृष्टेः स्वरूपमाह—

मिच्छद्दिठी णियमा उवइट्ठं पवयणं ण सद्दहइ। सद्दहइ असब्ज्ञावं उवइट्ठं वा अणुवइट्ठं ॥ २५ ॥

व्याख्या—मिथ्यादृष्टिर्जीवो गुरुन्निरुपदिष्टं प्रवचनं नियमान्न श्रद्धत्ते, इदं तत्त्वमित्यात्मनि न सम्यक् परिणमयति, किं तूपदिष्टमनुपदिष्टं वा प्रवचनमसद्भूतं विपरीतार्थं श्रद्धत्ते, एकस्मिन्नपि प्रवचनार्थेऽन्निनिवेशेनासद्भूतश्रद्धाने तदितरसकलसद्भूतार्थश्रद्धानस्याप्यश्रद्धानकल्पत्वात्। यत्त्वन्निन्नसूत्रार्थचारिणो बहोरज्ञानतपसि पतनं स्वल्पस्य च मार्गानुसारित्वमुद्घुष्यते तदगीतार्थस्य गीतार्थानिश्रितस्यानन्निनिवेशे सति फलमधिकृत्येति ध्येयम् ॥ २५ ॥

सम्यग्मिथ्यादृष्टिस्वरूपमाह—

सम्मामिच्छादिट्ठी सागारे वा तहा अणागारे । अह वंजणोग्गहम्मि य सागारे होइ नायव्वो ॥२६॥

व्याख्या—सम्यग्मिथ्यादृष्टिरुपयोगे चिन्त्यमानः साकारोपयोगे वा भवत्यनाकारोपयोगे वा । अथशब्दो यद्यर्थः । ततश्च यदि साकारोपयोगे भवति तर्हि व्यञ्जनावग्रह एव व्यावहारिकेऽव्यक्तज्ञानरूपे ज्ञातव्यः, नार्थावग्रहे । यतः संशयज्ञानिप्रख्यो जिनवचनरुचिद्वेषविकलः सम्यग्मिथ्यादृष्टिर्वर्ण्यते, न सम्यग्निश्चयज्ञानी संशयज्ञानप्रख्यतावानध्यवसायरूपव्यञ्जनावग्रह एवेति ॥ २६ ॥

तदेवं कृता सम्यक्त्वोत्पादप्ररूपणा, अथ चारित्रमोहनीयस्योपशमनाऽभिधातव्या । तत्र चारित्रमोहनीयोपशमनाधिकारिणमाह—

वेयगसम्मद्दिट्ठी चरित्तमोहुवसमाय चेट्ठंति । अजउं देसजई वा विरउं व विसोहिअट्ठाए ॥ २७ ॥

व्याख्या—वेदकसम्यग्दृष्टिः क्षायोपशमिकसम्यग्दृष्टिश्चारित्रमोहनीयोपशमनाय चेष्टते, न प्रागुक्तस्वरूपौपशमिकसम्यक्त्वयुक्तः । स चायतोऽविरतो देशयतिर्वा देशविरतो वा विरतः सर्वविरतो वा । एते च कदाचित्संक्लेशाऽध्यायां वर्तन्ते कदाचिच्च विशोध्यऽध्यायां । तत्र विशोध्यऽध्यायां वर्तमान एतदन्यतरश्चारित्रमोहनीयोपशमनाय यतते, न संक्लेशाऽध्यायाम् ॥२७॥

एतेषां चाविरतादीनां त्रयाणामप्येतल्लक्षणम्—

अणाणाणुवगमजयणाहजउं अवज्जविरईए । एगव्वयाइ चरिमो अणुमइमित्तो त्ति देसजई ॥२८॥

अणुमइविरउं अ जई दोण्ह वि करणाणि दोसि न उ तइयं ।
पन्ना गुणसेढी सिं तावइया आलिगा उप्पिं ॥ ३९ ॥

व्याख्या—यो व्रतानि न जानाति न चान्युपगच्छति नापि तत्पालनाय यतते सोऽज्ञानानन्युपगमायतनाऽविरतः । इह ज्ञानग्रहणपालनारूपपदत्रयेणाष्टौ भङ्गाः । *स्थापना । तत्राद्येषु सप्तसु भङ्गेषु नियमादविरतो यतो व्रतानि घुणाक्षरन्यायेन पालितान्यपि न फलवन्ति भवन्ति किंतु सम्यग्ज्ञानसम्यग्ग्रहणपुरस्सरं पालितानि । केवलं चतुर्थाद्येषु भङ्गेषु सम्यग्ज्ञानाभाव उत्तरेषु च सम्यग्ज्ञानानपायेऽपि सम्यग्ग्रहणसम्यक्पालनाभाव इति. प्रथमेषु सप्तसु भङ्गेषु वर्तमानो नियमादविरतः, चरमे तु भङ्गे वर्तमानोऽवद्यस्य पापस्य विरतेर्देशोपरमादेशयतिर्भवति, स चैकव्रतादिरेकव्रतग्राही द्विव्रतग्राहीत्येवं तावद्वाच्यो यावच्चरमोऽनुमतिमात्रः परिपूर्णद्वादशव्रतधारी प्रत्याख्यातसकलसावद्यकर्मा केवलमनुमतिमात्रप्रतिसेवकः । अनुमतिरपि त्रिविधा—प्रतिसेवनानुमतिः प्रतिश्रवणानुमतिः संवासानुमतिश्च । तत्र यः स्वयं परैर्वा कृतं पापं श्लाघते सावद्यारम्भनिष्पादितं वाऽशनाद्युपभुङ्क्ते तस्य प्रतिसेवनानुमतिः, यदा तु पुत्रादिभिः कृतं पापं शृणोति श्रुत्वा चानुमन्यते न च प्रतिषेधति तदा प्रतिश्रवणानुमतिः, यदा तु सावद्यारम्भप्रवृत्तेषु पुत्रादिषु केवलं ममत्वमात्रयुक्तो भवति

* १ न जाणइं, न आदरइं, न पालइं, सर्वलोकः । २ न जाणइं, न आदरइं, पालइं, (अज्ञान) तपस्वी । ३ न जाणइं, आदरइं, न पालइं, पार्श्वस्थः । ४ न जाणइं, आदरइं, पालइं, अगीतार्थः । ५ जाणइं, न आदरइं, न पालइं, श्रेणिकादिकः । ६ जाणइं, न आदरइं, पालइं, अनुत्तरदेवः । ७ जाणइं, आदरइं, न पालइं, संविग्नपाक्षिकः । ८ जाणइं, आदरइं, पालइं, महाव्रतधारी ।

नान्यत्किञ्चित्प्रतिशृणोति श्लाघते वा तदा संवासानुमतिः । तत्र यः संवासानुमतिमात्रमेव सेवते स चरमो देशविरतः, स च सर्वश्रावकाणां मध्ये गुणोत्तमः । यस्तु संवासानुमतेरपि विरतो भवति स यतिरित्युच्यते । कः पुनर्देशविरतिसर्वविरत्योर्लाभक्रमः ? उच्यते—दोण्हवीत्यादि, द्वयोरपि देशविरतिसर्वविरत्योः प्रतिपत्तौ द्वे करणे यथाप्रवृत्तकरणापूर्वकरणाख्ये भवतः, न तु तृतीयमनिवृत्तिकरणं, यतः करणकालात्प्रागप्यन्तर्मुहूर्त्तं यावत्प्रतिसमयमनन्तगुणवृद्ध्याविशुद्ध्या प्रवर्धमानोऽशुभप्रकृत्यनुभागद्विस्थानकभावकरणादिक्रमेणेह यथाप्रवृत्तकरणं प्राग्वत्करोति, तथैव चापूर्वकरणं । नवरमिह गुणश्रेणिर्न वाच्या, अपूर्वकरणाद्धासमाप्त्यनन्तरसमय एव च देशविरतिं सर्वविरतिं वा प्रतिपद्यत इत्यनिवृत्तिकरणस्यावकाश एव नास्तीति । तत्राविरतः सन् करणद्वयं कृत्वा देशविरतिं सर्वविरतिं वा लभते । यदि च देशविरतः सन् करणद्वयं करोति तदा सर्वविरतिमेव । तथा द्वयोः करणयोर्निष्ठितयोः सतोः पश्चाद्देशविरतिं सर्वविरतिं वा प्रतिपन्नः सन्नुदयावलिकाया उपरि गुणश्रेणिमारचयति, तां चानयोस्तावतीमन्तर्मुहूर्त्तप्रमाणां प्रतिसमयं दलिकरचनापेक्षयाऽसङ्ख्येयगुणवृद्धां विदधाति । कस्मादन्तर्मुहूर्त्तं यावद्गुणश्रेणिमारचयति परतोऽपि नेत्युच्यते—देशविरतेः सर्वविरतेर्वा प्रतिपत्त्यनन्तरं देशविरतः सर्वविरतो वाऽन्तर्मुहूर्त्तं कालं यावदवश्यं वर्धमानपरिणामो भवति, ततस्तावन्मात्रामेव गुणश्रेणिं विधत्ते, तत ऊर्ध्वं त्वनियमः । तथाहि—कोऽपि वर्धमानपरिणामो भवति, कोऽपि हीयमानपरिणामः, कोऽप्यवस्थितपरिणामः । ततो यदि वर्धमानपरिणामो भवति तत ऊर्ध्वमपि गुणश्रेणिं वर्धमानां करोति, अथ हीयमानपरिणामस्तर्हि हीयमानां, अवस्थितपरिणामश्चेदवस्थितां, स्वभावस्थे हीनपरिणामे वा देशविरते सर्वविरते वा स्थितिघातरसघातौ न भवतः ॥ २८–२९ ॥

परिणामपच्चयाउ णाऽणोगगया गया अकरणा उ । गुणसेढीसिं णिच्चं परिणामा हाणिवुड्ढिजुआ ॥३०॥

व्याख्या—परिणामप्रत्ययात्परिणामहासलक्षणकारणादित्यर्थः । अनाऽनोगेनाऽनोगाऽभावेन गता देशविरतिपरिणामात्परिभ्रश्याविरतिं गताः, सर्वविरतिपरिणामाच्च च्युत्वा देशविरतिमविरतिं वा गता ऽभूयोऽपि तामेव प्रागभ्युपगतां देशविरतिं सर्वविरतिं वा प्रतिपद्यमाना अकरणा एवाकृतकरणा एव सन्तः प्रतिपद्यन्ते । ये त्वाऽनोगतो देशविरतेः सर्वविरतेर्वा प्रतिपतिता आऽनोगेनैव च मिथ्यात्वं गतास्ते ऽभूयोऽपि जघन्यतोऽन्तर्मुहूर्त्तेन कालेनोत्कर्षतः प्रभूतेन कालेन देशविरतिं सर्वविरतिं वा प्रतिपत्तुमिच्छव उक्तरीत्या करणपुरस्सरमेव प्रतिपद्यन्ते । किंच यावद्देशविरतिं सर्वविरतिं वा प्रतिपालयन्ति तावदेषां देशविरतानां सर्वविरतानां वा गुणश्रेणिरपि समये समये प्राप्यते । नवरमत्र परिणामा हानिवृद्धियुता ऽवन्ति । तथाहि—वर्धमानपरिणामश्चेत्कदाचिदसङ्ख्येयभागाधिकां कदाचित्सङ्ख्येयभागाधिकां कदाचित्सङ्ख्येयगुणां कदाचिदसङ्ख्येयगुणां प्रतिसमयं गुणश्रेणिं करोति, हीयमानपरिणामश्चेदित्थमेव चतुर्धा हीयमानां, अवस्थितपरिणामस्तु तावन्मात्रामिति । उक्तं च—"परिणामपच्चएणं चउव्विहं हाइ वड्ढए वा वि । परिणामवड्ढियाए गुणसेढिं तत्तियं रयइ ॥ १ ॥" एषा चैवं दलिकापेक्षया द्रष्टव्या । कालतस्तु सर्वदाऽपि तावन्मात्रैव, अधश्च क्रमशोऽनुभवतः क्षीयमाणेषु समयेषूपर्युपरि वर्धत इति ॥ ३० ॥

तदेवमुक्तो देशविरतिसर्वविरतिलाभोऽधुनाऽनन्तानुबन्धिनां विसंयोजना प्रतिपाद्यते । अथ चारित्रमोहनीयोपशमनाभिधानेऽधिकृतेऽस्या अभिधानमसङ्गतमिति चेन्न, यश्चारित्रमोहनीयमुपशमयितुमारभते सोऽवश्यमनन्तानुबन्धिनो

विसंयोजयतीति तद्विसंयोजनाया इहावश्यवक्तव्यत्वात् । प्रतिज्ञातविधिमेवाह—

चउगइया पज्जत्ता तिण्णि वि संजोअणा विजोइंति । करणेहिं तीहिं सहिया नंतरकरणं उवसमोवा ॥३१॥

व्याख्या—चतुर्गतिका नैरयिकतिर्यङ्मनुष्यदेवाः पर्याप्ताः सर्वाभिः पर्याप्तिभिः त्रयोऽप्यविरतदेशविरतसर्वविरता अनन्तानुबन्धिनो विसंयोजयन्ति विनाशयन्ति । तत्राविरतसम्यग्दृष्टयश्चतुर्गतिकाः, देशविरतास्तिर्यङ्मनुष्या एव, सर्वविरतास्तु मनुष्या एव । किंविशिष्टाः सन्तो विसंयोजयन्तीत्याह—करणैस्त्रिभिः सहिताः, करणत्रयवक्तव्यता च यथा सम्यक्त्वोत्पादनाधिकारे प्रोक्ता तथैवेहापि वक्तव्या । नवरमिहान्तरकरणं न वक्तव्यं, तदभावाद्युपशमोऽपि न वक्तव्यः । वाशब्दोऽप्यर्थः । इत्यक्षरार्थः । भावार्थस्त्वयम्—अनन्तानुबन्धिनां क्षपणाय प्रवृत्तो यथाप्रवृत्तादीनि त्रीणि करणानि प्राग्वत् करोति, नवरमिहापूर्वकरणे प्रथमसमयादेवारभ्यानन्तानुबन्धिनां गुणसङ्क्रमोऽपि वक्तव्यः । तथाहि—अपूर्वकरणस्य प्रथमसमयेऽनन्तानुबन्धिनां दलिकं शेषकषायरूपपरप्रकृतौ स्तोकं सङ्क्रमयति, ततो द्वितीयसमयेऽसङ्ख्येयगुणं, ततोऽपि तृतीयसमयेऽसङ्ख्येयगुणं, एवं तावद्वाच्यं यावदपूर्वकरणचरमसमयः । एष गुणसङ्क्रमः, एष च प्रथमस्थितिखण्डस्य स्थित्यपेक्षया बृहत्तरस्य द्वितीयादिस्थितिखण्डानां च विशेषविशेषहीनानां यद् घातनं तेन निष्पन्नो य उद्वलनासङ्क्रमस्तदनुविद्धो द्रष्टव्यः । तदनेनोद्वलनासङ्क्रमानुविद्धेन गुणसंक्रमेणापूर्वकरणेऽनन्तानुबन्धिनः शेषप्रकृतिरूपतावस्थापनेन विनाशयति । अनिवृत्तिकरणे च वर्तमानः सन् गुणसङ्क्रमानुविद्धेनोद्वलनासङ्क्रमेण निरवशेषान् विनाशयति, किं त्वधस्तादावलिकामात्रं मुञ्चति, तदपि च स्तिबुकसङ्क्रमेण वेद्यमानासु प्रकृतिषु सङ्क्रमयति । ततोऽन्तर्मुहूर्त्तात्परतोऽनिवृत्तिकरणपर्यवसाने शेषकर्मणामपि स्थितिघातरसघातगुणश्रे-

णयो न भवन्ति, किं तु स्वभावस्थ एव भवति चतुर्विंशतिसत्कर्मा । तदेवमुक्ताऽनन्तानुबन्धिनां क्षपणा । ये त्वाचार्या अनन्तानुबन्धिनामुपशमनां मन्यन्ते, तन्मतेनायमुपशमनाविधिर्द्रष्टव्यः—अविरतसम्यग्दृष्टिदेशविरतप्रमत्तसंयतामन्यतमोऽनन्तानुबन्ध्युपशमनां चिकीर्षुः प्रागुक्तक्रमेण यथाप्रवृत्तकरणमपूर्वकरणं च करोति । केवलमिहापूर्वकरणे गुणश्रेणिरन्तर्मुहूर्त्तप्रमाणानां स्थितीनामुपरि याः स्थितयस्तन्मध्याद्दलिकं गृहीत्वोदयावलिकाया उपरितनीषु स्थितिषु प्रतिसमयमसङ्ख्येयगुणनया निक्षेपरूपा द्रष्टव्या, शेषं तथैव । ततोऽनिवृत्तिकरणे प्रविष्टोऽनिवृत्तिकरणाद्धायाः सङ्ख्येयेषु भागेषु गतेषु सत्स्वेकस्मिन् भागेऽवतिष्ठमानेऽनन्तानुबन्धिनामधस्तादावलिकामात्रं मुक्त्वाऽन्तर्मुहूर्त्तप्रमाणमन्तरकरणमभिनवस्थितिबन्धाद्धासमेनान्तर्मुहूर्त्तप्रमाणेन कालेन करोति । अन्तरकरणसत्कं च दलिकमुत्कीर्यमाणं परप्रकृतिषु बध्यमानासु प्रक्षिपति । प्रथमस्थितिगतं च दलिकमावलिकामात्रं वेद्यमानासु परप्रकृतिषु स्तिबुकसङ्क्रमेण सङ्क्रमयति । अन्तरकरणे च कृते सति द्वितीयसमयेऽनन्तानुबन्धिनामुपरितनस्थितिदलिकमुपशमयितुमारभते । तद्यथा—प्रथमसमये स्तोकमुपशमयति, द्वितीयसमयेऽसङ्ख्येयगुणं, तृतीयसमयेऽसङ्ख्येयगुणं, एवं तावद्वाच्यं यावदन्तर्मुहूर्त्तं । एतावता च कालेन साकल्येनानन्तानुबन्धिन उपशमिता भवन्ति । उपशमिता नाम यथा रेणुनिकरः सलिलबिन्दुनिवहैरभिषिच्याभिषिच्य द्रुघणादिभिर्निष्कुट्टितो निष्पन्दो भवति तथा कर्मरेणुनिकरोऽपि विशोधिसलिलप्रवाहेण परिषिच्य परिषिच्यानिवृत्तिकरणरूपद्रुघणनिष्कुट्टितः सङ्क्रमणोदयोदीरणानिधत्तिनिकाचनाकरणानामयोग्यो भवति । तदेवमाचार्यान्तरमतेनानन्तानुबन्धिनामुपशमनाऽप्यभिहिता ॥ २१ ॥

अथ दर्शनमोहनीयक्षपणाविधिमाह—

दंसणमोहे वि तहा कयकरणऊाइ पच्छिमे होइ । जिणकालगो मणुस्सो पट्ठवगो अट्ठवासुप्पिं ॥३३॥

व्याख्या—इह दर्शनमोहनीयक्षपणाया आरम्भको मनुष्यो जिनकालको जिनकालसंज्ञवी जिनकालश्च प्रथमतीर्थंकरविहरणकालादिर्जम्बूस्वामिकेवलोत्पत्तिपर्यवसानो ज्ञातव्यः । तथा वर्षाष्टकस्योपरि वर्तमानो वज्रर्षभनाराचसंहननश्च भवति । दर्शनमोहेऽपि च क्षपणा तथैव वक्तव्या यथा प्रागनन्तानुबन्धिनामुक्ता । इत्थं सामान्येनातिदिष्टेऽपि य इह विशेषः स उच्यते—इह दर्शनमोहनीयक्षपणायोद्यतो यथाप्रवृत्तादीनि त्रीणि करणानि करोति, तानि च प्रागिव वक्तव्यानि, नवरमपूर्वकरणस्य प्रथमसमय एवानुदितयोर्मिथ्यात्वसम्यङ्मिथ्यात्वयोर्दलिकं गुणसङ्क्रमेण सम्यक्त्वे प्रक्षिपति । उद्वलनासङ्क्रममपि तयोरेवमारभते—प्रथमं स्थितिखण्डं बृहत्तरमुद्वलयति, ततो द्वितीयं विशेषहीनं, ततोऽपि तृतीयं विशेषहीनं, एवं तावद्वाच्यं यावदपूर्वकरणचरमसमयः । अपूर्वकरणप्रथमसमये च यत्स्थितिकर्मासीत्तत्तस्यैव चरमसमये सङ्ख्येयगुणहीनं जातं । एवं स्थितिबन्धोऽपि वेदितव्यः । अपूर्वकरणप्रथमसमये यावान् स्थितिबन्ध आसीत्तदपेक्षया तस्यैवापूर्वकरणस्य चरमसमये सङ्ख्येयगुणहीनो भवतीत्यर्थः । ततोऽनिवृत्तिकरणे प्रविशति । तत्र च प्रविष्टः सन् प्रथमसमयादेवारभ्यापूर्वां गुणश्रेणिमपूर्वं स्थितिघातमपूर्वं रसघातमपूर्वं च स्थितिबन्धं कर्तुमारभते, अनिवृत्तिकरणप्रथमसमय एव च दर्शनत्रिकस्य देशोपशमनानिधत्तिनिकाचना व्यवच्छिद्यन्ते । देशोपशमनादीनां त्रयाणां करणानां नैकमपि दर्शनत्रिकस्य ततः प्रभृति प्रवर्तते इत्यर्थः । किंच तत्रयस्य स्थितिसत्कर्मानिवृत्तिकरणप्रथमसमयादारभ्य स्थितिघातादिभिर्घा-

त्यमानं स्थितिखण्डसहस्रेषु गतेष्वसंज्ञिपञ्चेन्द्रियस्थितिसत्कर्मसमानं भवति। ततः स्थितिखण्डसहस्रपृथक्त्वे गते सति चतुरिन्द्रियस्थितिसत्कर्मसमानं भवति। ततोऽपि तावन्मात्रेषु खण्डेषु गतेषु त्रीन्द्रियस्थितिसत्कर्मसमानं। ततोऽपि तावन्मात्रेषु खण्डेषु गतेषु द्वीन्द्रियस्थितिसत्कर्मसमानं। ततोऽपि तावन्मात्रेषु खण्डेषु गतेष्वेकेन्द्रियस्थितिसत्कर्मसमानं भवति। ततोऽपि तावन्मात्रेषु खंडेषु गतेषु पल्योपममात्रप्रमाणं भवति। एतच्च चूर्णिकृन्मतेनोक्तं। पचसङ्ग्रहकृन्मते तु पल्योपमसङ्ख्येयभागमात्रं। तदुक्तं पञ्चसङ्ग्रहे—"तिण्णिखंडसहस्साइं एक्केके अंतरम्मि गच्छंति। पलिउवमसंखंसे दंसणसंते तउ जाए ॥ १ ॥" इत्यादि। एकैकस्मिन्नन्तरे इति असंज्ञिपञ्चेन्द्रियचतुरिन्द्रियादिसमानस्थितिसत्कर्मभवनानामपान्तराले, तत एकं सङ्ख्येयतमं भागं मुक्त्वा शेषं सर्वमपि त्रयाणामपि दर्शनमोहनीयानां विनाशयति, ततस्तस्यापि प्रागमुक्तस्य सङ्ख्येयतमभागस्यैकं सङ्ख्येयभागं मुक्त्वा शेषान् सङ्ख्येयान् भागान् विनाशयति, एवं स्थितिघाताः सहस्रशो व्रजन्ति, तदनन्तरं च मिथ्यात्वस्यासङ्ख्येयान् भागान् सम्यक्त्वसम्यङ्मिथ्यात्वयोस्तु सङ्ख्येयान् भागान् खण्डयति। अनेन विधिना स्थितिखण्डेषु प्रभूतेषु परिगलितेषु सत्सु मिथ्यात्वमुदयावलिकारहितं सकलमपि क्षीणं, आवलिकामात्रं तु तिष्ठति, सम्यक्त्वसम्यङ्मिथ्यात्वयोस्तु पल्योपमासङ्ख्येयभागमात्रं शेषीभूतं तिष्ठति। अमूनि च स्थितिखण्डानि खण्ड्यमानानि मिथ्यात्वसत्कानि सम्यक्त्वसम्यग्मिथ्यात्वयोः प्रक्षिपति, सम्यङ्मिथ्यात्वसत्कानि सम्यक्त्वे, सम्यक्त्वसत्कानि त्वधस्तात्स्वस्थाने इति। यदपि मिथ्यात्वदलिकमावलिकामात्रमुद्धरितं तिष्ठति तदपि स्तिबुकसङ्क्रमेण सम्यक्त्वे प्रक्षिपति, तदनन्तरं सम्यक्त्वसम्यङ्मिथ्यात्वयोरसङ्ख्येयान् भागान् खण्डयत्येकं मुञ्चति, ततस्याप्यसङ्ख्येयान् भागान् खण्डयत्येकं मुञ्चति एवं कतिपयेषु स्थितिखण्डेषु गतेषु सम्य-

ञ्जिथ्यात्वमावलिकामात्रं तिष्ठति, तदानीं च सम्यक्त्वस्थितिसत्कर्माष्टवर्षप्रमाणं ञवति । स चाष्टवर्षप्रमाणसम्यक्त्वसत्कर्मा निश्चयनयमतेन सकलप्रत्यूहविलयाद्दर्शनमोहनीयक्षपक उच्यते । ततो निश्चयनयाञ्जिमतक्षपकत्वञ्जवनादूर्ध्वं सम्यक्त्वस्य स्थितिखण्डमन्तर्मुहूर्त्तप्रमाणमुत्किरति घातयतीत्यर्थः। तद्दलिकं तूदयसमयादारभ्य प्रक्षिपति, तच्चैवम्—उदयसमये स्तोकं, ततो द्वितीयसमयेऽसङ्खेयगुणं, ततोऽपि तृतीयसमयेऽसङ्खेयगुणं, एवं तावद्वाच्यं यावद्गुणश्रेणीशिरः, तत ऊर्ध्वं विशेषहीनं विशेषहीनं तावद्यावच्चरमा स्थितिः । ततो द्वितीयं स्थितिखण्डमन्तर्मुहूर्त्तप्रमाणं पूर्वस्मादसङ्खेयगुणमुत्किरति, उत्कीर्य च प्रागुक्तप्रकारेणोदयसमयादारभ्य निक्षिपति, एवं पूर्वस्मात्पूर्वस्मादसङ्खेयगुणान्यान्तर्मौहूर्त्तिकान्यनेकानि स्थितिखण्डान्युत्किरति निक्षिपति च तावद्यावद्द्विचरमं स्थितिखण्डं । द्विचरमाच्च स्थितिखण्डादन्तिमं स्थितिखण्डं सङ्खेयगुणं, तस्मिंश्चान्तिमे स्थितिखण्डे खंड्यमाने सङ्खेयञ्जागं गुणश्रेण्याः खण्डयति, अन्याश्च तदुपरितनीः सङ्खेयगुणाः स्थितीः तावन्मानत्वादेव चरमखण्डस्य उत्कीर्य च तद्दलिकमुदयसमयादारभ्यासङ्खेयगुणनया प्रक्षिपति, तद्यथा—उदयसमये स्तोकं, ततो द्वितीयसमयेऽसङ्खेयगुणं, ततोऽपि तृतीयसमयेऽसङ्खेयगुणं, एवं तावद्वाच्यं यावद्गुणश्रेणीशिरः । अत ऊर्ध्वं तूत्कीर्यमाणमेव दलिकं प्राप्यते, न तत्प्रक्षेपाधारभूतमिति न तत् क्वापि प्रक्षिपति, चरमे च स्थितिखण्डे उत्कीर्णे सत्यसौ क्षपकः कृतकरण इति परिज्ञाप्यते । तथा चाह—"कयकरणद्धाइ पच्छिमे होइ" पश्चिमे चरमे खण्डे उत्कीर्णे कृतकरणाद्धायां वर्तते कृतकरणो ञ्जवतीत्यर्थः । अस्यां च कृतकरणाद्धायां वर्तमानः कश्चित्कालमपि कृत्वा चतसृणां गतीनामन्यतमस्यां गतावुत्पद्यते । लेश्यायामपि पूर्वं शुक्लायामेवासीत्, सम्प्रति त्वन्यतमस्यां गच्छति । तदेवं प्रस्थापको मनुष्यो निष्ठापकस्तु

चतसृष्वपि गतिषु भवतीत्यागत । उक्तं च—"पढवगो उ मणूसो निढवगो होइ चउसु वि गईसु" । यदि पुनस्तदानीं कालं न करोति तदा वेदितसम्यक्त्वशेषः क्षायिकसम्यग्दृष्टिः सन्नुपशमश्रेणिं क्षपकश्रेणिं वा समारोहति । तत्र यो वैमानिकेष्वेव बद्धायुष्कः क्षीणसप्तकः स उपशमश्रेणिमारोहति, अबद्धायुष्कस्तु क्षपकश्रेणिमन्यगतिबद्धायुष्कस्तु न कामपि श्रेणिमारभते श्रेणिकादिवदिति ज्ञेयं । अथ क्षीणसप्तको गत्यन्तरं सङ्क्रामन् कतितमे भवे मोक्षमुपयाति ? उच्यते—तृतीये चतुर्थे वा । तथाहि—यदि स्वर्गे नरके वा गच्छति तदा स्वर्गभवान्तरितो नरकभवान्तरितो वा तृतीयभवे मोक्षमुपयाति, यदि चासौ तिर्यक्षु मनुष्येषु वा मध्ये समुत्पद्यते तदाऽवश्यमसङ्ख्येयवर्षायुष्केष्वेव न सङ्ख्येयवर्षायुष्केषु, ततस्तद्भवानन्तरं देवभवं, तस्माच्च देवभवाच्च्युत्वा मनुष्यभवं ततो मोक्षं यातीति चतुर्थभवे मोक्षगमनं । उक्तं च पञ्चसङ्ग्रहे—"तइयचउत्थे तंमि व भवंमि सिज्झंति दंसणे खीणे । जं देवणिरयसंखाउ चरमदेहेसु ते हुंति ॥ १ ॥" अत्र तृतीयभवे मोक्षगमने देवनारकेषु मध्ये उत्पत्तिर्हेतुश्चतुर्थभवे च मोक्षगमनेऽसङ्ख्येयवर्षायुष्केषूत्पत्तिस्तद्भवमोक्षगमने च चरमदेहत्वमिति क्रमेण योजनीयं । इदं च प्रायोवृत्त्योक्तमिति संभाव्यते, यतः क्षीणसप्तकस्य कृष्णस्य पञ्चमभवेऽपि मोक्षगमनं श्रूयते । उक्तं च—"नरयाउ नरभवम्मि देवो होऊण पंचमे कप्पे । तत्तो चुओसमाणो बारसमो अममतित्थयरो ॥ १ ॥" इति । इत्थमेव दुःप्रसहादीनामपि क्षायिकसम्यक्त्वमागमोक्तं युज्यत इति यथागमं विभावनीयम् ॥ ३२ ॥

तदेवं दर्शनमोहनीयं क्षपयित्वोपशमश्रेणिर्भवतीति प्रकार उक्तोऽथ दर्शनमोहनीयमुपशमय्याप्युपशमश्रेणिप्रतिपत्ति-

ञ्जवतीति प्रकारान्तरमाह—

अहवा दंसणमोहं पुव्विं उवसामइत्तु सामन्ने । पढमठ्ठिइमावलियं करेइ दोण्हं अणुदियाणं ॥ ३३ ॥

व्याख्या—अथवेति प्रकारान्तरे । इह यदि वेदकसम्यग्दृष्टिः सन्नुपशमश्रेणिं प्रतिपद्यते ततो नियमाद्दर्शनमोहनीयत्रितयं पूर्वमुपशमयति, तच्च श्रामण्ये स्थितः सन्नुपशमयति। तथा चाह—श्रामण्ये स्थितः सन् दर्शनमोहनीयमुपशमय्यान्तरकरणं कुर्वन्ननुदितयोर्मिथ्यात्वसम्यङ्मिथ्यात्वयोः प्रथमां स्थितिमावलिकामात्रां करोति, सम्यक्त्वस्य चान्तर्मुहूर्त्तप्रमाणां, उत्कीर्यमाणं च दलिकमन्तरकरणसत्कं त्रयाणामपि सम्यक्त्वप्रथमस्थितौ प्रक्षिपति । अयमेवात्र विशेषः । शेषमुपशमनाविधिरशेषोऽपि प्राग्वदेव करणत्रयानुगोऽवसेयः । अत्र मुखं व्यादाय स्वपितीत्यत्रेव क्त्वाप्रत्ययस्य व्यत्ययेन प्रयोग इति प्रथमस्थितिमावलिकां कृत्वा पूर्वं दर्शनमोहनीयमुपशमयतीति संमुखोऽर्थः । अन्तरकरणप्रवेशसमयादारभ्यान्तर्मुहूर्त्तेऽतिक्रान्ते गुणसङ्क्रमावसाने चात्र विध्यातसङ्क्रमः सम्यक्त्वस्य ञ्जवति विध्यातसङ्क्रमेण मिथ्यात्वसम्यङ्मिथ्यात्वयोर्दलिकं सम्यक्त्वे प्रविशतीत्यर्थः । उक्तं च—"पढमुवसमंव सेसं अंतमुहुत्ताउ तस्स विप्पाउं" इति ॥ ३३ ॥

दर्शनत्रितयमुपशमय्य किं करोतीत्याह—

अऊापरिवत्तीउं पमत्तइयरे सहस्ससो किच्चा । करणाणि तिन्नि कुणए तइयविसेसे इमे सुणसु ॥ ३४ ॥

व्याख्या—प्रमत्तञ्जावे इतरस्मिँश्चाप्रमत्तञ्जावे संक्लेशविशोधिवशादऊापरि (रा) वृत्तीः कालपरिवर्त्तनानि सहस्रशः कृत्वा चारित्रमोहनीयोपशमनाय पुनरपि त्रीणि करणानि यथाप्रवृत्तादीनि करोति, तानि च प्राग्वदुक्तव्यानि, केवल-

मिह यथाप्रवृत्तकरणमप्रमत्तगुणस्थानके ऽष्टव्यं, अपूर्वकरणमपूर्वगुणस्थाने,अनिवृत्तिकरणमनिवृत्तिबादरसंपरायगुणस्थानके । अत्रापि स्थितिघातादयः पूर्ववदेव प्रवर्त्तन्ते । नवरमिह सर्वासामशुभप्रकृतीनामबध्यमानानां गुणसङ्क्रमः प्रवर्त्तत इति वक्तव्यं । अपूर्वकरणाऽऽद्यायाश्च सङ्ख्येयतमे भागे गते सति निद्राप्रचलयोर्बन्धव्यवच्छेदः । ततः प्रभूतेषु स्थितिखण्डसहस्रेषु गतेषु सत्स्वपूर्वकरणाऽऽद्यायाः सङ्ख्येया भागा गता भवन्त्येकोऽवशिष्यते । अत्रान्तरे सुरद्विकपञ्चेन्द्रियजातिवैक्रियद्विकाहारकद्विकतैजसकार्मणसमचतुरस्रवर्णचतुष्कागुरुलघूपघातपराघातोच्छ्वासत्रसचतुष्कशुभखगतिस्थिरपञ्चकनिर्माणतीर्थकरलक्षणानां त्रिंशत्प्रकृतीनां बन्धव्यवच्छेदः । ततः स्थितिखण्डपृथक्त्वे गते सत्यपूर्वकरणाऽऽद्यायाश्चरमसमये हास्यरतिभयजुगुप्सानां बन्धव्यवच्छेदः, हास्यरत्यरतिभयशोकजुगुप्सानामुदयव्यवच्छेदः, सर्वकर्मणां देशोपशमनानिधत्तिनिकाचनाकरणव्यवच्छेदश्च । ततोऽनन्तरसमये तृतीयेऽनिवृत्तिकरणे प्रविशति । तत्र चेमान् वक्ष्यमाणान् विशेषान् शृणुत ॥ ३४ ॥

अंतोकोडाकोडी संतं अणियट्टिणो उ उदहीणं । बंधो अंतोकोडी पुव्वकमा हाणि अप्पबहू ॥ ३५ ॥

व्याख्या—अनिवृत्तेरनिवृत्तिकरणस्य प्रथमसमये आयुर्वर्जानां सप्तानां कर्मणां स्थितिसत्कर्मान्तःसागरोपमकोटाकोटिप्रमाणं, बन्धः पुनरन्तःसागरोपमकोटिप्रमाणः । पञ्चसङ्ग्रहे त्वत्र—"अंतो कोडाकोडी बंधं सन्तं च सत्तण्हं"इतिग्रन्थेनायुर्वर्जानां सप्तकर्मणां बन्धस्य सत्तायाश्चाविशेषेणान्तःकोटाकोटीप्रमाणत्वमेवोक्तं । तत्र यद्यपि प्रागुक्तेष्वपि करणेष्वेतावान् बन्ध एतावदेव च सत्कर्म सप्तकर्मणां प्राप्यते तथाप्यत्र बन्धसत्कर्मणी तदपेक्षया सङ्ख्येयगुणहीने ऽष्टव्ये इति विशेषः । सोऽपि च बन्धः पूर्वक्रमेण हानिं गच्छति, तद्यथा—स्थितिबन्धे पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमसङ्ख्येयभागहीनं करोति, तस्मि-

ऽपि पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमसङ्ख्येयभागहीनं करोतीत्यादि । अल्पबहुत्वमपि बन्धसत्तापकर्षेऽपि पूर्वक्रमेणैव वेदितव्यं । तद्यथा—सर्वस्तोके नामगोत्रे, स्वस्थाने तु परस्परं तुल्ये । ततो ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणि विशेषाधिकानि, स्वस्थाने तु परस्परं तुल्यानि । ततोऽपि मोहनीयं विशेषाधिकं । एतच्चाल्पबहुत्वं सर्वकालमपि द्रष्टव्यं यावदेतत्स्थानमिति ॥ ३५ ॥

ठिइकंमगमुक्कस्सं पि तस्स पल्लस्स संखतमभागो । ठिइबंधबहुसहस्से सेक्केक्कं जं भणिस्सामो ॥३६॥

व्याख्या—उत्कृष्टमपि स्थितिकर्मैकं हन्यमानं तस्य चारित्रमोहनीयोपशमकस्यानिवृत्तिकरणे प्रविष्टस्य पल्योपमस्य सङ्ख्येयतमो भागः, जघन्यमपि तस्यैतावदेव, केवलमुत्कृष्टपल्योपमसङ्ख्येयतमभागप्रमाणस्थितिघाताज्जघन्योऽसौ लघुतरो वेदितव्यः स्थितिघातेषु च सहस्रशो गतेषु सत्सु बध्यमानप्रकृतीनां बन्धः सागरोपमसहस्रपृथक्त्वप्रमाणो भवति । ततोऽनिवृत्तिकरणाद्यायाः सङ्ख्येयेषु भागेषु गतेषु सत्स्वेकस्मिँश्चावशिष्टे सत्यसंज्ञिपञ्चेन्द्रियबन्धतुल्यः स्थितिबन्धो भवति । तदनन्तरं स्थितिखण्डपृथक्त्वे गते सति चतुरिन्द्रियबन्धतुल्यः, ततो भूयः स्थितिखण्डपृथक्त्वे गते सति त्रीन्द्रियबन्धतुल्यः, ततोऽमुनैव क्रमेण द्वीन्द्रियबन्धतुल्यः, ततोऽप्येवमेवैकेन्द्रियबन्धतुल्यः, इत ऊर्ध्वं स्थितिबन्धसहस्रेषु गतेष्वायुर्वर्जानां सप्तानां कर्मणामेकैकं यदुक्तव्यं भवति तद्भणिष्यामः ॥ ३६ ॥

पल्लदिवड्ढबिपल्लाणि जाव पल्लस्स संखगुणहाणी । मोहस्स जाव पल्लं संखेज्जा भागहाऽमोहा ॥३७॥

तो णवरमसंखगुणा एक्कपहारेण तीसगाणमहो । मोहे वीसग हेट्ठा य तीसगाणुप्पि तइयं च ॥३८॥

व्याख्या—पल्योपमसार्धपल्योपमद्विपल्योपमानि यावत्पूर्वक्रमेणैव हानिरल्पबहुत्वं च। अयमिह भावार्थः—एकेन्द्रियबन्धतुल्यबन्धानन्तरं स्थितिखण्डसहस्रेषु गतेषु सत्सु नामगोत्रयोः स्थितिबन्धः पल्योपममात्रः। ज्ञानावरणदर्शनावरणान्तरायवेदनीयानां सार्धपल्योपममानः, मोहनीयस्य द्विपल्योपमप्रमाणो भवति। अमुं च पल्योपमसार्धपल्योपमादिकं स्थितिबन्धं यावत्प्राक्तनः स्थितिबन्धः सर्वोऽपि पूर्वस्मात्पूर्वस्मात् पल्योपमस्य संख्येयतमेन भागेन हीनो हीनतरो ज्ञातव्यः। स्थितिसत्कर्मणोऽपि चाल्पबहुत्वं बन्धक्रमेण तथैवेति। पल्यस्येति षष्ठी पञ्चम्यर्थे। अध इति चाध्याहर्तव्यं। ततः पल्योपमादधः स्थितिबन्धस्य संख्येयगुणहानिर्भवतीत्यर्थः। इदमुक्तं भवति—यस्य कर्मणो यदा पल्योपमप्रमाणः स्थितिबन्धस्तस्य तत्कालादनन्तरमन्योऽन्यः स्थितिबन्धो जायमानः संख्येयगुणहीनो भवति। ततश्चेदानीं नामगोत्रयोः पल्योपमप्रमाणात् स्थितिबन्धादन्यं स्थितिबन्धं संख्येयगुणहीनं करोति, शेषाणां तु कर्मणां पल्योपमसंख्येयभागहीनं करोति। एवं कतिपयेषु स्थितिबन्धसहस्रेषु गतेषु ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणां पल्योपममात्रः स्थितिबन्धः, मोहनीयस्य च सार्धपल्योपममात्रः स्यात्। ततो ज्ञानावरणीयादीनामन्यः स्थितिबन्धः संख्येयगुणहीनः, मोहनीयस्य तु संख्येयभागहीनः, तत ऊर्ध्वं स्थितिबन्धसहस्रेषु गतेषु मोहनीयस्य स्थितिबन्धः पल्योपमप्रमाणो भवति। ततो मोहनीयस्यान्यः स्थितिबन्धः संख्येयगुणहीनः प्रवर्तते। तदानीं च शेषकर्मणां पल्योपमसंख्येयभागप्रमाणः स्थितिबन्धो भवति। अत्राल्पबहुत्वमेतत्—नामगोत्रयोः स्थितिसत्कर्म सर्वस्तोकं, ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणां संख्येयगुणं, स्वस्थाने तु परस्परं तुल्यं। ततोऽपि मोहनीयस्य संख्येयगुणं, "मोहस्स जाव पल्लं संखेज्जइभागह त्ति" यावन्मोहस्य मोहनीयस्य

पल्यं पल्योपममात्रः स्थितिबन्धो न भवति तावत्प्राक्तनः सर्वोऽपि मोहनीयस्य स्थितिबन्धः सङ्ख्येयभागहाः पल्योपमस्य सङ्ख्येयतमेन भागेन हीनो हीनतरो वेदितव्यः, पल्योपममात्रे च स्थितिबन्धे जाते सत्यन्यं स्थितिबन्धं सङ्ख्येयगुणहीनं करोति, एतच्च भावितमेव । अस्माच्च सङ्ख्येयगुणहीनान्मोहनीयस्य स्थितिबन्धात्प्रभूतेषु स्थितिबन्धेषु गतेषु सत्सु मोहनीयस्यापि स्थितिबन्धः पल्योपमसङ्ख्येयभागमात्रो भवति । तदानीं च यद्भवति तदाह—"अमोहा तो णवरमसंखगुणे-त्यादि" "तो त्ति" ततः सर्वेषां कर्मणां पल्योपमसङ्ख्येयभागमात्रस्थितिबन्धभवनानन्तरं "अमोहे" इति द्विवचनतात्पर्यान्मोहनीयवर्जे नामगोत्रे गृह्येते, नवरं केवलं अन्यं स्थितिबन्धमधिकृत्यासङ्ख्येयगुणे भवतः । अन्यं स्थितिबन्धं नामगोत्रयोरसङ्ख्येयगुणहीनमारभते, शेषाणां तु सङ्ख्येयगुणहीनमित्यर्थः । अत्र स्थितिसत्कर्मापेक्षयाऽल्पबहुत्वं चिन्त्यते—सर्वस्तोकं नामगोत्रयोः सत्कर्म, ततो ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणां स्थितिबन्धोऽसङ्ख्येयगुणः स्वस्थाने तु परस्परं तुल्यः । ततोऽपि मोहनीयस्य सङ्ख्येयगुणः । ततः स्थितिघातसहस्रेषु गतेषु सत्सु ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणां स्थितिबन्धोऽसङ्ख्येयगुणहीनो भवति । तदानीं स्थितिसत्कर्माधिकृत्येदमल्पबहुत्वं—सर्वस्तोकं नामगोत्रयोः सत्कर्म, ज्ञानावरणीयादीनां चतुर्णां ततोऽसङ्ख्येयगुणं स्वस्थाने तु मिथः समानं, ततो मोहनीयस्यासङ्ख्येयगुणं । ततः स्थितिघातसहस्रेषु गतेषु सत्सु "एक्कपहारेण तीसगाणमहो मोहे त्ति" एकप्रहारेणैकेनैवत्रिंशत्कानां त्रिंशत्सागरोपमकोटाकोटिस्थितिकानां ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामधस्तान्मोहनीये कर्मणि स्थितिबन्धं सत्तां चाधिकृत्यासङ्ख्येयगुणहानिर्भवति, नात्र कश्चिदन्यो विकल्पः करणीयः । पूर्वं हि मोहनीयस्य सत्कर्म ज्ञानावरणीयादीनामुपरिष्टादसङ्ख्येयगुणमासीत्,

सम्प्रति पुनरेकहेलयैव तेषामधस्तादसङ्ख्येयगुणहीनं जातमिति बृहत्तरस्थितिखण्डापवर्तनमेतदिति भावः। अत्राल्पबहुत्वमुच्यते—सर्वस्तोकं नामगोत्रयोः सत्कर्म, ततो मोहनीयस्यासङ्ख्येयगुणं, ततोऽपि ज्ञानावरणीयादीनां चतुर्णामसङ्ख्येयगुणमिति। ततः स्थितिबन्धसहस्रेषु गतेषु सत्सु "वीसगहेट्ठा य त्ति" मोहनीयस्य स्थितिबन्ध एकहेलयैव विंशतिकयोर्विंशतिसागरोपमकोटाकोटिस्थितिकयोर्नामगोत्रयोरधस्तादसङ्ख्येयगुणहीनो जातः। अत्र स्थितिबन्धमाश्रित्याल्पबहुत्वं चिन्त्यते—सर्वस्तोको मोहनीयस्य स्थितिबन्धः, ततो नामगोत्रयोरसङ्ख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः। ततः कतिपयेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु "तीसगाणुप्पि तइयं च त्ति" तृतीयं वेदनीयं स्थितिकर्माधिकृत्य त्रिंशत्कानां त्रिंशत्सागरोपमकोटाकोटिस्थितिकानां ज्ञानावरणदर्शनावरणान्तरायाणामुपरि जातं। इदमुक्तं भवति—मोहनीयनामगोत्राणि स्थितिसत्कर्माधिकृत्य प्राक् त्रिंशत्कानामधस्ताज्जातानि, सम्प्रति तु त्रिंशत्कानामपि मध्ये ज्ञानावरणदर्शनावरणान्तरायाणि वेदनीयस्याधस्ताज्जातानि, वेदनीयं तु सर्वोपरि जातं। तदनन्तरं च तस्य वेदनीयस्यान्यः स्थितिबन्धः सर्वेभ्योऽप्यसङ्ख्येयगुणो जायते। अत्र स्थितिबन्धमाश्रित्याल्पबहुत्वमुच्यते—सर्वस्तोको मोहनीयस्य स्थितिबन्धः, ततो नामगोत्रयोरसङ्ख्येयगुणः, स्वस्थाने तु मिथः समानः, ततोऽपि ज्ञानावरणदर्शनावरणान्तरायाणामसङ्ख्येयगुणः स्वस्थाने तु मिथस्तुल्यः, ततोऽपि वेदनीयस्यासङ्ख्येयगुणः॥ ३७–३८॥

तो तीसगाणमुप्पिं च वीसगाइं असंखगुणणाए। तइयं च वीसगाहिय विसेसमहियं कमेणेइ॥३९॥

व्याख्या—ततोऽनेनैव विधिना स्थितिबन्धसहस्रेषु गतेषु सत्सु त्रिंशत्कानां त्रिंशत्सागरोपमकोटाकोटिस्थितिकानां

ज्ञानावरणदर्शनावरणान्तरायाणामुपरि स्थितिबन्धमधिकृत्य विंशतिके नामगोत्रे जाते। अत्राल्पबहुत्वमिदं—सर्वस्तोको मोहनीयस्य स्थितिबन्धः, ततो ज्ञानावरणदर्शनावरणान्तरायाणामसङ्ख्येयगुणः स्वस्थाने तु परस्परं तुल्यः, ततोऽपि नामगोत्रयोरसङ्ख्येयगुणः स्वस्थाने तु परस्परं तुल्यः, ततोऽपि वेदनीयस्य विशेषाधिकः। "असंखगुणणाए त्ति" यत्र मोहनीयं ज्ञानावरणादिभ्योऽसङ्ख्येयगुणहीनं कृतं ततः प्रभृति सर्वत्राप्यसङ्ख्येयगुणहीनमेव क्रमेण एत्यागच्छति। तथा तृतीयं वेदनीयं विंशतिकाभ्यां नामगोत्राभ्यां विशेषाधिकं जातं सत्सर्वत्रापि विशेषाधिकमेव क्रमेण एत्यनुवर्तते ॥ ३९ ॥

अहुदीरणा असंखेज्जसमयबद्धाण देसघाइ ब्व। दाणंतराय मणपज्जवं च तो ओहिचक्खूणं॥४०॥

व्याख्या—अथशब्दोऽधिकारान्तरसूचकः यस्मिन् काले सर्वकर्मणां पल्योपमासङ्ख्येयभागमात्रः स्थितिबन्धस्तस्मिन् कालेऽसङ्ख्येयसमयबद्धानामेव कर्मणामुदीरणा प्रवर्तते, यतस्तावन्मात्रस्थितिबन्धकरणे बध्यमानप्रकृतिस्थित्यपेक्षया याः पूर्वबद्धाः समयादिहीनाः स्थितयस्ता एवोदीरणामुपगच्छन्ति, नान्याः, ताश्च चिरकालबद्धाः क्षीणशेषाः संजवन्तीत्यसङ्ख्येयसमयबद्धानां तदानीमुदीरणा। ततः स्थितिबन्धसहस्रेषु परिगलितेष्वत्रास्मिन् प्रस्तावे दानान्तरायं मनःपर्यायज्ञानावरणं च देशघाति बध्नाति अनयोरनुभागं देशघातिनं बध्नातीत्यर्थः। ततः स्थितिबन्धसहस्रेषु गतेषु सत्सु अवधिज्ञानावरणावधिदर्शनावरणलाभान्तरायाणामनुभागं देशघातिनं बध्नाति ॥ ४० ॥

सुयभोगाचक्खूणं चक्खू य तओ मई सपरिभोगा। विरियं च असेढिगया बंधंति उ सव्वघाईणि ॥ ४१ ॥

व्याख्या—ततोऽपि असङ्ख्येयेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु श्रुतज्ञानावरणभोगान्तरायाचक्षुर्दर्शनावरणानामनुभागं

देशघातिनं बध्नाति । ततोऽपि सङ्ख्येयेषु स्थितिबन्धसहस्रेष्वतिक्रान्तेषु चक्षुर्दर्शनावरणीयस्यानुभागं देशघातिनं बध्नाति । ततोऽपि सङ्ख्येयेषु स्थितिबन्धसहस्रेष्वतीतेषु "मई सपरिभोग त्ति" मतिज्ञानावरणीयस्य परिभोगान्तरायसहितस्यानुभागं देशघातिनं बध्नाति । ततोऽपि स्थितिबन्धसहस्रेषु व्यतीतेषु सत्सु वीर्यान्तरायानुभागं देशघातिनं बध्नाति । अश्रेणिगताः क्षपकश्रेणिमुपशमश्रेणिं वाऽप्राप्ताः पूर्वोक्तान्यपि दानान्तरायादीनि कर्माणि सर्वघातीनि बध्नन्ति तेषामनुभागं सर्वघातिनं बध्नन्तीत्यर्थः ॥ ४१ ॥

संजमघाईणंतरमेव उ पढमठिईं य अन्नयरे । संजलणावेयाणं वेइज्जंतीण कालसमा ॥ ४२ ॥

व्याख्या—वीर्यान्तरायदेशघात्यनुभागबन्धानन्तरं सङ्ख्येयेषु स्थितिबन्धसहस्रेषु परिगलितेषु संयमघातिनां कर्मणामनन्तानुबन्धिवर्जानां द्वादशानां कषायाणां नवानां च नोकषायाणां "अंतरं ति" अन्तरकरणं करोति । तत्र चतुर्णां संज्वलनानामन्यतमस्य यस्य संज्वलनस्योदयो यस्य च त्रयाणां वेदानामन्यतमस्य वेदस्योदयस्तयोर्वेदकषायान्यतरयोः कर्मणोः प्रथमा स्थितिः स्वोदयकालप्रमाणा भवति, अन्येषां चैकादशानां कषायाणामष्टानां च नोकषायाणां प्रथमा स्थितिरावलिकामात्रा । स्वोदयकालप्रमाणं च चतुर्णां संज्वलनानां त्रयाणां च वेदानामिदम्—स्त्रीवेदनपुंसकवेदयोरुदयकालः सर्वस्तोकः, स्वस्थाने तु मिथः समानः, ततः पुरुषवेदस्य सङ्ख्येयगुणः, ततोऽपि संज्वलनक्रोधस्य विशेषाधिकः, ततोऽपि संज्वलनमानस्य विशेषाधिकः, ततोऽपि संज्वलनमायाया विशेषाधिकः, ततोऽपि संज्वलनलोभस्य विशेषाधिकः। उक्तं च पञ्चसङ्ग्रहे—"थीअपुमोदयकाला संखेज्जगुणो उ पुरिसवेयस्स । तस्स वि विसेसअहिउ कोहे तत्तो वि जकह-

मसो ॥ १ ॥" तत्र संज्वलनक्रोधेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणक्रोधोपशमो न भवति तावत्संज्वलनक्रोधस्योदयः । संज्वलनमानेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणमानोपशमो न भवति तावत्संज्वलनमानस्योदयः । मायया चोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणमायोपशमो न भवति तावत्संज्वलनमायाया उदयः । संज्वलनलोभेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणलोभोपशमो न भवति तावद्बादरसंज्वलनलोभस्योदयः । ततः परं सूक्ष्मसंपरायाद्धा । तदेवमन्तरकरणमुपरितनभागापेक्षया समस्थितिकमधोभागापेक्षया चोक्तनीत्या प्रथमस्थितिप्रतियोगिकतिपयप्रकृत्युदयकालवैषम्याद्विषमस्थितिकं, यावता कालेनान्यं स्थितिखण्डं घातयति यद्वान्यं स्थितिबन्धं कुरुते तावता कालेनान्तरकरणं करोति, त्रीण्यपि युगपदारभते युगपदेव च निष्ठां नयतीत्यर्थः । अन्तरकरणकाले चानुभागखण्डसहस्राणि व्यतिक्रामन्ति, तच्चान्तरं प्रथमस्थितेः सङ्ख्येयगुणं भवति। अन्तरकरणसत्कदलिकप्रक्षेपविधिश्चायम्—येषां कर्मणां तदानीं बन्ध उदयश्च विद्यते तेषामन्तरकरणसत्कं दलिकं प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति, यथा पुरुषवेदारूढः पुरुषवेदस्य । येषां तु कर्मणामुदय एव केवलो विद्यते न बन्धस्तेषामन्तरकरणसत्कं दलिकं प्रथमस्थितावेव प्रक्षिपति न द्वितीयस्थितावपि, यथा स्त्रीवेदोदयारूढः स्त्रीवेदस्य । येषां पुनरुदयो न विद्यते, किं तु केवलो बन्धस्तेषामन्तरकरणसत्कं दलिकं द्वितीयस्थितावेव प्रक्षिपति न प्रथमस्थितौ, यथा संज्वलनक्रोधोदयारूढः संज्वलनमानादीनां । येषां पुनर्न बन्धो नाप्युदयस्तेषामन्तरकरणसत्कं दलिकं परप्रकृतौ प्रक्षि-

पति, यथा द्वितीयतृतीयकषायाणामिति द्रष्टव्यं । "अन्नयरे" इत्यार्षत्वादेकवचनं पुंस्त्वनिर्देशश्च, ततोऽयमक्षरार्थः—संज्वलनवेदानामन्यतरयोर्वेद्यमानयोः प्रकृत्योः प्रथमा स्थितिः कालसमा उदयकालतुल्या ॥ ४२ ॥

दुसमयकयंतरे आलिगाण दुण्हं उदीरणा(न)त्तिणवे । मोहे एक्कठाणे बंधुदया संखवासाणि ॥ ४३ ॥

संखगुणहाणिबंधो एत्तो सेसाण संखगुणहाणी । पउवसमए णपुंसं असंखगुणणाइ जावंतो ॥ ४४ ॥

व्याख्या—द्विसमयकृतान्तरे उत्पत्तितदनन्तरलक्षणाभ्यां द्वाभ्यां समयाभ्यां कृतेऽन्तरे सत्यन्तरकरणे कृते सति द्वितीयसमय इत्यर्थः । इमे सप्ताधिकारा युगपत्प्रवर्तन्ते, तथाहि—पुरुषवेदसंज्वलनानामानुपूर्व्यैव सङ्क्रमः १ । संज्वलनलोभस्य च सङ्क्रमाभावः २ । तथान्तरकरणे कृते सत्यनन्तरादिषु समयेषु याः प्रकृतयो मोहनीयसत्का अमोहनीयसत्का वा बध्यन्ते तासां षण्णामावलिकानां मध्ये उदीरणा न भवति, किं तु षट्स्वावलिकास्वतिक्रान्तासु, इतः पूर्वं तु बद्धं बद्धं कर्म बन्धावलिकायामतीतायां प्राक्तनोदयसत्कर्मानुविद्धमुदीरणामायाति स्म ३ । तथा मोहे मोहनीये रसबन्ध एकस्थानकोऽभिनवो भवति ४ । तथा सङ्ख्येयवार्षिको मोहस्य स्थितिबन्धः ५ । तथोदयोऽसंप्राप्तोदय उदीरणाख्यः सोऽपि सङ्ख्येयवार्षिको मोहस्य, उक्तं च—"उदीरणा य संखसमा" ६ । तथा इतो मोहनीयस्य सङ्ख्येयवार्षिकात् स्थितिबन्धात्परतोऽन्योऽन्यः स्थितिबन्धः सर्वोऽपि पूर्वस्मात्पूर्वस्मात्सङ्ख्येयगुणहीनो भवति । शेषाणां तु कर्मणामसङ्ख्येयगुणहीन ७ । तथाऽन्तरकरणे कृते सति द्वितीये समये नपुंसकवेदं प्रोपशमयति उपशमयितुमारभतेऽसङ्ख्येयगुणनयेत्यं च तं तावदुपशमयति यावदन्तश्चरमसमयः, तथाहि—नपुंसकवेदस्य प्रथमसमये स्तोकं प्रदेशाग्रमुपशमयति, ततो द्वितीयसमयेऽस-

ङ्ख्येयगुणं, ततस्तृतीयसमयेऽसङ्ख्येयगुणं, एवं प्रतिसमयमसङ्ख्येयगुणं तावद्वाच्यं यावच्चरमसमयः । परप्रकृतिषु च प्रतिसमयमुपशमितदलिकापेक्षयाऽसङ्ख्येयगुणं तावत्सङ्क्रमयति यावद्द्विचरमसमयः । चरमसमये तूपशम्यमानं दलिकं परप्रकृतिषु यत्सङ्क्रम्यमाणं दलिकं तदपेक्षयाऽसङ्ख्येयगुणं द्रष्टव्यं । नपुंसकवेदोपशमनारम्भप्रथमसमयादारभ्य च सर्वकर्मणामुदीरणायां दलिकं स्तोकं प्राप्यते, उदये त्वसङ्ख्येयगुणम् ॥ ४३–४४ ॥

नपुंसकवेदे उपशान्ते सति तदनन्तरं स्थितिबन्धसहस्रेषु गतेषु पूर्वोक्तेन प्रकारेण स्त्रीवेदमुपशमयतीति तद्विधितिदेशं शेषविशेषं चाह—

एवित्थी संखतमे गयम्मि घाईण संखवासाणि । संखगुणहाणि एत्तो देसावरणाणुदगराइं ॥ ४५ ॥

व्याख्या—एवं पूर्वोक्तेन प्रकारेण स्त्रीवेदे उपशम्यमाने तदुपशमनाद्धायाः सङ्ख्येयतमे भागे गते सति घातिनां ज्ञानावरणदर्शनावरणान्तरायाणां सङ्ख्येयानि वर्षाणि सङ्ख्येयवर्षप्रमाणः स्थितिबन्धो भवति । इतश्च सङ्ख्येयवर्षप्रमाणात् स्थितिबन्धादारभ्यान्योऽन्यः स्थितिबन्धो घातिकर्मणां पूर्वस्मात् पूर्वस्मात्सङ्ख्येयगुणहीनो भवति । अस्मादेव च सङ्ख्येयवर्षप्रमाणघातिकर्मस्थितिबन्धादारभ्य देशघातिनां केवलज्ञानावरणकेवलदर्शनावरणवर्जानां ज्ञानावरणदर्शनावरणानामुदकराजिमुदकराजिसमानकषायकृतं रसं बध्नात्येकस्थानकमित्यर्थः ॥ ४५ ॥

तत एवं स्थितिबन्धसहस्रेष्वतिक्रान्तेषु सत्सु स्त्रीवेद उपशान्तो भवति । ततो यत्स्यात्तदाह—

तो सत्तण्हं एवं संखतमे संखवासिउं दोण्हं । बिइउं पुण ठिइबंधो सवेसिं संखवासाणि ॥ ४६ ॥

व्याख्या—ततः स्त्रीवेदोपशमनानन्तरं शेषान् सप्त नोकषायानुपशमयितुमारभते । तेषां च सप्तानामप्येवं नपुंसकवेदोक्तप्रकारेणोपशम्यमानानामुपशमनाद्धायाः सङ्ख्येयतमे भागे गते सति द्वयोर्नामगोत्रयोः सङ्ख्येयवार्षिकः स्थितिबन्धो भवति । वेदनीयस्य पुनरसङ्ख्येयवार्षिक एव तिष्ठति । तस्मिंश्च स्थितिबन्धे पूर्णे सत्यन्यो द्वितीयः स्थितिबन्धो वेदनीयस्यापि सङ्ख्येयवार्षिको भवति । एवं च सति सर्वेषामपि कर्मणां तत आरभ्य सङ्ख्येयवार्षिक एव स्थितिबन्धः पूर्वस्मात्पूर्वस्माच्चान्योऽन्यः स्थितिबन्धः सङ्ख्येयगुणहीनः प्रवर्तते । ततः स्थितिबन्धसहस्रेषु परिगलितेषु सत्सु सप्तापि नोकषाया उपशान्ता भवन्ति ॥ ४६ ॥

अयं तु विशेषः—

छस्सुवसमिज्जमाणे सेक्का उदयट्ठिई पुरिससेसा । समऊणावलियदुगे बद्धा वि य तावदद्धाए ॥ ४७ ॥

व्याख्या—षट्सु नोकषायेषूपशम्यमानेषु यस्मिन् समये षड् नोकषाया उपशान्तास्तस्मिन् समये पुरुषवेदस्य प्रथमस्थितौ शेषैकैवोदयस्थितिः समयमात्राऽवतिष्ठते । तदानीं च पुरुषवेदस्य स्थितिबन्धः षोडशवार्षिकः, संज्वलनानां तु सङ्ख्येयानि वर्षसहस्राणि । तथा पुरुषवेदस्य प्रथमस्थितौ द्व्यावलिकाशेषायां प्राग्निर्गणितस्वरूप आगालो व्यवच्छिद्यते, उदीरणा तु भवति । तथा पुरुषवेदस्यागालव्यवच्छेदसमय एव शेषदलिकसङ्क्रमाधारतालक्षणा पतद्ग्रहताऽपि व्यवच्छिद्यत इति ततः प्रभृति नोकषायसत्कं दलिकं पुरुषवेदे न सङ्क्रमयति, किं तु संज्वलनेषु । यदा च पुरुषवेदस्य शेषीभूतैकाऽप्युदयस्थितिरतिक्रान्ता भवति तदाऽसाववेदको भवति । अवेदकाद्धायाश्च प्रथमसमये समयद्वयोनावलिकाधिकेन

कालेन यद्बद्धं तदेव केवलमनुपशान्तं तिष्ठति, शेषं तु सर्वमपि नपुंसकवेदोक्तप्रकारेणोपशान्तं । योऽपि चरमः पुरुषवेदस्य पोरुशवार्षिकः स्थितिबन्धः सोऽपि प्रथमस्थितिचरमसमयञ्चाविना चरमोदयेन सहापगच्छति । यदपि सम(यद्ध) योनावलिका द्विककालबद्धमनुपशान्तमवशिष्यते तदपि तावदद्धया तावता कालेन समयद्धयोनावलिकाद्विकप्रमाणेन कालेनेत्यर्थः, उपशमयति । तदुपशमनाविधिश्चायम्—प्रथमसमये स्तोकमुपशमयति, द्वितीयसमयेऽसङ्ख्येयगुणं, तृतीयसमयेऽसङ्ख्येयगुणं, एवं तावद्वाच्यं यावत्सम (यद्ध) योनावलिकाद्विकचरमसमयः । परप्रकृतिषु च प्रतिसमयं सम (यद्ध) योनावलिकाद्विककालं यावद्यथाप्रवृत्तसङ्क्रमेण सङ्क्रमयति, तद्यथा—प्रथमसमये प्रभूतं, द्वितीयसमये विशेषहीनं, तृतीयसमये विशेषहीनं, एवं तावदभिधातव्यं यावच्चरमसमयः । ततः पुरुषवेद उपशान्तः । तदानीं च संज्वलनानां द्वात्रिंशद्वर्षप्रमाणोऽन्तर्मुहूर्त्तोनः स्थितिबन्धो भवति । शेषाणां च ज्ञानावरणदर्शनावरणान्तरायवेदनीयनामगोत्राणां सङ्ख्येयानि वर्षसहस्राणि । उक्तं च—"बन्धो बत्तीससमा संजलणियराण उ सहस्सा" ॥ ४७ ॥

तिविहमवेउ कोहं कमेण सेसे य तिविह तिविहे य। पुरिससमा संजलणा पढमठिई आलिगा अहिगा

व्याख्या—यस्मिन् समये पुरुषवेदस्यावेदको जातस्तस्मादेव समयादारभ्य त्रिविधं क्रोधमप्रत्याख्यानप्रत्याख्यानावरण-संज्वलनक्रोधानित्यर्थः, युगपदुपशमयितुमारभते । तदुपशमनां च कुर्वतः प्रथमस्थितिबन्धे पूर्णे सत्यन्यः स्थितिबन्धः

१ अवेदकप्रथमसमये द्रष्टव्यमन्यथा समयद्वयोनावलिकाद्विकप्रमाणकालेनोपशमनाभिधानमसंगतं स्यात् पंचसंग्रहवृहद्वृत्तौ तथैवाभिधानाच्च तत्त्वं पुनः केवलवेधसो जानन्ति ॥

संज्वलनानां सङ्ख्येयभागहीनो भवति, शेषाणां च सङ्ख्येयगुणहीनः। शेषं स्थितिघातादि पूर्वोक्तरीत्यैव वाच्यं। संज्वलनक्रोधस्य च प्रथमस्थितौ समयोनावलिकात्रिकशेषायां सत्यां पतद्ग्रहताऽपगच्छति । अप्रत्याख्यानप्रत्याख्यानावरणक्रोधदलिकं न तत्र प्रक्षिपति, किं तु संज्वलनमानादाविति भावः। ततो द्व्यावलिकाशेषायां प्रथमस्थितौ संज्वलनक्रोधस्यागालो न भवति, किं तूदीरणैव। साऽप्युदीरणा तावत्प्रवर्त्तते यावदेकावलिका शेषा भवति । उदीरणावलिकायाश्च चरमसमये संज्वलनानां स्थितिबन्धश्चत्वारो मासाः, शेषकर्मणां तु सङ्ख्येयानि वर्षसहस्राणि। संज्वलनक्रोधस्य च तदा बन्धोदयोदीरणाव्यवच्छेदः । अप्रत्याख्यानप्रत्याख्यानावरणक्रोधक्षयस्य चोपशमः। तदानीं चैकामावलिकां समयोनावलिकाद्विकबद्धं च दलिकं मुक्त्वा शेषमन्यत्सर्वं संज्वलनक्रोधस्योपशान्तं । साऽपि चैका प्रथमस्थितिसत्का चरमावलिका स्तिबुकसङ्क्रमेण माने प्रक्षिप्यते । समयोनावलिकाद्विकबद्धं च दलिकं पुरुषवेदोक्तप्रकारेणोपशमयति सङ्क्रमयति च । अनेनैव क्रमेण शेषानपि कषायाँस्त्रिविधान् मानमायालोभरूपतया त्रिप्रकारान् पुनस्त्रिविधानप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनरूपतया प्रत्येकं त्रिभेदानुपशमयति । तत्र संज्वलनोपशमना पुरुषवेदसमाऽवसेया। अप्रत्याख्यानप्रत्याख्यानावरणमानादीनां चोपशमना षड्नोकषायसमा । नवरं संज्वलनानां प्रथमस्थितावेकावलिकाधिका पुरुषवेदापेक्षयाऽवशिष्टा द्रष्टव्या। तथाहि—पुरुषवेदस्य प्रथमस्थितिः षट्सु नोकषायेषूपशान्तेष्वेकसमयमात्राऽनुपशान्ताऽऽसीत्, अप्रत्याख्यानप्रत्याख्यानावरणमानादिषु पुनरुपशान्तेषु संज्वलनमानादीनामनुपशान्ता प्रथमस्थितिरेकावलिकाप्रमाणाऽवशिष्यत इति। इदमतिसंक्षिप्तमिति वितत्य प्रदर्श्यते—संज्वलनक्रोधस्य बन्धो-

दयोदीरणाव्यवच्छेदसमय एव संज्वलनमानस्य द्वितीयस्थितेः सकाशाद्दलिकं समाकृष्य प्रथमस्थितिं करोति वेदयते च। तत्रोदयसमये स्तोकं प्रक्षिपति, द्वितीयादिस्थितिषु पुनः प्रथमस्थितिचरमसमयं यावद्यथोत्तरमसङ्ख्येयगुणं। प्रथमस्थितिप्रथमसमय एव च संज्वलनमानस्य स्थितिबन्धश्चातुर्मासिकः। शेषाणां तु ज्ञानावरणीयादीनां सङ्ख्येयवर्षसहस्रप्रमाणः। तदानीमेव च त्रीनपि मानान् युगपदुपशमयितुमारभते। संज्वलनमानस्य च प्रथमस्थितौ समयोनावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणदलिकप्रक्षेपः संज्वलनमाने न प्रवर्तते, किं तु संज्वलनमायादौ। आवलिकाद्विकशेषायां च संज्वलनमानस्थितावागालो व्यवच्छिद्यते, तत उदीरणैव केवला प्रवर्तते, साऽपि तावद्यावदावलिकाचरमसमयः। ततएका प्रथमस्थितेरावलिका शेषीभूताऽवतिष्ठते। तस्मिंश्च समये संज्वलनानां द्वैमासिकः स्थितिबन्धः। शेषकर्मणां तुसङ्ख्येयानि वर्षाणि। तदानीं च संज्वलनमानस्य बन्धोदयोदीरणा व्यवच्छिन्नाः। अप्रत्याख्यानप्रत्याख्यानावरणमानौ चोपशान्तौ। संज्वलनमानस्यापि प्रथमस्थितेरेकामावलिकां समयोनावलिकाद्विकबद्धाश्च लता मुक्त्वा शेषमन्यत्सर्वमुपशान्तं तदानीमेव च संज्वलनमायाया द्वितीयस्थितेर्दलिकमाकृष्य प्रथमस्थितिं करोति वेदयते च, प्रागुक्तां च संज्वलनमानप्रथमस्थितिसम्बन्धिनीमेकामावलिकामुदयनिर्मुक्तामुदयवत्यामस्यां संज्वलनमायायां स्तिबुकसङ्क्रमेण प्रक्षिपति, समयोनावलिकाद्विकबद्धाश्च लताः पुरुषवेदक्रमेणोपशमयति सङ्क्रमयति च। संज्वलनमायोदयप्रथमसमये च मायालोभयोर्द्वौ मासौ स्थितिबन्धः। शेषकर्मणां सङ्ख्येयानि वर्षाणि। तत्समयादेव चारभ्य तिस्रोऽपि माया युगपदुपशमयितुमारभते। ततः संज्वलनमायायाः प्रथमस्थितावावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणमायादलिकं संज्वलन्यां मायायां न प्रक्षि-

पति, किं तु संज्वलनलोभे । आवलिकाद्विकशेषायां त्वागालो व्यवच्छिद्यते । तत उदीरणैव केवला प्रवर्तते, साऽपि तावद्यावदावलिकाचरमसमयः । तस्मिँश्च समये संज्वलनमायालोभयोः स्थितिबन्ध एको मासः । शेषकर्मणां तु सङ्ख्येयानि वर्षाणि । तदानीमेव च संज्वलनमायाया बन्धोदयोदीरणा व्यवच्छिन्नाः । अप्रत्याख्यानप्रत्याख्यानावरणमाये चोपशान्ते । संज्वलन्या मायायाश्च प्रथमस्थितिसम्बन्धिनीमेकामावलिकां समयोनावलिकाद्विकबद्धाश्च लता विना निखिलमन्यदुपशान्तं । तदानीमेव च संज्वलनलोभस्य द्वितीयस्थितेः सकाशाद्दलिकमाकृष्य प्रथमस्थितिं करोति वेदयते च । पूर्वोक्तां च मायायाः प्रथमस्थितिसम्बन्धिनीमेकामावलिकां स्तिबुकसङ्क्रमेण संज्वलनलोभे सङ्क्रमयति । समयोनावलिकाद्विकबद्धाश्च लताः पूर्वोक्तपुरुषवेदक्रमेणोपशमयति सङ्क्रमयति च संज्वलनलोभे ॥ ४८ ॥

संज्वलनलोभस्य प्रथमस्थितेः प्रमाणं निरूपयन्नाह—

लोहस्स वेतिन्नागा बिइय तिन्नागोत्थ किट्टिकरणद्धा । एगफड्डगवग्गणअणंतनागो उ ता हेट्ठा ॥ ४९ ॥

व्याख्या—संज्वलनलोभस्य प्रथमस्थितेस्त्रयो नागा लोभस्य द्वितीयस्थितेर्दलिकमाकृष्य प्रथमस्थितिर्विनागत्रयोपेताक्रियत इत्यर्थः । तत्र प्रथमतो द्वौ त्रिनागौ प्रथमस्थितिं करोति द्वयोस्त्रिनागयोर्द्वितीयस्थितेः समाकृष्य दलिकं निक्षिपतीत्यर्थः । तत्र प्रथमस्त्रिनागोऽश्वकर्णकरणाद्धासंज्ञो,द्वितीयः किट्टिकरणाद्धासंज्ञः, (तृतीयः किट्टिवेदेनाद्धासंज्ञः),त्रिविनागोपेतलोभवेदनाद्धायाश्चप्रथमसमय एव त्रीनपि लोभानप्रत्याख्यानादीन् युगपदुपशमयितुमारभते । उपशमनाविधिश्च प्राग्वत् । तत्रा-

१ प्रसङ्गतोऽत्राभिधानमुल्लेखितं । २ अश्वकर्णकरणाद्धायाश्च ।

श्वकर्णकरणाद्धासंज्ञे प्रथमे त्रिभागे वर्तमानः पूर्वस्पर्धकेभ्यः प्रतिसमयं दलिकं गृहीत्वा तस्यात्यन्तनीरसतामापाद्यापूर्वस्पर्धकानि करोति । सङ्क्रमितमायादलिकसम्बन्धिभ्यः पूर्वबद्धसंज्वलनलोभसत्केभ्यो वा पूर्वस्पर्धकेभ्यः प्रतिसमयं दलिकं गृहीत्वा तस्य तत्कालबध्यमानसंज्वलनलोभस्पर्धकवदत्यन्तनीरसतामापादयन्नपूर्वं च दलिकं प्रतिसमयं गृह्णन्नपूर्वस्पर्धकानि करोतीत्यर्थः । इह तावदनन्तानन्तपरमाणुनिष्पन्नान् स्कन्धान् जीवः कर्मतया गृह्णाति । तत्र चैकैकस्मिन् स्कन्धे यः सर्वजघन्यो रसः सोऽपि सर्वजीवानन्तगुणान् रसाविभागान् प्रयच्छति । तदुपेतपरमाणूनां समुदायः प्रथमा वर्गणा । ततः क्रमेणैकोत्तररसाविभागवृद्ध्या सिद्धानन्तभागाभ्यानन्तगुणा वर्गणा वाच्याः । तावद्वर्गणासमुदायः स्पर्धकमुच्यते । इत ऊर्ध्वमेकोत्तरवृद्ध्या वर्धमानो रसो न लभ्यते, किंतु सर्वजीवानन्तगुणैरेव रसाविभागैः । ततः प्राक्तनक्रमेण द्वितीयं स्पर्धकमारभ्यते । एवं तृतीयादीनि तावद्वाच्यानि यावदनन्तस्पर्धकानि । एतेभ्य एव चेदानीं प्रथमादिवर्गणा गृहीत्वा विशुद्धिप्रकर्षवशादनन्तगुणहीनरसाः कृत्वा पूर्ववत्स्पर्धकानि करोति । न चैवंभूतानि कदापि पूर्वं कृतानि ततोऽपूर्वाणीत्युच्यते इति प्रकटोऽर्थः । तत एवमपूर्वस्पर्धकानि कुर्वतः सङ्ख्येयेषु स्थितिबन्धेषु गतेषु सत्स्वश्वकर्णकरणाद्धा व्यतिक्रामति, ततः किट्टिकरणाद्धायां प्रविशति । तदानीं च संज्वलनलोभस्य स्थितिबन्धो दिनपृथक्त्वप्रमाणः, शेषकर्मणां तु वर्षपृथक्त्वप्रमाणः । किट्टिकरणाद्धायां च पूर्वस्पर्धकेभ्योऽपूर्वस्पर्धकेभ्यश्च दलिकं गृहीत्वा प्रतिसमयमनन्ताः किट्टीः करोति । किट्टयो नाम पूर्वस्पर्धकेभ्योऽपूर्वस्पर्धकेभ्यश्च वर्गणा गृहीत्वा तासामनन्तगुणहीनरसतामापाद्यैकोत्तरवृद्ध्यागेन बृहदन्तरालतया व्यवस्थापनं, यथा यासामेव वर्गणानामसत्कल्पनयाऽनुभागभागानां शतमेकोत्तरं द्व्युत्तरादि वाऽऽसीत् तासामेवानुभाग-

नागानां पञ्चकस्य दशकस्य पञ्चदशकादेश्च व्यवस्थापनमिति । तासामेव किट्टीनां विशेषं प्रदिदर्शयिषुराह—"एगफड्डगे-त्यादि" ताः किट्टीरेकस्मिन्ननुभागस्पर्धके या अनन्ता वर्गणास्तासामनन्ततमे भागे यावत्यो वर्गणास्तावत्प्रमाणाः प्रथमसमये करोति, ता अप्यनन्ताः, तत्किं जघन्यानुभागस्पर्धकानुभागेन सदृशीः करोत्युत ततोऽपि हीनाः? उच्यते—ततोऽपि हीनाः। तथा चाह—"हेट्ठा" यत्सर्वजघन्यमनुभागस्पर्धकं तस्याधस्तात्करोति ततोऽप्यनन्तगुणहीनरसाः करोतीत्यर्थः ॥ ४९ ॥

अणुसमयं सेढीए असंखगुणहाणि जा अपुव्वाउ। तव्विवरीयं दलियं जह्न्नगाई विसेसूणं ॥ ५० ॥

व्याख्या—या अनुसमयं समयं समयं प्रत्यपूर्वा नवनवाः किट्टीः करोति ताः प्रतिसमयमसङ्ख्येयगुणहानियुक्तश्रेणिभागो द्रष्टव्याः। नवत्वं च प्रतिसमयं यथोत्तरमनन्तगुणहीनरसत्वापादनेन द्रष्टव्यं। अयं भावार्थः—प्रथमसमये प्रभूताः किट्टीः करोति, द्वितीयसमयेऽसङ्ख्येयगुणहीनाः, ततोऽपि तृतीयसमयेऽसङ्ख्येयगुणहीनाः, एवं तावदभिधातव्यं यावत्कि-ट्टिकरणाद्धायाश्चरमसमयः। दलिकं तद्विपरीतं किट्टिसङ्ख्याविपरीतं द्रष्टव्यं। तथाहि—प्रथमसमये सकलकिट्टिगतं दलिकं सर्वस्तोकं, ततो द्वितीयसमये सकलकिट्टिगतं दलिकमसङ्ख्येयगुणं, ततोऽपि तृतीयसमये सकलकिट्टिगतं दलिकमसङ्ख्येय-गुणं, एवं तावदभिधातव्यं यावत्किट्टिकरणाद्धायाश्चरमसमयः । तथा प्रथमसमयकृतासु किट्टिषु सामान्येनानुभागः सर्वप्रभूतः, ततो द्वितीयसमयकृतासु किट्टिषु सामस्त्येनानन्तगुणहीनः, ततोऽपि तृतीयसमयकृतास्वनन्तगुणहीनः, एवं तावद्वाच्यं यावत्किट्टिकरणाद्धाचरमसमयः । अथ प्रथमसमयकृतासु सर्वजघन्याद्यासूत्कृष्टान्तासु किट्टिषु परस्परं प्रदे-शाल्पबहुत्वं कियत्सङ्ख्येयेति चेदुच्यते—जघन्यकादिविशेषोनं जघन्यामादिं कृत्वा परतः क्रमेण प्रतिकिट्टि विशेषोनं

विशेषोनं प्रदेशाग्रमभिधातव्यं । अत्रेयं भावना—प्रथमसमयकृतासु किट्टिषु मध्ये या सर्वमन्दानुभागा किट्टिस्तस्याः प्रदेशाग्रं सर्वप्रभूतं, ततस्तन्मध्यगतद्वितीयकिट्टावनन्तरेणानन्तगुणेनानुभागेनाधिकायां प्रदेशाग्रं विशेषहीनं, ततोऽप्यनन्तरेणानन्तगुणेनानुभागेनाधिकायां तन्मध्यगततृतीयकिट्टौ विशेषहीनं, एवमनन्तरानन्तरानन्तगुणानुभागाधिकासु किट्टिषु विशेषहीनं तावदभिदध्यात् यावत्प्रथमसमयकृतानां किट्टीनां मध्ये सर्वोत्कृष्टा किट्टिरिति । इयमेव रीतिः सर्वेष्वपि समयेषु प्रत्येकं किट्टिसमुदाये भावनीया ॥ ५० ॥

अणुभागोणंतगुणो चाउम्मासाइ संखभागूणो । मोहे दिवसपुहुत्तं किट्टीकरणाइसमयम्मि ॥ ५१ ॥

व्याख्या—प्रथमसमयकृतानां किट्टीनामनुभागो यथोत्तरमनन्तगुणो वाच्यः । तथाहि—प्रथमसमयकृतानां किट्टीनां मध्ये या सर्वमन्दानुभागा किट्टी सा सर्वस्तोकानुभागा, ततो द्वितीयाऽनन्तगुणानुभागा, ततोऽपि तृतीयाऽनन्तगुणानुभागा, एवं तावद्वाच्यं यावत्प्रथमसमयकृतानां किट्टीनां मध्ये सर्वोत्कृष्टा किट्टिः । उक्तं चान्यत्रापि—"आइसमयकयाणं मंदाईणं रसो अणंतगुणो" । एवं द्वितीयादिसमयेष्वपि किट्टीनां प्ररूपणा विधेया । सम्प्रत्यासामेव किट्टीनां प्रदेशाल्पबहुत्वं परस्परमुच्यते—प्रथमसमयकृतानां किट्टीनां मध्ये या सर्वबहुप्रदेशा किट्टिः सा स्तोकप्रदेशा । तदपेक्षया द्वितीयसमयकृतानां किट्टीनां मध्ये या सर्वाल्पप्रदेशा साऽसङ्ख्येयगुणप्रदेशा, एवं तावद्वाच्यं यावच्चरमसमयः । अनुभागापेक्षया च प्रथमसमयकृतानां किट्टीनां मध्ये या सर्वमन्दानुभागा किट्टिः सा सर्वप्रभूतानुभागा, ततो द्वितीयसमयकृतानां किट्टीनां मध्ये या सर्वोत्कृष्टानुभागा साऽनन्तगुणहीना, ततोऽपि तृतीयसमयकृतकिट्टिषु या सर्वोत्कृष्टानुभागा साऽनन्तगुणहीना, एवं

तावद्वाच्यं यावच्चरमसमयः । मोहे मोहनीयकर्मणि संज्वलनानां चातुर्मासिकात् स्थितिबन्धादारभ्यान्योऽन्यः स्थितिबन्धः सङ्ख्येयेन भागेनोन ऊनतरस्तावद्वक्तव्यो यावत्किट्टिकरणाद्धायाः प्रथमसमये दिवसपृथक्त्वप्रमाणो भवति, स च प्रायस्तथैव यथास्थानं भावितः ॥ ५१ ॥

छिन्नमुहुत्तं संखेज्जेसु य घाईण दिणपुहुत्तं तु । वाससहस्सपुहुत्तं अंतोदिवसस्स अंते सिं ॥ ५२ ॥

व्याख्या—अस्याः किट्टिकरणाद्धायाः सङ्ख्येयेषु भागेषु गतेषु सत्सु संज्वलनलोभस्य स्थितिबन्धो छिन्नमुहूर्त्तप्रमाणो भवति । त्रयाणां च घातिकर्मणां दिनपृथक्त्वप्रमाणः । नामगोत्रवेदनीयानां च वर्षसहस्रपृथक्त्वं प्रभूतवर्षसहस्रप्रमाणः । पृथक्त्वशब्दोऽत्र बहुत्ववाची । तथा किट्टिकरणाद्धाया अन्ते चरमसमये संज्वलनलोभस्य स्थितिबन्धोऽन्तर्मुहूर्त्तमित्यध्याहारः । केवलमिदमन्तर्मुहूर्त्तं स्तोकतरमवसेयं । तथा "सिं ति" तेषां घातिकर्मणामन्तर्दिवसस्यान्तरहोरात्रस्य स्थितिबन्धः५२

वाससहस्सपुहुत्ता बिवस्स अंतो अघाइकम्माणं । लोभस्स असंखगुणं किट्टीउ जं च पुव्वुत्तं ॥ ५३ ॥

व्याख्या—अघातिनां तु नामगोत्रवेदनीयानां वर्षसहस्रपृथक्त्वप्रमाणात् किट्टिकरणाद्धासङ्ख्येयभागातिक्रमभाविनः स्थितिबन्धादन्योऽन्यो हीनः हीनतरः स्थितिबन्धो भवँस्तस्मिन् किट्टिकरणाद्धाचरमसमये द्विवर्षस्य द्वयोर्वर्षयोरन्तर्मध्ये भवति । तथा किट्टिकरणाद्धायां समयोनावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणलोभदलिकं संज्वलनलोभे न सङ्क्रमयति, तदानीं तस्य पतद्ग्रहतानिवृत्तेः, किंतु स्वस्थान एव स्थितमुपशमं नीयते । द्व्यावलिकाशेषायां च किट्टिकरणाद्धायां बादरसंज्वलनलोभस्यागालो न भवति, किं तूदीरणैव, साऽपि तावद्यावदावलिकाऽवशिष्यते । तस्याश्चोदीरणाव-

लिकायाश्चरमसमये यत् "किट्टीउ त्ति" किट्टीकृतं द्वितीयस्थितिगतं दलिकं, यच्च पूर्वोक्तसमयोनावलिकाद्विकबद्धं, या चोदयावलिकैका किट्टिकरणाद्धायाः शेषीभूता, एतत्सर्वं लोभस्य संज्वलनलोभस्यानुपशान्तं वर्त्तते, शेषं पुनरुपशान्तं। तथा तस्मिन्नेव समये द्वावप्यप्रत्याख्यानप्रत्याख्यानावरणलोभावुपशान्तौ, तस्मिन्नेव च समयेऽनिवृत्तिबादरसंपरायगुणस्थानकव्यवच्छेदः। संज्वलनलोभबन्धव्यवच्छेदो बादरसंज्वलनलोभोदयोदीरणाव्यवच्छेदश्चेति द्रष्टव्यम् ॥ ५३ ॥

सेसऽं तणुरागो तावइया किट्टिउ य पढमठिइं। वज्जिय असंखभागं हेट्ठुवरिमुदीरए सेसा ॥५४॥

व्याख्या—शेषाद्धां शेषकालं तृतीये विभाग इत्यर्थः, तनुराग इति सूक्ष्मसम्परायो भवति। ताश्च प्राक्कृताः किट्टीद्वितीयस्थितेः सकाशात् कियतीः समाकृष्य प्रथमस्थितिं तावतीं सूक्ष्मसम्परायाद्धातुल्यां करोति, किट्टिकरणाद्धायाश्चावशिष्टचरमावलिकामात्रस्थितिं स्तिबुकसङ्क्रमेण सङ्क्रमयति। तथा प्रथमान्तिमसमयकृताः किट्टीर्वर्जयित्वा शेषसमयकृताः किट्टयः सूक्ष्मसम्परायाद्धायाः प्रथमसमये प्रायेणोदयमागच्छन्ति। प्रथमस्थितिभावानाक्रान्तकिट्टिव्यवच्छेदार्थं प्रायः पदं। तथा चरमसमयकृतानां किट्टीनामधस्तादसङ्ख्येयभागं प्रथमसमयकृतानां चोपरितनमसङ्ख्येयभागं वर्जयित्वा शेषाः किट्टीरुदीरयति५४॥

गेण्हंतो य मुयंतो असंखभागो य चरिमसमयम्मि। उवसामेई बीयठिइं पि पुव्वं व सव्वऽं ॥ ५५ ॥

व्याख्या—द्वितीयसमये उदयप्राप्तानां किट्टीनामसङ्ख्येयं भागं मुञ्चति तावान् भाग उपशान्त इति तमुदये न ददातीत्यर्थः। अपूर्वं चासङ्ख्येयं भागमनुभवनार्थमुदीरणाकरणेन गृह्णाति। एवं प्रतिसमयमियतो भागस्य ग्रहणमोक्षौ कुर्वता तावद्गन्तव्यं यावत्सूक्ष्मसंपरायाद्धाचरमसमयः। द्वितीयस्थितिमपि द्वितीयस्थितिगतं दलिकमपि सूक्ष्मसम्परायाद्धाप्रथम-

समयादारभ्य सर्वाद्धां सकलामपि सूक्ष्मसम्परायाद्धां यावत् पूर्ववदुपशमयति । समयोनावलिकाद्विकबद्धमपि च दलिकमुपशमयति । सूक्ष्मसम्परायाद्धायाश्चरमसमये ज्ञानावरणदर्शनावरणान्तरायाणामान्तर्मौहूर्त्तिकः स्थितिबन्धो नामगोत्र, योश्च षोडशमुहूर्त्तप्रमाणः, वेदनीयस्य चतुर्विंशतिमुहूर्त्तप्रमाणः, तस्मिन्नेव चरमसमये सकलमपि मोहनीयमुपशान्तं, ततोऽनन्तरसमये उपशान्तमोहगुणस्थानकमवाप्नोति ॥ ५५ ॥

उवसंतद्धा जिन्नमुहुत्तो तीसे य संखतमतुल्ला । गुणसेढी सवद्धं तुल्ला य पएसकालेहिं ॥ ५६ ॥

व्याख्या—उपशान्ताद्धोपशान्तमोहगुणस्थानकालो जिन्नमुहूर्त्तं । तत्र च गुणश्रेणिमारचयति । तस्या उपशान्ताद्धाया यः सङ्ख्येयतमो जागस्तत्तुल्या उपशान्ताद्धासङ्ख्येयतमजागसमयप्रमाणा गुणश्रेणीः करोतीत्यर्थः । ताश्च गुणश्रेणीः सर्वा अपि सर्वाद्धां सकलमप्युपशान्तमोहगुणस्थानकालं यावत्प्रदेशापेक्षया कालापेक्षया च तुल्याः करोति, अवस्थितपरिणामरूपहेतोरेकरूपत्वात् ॥ ५६ ॥

उवसंता य अकरणा संकमणोवट्टणा य दिट्ठितिगे। पढाणुपुव्विगाए परिवडइ पमत्तविरतो त्ति ॥ ५७ ॥

व्याख्या—उपशान्ता मोहनीयप्रकृतयोऽकरणा भवन्ति सङ्क्रमणोद्वर्त्तनापवर्त्तनोदीरणानिधत्तिनिकाचनाकरणानामयोग्या भवन्तीत्यर्थः । दृष्टित्रिके दर्शनमोहनीयत्रिके पुनरुपशान्तेऽपि सङ्क्रमणापवर्त्तने भवतः, न तदन्यत्करणं, तत्र सङ्क्रमो मिथ्यात्वसम्यङ्मिथ्यात्वयोः सम्यक्त्वेऽपवर्त्तना तु त्रयाणामपि । इत्थं चैतत्क्रोधेन श्रेणिं प्रतिपन्नस्य द्रष्टव्यं । यदा तु मानेन श्रेणिं प्रतिपद्यते तदा मानमनुभवन्नेव प्रथमतो नपुंसकवेदोक्तक्रमेण क्रोधत्रिकमुपशमयति, ततः क्रोधो-

क्तप्रकारेण मानत्रिकं, शेषं तथैव। यदा तु मायया श्रेणिं प्रतिपद्यते तदा मायां वेदयन्नेव नपुंसकवेदोक्तप्रकारेण क्रोधत्रिकं, ततो मानत्रिकं, ततः क्रोधोक्तप्रकारेण मायात्रिकं, शेषं तथैव। यदा तु लोभेन श्रेणिं प्रतिपद्यते तदा लोभं वेदयन्नेव प्रथमतो नपुंसकवेदोक्तक्रमेण क्रोधत्रिकं, ततो मानत्रिकं, ततो मायात्रिकं, तत उक्तप्रकारेण लोभत्रिकमुपशमयति। अथ प्रतिपात उच्यते, स च द्विधा—भवक्षयेणाऽद्धाक्षयेण च। तत्र भवक्षयो म्रियमाणस्य, अद्धाक्षय उपशान्ताद्धासमाप्तिः। तत्र यो भवक्षयेण प्रतिपतति तस्य प्रथमसमय एव सर्वाण्यपि करणानि प्रवर्त्तन्ते, अविरतसम्यग्दृष्टित्वभावात्। प्रथमसमये च यानि कर्माण्युदीर्यन्ते तान्युदयावलिकायां प्रवेशयति, यानि च नोदीरणायां निविशन्ते तेषां कर्मणां दलिकान्युदयावलिकाया बहिस्ताज्जोपुच्छाकारसंस्थितानि रचयति। यस्तूपशान्तमोहगुणस्थानादद्धाक्षयेण प्रतिपतति स येनैव क्रमेण स्थितिघातादीन् कुर्वन्नारूढस्तेनैव क्रमेण पश्चानुपूर्व्या स्थितिघातादीन् कुर्वन् पतति स च तावत्प्रतिपतन्नायाति यावत्प्रमत्तसंयतगुणस्थानकम् ॥ ५७ ॥

उक्कड्डित्ता बीइ(य)ठिईहिं उदयाइसुं खिवइ दवं। सेढीइ विसेसूणं आवलिअप्पिं असंखगुणं॥५८॥

व्याख्या—उपशान्तमोहगुणस्थानात्प्रतिपतन् संज्वलनलोभादीनि कर्माणि क्रमेणानुभवति। तथाहि—आदितः संज्वलनलोभं, ततो मायोदयव्यवच्छेदस्थानादारतो मायां, ततो यत्र मानोदयव्यवच्छेदस्ततोऽर्वाग्मानं, ततो यत्र क्रोधोदयव्यवच्छेदस्ततः प्रभृति क्रोधमिति। अनेन क्रमेणोदयसमयप्राप्तानां तेषामनुभवनार्थं द्वितीयस्थितेः सकाशाद्दलिकमा-

१–२ आरभ्य.

कृष्याकृष्य प्रथमस्थितिं करोति, उदयादिषु चोदयसमयप्रभृतिषु च स्थितिषु श्रेण्या विशेषोनं विशेषोनं प्रक्षिपति। तथाहि—उदयसमये प्रभूतं प्रक्षिपति, ततो द्वितीयादिसमयेषु यथोत्तरं विशेषहीनं यावदुदयावलिकायाश्चरमसमयः। तत उदयावलिकाया उपर्यसङ्क्षेयगुणं। तथाहि—उदयावलिकाया उपरि प्रथमसमये तदव्यवहितप्राक्तनसमयप्रविष्टनिक्षेपापेक्षयाऽसङ्क्षेयगुणं। ततोऽपि द्वितीयादिसमयेषु यथोत्तरमसङ्क्षेयगुणं वाच्यं यावद्गुणश्रेणिशिरः। ततः परतो भूयोऽप्युदयावलिकोक्तक्रमेण विशेषविशेषहीनो दलिकनिक्षेपः ॥ ५८ ॥

वेइज्जंतीणेवं इयरासिं आवलिगाइ बाहिरउं। ण हि संकमाणुपुव्वी उवलिगोदीरणाणुप्पिं ॥ ५९ ॥

व्याख्या—एष पूर्वोक्तो दलिकनिक्षेपस्तत्कालवेद्यमानप्रकृतीनामवसेयः। इतरासामवेद्यमानानां प्रकृतीनामावलिकाबाह्यः तासामुदयावाप्तावुदयावलिकायां दलिकनिक्षेपमकृत्वा तस्या उपर्येव दलिकनिक्षेपः प्रवर्त्तते इत्यर्थः। सोऽप्यसङ्क्षेयगुणतया तावत्प्रवर्तते यावद्गुणश्रेणिशिरः। ततः परतः पुनर्विशेषहीनो विशेषहीनः "नहीत्यादि" हिशब्दोऽवधारणे, किमवधार्यते ? यः पूर्वमुपशमश्रेण्यारोहे आनुपूर्व्यैव सङ्क्रम उक्तः स इह न भवति, किं त्वनानुपूर्व्याऽपि भवति। तथा बन्धानन्तरं षण्णामावलिकानामुपर्युदीरणा भवतीति यत्प्रागुक्तं तदपीह न भवति, किं तु बन्धावलिकामात्रातिक्रमेऽप्युदीरणा भवतीति। शेषं तु यत् यत्र स्थाने व्यवच्छिन्नं बन्धनसङ्क्रमणापवर्त्तनोदीरणादेशोपशमनाऽऽगालनिधत्तिनिकाचनादि तत्तत्र स्थाने तथैव भवति ॥ ५९ ॥

वेइज्जमाणसंजलणऊ अहिगा उ मोहगुणसेढी। तुल्ला य जयाऽऽरूढो अउं य सेसेहिं तुल्ल त्ति ॥६०॥

व्याख्या—मोहस्य मोहनीयप्रकृतीनां गुणश्रेणिः कालमाश्रित्य वेद्यमानसंज्वलनकालादन्यधिका प्रतिपतता सता प्रारब्ध्यते, समारोहकालगुणश्रेण्यपेक्षया तु तुल्या। तथा "जय त्ति" प्राकृतत्वात् स्त्रीत्वनिर्देशः। ततोऽयमर्थः—येन संज्वलनेनोदयप्राप्तेनोपशमश्रेणिप्रतिपत्तिरासीत्तमुदयेन प्राप्तः सँस्तदनन्तरं तस्य गुणश्रेणिं शेषकर्मसत्कगुणश्रेणिभिः सह तुल्यामारभते, यथा संज्वलनक्रोधोदयेनोपशमश्रेणिं प्रतिपन्नस्ततः श्रेणेः प्रतिपतन् संज्वलनक्रोधोदयप्राप्तौ सत्यां तदनन्तरं संज्वलनक्रोधगुणश्रेणिं शेषकर्मगुणश्रेणिसमानां निर्वर्तयतीति। एवं मानमाययोरपि वाच्यं। संज्वलनलोभेन पुनरुपशमश्रेणिं प्रतिपन्नस्य प्रतिपातकाले प्रथमसमयादेवारभ्य संज्वलनलोभस्य गुणश्रेणिः शेषकर्मगुणश्रेणिभिः सह तुल्या प्रवर्तते ॥६०॥

खवगुवसामगपरिवडमाणठुगुणो तहिं तहिं बंधो।असुभाणागोऽणंतगुणो असुभाण सुभाण विवरीओ॥६१॥

व्याख्या—क्षपकस्य क्षपकश्रेणिमारोहतो यत्र स्थाने यावान् स्थितिबन्धस्तस्मिन्नेव स्थाने उपशमश्रेणिमारोहतस्तावान् स्थितिबन्धो द्विगुणो भवति, क्षपकापेक्षयोपशमकस्य मन्दपरिणामत्वात्। ततोऽपि तस्मिन्नेव स्थाने उपशमश्रेणितः प्रतिपततो द्विगुणो भवति, आरोहादवतरणपरिणामस्य मन्दत्वात्, क्षपकसत्कस्थितिबन्धापेक्षया चायं चतुर्गुणो भवतीत्यर्थः। तथा क्षपकस्य यस्मिन् स्थानेऽशुभप्रकृतीनामनुभागो यावान् भवति तदपेक्षया तस्मिन्नेव स्थाने तासामेवाशुभप्रकृतीनामुपशमश्रेणीतः प्रतिपततोऽनन्तगुणः। शुभानां शुभप्रकृतीनां पुनरनुभागो विपरीतो वाच्यः। तथाहि—उपशमश्रेणीतः प्रतिपततो यस्मिन् स्थाने शुभप्रकृतीनां यावाननुभागो भवति तदपेक्षया तस्मिन्नेव स्थाने तासामेव शुभप्र-

कृतीनामुपशमकस्यानुभागोऽनन्तगुणः । ततोऽपि तस्मिन्नेव स्थाने तासामेव शुभप्रकृतीनां क्षपकस्यानन्तगुणः । शेषमारोहत इव प्रतिपततोऽपि ज्ञेयं यावत्प्रमत्तसंयतगुणस्थानम् ॥ ६१ ॥

किच्चा पमत्ततदियरठाणे परिवत्ति बहुसहस्साणि । हेट्ठिल्लणंतरठुगं आसाणं वा वि गच्छेज्जा ॥ ६२ ॥

व्याख्या—एवं परिपाट्या पतितः प्रमत्तगुणस्थाने आगत्य तत्र विश्रम्य प्रमत्ततदितरस्थान इति प्रमत्ताप्रमत्तसंयतगुणस्थानकयोः प्रभूतानि सहस्राणि यावत्परिवृत्तीः कृत्वा कश्चिदनन्तरगुणस्थानद्विकमधस्तनं देशविरताविरतसम्यग्दृष्टिलक्षणं गच्छेत् । येषां च मतेनानन्तानुबन्धिनामुपशमना भवति तेषां मतेन कश्चित्सासादनभावमपि गच्छेत् ॥ ६२ ॥

उवसमसम्मत्तद्धा अंतो आउक्कया धुवं देवो । तिसु आउगेसु बद्धेसु जेण सेढिं ण आरुहइ ॥ ६३ ॥

व्याख्या—औपशमिकसम्यक्त्वाद्धाया अन्तर्मध्ये वर्त्तमानो यदि कश्चिदायुःक्षयात् कालं करोति तर्हि स ध्रुवमवश्यं देवो भवति । किं च सासादनभावं गतः सन्नपि यदि कालं करोति तथापि देव एव भवति । येन कारणेन देवायुर्वर्जेषु शेषेषु त्रिष्वायुःषु मध्येऽन्यतमस्मिन्नायुषि बद्धे श्रेणिं नारोहति, ततः श्रेणिस्थितः श्रेणीतः पतन् वा कालं कृत्वा देव एव भवति ॥ ६३ ॥

उग्घाडियाणि करणाणि उदयट्ठिइमाइयं इयरतुल्लं । एगभवे दुक्खुत्तो चरित्तमोहं उवसमेइ ॥ ६४ ॥

व्याख्या—करणानि बन्धनादीन्युपशमश्रेणिमारोहतो यत्र यत्र स्थले यानि यानि व्यवच्छिद्यन्ते उपशमश्रेणीतः पतंस्तत्तत्स्थानं प्राप्तस्य तानि तान्युद्घाटितानि भवन्ति प्रवर्तन्त इत्यर्थः । तथोदयस्थित्यादिकमुदयस्थितिबन्धादिकमितर-

तुल्यं उपशमश्रेण्यारोहजाव्युदयादितुल्यं आरोहे यत्र यत्र तद्भवबन्धेदः प्रतिपाते तत्र तत्र तत्प्रवृत्तिरित्यर्थः । एतच्च प्राग्व्यर्थप्रसङ्गादुक्तमेव । तथा एकस्मिन् जवे द्वौ वारौ चारित्रमोहनीयमुपशमयति उपशमश्रेणिं प्रतिपद्यत इत्यर्थः । न तु तृतीयमपि वारं । यश्च द्वौ वारावुपशमश्रेणिं प्रतिपद्यते स तस्मिन् जवे क्षपकश्रेणिं न प्रतिपद्यते । यस्त्वेकवारमुपशमश्रेणिं प्रतिपद्यते तस्य जवेदपि तस्मिन् जवे क्षपकश्रेणिः । एष कार्मग्रन्थिकाजिप्रायः । आगमाजिप्रायेण त्वेकस्मिन् जवे एकैव श्रेणिर्न तु द्वे अपि । तदुक्तं—"अन्नयरसेढिवज्जं एगजवेणं च सवाइं" इति ॥ ६४ ॥

तदयं पुरुषवेदोदयेनोपशमश्रेणिं प्रतिपन्नस्य विधिरुक्तः, सम्प्रति स्त्रीवेदेन नपुंसकवेदेन चोपशमश्रेणिं प्रतिपद्यमानस्य विधिमाह—

उदयं वज्जिय इत्थी इत्थिं समयइ अवेयगा सत्त । तह वरिसधरो वरिसधरित्थिं समगं कमारुढे ॥ ६५ ॥

व्याख्या—इह स्त्री उपशमश्रेणिं प्रतिपन्ना सती प्रथमतो नपुंसकवेदमुपशमयति पश्चात्स्त्रीवेदं, तं च तावदुपशमयति यावत् स्वोदयस्य द्विचरमसमयः, तस्मिँश्च समये एकां चरमसमयमात्रामुदयस्थितिं वर्जयित्वा शेषं सकलमपि स्त्रीवेदसत्कं दलिकमुपशमितं । ततश्चरमसमये व्यतीतेऽवेदका सती पुरुषवेदहास्यादिकाः सप्त प्रकृतीर्युगपदुपशमयितुमुद्यतते । शेषं पुरुषवेदेन श्रेणिं प्रतिपन्नस्येव जावनीयं । वर्षधरो नपुंसक उपशमश्रेणिं प्रतिपन्नः सँस्तथेत्येकामुदयस्थितिं मुक्त्वेत्यर्थः, वर्षधरस्त्रीवेदौ समकं युगपदुपशमयति । "कमारुढे" इति क्रमेणारब्धे सति । अत्रायं सम्प्रदायः—स्त्रीवेदेन पुरुषवेदेन चोपशमश्रेणिं प्रपद्यमानो यस्मिन् स्थाने नपुंसकवेदमुपशमयति तद्दूरं यावन्नपुंसकवेदेनापि श्रेणिं प्रतिपन्नः सन् केवलं

नपुंसकवेदमेवोपशमयति, तत ऊर्ध्वं तु नपुंसकवेदं स्त्रीवेदं च युगपदुपशमयितुं लग्नः सँस्तावद्गतो यावन्नपुंसकवेदोदयाद्धाया द्विचरमसमयः। तस्मिँश्च समये स्त्रीवेद उपशान्तो नपुंसकवेदस्य चैका समयमात्रोदयस्थितिरवशिष्यते। शेषं सर्वमुपशान्तं। तस्यामप्युदयस्थितावतिक्रान्तायामवेदको भूत्वा पुरुषवेदादिकाः सप्तप्रकृतीर्युगपदुपशमयितुं प्रक्रमते। शेषं तथैव ६५॥

तदेवमुक्ता सर्वोपशमनाऽथ देशोपशमनामभिधित्सुराह—

पगइठिईअणुभागप्पएसमूलुत्तराहिं पविभत्ता। देसकरणोवसमणा तीए समियस्स अट्ठपयं॥ ६६॥

व्याख्या—देशभूताभ्यां करणाभ्यां यथाप्रवृत्तापूर्वकरणसंज्ञिताभ्यामुपशमना देशकरणोपशमना, यद्वा करणाभ्यामुक्तरूपाभ्यामुपशमना करणोपशमना, ततो देशस्य प्रकृत्यादीनामेकदेशस्य करणोपशमना देशकरणोपशमनेति समासः, करणद्वयेन यत्प्रकृत्यादिकं देशत उपशमयति न सर्वात्मना सा देशोपशमनेत्यर्थः। सा च चतुर्विधा, तथाहि—प्रकृतिदेशोपशमना, स्थितिदेशोपशमना, अनुभागदेशोपशमना, प्रदेशदेशोपशमना चेति। पुनरप्येकैका द्विविधा—मूलप्रकृतिविषयोत्तरप्रकृतिविषया च। तया च देशोपशमनया शमितस्योपशमं नीतस्येदमर्थपदं इदं विशेषाकृतम्॥ ६६॥

उव्वट्टणउवट्टणसंकमणाइं च तिन्नि करणाइं। पगइतया उवसमिउं पहू नियट्टिम्मि वट्टंतो॥ ६७॥

व्याख्या—देशोपशमनयोपशमितस्य कर्मण उद्वर्तनापवर्तनासङ्क्रमणरूपाणि त्रीणि करणानि प्रवर्तन्ते, नान्यान्युदीरणादीनि, एष देशोपशमनायाः सर्वोपशमनातो विशेषः। तथा तया देशोपशमनया "पगइ त्ति" मूलप्रकृतिमुत्तरप्रकृतिं वोपशमयितुं प्रभुः समर्थो निवृत्तिकरणेऽपूर्वकरणगुणस्थानकचरमसमये पर्यवसानलक्षणसम्बन्धेन वर्त्तमानो वेदितव्यः।

इदमुक्तं भवति—सर्वेऽप्येकद्वित्रिचतुरिन्द्रियासंज्ञिपञ्चेन्द्रियतिर्यङ्नारकदेवा मनुष्याश्च यथासंभवमपूर्वकरणपर्यवसाना देशोपशमनास्वामिनोऽवसेयाः । इयं चैतेषां देशोपशमना सर्वकर्मणां द्रष्टव्या, न मोहस्यैव केवलस्य ॥ ६७ ॥

एतद्विषयमेव कञ्चिद्विशेषमाह—

दंसणमोहाणंताणुबंधिणं सगणियट्टिउं णुप्पिं । जा उवसमे चउण्हा मूलुत्तरणाइसंताउं ॥ ६८ ॥

व्याख्या—दर्शनमोहनीयानन्तानुबन्धिनां स्वकनिवृत्तेः स्वकीयस्वकीयापूर्वकरणात्परतो देशोपशमना न भवति । तत्र दर्शनत्रिकस्य क्षपका अविरतसम्यग्दृष्टयो देशविरताः सर्वविरता वा, उपशमकास्तु मनुष्याः प्रतिपन्नसर्वविरतयस्तावद्देशोपशमनां कुर्वन्ति यावत्स्वापूर्वकरणचरमसमयः । अनन्तानुबन्धिनां विसंयोजने प्रवृत्तास्तु चातुर्गतिका अपि स्वापूर्वकरणान्तिमसमयं यावद्देशोपशमकाः, न परतः । शेषाणां चारित्रमोहनीयप्रकृतीनामुपशमनायां क्षपणायां वा यावदपूर्वकरणगुणस्थानकचरमसमयस्तावद्देशोपशमना । शेषकर्मप्रकृतीनां च सर्वोपशमना न भवत्येव, किं तु देशोपशमनैव, साऽपि चापूर्वकरणगुणस्थानं यावदवगन्तव्या, न परतः । अथ साद्यादिप्ररूपणा क्रियते-"जा" इत्यादि, या मूलप्रकृतय उत्तरप्रकृतयो वाऽनादिसत्ताकास्ता उपशमे देशोपशमनाधिकारे चतुर्विधाः साद्यनादिध्रुवाध्रुवभेदात् । तत्र मूलप्रकृतीनामष्टानामपि देशोपशमनाऽपूर्वकरणगुणस्थानकादूर्ध्वं गत्वा पततां प्रवर्तमाना सादिः, तत्स्थानमप्राप्तानामनादिः, ध्रुवाऽभव्यानां, भव्यानां त्वध्रुवेति । कृता मूलप्रकृतीनां साद्यादिप्ररूपणा । अथोत्तरप्रकृतीनां सा क्रियते—तत्र वैक्रियसप्तकाहारकसप्तकमनुष्यद्विकदेवद्विकनरकद्विकसम्यक्त्वमिश्रोच्चैर्गोत्ररूपोद्वलनयोग्यत्रयोविंशतिप्रकृतिजिननामायुश्चतुष्करहितं शेषं त्रिंशदुत्तरं प्रकृ-

तिशतं ध्रुवसत्कर्म । तस्य देशोपशमना साद्यनादिध्रुवाध्रुवभेदेन चतुर्विधा, तथाहि—मिथ्यात्वानन्तानुबन्धिनां स्वस्वापूर्वकरणात्परतो देशोपशमना न भवति । शेषकर्मणां त्वपूर्वकरणगुणस्थानात्परतो न भवति, ततो व्यवच्छेदस्थानात्प्रच्यवमानानां सा प्रवर्तमाना सादिः, तत्स्थानमप्राप्तानामनादिः, ध्रुवाध्रुवे पूर्ववत् । शेषाणां तूद्वलनयोग्याद्यष्टाविंशतिप्रकृतीनामध्रुवसत्कर्मत्वादेव देशोपशमना सादिरध्रुवा च ज्ञेया ॥ ६८ ॥

अथ देशोपशमनामधिकृत्य प्रकृतिस्थानप्ररूपणामाह—

चउराइजुआ वीसा एक्कवीसा य मोहठाणाणि । संकमणियट्टिपाउग्गाइं सजसाइं णामस्स ॥ ६९ ॥

व्याख्या—मोहनीयस्य देशोपशमनायां षट् प्रकृतिस्थानानि भवन्ति । तद्यथा—एकविंशतिः, तथा चतुरादियुता विंशतिरिति चतुर्विंशतिः, पञ्चविंशतिः, षड्विंशतिः, सप्तविंशतिः, अष्टाविंशतिश्चेत्यर्थः । शेषाणि त्वनिवृत्तिबादरसंज्ञवीनीतीह न भवन्ति । तत्राष्टाविंशतिरूपं देशोपशमनास्थानमाद्यगुणस्थानत्रयस्थेषु वेदकसम्यग्दृष्टिषु च प्राप्यते । सप्तविंशतिस्थानमुद्वलितसम्यक्त्वस्य मिथ्यादृष्टेः सम्यग्मिथ्यादृष्टेर्वा । षड्विंशतिस्थानमुद्वलितसम्यक्त्वमिश्रपुञ्जद्वयस्यानादिमिथ्यादृष्टेर्वा । पञ्चविंशतिस्थानं षड्विंशतिसत्कर्मणो मिथ्यादृष्टेः सम्यक्त्वमुत्पादयतोऽपूर्वकरणादूर्ध्वं ज्ञातव्यं, तदा मिथ्यात्वदेशोपशमनाया निवृत्तेः । तथाऽनन्तानुबन्धिनामुद्वलनेऽपूर्वकरणादूर्ध्वं वर्तमानस्य चतुर्विंशतिस्थानं, चतुर्विंशतिसत्कर्मणो वा चतुर्विंशतिस्थानं । क्षपितसप्तकस्यैकविंशतिस्थानं । उक्तानि मोहनीयप्रकृतिस्थानानि । अथ नामकर्मप्रकृतिस्थानान्याह "संकमेत्यादि" नाम्नः प्रकृतिस्थानसङ्क्रमे यानि सयशांसि यशःकीर्तिसहितानि स्थानान्युक्तानि तान्येव निवृत्तिप्रायोग्यान्यपूर्वक-

रणप्रायोग्यानि भवन्ति देशोपशमनायोग्यानि भवन्तीत्यर्थः । तानि चेमानि—त्र्युत्तरशतं, द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिश्च । तत्रादिमानि चत्वारि स्थानानि यावदपूर्वकरणगुणस्थानकचरमसमयस्तावदेदितव्यानि, न परतः । शेषाणि च त्रीणि त्रिनवतिचतुरशीतिद्व्यशीतिरूपाण्येकेन्द्रियादीनां भवन्ति, न श्रेणिप्रतिपद्यमानानां । अन्यानि तु स्थानान्यपूर्वकरणगुणस्थानात्परतो लभ्यन्ते, नार्वागिति न देशोपशमनायोग्यानि । ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामेकैकं प्रकृतिस्थानं देशोपशमनायोग्यं । तत्र ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मकं, दर्शनावरणस्य नवप्रकृत्यात्मकं, वेदनीयस्य द्विप्रकृत्यात्मकं, गोत्रस्य देशोपशमनायोग्ये द्वे प्रकृतिस्थाने, तथाहि—द्वे एका चेति। तत्रानुद्वलितोच्चैर्गोत्रस्य द्वे, उद्वलितोच्चैर्गोत्रस्य चैका । आयुषोऽपि द्वे प्रकृतिस्थाने, तद्यथा—द्वे प्रकृती एका चेति । तत्राबद्धपरभवायुष्कस्यैका, बद्धपरभवायुषस्तु द्वे इति ॥ ६९ ॥

उक्ता प्रकृतिदेशोपशमना । अथ स्थितिदेशोपशमनामाह—

ठिइसंकमो व ठिइउवसमणा नवरिं जहन्नया कज्जा। अप्पवसिद्धिजहन्ना उव्वलगणियट्टिगे वियरा॥७०॥

व्याख्या—स्थितिसङ्क्रमवत् स्थितिदेशोपशमना द्रष्टव्या । तत्रोत्कृष्टस्थितिसङ्क्रमप्ररूपणात उत्कृष्टस्थितिदेशोपशमनाप्ररूपणाया न कोऽपि विशेषः । जघन्यस्थितिदेशोपशमनाऽपि जघन्यस्थितितुल्यैव प्रायो नवरमिह जघन्यस्थितिदेशोपशमनास्वामित्वप्ररूपणाऽभवसिद्धिकप्रायोग्यजघन्यस्थितौ वर्तमानस्यैकेन्द्रियस्य कार्या, तस्यैव प्रायः सर्वकर्मणामतिजघन्यायाः स्थितेः प्राप्यमाणत्वात् । याश्चेतराः प्रकृतयोऽभवसिद्धिकप्रायोग्यजघन्यस्थितयो न भवन्ति तासामुद्वलकेऽ-

पूर्वकरणे वा जघन्यस्थितिदेशोपशमना द्रष्टव्या । तत्रोद्वलके उद्वलनप्रायोग्यप्रकृतीनामन्तिमे स्थितिखण्डे पल्योपमासङ्ख्येयभागप्रमाणे उद्वलनाय व्यापृतस्तत्राप्याहारकसप्तकसम्यक्त्वमिश्राणामेकेन्द्रियोऽनेकेन्द्रियो वा। शेषप्रकृतीनां तूद्वलनयोग्यानां वैक्रियसप्तकदेवद्विकनरकद्विकमनुजद्विकोच्चैर्गोत्ररूपाणामेकेन्द्रिय एव । अन्यासां त्वपूर्वकरणान्त्यसमये जघन्यां देशोपशमनां करोति ॥ ७० ॥

अणुन्नागसंकमसमा अणुन्नागुवसामणा णियट्टिम्मि । संकमपएसतुल्ला पएसउवसामणा चेत्थ ॥७१॥

व्याख्या—अनुन्नागसङ्क्रमसमाऽनुन्नागदेशोपशमना वाच्या, सा च कियत्पर्यन्तमित्याह—निवृत्तावपूर्वकरणचरमसमयं यावदित्यर्थः । इदमुक्तं भवति–य एवोत्कृष्टानुन्नागसङ्क्रमस्वामी प्रागुक्तः स एवोत्कृष्टानुन्नागदेशोपशमनाया अपि स्वामी । तत्राशुन्नप्रकृतीनां मिथ्यादृष्टिः, शुन्नप्रकृतीनां तु सम्यग्दृष्टिः, केवलं सातवेद्ययशःकीर्त्युच्चैर्गोत्राणामुत्कृष्टानुन्नागसङ्क्रमस्वामिनोऽपूर्वकरणगुणस्थानकात्परतोऽपि भवन्ति । उत्कृष्टानुन्नागदेशोपशमनायास्तूत्कर्षतोऽप्यपूर्वकरणगुणस्थानकान्ता एव ज्ञेयाः । जघन्यानुन्नागदेशोपशमना च जिननामवर्जितानां सर्वासामपि प्रकृतीनामेकेन्द्रियेऽभवसिद्धिकप्रायोग्यजघन्यस्थितौ वर्तमाने द्रष्टव्या । जिननाम्नस्तु य एव जघन्यानुन्नागसङ्क्रमस्वामी स एव जघन्यानुन्नागदेशोपशमनास्वामी द्रष्टव्यः । प्रदेशदेशोपशमना चात्र प्रदेशसङ्क्रमतुल्या ज्ञातव्या । अयमिह परमार्थः–उत्कृष्टप्रदेशदेशोपशमनोत्कृष्टप्रदेशसङ्क्रमतुल्या । नवरं येषां कर्मणामपूर्वकरणात्परतोऽप्युत्कृष्टः प्रदेशसङ्क्रमः प्राप्यते तेषामप्यपूर्वकरणगुणस्थानान्त्यसमयमेव यावदुत्कृष्टप्रदेशदेशोपशमना वाच्या । जघन्या तु प्रदेशदेशोपशमना जघन्यप्रदेशसङ्क्रमतुल्यैवेति ॥ ७१ ॥

॥ इति कर्मप्रकृतिटीकायामुपशमनाकरणम् ॥

तदेवमभिहितमुपशमनाकरणं । अथ निधत्तिनिकाचनाकरणे अतिदेशेनाभिधित्सुराह—

देसोवसमणतुल्ला होइ णिहत्ती णिकायणा णवरं । संकमणं पि णिहत्तीइ णत्थि सेसाणि वियरस्स ॥७१॥

व्याख्या—निधत्तिर्निकाचना च देशोपशमनातुल्या ये देशोपशमनाया भेदा ये च स्वामिनस्तेऽन्यूनानतिरिक्ता निधत्तिनिकाचनयोरपि ज्ञेया इत्यर्थः । नवरं निधत्तिनिकाचनयोरिदमर्थपदं । सङ्क्रमणं अपिशब्दादुदीरणादीन्यपि निधत्तिविषये कर्मणि न भवन्ति, उद्वर्त्तनापवर्त्तने तु भवत एव । इतरस्यां निकाचनायां शेषे अपि उद्वर्तनापवर्तने अपि न भवतः सकलकरणायोग्यं निकाचितमित्यर्थः ॥ ७१ ॥

इह यत्र गुणश्रेणिस्तत्र प्रायो देशोपशमनानिधत्तिनिकाचनायथाप्रवृत्तसङ्क्रमा अपि संभवन्त्यत एतत्सकलाश्रितमल्पबहुत्वमाह—

गुणसेढिपएसग्गं थोवं पत्तेगसो असंखगुणं । उवसमणाइसु तीसु वि संकमणेहापवत्ते य ॥ ७२ ॥

व्याख्या—गुणश्रेणिप्रदेशाग्रं स्तोकं । ततः प्रत्येकश इति प्रत्येकं प्रत्येकमुपशमादिषु त्रिषु, यथाप्रवृत्ते च सङ्क्रमणेऽसङ्ख्येयगुणं वक्तव्यं । इयमत्र क्रमव्यक्तिः—यस्य तस्य वा कर्मणो गुणश्रेणिप्रदेशाग्रं सर्वस्तोकं । ततो देशोपशमनायां प्रदेशाग्रमसङ्ख्येयगुणं । ततो निधत्तमसङ्ख्येयगुणं । ततोऽपि निकाचितमसङ्ख्येयगुणं । ततोऽपि यथाप्रवृत्तसङ्क्रमेण सङ्क्रान्तमसङ्ख्येयगुणम् ॥ ७२ ॥

अधुनाऽष्टानामपि करणानां येऽध्यवसायास्तेषां प्रतिनियतपरिमाणप्ररूपणार्थमाह—

थोवा कसायउदया ठिइबंधोदीरणाइ(य)संकमणे। उवसमणाइसु अप्पवसाया कमसो असंखगुणा ॥७४॥

व्याख्या—स्थितिबन्धे उपलक्षणादनुभागबन्धे च ये कषायोदया बन्धनकरणाध्यवसायास्ते सर्वस्तोकाः। प्रकृतिप्रदेशबन्धयोश्च योगप्रत्ययत्वादिहाग्रहणं। तेभ्य उदीरणाध्यवसाया असङ्ख्येयगुणाः। ततोऽपि सङ्क्रमाध्यवसायाः सङ्क्रमोद्वर्तनापवर्तनाकरणाध्यवसायाः समुदिता असङ्ख्येयगुणाः। ततोऽप्युपशमनाध्यवसाया असङ्ख्येयगुणाः। ततोऽपि निधत्त्यध्यवसाया असङ्ख्येयगुणाः। ततोऽपि निकाचनाध्यवसाया असङ्ख्येयगुणाः॥ ७४॥

॥ इति कर्मप्रकृतिटीकायां करणाष्टकम्॥

तदेवमभिहितानि करणानि। साम्प्रतमुद्देशक्रमप्राप्तमुदयमभिधित्सुराह—

उदउ उदीरणाए तुल्लो मोत्तूण एगचत्तालं। आवरणविग्घसंजलणलोभवेए य दिट्ठिदुगं॥ १॥
आवलिगहिगं वेइंति आउगाइं पि अप्पमत्ता वि। वेयणियाणि य छसमय तणुपज्जत्ता य णिद्दाउं॥ २॥
मणुयगइजाइतसबायरं च पज्जत्तसुभगआइज्जं। जसकित्तिमुच्चगोयं चाजोगी केइ तित्थयरं॥ ३॥

व्याख्या—उदय उदीरणातुल्यः उदीरणायाः प्रकृत्यादयो ये भेदाः प्रागुक्ता या च साद्यादिप्ररूपणा यच्च स्वामित्वं

---

१ "स्थितिबन्धोऽत्रानुभागबन्धस्याप्युपलक्षणं, द्वयोः कषायत्वाऽविशेषात्। प्रकृतिप्रदेशबन्धौ च योगाद्भवत इति ताविह न गृह्येते, ततोऽयमर्थः" इत्यधिकं प्रत्यन्तरे दरीदृश्यते।

तत्सर्वमन्यूनानतिरिक्तमुदयेऽपि ज्ञातव्यं, उदयोदीरणयोः सहभावित्वात् । तथाहि—यत्रोदयस्तत्रोदीरणा यत्रोदीरणा तत्रोदय इति, तत्किं सर्वत्राप्ययं नियम इति चेत्प्रायो नियम एवेत्याशयं हृदि व्यवस्थाप्य व्यभिचारस्थानव्यवच्छेदं विवक्षुराह–"मोत्तूण एगचत्तालं" इत्यादि, मुक्त्वा एकचत्वारिंशत्प्रकृतीरुक्तनियमो द्रष्टव्यः, तासामुदीरणामन्तरेणापि कियत्कालमुदयस्य प्राप्यमाणत्वात् । तथाहि–आवरणानि ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयरूपाणि, "विग्घ त्ति" अन्तरायपञ्चकं संज्वलनलोभं वेदत्रयं दृष्टियुगं सम्यक्त्वमिथ्यात्वरूपं, सर्वसङ्ख्यया विंशतिप्रकृतीः स्वस्वोदयपर्यवसाने आवलिकामात्रं कालमधिकं वेदयन्ते, एतासामावलिकामात्रं कालमुदीरणयाऽसंवलितेन केवलेनैवोदयेनानुभवन्तीत्यर्थः । तच्चावलिकामात्रं त्रयाणां वेदानां मिथ्यात्वस्य चान्तरकरणे कृते प्रथमस्थितावावलिकाशेषायां शेषाणां तु कर्मणां स्वस्वसत्तापर्यवसाने, तथा चतुर्णामप्यायुषां स्वस्वपर्यवसाने आवलिकामात्रं कालमुदय एव भवति नोदीरणा, आवलिकान्तर्गतस्य कर्मणः सर्वस्याप्युदीरणानर्हत्वात् । तथा वेदनीये सातासातलक्षणे मनुजायुश्चाप्रमत्ता अप्रमत्तसंयतप्रभृतय उदीरणामन्तरेण केवलेनैवोदयेन वेदयन्ते । तथा तनुपर्याप्ताः शरीरपर्याप्त्या पर्याप्ताः सन्तो "दुसमय त्ति" द्वितीयसमयादारभ्य शरीरपर्याप्त्यनन्तरसमयादारभ्येन्द्रियपर्याप्तिचरमसमयं यावदित्यर्थः । तथास्वाभाव्यादुदीरणामन्तरेण केवलेनैवोदयेन निद्राः पञ्चापि वेदयन्ते । तथा मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्त्युच्चैर्गोत्ररूपा नव प्रकृतीरयोगिकेवलिन उदीरणामन्तरेण स्वकालं यावत्केवलेनैवोदयेन वेदयन्ते । केचित्तीर्थकृतः तीर्थकरनामाप्ययोगिनः सन्त उदीरणां विनैवोदयेन वेदयन्ते॥ १–२–३ ॥

उक्तः प्रकृत्युदयोऽथ स्थित्युदयमाह—

ठिइउदउं वि ठिइखयपउंगसाठिइउदीरणा अहिगो। उदयठिईइ हस्सो बत्तीसा एग उदयठिई ॥४॥

व्याख्या—स्थित्युदयोऽपि स्थितिक्षयात्प्रयोगतश्च भवति। तत्र स्थितिरबाधाकालरूपा तस्याः क्षयेण द्रव्यक्षेत्रकालभवभावरूपोदयहेतुसंप्राप्तौ सत्यां यः स्वभावत उदयो भवति स स्थितिक्षयनिष्पन्न उदयः। यस्तु तस्मिन्नुदये प्रवर्तमाने सत्युदीरणाकरणरूपेण प्रयोगेणाकृष्यमाणस्य दलिकस्यानुभवः स प्रयोगोदयः। अपिरत्रानुक्तविशेषांशे उदीरणासाम्यं प्रागुक्तं समुच्चिनोति। योऽयमुदयः सामान्यतो द्विधा उत्कृष्टो जघन्यश्च तत्रोत्कृष्टस्थित्युदय उत्कृष्टस्थित्युदीरणात उदयस्थित्याऽन्यधिकः। तथाहि—उत्कृष्टायां स्थितौ बध्यमानायामबाधाकालमध्येऽपि प्राग्बद्धं दलिकमस्तीति कृत्वा बन्धावलिकायामतीतायामनन्तरस्थितौ विपाकोदयेन वर्तमान उदयावलिकात उपरितनीः स्थितीः सर्वा अप्युदीरयति, उदीर्य च वेदयते। ततो बन्धावलिकोदयावलिकाहीनायाः शेषायाः सर्वस्या अपि स्थितेरुदयोदीरणे तुल्ये। वेद्यमानायां च स्थितावुदीरणा न प्रवर्तते, किंतूदय एव केवलः। ततो वेद्यमानया समयमात्रया स्थित्योत्कृष्टस्थित्युदीरणात उत्कृष्टस्थित्युदयोऽन्यधिकः। बन्धोदयावलिकाद्वयहीनश्चोत्कृष्टः स्थित्युदय उदयोत्कृष्टबन्धानां वेदितव्यः। शेषाणां तु यथासंभवं, तत्राप्युक्तनीत्योदयस्थित्याऽन्यधिको वक्तव्यः। तथा ह्रस्वो जघन्यः स्थित्युदयः षट्त्रिंशत्प्रकृतीनां प्रागुक्ताया एकचत्वारिंशतो निद्रापञ्चकवर्जनेन निष्पन्नानामेका समयमात्रोदयस्थितिः समयमात्रैकस्थित्युदयप्रमाणो ज्ञातव्यः, समयमात्रा

चैका स्थितिश्चरमस्थितिरवसेया। निद्रापञ्चकस्य तूदीरणाया अन्नावेऽपि शरीरपर्याप्त्यनन्तरं केवलोदयकालेऽपवर्तनाया अपि प्रवृत्तावेका स्थितिर्न प्राप्यत इति तद्वर्जनं। शेषं जघन्योदीरणातुल्यं निरवशेषमवगन्तव्यम्॥ ४॥

उक्तः स्थित्युदयोऽथानुन्नागोदयमाह—

अणुन्नागुदय जहन्नो वि णवरि आवरणविग्घवेयाणं। संजलणलोन्नसम्मत्ताण य गंतूणमावलियं॥ ५॥

व्याख्या—अनुन्नागोदयोऽप्यनुन्नागोदीरणातुल्यो वक्तव्यः। नवरं ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयवेदत्रयसंज्वलनलोन्नसम्यक्त्वानामुदीरणाव्यवच्छेदे सति परत आवलिकां गत्वाऽतिक्रम्य तस्या आवलिकायाश्चरमसमये जघन्यानुन्नागोदयो वाच्यः॥ ५॥

उक्तोऽनुन्नागोदयोऽथ प्रदेशोदयो वक्तुमवसरप्राप्तः। तत्र चेमावर्थाधिकारौ—साद्यनादिप्ररूपणा स्वामित्वं चेति। तत्र साद्यनादिप्ररूपणा द्विविधा—मूलप्रकृतिविषयोत्तरप्रकृतिविषया च। तत्र मूलप्रकृतिविषयसाद्यनादिप्ररूपणार्थमाह—

अजहण्णुक्कोसा चउविहा छण्ह चउविहा मोहे। आउस्स साइअधुवा सेसविगप्पा य सव्वेसिं॥६॥

व्याख्या—मोहनीयायुर्वर्जानां षण्णां कर्मणामजघन्यः प्रदेशोदयश्चतुर्विधः। तथाहि—सादिरनादिर्ध्रुवोऽध्रुवश्च। तत्र कश्चित् क्षपितकर्मांशो दिवि देवो जातस्तत्र च संक्लिष्टो भूत्वोत्कृष्टां स्थितिं बध्नन्नुत्कृष्टं प्रदेशाग्रमुद्वर्तयति। ततो बन्धावसाने कालं कृत्वा एकेन्द्रियेषूत्पन्नः, तस्य प्रथमसमये प्रागुक्तानां षण्णां कर्मणां जघन्यः प्रदेशोदयः, स चैकसामयिक इति सादिरध्रुवश्च, ततोऽन्यः सर्वोऽप्यजघन्यः, सोऽपि तद्द्वितीयसमये भवन् सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ पूर्व-

वत्। तथा तेषामेव षण्णां कर्मणामनुत्कृष्टः प्रदेशोदयस्त्रिधाऽनादिर्ध्रुवोऽध्रुवश्चेति । तथाहि—अमीषां षण्णां कर्मणामुत्कृष्ट-प्रदेशोदयो गुणितकर्मांशस्य स्वस्वोदयान्ते गुणश्रेणीशिरसि वर्तमानस्य लभ्यते, स चैकसामयिक इति सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः, स चानादिः सदैव भावात्, ध्रुवाध्रुवौ प्राग्वत्। तथा मोहे मोहनीयेऽजघन्योऽनुत्कृष्टश्च प्रदे-शोदयश्चतुर्विधः साद्यनादिध्रुवाध्रुवभेदात्, तथाहि—क्षपितकर्मांशस्यान्तरकरणे कृतेऽन्तरकरणपर्यन्तभाविगोपुच्छाकारसं-स्थितावलिकामात्रदलिकान्तसमये मोहनीयस्य जघन्यः प्रदेशोदयः, स चैकसामयिक इति सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः, सोऽपि ततो द्वितीयसमये भवन् सादिः, तत्स्थानमप्राप्तस्य त्वनादिः, ध्रुवाध्रुवौ प्राग्वत्। तथा गुणित-कर्मांशस्य सूक्ष्मसम्परायगुणस्थानकान्तसमये उत्कृष्टः प्रदेशोदयः, स चैकसामयिक इति सादिरध्रुवश्च । ततोऽन्यः सर्वोऽ-प्यनुत्कृष्टः, स चोपशमश्रेणीतः प्रतिपततो भवन् सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ प्राग्वत्। तथाऽऽयुषश्चत्वा-रोऽपि भेदा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपाःसाद्यध्रुवाः,चतुर्णामप्येतद्भेदानां यथायोगं प्रतिनियतकाल एव भावात्। तथा प्रागुक्तानां षण्णां मोहनीयस्य चेति सर्वेषां कर्मणामुक्तशेषौ विकल्पावुत्कृष्टजघन्यरूपौ साद्यध्रुवौ, तौ च प्रागेव भावितौ ॥ ६ ॥

कृता मूलप्रकृतीनां साद्यादिप्ररूपणा । अथोत्तरप्रकृतीनां तां चिकीर्षुराह—

अजहण्णोणुक्कोसो सगयालाए चउत्तिहा चउहा । मिच्छे सेसासिं दुविहा सव्वे य सेसाणं ॥ ७ ॥

व्याख्या—तैजससप्तकवर्णादिविंशतिस्थिरास्थिरनिर्माणागुरुलघुशुभाशुभज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्ट यरूपाणां सप्तचत्वारिंशत्प्रकृतीनामजघन्यः प्रदेशोदयश्चतुर्विधः साद्यनादिध्रुवाध्रुवभेदात्, तथाहि—कश्चित्क्षपितकर्मांशो

देव उत्कृष्टे संक्लेशे वर्तमान उत्कृष्टां स्थितिं बध्नन्नुत्कृष्टं प्रदेशाग्रमुद्वर्तयति,ततो बन्धावसाने कालं कृत्वा एकेन्द्रियेषूत्पद्यते, तस्य प्रथमसमये प्रागुक्तानां सप्तचत्वारिंशत्प्रकृतीनां जघन्यः प्रदेशोदयः, नवरमवधिज्ञानावरणावधिदर्शनावरणयोर्बन्धावलिकाचरमसमये देवस्य जघन्यः प्रदेशोदयो ज्ञातव्यः, स चैकसामयिक इति सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः, स च द्वितीयसमये भवन् सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ प्राग्वत् । अमूषामेव सप्तचत्वारिंशत्प्रकृतीनामनुत्कृष्टः प्रदेशोदयस्त्रिप्रकारः, तथाहि—अनादिर्ध्रुवोऽध्रुवश्चेति । तत्र गुणितकर्मांशस्य स्वस्वोदयान्ते गुणश्रेणीशिरसि वर्तमानस्योत्कृष्टः प्रदेशोदयः, स चैकसामयिक इति साद्यध्रुवः । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः स चानादिः सदाभावात्, ध्रुवाध्रुवौ प्राग्वत् । तथा मिथ्यात्वे मिथ्यात्वस्याजघन्योऽनुत्कृष्टश्च प्रदेशोदयश्चतुर्धा, साद्यनादिध्रुवाध्रुवभेदात्। तथाहि—क्षपितकर्मांशस्य प्रथमसम्यक्त्वमुत्पादयतः कृतान्तरकरणस्यौपशमिकसम्यक्त्वात्प्रच्युत्य मिथ्यात्वगतस्यान्तरकरणपर्यन्तभाविगोपुच्छाकारसंस्थितावलिकामात्रदलिकान्तसमये वर्तमानस्य जघन्यः प्रदेशोदयः, स चैकसामयिक इति साद्यध्रुवः । ततोऽन्यः सर्वोऽप्यजघन्यः, सोऽपि ततो द्वितीयसमये भवन् सादिः । वेदकसम्यक्त्वाद्याप्रच्यवमानस्य सादिः तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ प्राग्वत् । तथा मिथ्यात्वस्योत्कृष्टः प्रदेशोदयस्तदा भवति यदा कश्चिद्गुणितकर्मांशो देशविरतिगुणश्रेण्यां वर्तमान एव सर्वविरतिं प्रतिपद्य सर्वविरतिनिमित्तां गुणश्रेणिं करोति, तां च कृत्वा तावद्याति यावद्द्वयोरपि गुणश्रेण्योर्मस्तके, तत्समये च मिथ्यात्वं गच्छतीति, स चैकसामयिक

१ 'बध्नन्नुत्कृष्टम्' इत्यपि क्वचित् ।

इति साद्यध्रुवः। ततोऽन्यः सर्वोऽप्यनुत्कृष्टः, सोऽपि ततो द्वितीयसमये ऽनुत्कृष्टः सादिः। वेदकसम्यक्त्वाद्याप्रतिपततः सादिः तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवौ प्राग्वत्। तथैतासां सप्तचत्वारिंशत्प्रकृतीनां मिथ्यात्वस्य चोक्तशेषौ विकल्पौ जघन्योत्कृष्टरूपौ द्विविधौ साद्यध्रुवत्वेदात्, तौ च भाविताबेव। शेषाणामध्रुवोदयानां प्रकृतीनां दशोत्तरशतसङ्ख्यानां सर्वे विकल्पा जघन्याजघन्योत्कृष्टानुत्कृष्टरूपा द्विविधाः, तद्यथा—सादयोऽध्रुवाश्च। सा च साद्यध्रुवताऽध्रुवोदयत्वादवसेया ॥ ७ ॥

कृता साद्यनादिप्ररूपणा। अथ स्वामित्वमभिधेयं। तच्च द्विधा—उत्कृष्टप्रदेशोदयस्वामित्वं जघन्यप्रदेशोदयस्वामित्वं च। तत्रोत्कृष्टप्रदेशोदयं (प्रदेशोदयस्वामित्वं) प्रतिपिपादयिषुस्तदौपयिकीः संभवतीर्गुणश्रेणीः सर्वा अपि निरूपयति—

सम्मत्तुप्पा सावग विरए संजोयणाविणासे य। दंसणमोहक्खवगे कसाय उवसामगुवसंते ॥ ८ ॥
खवगे य खीणमोहे जिणे य दुविहे असंखगुणसेढी। उदउं तविवरीउं कालो संखेज्जगुणसेढी ॥९॥

व्याख्या—इहैकादश गुणश्रेणयः। तद्यथा—सम्यक्त्वोत्पादे प्रथमा गुणश्रेणिः १। द्वितीया श्रावके देशविरते २। तृतीया विरते सर्वविरते प्रमत्तेऽप्रमत्ते च ३। चतुर्थी संयोजनाविनाशेऽनन्तानुबन्धिनां विसंयोजने ४। पञ्चमी दर्शनमोहनीयत्रितयक्षपके ५। षष्ठी चारित्रमोहनीयोपशमके ६। सप्तमी उपशान्तमोहे ७। अष्टमी मोहनीयक्षपके ८। नवमी क्षीणमोहे ९। दशमी सयोगिकेवलिनि १०। एकादशी त्वयोगिकेवलिनीति ११। अत्र यथोत्तरं प्रदेशतः श्रेणिरसङ्ख्येयगुणा। तथाहि—सर्वस्तोकं सम्यक्त्वोत्पादगुणश्रेण्यां दलिकं, ततोऽपि देशविरतिगुणश्रेण्यामसङ्ख्येयगुणं, ततोऽपि सर्वविरतिगुणश्रेण्यामसङ्ख्येयगुणं, एवं तावद्वाच्यं यावदयोगिकेवलिगुणश्रेण्यां दलिकमसङ्ख्येयगुणं। अत एवोदयः प्रदेशोदयोऽ-

प्येतासु गुणश्रेणिषु यथोत्तरमसङ्ख्येयगुणो वाच्यः । तथा सर्वास्वप्येतासु गुणश्रेणिषु कालस्तद्विपरीत उदयक्रमविपरीतः "संखेज्जगुणसेढि" त्ति सङ्ख्येयगुणश्रेण्या वाच्यः । तथाहि–अयोगिकेवलिगुणश्रेणिकालः सर्वस्तोकः, ततः सयोगिकेवलिगुणश्रेणिकालः सङ्ख्येयगुणः, ततोऽपि क्षीणमोहगुणश्रेणिकालः सङ्ख्येयगुणः, एवं तावत्पश्चानुपूर्व्या वक्तव्यं यावत्सम्यक्त्वोत्पादगुणश्रेणिकालः सङ्ख्येयगुणः । स्थापना । एषा सम्यक्त्वोत्पादगुणश्रेणिः शेषाश्च यथोत्तरमसङ्ख्येयगुणदलिकाः कालतश्च सङ्ख्येयगुणहीना उपरिष्टाच्च पृथुत्वेन यथोत्तरं विशाला विशालतरा हृदि व्यवस्थाप्य भावनीयाः । स्यादेतत्, कथं दलिकं यथोत्तरमसङ्ख्येयगुणं प्राप्यते ?, उच्यते–सम्यक्त्वमुत्पादयन्मिथ्यादृष्टिर्भवति, ततस्तस्य मन्दविशुद्धिकत्वात्स्तोकं गुणश्रेणिदलिकं, सम्यक्त्वोत्पत्तौ सत्यां पुनर्विशुद्धत्वात्प्राक्तनगुणश्रेण्यपेक्षयाऽसङ्ख्येयगुणदलिका गुणश्रेणिः । ततो देशविरतस्य गुणश्रेणिरसङ्ख्येयगुणदलिका, सम्यग्दृष्ट्यपेक्षया देशविरतस्यातिविशुद्धत्वात् । ततोऽपि सर्वविरतस्य गुणश्रेणिरसङ्ख्येयगुणदलिका, देशविरतात्सर्वविरतस्य विशुद्धतरत्वात् । ततोऽपि संयतस्य सतोऽनन्तानुबन्धिनां विसंयोजने गुणश्रेणिरसङ्ख्येयगुणदलिका, तस्यातिविशुद्धतरत्वात् । एवमुत्तरोत्तरविशुद्धिप्रकर्षवशाद्यथोत्तरमसङ्ख्येयगुणदलिकता भावनीया । यथाक्रमं विशुद्धिप्रकर्षादेव क्रमशः सङ्ख्येयगुणहीनान्तर्मुहूर्त्तवेद्यास्वेतासु जीवाः क्रमेणासङ्ख्यगुणनिर्जरा उच्यन्ते ॥ ८ ॥ ए ॥

अथ का गुणश्रेणिः कस्यां गतौ प्राप्यत इत्येतन्निरुरूपयिषुराह—

तिन्नि वि पढमिल्लाउ मिच्छत्तगए वि हुज्ज अन्नभवे । पगयं तु गुणियकम्मे गुणसेढीसीसगाणुदए ॥ १० ॥

व्याख्या—आद्यास्तिस्रो गुणश्रेणयः सम्यक्त्वोत्पाददेशविरतिसर्वविरतिनिमित्ता झटित्येव मिथ्यात्वं गतस्याप्रशस्तमरणेन च झटित्येव मृतस्यान्यजवेऽपि नारकादिरूपपरजवेऽपि कञ्चित्कालमुदयमाश्रित्य जवेयुः। शेषास्तु गुणश्रेणयो नारकादिरूपपरजवे न प्राप्यन्ते, नारकादिजवप्राप्तेरप्रशस्तमरणेनैव संजवात्, न च शेषासु गुणश्रेणिषु सतीष्वप्रशस्तमरणसंजवः किं तु क्षीणास्वेव, तथा चोक्तं चन्द्रर्षिपूज्यैः पञ्चसङ्ग्रहे–"झत्ति गुणाउं पमिए मिछत्तगयम्मि आइमा तिन्नि। लब्जन्ति न सेसाउं जं झीणासुं असुजमरणं ॥१॥" तथाऽत्र तूत्कृष्टप्रदेशोदयस्वामित्वे प्रकृतं गुणितकर्मांशेन गुणश्रेणीशिरसामुदये वर्तमानेन॥१०॥

उत्कृष्टप्रदेशोदयस्वामित्व एव विवेकमाह—

आवरणविग्घमोहाण जिणोदइगाण वावि णियगंते। लहुखवणाए उहीणणोहिलद्धिस्स उक्कस्सो ।११।

व्याख्या—आवरणस्य पञ्चप्रकारस्य ज्ञानावरणस्य चतुःप्रकारस्य च दर्शनावरणस्य विघ्नस्य पञ्चप्रकारस्यान्तरायस्य सर्वसङ्ख्ययाऽऽसां चतुर्दशप्रकृतीनां लघुक्षपणयाऽभ्युत्थितस्य तस्य गुणितकर्मांशस्य क्षीणमोहगुणस्थानकचरमसमये गुणश्रेणीशिरसि वर्तमानस्योत्कृष्टः प्रदेशोदयः। इह द्विधा क्षपणा–लघुक्षपणा चिरक्षपणा च। तत्र योऽष्टवार्षिक एव सप्तमासाभ्यधिकः संयमं प्रतिपन्नस्तत्प्रतिपत्त्यनन्तरं चान्तर्मुहूर्त्तेन क्षपकश्रेणिमारजते तस्य या क्षपणा सा लघुक्षपणा। यस्तु प्रजूतकालं गृहवासमनुजूय संयमं प्रतिपद्यते, संयमप्रतिपत्तेरप्यूर्ध्वं प्रजूतेन कालेन क्षपकश्रेणिं करोति, तस्य या क्षपणा सा चिरक्षपणा। तया च बहवः पुजलाः परिशटन्ति, स्तोका एव चावशिष्यन्ते, ततो न तयोत्कृष्टः प्रदेशोदयो लभ्यते, ततो लघुक्षपणयाऽभ्युत्थितस्येत्युक्तं। अत्र चायं विशेषो ज्ञेयः–अवध्योरवधिज्ञानावरणावधिदर्शनावरणयोरनवधिल-

ब्धिकस्यावधिलब्धिरहितस्य लघुरुपणयाऽन्युत्थितस्योत्कृष्टः प्रदेशोदयः । अवधिज्ञानं ह्युत्पादयतो बहवः पुञ्जाः परिक्षीयन्ते, ततो नावधियुक्तस्योत्कृष्टप्रदेशोदयलाभ इत्यनवधिलब्धिकस्येत्युक्तं । तथा मोहानां मोहनीयप्रकृतीनां सम्यक्त्वमोहनीयसंज्वलनचतुष्टयवेदत्रयरूपाणामष्टानां लघुरुपणयोत्थितस्य गुणितकर्मांशस्य रुपकस्य स्वस्वोदयचरमसमये उत्कृष्टः प्रदेशोदयः । तथा जिने केवलिन्युदयो यासां ता जिनोदयिकास्तासु मध्ये औदारिकसप्तकतैजससप्तकसंस्थानषट्कप्रथमसंहननवर्णादिविंशतिपराघातोपघातागुरुलघुविहायोगतिद्विकप्रत्येकस्थिरास्थिरशुभाशुभनिर्माणरूपाणां द्विपञ्चाशत्प्रकृतीनां गुणितकर्मांशस्य सयोगिकेवलिगुणस्थानकचरमसमये उत्कृष्टः प्रदेशोदयः । सुस्वरदुःस्वरयोः स्वरनिरोधकाले, उच्छ्वासनाम्न उच्छ्वासनिरोधकाले, तथाऽन्यतरवेदनीयमनुष्यगतिमनुष्यायुःपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तितीर्थकरोच्चैर्गोत्राणां द्वादशप्रकृतीनां गुणितकर्मांशस्यायोगिकेवलिनश्चरमसमये उत्कृष्टः प्रदेशोदयः ॥ ११ ॥

उवसंत पढमगुणसेढीइ णिद्दादुगस्स तस्सेव । पावइ सीसगमुदयंति जायदेवस्स सुरनवगे ॥ १२ ॥

व्याख्या—उपशान्तकषायस्य स्वप्रथमगुणश्रेणीशिरसि वर्तमानस्य गुणितकर्मांशस्य निद्राद्विकस्य निद्राप्रचलालक्षणस्योत्कृष्टः प्रदेशोदयः । तथा तस्यैवोपशान्तकषायस्य "पावइ त्ति" प्राप्स्यति "सीसगमुदयं ति" मकारो लाक्षणिकः, स्वप्रथमगुणश्रेणीशीर्षकोदयं यदव्यवहितोत्तरसमये तत्समय इत्यर्थः, जातदेवस्य देवत्वेनोत्पन्नस्य स्वप्रथमगुणश्रेणीशिरसि वर्तमानस्य सुरनवकस्य वैक्रियसप्तकदेवद्विकरूपस्योत्कृष्टः प्रदेशोदयः ॥ १२ ॥

मिच्छत्तमीसणंताणुबंधिअसमत्तथीणगिद्धीणं । तिरिउदएगंताण य बिइया तइया य गुणसेढी ॥ १३ ॥

व्याख्या—मिथ्यात्वमिश्रानन्तानुबन्धिनां "असमत्त"त्ति अपर्याप्तकनाम्नः स्त्यानगृद्धित्रिकस्य तथा तिर्यद्वेवोदय एकान्तेन यासां तास्तिर्यगेकान्तोदयाः एकद्वित्रिचतुरिन्द्रियजातिस्थावरसूक्ष्मसाधारणाख्याः प्रकृतयस्तासां सर्वसङ्ख्यया सप्तदशप्रकृतीनां द्वितीया तृतीया च गुणश्रेणिर्यदा शिरसा मिथो मिलति तदा तयोर्द्वयोर्गुणश्रेणीशिरसोरेकत्र योगे वर्तमानस्य मिथ्यादृष्टेः स्वस्वोदये उत्कृष्टः प्रदेशोदयः । इयमत्र भावना—इह केनचिद्देशविरतेन सता देशविरतिप्रत्यया गुणश्रेणिः कृता, ततः स संयमं प्रतिपेदे, ततः संयमप्रत्यया गुणश्रेणिः कृता, ततो यस्मिन् काले द्वयोरपि गुणश्रेण्योः शिरसी एकत्र मिलिते तस्मिन् काले वर्तमानो गुणितकर्मांशः कश्चिन्मिथ्यात्वं गतस्तदा तस्य मिथ्यात्वानन्तानुबन्धिनामुत्कृष्टः प्रदेशोदयः । यदि पुनः सम्यङ्मिथ्यात्वं गतस्तदा सम्यङ्मिथ्यात्वस्य । स्त्यानर्द्धित्रिकस्य तु मिथ्यात्वं गतस्यागतस्य वोत्कृष्टः प्रदेशोदयो वाच्यः । प्रमत्तसंयतेऽपि तत्त्रयोदयः प्राप्यत इतिकृत्वा । तिर्यगुदयैकान्तानामपर्याप्तकनाम्नश्च प्राक् प्रवर्तितगुणश्रेणिद्वयस्य सम्यक्त्वादिगुणेभ्यः प्रतिपत्य मिथ्यात्वं गत्वाऽप्रशस्तमरणेन मृत्वा तिर्यग्भवप्राप्तौ सत्यां देशविरतिसर्वविरतिगुणश्रेणीशिरसोरेकत्र योगे स्वस्वोदये यथायोगं वर्तमानस्योत्कृष्टः प्रदेशोदयः ॥ १३ ॥

अंतरकरणं होहि त्ति जायदेवस्स तं मुहुत्तंतो । अट्ठण्ह कसायाणं छण्हं पि य णोकसायाणं ॥१४॥

व्याख्या—इह कस्यचिदुपशमश्रेणिं प्रतिपन्नस्यान्तरकरणं भविष्यति यदनन्तरसमये "इतीति" तस्मिन् पाश्चात्यसमये जातदेवस्य देवत्वेनोत्पन्नस्योत्पत्त्यनन्तरमन्तर्मुहूर्तात्परतो गुणश्रेणीशिरसि वर्तमानस्याप्रत्याख्यानप्रत्याख्यानावरणाख्याना-

मष्टानां कषायाणां वेदत्रयवर्जानां षण्णां च नोकषायाणामुत्कृष्टः प्रदेशोदयः । इहान्तर्मुहूर्त्तात्परत एव गुणश्रेणीशिरः प्राप्यत इति 'जायदेवस्स तं मुहुत्तंतो' इत्युक्तम् ॥ १४ ॥

हस्सठिइं बंधित्ता अद्धाजोगाइठिइणिसेगाणं । उक्कस्सपए पढमोदयम्मि सुरणारगाऊणं ॥ १५ ॥

व्याख्या—अद्धा बन्धकालः, योगो मनोवाक्कायनिमित्तं वीर्यं, आदिस्थितौ प्रथमस्थितौ निषेको दलिकनिक्षेपः, एतेषामुत्कृष्टपदे सति । किमुक्तं भवति ?—उत्कृष्टेन बन्धकालेनोत्कृष्टे योगे वर्तमानो ह्रस्वां जघन्यां स्थितिं बद्ध्वा प्रथमस्थितौ चोत्कृष्टं दलिकनिक्षेपं कृत्वा मृतः सन् देवो नारको वा यो जातस्तस्य प्रथमोदये प्रथमस्थित्युदये वर्तमानस्य देवस्य देवायुषो नारकस्य च नारकायुष उत्कृष्टः प्रदेशोदयः ॥ १५ ॥

अद्धाजोगुक्कोसे बंधित्ता भोगभूमिगेसु लहुं । सव्वप्पजीवियं वज्जइत्तु उवट्टिया दोण्हं ॥ १६ ॥

व्याख्या—उत्कृष्टे बन्धकाले उत्कृष्टे च योगे वर्तमानो भोगभूमिगेषु तिर्यक्षु मनुष्येषु वा विषये कश्चित्तिर्यगायुः कश्चिच्च मनुष्यायुरुत्कृष्टं त्रिपल्योपमस्थितिकं बद्ध्वा लघु शीघ्रं च मृत्वा त्रिपल्योपमायुष्केष्वेकस्तिर्यक्षु परो मनुष्येषु मध्ये समुत्पन्नः, तत्र च सर्वाल्पजीवितमन्तर्मुहूर्त्तप्रमाणं वर्जयित्वाऽन्तर्मुहूर्त्तमेकमायुस्तन्नवभोग्यत्वेन धृत्वेत्यर्थः, शेषमशेषमपि स्वस्वायुरपवर्त्तनाकरणेन तौ द्वावपवर्तयतः, ततोऽपवर्तनानन्तरप्रथमसमये तयोस्तिर्यङ्मनुष्ययोर्यथासङ्ख्यं तिर्यङ्मनुष्यायुषोरुत्कृष्टः प्रदेशोदयः ॥ १६ ॥

दूणगणाइज्जाजस गइदुगअणुपुव्वितिगसणीयाणं । दंसणमोहक्खवणा देसविरइ विरइगुणसेढी ॥१७॥

व्याख्या—इहाविरतसम्यग्दृष्टिर्दर्शनमोहनीयत्रयं क्षपयितुमभ्युद्यतो गुणश्रेणिं करोति, ततः स एव देशविरतिं प्रपन्नस्तन्निमित्तां गुणश्रेणिं करोति, ततः स एव सर्वविरतिं प्रतिपन्नः सन् सर्वविरतिनिमित्तां गुणश्रेणिं करोति। ततः करणपरिसमाप्तौ सत्यां भूयोऽप्यविरतो जातः, तस्य क्षीणदर्शनमोहनीयत्रयस्य तृतीयस्यां गुणश्रेण्यां कृतायां प्रतिभग्नस्य संक्लेशवशेनाविरतस्य जातस्य तिसृणामपि गुणश्रेणीनां शिरस्सु वर्तमानस्य तस्मिन्नेव भवे स्थितस्य दुर्भगानादेयायशःकीर्तिनीचैर्गोत्राणामुत्कृष्टः प्रदेशोदयः। यदि चासौ नरकेषु बध्वायुष्कत्वान्नारको झटिति जातस्तदा तस्य पूर्वोक्तानां चतसृणां प्रकृतीनां नरकद्विकसहितानामुत्कृष्टः प्रदेशोदयः। अथ तिर्यङ्नृत्पन्नस्तदा तस्य पूर्वोक्तानां तिर्यग्द्विकसहितानामुत्कृष्टः प्रदेशोदयः। अथ मनुष्यो जातस्तदा तासां मनुष्यानुपूर्वीसहितानामिति ॥ १७ ॥

संघयणपंचगस्स य बिइयाई तिन्नि हुंति गुणसेढी। आहारयउज्जोवाणुत्तरतणु अप्पमत्तस्स ॥१८॥

व्याख्या—प्रथमसंहननवर्जस्य शेषसंहननपञ्चकस्य द्वितीयाद्यास्तिस्रो गुणश्रेणयो मिथोमिलितशीर्षा उत्कृष्टप्रदेशोदयस्थानानि भवन्ति। इयमत्र भावना—इह कश्चिन्मनुष्यो देशविरतिं प्रतिपन्नः, ततः स देशविरतिप्रत्ययां गुणश्रेणिं करोति। ततः स एव विशुद्धिप्रकर्षवशतः सर्वविरतिं प्रतिपन्नः सन् सर्वविरतिप्रत्ययां गुणश्रेणिं करोति। ततः स एव तथाविधविशुद्धिवशादनन्तानुबन्धिनां विसंयोजनायोत्थितः सँस्तन्निमित्तां गुणश्रेणिं करोति। एवं द्वितीयाद्यास्तिस्रो गुणश्रेणयो मिलिता भवन्ति। ताश्च कृत्वा तासां मस्तकेषु वर्तमानस्याप्रथमानां पञ्चानां संहननानां यथायोगमुदयप्राप्तानां-

मुत्कृष्टः प्रदेशोदयः । तथोत्तरतनावाहारकशरीरे वर्तमानस्याप्रमत्तसंयतस्य प्रथमगुणश्रेणिशिरसि वर्तमानस्याहारकसप्तकोद्योतयोरुत्कृष्टः प्रदेशोदयः । उक्तं चान्यत्र–"आहारुज्जोयाणं अपमत्तो आइगुणसीसे" ॥ १८ ॥

बेइंदियथावरगो कम्मं काऊण तस्समं खिप्पं । आयवस्स उ तव्वेइ पढमसमयम्मि वट्टंतो ॥ १८ ॥

व्याख्या—द्वीन्द्रियस्थावरो नाम यो गुणितकर्मांशः पञ्चेन्द्रियः सम्यग्दृष्टिः सन् सम्यक्त्वनिमित्तां गुणश्रेणिं कृत्वा तस्या गुणश्रेणीतः प्रतिपत्य मिथ्यात्वं गत्वा द्वीन्द्रियमध्ये समुत्पन्नः, तत्र च द्वीन्द्रियप्रायोग्यां स्थितिं मुक्त्वा शेषां सर्वामपवर्तितवान्, ततोऽपि मृत्वा एकेन्द्रियो जातः, तत्र च कर्मैकेन्द्रियसमस्थितिकं करोति, शीघ्रमेव च शरीरपर्याप्तिं निष्ठां नयति । तस्य तद्वेदिन आतपवेदिनः खरबादरपृथ्वीकायिकस्य शरीरपर्याप्त्यनन्तरं प्रथमे समये आतपनाम्न उत्कृष्टः प्रदेशोदयः । एकेन्द्रियो द्वीन्द्रियस्थितिं झटित्येव स्वयोग्यां करोति, न त्रीन्द्रियादिस्थितिमिति द्वीन्द्रियग्रहणम् ॥ १९ ॥

तदेवमुक्त उत्कृष्टप्रदेशोदयस्वामी । अथ जघन्यप्रदेशोदयस्वाम्यभिधीयते—

पगयं तु खवियकम्मे जहन्नसामी जहन्नदेवठिई । निन्नमुहुत्ते सेसे मिच्छत्तगउं अइकिलिट्ठो ॥२०॥

कालगए एगिंदिय पढमे समए य मइसुयावरणे । केवलदुगमणपज्जवचक्खुअचक्खू य आवरणे ॥२१॥

व्याख्या—जघन्यस्वामीत्ययं भावप्रधानो निर्देशः, प्रथमा च सप्तम्यर्थे, ततोऽयमर्थः—जघन्यप्रदेशोदयस्वामित्वे प्रकृतमधिकारः । क्षपितकर्मांश इत्यत्र सप्तम्यास्तृतीयार्थत्वात्क्षपितकर्मांशेन, तत्र कश्चित्क्षपितकर्मांशो देवो जघन्यस्थितिर्दशवर्षसहस्रायुष्क उत्पत्त्यनन्तरमन्तर्मुहूर्त्ते गते सति सम्यक्त्वं प्रतिपद्यते । तच्च सम्यक्त्वं देशोनानि दशवर्षसहस्राणि

यावत्परिपाट्यान्तर्मुहूर्त्तावशेषे जीविते सति मिथ्यात्वं गतः । स चातिसंक्लिष्टपरिणामो वक्ष्यमाणकर्मणामुत्कृष्टां स्थितिं बद्धुमारभते, बहुतरं च दलिकं तदानीमुद्वर्तयति तावद्यावदन्तर्मुहूर्त्तं । ततः संक्लिष्टपरिणाम एव कालं कृत्वैकेन्द्रियो जातः, तज्जन्मप्रथमसमये मतिज्ञानावरणश्रुतज्ञानावरणकेवलज्ञानावरणकेवलदर्शनावरणमनःपर्यायज्ञानावरणचक्षुर्दर्शनावरणाचक्षुर्दर्शनावरणानां जघन्यः प्रदेशोदयो भवति । इह प्रायः सर्वदलिकमुद्वर्तितमिति स्तोकं प्राप्यते प्रथमसमये । किं चोत्कृष्टसंक्लेशवतः प्रदेशोदीरणा स्तोका भवति, तस्यानुभागोदीरणाया एव बह्व्याः प्रवृत्तेः, अनुभागोदीरणायां च बह्व्यां प्रवर्तमानायां प्रदेशोदीरणायाः स्तोकाया एव प्रवृत्तिनियमात् । अनेनैवाशयेन मिथ्यात्वगतोऽतिक्लिष्ट इत्युक्तम् ॥२०–२१॥

उहीण संजमाउं देवत्तगए गयस्स मिछत्तं । उक्कस्सठिईबंधे विकड्ढणे आवलिगं गंतुं ॥ २२ ॥

व्याख्या—अवध्योरवधिज्ञानावरणावधिदर्शनावरणयोः संयममादिति संयमं प्रतिपद्य क्षपितकर्मांशस्य समुत्पन्नावधिज्ञानदर्शनस्याप्रतिपतिततद्भावस्यैव सतो देवत्वं गतस्य, तत्र चान्तर्मुहूर्त्ते गते सति मिथ्यात्वं प्रतिपन्नस्य, ततो मिथ्यात्वप्रत्ययेनोत्कृष्टे स्थितिबन्धे प्रवर्तमाने प्रभूतदलिकस्य विकर्षणायामुद्वर्तनायां सत्यामावलिकां गत्वा बन्धावलिकामतिक्रम्य स्तोकः प्रदेशोदयः, उक्तक्रमेण तदानीं स्तोकप्रदेशोदीरणोपनीतस्य तस्य स्तोकतरस्यैव लाभात् ॥ २२ ॥

वेयणियंतरसोगारउच्च उहि व णिद्दपयला य । उक्कस्सठिईबंधे पभिनग्गपवेइया णवरं ॥ २३ ॥

व्याख्या—वेदनीययोः सातासातयोरन्तराणां पञ्चानामन्तरायाणां शोकारत्युच्चैर्गोत्राणां च जघन्यः प्रदेशोदयोऽवधिज्ञानावरणस्येव वक्तव्यः । निद्राप्रचले अपीत्थमेव जघन्यप्रदेशोदयसंभवे वेदितव्ये, केवलमुत्कृष्टस्थितिबन्धात्प्रतिभग्नेन

प्रतिपतितेन सता प्रवेदितुमनुभवितुं लग्ने ते तथाभूते द्रष्टव्ये । उत्कृष्टस्थितिबन्धो ह्यतिशयितसंक्लेशवतो भवति । न चातिसंक्लेशे वर्तमानस्य निद्रोदयसंभव इत्युत्कृष्टस्थितिबन्धप्रतिभग्नप्रवेदिते इति विशेषणम् ॥ २३ ॥

वरिसवरतिरियथावरणीयं पि य मइसमं णवरि तिन्नि । णिद्दाणिद्दा इंदियपज्जत्ती पढमसमयम्मि ॥२४॥

व्याख्या—वर्षवरो नपुंसकवेदस्ततो नपुंसकवेदतिर्यग्गतिस्थावरनीचैर्गोत्राणां जघन्यः प्रदेशोदयो मतिज्ञानावरणस्येव ज्ञातव्यः । निद्रानिद्रादयोऽपि तिस्रः प्रकृतयो जघन्यप्रदेशोदयविचारे मतिज्ञानावरणवद्भावनीयाः । नवरमिन्द्रियपर्याप्त्या पर्याप्तस्य प्रथमसमय इति द्रष्टव्यं । द्वितीयादिसमयेषूदीरणायाः संभवाज्जघन्यप्रदेशोदयासंभव इति प्रथमसमयग्रहणम् २४

दंसणमोहे तिविहे उदीरणुदए उ आलिगं गंतुं । सत्तरसण्ह वि एवं उवसमइत्ता गए देवे ॥२५॥

व्याख्या—क्षपितकर्मांशस्यौपशमिकसम्यग्दृष्टेरौपशमिकसम्यक्त्वात्प्रतिपततोऽन्तरकरणे स्थितेन द्वितीयस्थितेः सकाशात्सम्यक्त्वादीनां दलिकानि समाकृष्य यान्यन्तरकरणे चरमे आवलिकाभागमात्रे गोपुच्छाकारसंस्थानेन प्रथमसमये प्रभूतानां द्वितीयादिसमयेषु च क्रमशो विशेषहीनविशेषहीनानां निवेशलक्षणेन रचितानि, तेषामुदय उदीरणोदय इत्युच्यते, तस्मिन्नुदीरणोदये आवलिकामात्रं गत्वाऽऽवलिकायाश्चरमसमये सम्यक्त्वमिश्रमिथ्यात्वानां स्वस्वोदययुक्तस्य जघन्यः प्रदेशोदयः । तथाऽनन्तानुबन्धिवर्जद्वादशकषायपुरुषवेदहास्यरतिभयजुगुप्सारूपाः सप्तदश प्रकृतीरुपशमय्य देवलोकं गतस्य तासां सप्तदशप्रकृतीनामेवमेवोदीरणोदयचरमसमये जघन्यः प्रदेशोदयः । आसां हि सप्तदशानामपि प्रकृतीनामन्तरकरणं कृत्वा देवलोकं गतः सन् प्रथमसमय एव द्वितीयस्थितेः सकाशाद्दलिकमाकृष्योदयसमयादारभ्य गोपुच्छाकारेण

विरचयति । तद्यथा–प्रथमसमये प्रभूतं, द्वितीयसमये विशेषहीनं, तृतीयसमये विशेषहीनं, एवं यावदावलिकाचरमसमये विशेषहीनं । एवं दलिकरचनायां कृतायामावलिकायाश्चरमसमये जघन्यः प्रदेशोदयो लभ्यते । उपशान्तकषाय उपशमको वा कालगतः सन् सर्वार्थसिद्धे महाविमाने यातीति भगवत्यादौ सिद्धं। तत्र च नपुंसकवेदस्त्रीवेदशोकमोहनीयानन्तानुबन्ध्यरतिमोहनीयप्रकृतीनामुदयो नास्तीति तत्प्रतिषेधः कृतः ॥ २५ ॥

चउरुवसमित्तु पच्छा संजोइय दीहकालसम्मत्ता । मिच्छत्तगए आवलिआए संजोअणाणं तु ॥ २६ ॥

व्याख्या–चतुरो वारान् मोहनीयमुपशमय्य पश्चादन्तर्मुहूर्त्ते गते सति मिथ्यात्वं गतः सन् मिथ्यात्वप्रत्ययेन संयोजयत्यनन्तानुबन्धिनो बध्नाति, तान् बद्ध्वा परिणामपरावृत्त्या सम्यक्त्वं गतः, तच्च दीर्घकालं द्वात्रिंशं सागरोपमशतं यावदनुपालयति, सम्यक्त्वप्रभावतश्च तावता कालेन प्रभूताननन्तानुबन्धिनां सम्बन्धिनः पुद्गलान् प्रदेशसङ्क्रमद्वारेण परिशाटयति । ततः पुनरपि मिथ्यात्वं गत्वा मिथ्यात्वप्रत्ययेन भूयोऽप्यनन्तानुबन्धिनो बध्नाति, तस्यावलिकाया बन्धावलिकायाश्चरमसमये पूर्वबद्धानामनन्तानुबन्धिनां जघन्यः प्रदेशोदयः । आवलिकाया अनन्तरसमये हि प्रथमसमयबद्धस्य दलिकस्योदीरणानिष्पन्न उदयो भवति, ततो जघन्यः प्रदेशोदयो न लभ्यत इत्यावलिकायाश्चरमसमय इत्युक्तं । संसारे चैकजीवस्य चतुर्वारमेव मोहोपशमो भवति, न पञ्चवारमिति चतुर्वारग्रहणं । मोहोपशमग्रहणस्य किं प्रयोजनमिति चेदुच्यते–इह मोहोपशमं कुर्वन्नप्रत्याख्यानादिकषायाणां दलिकमन्यत्र गुणसङ्क्रमेण प्रभूतं संक्रमयति, ततोऽन्यत्र सङ्क्रमद्वारा क्षीणशेषाणां तेषामनन्तानुबन्धिषु बन्धकाले स्तोकमेव दलिकं सङ्क्रामतीति मोहोपशमग्रहणम् ॥२६॥

इत्थीए संजमभवे सवणिरुद्धम्मि गंतु मिच्छत्तं । देवीए लहुमिच्छी जेट्ठठिई आलिगं गंतुं ॥ २७ ॥

व्याख्या—संयमेनोपलक्षितो भवः संयमभवः तस्मिन् सर्वनिरुद्धेऽन्तर्मुहूर्त्तावशेषे सति स्त्रिया मिथ्यात्वं गतायास्ततोऽनन्तरभवे देवीभूताया "लहुं ति" शीघ्रमेव पर्याप्ताया ज्येष्ठस्थितिबन्धानन्तरमावलिकां गत्वाऽऽवलिकायाश्चरमसमये स्त्रीवेदस्य जघन्यः प्रदेशोदयः । इयमिह भावना—क्षपितकर्मांशा काचिद्देशोनां पूर्वकोटिं संयममनुपाल्यान्तर्मुहूर्त्ते शेषे जीविते मिथ्यात्वं गत्वाऽनन्तरभवे देवी समुत्पन्ना, शीघ्रमेव च पर्याप्ता, ततः उत्कृष्टसंक्लेशे वर्तमाना स्त्रीवेदस्योत्कृष्टां स्थितिं बध्नाति, पूर्वबद्धां चोद्वर्त्तयति, उत्कृष्टस्थितिबन्धात्परत आवलिकायाश्चरमसमये तस्याः ततः स्त्रीवेदस्य जघन्यः प्रदेशोदयो भवति, तदैवोद्वर्त्तनादिविरहीकृतत्वादनन्तरसमयभाव्युदीरणाद्यभावाच्च स्तोकप्रदेशप्राप्तेः ॥ २७ ॥

अप्पद्धाजोगचियाणाऊणुक्कस्सगठिईणंते । उवरिं थोवणिसेगे चिरतिव्वासायवेईणं ॥ २८ ॥

व्याख्या—अल्पया बन्धाद्धयाऽल्पेन च योगेन चितानां बद्धानां चतुर्णामप्यायुषां ज्येष्ठस्थितीनामन्तेऽन्तिमे उपरि सर्वोपरितने समये सर्वस्तोकदलिकनिक्षेपे चिरकालं तीव्रासातवेदनाऽनुभूतानां क्षपितकर्मांशानां तत्तदायुर्वेदिनां जघन्यः प्रदेशोदयः। तीव्रासातवेदनाऽनुभवेन हि प्रभूता आयुःपुद्गलाः परिशटन्तीत्यनुसंधाय तीव्रासातवेदिनामिति विशेषणं कृतम् ॥२८॥

संजोअणा विजोइय देवभवजहन्नगे अइणिरुद्धे । बंधिय उक्कस्सठिई गंतूणेगिंदिया सन्नी ॥ २९ ॥

सवलहुं णरयगए निरयगई तम्मि सवपज्जत्ते । अणुपुव्वीउं गइतुल्लाउं णेया भवादिम्मि ॥ ३० ॥

व्याख्या—संयोजनाननन्तानुबन्धिनो विसंयोज्य तद्विसंयोजने शेषाणामपि कर्मणां भूयः पुद्गलपरिशाटो भवतीति

तदुपादानं । तत्र चातिनिरुद्धे पश्चिमेऽन्तर्मुहूर्त्ते प्रतिपन्नमिथ्यात्व एकेन्द्रियप्रायोग्याणां प्रकृतीनामुत्कृष्टां स्थितिं बद्ध्वा सर्वसंक्लिष्ट एकेन्द्रियेषु मध्ये समुत्पन्नः । तत्र चान्तर्मुहूर्त्तं स्थित्वाऽसंज्ञिषु मध्ये समागतः । देवो हि मृत्वाऽऽनन्तर्येण नासंज्ञिषु गच्छतीत्यन्तरेकेन्द्रियभवग्रहणं । ततोऽसंज्ञिभवात् शेषासंज्ञिसर्वजीवापेक्षया लघु शीघ्रं मृत्वा नारको जातः, सर्वपर्याप्तिभिश्च शीघ्रं पर्याप्तस्तस्मिन् सर्वपर्याप्तिपर्याप्ते नारके नरकगतेर्जघन्यः प्रदेशोदयः, पर्याप्तस्य प्रभूताः प्रकृतयो विपाकोदयमायान्ति, उदयप्राप्ताश्च स्तिबुकसङ्क्रमेण न संक्रामन्ति । एवं च प्रकृत्यन्तरदलिकसङ्क्रमाभावाज्जघन्यः प्रदेशोदयः प्राप्यत इति सर्वपर्याप्तिपर्याप्तत्वग्रहणं । आनुपूर्व्यश्चतस्रोऽपि गतितुल्याः स्वस्वगतिसमानवक्तव्यता ज्ञेयाः, केवलं भवादौ भवप्रथमसमये, तृतीये हि समये प्रथमद्वितीयसमयनिष्ठितबन्धावलिका अन्या अपि कर्मलता उदयमायान्तीति भवप्रथमसमयग्रहणम् ॥ २९–३० ॥

देवगई उहिसमा णवरि उज्जोयवेयगो ताहे । आहारिजाय अइचिरसंजममणुपालिऊणंते ॥ ३१ ॥

व्याख्या—देवगतिरवधिसमाऽवधिज्ञानावरणस्येव देवगतेरपि जघन्यः प्रदेशोदयो भावनीय इत्यर्थः । नवरं यदोद्योतवेदको भवति "ताहे" तदा देवगतेर्जघन्यः प्रदेशोदयो वाच्यः । कोऽत्र हेतुरिति चेदुच्यते—यावदुद्योतनाम नोदयमाऽऽस्कन्दति तावत्तद्देवगतौ स्तिबुकसङ्क्रमेण संक्रम्यते । ततः सङ्क्रमोपनीततद्दलिकानुप्रवेशात्तस्या जघन्यः प्रदेशोदयो नावाप्यते । उदयप्राप्तस्य तूद्योतनाम्नः स्तिबुकसङ्क्रमो न भवतीत्युद्योतवेदकग्रहणं । उद्योतवेदकत्वं च पर्याप्तस्य भवति, नापर्याप्तस्येति पर्याप्तावस्थायां देवगतेर्जघन्यः प्रदेशोदय इति स्मर्त्तव्यं । तथा यश्चिरकालं देशोनपूर्वकोटिरूपं यावत्संयममनु-

पाल्यान्तेऽन्तिमकाले आहारकशरीरी जात उद्योतं च वेदयते स्म, तस्याहारकसप्तकस्य जघन्यः प्रदेशोदयः । चिरकालसंयमानुपालने हि भूयांसः कर्मपुञ्जाः परिशटन्तीति चिरकालसंयमग्रहणं, उद्योतग्रहणे च हेतुः प्रागभिहित एवानुसर्तव्यः ॥ ३१ ॥

सेसाणं चक्खुसमं तम्मि व अन्नम्मि वा भवे अचिरा । तज्जोगा बहुगीउं पवेययं तस्स ता ताउं ॥ ३२ ॥

व्याख्या—उक्तशेषाणां प्रकृतीनां चक्षुःसमं चक्षुर्दर्शनावरणसमं वाच्यं तावद्यावदेकेन्द्रियो जातः, ततो येषां कर्मणां तस्मिन्नेवैकेन्द्रियभवे उदयोऽस्ति तेषां तत्रैव भवेऽचिरादुदये जघन्यः प्रदेशोदयो वाच्यः । येषां तु कर्मणां मनुजगतिद्वीन्द्रियादिजातिचतुष्टयप्रथमसंस्थानपञ्चकौदारिकाङ्गोपाङ्गसंहननषट्कविहायोगतिद्विकत्रससुभगसुस्वरदुःस्वरादेयरूपाणां तत्रोदयासंभवस्तेषामेकेन्द्रियभवादुद्धृत्य तत्तदुदययोग्येषु भवेषूत्पन्नस्य तत्तद्भवयोग्यास्तास्ता बह्वीः प्रकृतीर्वेदयमानस्य सर्वपर्याप्तिभिः पर्याप्तस्य जघन्यः प्रदेशोदयः, तत्तद्भवयोग्यबहुप्रकृतिवेदनं हि पर्याप्तस्योपपद्यते । उदयप्राप्तानां च बह्वीनां प्रकृतीनां स्तिबुकसङ्क्रमो न भवति । तथा च सति विवक्षितप्रकृतीनां जघन्यः प्रदेशोदयः संभवतीत्यभिसंधाय सामर्थ्यात् पर्याप्तस्येति विवृतं । तीर्थकरनाम्नस्तु क्षपितकर्मांशस्योदयप्रथमसमये जघन्यः प्रदेशोदयो ज्ञेयः, परतो गुणश्रेणीदलिकस्य प्रभूतस्यावाप्तेस्तदसंभव इति ॥ ३२ ॥

॥ इति कर्मप्रकृतिटीकायामुदयाधिकारः ॥

तदेवमभिहित उदयः। अथ सत्ताऽभिधेया, तत्र चेमेऽर्थाधिकाराः—भेदः, साद्यनादिप्ररूपणा, स्वामित्वं चेति। तत्र भेदनिरूपणं तावदाह—

मूलुत्तरपगइगयं चउविहं संतकम्ममवि णेयं। धुवअद्धुवणाईयं अट्ठएहं मूलपगईणं ॥ १ ॥

व्याख्या—मूलप्रकृतिगतमुत्तरप्रकृतिगतं चेति सत्कर्म द्विविधं। तत्र मूलप्रकृतिगतमष्टप्रकारमुत्तरप्रकृतिगतं चाष्टपञ्चाशदधिकशतप्रकारं। पुनरेकैकं चतुर्विधं—प्रकृतिसत्कर्म, स्थितिसत्कर्म, अनुभागसत्कर्म, प्रदेशसत्कर्म चेति ज्ञेयं। अथ साद्यनादिप्ररूपणां कुर्वन् मूलप्रकृतिविषयां तामाह—धुवेत्यादि, अष्टानां मूलप्रकृतीनां सत्कर्म त्रिधा—ध्रुवमध्रुवमनादि चेति। तत्रानादित्वं सदैव भावात्। ध्रुवाध्रुवताऽभव्याभव्यापेक्षया ॥ १ ॥

सम्प्रत्युत्तरप्रकृतीनां साद्यनादिप्ररूपणामाह—

दिट्ठिदुगाउगवग्गइ तणुचोद्दसगं च तित्थगरमुच्चं। दुविहं पढम कसाया होंति चउद्धा तिहा सेसा॥ २॥

व्याख्या—दृष्टिद्विकं सम्यक्त्वसम्यङ्मिथ्यात्वरूपं, आयूंषि चत्वार्यपि, "वग्गइ त्ति" मनुष्यद्विकं देवद्विकं नरकद्विकं च, तनुचतुर्दशकं वैक्रियसप्तकाहारकसप्तके, तीर्थकरनाम, उच्चैर्गोत्रं च, एता अष्टाविंशतिप्रकृतयः सत्कर्म प्रतीत्य द्विविधाः—सादयोऽध्रुवाश्चेति। साद्यध्रुवभावश्चासामध्रुवसत्कर्मत्वादेवावसेयः। तथा प्रथमकषाया अनन्तानुबन्धिनः सत्कर्मापेक्षया चतुर्विधाः साद्यनादिध्रुवाध्रुवभेदात्। तथाहि—सम्यग्दृष्टिना सता प्रथमत उद्वलिताः सन्तस्ते यदा मिथ्यात्वप्रत्ययतो भूयोऽपि बध्यन्ते तदा सादयः, तत्स्थानमप्राप्तस्यानादयः, ध्रुवाध्रुवता प्राग्वत्। तथा शेषाः षड्विंशतिशतसङ्ख्याः

प्रकृतयः सत्कर्मापेक्षया त्रिधा—अनादिध्रुवाध्रुवभेदात् । तत्रानादित्वं ध्रुवसत्कर्मत्वात् । ध्रुवाध्रुवता प्राग्वत् ॥ २ ॥

तदेवं कृता साद्यनादिप्ररूपणा, सम्प्रति स्वामित्वं वाच्यं, तच्च द्विधा—एकैकप्रकृतिगतं प्रकृतिस्थानगतं च । तत्रैकैकप्रकृतिगतं स्वामित्वं प्रतिपिपादयिषुराह—

उवसमत्थंता चोद्दस दुचरिमसमयं ति अत्थि दो णिद्दा। बद्धाणि ताव आऊणि वेइयाइं ति जा कसिणं ३

व्याख्या—चतुर्दश प्रकृतयो ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयरूपाः उपशमस्थान्ताः क्षीणकषायवीतराग-उपशमस्थगुणस्थानकं यावत्सत्यो भवन्तीत्यर्थः, परतस्तासामभावः, एवमुत्तरत्रापि यासां सत्ता यद्गुणस्थानपर्यन्ता वक्ष्यते ततः परतस्तदभावोऽवधारणीयः । तथा द्वे निद्रे क्षीणकषायवीतरागोपशमस्थगुणस्थानकद्विचरमसमयं यावत्सत्यौ स्तः । आयूंषि चत्वार्यपि बद्धानि तावत्सन्ति यावत्कृत्स्नं निरवशेषं वेदितानि सन्ति स्वस्वभवपर्यन्तमनुभूयमानानि भवन्तीत्यर्थः ३॥

तिसु मिस्सत्तं णियमा अट्ठसु ठाणेसु होइ भइयव्वं। आसाणे सम्मत्तं णियमा भज्जं दससु होइ ॥ ४ ॥

व्याख्या—त्रिषु गुणस्थानकेषु मिथ्यादृष्टिसासादनसम्यग्मिथ्यादृष्टिलक्षणेषु नियमादवश्यंभावेन मिथ्यात्वं सत् विद्यमानं । शेषेषु पुनरष्टसु गुणस्थानकेषूपशान्तमोहपर्यवसानेषु भाज्यं विकल्पनीयं कदाचित्सत्तायां भवति कदाचिन्नेत्यर्थः । तथाहि—अविरतसम्यग्दृष्ट्यादिना क्षपिते नास्ति, उपशमिते त्वस्ति । क्षीणमोहादिषु पुनस्तस्यावश्यमभावः । तथा "आसाणे त्ति" सासादने सम्यक्त्वं सम्यक्त्वमोहनीयं नियमादस्ति, यत औपशमिकसम्यक्त्वाद्धायां जघन्यतः समयमात्रशेषायामुत्कर्षतः षडावलिकाशेषायां सासादनो लभ्यते । तत्र च नियमादष्टाविंशतिसत्कर्मैवासौ भवतीति भावः । दशसु पुनर्गु-

णस्थानकेषु मिथ्यादृष्ट्याद्युपशान्तमोहान्तेषु भाज्यं भवति, कदाचिद्भवति कदाचिन्न भवतीत्यर्थः । तथाहि—मिथ्यादृष्टौ जीवेऽनादिषड्विंशतिसत्कर्मण्युद्वलितसम्यक्त्वपुञ्जे मिश्रेऽपि सम्यक्त्वपुञ्जोद्वलनानन्तरं कियत्कालमवतिष्ठमानमिश्रभावेऽविरतादौ चोपशान्तमोहान्ते क्षीणसप्तके सम्यक्त्वमोहनीयं सत्तायां न प्राप्यतेऽन्यादृशे च प्राप्यत इति ॥ ४ ॥

बिइयतइएसु मीसं णियमा गाणणवगम्मि भयणिज्जं । संजोअणा उ णियमा दुसु पंचसु होइ भइयव्वं५॥

व्याख्या—द्वितीये तृतीये च गुणस्थाने मिश्रं सम्यग्मिथ्यात्वं नियमादस्ति, यतः सासादनो नियमादष्टाविंशतिसत्कर्मैव भवति, मिश्रस्त्वष्टाविंशतिसत्कर्मा विसंयोजितसम्यक्त्वः सप्तविंशतिसत्कर्मोद्वलितानन्तानुबन्धिचतुष्कश्चतुर्विंशतिसत्कर्मा वा भवतीत्येतेषु च सत्तास्थानेषु मिश्रसत्ताऽवश्यं लभ्यते । षड्विंशतिसत्कर्मा तु मिश्रो न संभवत्येव, मिश्रपुञ्जस्य सत्तोदयाभ्यां विना मिश्रगुणस्थानाप्राप्तेः । स्थाननवके गुणस्थाननवके मिथ्यादृष्ट्यविरतसम्यग्दृष्ट्यादावुपशान्तमोहान्ते भजनीयं मिश्रं (विकल्पनीयं) । यो मिथ्यादृष्टिः षड्विंशतिसत्कर्मा ये चाविरतसम्यग्दृष्ट्यादय उपशान्तमोहान्ताः क्षायिकसम्यग्दृष्टयस्तेषु मिश्रं सत्तायां न प्राप्यतेऽन्यत्र च प्राप्यत इत्यर्थः । तथा संयोजना अनन्तानुबन्धिनो द्वयोर्मिथ्यादृष्टिसासादनयोर्नियमाद्भवन्ति, यत एताववश्यमनन्तानुबन्धिनो बध्नतः, पञ्चसु पुनर्गुणस्थानेषु सम्यग्मिथ्यादृष्ट्यादिष्वप्रमत्तसंयतपर्यन्तेषु भजनीया विसंयोजितानन्तानुबन्धिनश्चतुर्विंशतिसत्कर्मणः सम्यग्मिथ्यादृष्टेः क्षीणसप्तकतयैकविंशतिसत्कर्मणोऽनन्तानुबन्धिराहित्येन चतुर्विंशतिसत्कर्मणो वाऽविरतसम्यग्दृष्ट्यादेरनन्तानुबन्धिनः सत्तायां न सन्ति, तदितरस्य तु सन्तीति । अत्र गुणस्थानपञ्चक एवानन्तानुबन्धिनां भजनीयत्वं । यदुक्तं—"तद्विसंयोजितानन्तानुबन्धिकषाय एवोपश-

मश्रेणिमपि प्रतिपद्यत" इति स्वमतान्निप्रायेण । कर्मग्रन्थान्तरे तु "आइठुगे अण नियमा नइया मीसाइणवगम्मि" इत्युक्तमिति ध्येयम् ॥ ५ ॥

खवगाणियट्टिअद्धा संखेज्जाहिंति अठ वि कसाया। णिरयतिरियतेरसगं णिद्दाणिद्दातिगेणुवरिं ॥६॥

व्याख्या—क्षपितस्यानिवृत्तिबादरसम्परायाद्धाया यावत्सङ्ख्येया भागास्तावदष्टावपि कषाया अप्रत्याख्यानप्रत्याख्यानावरणसंज्ञाः सन्ति, परतो न विद्यन्ते, क्षीणत्वात् । उपशमश्रेणिमधिकृत्य पुनरुपशान्तमोहगुणस्थानं यावत्सन्तो वेदितव्याः । तथा निरयतिर्यगेकान्तप्रायोग्यं यन्नामत्रयोदशकं नरकद्विकतिर्यग्द्विकैकद्वित्रिचतुरिन्द्रियजातिस्थावरातपोद्योतसूक्ष्मसाधारणरूपं निद्रानिद्रात्रिकेण संयुक्तं कषायाष्टकक्षयादुपरि सङ्ख्येयेषु स्थितिखण्डेषु गतेषु सत्सु युगपत्क्षयमुपयाति, ततो यावन्न क्षयमेति तावत्सत्, क्षये च सत्यसत्, उपशमश्रेण्यां त्वेताः षोडशापि प्रकृतय उपशान्तमोहगुणस्थानं यावत्सत्यो ज्ञेयाः ॥ ६ ॥

अपुमित्थीय समं वा हासछक्कं च पुरिससंजलणा । पत्तेगं तस्स कमा तणुरागंतो त्ति लोभो य ॥ ७॥

व्याख्या—प्रागुक्तप्रकृतिषोडशकक्षयानन्तरं सङ्ख्येयेषु स्थितिखण्डेषु गतेषु नपुंसकवेदः क्षीयते, यावच्च न क्षीयते तावत्सन् । ततः पुनरपि स्थितिखण्डेषु सङ्ख्येयेषु गतेषु स्त्रीवेदः क्षीयते, सोऽपि यावन्न क्षयं याति तावत्सन् । एवं स्त्रीवेदेन पुरुषवेदेन वा क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यं, नपुंसकवेदेन प्रतिपन्नस्य तु स्त्रीवेदनपुंसकवेदौ युगपत्क्षयमुपगच्छतः, यावच्च न क्षयमुपगच्छतस्तावत्सन्तौ, उपशमश्रेणिमधिकृत्य तूपशान्तमोहगुणस्थानकं यावत्सन्तौ । ततः स्त्रीवेदक्षयानन्तरं सङ्ख्ये-

येषु स्थितिखण्डेषु गतेषु हास्यादिषट्कं युगपत्क्षीयते । ततः समयोनावलिकाद्विकातिक्रमे पुरुषवेदः । एवं पुरुषवेदेन क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यं । स्त्रीवेदेन नपुंसकवेदेन वा क्षपकश्रेणिं प्रतिपन्नस्य तु पुरुषवेदो हास्यादिषट्कं च युगपत्क्षीयते । ततः पुरुषवेदक्षयानन्तरं सङ्ख्येयेषु स्थितिखण्डेषु गतेषु संज्वलनक्रोधः क्षीयते । ततो भूयोऽपि सङ्ख्येयेषु स्थितिखण्डेषु गतेषु संज्वलनमानः । ततोऽपि सङ्ख्येयेषु स्थितिखण्डेषु गतेषु संज्वलनी माया । यावच्च हास्यादिप्रकृतयो न क्षीयन्ते तावत्सत्यः । तनुरागान्त इति लोभश्चेत्यत्रेतिर्यावदर्थः, ततोऽयमर्थः—यावत्तनुरागस्य सूक्ष्मसम्परायगुणस्थानकस्यान्तस्तावल्लोभश्च संज्वलनलोभश्च सन् ज्ञातव्यः, परतोऽसन्, उपशमश्रेणिमधिकृत्य तु हास्यादिप्रकृतयः सर्वा अप्युपशान्तमोहगुणस्थानं यावत्सत्यो वेदितव्याः ॥ ७ ॥

मणुयगइजाइतसबायरं च पज्जत्तसुभगमाइज्जं । जसकित्ती तित्थयरं वेयणिउच्चं च मणुआऊ ॥ ८ ॥
भवचरिमस्समयम्मि य तम्मग्गिल्लसमयम्मि सेसाउ । आहारगतित्थयरा भज्जा दुसु नत्थि तित्थयरं ॥९॥

व्याख्या—मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तितीर्थकरान्यतरवेदनीयोच्चैर्गोत्रमनुष्यायूरूपा द्वादश प्रकृतयो भवचरमसमये सन्ति अयोगिकेवलिचरमसमयं यावद्विद्यन्ते परतोऽसत्य इत्यर्थः । शेषाः पुनरुक्तव्यतिरिक्ता अन्यतरवेदनीयदेवद्विकौदारिकसप्तकवैक्रियसप्तकाहारकसप्तकतैजसकार्मणसप्तकप्रत्येकसंहननषट्कसंस्थानषट्कवर्णादिविंशतिविहायोगतिद्विकागुरुलघुपराघातोपघातोच्छ्वासस्थिरास्थिरशुभाशुभदुर्भगसुस्वरदुःस्वरायशःकीर्तिमनुष्यानुपूर्वीनिर्माणानादेयापर्याप्तकनीचैर्गोत्ररूपास्त्र्यशीतिसङ्ख्याः "तम्मग्गिल्लसमयम्मि त्ति" भवचरमपाश्चात्यसमयेऽयोगिकेवलिचिर-

मसमये सत्यो भवन्तीत्यर्थः, चरमसमये त्वसत्यः । आहारकतीर्थकरनामनी सर्वेष्वपि स्वाधारत्वेन संभविषु गुणस्थानेषु भाज्ये । द्वयोः पुनर्गुणस्थानयोः सासादनसम्यग्मिथ्यादृष्टिरूपयोस्तीर्थकरनाम नियमान्न विद्यते, तीर्थकरनामसत्कर्मणः स्वभावत एवोक्तगुणस्थानद्वये गमनासंभवात् तत इत्थमनयोर्भजना भावनीया । योऽप्रमत्तसंयतादिः संयमप्रत्ययादाहारकसप्तकबन्धं विधाय विशुद्धिवशादुपरितनगुणस्थानेषु समारोहति । यश्च तद्बन्धानन्तरमुपरितनगुणस्थानेभ्योऽविशुद्धाध्यवसायेनाधः पतति तस्याहारकसप्तकं सर्वगुणस्थानेषु सत्तायां प्राप्यते । यस्त्वाहारकसप्तकं न बध्नात्येव, तद्बन्धं विनैव चोपरितनानि गुणस्थानान्यध्यारोहति तस्य तत्तेषु सत्तायां नावाप्यते । तथा यः कश्चिदविरतसम्यग्दृष्ट्यादिरपूर्वकरणभागषट्कं यावत्सम्यक्त्वप्रत्ययात्तीर्थकरनामबन्धो(बध्नो)परितनगुणस्थानकान्यधिरोहति। कश्चिच्च बद्धतीर्थकरनामाऽविशुद्धिवशान्मिथ्यात्वमपि गच्छति तदा सासादनमिश्ररहितेषु द्वादशसु गुणस्थानकेषु तीर्थकरनाम सत्तायां प्राप्यते । यस्तु विशुद्धसम्यक्त्वे सत्यपि तन्न बध्नाति तस्य सर्वगुणस्थानकेषु तत्सत्ता न लभ्यते, यदनयोः स्वहेतुसद्भावेऽपि बन्धाप्रौव्यान्नावश्यं सत्तासंभव इति । तथा तीर्थकराहारकद्वयस्य मिथो मिलितस्य सत्ता मिथ्यादृष्टौ नावाप्यते । उक्तं च—"उभए संति न मिच्छो" । केवलतीर्थकरनामसत्ताकोऽपि मिथ्यादृष्टिरन्तर्मुहूर्त्तमात्रं कालं नवेन्नाधिकं । उक्तं च—"तित्थगरे अंतरमुहुत्तं" । इदमुक्तं भवति —यो नरके बद्धायुष्को वेदकसम्यग्दृष्टिर्बद्धतीर्थकरनामा सँस्तत्रोत्पित्सुरवश्यं सम्यक्त्वं परित्यज्य तत्रोत्पद्यते, उत्पत्तिसमयानन्तरमन्तर्मुहूर्त्तादूर्ध्वमवश्यं सम्यक्त्वं प्रतिपद्यते, तस्यायमुक्तप्रमाणः कालो लभ्यत इति द्रष्टव्यम् ॥ ८-ए ॥

तदेवमुक्तमेकैकप्रकृतिसत्कर्म, सम्प्रति प्रकृतिस्थानसत्कर्मप्ररूपणार्थमाह—

पढमचरिमाणमेगं छन्नवचत्तारि बीयगे तिन्नि । वेयणियाउअगोएसु दोन्नि एगं तु दो हुंति ॥ १० ॥

व्याख्या—प्रथमचरमयोर्ज्ञानावरणान्तराययोरेकैकं पञ्चप्रकृत्यात्मकं स्थानं, तच्च क्षीणकषायचरमसमयं यावत्सत्, परतोऽसत् । तथा द्वितीये दर्शनावरणीये त्रीणि प्रकृतिस्थानानि, तद्यथा—षट् नव चतस्रः । तत्र समुदिताः सर्वा दर्शनावरणप्रकृतयो नव, ताश्चोपशमश्रेण्यामुपशान्तमोहं यावत्सत्यः, क्षपकश्रेण्यां त्वनिवृत्तिबादरसम्परायाद्या यावत्सङ्ख्येया भागास्तावत्सत्यः, परतः स्त्यानर्द्धित्रिकक्षये षड्भवन्ति, ताश्च तावत्सत्यो यावत्क्षीणकषायस्य द्विचरमसमयः, तस्मिन् द्विचरमसमये निद्राप्रचलयोर्व्यवच्छेदः, ततश्चरमसमये चतस्र एव सत्यस्ता अपि तत्र व्यवच्छिद्यन्ते । तथा वेदनीयायुर्गोत्राणां द्वे द्वे प्रकृतिस्थाने, तद्यथा—द्वे एका च । तत्र वेदनीयस्य यावदेका प्रकृतिर्न क्षीणा तावद्द्वे सत्यौ, एकस्यां तु क्षीणायामेका सती । गोत्रस्य यावदेकं न क्षीणमुद्वलितं वा तावद्द्वे सत्यौ । नीचैर्गोत्रे क्षीणे उच्चैर्गोत्रे वोद्वलिते पुनरेका सती । आयुषस्तु यावद्भुज्यमायुर्नोदेति तावद्द्वे प्रकृती सत्यौ, उदिते तु तस्मिन् प्राक्तनं क्षीणमित्येका सती ॥ १० ॥

अथ मोहनीयस्य प्रकृतिसत्कर्मस्थानप्रतिपादनायाह—

एगाइ जाव पंचगमेक्कारस बार तेरसिगवीसा । बिय तिय चउरो उस्सत्त अट्ठवीसा य मोहस्स ॥११॥

व्याख्या—मोहनीयस्य पञ्चदश प्रकृतिसत्कर्मस्थानानि । तथाहि—एकाद्याः पञ्च एका द्वे तिस्रश्चतस्रः पञ्च चेत्यर्थः, तथैकादश द्वादश त्रयोदशैकविंशतिर्द्वाविंशतिस्त्रयोविंशतिश्चतुर्विंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिश्चेति । एतानि सुखाव-

बोधाय गाथाक्रममुत्सृज्य भाव्यन्ते—तत्र मोहनीयस्य सर्वप्रकृतिसमुदायोऽष्टाविंशतिः । सम्यक्त्वे उद्वलिते सप्तविंशतिः । ततोऽपि सम्यग्मिथ्यात्वे उद्वलिते षड्विंशतिः, यदाऽनादिमिथ्यादृष्टेः षड्विंशतिः । अष्टाविंशतेरनन्तानुबन्धिचतुष्टये क्षीणे चतुर्विंशतिः । ततो मिथ्यात्वे क्षीणे त्रयोविंशतिः । ततः सम्यङ्मिथ्यात्वे क्षीणे द्वाविंशतिः । ततः सम्यक्त्वे क्षीणे एकविंशतिः । ततोऽष्टसु कषायेषु क्षीणेषु त्रयोदश । ततो नपुंसकवेदे क्षीणे द्वादश । ततः स्त्रीवेदे क्षीणे एकादश । ततः षट्सु नोकषायेषु क्षीणेषु पञ्च । ततः पुरुषवेदे क्षीणे चतस्रः । ततः संज्वलनक्रोधे क्षीणे तिस्रः । ततः संज्वलने माने क्षीणे द्वे । ततः संज्वलन्यां मायायां क्षीणायामेका ॥ ११ ॥

एतान्येव प्रकृतिसत्कर्मस्थानानि गुणस्थानेषु चिन्तयन्नाह—

तिन्नेग तिगं पणगं पणगं पणगं च पणगमिह दोन्नि । दस तिन्नि दोन्नि मिच्छाइगेसु जावोवसंतो त्ति ॥१२॥

व्याख्या—यावदुपशान्तमोहगुणस्थानकं तावन्मिथ्यादृष्ट्यादिषु गुणस्थानेषु क्रमेण त्र्यादीनि प्रकृतिसत्कर्मस्थानानि भवन्ति । तत्र मिथ्यादृष्टिगुणस्थाने त्रीणि प्रकृतिसत्कर्मस्थानानि अष्टाविंशतिः सप्तविंशतिः षड्विंशतिश्चेति । एतानि च प्रागेव भावितानि । सासादनगुणस्थाने एकं प्रकृतिसत्कर्मस्थानमष्टाविंशतिरूपं । सम्यङ्मिथ्यादृष्टिगुणस्थाने त्रीणि प्रकृतिसत्कर्मस्थानानि अष्टाविंशतिः सप्तविंशतिश्चतुर्विंशतिश्चेति । तत्र योऽष्टाविंशतिसत्कर्मा सन् सम्यङ्मिथ्यात्वं गतस्तमाश्रित्याष्टाविंशतिः । यस्तु मिथ्यादृष्टिः सन् सम्यक्त्वोद्वलनं कृत्वा सप्तविंशतिसत्कर्मा सन् सम्यङ्मिथ्यात्वमनुभवितुं लग्नस्तमाश्रित्य सप्तविंशतिः । विसंयोजितानन्तानुबन्धिनः सतश्चतुर्विंशतिसत्कर्मणः सम्यङ्मिथ्यादृष्टित्वावस्थामपेक्ष्य पुनश्चतु-

विंशतिः प्राप्यते । तथाऽविरतसम्यग्दृष्टिगुणस्थानके पञ्च प्रकृतिसत्कर्मस्थानानि, तद्यथा–अष्टाविंशतिश्चतुर्विंशतिस्त्रयोविंशतिर्द्वाविंशतिरेकविंशतिश्चेति । तत्राष्टाविंशतिरौपशमिकसम्यग्दृष्टेः क्षायोपशमिकसम्यग्दृष्टेर्वा । अष्टाविंशतिसत्कर्मणः अनन्तानुबन्धिक्षये द्विविधस्यापि तस्य चतुर्विंशतिः । वेदकसम्यग्दृष्टेर्मिथ्यात्वे क्षपिते त्रयोविंशतिः । तस्यैव सम्यङ्मिथ्यात्वे क्षपिते द्वाविंशतिः । क्षायिकसम्यग्दृष्टेरेकविंशतिरिति । तथा देशविरतिगुणस्थाने पञ्च प्रकृतिसत्कर्मस्थानानि । तानि चानुपदमभिहितान्येव । एतान्येव पञ्च षष्ठे सप्तमे च गुणस्थाने । अथानन्तरमपूर्वकरणगुणस्थानके द्वे प्रकृतिस्थानेः तद्यथा—चतुर्विंशतिरेकविंशतिश्च । तत्रोपशमश्रेण्यामक्षायिकसम्यग्दृष्टेश्चतुर्विंशतिः, क्षायिकसम्यग्दृष्टेस्तु द्वयोरपि श्रेण्योरेकविंशतिः । तथाऽनिवृत्तिबादरसम्परायगुणस्थानके दश प्रकृतिसत्कर्मस्थानानि, तद्यथा—चतुर्विंशतिरेकविंशतिस्त्रयोदश द्वादश एकादश पञ्च चतस्रस्तिस्रो द्वे एका च । तत्र चतुर्विंशतिरुपशमश्रेणिमधिकृत्य । एकविंशतिः क्षायिकसम्यग्दृष्टेर्द्वयोरपि श्रेण्योः । शेषाणि तु स्थानानि क्षपकश्रेण्यां, तानि च प्रागेव भावितानि । सूक्ष्मसम्परायगुणस्थानके त्रीणि प्रकृतिसत्कर्मस्थानानि, तद्यथा—चतुर्विंशतिरेकविंशतिरेका च । तत्र चतुर्विंशतिरौपशमिकसम्यग्दृष्टेः, एकविंशतिश्च क्षायिकसम्यग्दृष्टेः, एते द्वे अप्युपशमश्रेण्यां, क्षपकश्रेण्यां त्वेका । तथोपशान्तमोहगुणस्थाने द्वे प्रकृतिसत्कर्मस्थाने चतुर्विंशतिरेकविंशतिश्च । एते द्वे प्राग्वद्भावनीये ॥ १२ ॥

अत्र मतान्तरमाह—

संखीणदिट्ठिमोहे केई पणवीसइं पि इच्छंति । संजोअणाण पन्ना णासं तेसिं उवसमं च ॥ १३ ॥

व्याख्या—केचिदाचार्याः पञ्चविंशतिलक्षणमपि प्रकृतिसत्कर्मस्थानमिच्छन्ति । ते हि दृष्टिमोहे दर्शनमोहनीयत्रये संक्षीणे सति पश्चात्संयोजनानामनन्तानुबन्धिनां नाशमिच्छन्ति, ततस्तन्मते दर्शनमोहनीयत्रितयक्षये सति पञ्चविंशतिरूपं प्रकृतिसत्कर्मस्थानं प्राप्यते । यद्येवं तर्हि तन्मतं कस्मान्नाश्रियते ? उच्यते—आर्षेण विरोधात् । यदाह चूर्णिकृत्—"तं आरिसे न भिज्जइ तेण ण इच्छिज्जइ त्ति" । तथा त एवाचार्यास्तेषामनन्तानुबन्धिनामुपशमं चेच्छन्ति, नान्ये पारमर्षवेदिनः । अत एव ग्रन्थकृन्मतेन तदुपशमना नोक्ता ॥ १३ ॥

अथ नामकर्मणः प्रकृतिसत्कर्मस्थानान्यभिधित्सुराह—

तिउगसयं तप्पंचगतिगणउई णउइदुगणणउई य। चउतिगदुगाहिगअसी णव अट्ठ य णामठाणाइं१४

व्याख्या—नाम्नो द्वादश प्रकृतिस्थानानि—त्र्युत्तरशतं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिस्त्रिनवतिर्नवतिरेकोननवतिश्चतुरशीतिस्त्र्यशीतिर्द्व्यशीतिर्नवाष्टौ चेति । एतद्भावना चेयं—सर्वनामप्रकृतिसमुदायरूपोत्तरशतं । तदेव जिननामरहितं द्व्युत्तरशतं । त्र्युत्तरशतमाहारकसप्तकरहितं षण्णवतिः । सैव जिननामरहिता पञ्चनवतिः । पञ्चनवतिरेव सुरद्विकेन नरकद्विकेन वा वर्जिता त्रिनवतिः । त्र्युत्तरशतमेव नामत्रयोदशकरहितं नवतिः । सैव जिननामरहितैकोननवतिः । तथा त्रिनवतिरेव नरकद्विकवैक्रियसप्तकाभ्यां सुरद्विकवैक्रियसप्तकाभ्यां वा रहिता चतुरशीतिः । षण्णवतिस्त्रयोदशरहिता त्र्यशीतिः । पञ्चनवतिस्त्रयोदशरहिता द्व्यशीतिः, यद्वा चतुरशीतिर्मनुजद्विकरहिता द्व्यशीतिः । मनुजगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तितीर्थकररूपा नव । ता एव जिननामरहिता अष्टौ ॥ १४ ॥

एतान्येव गुणस्थानेषु चिन्तयन्नाह—

एगे छद्दोसु दुगं पंचसु चत्तारि अछगं दोसु । कमसो तीसु चउक्कं छत्तु अजोगिम्मि गाणाइं ॥ १५ ॥

व्याख्या—एकस्मिन्मिथ्यादृष्टिलक्षणे गुणस्थाने षट् प्रकृतिसत्कर्मस्थानानि, तद्यथा—ध्रुवोत्तरशतं षण्णवतिः पञ्चनवतिस्त्रिनवतिश्चतुरशीतिर्द्व्यशीतिश्चेति । तत्र षण्णवतिर्बध्नजिननाम्नो मिथ्यादृष्टेरन्तर्मुहूर्त्तं यावत्प्राप्यते, नावितचरमेतत्, आहारकजिननाम्नोरुन्नयोः सत्तायां मिथ्यात्वं न प्राप्यत इति ध्रुवोत्तरशतप्रतिषेधः । शेषं सुगमं । तथा द्वयोः सासादनसम्यङ्मिथ्यादृष्टिगुणस्थानकयोर्द्वे द्वे प्रकृतिसत्कर्मस्थाने—ध्रुवोत्तरशतं पञ्चनवतिश्चेति । तथा पञ्चसु अविरतसम्यग्दृष्ट्यादिष्वपूर्वकरणान्तेषु गुणस्थानेषु चत्वारि चत्वारि प्रकृतिसत्कर्मस्थानानि, तद्यथा—ध्रुवोत्तरशतं ध्रुवोत्तरशतं षण्णवतिः पञ्चनवतिश्चेति । शेषाणि तु क्षपकश्रेण्यामेकेन्द्रियादौ च संज्ञवत्प्राप्तिकानीति नेह प्राप्यन्ते । तथा द्वयोरनिवृत्तिबादरसूक्ष्मसम्पराययोरष्टकमष्टौ प्रकृतिसत्कर्मस्थानानि, तद्यथा—ध्रुवोत्तरशतं ध्रुवोत्तरशतं षण्णवतिः पञ्चनवतिः नवतिः एकोननवतिः व्यशीतिः ध्रुवाशीतिश्च । तत्रानिवृत्तिबादरस्यादिमानि चत्वार्युपशमश्रेण्यां क्षपकश्रेण्यां च त्रयोदशकाद्वयं यावत्प्राप्यन्ते, शेषाणि तु क्षपकश्रेण्यामेव । सूक्ष्मसम्परायस्यादिमानि चत्वार्युपशमश्रेण्यां, शेषाणि तु क्षपकश्रेण्यां । तथा त्रिषूपशान्तमोहक्षीणमोहसयोगिकेवलिलक्षणेषु गुणस्थानेषु चत्वारि प्रकृतिसत्कर्मस्थानानि भवन्ति । तत्रोपशान्तमोहे ध्रुवोत्तरशतध्रुवोत्तरशतषण्णवतिपञ्चनवतिलक्षणानि चत्वारि स्थानानि । क्षीणमोहसयोगिकेवलिनोस्तु नवत्येकोननवतिव्यशीतिध्रुवाशीतिलक्षणानि ।

अयोगिनि तु षट् प्रकृतिसत्कर्मस्थानानि, तद्यथा—नवतिरेकोननवतिरष्टयशीतिर्द्व्यशीतिर्नवाष्टौ चेति । एतेष्वाद्यानि चत्वार्ययोगिकेवलिद्विचरमसमयं यावत्, चरमसमये तु जिनाजिनावधिकृत्य द्वे अन्त्ये स्थाने प्राप्येते ॥ १५ ॥

तदेवमुक्तं प्रकृतिसत्कर्म । सम्प्रति स्थितिसत्कर्म वक्तव्यं, तत्र त्रयोऽर्थाधिकाराः, तद्यथा—भेदः साद्यनादिप्ररूपणा स्वामित्वं चेति । तत्र भेदः प्रागिव । साद्यनादिप्ररूपणाऽपि मूलप्रकृतिविषयोत्तरप्रकृतिविषया चेति द्विविधा । तत्र प्रथमतो मूलप्रकृतिविषयां साद्यनादिप्ररूपणां चिकीर्षुराह—

मूलठिई अजहन्नं तिहा चउऽहा य पढमगकसाया। तिन्नयरुवलणाउगवज्जाण तिहा दुहाणुत्तं ॥१६॥

व्याख्या—मूलप्रकृतिस्थितिसत्कर्माजघन्यं त्रिधा त्रिप्रकारं, तद्यथा—अनादि ध्रुवमध्रुवं च । तथाहि—मूलप्रकृतीनां जघन्यं स्थितिसत्कर्म स्वस्वक्षयपर्यवसाने समयमात्रैकस्थित्यवशेषे भवति, तच्च साद्यध्रुवं, ततोऽन्यत्सर्वमजघन्यं स्थितिसत्कर्म, तच्चानादि सदैव भावात्, ध्रुवाध्रुवता पूर्ववत् । उत्कृष्टानुत्कृष्टे तु स्थितिसत्कर्मणी पर्यायेण प्राप्यमाणत्वात्साद्यध्रुवतया द्विविधे एवेत्यर्थाद्भावनीयं । कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा, सम्प्रत्युत्तरप्रकृतीनां तां चिकीर्षुराह—चउऽहा येत्यादि, प्रथमायाः षष्ठ्यर्थत्वात्प्रथमकषायाणामनन्तानुबन्धिनामजघन्यं स्थितिसत्कर्म चतुर्धा साद्यनादिध्रुवाध्रुवभेदात् । तथाहि—अमीषां स्थितिसत्कर्म स्वक्षयोपान्त्यसमये स्वरूपापेक्षया समयमात्रैकस्थितिकं, कर्मत्वसामान्यापेक्षया तु द्विसमयमानं, तच्च साद्यध्रुवं, ततोऽन्यत्सर्वमजघन्यं, तदप्युद्वलितानां भूयो बन्धे सादि, तत्स्थानमप्राप्तानामनादि, ध्रुवाध्रुवता प्राग्वत् । तथा तीर्थकरनामोद्वलनयोग्यत्रयोविंशत्यायुश्चतुष्टयवर्जितानां शेषाणां षड्विंशत्यधिकशतसङ्ख्यानां प्रकृती-

नामजघन्यं स्थितिसत्कर्म त्रिधाऽनादिध्रुवाध्रुवभेदात्। तथाहि—एतासां जघन्यस्थितिसत्कर्म स्वस्वक्षयपर्यवसाने उदयवतीनां समयमात्रैकस्थितिरूपं अनुदयवतीनां स्वरूपतः समयमात्रैकस्थितिकं स्तिबुकसङ्क्रमोपनीतपररूपानुगतकर्मत्वसामान्यापेक्षया द्विसमयमात्रं, तच्च साद्यध्रुवं, ततोऽन्यत्सर्वमजघन्यं, तच्चानादि सदैव भावात्, ध्रुवाध्रुवता प्राग्वत्। अनुक्तमुक्तप्रकृतीनामुत्कृष्टानुत्कृष्टजघन्यरूपं जिननामसुरद्विकनरद्विकनरकद्विकवैक्रियसप्तकाहारकसप्तकोच्चैर्गोत्रसम्यक्त्वसम्यङ्मिथ्यात्वरूपत्रयोविंशत्युद्वलनप्रकृत्यायुश्चतुष्टयानां च जघन्याजघन्योत्कृष्टानुत्कृष्टरूपं भेदचतुष्कं द्विधा साद्यध्रुवं चेति, तथाहि—उक्तप्रकृतीनामुत्कृष्टानुत्कृष्टे स्थितिसत्कर्मणी पर्यायेणानेकशो भवत इति ते अप्येते साद्यध्रुवे, जघन्यं च प्रागेव भावितं। जिननामादीनां चाध्रुवसत्कर्मत्वाच्चत्वारोऽपि भेदाः साद्यध्रुवा ज्ञेयाः॥ १६॥

तदेवं कृता साद्यनादिप्ररूपणा, सम्प्रति स्वामित्वं वाच्यं, तच्च द्विधा—उत्कृष्टस्थितिसत्कर्मस्वामित्वं जघन्यस्थितिसत्कर्मस्वामित्वं च। तत्र प्रथमत उत्कृष्टस्थितिसत्कर्मस्वामित्वमाह—

जेट्ठठिई बंधसमं जेट्ठं बंधोदया उ जासि सह। अणुदयबंधपराणं समऊणा जट्ठिई जेट्ठं॥ १७॥

व्याख्या—यासां प्रकृतीनां सह युगपद्बन्धोदयौ भवतस्तासां ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयासातवेदनीयमिथ्यात्वषोडशकषायपञ्चेन्द्रियजातितैजससप्तकहुण्डसंस्थानवर्णादिविंशत्यगुरुलघुपराघातोपघातोच्छ्वासाप्रशस्तविहायोगत्युद्योतत्रसबादरपर्याप्तप्रत्येकास्थिराशुभदुर्भगदुःस्वरानादेययशःकीर्त्तिनिर्माणनीचैर्गोत्रान्तरायपञ्चकतिर्यङ्मनुष्यापेक्षिकवैक्रियसप्तकलक्षणानां (उदयो) बन्धोत्कृष्टानां षडशीतिप्रकृतीनां ज्येष्ठमुत्कृष्टं स्थितिसत्कर्म ज्येष्ठस्थितिबन्धसमं उत्कृष्टस्थितिबन्ध-

प्रमाणं भवति । एतासां ह्युत्कृष्टस्थितिबन्धारम्भेऽबाधाकालमध्ये प्राग्बद्धदलिकप्राप्तावप्युदयवतीत्वात्प्रथमस्थितेरन्यत्र स्तिबुकसङ्क्रमेण न सङ्क्रम इत्युत्कृष्टस्थितिबन्धप्रमाणाऽुत्कृष्टस्थितिसत्कर्मणो न कोऽपि विशेषः । तथाऽनुदये ऽदयाऽभावे पर ऽत्कृष्टः स्थितिबन्धो यासां ता अनुदयबन्धपरा निऽद्रापञ्चकनरकद्विकतिर्यग्द्विकौदारिकसप्तकैकेन्द्रियजातिसेवार्त्तसंहननातपस्थावररूपा विंशतिः, तासां समयोनोत्कृष्टा स्थितिरुत्कृष्टं स्थितिसत्कर्म । तथाहि—एतासामुत्कृष्टस्थितिबन्धारम्भे यद्यप्यबाधाकालमध्येऽपि प्राग्बद्धं दलिकमस्ति, तथापि प्रथमस्थितिं तासामुदयवतीषु मध्ये स्तिबुकसङ्क्रमेण संक्रमयति, तेन तया समयमात्रया प्रथमस्थित्योनोत्कृष्टा स्थितिः । अथ कथं निऽद्रादीनामनुदये सति बन्धेनोत्कृष्टस्थितिप्राप्तिः ? ऽच्यते ऽत्कृष्टः स्थितिबन्धः ऽत्कृष्टसंक्लेशाधीनो, न चोत्कृष्टसंक्लेशसत्त्वे निऽद्रापञ्चकोदयसंऽभवः, नरकद्विकस्य चोत्कृष्टां स्थितिं तिर्यञ्चो मनुष्या वा बध्नन्ति, न च तेषु नरकद्विकोदयः संऽभवी । शेषाणां तु देवा नारका वा यथासंऽभवमुत्कृष्टस्थितिबन्धकाः, न च तेषु तऽदयोपपत्तिरित्येतासामनुदय एवोपपन्न ऽत्कृष्टस्थितिबन्ध इति ॥ १७ ॥

संकमउ दीहाणं सहालिगाए उ आगमो संतं । समऊणमणुदयाणं ऽभयासिं जहिई तुल्ला ॥ १८ ॥

व्याख्या—यासां प्रकृतीनां सङ्क्रमकाले ऽदयोऽपि विद्यते सङ्क्रमत एव चोत्कृष्टं स्थितिसत्कर्म प्राप्यते न बन्धतस्तासां सङ्क्रमतो दीर्घाणामुदयसङ्क्रमोत्कृष्टानां मनुजगतिसातवेदनीयसम्यक्त्वस्थिरशुऽभसुऽभगसुस्वरादेययशःकीर्तिनवनोकषायप्रशस्तविहायोगतिप्रथमसंहननपञ्चकप्रथमसंस्थानपञ्चकोच्चैर्गोत्रलक्षणानामष्टाविंशति(त्रिंशत्)प्रकृतीनां य आगमः सङ्क्रमेणावलिकाद्विकहीन ऽत्कृष्टस्थितिसमागमः स आवलिकयोदयावलिकया सहित ऽत्कृष्टं स्थितिसत्कर्म । इदमुक्तं भवति—सातं

वेदयमानः कश्चिदसातमुत्कृष्टस्थितिकं बध्नाति । तच्च बद्ध्वा सातं बद्धुं लग्नः, असातवेदनीयं च बन्धावलिकातीतं सदावलिकात उपरितनं सकलमप्यावलिकाद्विकहीनत्रिंशत्सागरोपमकोटीकोटीप्रमाणस्थितिसत्कर्म तस्मिन् सातवेदनीये वेद्यमाने बध्यमाने चोदयावलिकाया उपरिष्टात्संक्रमयति, ततस्तयोदयावलिकया सहितः सङ्क्रमद्वारकावलिकाद्विकहीनोत्कृष्टस्थितिसमागमः सातवेदनीयस्योत्कृष्टं स्थितिसत्कर्म, एवमन्यासामप्युदयसङ्क्रमोत्कृष्टानामावलिकाद्विकहीनस्वस्वसजातीयोत्कृष्टस्थितिसमागमप्रमाणमुदयावलिकासहितमुत्कृष्टस्थितिसत्कर्म भावनीयं । सम्यक्त्वस्य पुनरन्तर्मुहूर्त्तोनोत्कृष्टस्थितिसमागमप्रमाणमुदयावलिकासहितमुत्कृष्टं स्थितिसत्कर्म द्रष्टव्यं, यतो मिथ्यात्वस्योत्कृष्टां स्थितिं बध्ध्वा ततोऽन्तर्मुहूर्त्तं मिथ्यात्व एव स्थित्वा सम्यक्त्वं प्रतिपद्यते, तत्प्रतिपत्तौ च सत्यां मिथ्यात्वस्योत्कृष्टां स्थितिमावलिकात उपरितनीमपि सङ्क्षयाऽन्तर्मुहूर्त्तोनसप्ततिसागरोपमकोटाकोटिप्रमाणां सकलामपि सम्यक्त्वे उदयावलिकात उपरि संक्रमयति, ततोऽन्तर्मुहूर्त्तोन एवोत्कृष्टस्थितिसमागम उदयावलिकया सहितः सम्यक्त्वस्योत्कृष्टं स्थितिसत्कर्म ।

तथा यासां प्रकृतीनां सङ्क्रमत उत्कृष्टा स्थितिः प्राप्यते, न च सङ्क्रमकाले उदयोऽस्ति तासामनुदयानामनुदयसङ्क्रमोत्कृष्टानां देवगतिदेवानुपूर्वीसम्यङ्मिथ्यात्वाहारकसप्तकमनुजानुपूर्वीद्वित्रिचतुरिन्द्रियजातिसूक्ष्मसाधारणापर्याप्ततीर्थकरलक्षणानामष्टादशानां सङ्क्रमद्वारकावलिकाद्विकहीनोत्कृष्टस्थितिसमागमप्रमाणमावलिकासहितं प्रागुक्तमेवोत्कृष्टं स्थितिसत्कर्म समयोनमवगन्तव्यं । तथाहि—मनुष्यः कश्चिदुत्कृष्टसंक्लेशपरिणत उत्कृष्टां नरकस्थितिं बध्ध्वा परिणामपरावृत्त्या देवगतिं बद्धुं लग्नः, तस्यां च देवगतौ बध्यमानायामावलिकाया उपरिष्टाद्बन्धावलिकातीतां नरकस्थितिमुदयावलिकात

वेदयमानः कश्चिदसातमुत्कृष्टस्थितिकं बध्नाति । तच्च बद्ध्वा सातं बद्धुं लग्नः, असातवेदनीयं च बन्धावलिकातीतं सदावलिकात उपरितनं सकलमप्यावलिकाद्विकहीनत्रिंशत्सागरोपमकोटीकोटीप्रमाणस्थितिसत्कर्म तस्मिन् सातवेदनीये वेद्यमाने बध्यमाने चोदयावलिकाया उपरिष्टात्संक्रमयति, ततस्तयोदयावलिकया सहितः सङ्क्रमद्वारकावलिकाद्विकहीनोत्कृष्टस्थितिसमागमः सातवेदनीयस्योत्कृष्टं स्थितिसत्कर्म, एवमन्यासामप्युदयसङ्क्रमोत्कृष्टानामावलिकाद्विकहीनस्वस्वसजातीयोत्कृष्टस्थितिसमागमप्रमाणमुदयावलिकासहितमुत्कृष्टस्थितिसत्कर्म भावनीयं । सम्यक्त्वस्य पुनरन्तर्मुहूर्त्तोनोत्कृष्टस्थितिसमागमप्रमाणमुदयावलिकासहितमुत्कृष्टं स्थितिसत्कर्म द्रष्टव्यं, यतो मिथ्यात्वस्योत्कृष्टां स्थितिं बध्ध्वा ततोऽन्तर्मुहूर्त्तं मिथ्यात्व एव स्थित्वा सम्यक्त्वं प्रतिपद्यते, तत्प्रतिपत्तौ च सत्यां मिथ्यात्वस्योत्कृष्टां स्थितिमावलिकात उपरितनीमपि सङ्क्षयाऽन्तर्मुहूर्त्तोनसप्ततिसागरोपमकोटाकोटिप्रमाणां सकलामपि सम्यक्त्वे उदयावलिकात उपरि संक्रमयति, ततोऽन्तर्मुहूर्त्तोन एवोत्कृष्टस्थितिसमागम उदयावलिकया सहितः सम्यक्त्वस्योत्कृष्टं स्थितिसत्कर्म ।

तथा यासां प्रकृतीनां सङ्क्रमत उत्कृष्टा स्थितिः प्राप्यते, न च सङ्क्रमकाले उदयोऽस्ति तासामनुदयानामनुदयसङ्क्रमोत्कृष्टानां देवगतिदेवानुपूर्वीसम्यङ्मिथ्यात्वाहारकसप्तकमनुजानुपूर्वीद्वित्रिचतुरिन्द्रियजातिसूक्ष्मसाधारणापर्याप्ततीर्थकरलक्षणानामष्टादशानां सङ्क्रमद्वारकावलिकाद्विकहीनोत्कृष्टस्थितिसमागमप्रमाणमावलिकासहितं प्रागुक्तमेवोत्कृष्टं स्थितिसत्कर्म समयोनमवगन्तव्यं । तथाहि—मनुष्यः कश्चिदुत्कृष्टसंक्लेशपरिणत उत्कृष्टां नरकस्थितिं बध्ध्वा परिणामपरावृत्त्या देवगतिं बद्धुं लग्नः, तस्यां च देवगतौ बध्यमानायामावलिकाया उपरिष्टाद्बन्धावलिकातीतां नरकस्थितिमुदयावलिकात

सत्कर्म जघन्यस्थितिसङ्क्रमो ज्ञातव्य एतासां प्रकृतीनां बन्धस्योदयस्य च व्यवच्छेदे सत्यन्यत्र सङ्क्रमेण क्षयनयनं भवतीति य एवासां चरमः सङ्क्रमः स एव जघन्यस्थितिसत्कर्मेति भावः। शेषाणां पुनरुदयवतीनां ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयवेदकसम्यक्त्वसंज्वलनलोभायुश्चतुष्टयनपुंसकवेदस्त्रीवेदसातासातवेदनीयोच्चैर्गोत्रमनुजगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्त्तितीर्थकरान्तरायपञ्चकरूपाणां चतुस्त्रिंशत्प्रकृतीनां स्वक्षयचरमसमये यैका समयमात्रा स्थितिः सा जघन्यस्थितिसत्कर्म। अनुदयवतीनां तु स्वस्वक्षयोपान्त्यसमये स्वरूपापेक्षया समयमात्राऽन्यथा तु द्विसमयमात्रा स्थितिर्जघन्यं स्थितिसत्कर्म। अनुदयवतीनां हि चरमसमये स्तिबुकसङ्क्रमेणोदयवतीषु प्रक्षेपात्तत्स्वरूपेणानुभवाच्च स्वरूपेण दलिकं न प्राप्यते, किंतु पररूपेणेत्येवमुक्तं। अथ सामान्येन सर्वकर्मणां जघन्यस्थितिसत्कर्मस्वामी प्रतिपाद्यते—तत्रानन्तानुबन्धिनां दर्शनमोहनीयत्रयस्य चाविरतादिरप्रमत्तपर्यन्तो यथायोगं जघन्यस्थितिसत्कर्मस्वामी। नारकतिर्यग्देवायुषां नारकतिर्यग्देवाः स्वस्वभवचरमसमये वर्तमानाः, कषायाष्टकस्त्यानर्द्धित्रिकनामत्रयोदशकनोकषायनवकसंज्वलनत्रिकरूपाणां षट्त्रिंशत्प्रकृतीनामनिवृत्तिबादरसम्परायः, संज्वलनलोभस्य सूक्ष्मसम्परायः, ज्ञानावरणपञ्चकदर्शनावरणषट्कान्तरायपञ्चकानां क्षीणकषायः, शेषाणां पञ्चनवतिसङ्ख्यानामयोगिकेवली जघन्यस्थितिसत्कर्मस्वामी ॥ १९ ॥

तदेवमुक्तं जघन्यस्थितिसत्कर्मस्वामित्वं, अथ स्थितिभेदनिरूपणार्थमाह—

ठिइसंतठाणाइं णियगुक्कस्सा हि थावरजहन्नो। णेरंतरेण हेट्ठा खवणाइसु संतराइं पि ॥ २० ॥

व्याख्या—सर्वेषां कर्मणां निजनिजाभ्युत्कृष्टात् स्थितिस्थानादारभ्याधस्तादवतरता तावद्वक्तव्यं यावत्स्थावरजघन्यमे-

केन्द्रियप्रायोग्यं जघन्यस्थितिसत्कर्म समायाति । एतावति स्थितिखण्डके यावन्तः समयास्तावन्ति स्थितिस्थानानि नानाजीवापेक्षया नैरन्तर्येण लभ्यन्ते । तथाहि—उत्कृष्टा स्थितिरेकं स्थितिस्थानं, सैव समयोना द्वितीयं, द्विसमयोना तृतीयं, एवं तावद्वाच्यं यावदेकेन्द्रियप्रायोग्यं जघन्यं स्थितिसत्कर्म । एकेन्द्रियप्रायोग्याच्च जघन्यस्थितिसत्कर्मणोऽधस्तात्क्षपणादिषु क्षपणे उद्वलने च सान्तराणि स्थितिस्थानानि लभ्यन्ते, अपिशब्दान्निरन्तराणि च । कथमिति चेदुच्यते—एकेन्द्रियप्रायोग्यजघन्यस्थितिसत्कर्मण उपरितनाग्रिमभागात्पल्योपमासङ्ख्येयभागमात्रं स्थितिखण्डं खण्डयितुमारभ्यते, खण्डनारम्भप्रथमसमयादारभ्य च समये समयेऽधस्तादुदयवतीनामनुभवेनानुदयवतीनां तु स्तिबुकसङ्क्रमेण समयमात्रा समयमात्रा स्थितिः क्षीयते, ततः प्रतिसमयं हानिकृताः स्थितिविशेषा लभ्यन्ते । तथाहि—तत्स्थावरप्रायोग्यं जघन्यस्थितिसत्कर्म प्रथमसमयेऽतिक्रान्ते समयहीनं, द्वितीयसमयेऽतिक्रान्ते द्विसमयहीनं, तृतीयसमयेऽतिक्रान्ते त्रिसमयहीनमित्यादि भवति, अन्तर्मुहूर्त्तेन च कालेन तत् स्थितिखण्डं खण्डयतीत्यन्तर्मुहूर्त्तं यावदेते समयसमयहानिकृता विशेषा लभ्यन्ते, तत उक्तस्थितिखण्डप्रमाणा स्थितिर्युगपदेव त्रुटितेति अन्तर्मुहूर्त्तादूर्ध्वं निरन्तराणि स्थितिस्थानानि न लभ्यन्ते, ततः पुनरपि द्वितीयं पल्योपमासङ्ख्येयभागमात्रं स्थितिखण्डमन्तर्मुहूर्त्तमात्रेण खण्डयति, तत्रापि प्रतिसमयमधः समयमात्रसमयमात्रस्थितिहान्यापेक्षया निरन्तराणि स्थितिस्थानानि प्राग्वल्लभ्यन्ते, द्वितीये च स्थितिखण्डे खण्डिते सति पल्योपमासङ्ख्येयभागमात्रा स्थितिर्युगपदेव त्रुटितेति भूयोऽप्यन्तर्मुहूर्त्तादूर्ध्वं निरन्तराणि स्थितिस्थानानि न लभ्यन्ते, एवं निरन्तरसान्तरस्थितिस्थानलाभक्रमस्तावद्भावनीयो यावदावलिका शेषा भवति । साऽपि चावलिकोदयवतीनामनुभवेनानु-

दयवतीनां च स्तिबुकसङ्क्रमेण प्रतिसमयं क्षीयते तावद्यावदेका स्थितिः, ततोऽमून्यावलिकासमयप्रमाणानि स्थितिस्थानानि निरन्तराणि लभ्यन्ते ॥ २० ॥

तदेवं स्थितिस्थानभेदोऽप्युपदर्शितः, अथानुभागसत्कर्मप्ररूपणार्थमाह—

संकमसममणुभागे णवरि जहन्नं तु देसघाईणं। उन्नोकसायवज्जाण (वज्जं) एगठाणंमि देसहरं ॥२१॥
मणनाणे दुठाणं देसहरं सामिगोय सम्मत्ते। आवरणविग्घसोलसग किट्टिवेएसु य सगंते ॥ २२ ॥

व्याख्या—अनुभागसङ्क्रमेण तुल्यमनुभागसत्कर्म वाच्यं, यस्यानुभागसङ्क्रमे स्थानप्रत्ययविपाकशुभाशुभत्वसाद्यनादित्वस्वामित्वान्युक्तानि तस्यैवात्राप्यनुभागसत्कर्मणि वाच्यानीति भावः। नवरमयं विशेषः—यदुत देशघातिनीनां हास्यादिषट्कवर्जितानां मतिश्रुतावधिज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणसंज्वलनचतुष्टयवेदत्रयान्तरायपञ्चकरूपाणामष्टादशप्रकृतीनां जघन्यानुभागसत्कर्म स्थानमधिकृत्यैकस्थानीयं, घातिसंज्ञामधिकृत्य देशहरं देशघाति। मनःपर्यायज्ञानावरणे तु जघन्यमनुभागसत्कर्म स्थानचिन्तायां द्विस्थानं, घातिसंज्ञाविचारे च देशघाति ज्ञेयं। इहोत्कृष्टानुभागसत्कर्मस्वामिनो य एवोत्कृष्टानुभागसङ्क्रमस्वामिनस्त एवाविशेषेण ज्ञेयाः। जघन्यानुभागसत्कर्मस्वामिनोऽपि कासाञ्चित्प्रकृतीनां जघन्यानुभागसङ्क्रमस्वामिन एव प्रत्येयाः, कासाञ्चित्त्वस्ति विशेष इति तमाह—"सामिगोय सम्मत्ते" इत्यादि सम्यक्त्वज्ञानावरणपञ्चकदर्शनावरणषट्कान्तरायपञ्चकरूपप्रकृतिषोडशकक्रिट्टिरूपसंज्वलनलोभवेदत्रयाणां सर्वसङ्क्षयैकविंशतिप्रकृतीनां स्वस्वान्तिमसमये वर्तमाना जघन्यानुभागसत्कर्मस्वामिनोऽवसेयाः ॥ २१-२२ ॥

अत्रैव विशेषमाह—

मइसुयचक्खुअचक्खूण सुयसमत्तस्स जेठलद्धिस्स। परमोहिस्सोहिदुगं मणनाणं विपुलणाणिस्स॥२३॥

व्याख्या—मतिज्ञानावरणश्रुतज्ञानावरणचक्षुर्दर्शनावरणाचक्षुर्दर्शनावरणानां श्रुतसमाप्तस्य सर्वाक्षरसन्निपातिनश्चतुर्दशपूर्वधरस्य ज्येष्ठलब्धिकस्योत्कृष्टायां श्रुतज्ञानलब्धौ वर्तमानस्य जघन्यमनुभागसत्कर्म, मतिज्ञानावरणादीनां सर्वोत्कृष्टश्रुतज्ञानलब्धिसम्पन्नश्चतुर्दशपूर्वविज्जघन्यानुभागसत्कर्मस्वामी वेदितव्य इत्यर्थः। तथा परमावधिज्ञानिनोऽवधिद्विकमवधिज्ञानावरणावधिदर्शनावरणरूपं जघन्यानुभागसत्कर्म भवति, अवधिज्ञानावरणावधिदर्शनावरणयोर्जघन्यानुभागसत्कर्मस्वामी परमावधिसम्पन्नो ज्ञेय इत्यर्थः। तथा मनोज्ञानं विपुलज्ञानिनः मनःपर्यायज्ञानावरणस्य जघन्यानुभागसत्कर्मस्वामी विपुलमतिलब्धिसम्पन्नो ज्ञेय इत्यर्थः, लब्धिसहितस्य प्रभूतोऽनुभागः प्रलयमुपयातीति परमोहिस्सेत्याद्युक्तम्॥२३॥

सम्प्रत्यनुभागसत्कर्मस्थानभेदप्ररूपणार्थमाह—

बंधहयहयउप्पत्तिगाणि कमसो असंखगुणियाणि। उदयोदीरणवज्जाणि होंति अणुभागठाणाणि॥२४॥

व्याख्या—इहानुभागस्थानानि त्रिधा—बन्धोत्पत्तिकानि हतोत्पत्तिकानि हतहतोत्पत्तिकानि चेति। तत्र बन्धादुत्पत्तिर्येषां तानि बन्धोत्पत्तिकानि, तानि चासङ्ख्येयलोकाकाशप्रदेशप्रमाणानि तद्धेतूनामध्यवसायानामसङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्। तथोद्वर्त्तनापवर्त्तनाकरणवशतोऽन्यथाऽन्यथापरिणामेन यान्यनुभागस्थानानि वैचित्र्यभाञ्जि भवन्ति तानि हतोत्पत्तिकानीत्युच्यन्ते, हतात्पूर्वावस्थाविनाशरूपाद् घातादुत्पत्तिर्येषां तानि हतोत्पत्तिकानीति व्युत्पत्तेः, तानि

च पूर्वेभ्योऽसङ्ख्येयगुणानि, एकैकस्मिन् बन्धोत्पत्तिके स्थाने नानाजीवापेक्षयोर्वर्त्तनापवर्त्तनाभ्यामसङ्ख्येयभेदकरणात्। यानि तु स्थितिघातेन रसघातेन वाऽन्यथात्वमापादितानि विलक्षणान्यनुभागस्थानानि जायन्ते तानि च हतहतोत्पत्तिकान्युच्यन्ते, हते उद्वर्त्तनापवर्त्तनाकृतघाते सति भूयोऽपि हतात् स्थितिघातकृताद्रसघातकृताद्वा घातादुत्पत्तिर्येषां तानि हतहतोत्पत्तिकानीति व्युत्पत्तेः, तानि चोद्वर्त्तनापवर्त्तनाजन्येभ्योऽनुभागस्थानेभ्योऽसङ्ख्येयगुणानि। अक्षरयोजना त्वियं—यान्युदयत उदीरणातश्च प्रतिसमयं क्षयसंभवादन्यथाऽन्यथाऽनुभागस्थानानि जायन्ते तानि वर्जयित्वा शेषाणि बन्धोत्पत्तिकादीन्यनुभागस्थानानि क्रमशोऽसङ्ख्येयगुणानि वाच्यानि। उदयोदीरणाजन्यानि कस्माद्वर्ज्यन्त इति चेत्तत्प्रवृत्तौ बन्धोद्वर्त्तनापवर्त्तनास्थितिघातरसघातजन्यान्यतमावश्यंभावेन तेषां तेष्वेवान्तर्भावेनापृथक्करणादित्याहुः। तुल्यजातीयत्वेऽपि हेतुभेदात्तद्भेद आवश्यक इत्यपि न शङ्कनीयं, बन्धोत्पत्तिकाद्यन्तर्भूतत्वे सति तादृशभेदस्य स्थानभेदानौपयिकत्वेनादूषणत्वादिति दिक् ॥ २४ ॥

तदेवमुक्तमनुभागसत्कर्म, सम्प्रति प्रदेशसत्कर्म वक्तव्यं, तत्र च त्रयोऽर्थाधिकाराः—भेदः साद्यनादिप्ररूपणा स्वामित्वं चेति। तत्र भेदः प्राग्वत्। इदानीं साद्यनादिप्ररूपणा कर्तव्या, सा च द्विधा—मूलप्रकृतिविषयोत्तरप्रकृतिविषया च। तत्र मूलप्रकृतिविषयां तां चिकीर्षुराह—

सत्तण्हं अजहण्णं तिविहं सेसा दुहा पएसम्मि। मूलपगईसु आउस्स साइ अधुवा य सव्वे वि॥ २५ ॥

व्याख्या—आयुर्वर्जानां सप्तानां मूलप्रकृतीनामजघन्यं प्रदेशसत्कर्म त्रिविधं—अनादि ध्रुवमध्रुवं चेति। तत्र क्षपित-

कर्मांशस्यायुर्वर्जसप्तकर्मणां स्वस्वक्षयावसरे चरमस्थितौ वर्तमानस्य जघन्यं प्रदेशसत्कर्म, तच्च साद्यध्रुवं, ततोऽन्यत्सर्वमजघन्यं, तच्चानादि सदैव भावात्, ध्रुवाध्रुवताऽभव्याभव्यापेक्षया। शेषा ऊरितविकल्पा उत्कृष्टानुत्कृष्टजघन्यरूपा त्रिधा सादयोऽध्रुवाश्चेति। तत्रोत्कृष्टं प्रदेशसत्कर्म गुणितकर्मांशस्य मिथ्यादृष्टेः सप्तमपृथिव्यां वर्त्तमानस्य प्राप्यते, शेषकालं तु तस्याप्यनुत्कृष्टं, ततो द्वे अपि साद्यध्रुवे। जघन्यं तु भावितमेव। आयुषस्तु सर्वेऽपि विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपाः सादयोऽध्रुवाश्चाध्रुवसत्कर्मत्वात् ॥ २५ ॥

अथोत्तरप्रकृतीरधिकृत्य साद्यनादिप्ररूपणां कुर्वन्नाह—

बायालाणुक्कस्सं चउवीससया जहन्न चउतिविहं। होइह तिहा चउद्धा अजहन्नमणासियं दुविहं ॥२६॥

व्याख्या—सातवेदनीयसंज्वलनचतुष्टयपुरुषवेदपञ्चेन्द्रियजातितैजससप्तकाद्यसंस्थानाद्यसंहननशुभवर्णाद्येकादशकागुरुलघुपराघातोच्छ्वासप्रशस्तविहायोगतित्रसदशकनिर्माणरूपाणां द्विचत्वारिंशत्प्रकृतीनामनुत्कृष्टं प्रदेशसत्कर्म चतुर्विधं—साद्यनादिध्रुवाध्रुवभेदात्। तथाहि—आद्यसंहननवर्जानां शेषाणामेकचत्वारिंशत्प्रकृतीनां क्षपकश्रेण्यां स्वस्वबन्धान्तसमये गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्म, तच्चैकसामयिकत्वात्साद्यध्रुवं, ततोऽन्यत्सर्वमनुत्कृष्टं, तदपि च द्वितीयसमये भवत्सादि, तत्स्थानमप्राप्तस्यानादि, ध्रुवाध्रुवे प्राग्वत्। आद्यसंहननस्य तु सप्तमावनौ सम्यग्दृष्टेर्नारकस्य मिथ्यात्वं यियासोरुत्कृष्टं प्रदेशसत्कर्म, तच्च साद्यध्रुवं, ततोऽन्यदनुत्कृष्टं, तदपि द्वितीयसमये भवत्सादि, तत्स्थानमप्राप्तस्यानादि, ध्रुवाध्रुवे प्राग्वत्। तथाऽनन्तानुबन्धियशःकीर्त्तिसंज्वलनलोभवर्जितानां चतुर्विंशत्यधिकशतसङ्ख्यानां ध्रुवसत्कर्मप्रकृतीनामज-

घन्यं प्रदेशसत्कर्म त्रिविधं, अनादिध्रुवाध्रुवभेदात् । तथाहि—एतासां क्षपितकर्मांशस्य स्वस्वक्षयचरमसमये जघन्यं प्रदेशसत्कर्म प्राप्यते, तच्चैकसामयिकमिति साद्यध्रुवं, ततोऽन्यदजघन्यं, तच्चानादि, सदैव भावात्, ध्रुवाध्रुवता प्राग्वत् । "चउ तिविहं ति" द्विचत्वारिंशतोऽनुत्कृष्टं चतुर्विधं चतुर्विंशशतध्रुवसत्कर्मणां चाजघन्यं त्रिविधमिति यथासङ्केन योजनीयं । तथाऽनन्तानुबन्धिचतुष्टयसंज्वलनलोभयशःकीर्त्तिरूपाणां षण्णां प्रकृतीनामजघन्यं प्रदेशसत्कर्म चतुर्विधं, साद्यनादिध्रुवाध्रुवभेदात् । तथाहि—अनन्तानुबन्धिनामुद्वलके क्षपितकर्मांशे यदा शेषीभूतैका स्थितिर्भवति तदा जघन्यं प्रदेशसत्कर्म, तच्चैकसामयिकमिति साद्यध्रुवं, ततोऽन्यत्सर्वमजघन्यं, तच्चोद्वलितानां तेषां मिथ्यात्वप्रत्ययाभूयोऽपि बध्यमानतया सादि, तत्स्थानमप्राप्तस्यानादि, ध्रुवाध्रुवे प्राग्वत् , यशःकीर्त्तिसंज्वलनलोभयोस्तु क्षपितकर्मांशस्य क्षपणायोत्थितस्य यथाप्रवृत्तकरणस्यान्तिमसमये जघन्यं प्रदेशसत्कर्म, तच्चैकसामयिकत्वात्साद्यध्रुवं, ततोऽन्यत्सर्वमजघन्यं, तदपि चापूर्वकरणगुणस्थानप्रथमसमये गुणसङ्क्रमेण प्रभूतदलिकोपनयनादजघन्यं भवत्सादि, तत्स्थानमप्राप्तस्यानादि, ध्रुवाध्रुवता प्राग्वत् । अभाषितमनुक्तं सर्वासामपि प्रकृतीनां द्विविधं साद्यध्रुवं चेति । तत्र द्विचत्वारिंशत्प्रकृतीनामभाषितं जघन्यमजघन्यमुत्कृष्टं च । तत्रोत्कृष्टं द्विविधमनुत्कृष्टप्रसङ्गे भावितमेव, जघन्यमजघन्यं च वक्ष्यमाणं स्वामित्वं मनसिकृत्य स्वयमेव भावनीयं । चतुर्विंशतिशतसङ्ख्यानामभाषितमुत्कृष्टमनुत्कृष्टं जघन्यं च । तत्र जघन्यमजघन्यप्रसङ्गे भावितमेव, उत्कृष्टानुत्कृष्टे च गुणितकर्मांशे मिथ्यादृष्टौ प्राप्येते इत्येते अपि साद्यध्रुवे । एवमनन्तानुबन्धिसंज्वलनलोभय-

शःकीर्त्तीनामप्युत्कृष्टानुत्कृष्टे भावनीये, जघन्यं तु भावितमेव । शेषाणां चाध्रुवसत्कर्मणां चत्वारोऽपि भेदा अध्रुवसत्कर्मत्वादेव साद्यध्रुवाः ॥ २६ ॥

तदेवं कृता साद्यनादिप्ररूपणा, अथ स्वामित्वमभिधानीयं, तच्च द्विधा—उत्कृष्टप्रदेशसत्कर्मस्वामित्वं जघन्यप्रदेशसत्कर्मस्वामित्वं चेति । तत्रोत्कृष्टप्रदेशसत्कर्मस्वामित्वमाह—

संपुन्नगुणियकम्मो पएसउक्कस्ससंतसामीउ । तस्सेव उ उप्पिवित्रिग्गयस्स कासिंचि वन्नेऽहं ॥ २७ ॥

व्याख्या—उत्कृष्टप्रदेशसत्कर्मस्वामी सम्पूर्णगुणितकर्मांशः सप्तमावनौ चरमसमये वर्त्तमानो नारकः प्रायः सर्वासामपि प्रकृतीनां ज्ञातव्यः । कासाञ्चित्तु प्रकृतीनां तस्यैव सम्पूर्णगुणितकर्मांशस्य सप्तमावनेर्विनिर्गतस्योपरि विशेषोऽस्तीति शेषः । तमहं वर्णयामि वर्णयिष्यामि । "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति भविष्यति वर्त्तमाना ॥ २७ ॥

प्रतिज्ञातमेवाह—

मिछत्ते मीसम्मि य संपक्खित्तम्मि मीससुद्धाणं । वरिसवरस्स उ ईसाणगस्स चरमम्मि समयम्मि ॥२८॥

व्याख्या—प्रागुक्तस्वरूपो गुणितकर्मांशः सप्तमावनेरुद्वृत्य तिर्यक्ष्वुत्पन्नः, तत्राप्यन्तर्मुहूर्त्तं स्थित्वा मनुष्येषूत्पन्नः, तत्र सम्यक्त्वं प्राप्य सप्तकक्षपणाय यः शीघ्रमुद्यतते तस्य सम्यङ्मिथ्यात्वे मिथ्यात्वस्य सर्वसङ्क्रमेण प्रक्षेपसमये सम्यङ्मिथ्यात्वस्योत्कृष्टप्रदेशसत्कर्मस्वामित्वं लभ्यते, तदपि सम्यङ्मिथ्यात्वं यस्मिन् समये सर्वसङ्क्रमेण सम्यक्त्वे प्रक्षिपति तस्मिन् समये सम्यक्त्वस्योत्कृष्टप्रदेशसत्कर्मस्वामित्वं । अक्षरयोजना त्वियम्—मिथ्यात्वे मिश्रे च यथासङ्ख्यं मिश्रे शुद्धे च शुद्ध-

पुञ्जोदयजाविनि सम्यक्त्वे प्रक्षिप्ते सति मिश्रशुद्ध्योः सम्यङ्मिथ्यात्वसम्यक्त्वयोरुत्कृष्टं प्रदेशसत्कर्म जवति। तथा स एव गुणितकर्मांशो नारकस्तिर्यग्भूत्वा कश्चिदीशानदेवो जातः, सोऽपि च तत्रातिसंक्लिष्टो भूत्वा भूयो भूयो नपुंसकवेदं बध्नाति, तदानीं तस्य जवचरमसमये वर्त्तमानस्य वर्षव (ध) रस्य नपुंसकवेदस्योत्कृष्टप्रदेशसत्कर्म ॥ २८ ॥

ईसाणे पूरित्ता णपुंसगं तो असंखवासा (सी)सु। पल्लासंखियजागेण पूरिए इत्थिवेयस्स ॥ २९ ॥

व्याख्या—ईशानदेवलोके उक्तप्रकारेण नपुंसकवेदमापूर्य नपुंसकवेदस्योत्कृष्टं प्रदेशसंचयं कृत्वा ततः सङ्ख्येयवर्षायुष्केषु मध्ये समुत्पद्य पुनरसङ्ख्येयवर्षायुष्केषु मध्ये यः समुत्पन्नस्तत्र च तेन संक्लिष्टेन भूत्वा पल्योपमासङ्ख्येयजागमात्रेण कालेन स्त्रीवेदे पूरिते सति बन्धेन नपुंसकवेददलिकसङ्क्रमेण च सुतरां भृते सति तस्य स्त्रीवेदस्योत्कृष्टं प्रदेशसत्कर्म जवति॥२९॥

पुरिसस्स पुरिससंकमपएसउक्कस्स सामिगस्सेव। इत्थी जं पुण समयं संपक्खित्ता हवइ ताहे ॥ ३० ॥

व्याख्या—पुरुषस्य पुरुषवेदस्योत्कृष्टं प्रदेशसत्कर्मोत्कृष्टपुरुषवेदसङ्क्रमस्वामिन एव य एवोत्कृष्टपुरुषवेदसङ्क्रमस्वामी स एवोत्कृष्टपुरुषवेदप्रदेशसत्कर्मस्वाम्यपि ज्ञेय इत्यर्थः। यं समयं यस्मिन् समये पुनः स्त्रीवेदं पुरुषवेदे संप्रक्षेप्ता जवति "ताहे" तदानीं पुरुषवेदस्योत्कृष्टप्रदेशसत्कर्मस्वामी, गुणितकर्मांशः क्षपकः पुरुषवेदे स्त्रीवेदस्य सर्वसङ्क्रमसमये तदुत्कृष्टप्रदेशसङ्क्रमस्वामीति निर्गलितोऽर्थः। उक्तं च पञ्चसङ्ग्रहेऽपि—"जो सबसंकमेणं इत्थिं पुरिसम्मि बुहइ सो सामी" इति॥३०॥

तस्सेव य (उ) संजलणा पुरिसाइकमेण सबसंछोने। चउरुवसमित्तु खिप्पं रागंते सायउच्चजसा ॥३१॥

व्याख्या—य एव पुरुषवेदोत्कृष्टप्रदेशसत्कर्मस्वामी तस्यैव संज्वलनाश्चत्वारः क्रोधादयः क्रमेण पुरुषवेदादिदलिकसर्वसंक्रोन्ने उत्कृष्टप्रदेशसत्कर्मणो ज्ञवन्ति । अयमिह तात्पर्यार्थः—पुरुषवेदोत्कृष्टप्रदेशसत्कर्मस्वामी यदा पुरुषवेदं सर्वसङ्क्रमेण संज्वलनक्रोधे सङ्क्रमयति तदा संज्वलनक्रोधोत्कृष्टप्रदेशसत्कर्मस्वामी । स एव यदा संज्वलनक्रोधं सर्वसङ्क्रमेण संज्वलनमाने सङ्क्रमयति तदा संज्वलनमानोत्कृष्टप्रदेशसत्कर्मस्वामी । स एव यदा संज्वलनमानं सर्वसङ्क्रमेण संज्वलन्यां मायायां सङ्क्रमयति तदा संज्वलनमायोत्कृष्टप्रदेशसत्कर्मस्वामी। स एव यदा संज्वलनमायां संज्वलनलोन्ने सर्वसङ्क्रमेण सङ्क्रमयति तदा संज्वलनलोन्नोत्कृष्टप्रदेशसत्कर्मस्वामी । तथा चतुरो वारान् मोहनीयमुपशमय्य गुणितकर्मांशस्य शीघ्रं क्षपणायोत्थितस्य राग्यन्ते सूक्ष्मसम्परायगुणस्थानचरमसमये वर्तमानस्य सातवेदनीयोच्चैर्गोत्रयशःकीर्त्तीनामुत्कृष्टं प्रदेशसत्कर्म, यत एतासु प्रकृतिषु श्रेण्यारूढः सन् गुणसङ्क्रमेण प्रभूतान्यशुभप्रकृतिदलिकानि सङ्क्रमयति, ततः सूक्ष्मसम्परायचरमसमये एतासामुत्कृष्टप्रदेशसत्कर्म प्राप्यते ॥ ३१ ॥

देवणरयाउगाणं जोगुक्कस्सेहिं जेठगऊाए । बऊाणि ताव जावं पढमे समए उइन्नाणि ॥ ३२ ॥

व्याख्या—देवनारकायुषोरुत्कृष्टैर्योगैरुत्कृष्टया च बन्धाऊया बऊयोः सतोस्तावदुत्कृष्टं प्रदेशसत्कर्म प्राप्यते यावत् प्रथमे समये उदीर्णे उदयप्राप्ते ज्ञवतः । बन्धादारभ्योदयप्रथमसमयं यावद्देवनारकायुषोरुक्तप्रकारेण बऊयोरुत्कृष्टं प्रदेशसत्कर्म ज्ञवति । परतस्तूदयादिनिर्जीर्णप्रदेशहानेर्नोत्कर्षप्राप्तिरिति ज्ञावः ॥ ३२ ॥

सेसाउगाणि णियगेसु चेव आगम्मपुव्वकोडीए । सायबहुलस्स अचिरा बंधंते जाव णोवट्टे ॥ ३३ ॥

व्याख्या—शेषायुषी तिर्यङ्मनुष्यायुषी, पूर्वकोट्येत्युपलक्षणे तृतीया, ततः पूर्वकोट्युपलक्षिते पूर्वकोटिप्रमाणे इत्यर्थः, उत्कृष्टया बन्धाऽध्योत्कृष्टैश्च योगैर्बध्ने सती निजकभवेषु निजनिजभवे समागत्य यः सातबहुलः सन् यथायोगमनुभवति सुखितस्य न प्रभूता आयुःपुद्गलाः परिशटन्तीति सातबहुलग्रहणं। ततोऽचिराद्बन्धान्त इति उत्पत्तिसमयादूर्ध्वमन्तर्मुहूर्त्तमात्रमेव स्थित्वा मर्तुकामस्य जातस्य सत उत्कृष्टया बन्धाऽध्योत्कृष्टैश्च योगैरन्यत्पारभविकं समानजातीयं मनुष्यस्य सतो मनुष्यायुस्तिरश्चः सतस्तिर्यगायुर्बध्नतो बन्धान्तसमय इत्यर्थः, यावन्नाद्याप्यपवर्तयति तावत्तस्य सातबहुलस्य मनुष्यस्य सतो मनुष्यायुषस्तिरश्चः सतस्तिर्यगायुष उत्कृष्टं प्रदेशसत्कर्म भवति। यतस्तस्य सातबाहुल्येन निर्जीर्णाल्पप्रदेशान्तर्मुहूर्त्तोनस्वभवायुः सर्वं परभवायुश्च समानजातीयं परिपूर्णदलिकमस्तीति मिलितप्रदेशबाहुल्यं लभ्यते। बन्धानन्तरं चायुर्वेद्यमानं द्वितीयसमयेऽपवर्त्तयिष्यतीत्यत उक्तं बन्धान्त इति ॥ ३३ ॥

पूरित्तु पुव्वकोडीपुहुत्त नारयदुगस्स बंधंते। एवं पल्लतिगंते वेउव्वियसेसणवगम्मि ॥ ३४ ॥

व्याख्या—पूर्वकोटिपृथक्त्वं पूर्वकोटिसप्तकं यावत्संक्लिष्टाध्यवसायवशेन निरन्तरमापूर्य नरकद्विकं नरकगतिनरकानुपूर्वीरूपं भूयो भूयो बन्धेन निचितं कृत्वा नरकाभिमुखे बन्धान्तसमये तस्य नरकद्विकस्योत्कृष्टप्रदेशसत्कर्मस्वामी भवति। तथा एवमनेनैव प्रकारेण पूर्वकोटिपृथक्त्वं यावदभोगभूमिषु भोगभूमिषु च पल्योपमत्रयं यावद्विशुद्ध्याध्यवसायेन वैक्रियशेषनवकं वैक्रियैकादशकान्नरकद्विकापनयनेन देवद्विकवैक्रियसप्तकलक्षणं बन्धेनापूर्य देवत्वाभिमुखस्तासां देवद्विकवैक्रियसप्तकरूपनवप्रकृतीनामुत्कृष्टप्रदेशसत्कर्मस्वामी भवति ॥ ३४ ॥

तमतमगो सव्वलहुं सम्मत्तं लभिय सव्वचिरमद्धं । पूरित्ता मणुयदुगं सवज्जरिसहं सबंधंते ॥ ३५ ॥

व्याख्या—तमस्तमगः सप्तमपृथ्वीनारकः, सर्वलघु सर्वशब्दोऽत्यर्थेऽतिशीघ्रं जन्मानन्तरमन्तर्मुहूर्त्तमात्रे गते सतीत्यर्थः, सम्यक्त्वं लब्ध्वा सर्वचिराद्धमतीव दीर्घकालमन्तर्मुहूर्त्तोनत्रयस्त्रिंशत्सागरोपमलक्षणं यावत्सम्यक्त्वमनुपालयँस्तावन्तं कालं मनुजद्विकं वज्रर्षभनाराचसंहननं च बन्धेनापूर्य यस्मिन् समये मिथ्यात्वं यास्यति तस्मिन् समये बन्धाद्धाचरमभूते तयोर्मनुजद्विकवज्रर्षभनाराचसंहननयोरुत्कृष्टप्रदेशसत्कर्मस्वामी भवति ॥ ३५ ॥

सम्मादिट्ठिधुवाणं बत्तीसुदहीसयं चउक्खुत्तो । उवसामयित्तु मोहं खवेंतगे णियगबंधंते ॥ ३६ ॥

व्याख्या—सम्यक्त्वे सत्यवश्यं बन्धो यासां ताः सम्यग्दृष्टिध्रुवाः पञ्चेन्द्रियजातिसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसचतुष्कसुस्वरसुभगादेयरूपा द्वादश तासां द्वात्रिंशदधिकसागरोपमशतं यावद्बन्धेनोपचितानां चतुःकृत्वो मोहनीयमुपशमय्य क्षपयतः क्षपणायोद्यतस्य निजकबन्धान्ते निजनिजबन्धव्यवच्छेदकाले उत्कृष्टं प्रदेशसत्कर्म भवति । इह मोहनीयमुपशमयन्नशुभप्रकृतीनां प्रभूतानि दलिकानि गुणसङ्क्रमेणाधिकृतप्रकृतिषु सङ्क्रमयतीति कृत्वा चतुष्कृत्वो मोहोपशमग्रहणम् ॥ ३६ ॥

धुवबंधीण सुभाणं सुभथिराणं च नवरि सिग्घयरं । तित्थयराहारगतणू तेत्तीसुदही चिरचिया य ॥३७॥

व्याख्या—शुभानां ध्रुवबन्धिनीनां तैजससप्तकशुभवर्णाद्येकादशकागुरुलघुनिर्माणरूपाणां विंशतिसङ्ख्यानां शुभस्थिरयोश्च पूर्वोक्तेन प्रकारेणोत्कृष्टं प्रदेशसत्कर्म भावनीयं । नवरं चतुष्कृत्वो मोहनीयोपशमनानन्तरं शीघ्रतरं क्षपणाय समु-

द्यतस्येति वक्तव्यं, शेषं तथैव । तथा तीर्थकरनाम्नो गुणितकर्मांशेन त्रयस्त्रिंशत्सागरोपमाणि पूर्वकोटिद्व्याधिकानि यावदिति पूरयित्वा व्याख्येयं । बन्धेन पूरितस्य स्वबन्धान्तसमये उत्कृष्टं प्रदेशसत्कर्म । आहारकतनोराहारकसप्तकस्य तु चिरचितस्य देशोनपूर्वकोटिं यावद्भूयो भूयो बन्धेनोपचितस्य स्वबन्धव्यवच्छेदसमये उत्कृष्टप्रदेशसत्कर्म ॥ ३७ ॥

तुल्ला णपुंसवेएणेगिंदियथावरायवुज्जोया । विगलसुहुमत्तियावि य णरतिरियचिरच्चिया होंति ॥ ३८ ॥

व्याख्या—नपुंसकवेदेन तुल्या एकेन्द्रियजातिस्थावरातपोद्योता ज्ञेयाः, यथा नपुंसकवेदस्येशानदेवश्चवचरमसमये भूयो भूयो बन्धेनोपचितस्योत्कृष्टप्रदेशसत्कर्मोक्तं तथैतेषामपि वाच्यमित्यर्थः । तथा विकलत्रिकं द्वित्रिचतुरिन्द्रियजातिरूपं सूक्ष्मत्रिकं च सूक्ष्मापर्याप्तसाधारणरूपं, एताः षट् प्रकृतयो यदा तिर्यङ्मनुष्यश्चवैश्चिरचिताः पूर्वकोटिपृथक्त्वं यावदुपचिता भवन्ति तदा स्वबन्धान्तसमये तेषां तिर्यङ्मनुष्याणां ता उत्कृष्टप्रदेशसत्कर्माणो भवन्ति ॥ ३८ ॥

तदेवमुक्तमुत्कृष्टप्रदेशसत्कर्मस्वामित्वं, अथ जघन्यप्रदेशसत्कर्मस्वामित्वमाह—

खवियंसियम्मि पगयं जहन्नगे णियगसंतकम्मंते । खणसंजोइयसंजोअणाण चिरसम्मकालंते ॥ ३९ ॥

व्याख्या—क्षपितांश इति सूत्रे सप्तम्यास्तृतीयार्थत्वात्क्षपितकर्मांशेन जघन्यके जघन्यप्रदेशसत्कर्मस्वामित्वे प्रकृतमधिकारः निजकसत्कर्मान्त इति स्वसत्ताचरमसमये, एवं तावत्सर्वकर्मणां सामान्येनोक्तं । अथ येषां कर्मणां विशेषोऽस्ति तानि पृथगेवाह—"खणेत्यादि" इह क्षपितकर्मांशेन सम्यग्दृष्टिना सताऽनन्तानुबन्धिन उद्वलितास्ततः पुनरपि मिथ्यात्वं गतेन क्षणमन्तर्मुहूर्त्तकालं यावत्संयोजिता बद्धा ये संयोजना अनन्तानुबन्धिनस्तेषां ततो भूयोऽपि सम्यक्त्वं प्रतिपन्नस्य

तत्सम्यक्त्वं चिरं वे षट्षष्टी सागरोपमाणां यावदनुपाल्य क्षपणार्थमभ्युद्यतस्य क्षपणकाले यदैका स्थितिः स्वरूपापेक्षया समयमात्रा कर्मत्वसामान्यापेक्षया तु द्विसमयमात्रा शेषा भवति तदा तेषां जघन्यं प्रदेशसत्कर्म ॥ ३९ ॥

उव्वलमाणीणुव्वलणाए एगठिई दुसामइगा । दिट्ठिदुगे बत्तीसे उदहिसए पालिए पन्ना ॥ ४० ॥

व्याख्या—उद्वल्यमानानामुद्वलनप्रकृतीनामनन्तानुबन्धिनां प्रागुक्तत्वात्तद्वर्जितानामाहारकसप्तकवैक्रियसप्तकदेवद्विकमनुजद्विकनरकद्विकसम्यक्त्वसम्यङ्मिथ्यात्वोच्चैर्गोत्रलक्षणानां त्रयोविंशतिसङ्ख्यानामुद्वलनकाले यैका स्थितिः स्वरूपापेक्षया समयमात्रा सा तासां जघन्यं प्रदेशसत्कर्म । एतच्च सामान्येनोक्तं, अत्रैव विशेषमाह—"दिट्ठिदुगेत्यादि" द्वात्रिंशदधिकं सागरोपमाणां शतं यावत्सम्यक्त्वमनुपाल्य पश्चान्मिथ्यात्वं गतस्ततश्च पल्योपमासङ्ख्येयभागमात्रकालप्रमाणया मन्दोद्वलनया सम्यक्त्वमिश्रे उद्वलयितुं लग्नः, उद्वलयँश्च तद्दलिकं मिथ्यात्वे सङ्क्रमयति, सर्वसङ्क्रमेण चावलिकाया उपरितनं सकलमपि दलिकं सङ्क्रमितं, आवलिकागतं च दलिकं स्तिबुकसङ्क्रमेण सङ्क्रमयति, तत्सङ्क्रमव्यापारे च यदैका स्थितिः स्वरूपापेक्षया समयमात्रावस्थाना, कर्मत्वमात्रमधिकृत्य तु द्विसमयमात्रा शेषा भवति, तदा तयोः सम्यक्त्वमिश्रयोर्जघन्यं प्रदेशसत्कर्म ॥ ४० ॥

अंतिमलोभजसाणं मोहं अणुवसमइत्तु खीणाणं । णेयं अहापवत्तकरणस्स चरमम्मि समयम्मि ॥४१॥

व्याख्या—अन्तिमलोभयशसोः संज्वलनलोभयशःकीर्त्योः चतुरो वारान्मोहमनुपशमय्योपशमश्रेणिमकृत्वेत्यर्थः, शे-

षान्निः क्षपितकर्मांशक्रियान्निः क्षीणयोः यथाप्रवृत्तकरणचरमसमये जघन्यं प्रदेशसत्कर्म ज्ञेयं । मोहनीये उपशम्यमाने हि गुणसङ्क्रमोपनीतं प्रचुरं दलिकं प्राप्यते, न च तेनेह प्रयोजनमिति कृत्वा मोहनीयोपशमनप्रतिषेधः ॥ ४१ ॥

वेउव्वेक्कारसगं खणबंधगए उ णिरय जेट्ठठिई । उव्वट्टित्तु अबंधिय एगिंदिगए चिरुव्वलणे ॥ ४२ ॥

व्याख्या—नरकद्विकदेवद्विकवैक्रियसप्तकरूपं वैक्रियैकादशकं पूर्वं क्षपितकर्मांशेनोद्वलितं । ततो भूयोऽपि क्षणमन्तर्मुहूर्त्तकालं यावद्बद्धं । ततो ज्येष्ठस्थितौ नरकेऽप्रतिष्ठानाभिधनरकावासे गतस्तत्र च सता तेन तद्वैक्रियैकादशकं त्रयस्त्रिंशत्सागरोपमाणि यावदुपाकतः सङ्क्रमतश्च यथायोगमनुभूतं । ततो नरकादुद्वृत्य निर्गत्य तिर्यक्पञ्चेन्द्रियेषु मध्ये समुत्पन्नस्तत्र च तथाविधाध्यवसायाभावाद्वैक्रियैकादशकस्य भूयो न बन्धं कृतवान्, तत एकेन्द्रियेषु गतस्तत्र च तद्वैक्रियैकादशकं चिरोद्वलनयोद्वलयितुं लग्नस्तस्य चिरोद्वलनया तदुद्वलयतः सतो यदैका स्थितिः स्वरूपापेक्षया समयमात्रावस्थानाऽन्यथा तु द्विसमयमानाऽवशिष्यते तदा तस्य वैक्रियैकादशकस्य जघन्यं प्रदेशसत्कर्म भवति ॥ ४२ ॥

मणुयदुगुच्चागोएसु सुहुमखणबद्धगेसु सुहुमतसे । तित्थयराहारतणू अप्पद्धाबंधिया सुचिरं ॥ ४३ ॥

व्याख्या—मनुष्यद्विकमुच्चैर्गोत्रं च पूर्वं सूक्ष्मत्रसेन क्षपितकर्मांशेनोद्वलितं ततः सूक्ष्मेण सूक्ष्मैकेन्द्रियेण पृथिव्यादिना सता क्षणमन्तर्मुहूर्त्तकालं यावद्भूयोऽपि बद्धं, ततः सूक्ष्मत्रसेषु तेजोवायुषु मध्ये समुत्पन्नस्तत्र च चिरोद्वलनया मनुष्यद्विकोच्चैर्गोत्रे उद्वलयितुं लग्नः, उद्वलयतश्च तयोर्यदैका स्थितिर्द्विसमयमात्राऽवशिष्यते तदा तयोः सूक्ष्मक्षणबद्धयोर्जघन्यं प्रदेशसत्कर्म । तथा तीर्थकरनामाहारकसप्तकालं चतुरशीतिवर्षसहस्राणि सातिरेकाणि यावद्बद्ध्वा यः केवली जातः,

ततः सुचिरमतिप्रभूतं कालं देशोनपूर्वकोटिरूपं यावत्केवलिपर्यायं परिपाल्यायोगिकेवलिभावे वर्तमानस्य क्षपितकर्मांशस्य चरमसमये तीर्थकरनाम्नो जघन्यं प्रदेशसत्कर्म । अन्ये त्वाहुः—तीर्थकरनाम्नः क्षपितकर्मांशेन तत्प्रायोग्यजघन्ययोगिना सता प्रथमसमये बद्धा या लता सा जघन्यं प्रदेशसत्कर्म । आहारकतनुरित्याहारकसप्तकं तदल्पकालं बद्ध्वा मिथ्यात्वं गतस्य सुचिरमिति चिरोद्वलनयोद्वलयतः सतो यदैका स्थितिर्द्विसमयमात्रावस्थाना शेषीभवति तदा तस्य जघन्यं प्रदेशसत्कर्म प्राप्यते ॥ ४३ ॥

तदेवमुक्तं जघन्यप्रदेशसत्कर्मस्वामित्वं, अथ प्रदेशसत्कर्मस्थानप्ररूपणां चिकीर्षुः स्पर्धकप्ररूपणामाह—

चरमावलियपविट्ठा गुणसेढी जासिमत्थि णय उदओ। आवलिगासमयसमा तासिं खलु फड्डगाइं तु ॥४४॥

व्याख्या—चरमा सर्वान्तिमा या क्षपणकाले आवलिका तां प्रविष्टा गुणश्रेणिर्यासां प्रकृतीनामस्ति, न चोदयः, तासां स्त्यानर्द्धित्रिकमिथ्यात्वप्रथमद्वादशकषायनरकद्विकतिर्यग्द्विकाद्यजातिचतुष्टयातपोद्योतस्थावरसूक्ष्मसाधारणरूपाणामेकोनत्रिंशत्सङ्ख्यानामावलिकायां यावन्तः समयास्तत्समान्येव खलु स्पर्धकानि भवन्ति । तुरेवकारार्थः । खलुर्वाक्यालङ्कारे । अयमिह भावार्थः—अभव्यप्रायोग्यजघन्यप्रदेशसत्कर्मयुक्तसत्त्वेषु मध्ये समुत्पद्य तत्र देशविरतिं सर्वविरतिं वाऽनेकवारं लब्ध्वा चतुरो वारान्मोहनीयमुपशमय्य भूयोऽप्येकेन्द्रियेषु मध्ये समुत्पद्य तत्र च पल्योपमासङ्ख्येयभागमात्रं कालं यावत्स्थित्वा ततो मनुष्येषु मध्ये समुत्पन्नः सन् यः शीघ्रं क्षपणार्थमभ्युद्यतस्तस्य चरमे स्थितिखण्डेऽपगते सति चरमावलिकायां स्तिबुकसङ्क्रमेण क्षीयमाणायां यावदेका स्थितिर्द्विसमयमात्रा शेषीभवति तदा सर्वजघन्यं यत्प्रदेशसत्कर्म तत्प्र-

थमं प्रदेशसत्कर्मस्थानं, तत एकपरमाणुप्रक्षेपे द्वितीयं, द्विपरमाणुप्रक्षेपे तृतीयं, एवं यथोत्तरमेकैकपरमाणुप्रक्षेपेण नानाजीवापेक्षयाऽनन्तानि प्रदेशसत्कर्मस्थानानि वाच्यानि, यावत्तस्मिन्नेव चरमे स्थितिविशेषे गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं भवति। तदूर्ध्वमन्यत्प्रदेशसत्कर्मस्थानं न प्राप्यत इतीदमेकं स्पर्धकं। इदं तु चरमस्थितिमधिकृत्यैकस्थितिकं स्पर्धकं। एवं द्वयोश्चरमस्थित्योः शेषीभूतयोर्द्विस्थितिकं द्वितीयं स्पर्धकं वक्तव्यं, तिसृषु च स्थितिषु त्रिस्थितिकं तृतीयं, एवं तावद्वाच्यं यावत्समयोनावलिकासमयप्रमाणानि स्पर्धकानि भवन्ति। अत्र समयोनावलिकाप्रमाणं स्पर्धकं सर्वोत्कृष्टं, एकस्थितिकं सर्वजघन्यं, द्वित्रादिकासु च स्थितिषु शेषीभूतासु मध्यममिति विवेकः। तथा चरमस्थितिघातस्य चरमप्रक्षेपमादिं कृत्वा पश्चानुपूर्व्या यथोत्तरं वृद्धानि प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावन्निजनिजमुत्कृष्टप्रदेशसत्कर्म। तत एतावदप्येतन्निखिलस्थितिगतं यथास्वमुक्तप्रकृतीनामेकं स्पर्धकं विवक्ष्यते। तत एतेन स्पर्धकेन सहितानि पररूपान्तःप्रवेशगलितैकसमयकचरमैकस्थितिकादीन्यावलिकासमयप्रमाणानि स्पर्धकानि भवन्ति ॥ ४४ ॥

संजलणतिगे चेवं अहिगाणि य आलिगाइ समएहिं।ऊसमयहीणेहिं गुणाणि जोगट्ठाणाणि कसिणाणि

व्याख्या—संज्वलनत्रिके क्रोधमानमायारूपे एवं पूर्वोक्तेन प्रकारेण स्पर्धकानि वाच्यानि। अयमिह तात्पर्यार्थः—क्रोधादीनां प्रथमस्थितिर्यावदावलिका शेषा न भवति तावत् स्थितिघातरसघातबन्धोदयोदीरणाः प्रवर्तन्ते, आवलिकाशेषायां तु प्रथमस्थिताववतिष्ठमानायां ता व्यवच्छिद्यन्ते, ततोऽनन्तरसमये समयोनावलिकागतं समयद्वयोनावलिकाद्विकबद्धं च सदस्ति, अन्यत्सर्वं क्षीणं, तत्र समयोनावलिकागतदलिकस्पर्धकभावना प्राग्वदेव कर्तव्या। समयद्वयोनावलि-

कादिकबद्धदलिकस्य पुनरन्यथा स्पर्धकभावना क्रियते, सत्कर्मवृद्धिप्रकाराद्बन्धकृतवृद्धिप्रकारस्यान्यथाभावात् प्रागुक्तरीत्याऽत्र स्पर्धकस्वरूपस्याप्राप्यमाणत्वात्। अथ कथं स्थितिघातरसघातबन्धोदयोदीरणाव्यवच्छेदानन्तरं समयद्वयोनावलिकाद्विकबद्धमेव सदस्ति, न शेषमिति प्रतीतिपथमायाति? उच्यते—इह चरमसमयक्रोधादिवेदकेन यद्बद्धं दलिकं तद्बन्धावलिकोत्तीर्णं सदावलिकामात्रेण कालेन निरवशेषं सङ्क्रम्यमाणमावलिकाचरमसमये स्वरूपापेक्षयाऽकर्मतां नीयते, द्विचरमसमयक्रोधादिवेदकेन च यद्बद्धं तदपि बन्धावलिकायामतीतायामन्येनावलिकामात्रेण कालेन सङ्क्रम्यमाणमावलिकाचरमसमयेऽकर्मतां नीयते। एवं यत्कर्म यस्मिन् समये बद्धं तत्तस्माद्द्वितीयसमयादारभ्य द्वितीयावलिकाचरमसमयेऽकर्मीभवति। तथा च बन्धाद्यभावप्रथमसमये समयद्वयोनावलिकाद्विकबद्धमेव सत्प्राप्यते, न शेषं, यत आवलिकाया असत्कल्पनया चतुःसमयात्मिकायाः कल्पने बन्धादिव्यवच्छेदसमयादर्वागष्टमे समये बद्धं चतुःसमयात्मिकायां बन्धावलिकायां परिगलितायामन्यया चतुःसमयात्मिकयाऽऽवलिकयाऽन्यत्र सङ्क्रम्यमाणं चरमसमये बन्धादिव्यवच्छेदसमयरूपे सर्वात्मनाऽन्यत्र सङ्क्रमितत्वात् स्वरूपेण न प्राप्यते। सप्तमसमये च यद्बद्धं तच्चतुःसमयात्मिकायामावलिकायां परिहीणायामन्यया चतुःसमयात्मिकयाऽऽवलिकयाऽन्यत्र सङ्क्रम्यमाणं बन्धादिव्यवच्छेदानन्तरसमये सर्वात्मनाऽन्यत्र सङ्क्रमितत्वात् स्वरूपेण न प्राप्यते। षष्ठादिसमयबद्धं तु प्राप्यते। ततो बन्धादौ व्यवच्छिन्ने सत्यनन्तरसमये समयद्वयोनावलिकाद्विकबद्धमेव सत्, नान्यदिति, तत्र बन्धादिकं यस्मिन् समये भवति, तदग्रिमसमये च न भवति, तस्मिन् बन्धादिव्यवच्छेदसमये जघन्ययोगिना सता यद्बद्धं तस्य बन्धावलिकायामतीतायामन्यया बन्धावलिकयाऽन्यत्र सङ्क्रम्यमाणस्य चरमसमये

यद्दलिकं सङ्क्रमयिष्यति तत्संज्वलनक्रोधस्य जघन्यं प्रदेशसत्कर्मस्थानं । एवं द्वितीययोगस्थानवर्तिना बन्धादिव्यवच्छेदसमये यद्बद्धं तद्दलिकं चरमसमये द्वितीयं प्रदेशसत्कर्मस्थानं । एवमुत्तरोत्तरयोगस्थानानुसरणेन तावद्वाच्यं यावदुत्कृष्टयोगस्थानवर्तिना सता बन्धादिव्यवच्छेदसमये यद्बद्धं तद्दलिकं चरमसमये सर्वोत्कृष्टमन्तिमं प्रदेशसत्कर्मस्थानं । एवं जघन्ययोगस्थानादारभ्योत्कृष्टयोगस्थानपर्यन्तं यावन्ति योगस्थानानि भवन्ति तावन्ति बन्धादिव्यवच्छेदसमयबद्धस्य दलिकस्य प्रदेशसत्कर्मस्थानान्यपि चरमसमये प्राप्यन्ते, इदमेकं स्पर्धकं । एवं बन्धादिव्यवच्छेदद्विचरमसमये जघन्ययोगादिना यद्बध्यते तत्रापि द्वितीयावलिकाचरमसमये प्रागिव तावन्ति प्रदेशसत्कर्मस्थानानि भावनीयानि । केवलं स्थितिद्वयभावीनि तान्यवसेयानि, तदानीं बन्धादिव्यवच्छेदचरमसमयबद्धस्यापि दलिकस्य द्विसमयस्थितिकस्य प्राप्यमाणत्वात्, इदं द्वितीयं स्पर्धकं । एवं बन्धादिव्यवच्छेदत्रिचरमसमये जघन्ययोगादिना यद्बद्धं तस्यापि द्वितीयावलिकाचरमसमये प्रागिव तावन्ति प्रदेशसत्कर्मस्थानानि भवन्ति । नवरं तानि स्थितित्रयभावीन्यवबोद्धव्यानि, तदानीं बन्धादिव्यवच्छेदचरमसमयबद्धस्यापि दलिकस्य द्विसमयस्थितिकस्य द्विचरमसमयबद्धकर्मसत्कस्यापि दलिकस्य त्रिसमयस्थितिकस्य प्राप्यमाणत्वात्, इदं तृतीयं स्पर्धकं । एवं समयद्वयोनावलिकाद्विके यावन्तः समयास्तावन्ति स्पर्धकानि भवन्ति । एवं संज्वलनमानमाययोरपि तावन्ति स्पर्धकानि प्रत्येकं वाच्यानि । तत आह—"अहिगाणीत्यादि" योगस्थानानि योगस्थानकृतप्रदेशसत्कर्मस्पर्धकानि कृत्स्नानि समुदितानि विवक्षितानि आवलिकासमयैर्ह्रांन्यां समयान्यामूनैर्गुणानीति गुणितान्यधिकानि प्राप्यन्ते। तथाहि—बन्धादिव्यवच्छेदानन्तरसमये समयद्वयोनावलिकाद्विकसमयप्रमाणान्यवाप्यन्ते स्पर्धकानि । तदा च प्रथमायां

स्थितावनुदयावलिकैका शेषीभूताऽवतिष्ठते, द्वितीयस्थितौ च द्विसमयहीनद्व्यावलिकाप्रमाणमुत्कृष्टं स्पर्धकमस्ति । यदा तु प्रथमस्थितिसत्कानुदयावलिका प्रकृत्यन्तरेषु सङ्क्रम्यमाणा निःशेषा व्यवच्छिन्ना भवति, तदा परतोऽपि द्वितीयस्थितिगतावलिकाऽन्यत्र सङ्क्रमेण व्यवच्छिद्यमाना त्रुट्यति । तत एकावलिकाप्रमाणानि स्पर्धकान्यन्यत्र सङ्क्रमद्वारा त्रुटितत्वात् पृथङ् न गण्यन्त इति तेषु प्रथमस्थितौ च व्यवच्छिन्नायां शेषाणि समयद्वयोनावलिकासमयप्रमाणान्येवाधिकानि प्राप्यन्ते, नान्यानीति ॥४५॥

वेएसु फड्डगदुगं अहिगा पुरिसस्स बे उ आवलिया।दुसमयहीणा गुणिया जोगट्ठाणेहिं कसिणेहिं ॥४६॥

व्याख्या—वेदेषु स्त्रीवेदपुरुषवेदनपुंसकवेदेषु प्रत्येकं स्पर्धकद्वयं भवति । तथाहि—कश्चिज्जन्तुरभवसिद्धिकप्रायोग्यजघन्यप्रदेशसत्कर्मा त्रसेषु समुत्पद्य तत्र देशविरतिं सर्वविरतिं चानेकशः समासाद्य चतुरश्च वारान्मोहनीयमुपशमय्य द्वात्रिंशदधिकं च सागरोपमाणां शतं यावत्सम्यक्त्वमनुपाल्याप्रतिपतितसम्यक्त्वो नपुंसकवेदेन क्षपकश्रेणिमारूढः, ततो नपुंसकवेदस्य प्रथमस्थितौ द्विचरमसमये वर्तमानेनोपरितनस्थितिखण्डमन्यत्र सङ्क्रमं नीतं । तथा च सत्युपरितनी स्थितिः सर्वात्मना निर्लेपीकृता । ततः प्रथमस्थितौ चरमसमये सर्वजघन्यं यत्प्रदेशसत्कर्म तत्प्रथमं प्रदेशसत्कर्मस्थानं । तत एकैकपरमाणुप्रक्षेपेण यथोत्तरं नानाजीवापेक्षयाऽनन्तानि प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं, इदमेकं स्पर्धकं । तथा द्वितीयस्थितौ चरमखण्डे सङ्क्रम्यमाणे चरमसमये प्रागुक्तक्षपितकर्मांशप्रकारेण सर्वजघन्यं यत्प्रदेशसत्कर्मस्थानं तदादिं कृत्वा नानाजीवानपेक्ष्य यथायोगमुत्तरोत्तरवृद्ध्या निरन्तरं प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं । तावन्ति तानि द्वितीयं स्पर्धकं । अथवा यावत्प्रथमा स्थि-

तिर्द्वितीया च स्थितिर्विद्यते तावदेकं स्पर्धकं, द्वितीयस्थितौ च चरमसंज्ञोज्ञेन क्षीणायां प्रथमस्थितौ समयमात्रायां शेषीभूतायां द्वितीयं स्पर्धकं। एवमेव प्रकारद्वयेन स्त्रीवेदस्यापि स्पर्धकद्वयं भावनीयं। पुरुषवेदे तु स्पर्धकद्वयमित्थं भावनीयं—उदयचरमसमये जघन्यं प्रदेशसत्कर्म आदि कृत्वा नानाजीवापेक्षयैकैकपरमाणुवृद्ध्या निरन्तरं प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं, एतानि च सर्वाण्यनन्तानि, एतान्येकं स्पर्धकं। तथोदयचरमसमये द्वितीयस्थितौ चरमखण्डे सङ्क्रम्यमाणे सर्वजघन्यप्रदेशसत्कर्मस्थानमादि कृत्वा प्राग्वद्द्वितीयं स्पर्धकं वाच्यं। किंच "अहिगा पुरिसस्सेत्यादि" पुरुषवेदस्याधिकान्यपि स्पर्धकानि भवन्ति। कियन्तीति चेदुच्यते—द्वे आवलिके द्विसमयहीने, प्रथमायास्तृतीयार्थत्वात् द्विसमयहीनाभ्यां द्वाभ्यामावलिकाभ्यां गुणितानि योगस्थानैः कृत्स्नैः तृतीयायाः प्रथमार्थत्वात् कृत्स्नानि योगस्थानानि आवलिकाधिकसमयैर्द्विरूपहीनैर्गुणिता यावन्तः सकलयोगस्थानसमुदायास्तावन्ति स्पर्धकान्यधिकानि भवन्ति समयद्वयहीनावलिकाधिकसमयप्रमाणान्यधिकानि भवन्तीत्यर्थः। तथाहि—पुरुषवेदस्य बन्धोदयादिव्यवच्छेदे जाते सति समयद्वयोनावलिकाधिकबद्धं दलिकं विद्यते। ततोऽवेदकस्य सतः संज्वलनत्रिकोक्तप्रकारेण योगस्थानान्यपेक्ष्य समयद्वयहीनावलिकाद्वयसमयप्रमाणानि स्पर्धकान्युपपद्यन्ते। इदं च द्वितीयस्थितिप्रकारान्निधानमेव द्रष्टव्यं (इदं च प्रकारांतरान्निधानान्निप्रायेण द्रष्टव्यं) "दो इगि संतं हवा एए" इति पञ्चसङ्ग्रहप्रतीकस्य "अथवा एते द्वे स्पर्धके द्रष्टव्ये, यावत्प्रथमा स्थितिर्द्वितीया च स्थितिर्विद्यते तावदेकं स्पर्धकं। प्रथमस्थितौ द्वितीयस्थितौ वाऽपरस्थितिद्वये शेषीभूतायां द्वितीयं स्पर्धकं। तत्र स्त्रीवेदस्य नपुंसकवेदस्य वा द्वितीयस्थितिसत्कचरमद-

लिकप्रक्षेपे एका स्थितिः प्रथमस्थितेः शेषीभूता भवति, पुरुषवेदस्य च प्रथमस्थितावुदयेन क्षीणायां समयद्वयोनावलिकाद्विकबद्धप्रमाणा द्वितीया स्थितिः शेषीभूता भवती"त्येवं वृत्तौ व्याख्यानात् ॥ ४६ ॥

सम्प्रत्युक्तानां वक्ष्यमाणानां च स्पर्धकानां सामान्यरूपं लक्षणमाह—

सव्वजहन्नाढत्तं खंधुत्तरउं णिरंतरं उप्पिं । एगं उव्वलमाणी लोभजसा णोकसायाणं ॥ ४७ ॥

व्याख्या—सर्वजघन्यात्प्रदेशसत्कर्मस्थानादारब्धं स्कन्धेनैकैकेन कर्मस्कन्धेनोत्तरतः पूर्वस्मादुत्तरोत्तरेण निरन्तरं प्रदेशसत्कर्मस्थानजालं तावन्नेयं यावत् "उप्पिं ति" उपरितनं सर्वोत्कृष्टं प्रदेशसत्कर्मस्थानमायाति । इहैकैककर्मस्कन्धोत्तरवृद्ध्यभिधानं योगस्थानवशलब्धस्पर्धकापेक्षया, अन्यथा तु प्रागेकैकप्रदेशोत्तरवृद्धिरेवाभिहितेति द्रष्टव्यं । तदेवमुक्तं स्पर्धकानां सामान्यलक्षणं, अथोद्वलनप्रकृतीनां स्पर्धकप्ररूपणामाह—"एगं उव्वलमाणी" अत्र प्रथमैकवचनस्य षष्ठीबहुवचनपरत्वादुद्व्यमानप्रकृतीनां त्रयोविंशतिसङ्ख्यानामेकं स्पर्धकमित्यर्थः । तत्र सम्यक्त्वस्य तावद्भावना विधीयते—अन्यतरप्रायोग्यजघन्यस्थितिसत्कर्मा त्रसेषु मध्ये समुत्पद्य तत्र सम्यक्त्वं देशविरतिं चानेकवारान् लब्ध्वा चतुरश्च वारान्मोहनीयमुपशमय्य द्वात्रिंशं सागरोपमशतं च यावत्सम्यक्त्वमनुपाल्य मिथ्यात्वं गतः, ततश्चिरोद्वलनया सम्यक्त्वमुद्वलयतो यदा चरमखण्डं सङ्क्रमेण परिगलितमेका च शेषोदयावलिका तिष्ठति, तामपि च स्तिबुकसङ्क्रमेण मिथ्यात्वे सङ्क्रमयति, सङ्क्रमयतश्च यदैका स्थितिर्द्विसमयमात्राऽवशिष्यते तदा सम्यक्त्वस्य जघन्यं प्रदेशसत्कर्मस्थानं, ततो नानाजीवापेक्षयैकैकप्रदेशवृद्ध्याऽनन्तानि प्रदेशसत्कर्मस्थानानि तावन्नेतव्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं भवति,

इदमेकं स्पर्धकं । एवं सम्यङ्मिथ्यात्वस्यापि निरवशेषं वाच्यं । एवमेव च शेषाणामप्युद्वलनयोग्यानां वैक्रियैकादशकाहारकसप्तकोच्चैर्गोत्रमनुष्यद्विकरूपाणां वाच्यं । नवरं तासां द्वात्रिंशदधिकसागरोपमशतप्रमाणः सम्यक्त्वकालो मूलत एव न वाच्यः । इहोद्वलनप्रकृतीनामेकस्पर्धकान्निधानमुपलक्षणपरं द्रष्टव्यं, न तु शेषनिषेधपरं, यावता प्रागुक्तानामनुदयवतीनामिवासामप्यावलिकासमयसमान्येव स्पर्धकानि लभ्यन्त इति । उक्तं च पञ्चसङ्ग्रहे—"अणुदयतुल्लं उव्वलणिगाण जाणिज्ज दीहउव्वलणे त्ति" उद्वलनप्रकृतीनां दीर्घोद्वलने चिरोद्वलने क्रियमाणे स्पर्धकपटलमनुदयतुल्यमनुदयप्रकृतितुल्यं जानीहीत्येतदर्थः । "लोभजसा णोकसायाणं ति" प्रथमायाः षष्ठ्यर्थत्वात् संज्वलनलोभयशःकीर्त्योर्नोकषायाणां च षण्णामेकं स्पर्धकं । तत्राभव्यप्रायोग्यजघन्यस्थितिसत्कर्मा त्रसेषु मध्ये समुत्पन्नः, तत्र चतुष्कृत्वो मोहोपशममन्तरेण शेषाभिः क्षपितकर्मांशक्रियाभिः कर्मदलिकं प्रभूतं क्षपयित्वा चिरकालं संयममनुपाल्य क्षपणायोत्थितः, तस्य यथाप्रवृत्तकरणचरमसमये जघन्यं प्रदेशसत्कर्म । ततस्तस्मादारभ्य नानाजीवापेक्षयैकैकप्रदेशवृद्ध्या निरन्तराणि प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावच्छुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं । एवमेकं संज्वलनलोभयशःकीर्त्योः स्पर्धकमवाप्यते । उपशमश्रेणिकरणे प्रभूतानां प्रकृत्यन्तरदलिकानां गुणसङ्क्रमेण समागमाज्जघन्यं प्रदेशसत्कर्म न प्राप्यत इति चतुष्कृत्वो मोहोपशममन्तरेणेति व्याकृतं । हास्यादीनां षण्णां नोकषायाणां प्रत्येकमेकैकस्पर्धकभावना चेयम्—स एवाभव्यसिद्धिकप्रायोग्यजघन्यप्रदेश[1] सत्कर्मा त्रसेषु मध्ये समुत्पन्नः, तत्र सम्यक्त्वं देशविरतिं चानेकशो लब्ध्वा चतु-

१ स्थितिसत्कर्मा इति पञ्चसङ्ग्रहवृत्तौ ।

रश्च वारान्मोहनीयमुपशमय्य स्त्रीवेदनपुंसकवेदौ भूयो भूयो बन्धेन हास्यादिदलिकसङ्क्रमेण च प्रभूतमापूर्य मनुष्यो जातः, तत्र चिरकालं संयममनुपाल्य क्षपणायोत्थितः, तस्य चरमखण्डचरमसमये यद्विद्यमानं प्रत्येकं षण्णां नोकषायाणां प्रदेशसत्कर्म तत्सर्वजघन्यं । तत आरभ्य नानाजीवापेक्षया एकैकप्रदेशवृद्ध्याऽनन्तानि निरन्तराणि प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं । एवं षण्णां नोकषायाणां प्रत्येकमेकं स्पर्धकं संभवति ॥ ४७ ॥

अथ मोहनीयवर्जानां घातिकर्मणां स्पर्धकनिरूपणार्थमाह—

तिण्हंपि गवोच्छेया खीणकसायस्स सेसकालसमा । एगट्ठिया घाईणं निद्दापयलाण हिच्चेगं ॥ ४८ ॥

व्याख्या—क्षीणकषायस्य स्थितिखण्डकव्यवच्छेदात् स्थितिघातव्यवच्छेदात् परतो यः शेषः कालस्तिष्ठति स्वसङ्ख्येयभागलक्षणस्तत्समयसमानि स्पर्धकानि घातिकर्मणामेकाधिकानि भवन्ति । निद्राप्रचलयोस्तु हित्वा परित्यज्यैकं चरमस्थितिगतं स्पर्धकं शेषाणि वाच्यानि, निद्राप्रचलयोर्ह्युदयाभावात् स्वरूपेण चरमसमये दलिकं न प्राप्यते, किं तु परप्रकृतिरूपेण, तेन तयोरेकस्पर्धकं चरमस्थितिगतं त्यज्यते, शेषघातिकर्मणां तूदयवत्त्वात्तन्न परित्यज्यते । अधिकृतस्पर्धकभावनाचेयम्—क्षीणकषायाद्धायाः सङ्ख्येयेषु भागेषु गतेषु सत्स्वेकस्मिंश्च सङ्ख्येयतमेऽन्तर्मुहूर्त्तप्रमाणे भागेऽवतिष्ठमाने ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकानां स्थितिसत्कर्म सर्वापवर्त्तनयाऽपवर्त्य क्षीणकषायाद्धासमं क्रियते, निद्राप्रचलयोस्त्वेकसमयहीनं, तदानीं च स्थितिघातादयो निवर्त्तन्ते, ततः क्षीणकषायाद्धासमीकृतं स्थितिसत्कर्म यथायोगमुदयोदीरणाभ्यां क्षयमुपगच्छत्तावत्स्थितिविशेषतामापद्यते यावदेका स्थितिः शेषीभवति । तस्यां च क्षपितकर्मांशस्य यत्सर्व-

जघन्यं प्रदेशसत्कर्म तत्प्रथमं प्रदेशसत्कर्मस्थानं । तत एकस्मिन् परमाणौ प्रक्षिप्ते द्वितीयं, परमाणुद्वयप्रक्षेपे तृतीयं, एवमेकैकपरमाणुवृद्ध्या निरन्तराणि प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावदुद्वेल्लितकर्मांशस्य सर्वोत्कृष्टप्रदेशसत्कर्मस्थानं, इदमेकं स्पर्धकं । द्वयोः स्थित्योः शेषीभूतयोरुक्तप्रकारेण द्वितीयं स्पर्धकं । तिसृषु च स्थितिषु शेषीभूतासु तृतीयं स्पर्धकं । एवं क्षीणकषायाद्धासमीकृते स्थितिकर्मणि यावन्तः स्थितिविशेषास्तावन्ति स्पर्धकानि भवन्ति । चरमस्य च स्थितिघातस्य चरमं प्रक्षेपमादिं कृत्वा पश्चानुपूर्व्या प्रदेशसत्कर्मस्थानानि यथोत्तरं वृद्धानि तावद्वाच्यानि यावन्निजनिजं सर्वोत्कृष्टं प्रदेशसत्कर्म तत एतदपि सकलस्थितिगतमेकं स्पर्धकं द्रष्टव्यं । ततस्तेनाधिकानि स्थितिघातव्यवच्छेदात् परतो भाविक्षीणकषायाद्धासमयसमानि स्पर्धकानि भवन्ति । निद्राप्रचलयोस्तु द्विचरमस्थितिमवधीकृत्य स्पर्धकानि वाच्यानि, चरमसमये तद्व्यवच्छिकाप्राप्तेः । तत एकेन हीनानि तयोः स्पर्धकानि द्रष्टव्यानि ॥ ४८ ॥

सेलेसिसंतिगाणं उदयवईणं तु तेण कालेणं । तुल्ला णेगहियाइं सेसाणं एगहीणाइं ॥ ४९ ॥

व्याख्या—शैलेशी अयोग्यवस्था, तस्यां सत्ता यासां प्रकृतीनां ताः शैलेशीसत्ताकाः, ताश्च द्विधा—उदयवत्योऽनुदयवत्यश्च । तत्रोदयवत्यो मनुजगतिमनुजायुःपञ्चेन्द्रियजातित्रससुभगादेयपर्याप्तबादरयशःकीर्त्तितीर्थकरोच्चैर्गोत्रान्यतरवेदनीयरूपा द्वादश तासां, तेनायोगिकालेन तुल्यानि अयोगिसमयसमसङ्ख्यानीत्यर्थः, स्पर्धकान्येकेनाधिकानि भवन्ति । तथाहि—अयोगिकेवलिनश्चरमसमये क्षपितकर्मांशमपेक्ष्य यत्सर्वजघन्यं प्रदेशसत्कर्मस्थानं तत्प्रथमं, तत एकैकप्रदेशवृद्ध्या नानाजीवापेक्षयाऽनन्तानि प्रदेशसत्कर्मस्थानानि तावद्द्रष्टव्यानि यावदुद्वेल्लितकर्मांशस्य सर्वोत्कृष्टं प्रदेशसत्कर्मस्थानं,

इदमेकं स्पर्धकं। एवमेव द्वयोः स्थित्योः शेषीभूतयोर्द्वितीयं स्पर्धकं, तिसृषु स्थितिषु तृतीयं। एवं निरन्तरं तावद्वाच्यं यावदयोगिप्रथमसमयः। तथा सयोगिकेवलिचरमसमये चरमस्थितिघातस्य यश्चरमः प्रदेशस्तत आरभ्य पश्चानुपूर्व्या स्वस्वसर्वोत्कृष्टप्रदेशसत्कर्मस्थानान्तमपि सकलस्वस्वस्थितिगतमेकैकं स्पर्धकं द्रष्टव्यं। ततोऽयोगिकेवलिगुणस्थाने यावन्तः समयास्तावन्ति स्पर्धकान्येकेनाधिकान्युदयवतीनां प्रत्येकं भवन्ति, शेषाणां त्वनुदयवतीनां त्र्यशीतिसङ्ख्यानां तावन्ति स्पर्धकान्येकेनोनानि भवन्ति, यतस्तासामयोगिकेवलिचरमसमये उदयवतीषु स्तिबुकसङ्क्रमेण सङ्क्रम्यमाणानां चरमसमयगतं स्पर्धकं न प्राप्यत इति तेन हीनानि तासां स्पर्धकानि भवन्ति। यद्यपीह मनुष्यगत्यादीनामुद्वलनप्रकृतिषु मध्ये प्रागेव स्पर्धकप्ररूपणा कृता तथापीहापि तासां स्पर्धकानि प्राप्यन्त इति भूय उपादानम् ॥ ४९ ॥

बन्धनादिकरणेष्वपि यथायोगमित्थंभूतस्पर्धकातिदेशमाह—

संभवउं ठाणाइं कम्मपएसेहिँ होंति नेयाइं। करणेसु य उदयम्मि य अणुमाणेणेवमेएण ॥ ५० ॥

व्याख्या—एवमुपदर्शितेन, एतेन बुद्धिसमीपतरवर्त्तिनाऽनुमानेन प्रकारेण संभवतः संभवमाश्रित्य स्थानानि प्रदेशसत्कर्मस्थानानि करणेषु बन्धनादिषूदये च कर्मप्रदेशेभ्यः कर्मप्रदेशानधिकृत्य ज्ञेयानि ज्ञातव्यानि। तथाहि—बन्धनकरणे जघन्ययोगस्थानादारभ्य यावदुत्कृष्टं योगस्थानं तावन्ति प्रदेशसत्कर्मस्थानानि बन्धमाश्रित्य प्राप्यन्ते, तावन्ति चैकं स्पर्धकं, एवं सङ्क्रमादिष्वपि प्रत्येकं यथायोगं भावनीयम् ॥ ५० ॥

करणोदयसंताणं पगइठाणेसु सेसगतिगे य। भूयक्कारप्पयरो अवट्ठिउं तह अवत्तव्वो ॥ ५१ ॥

व्याख्या—अष्टानां करणानामुदयसत्तयोश्च प्रकृतिस्थानेषु शेषके च त्रिके स्थित्यनुभागप्रदेशरूपे प्रत्येकं चत्वारो भेदा ज्ञातव्याः । तथाहि—भूयस्कारोऽल्पतरोऽवस्थितोऽवक्तव्यश्च ॥ ५१ ॥

एतेषां चतुर्णां लक्षणमाह—

एगादहिगे पढमो एगाईऊणगम्मि बिइओ त्ति । तत्तियमेत्तो तइओ पढमे समए अवत्तव्वो ॥ ५२ ॥

व्याख्या—स्तोकप्रकृत्यादिबन्धाद्यनन्तरमेकाद्यधिकप्रकृत्यादिबन्धादिसंज्ञवे प्रथमो नाम भूयस्कारः । प्रभूतप्रकृत्यादिबन्धाद्यनन्तरमेकाद्यूनबन्धादिसंज्ञवे द्वितीय इत्यल्पतरः । यावन्मात्रः प्रथमे समये बन्धादिस्तावन्मात्र एव द्वितीयादिसमये प्रवर्त्तमानस्तृतीयो भेदोऽवस्थितः । यदा तु सर्वथैवाबन्धकादिर्भूत्वा भूयोऽपि बन्धादिकमारभते तदा स बन्धादेश्चतुर्थो भेदोऽवक्तव्यनामा, भूयस्कारादिशब्देन वक्तुमशक्यत्वात् । इह प्रकृतिबन्धोदयोदीरणासत्ताश्रितं भूयस्कारादिस्वरूपं पञ्चसङ्ग्रहानुसारेण भाव्यते—तत्र मूलप्रकृतीनां चत्वारि बन्धस्थानानि एका षट् सप्ताष्टौ च । तत्रैकां प्रकृतिं सातवेदनीयलक्षणां बध्नत एका, सा चोपशान्तमोहादेः । षट् प्रकृतीर्बध्नतः षट्, ताश्च सूक्ष्मसम्परायस्य । सप्त बध्नतां सप्त, ताश्च मिश्रापूर्वकरणानिवृत्तिबादराणां सदा, शेषाणां चायुर्बन्धाभावे । अष्टौ बध्नतामष्टौ, ताश्च मिश्रवर्जितमिथ्यादृष्ट्यादिप्रमत्तसंयतान्तानामायुर्बन्धकाले द्रष्टव्याः । अत्र त्रयो भूयस्काराः, तथाहि—उपशान्तमोहगुणस्थानके एकां प्रकृतिं बद्ध्वा ततः प्रतिपत्य सूक्ष्मसम्परायगुणस्थाने षट् प्रकृतीर्बध्नतः प्रथमे समये भूयस्कारः, शेषकालं त्ववस्थितः, एष प्रथमो भूयस्कारः । ततोऽपि प्रतिपततोऽनिवृत्तिबादरसम्प-

राये सप्त बध्नतः प्रथमसमये द्वितीयो भूयस्कारः, शेषकालं त्ववस्थितः । सप्त बद्ध्वाऽष्टौ प्रमत्तादिगुणस्थानेषु बध्नतः प्रथमसमये तृतीयो भूयस्कारः, शेषकालं त्ववस्थितः । तथा त्रयोऽल्पतराः, ते चैवम्—अष्ट बद्ध्वा सप्त बध्नतः प्रथमे समयेऽल्पतरः, शेषकालं त्ववस्थितः, इत्येष प्रथमोऽल्पतरः । यदा तु सप्त बद्ध्वा सूक्ष्मसम्परायगतः षड् बध्नाति तदा प्रथमसमये द्वितीयोऽल्पतरः, शेषकालं त्ववस्थितः । षड् बध्ध्वोपशान्तमोहे क्षीणमोहे वैकां बध्नतः प्रथमसमये तृतीयोऽल्पतरः, शेषकालं त्ववस्थितः । तदेवं मूलप्रकृतिबन्धस्थानेषु त्रयो भूयस्कारास्त्रयोऽल्पतराश्चत्वारश्चावस्थिता बन्धाश्चतुर्ष्वपि स्थानेष्ववस्थितस्य प्राप्यमाणत्वादिति सिद्धं । अवक्तव्यबन्धस्तु मूलप्रकृतीनां न संभवति, सर्वमूलप्रकृत्यबन्धकस्यायोगिकेवलिनो भूयोऽपि बन्धकत्वाभावात् ।

उदयस्थानानि मूलप्रकृतीनां त्रीणि—अष्टौ सप्त चतस्रश्चेति । तत्राष्टानामुदयः सूक्ष्मसम्परायं यावत्, मोहोदयं विना सप्तानामुपशान्ते क्षीणमोहे वा, चतसृणां घातिवर्जानां केवलिनः, अत्रैक एव भूयस्कारः । उपशान्तमोहे सप्तवेदको भूत्वा ततः प्रतिपाते भूयोऽप्यष्टौ वेदयत इति । चतुर्वेदकस्तु भूत्वा सप्ताष्टौ वा न वेदयते, चतुर्वेदकत्वस्य सयोग्यवस्थायां भावात्, ततश्च प्रतिपाताभावात्, तत एक एवात्र भूयस्कारो, द्वावल्पतरौ, त्रयोऽवस्थिताः, अवक्तव्यस्तु नास्ति, सर्वकर्मावेदकस्य सिद्धस्य भूयोऽपि कर्मवेदकत्वासंभवात् ।

उदीरणास्थानानि मूलप्रकृतीनां पञ्च । तथाहि—अष्टौ, सप्त, षट्, पञ्च, द्वे चेति । अत्र त्रयो भूयस्काराः, तथाहि—उपशान्तमोहः पञ्चकर्मोदीरको भूत्वा प्रतिपतन् सूक्ष्मसम्पराये समागतः षण्णामुदीरको भवति, ततोऽपि प्रतिपतन् प्रम-

त्तसंयतगुणस्थानादावागत आयुष्यावलिकाशेषे सप्तानां, तत ऊर्ध्वं परभवेऽष्टानां, द्विकोदीरकास्तु क्षीणमोहः सयोगिकेवली च, न चानयोरेकतरोऽपि प्रतिपततीत्येतदपेक्षया भूयस्कारो न लभ्यत इति त्रय एव भूयस्काराः, चत्वारोऽल्पतराः, पञ्चावस्थिताः, अवक्तव्यस्त्वत्रापि नास्ति, सर्वमूलप्रकृत्यनुदीरकस्यायोगिकेवलिनो भूयोऽप्युदीरकत्वाभावात् ।

सत्तास्थानानि मूलप्रकृतीनां त्रीणि—अष्टौ सप्त चतस्रश्चेति । अत्रैकोऽपि भूयस्कारो न संभवति, सप्तादिसत्ताकस्य क्षीणमोहादेः प्रतिपाताभावेनाष्टादिसत्ताकत्वासंभवात् , द्वावल्पतरौ, त्रयोऽवस्थिताः, अवक्तव्यस्त्वत्रापि नास्ति, क्षीणशेषकर्मणो भूयः कर्मसत्ताया असंभवात् ।

तदेवमुक्ता मूलप्रकृतीनां बन्धोदयोदीरणासत्तास्थानेषु भूयस्कारादयः, सम्प्रत्युत्तरप्रकृतीनां तेषु तेऽभिधातव्याः ।

तत्र दर्शनावरणीयस्य त्रीणि बन्धस्थानानि—नव षट् चतस्रश्चेति । तत्र सर्वप्रकृतिसमुदायो नव, तद्बन्धश्चाद्यगुणस्थानद्वयं यावत् , ततः परं स्त्यानर्द्धित्रिकबन्धव्यवच्छेदे सम्यङ्मिथ्यादृष्ट्यादिषु षड्विधं बध्नतः प्रथमसमये प्रथमोऽल्पतरबन्धः । एतत् षड्विधं बन्धस्थानमपूर्वकरणप्रथमसप्तभागं यावत् , ततः परं निद्राप्रचलाबन्धव्यवच्छेदे चतुर्विधं बध्नत आद्यसमये द्वितीयोऽल्पतरबन्धः । एतच्चतुर्विधं बन्धस्थानं सूक्ष्मसम्परायं यावत् , ततः कस्यचित् प्रतिपत्य षड्विधं बध्नतः प्रथमसमये प्रथमो भूयस्कारबन्धः । ततोऽपि प्रतिपत्य नवविधं बध्नत आद्यसमये द्वितीयो भूयस्कारबन्धः । अत्र नवविधादिषु त्रिष्वपि द्वितीयादिसमयेषु तदेव बध्नतस्त्रयोऽवस्थितबन्धाः । यदा तूपशान्तमोहावस्थायां दर्शनावरणप्रकृतीनां सर्वथाऽबन्धको भूत्वा पुनरुद्भवेण प्रतिपत्य चतुर्विधं बध्नाति तदाऽऽद्यसमये प्रथमोऽवक्तव्यबन्धः, भूयस्कारादिलक्षणै-

र्वक्तुमशक्यत्वात्, द्वितीयादिसमयेषु त्ववस्थितः। यदा तूपशान्तमोहावस्थात एवायुःक्षयेणानुत्तरसुरेषूत्पद्यते तदा तत्रा-द्यसमय एव षड्विधं बध्नतो द्वितीयोऽवक्तव्यः, द्वितीयादिसमयेषु त्ववस्थितः। तदेवमत्र द्वौ भूयस्कारौ, द्वावल्पतरौ बन्धौ, अवस्थितास्तु गणनया षड् भवन्तोऽपि बन्धस्थानानि त्रीण्येवेति तज्ज्ञेदाश्रय एव, अवक्तव्यौ तु बन्धौ द्वाविति स्थितं।

मोहनीयस्य दश बन्धस्थानानि—द्वाविंशतिरेकविंशतिः सप्तदश त्रयोदश नव पञ्च चतस्रः तिस्रो द्वे एका च। तत्र द्वाविंशतिकं बन्धस्थानं मिथ्यादृष्टौ, एकविंशतिकं सासादने, सप्तदशकं मिश्रेऽविरतसम्यग्दृष्टौ (च), त्रयोदशकं देश-विरते, नवकं प्रमत्ताप्रमत्तयोरपूर्वकरणे च, पञ्चादीन्येकपर्यन्तानि अनिवृत्तिबादरे प्रथमादिषु पञ्चान्तेषु भागेषु। अत्र भूयस्कारा नव, ते चोपशमश्रेणीतः प्रतिपाते संज्वलनलोभरूपैकप्रकृतिबन्धादारभ्य क्रमेण वेदितव्याः। अल्पतरबन्धा-स्त्वष्टौ, यतो द्वाविंशतिबन्धादेकविंशतिबन्धे, एकविंशतिबन्धाद्वा सप्तदशबन्धे गमनं न संभवति द्वाविंशतिबन्धकस्य मिथ्यादृष्टेरेकविंशतिबन्धकसासादनभावस्यानन्तर्येणाप्राप्तेः, एकविंशतिबन्धकस्य च सासादनस्य नियमतो मिथ्यात्व एव गमनात् सप्तदशबन्धकमिश्राविरतसम्यग्दृष्टिभावालाभात्। अवस्थितबन्धा दश "अवस्थितबन्धः सर्वत्रापि बन्धस्थान-समः" इतिवचनात्। एकसप्तदशप्रकृत्यात्मकौ द्वाववक्तव्यबन्धौ। तौ चोपशान्तमोहगुणस्थानादध्वक्षयेण भवक्षयेण च प्रतिपाते भावनीयौ।

नाम्नो बन्धस्थानान्यष्टौ। तथाहि—त्रयोविंशतिः पञ्चविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशदेका च। एतानि च नानाजीवानपेक्ष्य नानाप्रकाराणीति सप्ततिकार्थसङ्ग्रहाद्भावनीयानि। अत्र भूयस्काराः षट् त्रयोविंशत्यादेः

पञ्चविंशत्यादिषु एकत्रिंशदन्तेषु गमनात् एकत्रिंशद्बन्धाऽुत्तीर्यैकप्रकृतिबन्धस्य च क्रियमाणस्य गुरुत्वान्नावादष्टान्तरेष्वपि षण्णामेव भूयस्काराणां संभवात् । अथ प्रतिपातकाले एकस्याः प्रकृतेर्बन्धमाधायैकत्रिंशत्प्रकृतिबन्धमपि करोति । एकप्रकृत्यपेक्षया चैकत्रिंशत्प्रकृतिबन्धो भूयस्कार इति सप्त भूयस्काराः प्राप्नुवन्ति । युक्तं चैतत्, सप्तानां भूयस्काराणां शास्त्रान्तरेऽप्यभिधानात् । उक्तं च शतकचूर्णौ—"एक्काउं वि एक्कतीसं जाइ त्ति भूअगारा सत्त" इति, तदयुक्तं, एकत्रिंशद्बन्धरूपस्य भूयस्कारस्याष्टाविंशत्याद्यपेक्षया प्रागेव गृहीतत्वात् एकापेक्षया तस्य पृथग्भावायोगात् । न ह्यवधिभेदाद्भूयस्कारभेदो विवक्ष्यते, तथा सति भूयस्काराणामतिबाहुल्यप्रसक्तेः । तथाहि—कदाचिदष्टाविंशतेरेकत्रिंशद्बन्धं गच्छति कदाचिदेकोनत्रिंशतः कदाचित्त्रिंशतः कदाचिदेकस्याः, तथा कदाचित्त्रयोविंशतेरप्यष्टाविंशतिबन्धं गच्छति कदाचित्पञ्चविंशतेरित्यादि । तदेवं सप्तातिरिक्ता बहवोऽपि भूयस्काराः प्राप्नुवन्ति । न चैतदिष्टं । ततो नावधिभेदाद्भूयस्कारभेद इति षडेव भूयस्कारभेदाः । शास्त्रान्तरे सप्तभिधानं बन्धादनुत्तीर्णावधिभेदो न भूयस्कारभेदप्रयोजकः, तदुत्तीर्णावधिभेदस्तु भूयस्कारभेदप्रयोजक इति प्रसङ्गाभिप्रायेण, तत्रापि परमार्थतः षडन्तर्भाव एवोन्नेय इति तत्त्वं । अल्पतराः सप्त, तथाहि—देवत्वं प्राप्तस्यैकत्रिंशतस्त्रिंशति गमनं संभवति, तस्यैव देवभवाच्च्यवमानस्य त्रिंशत एकोनत्रिंशति, तथा क्षपकश्रेण्यारोहे ऽपशमश्रेण्यारोहे वाऽष्टाविंशत्यादेरेकस्यां, नानाजीवानां यथायोगं त्रिंशदादेस्त्रयोविंशत्यन्तेषु गमनं । ततः सप्ताल्पतराः, अवस्थिता अष्टैव, अवक्तव्यास्तु त्रयः ते पुनरेवं—ऽपशान्तमोहावस्थायां नामकर्मणः सर्वथाऽबन्धको भूत्वा इहैवोपशान्ताद्धाक्षयेण यदा पुनरप्येकविधं बध्नाति तदाद्यसमये प्रथमोऽवक्तव्यबन्धः, यदा चोप-

शान्तमोहावस्थायामेवायुःक्षयेणानुत्तरसुरेषु समुत्पद्यते उपात्ततीर्थकरनामा च तदा तस्य प्रथमसमय एव मनुष्यगति-प्रायोग्यां तीर्थकरनामसहितां त्रिंशतं बध्नतो द्वितीयोऽवक्तव्यबन्धः, यदि चानुपात्ततीर्थकरनामा भवति तदा तस्य तीर्थकरनामरहितां तत्रैव मनुष्यगतिप्रायोग्यामेकोनत्रिंशतं बध्नतः प्रथमसमये तृतीयोऽवक्तव्यबन्धः ।

शेषेषु ज्ञानावरणवेदनीयायुर्गोत्रान्तरायलक्षणेषु पञ्चसु कर्मसु बन्धस्थानमेकैकमेव भवति, ज्ञानावरणान्तराययोः प्रकृतिपञ्चकस्य समुदितस्यैव वेदनीयायुर्गोत्राणां चान्यतरैकप्रकृतेरेव बन्धात् । अवस्थितबन्धश्चैतेषां प्रभूतकालमवस्थितत्वेन बध्यमानत्वादेकैकोऽस्त्येव । अवक्तव्यबन्धोऽपि वेदनीयवर्जानां चतुर्णामेकैकोऽस्ति । तत्र ज्ञानावरणस्यान्तरायस्य चोपशान्तमोहगुणस्थानादुच्चैःक्षयेण भवक्षयेण वा प्रतिपाते पञ्चपञ्चप्रकृत्यात्मकः प्रथमसमये एकैकोऽवक्तव्यो बन्धः । गोत्रस्य तूपशान्तमोहगुणस्थानादेव द्विधाऽपि प्रतिपतितस्योच्चैर्गोत्रं बध्नतः प्रथमसमये उच्चैर्गोत्रप्रकृत्यात्मक एकोऽवक्तव्यबन्धः आयुषो बन्धारम्भे तां तामायुःप्रकृतिं बध्नतः प्रथमसमये तत्तदेकप्रकृत्यात्मक एकोऽवक्तव्यबन्धः । वेदनीयस्य त्ववक्तव्यबन्धः सर्वथाऽनुपपन्नः, अयोग्यवस्थायां तद्बन्धे व्यवच्छिन्ने भूयोऽपि बन्धासंभवात् ।

तदेवमुक्ताः प्रत्येकं ज्ञानावरणीयाद्युत्तरप्रकृतीनां बन्धस्थानेषु भूयस्कारादयः, सम्प्रति सामान्यतः सर्वोत्तरप्रकृतीनां बन्धस्थानेषु ते वक्तव्याः । तत्र सामान्यतः सर्वोत्तरप्रकृतीनां बन्धस्थानान्येकोनत्रिंशत्, तद्यथा—एका सप्तदश तत ऊर्ध्वमेकोत्तराणि स्थानानि यावद्विंशतिं यावत् ततः षड्विंशतिः ततस्त्रिपञ्चाशदादीनि द्विषष्टिवर्जान्येकोत्तरवृद्धानि स्थानानि चतुःसप्ततिं यावद्भाव्यानि १–१७–१८–१९–२०–२१–२२–२६–५३–५४–५५–५६–५७–५८–५९–६०–६१–

६३–६४–६५–६६–६७–६८–६९–७०–७१–७२–७३–७४ । अत्राष्टाविंशतिर्ऋूयस्काराः, तथाहि—एकप्रकृत्यात्मकं स्थानमुपशान्तमोहगुणस्थानादौ, तत उपशान्तमोहात् परिभ्रंशे सूक्ष्मसम्परायमागतस्य ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टययशःकीर्त्युच्चैर्गोत्ररूपाः षोडश प्रकृतीरधिका बध्नतः सप्तदशप्रकृत्यात्मक एको ऋूयस्कारः । ततोऽनिवृत्तिबादरं प्रविशतः प्रथमतः संज्वलनलोभमेकमधिकं बध्नतोऽष्टादशप्रकृत्यात्मको द्वितीयो ऋूयस्कारः । ततो मायामपि बध्नत एकोनविंशतिप्रकृत्यात्मकस्तृतीयः । ततः संज्वलनमानबन्धे विंशतिप्रकृत्यात्मकस्तुरीयः । ततः संज्वलनक्रोधस्यापि बन्धे एकविंशतिप्रकृत्यात्मकः पञ्चमः । ततोऽप्यधोऽवतरतः पुरुषवेदमपि बध्नतो द्वाविंशतिप्रकृत्यात्मकः षष्ठः । ततोऽपूर्वकरणगुणस्थानकं प्रविशतो भयजुगुप्साहास्यरतिरूपप्रकृतिचतुष्टयमधिकं बध्नतः षड्विंशतिप्रकृत्यात्मकः सप्तमः । ततस्तस्मिन्नेवापूर्वकरणगुणस्थानके क्रमेणाधोऽवतरतो नाम्नोऽष्टाविंशतिं बध्नतो यशःकीर्त्तिवर्जाः शेषाः सप्तविंशतिप्रकृतयोऽधिकाः प्राप्यन्त इति त्रिपञ्चाशत्प्रकृत्यात्मकोऽष्टमो ऋूयस्कारः । तस्यैव तीर्थकरनामसहितां देवगतिप्रायोग्यामेकोनत्रिंशतं बध्नतश्चतुःपञ्चाशत्प्रकृत्यात्मको नवमः । आहारकद्विकसहितां त्रिंशतं बध्नतः पञ्चपञ्चाशत्प्रकृत्यात्मको दशमः । आहारकद्विकतीर्थकरनामसहितामेकत्रिंशतं बध्नतः षट्पञ्चाशत्प्रकृत्यात्मक एकादशः । ततस्तस्मिन्नेवापूर्वकरणगुणस्थानकेऽधस्तादवतरतो नामत्रिंशता सह निद्राद्विकं बध्नतः सप्तपञ्चाशत्प्रकृत्यात्मको द्वादशः । एकत्रिंशता सह निद्राद्विकं बध्नतोऽष्टपञ्चाशत्प्रकृत्यात्मकस्त्रयोदशः । ततोऽप्रमत्तगुणस्थाने समागतस्य तामेवाष्टपञ्चाशतं देवायुषा सह बध्नत एकोनषष्टिप्रकृत्यात्मकश्चतुर्दशः । ततो देशविरतगुणस्थानमागतस्य नाम्नोऽष्टाविंशतिबन्धकस्य प्रत्याख्यानावरणकषायचतुष्टयम-

धिकं बध्नतः षष्टिप्रकृत्यात्मकः पञ्चदशः । तस्यैव नाम्न एकोनत्रिंशतं बध्नत एकषष्टिप्रकृत्यात्मकः षोडशः । ततोऽविरतसम्यग्दृष्टिगुणस्थानमागतस्य नाम्नोऽष्टाविंशतिबन्धकस्यायुरबन्धेऽप्रत्याख्यानकषायचतुष्टयस्याधिकस्य बन्धे त्रिषष्टिप्रकृत्यात्मकः सप्तदशः । इह प्रकारान्तरासंभवात् द्विषष्टिप्रकृत्यात्मकं बन्धस्थानं सर्वथा न संभवति, ततस्तदात्मको भूयस्कारो न लभ्यते । ततस्तस्यैवाविरतसम्यग्दृष्टेर्नाम्न एकोनत्रिंशतं बध्नतश्चतुःषष्टिप्रकृत्यात्मकोऽष्टादशो भूयस्कारः । तस्यैव मनुष्यगतिप्रायोग्यां त्रिंशतं बध्नतः पञ्चषष्टिप्रकृत्यात्मक एकोनविंशतितमः । तस्यैवायुर्बन्धकस्य षट्षष्टिप्रकृत्यात्मको विंशतितमः । ततो मिथ्यात्वं गतस्य नाम्नस्त्रयोविंशतिं बध्नत आयुर्बन्धकस्य मिथ्यात्वानन्तानुबन्धिचतुष्टयस्त्यानर्द्धित्रिकाणि च बध्नतः सप्तषष्टिप्रकृत्यात्मक एकविंशतितमः । तस्यैव पञ्चविंशतिबन्धकस्यायुरबन्धेऽष्टषष्टिप्रकृत्यात्मको द्वाविंशतितमः । तस्यैव पञ्चविंशतिबन्धकस्यायुषो बन्धे एकोनसप्ततिप्रकृत्यात्मकस्त्रयोविंशतितमः । तस्यैव मिथ्यादृष्टेः षड्विंशतिबन्धकस्यायुषो बन्धे सप्ततिप्रकृत्यात्मकश्चतुर्विंशतितमः । तस्यैव नाम्नोऽष्टाविंशतिबन्धकस्यायुरबन्धे एकसप्ततिप्रकृत्यात्मकः पञ्चविंशतितमः । तस्यैवायुर्बन्धकस्य द्वासप्ततिप्रकृत्यात्मकः षड्विंशतितमः । तस्यैव मिथ्यादृष्टेरेकोनत्रिंशतमायुश्च बध्नतस्त्रिसप्ततिप्रकृत्यात्मकः सप्तविंशतितमः । तस्यैव नाम्नस्त्रिंशतं बध्नत आयुर्बन्धकस्य चतुःसप्ततिप्रकृत्यात्मकोऽष्टाविंशतितमः । इह केचिद्भूयस्कारा अन्यान्यावधिस्थानाद्भूयो भूयः संभवन्तोऽप्येकवारं गृहीतत्वान्न पृथग्गणनायामधिक्रियन्ते, ततोऽष्टाविंशतिरेव भूयस्काराः, एतदनुसारेणाल्पतरा अप्यष्टाविंशतिरेव भावनीयाः,

अवस्थितबन्धास्तु स्थानसमा इत्येकोनत्रिंशत्, अवक्तव्यस्त्वत्रानुपपन्नः सर्वोत्तरप्रकृत्यबन्धकीभूतस्य भूयो बन्धकत्वानुपपत्तेः।

तदेवमुक्ताः प्रत्येकं ज्ञानावरणीयाद्युत्तरप्रकृतीनां सामान्यतः सर्वोत्तरप्रकृतीनां च बन्धस्थानेषु भूयस्कारादयोऽथोदयस्थानेषु वक्तव्याः। तत्र प्रथमतः प्रत्येकं ज्ञानावरणीयाद्युत्तरप्रकृतीनामुदयस्थानेषु भावनीयाः। ते चैवम्—ज्ञानावरणीयान्तराययोर्वेदनीयायुर्गोत्राणां चैकैकमुदयस्थानं पञ्चपञ्चप्रकृत्यात्मकमेकैकप्रकृत्यात्मकं च। दर्शनावरणीयस्य द्वे उदयस्थाने—चतस्रः पञ्च चेति। तत्र चक्षुरचक्षुरवधिकेवलदर्शनावरणरूपाश्चतस्रः, ता एव निद्रापञ्चकान्यतमसहिताः पञ्च, निद्रा हि परावर्त्तमानोदया इति द्वित्रादिका नोदयमायान्ति। अत्रैको भूयस्कारः, एक एव चाल्पतरः, द्वाववस्थितौ, अवक्तव्यस्तु नास्ति, क्षीणमोहे सर्वदर्शनावरणप्रकृत्युदयव्यवच्छेदे सति भूय उदयासंभवात्।

मोहनीयस्य नवोदयस्थानानि—एका द्वे चतस्रः पञ्च षट् सप्ताष्टौ नव दश च। एतानि चाग्रे संवेधे भावयिष्यन्ते। अत्राष्टौ भूयस्काराः, अष्टावल्पतराः, नवावस्थिताः, अवक्तव्या उदयास्तु पञ्च, तथाहि—एका षट् सप्ताष्टौ नव च। तत्र यदोपशान्तमोहादप्रत्याख्येयेन प्रतिपतति तदा सूक्ष्मसम्परायं प्रविशतः संज्वलनलोभरूपैकप्रकृत्यात्मकोऽवक्तव्योदयः। अवरुह्येण ततः प्रतिपाते चाद्यसमय एव चतुर्थगुणस्थानं गच्छति। स च यदि क्षायिकसम्यग्दृष्टिर्भवति जुगुप्सायाश्चावेदकस्तदा तस्यानन्तानुबन्धिवर्जा अन्यतमे त्रयः क्रोधादिकाः पुरुषवेदो हास्यरतियुगलमिति षट् प्रकृतय उदये प्राप्यन्त इत्याद्यसमये षट्प्रकृत्यात्मकोऽवक्तव्योदयः। यदि चाद्यसमय एव क्षायोपशमिकसम्यक्त्वं वेदयते क्षायिकसम्यग्दृष्टिरेव

वा सन् ज्ञयं जुगुप्सां वाऽनुज्ञवति तदा सप्तप्रकृत्यात्मकः । क्षायोपशमिकसम्यक्त्वज्ञययोस्तज्जुगुप्सयोर्वा क्षायिकसम्यक्त्ववतोऽप्याद्यसमये ज्ञयजुगुप्सयोर्युगपदुदये वाऽष्टप्रकृत्यात्मकः । क्षायिकसम्यक्त्वाज्ञावे क्षायोपशमिकसम्यक्त्वज्ञयजुगुप्सानां समुदितानामुदये नवप्रकृत्यात्मकः ।

नाम्न उदयस्थानानि द्वादश, तथाहि—विंशतिरेकविंशतिश्चतुर्विंशत्यादीन्येकत्रिंशदन्तानि नवाष्टौ च, (२०–२१–२४–२५–२६–२७–२८–२९–३०–३१–९–८) एतान्यप्यग्रे संवेधेऽन्निधास्यामः । अत्राष्टौ ज्रूयस्कारोदयाः, अष्टोदयान्नवोदये नवोदयाद्विंशत्युदये विंशत्युदयाच्चैकविंशत्युदयेऽगमनात्, किं त्वेकविंशत्युदयस्थानादारज्य यथायोगं संसारे समुद्घाते वा चतुर्विंशत्याद्युदयस्थानेष्वेव गमनसंज्ञवात् । अल्पतरोदया नव, यतो नवकोदयादष्टकोदये एकविंशत्युदयाद्विंशत्युदये पञ्चविंशत्युदयाच्च चतुर्विंशत्युदये गमनं न संज्ञवति, ततो नवैवाल्पतरोदयाः, ते च तीर्थकरातीर्थकरयोः समुद्घातप्रतिपत्तिमयोगित्वप्रतिपत्तिं चाश्रित्य ज्ञाव्यन्ते—तत्र स्वज्ञावस्थस्यातीर्थकृतो मनुजगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुज्ञगादेययशःकीर्त्ययुरुलघुतैजसकार्मणनिर्माणवर्णादिचतुष्टयस्थिरास्थिरशुज्ञाशुज्ञाद्यसंहननोपघातप्रत्येकौदारिकद्विकषण्मन्यतमसंस्थानपराघातोच्छ्वासान्यतरविहायोगतिसुस्वरदुःस्वरान्यतरलक्षणत्रिंशत्प्रकृत्युदयो ज्ञवति । एष एव तीर्थकृतस्तीर्थकरनामान्वित एकत्रिंशदुदयः । ततः समुद्घातं कुर्वतोऽतीर्थकृतो द्वितीयसमये औदारिकमिश्रकाययोगे वर्त्तमानस्य पराघातोच्छ्वासान्यतरविहायोगतिसुस्वरदुःस्वरान्यतरनिरोधे षड्विंशतिः १ । पराघातोच्छ्वासप्रशस्तविहायोगतिसुस्वरनिरोधे तीर्थकृतः सप्तविंशतिः २ । षड्विंशतिरेवातीर्थकरकेवलिनः समुद्घातं प्रविष्टस्य तृतीयसमये कार्मणकाययोगे

वर्त्तमानस्योदितसंस्थानाद्यसंहननौदारिकद्विकोपपातप्रत्येकरूपप्रकृतिषट्कनिरोधे विंशतिः ३ । तस्मिन्नेव समये तीर्थकृत उक्तप्रकृतिषट्कनिरोधे एकविंशतिः ४ । अयोगित्वं प्रतिपद्यमानस्य तु तीर्थकृत एकत्रिंशतः स्वरनिरोधे त्रिंशन्नवति ९। ततोऽप्युच्छ्वासे निरुद्धे एकोनत्रिंशत् ६ । अतीर्थकृतस्त्रिंशतः स्वरनिरोधे एकोनत्रिंशत्, तत उच्छ्वासे निरुद्धेऽष्टाविंशतिः ७ । ततोऽष्टाविंशतेरतीर्थकृत्केवलिनोऽयोगित्वप्रतिपत्तिप्रथमसमये पराघातोदितविहायोगतिप्रत्येकोपघातान्यतमसंस्थानाद्यसंहननौदारिकद्विकस्थिरास्थिरागुरुलघुशुभाशुभतैजसकार्मणवर्णादिचतुष्टयनिर्माणलक्षणविंशतिप्रकृत्युदयव्यवच्छेदेऽष्टकोदयः ८। तीर्थकृत्केवलिन एकोनत्रिंशत उक्तविंशतिप्रकृत्युदयव्यवच्छेदे नवकोदयः ९। संसारिणां त्वेकत्रिंशदादेरुदयस्थानादेकविंशत्यन्तेषु कतिपयेष्वेवाल्पतरोदयस्थानेषु सङ्क्रमणं । तत इत्थं विचार्यमाणमल्पतरोदयस्थानमधिकं न प्राप्यत इति नवैवाल्पतरोदयाः । अवस्थितोदयाः स्थानतुल्याः । अवक्तव्योदयस्त्वसंज्ञवी, यतः सर्वनामोत्तरप्रकृत्युदयव्यवच्छेदोऽयोगिचरमसमये, न च ततः पुनरुदय इति ।

तदेवमुक्ताः प्रत्येकं ज्ञानावरणीयाद्युत्तरप्रकृतीनामुदयस्थानेषु न्यूयस्कारादयः । सम्प्रति सामान्यतः सर्वोत्तरप्रकृतीनामुदयस्थानेषु वक्तव्याः । तत्र सामान्यतः सर्वोत्तरप्रकृतीनामुदयस्थानानि षड्विंशतिः । तद्यथा—एकादश द्वादश त्रयोविंशतिश्चतुर्विंशतिः, तत एकोनत्रिंशदादीनि चतुस्त्रिंशदन्तानि ततश्चतुश्चत्वारिंशदादीनि एकोनषष्ट्यन्तानि ११–१२–२३–२४–२९–३०–३१–३२–३३–३४–४४–४९–४६–४७–४८–४९–५०–५१–५२–५३–५४–५५–५६–५७–५८–५९ । तत्र मनुष्यगतिमनुष्यायुःपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्त्तयोऽन्यतरवेदनीयमुच्चैर्गोत्रं चेत्येकादशप्रकृत्युदयो-

ऽतीर्थकृतोऽयोगित्वावस्थायां । एष एव तीर्थकरनामान्वितो द्वादशोदयस्तीर्थकृतः । एतावेव द्वावुदयावगुरुलघुनिर्माण-स्थिरास्थिरशुभाशुभतैजसकार्मणवर्णादिचतुष्टयरूपनामध्रुवोदयसहितौ समुद्घाते कार्मणकाययोगे त्रयोविंशतिचतुर्विंशत्यु-दयौ भवतः । एतेषूदयस्थानेषु न भूयस्कारप्राप्तिः, अयोगिनः सयोगित्वस्य अतीर्थकृतश्च तीर्थकरत्वस्याप्राप्तेः । तावेव त्रयोविंशतिचतुर्विंशत्युदयौ प्रत्येकोपघातौदारिकद्विकान्यतमैकसंज्ञविसंस्थानाद्यसंहननसमेतौ यथासङ्ख्यमेकोनत्रिंशत्रिंश-दुदयौ भवतः । तथास्वभावस्थयोस्तीर्थकरातीर्थकरयोर्यावेकत्रिंशत्त्रिंशद्रूपौ नाम्न उदयौ तावन्यतरवेदनीयमनुष्यायुरु-च्चैर्गोत्रसमेतौ चतुस्त्रिंशत्त्रयस्त्रिंशदुदयौ भवतः । तयोः स्वरनिरोधे क्रमेण त्रयस्त्रिंशद्द्वात्रिंशदुदयौ । तयोरप्युच्छ्वासनिरोधे द्वात्रिंशदेकत्रिंशदुदयौ । एते दशोदयाः केवलिनां । एतेषु दशसूदयस्थानेषु षड्भूयस्कारोदयाः । ते चातीर्थकरतीर्थकराव-धिकृत्य क्रमेणैकोनत्रिंशत्त्रिंशदादयो द्रष्टव्याः । शेषास्तु न संभवन्ति । तत्र कारणमुक्तमेव । नवाष्टपतरोदयाः, ते च चतुस्त्रिंशद्वर्जाः शेषाः सर्वेऽपि । चतुश्चत्वारिंशदुदयः क्षीणसप्तकस्याविरतसम्यग्दृष्टेरन्तरालगतौ वर्त्तमानस्य । तत्र ज्ञाना-वरणपञ्चकदर्शनावरणचतुष्कमन्तरायपञ्चकमनन्तानुबन्धिवर्जास्त्रयोऽन्यतमे क्रोधादयस्त्रयाणां वेदानामन्यतमो वेदः द्वयोर्युगलयोरन्यतरद्युगलमिति षड्मोहनीयप्रकृतयः सर्वसङ्ख्यया विंशतिर्घातिप्रकृतयः । तथा चतसृष्वन्यतमा गतिरन्य-तमानुपूर्वी पञ्चेन्द्रियजातिः त्रसबादरपर्याप्तसुभगदुर्भगैकतरादेयानादेयैकतरयशःकीर्त्ययशःकीर्त्येकतरनिर्माणागुरुलघु-स्थिरास्थिरशुभाशुभतैजसकार्मणानि वर्णादिचतुष्टयं चेति नाम्न एकविंशतिरन्यतरदायुरन्यतरवेदनीयमन्यतरगोत्रमिति सर्वाग्रेणाघातिप्रकृतयश्चतुर्विंशतिरुभयमीलनेन च चतुश्चत्वारिंशदुदयः । तत्रैव वेदकसम्यक्त्वभयजुगुप्सानामन्यतमैकप्र-

क्षेपे पञ्चचत्वारिंशदुदयः । अन्यतमद्वयप्रक्षेपे षट्चत्वारिंशदुदयः । त्रयप्रक्षेपे सप्तचत्वारिंशदुदयः । नवस्थस्य क्षायिकसम्यग्दृष्टेर्देवस्य नारकस्य वा प्रागुक्ता चतुश्चत्वारिंशत् आनुपूर्वीरहिता शरीरस्थस्य वैक्रियिकोपघातप्रत्येकसमचतुरस्रप्रक्षेपेऽष्टचत्वारिंशदुदयमायाति । ततो वेदकसम्यक्त्वभयजुगुप्सानामन्यतमैकप्रक्षेपे एकोनपञ्चाशत् । अन्यतमद्वयप्रक्षेपे पञ्चाशत् । युगपत्त्रयप्रक्षेपे एकपञ्चाशत् । यदा प्रागुक्तैव चतुश्चत्वारिंशदानुपूर्वीरहिता नवस्थस्य तिरश्चो मनुष्यस्य वा क्षायिकसम्यग्दृष्टेरौदारिकद्विकाद्यसंस्थानसंहननोपघातप्रत्येकलक्षणप्रकृतिषट्कप्रक्षेपे एकोनपञ्चाशत् । सैव वेदकसम्यक्त्वभयजुगुप्सानामन्यतमैकप्रकृतिप्रक्षेपे पञ्चाशत् । अन्यतमप्रकृतिद्वयप्रक्षेपे एकपञ्चाशत् । त्रयस्यापि प्रक्षेपे द्विपञ्चाशत् । निद्राप्रक्षेपे त्रिपञ्चाशत् । अथवा नवस्थदेवनारकयोग्याऽष्टचत्वारिंशत् शरीरपर्याप्त्या पर्याप्तस्य देवस्य नारकस्य वा क्षायिकसम्यग्दृष्टेः पराघातान्यतरविहायोगतिप्रक्षेपे पञ्चाशत् । ततो वेदकसम्यक्त्वभयजुगुप्सानामन्यतमैकप्रकृतिप्रक्षेपे एकपञ्चाशत् । अन्यतमद्वयप्रक्षेपे द्विपञ्चाशत् । त्रयस्यापि प्रक्षेपे त्रिपञ्चाशत् । यदा तिरश्चो मनुष्यस्य वा शरीरस्थस्य क्षायिकसम्यग्दृष्टेः प्रागुक्तैकोनपञ्चाशच्छरीरपर्याप्त्या पर्याप्तस्य पराघातप्रशस्तविहायोगत्यन्वितैकपञ्चाशत् । ततो वेदकसम्यक्त्वभयजुगुप्सानिद्राणामन्यतमैकप्रकृतिप्रक्षेपे द्विपञ्चाशत् । अन्यतमद्वयप्रक्षेपे त्रिपञ्चाशत् । अन्यतमत्रयप्रक्षेपे चतुःपञ्चाशत् । चतुष्टयप्रक्षेपे पञ्चपञ्चाशत् । यदा तिर्यङ्मनुष्ययोरेव क्षायिकसम्यग्दृष्ट्योरनन्तरोक्तैकपञ्चाशत्प्राणापानपर्याप्तिसमाप्त्यनन्तरमुच्छ्वासोदयेन मीलिता द्विपञ्चाशत् । ततो वेदकसम्यक्त्वभयजुगुप्सानिद्राणामन्यतमैकद्वयत्रयचतुष्टयप्रक्षेपैः क्रमात्त्रिपञ्चाशच्चतुःपञ्चाशत्पञ्चपञ्चाशत् षट्पञ्चाशच्च । यदा प्रागुक्ता प्राणापानपर्याप्तिपर्याप्तयोग्या द्विपञ्चाशन्नामपर्याप्त्या

पर्याप्तस्य स्वरे प्रक्षिप्ते त्रिपञ्चाशत्। ततो वेदकसम्यक्त्वज्ञयजुगुप्सानिद्राणामुक्तनीत्या प्रक्षेपे सप्तपञ्चाशदन्ताः। तिरश्चोऽधिकृत्योद्योतनाम्नि प्रक्षिप्तेऽष्टपञ्चाशत्। एते चाविरतोदयाः सर्वेऽपि ध्रुवस्कारा अष्टपतराश्च संज्ञवन्ति। निद्राज्ञयजुगुप्सोद्योतानामध्रुवोदयत्वात्। मिथ्यादृष्टेः षट्चत्वारिंशत्प्रकृतीन्येकोनषष्टिपर्यन्तान्युदयस्थानानि। तानि च सप्ततिकार्थं परिज्ञाय निद्राज्ञयजुगुप्सोद्योतानां संचारणेन स्वयमेव ज्ञातव्यानि। अथ मिथ्यादृष्टेः सप्तकोदये नाम्न एकविंशत्युदयस्थस्य पञ्चचत्वारिंशद्रूपमुदयस्थानं कुतो न ज्ञवतीति चेदन्तरालगतौ मिथ्यादृष्टेरनन्तानुबन्धिसहितस्यैव प्राप्तेरनन्तानुबन्धिरहितस्य तस्य मरणनिषेधात्। तथा च सत्यष्टकोदय इति षट्चत्वारिंशदादीन्येव तस्योदयस्थानानि। एकोनषष्टिरूपं तु तस्योदयस्थानमन्यतमक्रोधादिचतुष्टयान्यतमवेदान्यतमयुगलज्ञयजुगुप्सामिथ्यात्वरूपमोहनीयदशकोदये वर्त्तमानस्य तिर्यग्गतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुज्ञगदुर्ज्ञगैकतरादेयानादेयैकतरयशःकीर्त्ययशःकीर्त्त्येकतरवर्णादिचतुष्टयागुरुलघुस्थिरास्थिरशुज्ञाशुज्ञतैजसकार्मणनिर्माणौदारिकद्विकान्यतमसंस्थानान्यतमसंहननप्रत्येकोपघातपराघातान्यतरविहायोगतिसुस्वरदुःस्वरान्यतरोच्छ्वासोद्योतरूपनामसत्कैकत्रिंशत्प्रकृत्युदयवतो ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयान्यतमनिर्ज्ञोदयवतोऽन्यतरवेदनीयान्यतमायुरन्यतरगोत्राण्ययनुज्ञवतो ऽष्टव्यं। अत्रावक्तव्योदयो न घटते सर्वप्रकृत्युदयव्यवच्छेदे ध्रुव ज्ञदयासंज्ञवात्। अवस्थितोदयाः षड्विंशतिः स्थानसमत्वात्तेषां। अथान्तरालगतौ समुद्घाते च संज्ञवीनि यान्युदयस्थानानि तेषु कथमवस्थितत्वं ?, सत्यं, तत्रापि समयद्वयत्रयावस्थानोपपत्तेः। ध्रुवस्कारोदया एकविंशतिः, यतो न ज्ञिनस्योदयेषु केवली याति, नाप्यतीर्थकरस्तीर्थकरोदयं, नाप्ययोगी सयोगिकेवल्युदयमित्येकादशाष्टादश-

त्रयोविंशतिचतुर्विंशतिचतुश्चत्वारिंशद्बन्धाणानि पञ्चोदयस्थानानि भूयस्कारतया न प्राप्यन्ते । अल्पतरोदयाश्चतुर्विंशतिः, यतोऽविरतसम्यग्दृष्टिर्मिथ्यादृष्टिर्वा न केवल्युदयस्थानमारोहतीति चतुस्त्रिंशद्बन्धाणोऽल्पतरोदयो न लभ्यते । अथ स्वभावस्थे तीर्थंकरे संभविनि चतुस्त्रिंशदुदये चतुश्चत्वारिंशदादीनामन्यतमस्मादुदयस्थानात्सङ्क्रमे चतुस्त्रिंशदुदयोऽल्पतरो भवतीति चेन्न, गुणस्थानक्रमारोहं विना केवलित्वाप्राप्तेः । क्रमानुसरणे च क्षीणमोहगुणस्थाने त्रयस्त्रिंशत्प्रकृत्यात्मकमेकमेवोदयस्थानं मनुजगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्त्तितैजसकार्मणस्थिरास्थिरशुभाशुभवर्णादिचतुष्टयागुरुलघुनिर्माणौदारिकद्विकप्रत्येकोपघातान्यतरविहायोगतिपराघातसुस्वरदुःस्वरान्यतरोच्छ्वासान्यतमसंस्थानाद्यसंहननान्यतरवेदनीयमनुष्यायुरुच्चैर्गोत्रलक्षणं प्राप्यते । ततः केवलज्ञानोत्पत्तौ तीर्थंकरनामोदये चतुस्त्रिंशद्बन्धाणमुदयस्थानं भूयस्कारतयैव प्राप्यते, नाल्पतरतयेति । यदपि चैकोनषष्टिरूपमुदयस्थानं तदपि ततोऽन्यस्य महत उदयस्थानस्याभावान्नाल्पतरत्वमास्कन्दतीति व्यापगमाच्चतुर्विंशतिरेवाल्पतराः । तदेवमुक्ताः सामान्यतः सर्वोत्तरप्रकृतीनामुदयस्थानेषु भूयस्कारादयः । उदीरणाधिकारोऽपि प्राय उदयसम एव द्रष्टव्यः । नवरं नाम्नोऽष्टनवोदयस्थानयोरुदीरणाभावः सामान्यतः सर्वोत्तरप्रकृतिसमुदाये चाप्रमत्तादौ वेदनीयायुर्वर्जनमित्यादिरूपो यो विशेषस्तमुदीरणाप्रस्थानतः सम्यक् परिभाव्य तज्ञता भूयस्कारादयो निरूपणीयाः ।

सम्प्रति प्रत्येकं ज्ञानावरणीयाद्युत्तरप्रकृतीनां सामान्यतः सर्वोत्तरप्रकृतीनां च सत्तास्थानेषु भूयस्कारादयो वाच्याः । तत्र प्रत्येकं ज्ञानावरणीयाद्युत्तरप्रकृतीनां ते भाव्यन्ते—ज्ञानावरणीयस्यान्तरायस्य च प्रत्येकं पञ्चपञ्चप्रकृत्यात्मकमेकं सत्ता-

स्थानं । अत्रान्यस्य महतोऽल्पस्य वा स्थानस्याभावाद्भूयस्कारादल्पतरासंभवः, अवक्तव्योऽप्यत्र नास्ति, सकलैतदुत्तरप्रकृतिसत्ताव्यवच्छेदे भूयः सत्ताऽसंभवात् । वेदनीयस्य द्वे सत्तास्थाने, तद्यथा—द्वे एका च । तत्र द्वे अयोग्यवस्थाद्विचरमसमयं यावत्, एका चरमसमये । अत्र न भूयस्कारसत्कर्मता, एकप्रकृत्यात्मकसत्तास्थानाद्विप्रकृत्यात्मकसत्तास्थाने सङ्क्रमाभावात् । एकमल्पतरं, तच्चैकप्रकृत्यात्मकं । एकं द्विप्रकृत्यात्मकमवस्थितं, एकप्रकृत्यात्मकस्य स्थानस्यैकसामयिकत्वेनावस्थितत्वाभावात् । गोत्रायुषोर्द्वे द्वे सत्तास्थाने, तद्यथा—द्वे एका च । तत्र गोत्रप्रकृत्योरन्यतरानपगमे द्वे । यदा तु तेजोवायुभवगतेनोच्चैर्गोत्रमुद्वलितं भवति नीचैर्गोत्रं वाऽयोग्यवस्थाद्विचरमसमये क्षीणं तदैका । आयुषः परभवायुरबन्धं यावदेका, तद्बन्धे च द्वे सत्यौ । तत्र गोत्रस्यैकं द्विप्रकृत्यात्मकं भूयस्कारसत्कर्म यदोद्वलितोच्चैर्गोत्रो नीचैर्गोत्रैकसत्कर्मा सन् भूय उच्चैर्गोत्रं बध्नाति तदाऽवसेयं, एकमेकप्रकृत्यात्मकमल्पतरं, तदपि चोच्चैर्गोत्रे उद्वलिते नीचैर्गोत्रे वा क्षीणे, द्वे अवस्थितसत्कर्मणी, द्वयोरपि चिरकालमवस्थानात् । नवरमेकप्रकृत्यात्मके सत्तास्थाने चिरमवस्थानमुद्वलितोच्चैर्गोत्रस्य नीचैर्गोत्ररूपे द्रष्टव्यं, नोच्चैर्गोत्ररूपे, तस्य द्वितीयसमय एव क्षयात् । आयुषोऽप्येकं द्विप्रकृत्यात्मकं भूयस्कारसत्कर्म, तच्च परभवायुर्बन्धे, एकमेकप्रकृत्यात्मकमल्पतरसत्कर्म, तच्चानुभूयमानभवायुषः सत्ताव्यवच्छेदे परभवायुष उदयसमये । द्वे अवस्थितसत्कर्मणी, द्वयोरपि सत्तास्थानयोश्चिरकालमवस्थानात् । यत्त्ववक्तव्यं तदुभयत्रापि नास्ति, उभयोरपि सर्वस्वस्वोत्तरप्रकृतिसत्ताव्यवच्छेदे भूयः सत्ताया अयोगात् ।

दर्शनावरणीयस्य त्रीणि सत्कर्मस्थानानि—नव षट् चतस्रश्चेति । तत्र क्षपकश्रेण्यामनिवृत्तिबादराद्धायाः सङ्ख्येयान्

न्नागान् यावदुपशमश्रेण्यामुपशान्तमोहगुणस्थानं यावन्नव । क्षपकश्रेण्यामनिवृत्तिबादरसम्परायाद्धायाः संख्येयेभ्यो भागेभ्यः परतः क्षीणमोहगुणस्थानस्य द्विचरमसमयं यावत् षट् । चरमसमये चतस्रः । अत्र के अल्पतरे—षट् चतस्रश्चेति । नवषष्कात्मके के अवस्थितसत्कर्मणी, चतुःप्रकृत्यात्मकस्य सत्तास्थानस्यैकसामयिकत्वेनावस्थितत्वासंभवात् । भूयस्कारमवक्तव्यं चात्र नास्ति, द्व्यादिप्रकृतिसत्ताव्यवच्छेदे भूयः सत्ताऽसंभवात् ।

मोहनीयस्य पञ्चदश सत्तास्थानानि, तद्यथा—अष्टाविंशतिः सप्तविंशतिः षड्विंशतिश्चतुर्विंशतित्रयोविंशतिर्द्वाविंशतिरेकविंशतित्रयोदश द्वादशैकादश पञ्च चतस्रस्तिस्रो के एका च । तत्र सर्वप्रकृतिसमुदायोऽष्टाविंशतिः । ततः सम्यक्त्वे उद्वलिते सप्तविंशतिः । सम्यङ्मिथ्यात्वेऽप्युद्वलिते षड्विंशतिः, अनादिमिथ्यादृष्टेर्वा षड्विंशतिः । अष्टाविंशतेरनन्तानुबन्धिचतुष्टये क्षीणे चतुर्विंशतिः । ततो मिथ्यात्वे क्षीणे त्रयोविंशतिः । ततः सम्यङ्मिथ्यात्वे क्षीणे द्वाविंशतिः । ततः सम्यक्त्वे क्षीणे एकविंशतिः । ततः कषायाष्टकक्षये त्रयोदश । ततो नपुंसकवेदे क्षीणे द्वादश । ततोऽपि स्त्रीवेदे क्षीणे एकादश । ततो नोकषायषट्कक्षये पञ्च । ततः पुरुषवेदे क्षीणे चतस्रः । ततः संज्वलनक्रोधे क्षीणे तिस्रः । ततः संज्वलनमाने क्षीणे के । ततः संज्वलनमायायामपि क्षीणायामेकेति । अत्र पञ्चदशावस्थितसत्कर्माणि, सर्वेषामपि जघन्यतोऽप्यन्तर्मुहूर्त्तमवस्थानसंभवात् । चतुर्दशाल्पतराणि, तानि चाष्टाविंशतिविनिर्मुक्तानि सर्वाण्यपि द्रष्टव्यानि । एकं भूयस्कारसत्कर्म, तच्चाष्टाविंशतिलक्षणं, चतुर्विंशतिसत्तास्थानात् षड्विंशतिसत्तास्थानाद्वाऽष्टाविंशतिरूपे सत्तास्थाने सङ्क्रमणसंभवाच्चैषाणि सत्तास्थानानि भूयस्कारतया न प्राप्यन्ते, अनन्तानुबन्धिसम्यक्त्वसम्यङ्मिथ्यात्वव्यतिरेकेणान्यस्याः

प्रकृतेः सत्ताव्यवच्छेदे भूयः सत्ताया अयोगात् । अवक्तव्यं तु सत्कर्मात्र नास्ति, मोहनीयस्य सर्वोत्तरप्रकृतिसत्ताव्यवच्छेदे भूयः सत्ताया असंभवात् ।

नाम्नो द्वादश सत्कर्मस्थानानि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिः षण्णवतिरशीतिरेकोनाशीतिः अष्टसप्ततिः षट्सप्ततिः पञ्चसप्ततिर्नवाष्टौ चेति । तत्र सर्वप्रकृतिसमुदायस्त्रिनवतिः । सा तीर्थकररहिता द्विनवतिः । त्रिनवतिराहारकचतुष्टयरहितैकोननवतिः । द्विनवतिराहारकचतुष्कहीनाऽष्टाशीतिः । इदं प्रथमसत्तास्थानचतुष्कं । अस्मान्नामत्रयोदशके क्षीणेऽशीतिरेकोनाशीतिः षट्सप्ततिः पञ्चसप्ततिश्चेति द्वितीयसत्तास्थानचतुष्कं भवति । अष्टाशीतेर्देवद्विके नरकद्विके वोद्वलिते षण्णवतिः । ततोऽपि देवद्विकसहिते नरकद्विकसहिते वा वैक्रियचतुष्टये उद्वलितेऽशीतिः । ततोऽपि मनुष्यद्विके उद्वलितेऽष्टसप्ततिः । एतानि त्रीणि सत्तास्थानान्यध्रुवसंज्ञान्याहुः । नवप्रकृत्यात्मकं तीर्थकृतोऽष्टप्रकृत्यात्मकमतीर्थकृतोऽयोग्यवस्थाचरमसमये सुप्रसिद्धं । अत्र दशावस्थितसत्कर्माणि, नवाष्टरूपसत्तास्थानयोरेकसामयिकतयावस्थितत्वायोगात् । दशाऽपतरस्थानानि, तथाहि—प्रथमचतुष्काद्द्वितीयचतुष्कगमने चत्वारि, द्वितीयचतुष्कान्नवाष्टगमने च द्वे, प्रथमसत्तास्थानचतुष्कसत्कचतुर्थसत्तास्थानात् प्रथमध्रुवसंज्ञ षण्णवति ८६ सत्तास्थानगमने, ततोऽपि तृतीयाध्रुवसत्तास्थानगमने द्वे, त्रिनवतिद्विनवतिभ्यामाहारकचतुष्टयोद्वलने एकोननवत्यष्टाशीतिसङ्क्रान्तौ द्वे । तदेवं सर्वसङ्ख्यया दशाऽपतरसत्तास्थानानि । भूयस्कारसत्तास्थानानि षट्, तथाहि—भूयो मनुष्यद्विकबन्धेनाष्टसप्ततेरशीतौ गमनं, ततोऽपि नरकद्विके देवद्विके वा वैक्रियचतुष्टयसहिते भूयोऽपि बध्यमाने षण्णवतौ, ततोऽपि देवद्विके नरकद्विके वा पुनरपि

बध्यमानेऽष्टाशीतौ, ततोऽपि तीर्थकरनामबन्धे एकोननवत्यां गमनमिति चत्वारि । अष्टाशीतेरेवाहारकद्विकबन्धेन त्रिनवतौ गमनं, ततोऽपि तीर्थकरनामबन्धे त्रिनवतौ, एवं सर्वसङ्ख्यया षडेव त्रयस्कारसत्कर्माणि, नाधिकानि, शेषात्सत्तास्थानात्प्रच्यूतेऽन्यस्मिन् सत्तास्थाने गमनासंभवात् । यच्चवक्तव्यं तदिह न लभ्यते, नाम्नः सर्वोत्तरप्रकृतिसत्ताव्यवच्छेदे त्रयः सत्तोपादानासंभवात् ।

तदेवमुक्ताः प्रत्येकं ज्ञानावरणीयाद्युत्तरप्रकृतीनां सत्तास्थानेषु त्रयस्कारादयः । सम्प्रति सामान्यतः सर्वोत्तरप्रकृतीनां तेऽभिधेयाः । तत्र सामान्यतः सर्वोत्तरप्रकृतीनां सत्तास्थानान्यष्टचत्वारिंशत् । तथाहि—एकादश द्वादशाशीतिरेकाशीतिश्चतुरशीतिः पञ्चाशीतिः,ततश्चतुर्नवत्यादीनि चतुर्दशाधिकशतान्तानि, ततः पञ्चविंशाद्यतादारभ्य षट्चत्वारिंशशतपर्यन्तानि स्थानानि द्वात्रिंशशतवर्जानि निरन्तरं वाच्यानि—११–१२–८०–८१–८४–८५–९४–९५–९६–९७–९८–९९–१००–१०१–१०२–१०३–१०४–१०५–१०६–१०७–१०८–१०९–११०–१११–११२–११३–११४–१२५–१२६–१२७—१२८–१२९–१३०–१३१-१३३–१३४–१३५–१३६–१३७–१३८–१३९–१४०–१४१–१४२–१४३–१४४–१४५–१४६। तत्रातीर्थकरकेवलिनोऽयोग्यवस्थाचरमसमये एकादशप्रकृत्यात्मकं सत्तास्थानं । तस्मिन्नेव समये तीर्थकृतो द्वादशप्रकृत्यात्मकं, ताश्च द्वादश मनुष्यायुर्मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्त्तितीर्थकरनामान्यतरवेदनीयोच्चैर्गोत्रलक्षणाः । एता एव जिननामरहिता एकादश । सयोगिकेवल्यवस्थायामशीत्यादीनि चत्वारि सत्तास्थानानि ८०–८१–८४–८५। तत्राशीतिरियं—देवद्विकमौदारिकचतुष्टयं वैक्रियचतुष्टयं तैजसकार्मणशरीरे तैजसकार्मणबन्धने तैजसकार्मणसङ्घाते संस्था-

नषट्कं संहननषट्कं वर्णादिविंशतिरगुरुलघुपराघातोपघातोच्छ्वासविहायोगतिद्विकानि स्थिरास्थिरे शुभाशुभे सुस्वरदुःस्वरे दुर्भगमयशःकीर्त्तिरनादेयं निर्माणं प्रत्येकमपर्याप्तं मनुष्यानुपूर्वी नीचैर्गोत्रमन्यतरवेदनीयमित्येकोनसप्ततिरेकादश च प्रागुक्ता इति । सैवाशीतिर्जिननामसहितैकाशीतिः । अशीतिरेवाहारकचतुष्टयान्विता चतुरशीतिः । सैव जिननामान्विता पञ्चाशीतिः । एतान्येवाशीत्यादीनि चत्वारि सत्तास्थानानि ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकसहितानि चतुर्नवत्यादीनि चत्वारि सत्तास्थानानि भवन्ति ९४–९९–९०–९९ । एतानि च क्षीणकषायचरमसमये नानाजीवानधिकृत्य प्राप्यन्ते । एतान्येव निद्राप्रचलासहितानि यथाक्रमं षण्णवत्यादीनि चत्वारि सत्तास्थानानि भवन्ति ९६ ९७–१००–१०१ । एतानि क्षीणकषायगुणस्थानके द्विचरमसमयं यावन्नानाजीवापेक्षया प्राप्यन्ते । एतेष्वेव संज्वलनलोभप्रक्षेपे सप्तनवत्यादीनि चत्वारि भवन्ति ९७–९८–१०१–१०२ । एतानि सूक्ष्मसम्पराये लभ्यन्ते । एतेष्वेव संज्वलनमायाप्रक्षेपेऽष्टनवत्यादीनि चत्वारि भवन्ति ९८–९९–१०२–१०३ । एतान्यनिवृत्तिबादरसम्परायगुणस्थानपर्यन्ते लभ्यन्ते । तस्मिन्नेव गुणस्थाने तेष्वेव चतुर्षु सत्तास्थानेषु संज्वलनमानप्रक्षेपे नवनवत्यादीनि चत्वारि भवन्ति ९९–१००–१०३–१०४ । तस्मिन्नेव गुणस्थाने तेष्वेव चतुर्षु संज्वलनक्रोधप्रक्षेपे शतादीनि चत्वारि स्थानानि भवन्ति १००–१०१–१०४–१०५ । तस्मिन्नेव गुणस्थाने पुरुषवेदप्रक्षेपे एकोत्तरशतादीनि चत्वारि १०१–१०२–१०५–१०६ । ततस्तस्मिन्नेव गुणस्थाने हास्यादिषट्कप्रक्षेपे सप्तोत्तरशतादीनि चत्वारि १०७–१०८–१११–११२ । ततस्तस्मिन्नेव गुणस्थाने स्त्रीवेदप्रक्षेपेऽष्टोत्तरशतादीनि चत्वारि १०८–१०९–११२–११३ । ततस्तस्मिन्नेव गुणस्थाने नपुंसकवेदप्रक्षेपे नवोत्तरशतादीनि

चत्वारि १०९–११०–११३–११४। तस्मिन्नेव गुणस्थाने तेष्वेव चतुर्षु नामत्रयोदशकस्त्यानर्द्धित्रिकरूपप्रकृतिषोडशक-प्रक्षेपे पञ्चविंशत्युत्तरशतादीनि चत्वारि १२५–१२६–१२९–१३०। ततोऽपि तस्मिन्नेव गुणस्थाने मध्यमकषायाष्टकप्रक्षेपे त्रयस्त्रिंशशतादीनि चत्वारि १३३–१३४–१३७–१३८। तथा यानि क्षीणमोहसत्कानि षण्णवतिसप्तनवतिशतैकोत्तरशतात्मकानि चत्वारि सत्तास्थानानि तेषु मोहनीयषोडविंशतिस्त्यानर्द्धित्रिकनामत्रयोदशकप्रक्षेपादिमानि चत्वारि सत्तास्थानानि भवन्ति—चतुस्त्रिंशं शतं पञ्चत्रिंशं शतं अष्टत्रिंशं शतं एकोनचत्वारिंशं शतं (१३४–१३५–१३८–१३९) चेति। तेष्वेव षण्णवत्यादिषु चतुर्षु मोहनीयत्रयोविंशतिनामत्रयोदशकस्त्यानर्द्धित्रिकप्रक्षेपे पञ्चत्रिंशशतादीनि चत्वारि १३५–१३६–१३९ १४०। मोहनीयचतुर्विंशतिप्रक्षेपे चैतानि षट्त्रिंशशतादीनि चत्वारि सत्तास्थानानि भवन्ति १३६–१३७–१४०–१४१। मोहनीयषड्विंशतिप्रक्षेपे चाष्टत्रिंशशतादीनि चत्वारि १३८–१३९–१४२–१४३। मोहनीयसप्तविंशतिप्रक्षेपे चैतान्येकोनचत्वारिंशशतादीनि चत्वारि भवन्ति १३९–१४०–१४३–१४४। मोहनीयाष्टाविंशतिप्रक्षेपाच्चैतानि चत्वारिंशशतादीनि चत्वारि भवन्ति १४०–१४१–१४४–१४५। अमूनि च मोहनीयषोडविंशत्यादिप्रकृतिप्रक्षेपभावीनि चतुस्त्रिंशशतादीनि पञ्चचत्वारिंशशतपर्यन्तानि सत्तास्थानान्यविरतसम्यग्दृष्ट्यादीनामप्रमत्तान्तानामवसेयानि। यच्चानन्तरं पञ्चचत्वारिंशशतलक्षणं सत्तास्थानं तदेव परभवायुर्बन्धे षट्चत्वारिंशशतात्मकसत्तास्थानं (१४६) भवति। तथा यदा जन्तोस्तेजोवायुभवे वर्त्तमानस्य नाम्नोऽष्टसप्ततिरेकमेव च नीचैर्गोत्रलक्षणं गोत्रं सत्तदा तस्य ज्ञानावरणपञ्चकदर्शनावरणनवकवेदनीयद्विकमोहनीयषड्विंशत्यन्तरायपञ्चकतिर्यगायुषां मीलनेन सप्तविंशं शतं (१२७) सत्तास्थानं भवति, तदेव

पारञ्जविकतिर्यगायुर्बन्धेऽष्टाविंशत्यधिकं शतं (१२८)। तथा वनस्पतिकायिकेषु यदा स्थितिह्रयादेवद्विकनरकद्विकवैक्रियचतुष्टयरूपास्वष्टासु प्रकृतिषु क्षीणासु नाम्नोऽशीतिप्रकृतयः सत्तायां लभ्यन्ते तदा नाम्नोऽशीतिर्वेद वेदनीये द्वे गोत्रे अनुभूयमानं तिर्यगायुरावरणचतुर्दशकं मोहनीयषड्विंशतिरन्तरायपञ्चकं चेति त्रिंशशतात्मकं (१३०) सत्तास्थानं, तदेव परभवायुर्बन्धे एकत्रिंशशतात्मकं (१३१) सत्तास्थानं । तदेवं परिभाव्यमानं द्वात्रिंशशतात्मकं सत्तास्थानं न प्राप्यत इति तद्वर्जनं कृतं । इह यद्यपि सप्तनवत्यादीनि तत्तत्प्रकृतिप्रक्षेपादन्यथाऽन्यथाऽनेकधा लभ्यन्ते तथापि सङ्ख्यया तुल्यानीति न पृथग्विवक्ष्यन्ते । ततोऽष्टचत्वारिंशदेव सत्तास्थानानि, नोनाधिकानि । अत्रावक्तव्यं सत्कर्म नास्ति, सर्वप्रकृतिसत्ताव्यवच्छेदे भूयः सत्ताया अयोगात् । अवस्थितानि चतुश्चत्वारिंशत्, एकादशद्वादशचतुर्नवतिपञ्चनवतिरूपाणां चतुर्णां सत्तास्थानानामेकसामयिकतयाऽवस्थितत्वायोगात् । सप्तचत्वारिंशदल्पतराणि । सप्तदश भूयस्काराणि, यतस्तानि सप्तविंशशतादारभ्य परत एव प्राप्यन्ते, नार्वाक्, परतोऽपि यत्रयस्त्रिंशशतात्मकं सत्तास्थानं तदपि भूयस्कारतया न लभ्यते, सप्तविंशशतादर्वाक्तनानां सत्तास्थानानां परतोऽपि त्रयस्त्रिंशशतात्मकस्य सत्तास्थानस्य क्षपकश्रेण्यामेव प्राप्तिसंभवात् । ततश्च प्रतिपाताभावेन तेषां भूयस्कारत्वायोगात्, ततः सप्तदशैव भूयस्काराणि । तदेवमुक्ताः उत्तरप्रकृतिमाश्रित्य बन्धादिषु भूयस्कारादयः । एवं बन्धादीनां स्थित्यादित्रये सङ्क्रमादीनां चतुर्षु चागमानुसारेण स्वयमेव भावना विधेया ॥ ५२ ॥

करणोदयसंताणं सामित्तोघेहिं सेसगं णेयं । गइआइमग्गणासुं संभवउं सुहु आगमिय ॥ ५३ ॥

व्याख्या—अष्टानां करणानामुदयसत्तयोश्च यदुक्तं प्रत्येकं स्वरूपं तत्स्वामित्वौघैरिति द्वितीयार्थे तृतीया व्यक्त्यपेक्षया बहुवचनं उत्तरान्निधेयस्य च प्राग्निपातः, ततश्च तान्योघस्वामित्वानि यथोक्तकरणाष्टकोदयसत्तारूपाणीत्यर्थः। सुष्ठु आगम्य परिज्ञाय शेषकमपि ज्ञातव्यं। क्वेत्याह—गत्यादिषु चतुर्दशसु मार्गणास्थानेषु। कथमित्याह—संज्ञवतः शास्त्रानुसारेण, नान्यथा ॥ ५३ ॥

बंधोदीरणसंकमसंतुदयाणं जहन्नयाईहिं। संवेहो पगइ ठिई अणुभागपएसउं णेउं ॥ ५४ ॥

व्याख्या—बन्धोदीरणासङ्क्रमसत्तोदयरूपाणां पञ्चानां पदार्थानां प्रकृतिस्थित्यनुभागप्रदेशतः प्रकृतिस्थित्यनुभागप्रदेशानधिकृत्य जघन्याजघन्योत्कृष्टानुत्कृष्टैः संवेधो मिथः शास्त्राविरोधेनैककालं मीलनं, यथा ज्ञानावरणीयस्य जघन्ये स्थितिबन्धे जघन्योऽनुभागबन्धो जघन्यः प्रदेशबन्धः अजघन्याः स्थित्युदीरणासङ्क्रमोदया इत्यादिरूपं तत्पूर्वापरविचारं सुष्ठु परिज्ञाय ज्ञातव्यम् ॥ ५४ ॥

तदेवमुक्ता सत्ता। समाप्तः प्रकृतग्रन्थार्थः। अथ संवेधप्रसङ्गाद्बन्धोदयसत्तासंवेधप्रतिपादकसप्ततिकार्थो महोपयोगीत्यत्रैवायं दिङ्मात्रेणोपदर्श्यते, तत्र प्रथमतो मूलप्रकृतिषु बन्धस्य बन्धेन संवेध उच्यते—आयुषि बध्यमानेऽष्टापि कर्माणि नियमाद्बध्यन्ते आप्रमत्तगुणस्थानं। शेषेषु (सप्तसु बध्यमानेष्वेवायुषोऽबंधात्) गुणस्थानेषु सप्तबन्धेऽप्यायुषो न बन्ध इति। मोहनीये बध्यमाने सप्तानामष्टानां वा बन्धः। तद्बन्धो ह्यनिवृत्तिबादरान्तः, तत्र मिश्रापूर्वकरणानिवृत्तिबादरेषु सप्तानामेव, शेषेषु त्वप्रमत्तान्तेष्वायुर्बन्धाभावे सप्तानां तद्बन्धे त्वष्टानां बन्धः। वेदनीये बध्यमाने एकस्य षण्णां सप्तानाम्

मष्टानां वा बन्धः, तत्रोपशान्तमोहादौ वेदनीये बध्यमाने तदेवैकं बध्यते, सूक्ष्मसम्पराये मोहायुर्वर्जानि षट्, सप्ताष्ट-
ज्ञावना प्राग्वत्। ज्ञानावरणदर्शनावरणनामगोत्रान्तरायेषु बध्यमानेषु षट् सप्ताष्टौ च, तत्र षट् सूक्ष्मसम्पराये, सप्ताष्ट-
ज्ञावना प्राग्वत्। तदेवं चिन्तितो बन्धस्य बन्धेन संवेधः, अथोदयस्योदयसत्ताभ्यां सह चिन्त्यते—मोहस्योदये नियमादष्टावप्युदये सत्तायां च लभ्यन्ते। तदुदयो हि सूक्ष्मसम्परायान्तः। सूक्ष्मसम्परायं यावच्च सर्वाण्यपि कर्माण्युदये सत्तायां च प्राप्यन्त इति। ज्ञानावरणदर्शनावरणान्तरायाणामुदये सति सप्ताष्टौ च सत्तायामुदये च लभ्यन्ते। तत्राष्टावुदये सूक्ष्मसम्परायं यावत्, सत्तायां तूपशान्तमोहेऽपि। सप्त तूदयमाश्रित्योपशान्तमोहे क्षीणमोहे वा सत्तामधिकृत्य तु क्षीणमोह एव। वेदनीयायुर्नामगोत्राणामुदये सत्यष्टौ सप्त चत्वारि वा सन्त्युदयवन्ति च प्राप्यन्ते। तत्राष्टावुदयमधिकृत्य सूक्ष्मसम्परायं, सत्तामधिकृत्य तूपशान्तमोहं यावत्। सप्तोदयमधिकृत्योपशान्तमोहे क्षीणमोहे वा, सत्तामधिकृत्य तु क्षीणमोह एव। चत्वारि त्रयोदशे चतुर्दशे वा गुणस्थाने तान्येव। तदेवमुक्त उदयस्योदयसत्ताभ्यां संवेधः। अथ सत्ताया उदयसत्ताभ्यां चिन्त्यते। तत्र मोहनीयस्य सत्तायामुदयोऽष्टानां सप्तानां वा। तत्राष्टानां सूक्ष्मसम्परायं यावत्, सप्तानां तूपशान्तमोहे, सत्ता पुनरष्टानामेव, मोहनीयसत्तायाः शेषसर्वसत्तानान्तरीयकत्वात्। ज्ञानावरणदर्शनावरणान्तरायाणां सत्तायां सप्तानामष्टानां वोदयः। तत्राष्टानामुदयः सूक्ष्मसम्परायं यावत्, सप्तानामुपशान्तमोहे क्षीणमोहे वा। सत्ताऽप्यष्टानां सप्तानां वा, अष्टानामुपशान्तमोहं यावत्, सप्तानां क्षीणमोहे। वेदनीयायुर्नामगोत्राणां सत्तायां सप्तानामष्टानां चतुर्णां वा सत्तोदयौ। तत्र सप्तानामष्टानां वा सत्तोदयौ प्राग्वत्। चतुर्णां त्रयोदशे चतुर्दशे च गुणस्थाने।

तदेवमुक्तः सत्ताया उदयसत्ताभ्यां संवेधः। अथोदयस्य बन्धेन सह संवेध उच्यते—मोहनीयस्योदये षट् सप्ताष्टौ वा बध्यन्ते। तत्राष्टावायुर्बन्धकाले, तदभावे तु सप्त, तानि चानिवृत्तिबादरं यावत्, षट् सूक्ष्मसम्पराये। मोहनीयवर्जानां शेषाणामुदये एकं षट् सप्ताष्टौ च बध्यन्ते। तत्र षट्सप्ताष्टभावना प्राग्वत्। एकं ज्ञानावरणदर्शनावरणान्तरायाणामुदये उपशान्तमोहे क्षीणमोहे वा, वेदनीयायुर्नामगोत्राणामुदये सयोगिकेवलिन्यपि, तच्चैकं सातवेदनीयरूपं द्रष्टव्यं। तदेवमुक्त उदयस्य बन्धेन सह संवेधः। अथ बन्धस्योदयेन सहोच्यते—षण्णां सप्तानामष्टानां वा बन्धे मोहस्योदयो भवति, अष्टसप्तषड्बन्धानां क्रमेणाप्रमत्तानिवृत्तिबादरसूक्ष्मसम्परायान्तत्वात्, मोहोदयस्य चावश्यं सूक्ष्मसम्परायान्तत्वात्। शेषाणां तूदयोऽष्टानां सप्तानां षण्णामेकस्य च बन्धे भवति। तथाहि—ज्ञानावरणदर्शनावरणान्तरायाणामुदयः क्षीणमोहं यावत्, वेदनीयायुर्नामगोत्राणामयोगिकेवलिनं यावत्। एकस्य च बन्ध उपशान्तमोहादौ। ततः शेषाणामुदयः सप्ताष्टषण्णामेकबन्धेऽपि भवति। तदेवमुक्तो बन्धस्योदयेन सह संवेधः। अथ सत्ताया बन्धेन सहोच्यते—एकैकस्यापि कर्मणः सत्तायामेकषट्सप्ताष्टभेदैश्चतुर्विधोऽपि बन्धः संभवति। मोहनीयस्य सत्ताया उपशान्तमोहं शेषघातिनां क्षीणमोहं अघातिनां चतुर्णामयोगिकेवलिनं यावत्प्राप्तेः, अष्टसप्तषण्णामेकबन्धानां च यथाक्रमं अप्रमत्तमनिवृत्तिबादरं सूक्ष्मसम्परायमुपशान्तमोहादिकं च यावत्प्राप्तेः। तदेवमुक्तः सत्ताया बन्धेन संवेधः। अथ बन्धस्य सत्तया सहोच्यते—अष्टबन्धे सप्तबन्धे षड्बन्धे च नियमादष्टानां सत्ता, एकस्य च बन्धेऽष्टानां सप्तानां चतुर्णां च क्रमेणोपशान्तमोहे क्षीणमोहे सयोगिकेवलिनि च। उक्तो बन्धस्य सत्तया संवेधः। सम्प्रत्युदयेन सहान्निधीयते—सप्तानामष्टानां षण्णां वा बन्धे निय-

मादष्टानामपि प्रकृतीनामुदयो ज्ञवति । सातवेदनीयस्यैवैकस्य बन्धे सप्तानां चतुर्णां वोदयः । तत्र सप्तानामुपशान्तमोहे क्षीणमोहे वा । चतुर्णां सयोगिकेवलिनि ।

तदेवमुक्तो मूलप्रकृतीरधिकृत्य बन्धोदयसत्तानां संवेधः । अथैतासामेव स्थानान्युच्यन्ते—स्थानं नाम द्वित्रादिप्रकृतिसमुदायः । तत्र वेदनीयायुर्गोत्राणां प्रत्येकं द्वे द्वे सत्तास्थाने—द्वे एका चेति । तत्र वेदनीयस्यायोगिकेवलिद्विचरमसमयं यावद्वे अपि सत्यौ, एकतरस्या व्यवच्छेदे चरमसमय एका, गोत्रस्योच्चैर्गोत्रे उद्वलिते नीचैर्गोत्रे वाऽयोगिद्विचरमसमये क्षीणे एका सती, शेषकालं तु द्वे । बन्धे उदये च वेदनीयायुर्गोत्राणामेकमेवैकप्रकृतिरूपं स्थानं । न ह्यमीषां द्वित्रादिप्रकृतयो युगपद्बन्धमुदयं वा गच्छन्ति । तथा ज्ञानावरणान्तरायथोः प्रत्येकं बन्धोदयसत्तास्वेकैकं पञ्चपञ्चप्रकृत्यात्मकं स्थानं ।

अथायुषो गुणस्थानेषु बन्धोदयसत्ताश्चिन्त्यन्ते—आद्यं गुणस्थानं यावन्नरकायुषो द्वितीयं यावत्तिर्यगायुषश्चतुर्थं यावन्मनुष्यायुषः सप्तमं यावद्देवायुषो बन्धः । तथा चतुर्थं यावन्नरकायुषो देवायुषश्चोदयः, पञ्चमं यावत्तिर्यगायुषश्चतुर्दशं यावन्मनुष्यायुषः । तथा चतुर्थं यावन्नरकायुषः सत्ता, देशविरतिं यावत्तिर्यगायुषोऽयोगिकेवलिनं यावन्मनुष्यायुषः, देवायुषस्तूपशान्तमोहगुणस्थानकं यावत्, यतो देवायुषि बद्धेऽप्युपशमश्रेणिमारज्ञते, सा चोपशान्तमोहगुणस्थानं यावज्ञवतीति । सम्प्रत्यायुषो बन्धोदयसत्तासंवेध उच्यते—तत्र तिर्यञ्चो मनुष्याश्च सर्वत्रोत्पद्यन्त इति तेषां चतुर्णामप्यायुषां बन्धसंज्ञवः, देवा नारकाश्च तिर्यञ्जनुष्यगत्योरेवोत्पद्यन्त इति तेषां द्वयोरेवायुषोर्बन्धः । ततस्तिर्यञ्जनुष्यगत्योर्नव नव,

देवनारकयोश्च पञ्च पञ्च भङ्गाः संभवन्तीति सर्वसङ्ख्ययाऽष्टाविंशतिर्भङ्गाः । तथाहि—नैरयिकस्य परभवायुर्बन्धकालात् पूर्वं नारकायुष उदयो नारकायुषः सत्ता १, एष भङ्ग आद्येषु चतुर्षु गुणस्थानेषु प्राप्यते, शेषगुणस्थानस्य नरकेष्वसंभवात् । परभवायुर्बन्धकाले तिर्यगायुषो बन्धो नारकायुष उदयो नारकतिर्यगायुषी सती २, एष भङ्गो मिथ्यादृष्टेः सासादनस्य वा । अथवा मनुष्यायुषो बन्धो नारकायुष उदयो मनुष्यनारकायुषी सती ३, एष भङ्गो मिथ्यादृष्टेः सासादनस्याविरतसम्यग्दृष्टेर्वा । बन्धोपरमे नारकायुष उदयो नारकतिर्यगायुषी सती ४, एष भङ्ग आद्येषु चतुर्ष्वपि गुणस्थानेषु, तिर्यगायुर्बन्धानन्तरं कस्यचिन्नारकस्य सम्यङ्मिथ्यात्वे सम्यक्त्वे वा गमनसंभवात् । अथवा नारकायुष उदयो मनुष्यनारकायुषी सती ५, एषोऽपि भङ्ग आद्येषु चतुर्ष्वपि गुणस्थानेषु, मनुष्यायुर्बन्धानन्तरं मिश्रे सङ्क्रमसंभवात् । एवं देवानामपि पञ्च भङ्गा भावनीयाः । नवरं नारकायुषः स्थाने देवायुरुच्चारणीयं । तिरश्चां परभवायुर्बन्धकालात् पूर्वं तिर्यगायुष उदयस्तिर्यगायुषः सत्ता १, एष भङ्ग आद्येषु पञ्चसु गुणस्थानेषु, शेषगुणस्थानस्य तिर्यक्त्वसंभवात् । बन्धकाले नारकायुषो बन्धस्तिर्यगायुष उदयो नारकतिर्यगायुषी सती, एष भङ्गो मिथ्यादृष्टेः, अन्यस्य नारकायुरबन्धकत्वात् २ । अथवा तिर्यगायुषो बन्धस्तिर्यगायुष उदयो द्वे तिर्यगायुषी सती, एष भङ्गो मिथ्यादृष्टेः सासादनस्य वा ३ । यद्वा मनुष्यायुषो बन्धस्तिर्यगायुष उदयो मनुष्यतिर्यगायुषी सती, एषोऽपि भङ्गो मिथ्यादृष्टेः सासादनस्य वा, तिरश्चोऽविरतसम्यग्दृष्टेर्देशविरतस्य वा देवायुष एव बन्धसंभवात् ४ । यद्वा देवायुषो बन्धस्तिर्यगायुष उदयो देवतिर्यगायुषी सती, एष भङ्गो मिश्रवर्जितेष्वाद्येषु चतुर्ष्वपि गुणस्थानेषु, मिश्रस्यायुर्बन्धायोगात्तद्वर्जनं ५ । बन्धोपरमे तु तिर्यगायुष

उदयो नरकतिर्यगायुषी सती ६, एष भङ्ग आद्येषु पञ्चसु गुणस्थानेषु, नरकायुर्बन्धानन्तरं मिश्रसम्यक्त्वादावपि गमनसंभवात्। अथवा तिर्यगायुष उदयो द्वे तिर्यगायुषी सती ७, अथवा तिर्यगायुष उदयो मनुष्यतिर्यगायुषी सती ८, अथवा तिर्यगायुष उदयो देवतिर्यगायुषी सती ९, एते त्रयोऽपि भङ्गा आद्येषु पञ्चसु गुणस्थानेषु। तदेवं सर्वसङ्ख्यया तिरश्चां नव भङ्गाः, मनुष्याणामप्येवं नवैव। तत्र मनुष्यायुष उदयो मनुष्यायुषः सत्ते १ त्येष भङ्गोऽयोगिकेवलिनं यावत्। परभवायुर्बन्धकाले नरकायुषो बन्धो मनुष्यायुष उदयो नारकमनुष्यायुषी सती, एष भङ्गो मिथ्यादृष्टेः, अन्यस्य नरकायुरबन्धकत्वात् २। तिर्यगायुषो बन्धो मनुष्यायुष उदयस्तिर्यङ्मनुष्यायुषी सती ३, एष विकल्पो मिथ्यादृष्टेः सासादनस्य वा। मनुष्यायुषो बन्धो मनुष्यायुष उदयो द्वे मनुष्यायुषी सती ४, एष भङ्गो मिथ्यादृष्टेः सासादनस्य वा। देवायुषो बन्धो मनुष्यायुष उदयो देवमनुष्यायुषी सती, एष भङ्गोऽप्रमत्तगुणस्थानं यावत् ५। बन्धोपरमे तु मनुष्यायुष उदयो नरकमनुष्यायुषी सती ६, मनुष्यायुष उदयस्तिर्यङ्मनुष्यायुषी सती ७, मनुष्यायुष उदयो द्वे मनुष्यायुषी सती ८, एते त्रयोऽपि भङ्गा अप्रमत्तगुणस्थानं यावत्, नरकतिर्यङ्मनुष्यायुर्बन्धानन्तरं कस्यचित्संयमप्रतिपत्तेरपि भावात् ८। मनुष्यायुष उदयो देवमनुष्यायुषी सती, एष भङ्ग उपशान्तमोहगुणस्थानं यावत्, देवायुषि बद्धेऽप्युपशमश्रेण्यारोहसंभवात् ९।

अथ दर्शनावरणस्य बन्धोदयसत्तास्थानान्युच्यन्ते—अस्य त्रीणि बन्धस्थानानि नव षट् चतस्रश्चेति। तत्र सर्वप्रकृतिसमुदायो नव, तद्बन्धश्चाद्यगुणस्थानद्वयं यावत्। ता एव नव प्रकृतयः स्त्यानर्द्धित्रिकरहिताः षड्भवन्ति, तद्बन्धश्च

मिश्रगुणस्थानादारभ्यापूर्वकरणगुणस्थानस्य प्रथमभागं यावत्। ता एव षट् प्रकृतयो निद्राप्रचलाहीनाश्चतस्रः, तद्बन्धश्चापूर्वकरणगुणस्थानप्रथमभागादूर्ध्वं सूक्ष्मसम्परायं यावत्। सत्तास्थानान्यपि दर्शनावरणस्य त्रीणि नव षट् चतस्रश्चेति। तत्र क्षपकश्रेणिमधिकृत्यानिवृत्तिबादरसम्परायाद्यभागं यावन्नव सत्यः। तत ऊर्ध्वं तु स्त्यानर्द्धित्रिके क्षीणे षट् प्रकृतयः, ताश्च क्षीणमोहद्विचरमसमयं यावत्सत्यः। द्विचरमसमये निद्राप्रचलयोः सत्ताव्यवच्छेदे चतस्रः सत्यः, ताश्च क्षीणमोहचरमसमय एव क्षीयन्ते। उपशमश्रेण्यां तु नवापि प्रकृतय उपशान्तमोहगुणस्थानं यावत्सत्यः, अत्र नवबन्धस्थाने कालमधिकृत्य भङ्गत्रयं, तथाहि—तदनाद्यनन्तमनादिसान्तं सादिसान्तं चेति। तत्रानाद्यनन्तमभव्यानां, तेषां कदापि नवविधबन्धव्यवच्छेदासंभवात्। अनादिसान्तं भव्यानां, तेषां कालान्तरे नवविधबन्धव्यवच्छेदसंभवात्। सादिसान्तं सम्यक्त्वात्पतितानां द्रष्टव्यं, तच्च जघन्येनान्तर्मुहूर्त्तं कालं यावत् उत्कर्षतो देशोनार्धपुद्गलपरावर्त्तं यावत्। तथा षट्प्रकृत्यात्मकस्य बन्धस्थानस्य निरन्तरं बध्यमानत्वेनावस्थानमुत्कर्षतो द्वे षट्षष्टी सागरोपमाणां, अन्तरा सम्यङ्मिथ्यात्वान्तरितस्य सम्यक्त्वस्यैतावन्तं कालं यावदवस्थानसंभवात्, तत ऊर्ध्वं तु कश्चित् क्षपकश्रेणिं प्रतिपद्यते, कश्चित्तु मिथ्यात्वं, मिथ्यात्वप्रतिपत्तौ चावश्यं नवविधो बन्ध इति, जघन्येन चान्तर्मुहूर्त्तं। चतुर्विधबन्धस्थानं जघन्येनैकं समयं उत्कर्षतोऽन्तर्मुहूर्त्तं। तत्रोपशमश्रेण्यामपूर्वकरणद्वितीयभागे चतुर्विधबन्धमारभ्यानन्तरसमये कश्चित्कालं करोति, कालं च कृत्वा दिवं गतः सन्नविरतो भवति, अविरतत्वे च षड्विधबन्ध इति। चतुर्विधबन्धस्थानस्यैकसामायिकी स्थितिरुत्कर्षेण त्वान्तर्मौहूर्तिकी, अपूर्वकरणद्वितीयभागादारभ्य सूक्ष्मसम्परायान्तस्यापि कालस्यान्तर्मुहूर्त्तप्रमाणत्वात्। तथा नवप्रकृत्यात्मकं दर्शनावरणस्य

सत्तास्थानं कालमधिकृत्य द्विधाऽनाद्यनन्तमनादिसान्तं च । अनाद्यनन्तमभव्यानां, कदाप्यव्यवच्छेदात्, अनादिसान्तं भव्यानां, कालान्तरे व्यवच्छेदात् । सादिसान्तं तु न भवति, नवात्मकसत्तास्थानव्यवच्छेदस्य क्षपकश्रेण्यां भावात्, ततश्च प्रतिपाताभावात् । षट्प्रकृत्यात्मकं तु सत्तास्थानमजघन्योत्कृष्टमन्तर्मुहूर्त्तप्रमाणं । चतुःप्रकृत्यात्मकं त्वेकसामयिकं । उदयस्थाने दर्शनावरणस्य द्वे, तद्यथा—चतस्रः पञ्च च। तत्र दर्शनावरणचतुष्कस्य केवलस्योदये चतुःप्रकृत्यात्मकमुदयस्थानं, अन्यतमनिद्रोदयसाहित्ये च पञ्चप्रकृत्यात्मकं, एते द्वे अप्युदयस्थाने क्षीणमोहगुणस्थानं यावद्द्रष्टव्ये । अयं च चतसृणां पञ्चानां वा प्रकृतीनामुदय एकत्र युगपद्भावापेक्षया दृष्टव्यः, सामान्यचिन्तायां तु प्रमत्तसंयतं यावन्नवानामप्युदयः, ततः परं स्त्यानर्द्धित्रिकस्योदयाभावात् षण्णामुदयः । स च तावद्यावत्क्षीणमोहस्योपान्त्यसमयः । तत्र च निद्राप्रचलयोरपि व्यवच्छेदाच्चरमसमये चतसृणामुदयः । अथ बन्धोदयसत्तास्थानानां परस्परं संवेध उच्यते—नवविधो बन्धश्चतुर्विध उदयो नवविधा सत्ता, एष भङ्गो निद्रोदयाभावे द्रष्टव्यः, निद्रोदये तु नवविधो बन्धः पञ्चविध उदयो नवविधा सत्ता, एतौ द्वावपि भङ्गौ मिथ्यादृष्टिसासादनानां । तथा षड्विधो बन्धश्चतुर्विध उदयो नवविधा सत्ता, अथवा षड्विधो बन्धः पञ्चविध उदयो नवविधा सत्ता, एतौ द्वावपि मिश्रगुणस्थानादारभ्यापूर्वकरणगुणस्थानाद्यभागं यावद्वेदितव्यौ । तथा चतुर्विधो बन्धश्चतुर्विध उदयो नवविधा सत्ता, अथवा चतुर्विधो बन्धः पञ्चविध उदयो नवविधा सत्ता, एतौ द्वावुपशमश्रेण्यामपूर्वकरणद्वितीयभागादारभ्य सूक्ष्मसम्परायचरमसमयं यावत्, उपशान्ते तु बन्धाभावाच्चतुर्विध उदयो नवविधा सत्ता,अथवा पञ्चविध उदयो नवविधा सत्ता इति द्वौ भङ्गौ । क्षीणमोहचरमसमये च चतुर्विध उदयश्चतुर्विधा सत्ता इत्येष

नवमो भङ्गः। तथा चतुर्विधो बन्धश्चतुर्विध उदयः षड्विधा सत्तेत्येष विकल्पः स्त्यानर्द्धित्रिकक्षयानन्तरं सूक्ष्मसम्परायचरमसमयं यावत्। तथाऽबन्धश्चतुर्विध उदयः षड्विधा सत्तेत्येष विकल्पः क्षीणमोहे द्विचरमसमयं यावत्। तदेवं सर्वसङ्ख्यया दर्शनावरणस्य सप्ततिकाकारमतेनैकादश भङ्गा उक्ताः। केचिदाचार्याः कर्मस्तवकारादयः क्षपके क्षीणमोहे च द्विचरमसमयं यावत् पञ्चानामप्युदयमिच्छन्ति, तन्मतेनान्यौ द्वौ भङ्गौ भवतः, तद्यथा—चतुर्विधो बन्धः पञ्चविध उदयः षड्विधा सत्ता, एष भङ्गः स्त्यानर्द्धित्रिकक्षयानन्तरं सूक्ष्मसम्परायं यावत्। बन्धाभावे पञ्चविध उदयः षड्विधा सत्ता, एष भङ्गः क्षीणमोहे द्विचरमसमयं यावत्। तदेवं सर्वसङ्ख्यया त्रयोदश भङ्गाः।

अथ गोत्रस्य प्रागुक्तानां बन्धोदयसत्तास्थानानां संवेध उच्यते—तत्र नीचैर्गोत्रस्य सासादनगुणस्थानं यावद्बन्धो देशविरतिगुणस्थानं यावदुदयः। उच्चैर्गोत्रस्य तु सूक्ष्मसम्परायं यावद्बन्धोऽयोगिकेवलिनं यावदुदयः। सत्कर्मता तु द्वयोरपि सर्वेष्वपि गुणस्थानेषु। एवं चात्र सप्त भङ्गाः संभवन्ति, तथाहि—नीचैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदयो नीचैर्गोत्रं सत् १, एष भङ्गस्तेजोवायुकायिकेषु लभ्यते, तत्रोच्चैर्गोत्रोद्वलनात्तद्भवादुद्वृत्तेषु च शेषजीवेषु कियत्कालं लभ्यते। नीचैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदय उच्चैर्नीचैर्गोत्रे सती २। अथवा नीचैर्गोत्रस्य बन्ध उच्चैर्गोत्रस्योदयो द्वे सती ३। एतौ भङ्गौ मिथ्यादृष्टिषु सासादनेषु वा, अग्रे तु बन्धो नीचैर्गोत्रस्य नास्तीत्येतदसंभवः। तथोच्चैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदयो द्वे सती ४, एष भङ्गो मिथ्यादृष्टेरारभ्य देशविरतिं यावत्, न परतः, परतो नीचैर्गोत्रोदयाभावात्। तथोच्चैर्गोत्रस्य बन्ध उच्चैर्गोत्रस्योदयो द्वे सती, एष भङ्गः सूक्ष्मसम्परायं यावत्, न परतः, परतो गोत्रबन्धाभावात् ५। अबन्ध उच्चैर्गोत्रस्योदयो

के सती, एष विकल्प उपशान्तमोहादारभ्यायोगिद्विचरमसमयं यावत् ६ । चरमसमये उच्चैर्गोत्रस्योदय उच्चैर्गोत्रं सत् ७ ।

अथ वेदनीयस्य प्रागुक्तानां बन्धोदयसत्तास्थानानां संवेध उच्यते—असातस्य बन्धोऽसातस्योदयः सातासाते सती १, अथवाऽसातस्य बन्धः सातस्योदयो के सती २, एतौ द्वौ भङ्गौ मिथ्यादृष्टेरारभ्य प्रमत्तसंयतं यावत्प्राप्येते, न परतः, परतोऽसातस्य बन्धाभावात् । सातस्य बन्धोऽसातस्योदयो के सती ३, यद्वा सातस्य बन्धः सादस्योदयो के सती ४, इमौ द्वौ भङ्गौ मिथ्यादृष्टेरारभ्य सयोगिकेवलिद्विचरमसमयं यावत् । परतो बन्धाभावेऽसातस्योदयः सातासाते सती ५, अथवा सातस्योदयः सातासाते सती ६, एतौ द्वौ भङ्गौ अयोगिकेवलिद्विचरमसमयं यावत् । चरमसमयेऽसातस्योदयोऽसातं सत् यस्य द्विचरमसमये सातं क्षीणं ७, यस्य त्वसातं द्विचरमसमये क्षीणं तस्य सातस्योदयः सातस्य सत्ता ८ । सर्वसङ्ख्यया वेदनीयाः सांवेधिका अष्टौ भङ्गाः ।

ज्ञानावरणान्तराययोश्च पञ्चानामेव बन्ध उदयः सत्ता च, बन्धोपरमेऽपि पञ्चानामेवोदयः सत्ता चेति द्वौ भङ्गौ । तदेवमल्पवक्तव्यत्वादुक्तानि प्रथमतः षट् कर्माणि ।

अथ मोहनीयस्य बन्धोदयसत्तास्थानान्युच्यन्ते—मोहनीयस्य दश बन्धस्थानानि, तद्यथा—प्रथमं बन्धस्थानं द्वाविंशतिः, सा चाद्यगुणस्थाने । द्वितीयमेकविंशतिः, सा च द्वितीयगुणस्थाने । तृतीयं सप्तदश, तत्तृतीयचतुरीयगुणस्थानयोः । चतुर्थं त्रयोदश, तच्च पञ्चमे गुणस्थाने । पञ्चमं नव, तच्च षष्ठसप्तमाष्टमगुणस्थानेषु । षष्ठं पञ्चप्रकृत्यात्मकं, सप्तमं चतुःप्रकृत्यात्मकं, अष्टमं त्रिप्रकृत्यात्मकं, नवमं द्विप्रकृत्यात्मकं, दशममेकप्रकृत्यात्मकं, इमानि पञ्चादीनि पञ्च बन्धस्थानानि

नवमगुणस्थाने द्रष्टव्यानि । अत्र मिथ्यात्वं षोडश कषाया अन्यतमो वेदोऽन्यतरद्युगलं भयं जुगुप्सा चेति द्वाविंशतिः। एषा च हास्यरतियुगलेऽरतिशोकयुगले च पर्यायेण प्राप्यत इति द्विधा, नवकबन्धं यावत्सर्वेषामपि हास्यरत्योररतिशोकयोश्च विकल्पेन बन्धकत्वात् । भूयः सा त्रिष्वपि वेदेषु प्रत्येकं विकल्पेन प्राप्यत इति षोढा । सैव द्वाविंशतिर्मिथ्यात्वाबन्धे एकविंशतिः, नवरमत्र द्वयोर्वेदयोरन्यतरो वेद इति वाच्यं । एकविंशतिबन्धकानां सासादनानां नपुंसकवेदाबन्धकत्वात्तद्बन्धस्य मिथ्यात्वोदयहेतुकत्वात्सासादनानां च तदुदयाभावात्ततो द्वयोर्युगलयोर्द्वयोश्च वेदयोः संचारणया चतुर्धैकविंशतिः । प्रथमकषायाबन्धे सप्तदशको बन्धः, द्वितीयकषायाबन्धे त्रयोदशकः, तृतीयकषायाबन्धे नवकः, एतेषु सप्तदशादिषु अनन्तानुबन्ध्युदयाभावात् स्त्रीवेदस्य न बन्ध इति पुरुषवेद एक एव बध्यते इति द्वावेव भङ्गौ युगलद्विकेन लभ्येते । तत्रापि नवकबन्धे प्रमत्तगुणस्थाने युगलविकल्पः प्राप्यते, अप्रमत्तापूर्वकरणयोश्च हास्यरतिरूपमेकमेव युगलं प्राप्यते, अरतिशोकयुगलस्याप्रमत्तगुणस्थान एव स्थितत्वादित्येतद्गुणस्थानद्वये नवकबन्ध एकरूप एव । तथा हास्यरतिभयजुगुप्सा अपूर्वकरण एव तिष्ठन्ति, परतो नानुवर्त्तन्ते । ततोऽनिवृत्तिबादरे प्रथमसमयादारभ्य पञ्चको बन्धः, स चानिवृत्तिबादराद्धायाः प्रथमपञ्चभागान्तं यावत् । ततः परतः पुरुषवेदस्य बन्धाभावाच्चतुर्विधो बन्धः, सोऽप्यनिवृत्तिबादरसम्परायाद्धाया द्वितीयपञ्चभागान्तं यावत् । ततः परतः संज्वलनक्रोधस्य बन्धाभावात्त्रिको बन्धः, सोऽपि तृतीयपञ्चभागान्तं यावत् । ततः परतः संज्वलनमानस्य बन्धाभावाद्द्विको बन्धः, सोऽपि चतुर्थपञ्चभागान्तं यावत् । ततः परतः संज्वलनमायाया बन्धाभावात्संज्वलनलोभस्यैकस्य बन्धः, स चानिवृत्तिबादरसम्परायगुणस्थानचरमसमयं यावत् । अमी-

षामेव बन्धस्थानानां कालप्रमाणमभिधास्यामः—तत्र द्वाविंशतिबन्धे कालमधिकृत्य भङ्गत्रयं, तद्यथाहि—अभव्यानामेष बन्धोऽनाद्यपर्यवसितः, भव्यानामनादिसपर्यवसितः, सम्यक्त्वपरिभ्रष्टानां सादिसपर्यवसानः, स च जघन्येनान्तर्मुहूर्त्तप्रमाण उत्कर्षेण देशोनपुद्गलपरावर्त्तार्द्धमानः। एकविंशतिबन्धस्तु सासादनभावे लभ्यते, ततो यावानेव सासादनभावस्य कालस्तावानेवास्य द्रष्टव्यः, स च जघन्यत एकः समय उत्कर्षतः षडावलिकाः। सप्तदशबन्धे चोत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि किञ्चित्समधिकानि। त्रयस्त्रिंशत्सागरोपमाणि हि अनुत्तरसुरेषु प्राप्यन्ते, ततश्च्युत्वेहागत्य यावदद्यापि देशविरतिं सर्वविरतिं वा न प्रतिपद्यन्ते तावत्सप्तदशबन्ध इति किञ्चित्समधिकानीत्युच्यन्ते। जघन्यतस्त्वन्तर्मुहूर्त्तं। त्रयोदशबन्धे नवकबन्धे चोत्कृष्टा स्थितिर्देशोना पूर्वकोटी, यतस्त्रयोदशबन्धो देशविरतौ नवकबन्धश्च सर्वविरतौ, देशविरतेः सर्वविरतेश्चोत्कर्षतोऽपि देशोनपूर्वकोटिरेवकाल इति। जघन्यतस्त्वनयोः स्थितिरान्तर्मौहूर्त्तिकी। शेषेषु तु पञ्चादिषूत्कर्षतोऽन्तर्मुहूर्त्तप्रमाणा स्थितिः, जघन्यतस्तु समयमात्रा। तद्भावना चैवं—उपशमश्रेण्यां पञ्चविधबन्धमारभ्य द्वितीयसमये कश्चित् कालं कृत्वा देवलोकं याति, तत्र च गतः सन्नविरतो भवति, अविरतत्वे च सप्तदशबन्ध इत्येकसमयता। एवं चतुर्विधादिष्वपि भावनीयं। तदेवमुक्तानि मोहनीयस्य बन्धस्थानानि।

अथोदयस्थानान्युच्यन्ते—नव मोहनीयस्योदयस्थानानि, तद्यथा—एकं द्वे चत्वारि पञ्च षट् सप्ताष्टौ नव दश च। तत्र चतुर्णां संज्वलनानामेकतमस्योदये एककमुदयस्थानं, तदेव त्रयाणामन्यतमवेदप्रक्षेपे द्विकं, तत्रापि हास्यरतिरूपयुगलप्रक्षेपे चतुष्कं, तत्रैव भयप्रक्षेपे पञ्चकं, ततो जुगुप्साप्रक्षेपात् षट्कं। तत्रैव चतुर्णां प्रत्याख्यानावरणानामन्यतमोदयप्रक्षेपे सप्तकं,

तत्रैवाप्रत्याख्यानानां चतुर्णामन्यतमप्रक्षेपेऽष्टकं, तत्रैव चतुर्णामनन्तानुबन्धिनामन्यतमप्रक्षेपे नवकं, तत्रैव मिथ्यात्वप्रक्षेपे दशकमिति । तत्र द्विकादयो दशान्ता उदयाः प्रत्येकं क्रोधे माने मायायां लोभे च प्राप्यन्त इति चतुर्विधा भवन्ति । ते च चतुर्विधाः सन्तः प्रत्येकमेकैकस्मिन् वेदे प्राप्यन्त इति वेदत्रयवशाद्द्वादशधा भवन्ति । द्वादशधा च सन्तो द्विकोदयरहिताः, शेषा उदयाः प्रत्येकमेकैकस्मिन् युगले प्राप्यन्त इति युगलसंचारणया द्विगुणा भवन्ति, ततो द्विकोदये द्वादशैव भङ्गाः । शेषेषु तूदयेषु प्रत्येकं चतुर्विंशतिः, सा चैकैकस्मिन् गुणस्थानेऽनेकधा प्राप्यते, तथाहि—अनन्तानुबन्धिनां वेदकसम्यक्त्वस्य भयजुगुप्सयोश्च कादाचित्क उदयो भवति, यतः सम्यक्त्वप्रभावेणोद्वलितानामनन्तानुबन्धिनां भूयोऽपि मिथ्यात्वप्रतिपत्तौ तन्महिम्नोपचितानामावलिकामात्रमुदयो न भवति, शेषकालं तु भवति । अविरतसम्यग्दृष्ट्यादीनामप्यौपशमिकसम्यक्त्ववतां क्षायिकसम्यक्त्ववतां वा वेदकसम्यक्त्वस्योदयो न भवति, शेषाणां तु भवति । भयजुगुप्सयोस्त्वध्रुवोदयत्वादेव मिथ्यादृष्ट्यादिष्वपूर्वकरणान्तेषु कदाचिदुदयो भवति कदाचिन्नेत्येकैकस्मिन् गुणस्थाने उदयास्तद्भाविनश्चतुर्विंशतयश्च बहुधा भवन्ति । तत्र मिथ्यादृष्टौ सप्ताष्टौ नव दश चेति चत्वार उदया भवन्ति । तत्र मिथ्यात्वमनन्तानुबन्धिवर्जा अन्यतमे त्रयः क्रोधादिकाः त्रयाणां वेदानामन्यतमो वेदो द्वयोर्युगलयोरन्यतरद्युगलमित्येतासां सप्तानां नियमादुदयो भवति । अत्र द्वाभ्यां युगलाभ्यां त्रिभिर्वेदैश्चतुर्भिश्च क्रोधादिभिः परस्परं ताडने भङ्गाश्चतुर्विंशतिः । तस्मिन्नेव सप्तके भये वा जुगुप्सायां वाऽनन्तानुबन्धिनि वा प्रक्षिप्तेऽष्टानामुदयः, अत्र भयादौ प्रत्येकमेकैका चतुर्विंशतिः प्राप्यत इति तिस्रश्चतुर्विंशतयः । ननु सप्तोदयेऽष्टोदये वा क्वचिन्मिथ्यादृष्टिरनन्तानुबन्ध्युदयरहितः कथं प्राप्यत इति चेदुच्यते-यः

कश्चित्सम्यग्दृष्टिः सन्ननन्तानुबन्धिविसंयोजनयैव विश्रान्तो मिथ्यात्वादिक्षयाय नोद्युक्तवान् तस्य कालान्तरे मिथ्यात्वं गतस्य तत्प्रत्ययतो ऽयोऽप्यनन्तानुबन्धिनां बन्धे प्रवर्त्तमाने बन्धावलिका यावन्नातिक्रामति तावदुदयो न ऽवति,बन्धावलिकायां त्वतिक्रान्तायां ऽवेदपि । अथ कथं बन्धावलिकातिक्रमेऽप्युदयः संऽवी ? जघन्यतोऽप्यनन्तानुबन्धिनामबाधाकालस्यान्तर्मुहूर्त्तमानत्वात् , नैष दोषः, यतो बन्धसमयादारभ्य तेषां सत्ता ऽवति सत्तायां च सत्यां बन्धकालं यावत् पतद्ग्रहता, पतद्ग्रहतायां च सत्यां शेषसजातीयप्रकृतिदलिकसङ्क्रान्तिः, सङ्क्रान्तं च पतद्ग्रहप्रकृतिरूपतया परिणमते । ततः सङ्क्रमावलिकायामतीतायामुदयो ऽवतीति बन्धावलिकायामतीतायां तदभिधानमविरुद्धं । तथा तस्मिन्नेव सप्तके ऽयजुगुप्सयोरथवा ऽयानन्तानुबन्धिनोर्यदा जुगुप्सानन्तानुबन्धिनोः प्रक्षिप्तयोर्नवानामुदयः । तत्राप्येकैकस्मिन् विकल्पे ऽङ्गानां चतुर्विंशतिः प्राप्यत इति तिस्रश्चतुर्विंशतयः । तथा तस्मिन्नेव सप्तके ऽयजुगुप्सानन्तानुबन्धिषु युगपत्प्रक्षिप्तेषु दशानामुदयः । अत्रैकैव ऽङ्गानां चतुर्विंशतिः । सर्वसङ्ख्यया मिथ्यादृष्टावष्टौ चतुर्विंशतयः । सासादने मिश्रे च सप्ताष्टनवलक्षणास्त्रय उदयाः, तत्रानन्तानुबन्ध्यादीनामन्यतमे चत्वारः क्रोधादिकास्त्रयाणां वेदानामन्यतमो वेदो द्वयोर्युगलयोरन्यतरद्युगलमित्येतासां सप्तानां प्रकृतीनामुदयः सासादने ध्रुवः । अत्र प्रागुक्तरीत्या ऽङ्गानामेका चतुर्विंशतिः । तथा तस्मिन्नेव सप्तके ऽये वा जुगुप्सायां वा क्षिप्तायामष्टानामुदयः, अत्र द्वे चतुर्विंशती ऽङ्गानां । ऽयजुगुप्सयोर्युगपत्क्षिप्तयोर्नवानामुदयः, अत्रैका ऽङ्गानां चतुर्विंशतिः । सर्वसङ्ख्यया सासादने चतस्रश्चतुर्विंशतयः । तथा सम्यङ्मिथ्यादृष्टावनन्तानुबन्धिवर्जास्त्रयोऽन्यतमे क्रोधादयः त्रयाणां वेदानामन्यतमो वेदो द्वयोर्युगलयोरन्यतरद्युगलं सम्यग्मिथ्यात्वं चेति सप्तानां

प्रकृतीनामुदयो ध्रुवः । अत्र प्रागुक्तरीत्या जुगुप्सानामेका चतुर्विंशतिः । अस्मिन्नेव सप्तके भये जुगुप्सायां वा हिष्टायामष्टानामुदयः, अत्र द्वे चतुर्विंशती । भयजुगुप्सयोर्युगपद्धिष्टयोर्नवानामुदयः, अत्रैका चतुर्विंशतिः । सर्वसङ्क्षया सम्यग्मिथ्यादृष्टौ चतस्रश्चतुर्विंशतयः । अविरतसम्यग्दृष्टौ षट् सप्ताष्टौ नव चेति चत्वार उदयाः । तत्रौपशमिकसम्यग्दृष्टे क्षायिकसम्यग्दृष्टेर्वा, अस्यानन्तानुबन्धिवर्जास्रयोऽन्यतमे क्रोधादिका अन्यतमो वेदोऽन्यतरच्च युगलमिति षण्णामुदयो ध्रुवः, अत्रापि प्राग्वज्जुगुप्सानामेका चतुर्विंशतिः । अस्मिन्नेव षट्के भये जुगुप्सायां वा वेदकसम्यक्त्वे वा हिष्टे सप्तानामुदयः, अत्र भयादिषु प्रत्येकमेकैकचतुर्विंशतिप्राप्तेस्तिस्रश्चतुर्विंशतयः । तस्मिन्नेव षट्के भयजुगुप्सयोर्वा भयवेदकयोर्वा जुगुप्सावेदकयोर्वा हिष्टयोरष्टानामुदयः, अत्रापि तिस्रश्चतुर्विंशतयः । युगपत्त्रयप्रक्षेपे नवानामुदयः, अत्रैका चतुर्विंशतिः । सर्वसङ्क्षयाऽविरतसम्यग्दृष्टावष्टौ । देशविरते पञ्च षट् सप्ताष्टौ चेति चत्वार उदयाः । तत्रौपशमिकसम्यग्दृष्टेःक्षायिकसम्यग्दृष्टेर्वा देशविरतस्य तृतीयचतुर्थकषायाणामन्यतमौ द्वौ क्रोधादिकावन्यतमो वेदोऽन्यतरद्युगलं चेति पञ्चानामुदयो ध्रुवः, अत्रैका चतुर्विंशतिः । भयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिन् प्रक्षिप्ते षण्णामुदयः, अत्र तिस्रश्चतुर्विंशतयः । अन्यतरद्वयप्रक्षेपे सप्तानामुदयः, अत्रापि तिस्रश्चतुर्विंशतयः । युगपत्त्रयप्रक्षेपेऽष्टानामुदयः, अत्रैका चतुर्विंशतिः । सर्वसङ्क्षया देशविरतेऽष्टौ । प्रमत्तसंयते चतस्रः पञ्च षट् सप्त चेति चत्वार उदयाः । तत्र संज्वलनानामन्यतम एकः क्रोधादिरन्यतमो वेदोऽन्यतरच्च युगलमित्येतासां चतसृणामुदयः प्रमत्तसंयते ध्रुवः, अत्रैका चतुर्विंशतिः । ततो भयजुगुप्सावेदकसम्यक्त्वानामन्यतरैकप्रक्षेपे पञ्चानामुदयः, तत्र तिस्रश्चतुर्विंशतयः, अन्यतरद्वयप्रक्षेपे षण्णामुदयः, तत्रापि तिस्रश्चतुर्विंशतयः, युगपत्त्रय-

प्रक्षेपे सप्तानामुदयः, तत्रैका चतुर्विंशतिः । सर्वसङ्ख्यया प्रमत्तेऽष्टौ । एवमेवाप्रमत्तेऽपि चतुर्षूदयेष्वष्टौ भावनीयाः । अपूर्वकरणे चतस्रः पञ्च षट् चेति त्रय उदयाः । तत्र चतस्रः प्राग्वत्, अत्रैका चतुर्विंशतिः । अस्मिन्नेव चतुष्के भये वा जुगुप्सायां वा हिक्षायां पञ्चानामुदयः, अत्र द्वे चतुर्विंशती । भयजुगुप्सयोस्तु युगपत् हिक्षयोः षण्णामुदयः, अत्रैका चतुर्विंशतिः । सर्वसङ्ख्ययाऽपूर्वकरणे चतस्रश्चतुर्विंशतयः । इहाप्रमत्तापूर्वकरणयोरुदयाः प्रमत्तोदयापेक्षया गुणस्थानभेदमात्रेणैव भिन्ना न परमार्थत इति प्रमत्तोदयग्रहणेनैव ते गृहीता द्रष्टव्याः । अत एवाग्रे तयोश्चतुर्विंशतयः पृथग् न गणयिष्यन्ते । अथ दशोदयादिषु यावत्यश्चतुर्विंशतयो भवन्ति तावत्यो निर्दिश्यन्ते—तत्र दशकोदये एका चतुर्विंशतिर्मिथ्यादृष्टौ । नवोदये षट्, तत्र तिस्रो मिथ्यादृष्टौ, सासादने मिश्रेऽविरते चैकैका । अष्टोदये एकादश, तथाहि—तिस्रो मिथ्यादृष्टौ, द्वे सासादने, द्वे मिश्रे, तिस्रोऽविरतसम्यग्दृष्टौ, देशविरते चैका । सप्तोदये दश, तद्यथा—मिथ्यादृष्टिसासादनमिश्रप्रमत्तसंयतेष्वेकैका, अविरतसम्यग्दृष्टौ देशविरते च तिस्रस्तिस्रः । षडुदये सप्त, तथाहि—अविरतसम्यग्दृष्टावेका, देशविरते तिस्रः, प्रमत्ते च तिस्र इति । पञ्चकोदये चतस्रः, तत्र देशविरतस्यैका, प्रमत्तस्य च तिस्रः । चतुष्कोदये एका, सा च प्रमत्तस्येति । सर्वसङ्ख्यया चत्वारिंशच्चतुर्विंशतयः, ताश्च चतुर्विंशत्या गुण्यन्ते, जातानि नव शतानि षष्ट्यधिकानि । तथा पञ्चादिषु बन्धस्थानेषु क्रमेण द्वादश चत्वारः त्रयो द्वावेकश्चेत्युदयविकल्पा भवन्ति । तथाहि—पञ्चविधबन्धकाले द्वयोः प्रकृत्योरुदयः, चतुर्णां संज्वलनानामन्यतमस्यैकस्य क्रोधादेस्त्रयाणां वेदानामन्यतमस्य वेदस्य चेति, अत्र त्रिभिश्चतुर्णां गुणने द्वादश भङ्गाः । चतुर्विधबन्धे त्वेकोदयः, यतः पुरुषवेदबन्धव्यवच्छेदे चतुर्विधबन्धो भवति,

पुरुषवेदस्य च बन्धोदयौ युगपद्व्यवच्छिद्येते इति, स चैककोदयश्चतुर्णां संज्वलनानामन्यतमस्य, अत्र च चत्वारो भङ्गाः, यतः कोऽपि संज्वलनक्रोधेनोदयप्राप्तेन श्रेणिं प्रतिपद्यते, कोऽपि संज्वलनमानेन, कोऽपि संज्वलनमायया, कोऽपि संज्वलनलोभेनेति चत्वारो भङ्गाः। संज्वलनक्रोधबन्धव्यवच्छेदे त्रिविधो बन्धः, तत्राप्येकविध उदयः, स च संज्वलनक्रोधवर्जानां त्रयाणामन्यतमस्यात्र त्रयो भङ्गाः। संज्वलनमानबन्धव्यवच्छेदे द्विविधो बन्धः, अत्राप्येकविध उदयः, स च संज्वलनमायालोभयोरन्यतरस्य द्रष्टव्यः, अत्र द्वौ भङ्गौ। संज्वलनमायाबन्धव्यवच्छेदे एकविधो बन्धः, तत्राप्युदय एकविधः, स च संज्वलनलोभोदयरूपोऽवगन्तव्यः, अत्रैक एव भङ्गः। इह यद्यपि पञ्चादिषु बन्धस्थानेषु संज्वलनानामुदयमधिकृत्य न विशेषस्तथापि बन्धस्थानापेक्षया भेदोऽस्तीति पृथग् भङ्गा गण्यन्ते। प्रमत्ताप्रमत्तापूर्वकरणानां तु बन्धस्थानापेक्षयाऽपि न भेदः, सर्वेषामपि नवबन्धकत्वात्, तत एतेषां भङ्गाः पार्थक्येन न गणिताः। तथाऽबन्धकेऽपि सूक्ष्मसम्पराये एकोदयः। सर्वसङ्ख्ययाऽमी उदयविकल्पास्त्रयोविंशतिः, एते प्रागुक्तेषूदयविकल्पेषु क्षिप्ता नव शतानि त्र्यशीत्यधिकानि भवन्ति। इह केचिदाचार्याश्चतुर्विधबन्धकस्याप्याद्यविभागे वेदोदयमिच्छन्ति, ततश्च तन्मतेन चतुर्विधबन्धकेऽपि द्विकोदयभङ्गा द्वादश भवन्ति, ते च बन्धकभेदेन भिन्ना इति पृथग्गण्यन्ते, तत्प्रक्षेपादुदयविकल्पानां नव शतानि पञ्चनवत्यधिकानि भवन्ति। यदि तु बन्धकभेदेन भङ्गानां भेदो न विवक्ष्यते, तदा पञ्चविधबन्धे चतुर्विधबन्धे च ये द्विकोदयभङ्गास्ते एकरूपा एवेति द्वादशैव। ये चैककोदयभङ्गास्ते चत्वार एवेति षोडशैव, एतेषां प्रागुक्तोदयभङ्गराशौ षष्ट्यधिकनवशतप्रमाणे प्रक्षेपे षट्सप्तत्यधिकानि नवशतान्युदयविकल्पानां भवन्ति। अथ मोहनीयोदया एते गुणस्थानेषुचिन्त्यन्ते—तत्र मिथ्या-

दृष्ट्यविरतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रमत्तानामष्टावष्टौ चतुर्विंशतयो भवन्ति, सासादनमिश्रापूर्वकरणेषु चतस्रश्चतस्रः, भाविताचरा एता इति न भूयो भाव्यन्ते, सर्वसङ्ख्ययाऽमूर्द्विपञ्चाशत्, तस्याश्चतुर्विंशत्या गुणने जातानि द्वादश शतान्यष्टचत्वारिंशदधिकानि । अन्ये चानिवृत्तिबादरसम्पराये पञ्चविधबन्धादौ षोडश सूक्ष्मसम्पराये चैक इति सप्तदश भङ्गा अधिकाः क्षिप्यन्ते । ततः सर्वेष्वपि गुणस्थानेषु सर्वसङ्ख्यया मोहनीयस्योदयाः पञ्चषष्ट्यधिकानि द्वादश शतानि । एत एव च भङ्गा उदीरणायामपि द्रष्टव्याः, उदयोदीरणयोः सहभावित्वात् । यद्यपि वेदत्रयसंज्वलनानां पर्यन्तावलिकायामुदीरणा न भवति, किं तु केवल एवोदयः, तथापि शेषकालमुदीरणा लभ्यत इति भङ्गसङ्ख्या न व्याहन्यते । एते चैकादयो दशान्ता उदयास्तदन्तर्गता भङ्गाश्च जघन्यत एकसामयिका उत्कर्षत आन्तर्मौहूर्त्तिकाः । तथाहि—चतुरुदयादिषु दशोदयपर्यन्तेष्ववश्यमन्यतमो वेदोऽन्यतरच्च युगलं विद्यते, वेदयुगलयोश्च मध्येऽवश्यमन्यतरन्मुहूर्त्तादारतः परावर्त्तते । तदुक्तं पञ्चसङ्ग्रहमूलटीकायां—"युगलेन वेदेन वाऽवश्यं मुहूर्त्तादारतः परावर्त्तितव्यमिति" । तत एते उत्कर्षत आन्तर्मौहूर्त्तिकाः, द्विकोदयैककोदयानां चान्तर्मौहूर्त्तिकत्वं सुप्रसिद्धमेव । एकसामयिकता त्वेवं—यदा विवक्षिते उदये भङ्गे वा समयमेकं वर्त्तित्वा गुणस्थानान्तरे गच्छति तदाऽवश्यं बन्धस्थानभेदाद्गुणस्थानभेदात्स्वरूपतो वा भिन्नमुदयान्तरं भङ्गान्तरं वा यातीति सर्वेऽप्युदया भङ्गाश्च जघन्यत एकसामयिकाः ।

तदेवमुक्तानि मोहनीयस्योदयस्थानानि । अथ सत्तास्थानान्युच्यन्ते—मोहनीयस्य सत्तास्थानानि पञ्चदश, तद्यथा—अष्टाविंशतिः सप्तविंशतिः षड्विंशतिश्चतुर्विंशतित्रयोविंशतिर्द्वाविंशतिरेकविंशतित्रयोदश द्वादशैकादश पञ्च चतस्रस्तिस्रो

द्वे एका चेति । एतेषामेव सत्तास्थानानां गुणस्थानेषु व्यवच्छेदश्चिन्त्यते—अविरतादयोऽप्रमत्तान्ता अनन्तानुबन्धिमिथ्यात्वमिश्रसम्यक्त्वानां क्षपका भवन्ति ततस्तेषु सप्तकं कियत्कालं प्राप्यते, परतः सर्वथा न भवति । तथाऽनिवृत्तिबादरसम्परायः प्रथमं युगपन्मध्यमाष्टकषायान् विनाशयति, ततो नपुंसकवेदं, ततः स्त्रीवेदं, ततो हास्यादिषट्कं, ततः पुरुषवेदं, ततः क्रमेण त्रीन् क्रोधमानमायारूपान् संज्वलनान्, सूक्ष्मसम्परायस्तु किट्टीकृतं लोभं विनाशयति । अनेन व्यवच्छेदक्रमेण चतुर्विंशत्यादीनि द्वादश सत्तास्थानानि व्याख्यातानि भवन्ति । त्रीणि चैवं भाव्यानि—सर्वप्रकृतिसमुदायोऽष्टाविंशतिः, ततः सम्यक्त्वे उद्वलिते सप्तविंशतिः, ततः सम्यङ्मिथ्यात्वे उद्वलिते षड्विंशतिः, अनादिमिथ्यादृष्टेर्वा षड्विंशतिरिति । अथ गुणस्थानेषु सत्तास्थानानि चिन्त्यन्ते—मिथ्यादृष्टिगुणस्थाने त्रीणि सत्तास्थानानि—अष्टाविंशतिः सप्तविंशतिः षड्विंशतिश्च, यतो मिथ्यादृष्टिः सम्यक्त्वमिश्रयोरुद्वलको भवति । सासादने एकं सत्तास्थानमष्टाविंशतिः । मिश्रे त्रीणि सत्तास्थानानि—अष्टाविंशतिश्चतुर्विंशतिः सप्तविंशतिश्च, तत्र चतुर्विंशतिर्विसंयोजितानन्तानुबन्धिनि सम्यग्दृष्टौ मिश्रत्वं प्रपन्ने, सप्तविंशतिश्चोद्वलितसम्यक्त्वपुञ्जे मिथ्यादृष्टौ तद्भावं प्रपन्ने द्रष्टव्या । तथाऽविरतदेशविरतप्रमत्ताप्रमत्तेषु प्रत्येकं पञ्च सत्तास्थानानि—अष्टाविंशतिश्चतुर्विंशतिस्त्रयोविंशतिर्द्वाविंशतिरेकविंशतिश्च । अपूर्वकरणे त्रीणि, तद्यथा—अष्टाविंशतिश्चतुर्विंशतिरेकविंशतिश्च । अनिवृत्तिबादरसम्पराये एकादश सत्तास्थानानि, तद्यथा—अष्टाविंशतिश्चतुर्विंशतिरेकविंशतिस्त्रयोदश द्वादशैकादश पञ्च चतस्रस्तिस्रो द्वे एका च । सूक्ष्मसम्पराये चत्वारि सत्ता-

स्थानानि, तद्यथा—अष्टाविंशतिश्चतुर्विंशतिरेकविंशतिरेका च । उपशांतमोहगुणस्थानके त्रीणि सत्तास्थानानि तद्यथा—अष्टाविंशतिः चतुर्विंशतिरेकविंशतिश्च । तदेवमुक्तानि सप्रपञ्चं मोहनीयस्य सत्तास्थानानि ।

अथ बन्धोदयसत्तास्थानानां संवेधश्चिन्त्यते—तत्र द्वाविंशतिबन्धे मिथ्यादृष्टेः सप्तोदयेऽष्टाविंशतिलक्षणमेकमेव सत्तास्थानं भवति । कथमिदं प्रत्येयमिति चेदुच्यते—सप्तोदयोऽनन्तानुबन्धिराहित्ये संभवति, तद्रहितश्च मिथ्यादृष्टिरवश्यमष्टाविंशतिसत्कर्मा, येन हि पूर्वं सम्यग्दृष्टिना सताऽनन्तानुबन्धिन उद्वलिताः ततश्च स कालान्तरे परिणामवशान्मिथ्यात्वं गतः तत्प्रत्ययेन चानन्तानुबन्धिनो बध्नाति तदाऽसौ मिथ्यादृष्टिर्बन्धावलिकामात्रं कालं यावदनन्तानुबन्ध्युदयरहितः प्राप्यते, नान्यः, स चाष्टाविंशतिसत्कर्मेति तस्य सत्तास्थानमष्टाविंशतिरेव । अष्टनवदशकोदये चाष्टाविंशतिसप्तविंशतिषड्विंशतिलक्षणानि त्रीणि सत्तास्थानानि तथाहि—अष्टोदयो द्विधाऽनन्तानुबन्ध्युदयरहितस्तत्सहितश्च, तत्रानन्तानुबन्ध्युदयरहिते प्रागुक्तयुक्तेरष्टाविंशतिरेव सत्तास्थानं, तत्सहिते तु त्रीण्यपि सत्तास्थानानि । तत्र मिथ्यादृष्टिसम्यक्त्वसम्यङ्मिथ्यात्वयोरुद्वलको भवति, स च यावन्नाद्यापि सम्यक्त्वमुद्वलयति तावदष्टाविंशतिः, तस्मिन्नुद्वलिते सप्तविंशतिः, सम्यग्मिथ्यात्वेऽप्युद्वलिते षड्विंशतिरनादिमिथ्यादृष्टेर्वा । एवं नवोदयेऽपि द्रष्टव्यं । दशोदयस्त्वनन्तानुबन्धिसहित एव भवतीति तत्रापि त्रीणि सत्तास्थानानि भावनीयानि । सासादने त्वेकविंशतिबन्धे त्रिष्वपि सप्ताष्टनवकरूपेषूदयेष्वष्टाविंशतिरेवैकं सत्तास्थानं । तथाहि—सासादनत्वमौपशमिकसम्यक्त्वात्प्रच्यवमानस्योपजायते, सम्यक्त्वगुणेन च तेन मिथ्यात्वं त्रिधा कृतं—सम्यक्त्वं सम्यग्मिथ्यात्वं मिथ्यात्वं चेति । ततो दर्शनत्रिकस्यापि सत्कर्मतया

प्राप्तेः सासादने त्रिष्वप्युदयस्थानेष्वष्टाविंशतिरेवैकं सत्तास्थानं । सप्तदशबन्धो द्वयानां सम्यग्मिथ्यादृष्टीनामविरतसम्यग्दृष्टीनां च । तत्र सम्यग्मिथ्यादृष्टीनां त्रीण्युदयस्थानानि—सप्ताष्टौ नव चेति । अविरतसम्यग्दृष्टीनां चत्वारि, तद्यथा—षट् सप्ताष्टौ नव (च) । तत्र षण्णामुदयोऽविरतानामौपशमिकसम्यग्दृष्टीनां क्षायिकसम्यग्दृष्टीनां वा प्राप्यते । तत्रौपशमिकसम्यग्दृष्टीनां द्वे सत्तास्थाने अष्टाविंशतिश्चतुर्विंशतिश्च । तत्राष्टाविंशतिः प्रथमसम्यक्त्वोत्पादकाले, उपशमश्रेणिप्रतिपाते तूपशान्तानन्तानुबन्धिनामष्टाविंशतिः, उद्वलितानन्तानुबन्धिनां चतुर्विंशतिः, क्षायिकसम्यग्दृष्टीनां तु सप्तकक्षयादेकविंशतिरेव सप्तोदये मिश्रदृष्टीनां त्रीणि सत्तास्थानानि—अष्टाविंशतिः सप्तविंशतिश्चतुर्विंशतिश्च । तत्राष्टाविंशतिसत्कर्मणः सतो मिश्रभावं प्रपन्नस्याष्टाविंशतिः, यस्तु मिथ्यादृष्टिः सम्यक्त्वोद्वलनं कृत्वा मिश्रं नाद्याप्युद्वलयितुं लग्नोऽन्तरान्तरे च परिणाममहिम्ना मिथ्यात्वान्निवृत्त्य मिश्रभावं प्रपन्नः, तस्य सप्तविंशतिः । यश्च विसंयोजितानन्तानुबन्धिचतुष्कः सम्यग्दृष्टिर्मिश्रभावं प्रपद्यते, तस्य चतुर्विंशतिः, सा च चतसृषु गतिषु प्राप्यते, चतुर्गतिकानामपि सम्यग्दृशामनन्तानुबन्धिविसंयोजकत्वात्तद्विसंयोजनानन्तरं च केषाञ्चित् परिणामवशेन मिश्रभावप्राप्तिसंभवात्, ततश्च चतसृष्वपि गतिषु मिश्रदृष्टीनां चतुर्विंशतिः संभवति । अविरतसम्यग्दृष्टीनां सप्तोदये पञ्च सत्तास्थानानि—अष्टाविंशतिश्चतुर्विंशतिस्त्रयोविंशतिर्द्वाविंशतिरेकविंशतिश्च । तत्राष्टाविंशतिरौपशमिकसम्यग्दृष्टीनां वेदकसम्यग्दृष्टीनां च । चतुर्विंशतिरप्युभयेषां, नवरं विसंयोजितानन्तानुबन्धिनां । त्रयोविंशतिर्वेदकसम्यग्दृष्टीनामेव क्षपणायोद्यतानामनन्तानुबन्धिषु मिथ्यात्वे च क्षपिते सति । द्वाविंशतिरपि तेषामेव सम्यग्मिथ्यात्वे क्षपिते, स च द्वाविंशतिसत्कर्मा सम्यक्त्वं क्षपयँस्तच्चरमग्रासे वर्त्तमानः

कश्चित्पूर्ववद्बायुष्कः कालमपि करोति, कालं च कृत्वा चतसृणां गतीनामन्यतमस्यां गतावुत्पद्यते । उक्तं च—"पढवगो उ मणुस्सो णिढवगा चउसु वि गईसु" । ततो द्वाविंशतिश्चतसृष्वपि गतिषु प्राप्यते । एकविंशतिः क्षायिकसम्यग्दृष्टीनां। एवमष्टोदयेऽपि मिश्रदृष्टीनामविरतसम्यग्दृष्टीनां चोक्तरूपाण्यन्यूनानतिरिक्तानि सत्तास्थानानि भावनीयानि । एवं नवोदयेऽपि, नवरं नवोदयोऽविरतानां वेदकसम्यग्दृष्टीनामेवेति । तत्राष्टाविंशतिचतुर्विंशतित्रयोविंशतिद्वाविंशतिलक्षणानि चत्वारि सत्तास्थानानि वाच्यानि । त्रयोदशबन्धकानां देशविरतानां चत्वार्युदयस्थानानि, तद्यथा—पञ्च षट् सप्ताष्ट । तत्र देशविरता द्विधा तिर्यञ्चो मनुष्याश्च । तत्र तिरश्चां चतुर्ष्वप्युदयेषु द्वे द्वे सत्तास्थाने अष्टाविंशतिश्चतुर्विंशतिश्च । तत्राष्टाविंशतिरौपशमिकसम्यग्दृष्टीनां वेदकसम्यग्दृष्टीनां वा । तत्रौपशमिकसम्यग्दृष्टीनां प्रथमसम्यक्त्वेन सह देशविरतिप्रतिपत्तिकाले, वेदकसम्यग्दृष्टीनां त्वष्टाविंशतिः सुप्रतीता । चतुर्विंशतिरनन्तानुबन्धिषु विसंयोजितेषु वेदकसम्यग्दृष्टीनामवगन्तव्या । शेषाणि तु त्रयोविंशत्यादीनि सत्तास्थानानि तिरश्चां न संभवन्ति, तानि हि क्षायिकसम्यक्त्वमुत्पादयतः प्राप्यन्ते । न च तिर्यञ्चः क्षायिकसम्यक्त्वमुत्पादयन्ति, किं तु मनुष्या एव । अथ मनुष्यः क्षायिकसम्यक्त्वमुत्पाद्य यदा तिर्यक्षूत्पद्यते तदा तिरश्चोऽप्येकविंशतिः कथं न प्राप्यते ? मैवं, क्षायिकसम्यग्दृष्टेस्तिर्यक्षूत्पित्सोरसङ्ख्येयवर्षायुष्केष्वेव समुत्पादात्, तत्र च देशविरत्यभावादेशविरतेषु तिर्यक्षु त्रयोविंशत्यादिप्रतिषेधस्य युक्तत्वात् । उक्तं च सप्ततिकाचूर्णौ—"एगवीसा तिरिक्खेसु संजयासंजएसु न लब्भइ, कहं ? जम्हा—संखेज्जवासाउएसु खाइगसम्मदिट्ठी न उववज्जइ, असंखेज्जवासाउएसु उववज्जेज्जा, तस्स देसविरई णत्थि त्ति" । ये तु मनुष्या देशविरतास्तेषां पञ्च-

कोदये त्रीणि सत्तास्थानानि एकविंशतिचतुर्विंशत्यष्टाविंशतिरूपाणि । षड्कोदये सप्तोदये च प्रत्येकं पञ्चापि सत्तास्थानानि । अष्टकोदये चैकविंशतिवर्जानि शेषाणि चत्वारि सत्तास्थानानि भवन्ति, तानि चाविरतसम्यग्दृष्ट्युक्तया दिशा भावनीयानि । एवं नवकबन्धे प्रमत्तेऽप्रमत्ते च प्रत्येकं चतुष्कोदये त्रीणि त्रीणि सत्तास्थानान्यष्टाविंशतिचतुर्विंशत्येकविंशतिलक्षणानि । पञ्चकोदये षड्कोदये च पञ्च पञ्च सत्तास्थानान्यष्टाविंशतिचतुर्विंशतित्रयोविंशतिद्वाविंशत्येकविंशतिलक्षणानि । एतान्येवैकविंशतिवर्जानि शेषाणि चत्वारि सप्तकोदये प्रागुक्तदिशा भावनीयानि । अपूर्वकरणस्य तु नवबन्धकस्य त्रीण्युदयस्थानानि चत्वारि पञ्च षट् चेति । एतेषु च त्रिष्वपि प्रत्येकं त्रीणि त्रीणि सत्तास्थानान्यष्टाविंशतिचतुर्विंशत्येकविंशतिलक्षणानि द्रष्टव्यानि । अपूर्वकरणो हि वेदकसम्यग्दृष्टिर्न भवति, किं त्वौपशमिकसम्यग्दृष्टिः क्षायिकसम्यग्दृष्टिर्वा । तत्रौपशमिकसम्यग्दृष्टेरष्टाविंशतिचतुर्विंशती एव प्राग्वद्भावनीये, क्षायिकसम्यग्दृष्टेस्त्वेकविंशतिः । पञ्चचतुस्त्रिद्व्येकबन्धकेष्वबन्धके च सूक्ष्मसम्पराये उपशान्तमोहे च प्रत्येकं त्रीणि त्रीणि सत्तास्थानान्यष्टाविंशतिचतुर्विंशत्येकविंशतिलक्षणान्युपशान्तसप्तकमुद्वलितानन्तानुबन्धिनं क्षीणसप्तकं चाधिकृत्य यथायोगं द्व्येकोदये एकोदयेऽनुदये चोपशमश्रेण्यां भवन्ति । तथा पञ्चविधबन्धकस्यानिवृत्तिबादरक्षपकस्य प्रागुक्ताया एकविंशतेरष्टसु कषायेषु क्षीणेषु त्रयोदशकं सत्तास्थानं, ततो नपुंसकवेदे क्षपिते द्वादशकं, ततः स्त्रीवेदे क्षपिते एकादशकमिति, एतान्यन्यान्यपि त्रीणि सत्तास्थानानि त्रीणि च प्रागुक्तानीति सर्वसङ्ख्यया पञ्चबन्धकस्य षट् सत्तास्थानानि । तत्रेह यः कश्चिन्नपुंसकवेदेन क्षपकश्रेणिं प्रतिपन्नः, स स्त्रीवेदनपुंसकवेदौ युगपत् क्षपयति, तयोर्युगपत्क्षयसमकालमेव च पुरुषवेदस्य बन्धो व्यवच्छिद्यते,

तदनन्तरं पुरुषवेदहास्यादिषट्कं युगपत् क्षपयति । यदि तु स्त्रीवेदेन क्षपकश्रेणिं प्रतिपन्नस्तदादौ नपुंसकवेदं क्षपयति, ततोऽन्तर्मुहूर्त्तेन स्त्रीवेदं, स्त्रीवेदक्षयसमकालमेव च पुरुषवेदस्य बन्धव्यवच्छेदः, तदनन्तरं पुरुषवेदहास्यादिषट्कं युगपत्क्षपयति, यावच्चोन्नयत्रापि पुरुषवेदहास्यादिषट्कं न क्षीयेते तावच्चतुर्विंधबन्धकस्य वेदोदयरहितस्यैकोदये वर्त्तमानस्यैकादशकं सत्तास्थानं लभ्यते, तयोस्तु क्षीणयोश्चतुःप्रकृत्यात्मकं । इदं च स्त्रीवेदेन नपुंसकवेदेन वा क्षपकश्रेणिं प्रतिपन्नस्य पञ्चप्रकृत्यात्मकं सत्तास्थानं न प्राप्यते । यस्तु पुरुषवेदेन क्षपकश्रेणिं प्रतिपन्नस्तस्य नोकषायषट्कक्षयसमकालं पुरुषवेदस्य बन्धव्यवच्छेद इति तस्य चतुर्विंधबन्धकाले एकादशप्रकृत्यात्मकं सत्तास्थानं न प्राप्यते, किं तु पञ्चप्रकृत्यात्मकं, द्वे च प्रागुक्ते, त्रीणि चोपशमश्रेण्याश्रितानीति सर्वसङ्ख्यया चतुर्विंधबन्धकस्य षट् सत्तास्थानानि । तथा संज्वलनक्रोधस्य प्रथमस्थितावावलिकाशेषायां बन्धोदयोदीरणा युगपद्व्यवच्छिद्यन्ते, तासु च व्यवच्छिन्नासु बन्धस्त्रिविधो भवति, तदानीं च संज्वलनक्रोधस्य प्रथमस्थितिगतमावलिकामात्रं समयद्वयोनावलिकाद्विकबद्धं च दलिकं मुक्त्वान्यत्सर्वं क्षीणं, तदपि च सत् समयद्वयोनावलिकाद्विकमात्रेण कालेन क्षयमुपयास्यति, यावच्च न याति तावच्चतस्रः प्रकृतयस्त्रिविधबन्धे सत्यः, क्षीणे तु तस्मिंस्तिस्रः, तदेवं त्रिविधबन्धकस्यैते द्वे त्रीणि चोपशमश्रेण्याश्रितानीति सर्वसङ्ख्यया पञ्च सत्तास्थानानि । तथा संज्वलनमानस्य प्रथमस्थितावावलिकाशेषायां बन्धोदयोदीरणानां युगपद्व्यवच्छेदे द्विविधो बन्धो भवति, तदानीं च संज्वलनमानस्य प्रथमस्थितिगतमावलिकामात्रं समयद्वयोनावलिकाद्विकबद्धं च दलिकं मुक्त्वाऽन्यत् सर्वं क्षीणं, तदपि सत् समयद्वयोनावलिकाद्विकमात्रेण कालेन क्षयं यास्यति, यावच्च न याति तावत्तिस्रः सत्यः, क्षीणे तु तस्मिन्

द्वे, तदेवं द्विविधबन्धकस्यैते द्वे त्रीणि चोपशमश्रेण्याश्रितानीति सर्वसङ्ख्यया पञ्च सत्तास्थानानि । तथा संज्वलनमायायाः प्रथमस्थितावावलिकाशेषायां बन्धोदयोदीरणानां युगपद्व्यवच्छेदे एकविधबन्धो भवति, तदानीं च संज्वलनमायायाः प्रथमस्थितिगतमावलिकामात्रं समयद्वयोनावलिकाद्विकबद्धं च सदस्ति, अन्यत्समस्तं क्षीणं, तदपि च सत् समयद्वयोनावलिकाद्विकेन कालेन क्षयं यास्यति, यावच्च न याति तावद्वे सती, क्षीणे तु तस्मिन्नेका, तदेवमेकविधबन्धकस्येमे द्वे त्रीणि चोपशमश्रेण्याश्रितानीति सर्वसङ्ख्यया पञ्च । अबन्धके च सूक्ष्मसम्पराये क्षपके एकं सत्तास्थानमेकप्रकृत्यात्मकं, त्रीणि चोपशमश्रेण्याश्रितानीति चत्वारि ।

एतेषामेव सत्तास्थानानामवस्थानकालमानमुच्यते—सप्तविंशतिसत्तास्थानस्याजघन्योत्कर्षमवस्थानकालः पल्योपमासङ्ख्येयभागः । तथाहि—अष्टाविंशतिसत्कर्मणो मिथ्यादृष्टेः सम्यक्त्वे उद्वलिते सप्तविंशतिः सत्तास्थानमवाप्यते । तदनन्तरं यावन्नाद्यापि सम्यङ्मिथ्यात्वमुद्वलयितुमारभते तावत्सम्यग्मिथ्यात्वोदयमपि गच्छति । उक्तं च पञ्चसङ्ग्रहमूलटीकायां—"उद्वलनाया अप्रारम्भे तस्य सम्यग्मिथ्यात्वोदयो भवती"ति । ततः सम्यग्मिथ्यादृष्टेरप्यन्तर्मुहूर्त्तं यावत्सप्तविंशतिसत्तास्थानं प्राप्यते, अन्तर्मुहूर्त्तानन्तरं च सोऽप्यवश्यं मिथ्यात्वं गच्छति । मिथ्यात्वं गतश्च सन् सम्यङ्मिथ्यात्वमुद्वलयितुमारभते, पल्योपमासङ्ख्येयभागमात्रेण च कालेन तन्निशेषमुद्वलयति, यावच्च न निःशेषमुद्वलयति तावत्सदित्यजघन्योत्कर्षं सप्तविंशतिसत्तास्थानस्य पल्योपमासङ्ख्येयभागः कालः । सम्यग्मिथ्यात्वे चोद्वलिते षड्विंशतिः सत्तास्थानं, तस्य चावस्थानमुत्कर्षतो देशोनपुद्गलपरावर्त्तार्धकालं, ततः परमवश्यमौपशमिकं सम्यक्त्वं करणत्रयपूर्वमासादयति,

ततश्च भूयोऽप्यष्टाविंशतिसत्कर्मा भवति, जघन्यतस्तु षड्विंशतिसत्तास्थानमन्तर्मुहूर्त्तं । तथाऽष्टाविंशतिचतुर्विंशतिसत्तास्थानयोरवस्थानकालो द्वे षट्षष्टी सागरोपमाणां, तथाहि—वेदकसम्यक्त्वान्वितस्याष्टाविंशतिसत्कर्मण एकां षट्षष्टिं सागरोपमाणां संपूर्य ततोऽन्तर्मुहूर्त्तं सम्यग्मिथ्यात्वे स्थित्वा ततो भूयोऽपि सम्यक्त्वसहितामेकां षट्षष्टिं सागरोपमाणां संपूर्य स्थितस्य, ततः परमवश्यं क्षपकश्रेणेर्मिथ्यात्वस्य वा प्रतिपत्तिर्भवति । तत्र क्षपकश्रेणिप्रतिपत्तौ मिथ्यात्वादिक्षयादष्टाविंशतिसत्तास्थानमपैति, आन्तरालिकं मिश्रसत्कमन्तर्मुहूर्त्तं च स्तोकत्वान्न विवक्षितं, ततः क्षपकश्रेणिप्रतिपत्त्यपेक्षयाऽष्टाविंशतिसत्तास्थानस्यावस्थानकालो द्वे षट्षष्टी सागरोपमाणां, यस्तु मिथ्यात्वं प्रतिपद्यते स पल्योपमासङ्ख्येयभागमात्रेण कालेन सम्यक्त्वं निःशेषमुद्वलयति, तावच्च तत्सदिति तस्य पल्योपमासङ्ख्येयभागमात्राधिके द्वे षट्षष्टी सागरोपमाणामष्टाविंशतिसत्तास्थानस्यावस्थानकालः । एवं चतुर्विंशतिसत्तास्थानस्यापि भावनीयं । नवरं योऽपि सागरोपमषट्षष्टिद्वयानन्तरं मिथ्यात्वं प्रतिपद्यते तस्यापि प्रथमसमय एवानन्तानुबन्धिबन्धसंभवाच्चतुर्विंशतिसत्तास्थानमपयातीति परिपूर्णे द्वे षट्षष्टी सागरोपमाणां चतुर्विंशतिसत्तास्थानस्यावस्थानकालः । जघन्यतस्तु द्वे अप्यान्तर्मौहूर्त्तिके । तथाहि—अष्टाविंशतिसत्कर्मा वेदकसम्यक्त्वोपेतः सप्तकक्षपणमारभमाणो यावन्नानन्तानुबन्धिनः क्षपयति तावदष्टाविंशतिरेव सत्तास्थानं, अनन्तानुबन्धिषु क्षपितेषु तु चतुर्विंशतिः, साऽपि तावद्यावन्मिथ्यात्वं न क्षपयति, क्षपिते तु तस्मिंस्त्रयोविंशतिः । तदेवं चतुर्विंशत्यष्टाविंशती जघन्यत आन्तर्मौहूर्त्तिके । एकविंशतिसत्तास्थानमुत्कर्षतः साधिकत्रयस्त्रिंशत्सागरोपमस्थितिकं । तथाहि—इह मनुष्यभवे सप्तकक्षयं कृत्वा सर्वार्थसिद्धे महाविमाने देवो जातः, तत्र च

त्रयस्त्रिंशत्सागरोपमाण्यनुभूय पुनरपीह मनुष्यभवे समायातः, ततो यावन्नाद्यापि क्षपकश्रेणिमारभते तावत्तस्यैकविंशतिरेव सत्तास्थानं। जघन्यतस्त्वेतदप्यान्तर्मौहूर्त्तिकं, तच्च सप्तकक्षयानन्तरं क्षपकश्रेणिमारोहतो द्रष्टव्यं। शेषाणां सत्तास्थानानां जघन्यत उत्कर्षतश्चान्तर्मुहूर्त्तमेव सत्तास्थानं प्राप्यते, तच्च सुप्रतीतमेव। तथाऽनादिमिथ्यादृष्टीनां षड्विंशतिसत्तास्थानमभव्यापेक्षयाऽनाद्यपर्यवसानं, भव्यापेक्षयाऽनादिसपर्यवसानं च द्रष्टव्यं। तदेवं कृता सत्तास्थानानां कालप्ररूपणा, तत्करणाच्च समाप्तं मोहनीयं।

अथ नामकर्मणो बन्धादिस्थानानि वाच्यानि—तत्र यान्निः प्रकृतिभिः सहिता नामकर्मणो बह्व्यः प्रकृतयो बन्धमुदयं वा गच्छन्ति ता आदौ निर्दिश्यन्ते—अपर्याप्तकजातिपर्याप्तकगतिनामकर्मभिः प्रेरिता इव बह्व्यः शेषप्रकृतयो बन्धमुदयं वोपयान्ति। तथाहि—अपर्याप्तकनाम्नि बध्यमाने उदयप्राप्ते वा मनुष्यगतिप्रायोग्यास्तिर्यग्गतिप्रायोग्या वा बह्व्यो नाम्नः प्रकृतयो बन्धमुदयं वोपयान्ति। जातिनाम्नि चैकेन्द्रियादिजातिरूपे बादरसूक्ष्मादयः, पर्याप्तकनाम्नि च यशःकीर्त्त्यादयः, देवादिगतौ च वैक्रियद्विकादय इति। अत्रोदयस्थितेरियं वक्तव्यता—उदयसमयप्राप्तानामबाधाकालक्षयेणोदयो भवति, स च द्विधा प्रदेशतोऽनुभागतश्च। तत्रानुदयवतीनां प्रकृतीनां दलिकमबाधाकालक्षये प्रतिसमयमुदयवतीषु स्तिबुकसङ्क्रमेण सङ्क्रम्य यदनुभूयते स प्रदेशोदयः, स चानुपशान्तानामवसेयः, उपशान्तानां तु न भवति। अनुभागोदयश्च विपाकोदयः, स च नित्योदयानां सदा प्रवर्त्तते, शेषाणां तु भजनीयः। यस्तु प्रयोगोदय उदीरणापरनामा स विपाकोदये प्रवर्त्तमान एव प्रवर्त्तत इति न पृथग्विवक्ष्यते। अथ याः प्रकृतयो देवगत्या सह बन्धमुदयं वा

गच्छन्ति ता उच्यन्ते—अशुभास्थिरसमचतुरस्रपराघातोच्छ्वासत्रसदशकवर्णगन्धरसस्पर्शतैजसकार्मणागुरुलघुनिर्माणोपघा-
तायशःकीर्त्तिपञ्चेन्द्रियजातिवैक्रियद्विकाहारकद्विकशुभविहायोगतिदेवानुपूर्वीलक्षणा द्वात्रिंशत्प्रकृतयो देवगत्या सह बन्धः
मुदयं वा गच्छन्ति । यदा तु तीर्थकरनामापि बध्यते तदा तत्सहितास्त्रयस्त्रिंशत्प्रकृतयो वेदितव्याः । तथा यदा देव-
गतौ स्थितः सँस्तीर्थकरनाम बध्नाति तदा तीर्थकरनामसहिता देवद्विकवैक्रियद्विकाहारकद्विकरहिताः शेषा देवगतिप्रायोग्या-
सप्तविंशतिं बध्नाति, मनुजद्विकौदारिकद्विकाद्यसंहननलक्षणाश्च पञ्चेति, सर्वसङ्ख्यया द्वात्रिंशद्व (तं ब) ध्नाति । तथा सूक्ष्मेण
साधारणेनापर्याप्तेन वा सह न यशःकीर्त्तिं बध्नाति, नाप्युदयेनानुभवति, न चाहारकद्विके बध्यमाने उदयप्राप्ते वाऽयशः-
कीर्त्यस्थिराशुभरूपास्तिस्रः प्रकृतयो बन्धमुदयं वाऽऽयान्ति । अथ बन्धमधिकृत्य नरकगतिसहचराः प्रकृतय उपद-
र्श्यन्ते—हुण्डं वर्णगन्धरसस्पर्शा अगुरुलघुतैजसकार्मणोपघातनिर्माणान्यस्थिराशुभदुर्भगानादेययायशःकीर्त्तयस्तिर्यग्द्विक-
मनुष्यद्विकयोरन्यतरदन्यतरा जातिर्बादरप्रत्येकनामनी दुःस्वरपराघातोच्छ्वासपर्याप्तकनामानि त्रसनामाप्रशस्तविहायोग-
तिर्वैक्रियद्विकं चेत्यष्टाविंशतिर्नरकगत्या सह बन्धमायान्ति । हुण्डाद्या विंशतिरौदारिकशरीरापर्याप्तकनामसहिता द्वाविं-
शतिरपर्याप्तकबन्धसंज्ञाः पर्याप्तकनाम्ना सहैतासां मिलितानां बन्धे उदये वाऽसंभवात् । एता अपर्याप्तकबन्धसंज्ञाः
प्रकृतीर्बध्नन् यदैकेन्द्रियप्रायोग्या बध्नाति तदाऽन्या अपि स्थावरसूक्ष्मसाधारणरूपास्तिस्रः प्रकृतयो बन्धे प्रविशन्तीत्यप-
र्याप्तकैकेन्द्रियप्रायोग्याः पञ्चविंशतिः, त्रसप्रायोग्याश्च ता बध्नँस्त्रसनामौदारिकाङ्गोपाङ्गसेवार्त्तसंहननाख्या अन्या अपि
तिस्रः प्रकृतीर्बध्नातीत्यपर्याप्तकत्रसप्रायोग्या अपि पञ्चविंशतिरवसेया । पर्याप्तकनाम्नि बध्यमानेऽपर्याप्तस्थाने पर्याप्तानि-

षेकेण स्थिरशुभयशःकीर्त्युच्छ्वासोद्योतपराघाताख्यानां षण्णां च प्रकृतीनामधिकानां प्रक्षेपेणैकत्रिंशज्ज्ञातव्या । एषा च पर्याप्तस्थावरैकेन्द्रियप्रायोग्ये पर्याप्तत्रसप्रायोग्ये च बन्धे प्रत्येकं संज्ञवतो ज्ञातव्या । तथा यदा खरबादरपर्याप्तैकेन्द्रियप्रायोग्यं बध्नाति तदा द्वात्रिंशत्तममातपनामापि द्रष्टव्यं । यदा तु विकलेन्द्रियप्रायोग्यं बध्नाति तदाऽप्रशस्तविहायोगतिदुःस्वरनाम्नोरधिकयोर्बन्धात् पर्याप्तविकलेन्द्रियप्रायोग्ये बन्धे त्रयस्त्रिंशत् । पर्याप्ततिर्यक्पञ्चेन्द्रियमनुष्यप्रायोग्यबन्धारम्भे च सुस्वरसुभगादेयप्रशस्तविहायोगतिसंहननपञ्चकसंस्थानपञ्चकलक्षणाश्चतुर्दश प्रकृतयोऽधिकाः प्रविशन्तीति सप्तचत्वारिंशत् । तदेवं पर्याप्तापर्याप्तस्थावरत्रसप्रायोग्यबन्धेषु यावत्यः प्रकृतयो यथा संज्ञवन्ति तावत्यस्तथा प्ररूपिताः ।

अथ बन्धस्थानानि नाम्न उपदर्श्यन्ते (विव्रियन्ते), तत्राष्टौ बन्धस्थानानि—त्रयोविंशतिः पञ्चविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत् त्रिंशदेकत्रिंशदेका चेति । एतेषां मध्ये यति यस्यां गतौ वर्तमानो बध्नाति तस्यां गतौ तति बन्धस्थानानि प्ररूप्यन्ते—तत्र मनुजगतौ वर्त्तमानो जीवः सर्वाण्यपि नाम्नो बन्धस्थानानि यथासंज्ञवं बध्नाति, तथाहि—मनुष्यः सर्वास्वपि गतिषूत्पद्यते, तत्रैकेन्द्रियेषु मध्ये उत्पित्सुस्त्रयोविंशतिं षड्विंशतिं वा बध्नाति, विकलेन्द्रियेषूत्पित्सुः पञ्चविंशतिमेकोनत्रिंशतं त्रिंशतं वा, नरकेषूत्पित्सुरष्टाविंशतिं, देवगतावुत्पित्सुरष्टाविंशतिमेकोनत्रिंशतं त्रिंशतमेकत्रिंशतं च, क्षपकश्रेण्यामुपशमश्रेण्यां च वर्त्तमान एकामिति । तथा तिर्यग्गतौ वर्त्तमान आद्यानि षट् बन्धस्थानानि यथायोगं बध्नाति, तिरश्चोऽपि यथायोगं चतसृष्वपि गतिषु गमनसंज्ञवात्, यस्तु देवगतिप्रायोग्य एकत्रिंशद्बन्धः स तीर्थकराहा-

रकबन्धसहितः, एकविधबन्धश्च श्रेणिगतस्येति तौ निषिध्येते तिरश्चः । तथा नरकगतौ वर्त्तमान एकोनत्रिंशतं त्रिंशतं वा बध्नाति, यतोऽवश्यं नारकः पर्याप्तेषु तिर्यक्षु मनुष्येषु वा मध्ये समुत्पद्यते, तत्प्रायोग्यश्चैकोनत्रिंशद्बन्धः, यस्तु नारकः श्रेणिकादिवद्भाविततीर्थंकरः स मनुष्यगतिप्रायोग्यं बध्नंस्त्रिंशतं बध्नाति । तथा देवगतौ वर्त्तमानः पञ्चविंशतिं षड्विंशतिमेकोनत्रिंशतं त्रिंशतं वा बध्नाति, तत्र पञ्चविंशतिं पृथिव्यम्बुवनस्पतिषु मध्ये समुत्पित्सुः, तामेव पञ्चविंशतिमातपप्रक्षेपेण षड्विंशतिं खरबादरपृथिवीकायिकेषु समुत्पद्यमानः । एकोनत्रिंशत्त्रिंशद्भावना च नारकवत् । तदेवं नाम्नो बन्धस्थानानां गतिभेदेन बन्धका उक्ताः । अथ कस्या गतेः प्रायोग्यं बध्नतः कति बन्धस्थानानि प्रायोग्यानि भवन्तीत्येतन्निरूप्यते—नारकगतिप्रायोग्यं बध्नत एकमेवाष्टाविंशतिरूपं बन्धस्थानं देवगतिप्रायोग्यं बध्नतोऽष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्बन्धकानि चत्वारि, एकेन्द्रियप्रायोग्यं बध्नतस्त्रयोविंशतिपञ्चविंशतिषड्विंशतिलक्षणानि त्रीणि, द्वीन्द्रियादितिर्यग्गतिमनुष्यगतिगमनप्रायोग्यं बध्नतः पञ्चविंशत्येकोनत्रिंशत्त्रिंशद्बन्धकं बन्धस्थानत्रयमवाप्यते । एतानि सर्वाण्यपि बन्धस्थानान्यदूर एवाग्रे भावयिष्यन्ते । सम्प्रति गुणस्थानेषु बन्धस्थानानि चिन्त्यन्ते—तत्र मिथ्यादृष्टौ षड् नामबन्धाः त्रयोविंशतिपञ्चविंशतिषड्विंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंशद्बन्धकाः, ते च चतुर्गतिप्रायोग्यबन्धसंभवेन भावनीयाः । सासादनेऽष्टाविंशत्येकोनत्रिंशत्त्रिंशद्बन्धकानि त्रीणि बन्धस्थानानि, तत्र तिरश्चो मनुष्यस्य वा सासादनस्य देवगतिप्रायोग्यं बध्नतोऽष्टाविंशतिः, देवस्य नारकस्य वा सासादनस्य तिर्यग्मनुष्यप्रायोग्यं बध्नत एकोनत्रिंशत्, तिर्यक्प्रायोग्यं बध्नतस्त्रिंशत् । सम्यग्मिथ्यादृष्टौ द्वे बन्धस्थाने अष्टाविंशतिरेकोनत्रिंशच्च, तत्र तिरश्चो मनुष्यस्य वा देवगतिप्रायोग्यं बध्नतोऽष्टा-

विंशतिः, देवस्य नारकस्य वा नृगतिप्रायोग्यं बध्नत एकोनत्रिंशत् । अविरतसम्यग्दृष्टावष्टाविंशत्येकोनत्रिंशत्त्रिंशद्बन्धस्थानानि त्रीणि बन्धस्थानानि, तत्र तिर्यङ्मनुष्याणां देवगतिप्रायोग्यं बध्नतामष्टाविंशतिः, मनुष्याणां देवगतिप्रायोग्यं बध्नतामेकोनत्रिंशत्, देवनारकाणां मनुष्यगतिप्रायोग्यं बध्नतामेकोनत्रिंशत्त्रिंशच्च । देशविरते प्रमत्ते च द्वे द्वे बन्धस्थाने अष्टाविंशत्येकोनत्रिंशद्बन्धके । एते च द्वे अपि देवगतिप्रायोग्यं बध्नतो वेदितव्ये । तत्रापि देशविरतस्य तिरश्चोऽष्टाविंशतिरेव, मनुष्यस्य तु द्विविधस्यापि द्वे अपि । अथ प्रमत्तसंयते आहारकद्विकस्य कथं न बन्धः तद्बन्धस्य संयमप्रत्ययत्वात्, मैवं, तद्बन्धस्य विशिष्टसंयमप्रत्ययत्वात्तादृशस्य च विशिष्टसंयमस्याप्रमत्तादिगुणस्थान एव भावात् । अप्रमत्तेऽष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्बन्धकानि चत्वारि बन्धस्थानानि । अपूर्वकरणेऽष्टाविंशत्यादीनि पञ्च बन्धस्थानानि, तत्र चत्वारि प्रागुक्तान्येव, पञ्चमं तु यशःकीर्त्तिरूपैकप्रकृत्यात्मकमिति । नवमदशमयोस्तु गुणस्थानयोर्यशःकीर्त्तेरेकस्या एव बन्धः । तदेवं गुणस्थानेषु बन्धस्थानान्युक्तानि । अथैकेन्द्रियादिप्रायोग्याणि यानि त्रयोविंशत्यादीनि स्थानानि प्रागुक्तानि तानि भावयितुमुपक्रम्यते, तत्र तिर्यग्गतिस्तिर्यगानुपूर्वी एकेन्द्रियजातिर्दुःस्वरवर्जं स्थावरदशकं तैजसकार्मणवर्णादिचतुष्टयागुरुलघूपघातनिर्माणाख्यानामध्रुवबन्धिन्य औदारिकशरीरं हुण्डसंस्थानं चेत्येषा त्रयोविंशतिरपर्याप्तैकेन्द्रियस्य प्रायोग्या द्रष्टव्या । इहापर्याप्तकैकेन्द्रियप्रायोग्याः पञ्चविंशतिप्रकृतयः प्राक् संभवत उपात्तास्ततो बादरप्रत्येकरूपाभ्यां द्वाभ्यामुद्धरिताभ्यां प्रकृतिभ्यां प्रक्षिप्ताभ्यां सूक्ष्मसाधारणयोः प्रतिपक्षभूतयोः संचारणे त्रयोविंशतौ चत्वारो भङ्गा भवन्ति । तथाहि—बादरनाम्नि बध्यमाने एका त्रयोविंशतिः प्रत्येकनाम्ना सह प्राप्यते, द्वितीया साधा-

रणनाम्ना । एवं सूक्ष्मनाम्न्यपि बध्यमाने द्वे त्रयोविंशती इति । तदेवमुक्तमपर्याप्तकैकेन्द्रियप्रायोग्यवक्तव्यं । पर्याप्तकैकेन्द्रियप्रायोग्यबन्धस्थानचिन्तायामपर्याप्तकमपनीय पर्याप्तकं प्रक्षेप्यं । सैव च त्रयोविंशतिः पराघातोच्छ्वाससहिता पञ्चविंशतिर्भवति, सा च पर्याप्तकैकेन्द्रियप्रायोग्यं बध्नतो मिथ्यादृष्टेरवगन्तव्या । इह पर्याप्तैकेन्द्रियप्रायोग्याः प्रागातपेन सह द्वात्रिंशत्प्रकृतयः संज्ञविन्य उक्तास्तत्र पञ्चविंशतिबन्धे आतपमुद्योतं वा न संज्ञवति उच्छ्वासपराघाते च प्रक्षिप्ते इति स्थिरशुभयशःकीर्त्तिरूपास्तिस्रः प्रकृतय ऊरितास्तिष्ठन्ति, ताश्चास्थिराशुभायशःकीर्त्तिप्रतिपक्षभूताः, ततो विकल्पेन तासामेव स्थाने प्रक्षेप्तव्याः । तथा च सत्येवमभिलापः—तिर्यग्गतिस्तिर्यगानुपूर्वी एकेन्द्रियजातिरौदारिकतैजसकार्मणानि हुण्डं वर्णादिचतुष्टयमगुरुलघूपघातोच्छ्वासस्थावरपराघातनामानि पर्याप्तं बादरसूक्ष्मयोरेकतरं प्रत्येकसाधारणयोरेकतरं स्थिरास्थिरयोरेकतरं शुभाशुभयोरेकतरं यशःकीर्त्ययशःकीर्त्योरेकतरा दुर्भगमनादेयं निर्माणं चेति । अत्र विंशतिर्भङ्गाः, तत्र बादरपर्याप्तप्रत्येकस्थिरशुभेषु बध्यमानेषु यशःकीर्त्या सहैको द्वितीयश्चायशःकीर्त्या, एतौ च द्वौ शुभेन लब्धौ, एवमशुभेनापि द्वौ लब्धौ, ततो जाताश्चत्वारः, एते चत्वारः स्थिरेण लब्धाः, एवमस्थिरेणापि चत्वारो लभ्यन्ते, जाता अष्टौ, ते च बादरपर्याप्तप्रत्येकैः सह लब्धाः । यदा तु प्रत्येकस्थाने साधारणमभिषिच्यते तदा स्थिरास्थिरशुभाशुभायशःकीर्त्तिभिश्चत्वारः, साधारणेन सह यशःकीर्त्तिबन्धप्रतिषेधात्तदाश्रितभङ्गाप्राप्तेः । सूक्ष्मपर्याप्तनाम्नोस्तु बध्यमानयोः प्रत्येकसाधारणस्थिरास्थिरशुभाशुभायशःकीर्त्तिभिरष्टौ । सूक्ष्मेणापि सह यशःकीर्त्तेर्बन्धाभावादत्रापि तदाश्रिता भङ्गा न प्राप्यन्ते । तदेवं सर्वसङ्ख्यया पञ्चविंशतिबन्धे विंशतिर्भङ्गाः । सैव पञ्चविंशतिरातपसहिता षड्विंशतिर्भवति । नवरमिहात-

पस्थाने उद्योतमपि विकल्पेन प्रक्षेप्यं, पर्याप्तैकेन्द्रियप्रायोग्यबन्धे उद्योतस्यापि बन्धसंभवात्। अत्र भङ्गाः षोडश, ते चातपोद्योतस्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्त्तिपदैरवसेयाः। आतपोद्योताभ्यां च सह सूक्ष्मसाधारणयोर्बन्धो न भवति, ततस्तदाश्रिता विकल्पा नोपजायन्ते। तदेवमेकेन्द्रियप्रायोग्यबन्धस्थानत्रये सर्वसङ्ख्यया चत्वारिंशद्भङ्गाः। अथ द्वीन्द्रियप्रायोग्यबन्धस्थानवक्तव्यमुच्यते—तत्र प्रागुक्ता त्रयोविंशतिः स्थावरनामापनयनात्तत्रश्चावश्यं सूक्ष्मसाधारणयोः स्थाने बादरप्रत्येकनामप्रक्षेपात्सेवार्त्तसंहननत्रसनामौदारिकाङ्गोपाङ्गनाम्नां चाधिकानां प्रक्षेपाद्द्वीन्द्रियस्य प्रायोग्या पञ्चविंशतिर्भवति, सा चैवमभिलाप्या—तिर्यग्गतिस्तिर्यगानुपूर्वी द्वीन्द्रियजातिरौदारिकतैजसकार्मणानि हुण्डसंस्थानं सेवार्त्तसंहननमौदारिकाङ्गोपाङ्गं वर्णादिचतुष्टयं अगुरुलघूपघातत्रसबादरापर्याप्तप्रत्येकास्थिराशुभदुर्भगानादेययशःकीर्त्तिनिर्माणानि चेति। एषा चापर्याप्तद्वीन्द्रियप्रायोग्यं बध्नतो मिथ्यादृष्टेरवसेया। अत्र प्रतिपक्षभूता परावर्त्तमाना प्रकृतिरेकापि न बन्धमेतीत्येक एव भङ्गः। एषैव पञ्चविंशतिर्दुःस्वरपराघातोच्छ्वासाशुभविहायोगतियुक्ता एकोनत्रिंशद्भवति। एषा च पर्याप्तद्वीन्द्रियप्रायोग्यं बध्नतो मिथ्यादृष्टेर्ज्ञेया। अत एवापर्याप्तकस्थाने पर्याप्तकं प्रक्षिप्यते, पर्याप्तकबन्धे च स्थिरशुभयशःकीर्त्तयोऽपि बन्धमायान्तीति ता अप्यस्थिराशुभायशःकीर्त्तिस्थाने विकल्पेन प्रक्षेप्तव्याः। अत्र स्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्त्तिपदैरष्टौ भङ्गाः। सैवैकोनत्रिंशदुद्योतसहिता त्रिंशत्। अत्रापि त एवाष्टौ भङ्गाः। सर्वसङ्ख्यया सप्तदश। एवं त्रीन्द्रियप्रायोग्याणि चतुरिन्द्रियप्रायोग्याणि च त्रीणि त्रीणि बन्धस्थानानि। तेषु च प्रत्येकं सप्तदश सप्तदश भङ्गा वाच्याः। नवरं त्रीन्द्रियाणां त्रीन्द्रियजातिश्चतुरिन्द्रियाणां चतुरिन्द्रियजातिरभिलाप्या। तिर्यक्पञ्चेन्द्रियप्रायोग्यमपि बध्न-

तस्त्रीणि बन्धस्थानानि, तद्यथा—पञ्चविंशतिरेकोनत्रिंशत्त्रिंशत्। तत्र पञ्चविंशतिर्द्वीन्द्रियप्रायोग्यं बध्नत इव ज्ञेया, नवरं द्वीन्द्रियजातिस्थाने पञ्चेन्द्रियजातिरभिलाप्या। सैव पञ्चविंशतिः पराघातोच्छ्वासदुःस्वराप्रशस्तविहायोगतिभिः सहैकोनत्रिंशद्भवति। सा च पर्याप्ततिर्यक्पञ्चेन्द्रियप्रायोग्यं बध्नतोऽवसेया, तत्प्रायोग्यबन्धारम्भे च सुस्वरसुभगादेयप्रशस्तविहायोगत्याद्यसंहनन-पञ्चकाद्यसंस्थानपञ्चकलक्षणाश्चतुर्दश प्रकृतयोऽन्या अपि बन्धमाश्रित्य संभवन्ति, ताश्च दुःस्वरादीनां प्रतिपक्षभूताः, ततो विकल्पेन दुःस्वरदुर्भगानादेयानां स्थाने सुस्वरसुभगादेयानामप्रशस्तविहायोगतिस्थाने प्रशस्तविहायोगतेर्हुण्डसंस्थानस्य स्थाने विकल्पेन पञ्चसंस्थानानां सेवार्त्तसंहननस्थाने पञ्चसंहननानां प्रक्षेपे षड्भिः संस्थानैः षड्भिः संहननैः प्रशस्ताप्रशस्तविहायोगतिभ्यां स्थिरास्थिराभ्यां शुभाशुभाभ्यां सुभगदुर्भगाभ्यां सुस्वरदुःस्वराभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्त्तिभ्यां भङ्गा अष्टाधिकषट्चत्वारिंशत्शतसङ्ख्या भवन्ति। सैवैकोनत्रिंशदुद्योतसहिता त्रिंशद्भवति। अत्रापि भङ्गाः प्राग्वदष्टाधिकानि षट्चत्वारिंशच्छतानि। सर्वसङ्ख्यया तिर्यक्पञ्चेन्द्रियप्रायोग्यबन्धस्थानेषु भङ्गा द्विनवतिशतानि सप्तदशाधिकानि ९२१७। सर्वस्यां तिर्यग्गतौ सर्वसङ्ख्यया भङ्गास्त्रिनवतिशतान्यष्टाधिकानि ९३०८। तदेवं व्याख्यातानि तिर्यग्गतिप्रायोग्यानि बन्धस्थानानि। अथ मनुष्यगतिप्रायोग्याण्युच्यन्ते—तत्र यान्येव तिर्यक्पञ्चेन्द्रियप्रायोग्याणि बन्धस्थानानि तान्येव मनुष्याणां प्रायोग्याणि द्रष्टव्यानि, नवरं तिर्यग्गतितिर्यगानुपूर्वीस्थाने मनुष्यगतिमनुष्यानुपूर्व्यौ वक्तव्ये। तथा त्रिंशद्बन्धस्थाने त्रिंशत्तमं तीर्थकरनाम वक्तव्यमिति विशेषः। तत्र पञ्चविंशतिबन्धस्थाने प्राग्वदेको भङ्गः। एकोनत्रिं-

शद्बन्धस्थानेऽष्टाधिकानि षट्चत्वारिंशच्छतानि, सैवैकोनत्रिंशत्तीर्थकरनामसहिता त्रिंशन्नवति, परमस्यां संस्थानं समचतुरस्रमेव संहननं वज्रर्षभनाराचमेव विहायोगतिः प्रशस्तैव वाच्या, शेषसंस्थानसंहननविहायोगतीनां तीर्थकरनाम्ना सह बन्धायोगात् । एवं चान्निलाप्या—मनुष्यद्विकमौदारिकद्विकं पञ्चेन्द्रियजातितैजसकार्मणे आद्यसंहननमाद्यसंस्थानं वर्णादिचतुष्टयमगुरुलघु पराघातोपघातोच्छ्वासनामानि प्रशस्तविहायोगतित्रसचतुष्कं स्थिरास्थिरयोरेकतरं शुभाशुभयोरेकतरं सुभगं सुस्वरमादेयं यशःकीर्त्ययशःकीर्त्योरेकतरा तीर्थकरनाम निर्माणमिति । एनां च त्रिंशतं देवा नारका वा सम्यग्दृष्टयो मनुष्यगतिप्रायोग्यं बध्नन्तो बध्नन्ति । अत्र स्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्त्तिनिरष्टौ भङ्गाः । सर्वसङ्ख्यया मनुष्यगतिप्रायोग्यबन्धस्थानेषु भङ्गाः सप्तदशोत्तरषट्चत्वारिंशच्छतानि ४६१७ । नरकगतिप्रायोग्यं बध्नतोऽष्टाविंशतिरेकमेव बन्धस्थानं, सा चेयं—नरकद्विकं पञ्चेन्द्रियजातिर्वैक्रियद्विकं तैजसकार्मणे हुण्डं वर्णचतुष्कमगुरुलघूपघातं पराघातमुच्छ्वासं कुखगतित्रसचतुष्कमस्थिरषट्कं निर्माणं चेति, एतदष्टाविंशतिप्रकृत्यात्मकं बन्धस्थानं मिथ्यादृष्टेरवसेयं । अत्र सर्वासामशुभत्वादेक एव भङ्गः । अथ देवगतिप्रायोग्याणि बन्धस्थानान्युच्यन्ते—तानि चाष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्बन्धाख्यानि चत्वारि, तत्राष्टाविंशतिरियं—देवगतिर्देवानुपूर्वी पञ्चेन्द्रियजातिर्वैक्रियद्विकं तैजसकार्मणे समचतुरस्रं वर्णचतुष्कं अगुरुलघूपघातपराघातोच्छ्वासनामानि प्रशस्तविहायोगतित्रसचतुष्कं स्थिरास्थिरयोरेकतरं शुभाशुभयोरेकतरं सुभगत्रिकं यशःकीर्त्ययशःकीर्त्योरेकतरा निर्माणं चेति । एतच्च बन्धस्थानं मिथ्यादृष्टिसासादनमिश्राविरतसम्यग्दृष्टिदेश (सर्व) विरतानां देवगतिप्रायोग्यं बध्नतामवसेयं । अत्र स्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्त्तिनिरष्टौ भङ्गाः ।

एषैव जिननामसहितैकोनत्रिंशत्, अत्रापि त एवाष्टौ भङ्गाः, नवरमेतद्बन्धस्थानं देवगतिप्रायोग्यं बध्नतामविरतसम्यग्दृष्टी-(ष्ठादी) नामवसेयं। त्रिंशत्पुनरियं—देवद्विकं पञ्चेन्द्रियजातिर्वैक्रियद्विकमाहारकद्विकं तैजसकार्मणे समचतुरस्रं वर्ण-चतुष्टयमगुरुलघूपघातं पराघातमुच्छ्वासं सुखगतित्रसदशकं निर्माणं चेति, एतद्बन्धस्थानं देवगतिप्रायोग्यं बध्नतोऽप्रमत्त-स्यापूर्वकरणस्य चावगन्तव्यं। अत्र सर्वाण्यपि कर्माणि शुभान्येवेत्येक एव भङ्गः। एषैव त्रिंशज्जिननामसहिता एकत्रिं-शद्भवति, इयमपि त्रिंशदिवैकान्तशुभपदा द्रष्टव्येत्यत्राप्येक एव भङ्गः। सर्वसङ्ख्यया देवगतिप्रायोग्येषु बन्धस्थानेष्वष्टा-दश भङ्गाः। एकं तु बन्धस्थानं यशःकीर्त्तिलक्षणं देवगतिप्रायोग्ये बन्धे व्युच्छिन्नेऽनिवृत्तिबादरसूक्ष्मसम्परायोरवसेयं। सर्वसङ्ख्यया बन्धस्थानेषु भङ्गास्त्रयोदश सहस्राणि नव शतानि पञ्चचत्वारिंशच्च १३९४५।

अथ नामप्रकृतीनां गुणस्थानेषु बन्धव्यवच्छेद उच्यते—साधारणसूक्ष्मातपस्थावरनरकद्विकैकद्वित्रिचतुरिन्द्रियजाति-हुण्डापर्याप्तसेवार्त्तलक्षणानां त्रयोदशप्रकृतीनां मिथ्यादृष्टिगुणस्थाने बन्धव्यवच्छेदो मिथ्यादृष्टय एवैतासां बन्धका न सासादनादय इत्यर्थः। एवमेवाग्रेऽपि व्यवच्छेदार्थोऽन्यूह्यः। अप्रशस्तविहायोगतिदुःस्वरदुर्भगोद्योतानादेयतिर्यग्द्विका-द्यन्तवर्जसंहननरूपाणां पञ्चदशप्रकृतीनां सासादने बन्धव्यवच्छेदः। औदारिकद्विकमनुष्यद्विकाद्यसंहननलक्षणानां पञ्चानां प्रकृतीनामविरतसम्यग्दृष्टिगुणस्थाने बन्धव्यवच्छेदः, मिथ्यादृष्ट्यादयोऽविरतसम्यग्दृष्टय एवासां बन्धका न देशविरतादय इतियावत्। अस्थिराशुभायशःकीर्त्तीनां प्रमत्तसंयते बन्धव्यवच्छेदः। सुरद्विकवैक्रियद्विकतैजसकार्मणवर्णचतुष्टयागुरुल-घूपघातनिर्माणपराघातोच्छ्वासप्रशस्तविहायोगतित्रसदशकसमचतुरस्रपञ्चेन्द्रियजातिरूपाणामष्टाविंशतिप्रकृतीनामपूर्वकरणे

बन्धव्यवच्छेदः । तथा प्रमत्तेऽप्रमत्ते चाहारकद्विकस्योदयो भवति, बन्धस्त्वप्रमत्तादारभ्य यावदपूर्वकरणस्तावत् । तीर्थकरनाम्न उदयः सयोगिकेवलिन्ययोगिकेवलिनि च, बन्धस्त्वविरतसम्यग्दृष्टेरारभ्य यावदपूर्वकरणमध्यभागस्तावत् । यशःकीर्त्तेस्तु मिथ्यादृष्टेरारभ्य यावत्सूक्ष्मसम्परायस्तावद्बन्धः । तदेवमुक्तं नाम्नो बन्धवक्तव्यं, अधुनोदयेऽपि यदुक्तव्यं तदुच्यते—एकेन्द्रियानधिकृत्योच्छ्वासात् द्वीन्द्रियादीनधिकृत्योच्छ्वासस्वराभ्यां पूर्वं पश्चाद्योद्योतातपयोर्यथायोगमुदयो भवति, तथैव चाग्रे भावयिष्यामः । तथा सूक्ष्मस्यापर्याप्तस्य साधारणस्योद्योतस्य चोदयेन सह नातपमुदयमेति । तथोद्योतेन सहातपं न बध्यते । नापि सूक्ष्मापर्याप्तसाधारणरूपेण त्रिकेण सहातपोद्योतोभयं । अयं बन्धविषयोऽपवादोऽथोदयविषयेऽयमभिधीयते—साधारणोदयेऽप्युद्योतयशःकीर्त्योरुदयो भवति, दुर्भगानादेययशःकीर्त्तीनामुदये बादरपवनः पर्याप्तो वैक्रियशरीरमारभ्य तदुदयभाग्भवति, बादरपर्याप्तग्रहणात् पर्याप्तापर्याप्तसूक्ष्मापर्याप्तबादरव्युदासः, तेषां वैक्रियलब्धेरेवाभावात् । उक्तं च प्रज्ञापनाचूर्णौ—"तिण्हं रासीणं वेउव्वियलद्धी चेव णत्थि बायरपज्जत्ताणं संखेज्जइमे भागे तस्स त्ति" । तथा दुर्भगानादेययोरुदयेऽपि देवगत्युदयो न विरुध्यते । तथाऽऽहारकद्विकस्योदयो दुर्भगानादेययशःकीर्त्युदयविरुद्धः अस्थिराशुभोदयेन चाविरुद्धः, तयोर्ध्रुवोदयत्वात् । तथा विकलेन्द्रियेषु सुस्वरोदयोऽप्यविरुद्धः । तथा मनुष्याणां देशविरतानां सर्वविरतानां वा यथायोगं वैक्रियाहारककरणाद्धायां वर्त्तमानानामुद्योतोदयो भवति, न शेषाणां । तदेवमुदयविषयसंभवचिन्तां विधायोदयस्थानान्यभिधीयन्ते—तत्र चतुर्गतिकान् प्राणिनोऽधिकृत्य सर्वसङ्ख्यया नाम्नो द्वादशोदयस्थानानि । तद्यथाहि—विंशतिरेकविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशति-

रेकोनत्रिंशत्त्रिंशदेकत्रिंशन्नवाष्टौ च । एतान्येवोदयस्थानानि गतिषु चिन्त्यन्ते—मनुष्येषु चतुर्विंशतिवर्जानि शेषाण्येकादशाप्युदयस्थानानि संभवन्ति, चतुर्विंशतिस्तु न संभवति, तस्या एकेन्द्रियेष्वेव संभवात् । विंशत्यष्टनवोदयवर्जिताः शेषा नवोदयास्तिर्यक्षु संभवन्ति, नवाष्टोदयावयोगिकेवलिनि प्राप्येते, विंशत्युदयस्तु केवलिसमुद्घातावस्थायामिति तिर्यद्वयेतत्त्रयवर्जनं । तथा नरकगतौ पञ्चोदयाः, तद्यथा—एकविंशतिः पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशच्च । एत एव च पञ्चोदयाः सुरगतौ त्रिंशत्सहिताः षड्वेदितव्याः । अथ गुणस्थानेषूदयस्थानानि चिन्त्यन्ते—मिथ्यादृष्टिगुणस्थाने एकविंशतिचतुर्विंशतिपञ्चविंशतिषड्विंशतिसप्तविंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्भक्षणा नवोदया भवन्ति, मिथ्यादृष्टेः सर्वजीवयोनिषु संभवात्, विंशत्यष्टनवोदयास्तु केवल्यवस्थाभाविनो न संभवन्ति । एत एव नवोदयाः सप्तविंशत्यष्टाविंशतिहीनाः शेषाः सप्त सासादने संभवन्ति, तत्रैकविंशत्युदयो भवान्तरे, चतुर्विंशत्युदयः पर्याप्तप्रत्येकबादरैकेन्द्रियस्य जन्माद्यसमये, षड्विंशतिर्द्वीन्द्रियादिषूत्पद्यमानस्य, पञ्चविंशतिरुत्तरवैक्रियकरणप्रथमकाले, एकोनत्रिंशत्पर्याप्तनारकाणां, त्रिंशत्पर्याप्तमनुष्यदेवानां, एकत्रिंशत्पञ्चेन्द्रियतिरश्चामुद्योतवेदकानां, सप्तविंशत्यष्टाविंशत्युदयान्यां तु किञ्चिदूनपर्याप्तावस्थायां भवितव्यं, तदानीं च सासादनत्वं न लभ्यत इति तयोरत्रासंभवः । त एवैकविंशत्यादयो नवोदयाश्चतुर्विंशत्यूनाः शेषा अष्टाविरतसम्यग्दृष्टौ, तस्य चतसृष्वपि गतिषूत्पत्त्यवस्थायां पर्याप्तावस्थायां वा प्राप्यमाणत्वात्, चतुर्विंशत्युदयस्तु तस्य न संभवति, एकेन्द्रियेष्वेव चतुर्विंशत्युदयप्राप्तेः । एत एवाष्टौ पञ्चविंशत्यूना विंशत्युदयसहिताः सयोगिकेवलिन्यष्टावेव भवन्ति, तत्र विंशत्येकविंशतिषड्विंशतिसप्तविंशत्युदयाः समुद्घातावस्थायां, अष्टाविंशत्येकोनत्रिं-

शदुदयौ योगनिरोधावस्थायां, त्रिंशदुदयः सामान्यकेवलिनः स्वभावस्थस्य तीर्थकृतो वा कृतवाग्निरोधस्य, एकत्रिंशदुदयस्तीर्थकरस्य । तथा पञ्चविंशत्यादयः सप्तोदयाः षड्विंशत्यूनाः षड् देशविरते भवन्ति, तत्र पञ्चविंशतिसप्तविंशत्यष्टाविंशतिनवविंशत्युदया उत्तरवैक्रियं कुर्वतो वेदितव्याः, त्रिंशदुदयः(प्राकृत)तिर्यङ्मनुष्ययोः पर्याप्तयोः (वैक्रिययोर्वा), एकत्रिंशदुदय उद्योतमनुभवतस्तिरश्च इति । तथा प्रमत्तसंयते पञ्चविंशत्यादयः षड्विंशतिहीनाः पञ्चोदया भवन्ति, तत्र पञ्चविंशतिसप्तविंशत्यष्टाविंशतिनवविंशत्युदया वैक्रियमाहारकं वा कुर्वतः संयतस्य वेदितव्याः, त्रिंशदुदयस्तु सामान्यसंयतस्य, यस्त्वेकत्रिंशदुदयः स तिरश्चामेव भवतीत्यत्र न संभवति । तथा एकोनत्रिंशदादयस्त्रय उदयाः सम्यग्मिथ्यादृष्टौ भवन्ति, तत्रैकोनत्रिंशन्नारकाणां, त्रिंशद्देवमनुष्यतिरश्चां, एकत्रिंशत्तिरश्चां । तथाऽप्रमत्ते द्वे उदयस्थाने एकोनत्रिंशत्त्रिंशच्च, तत्रैकोनत्रिंशदैक्रिये आहारके वा व्यवस्थिते ज्ञेया, त्रिंशत्सामान्यमनुष्ये । अपूर्वकरणानिवृत्तिबादरसूक्ष्मसम्परायोपशान्तमोहक्षीणमोहेष्वपि त्रिंशदेवोदयस्थानं । तथाऽयोगिकेवलिन्यष्टकोदयो नवोदयो वा, तत्राष्टकोदयोऽतीर्थकृतः नवोदयस्तीर्थकृतः । अथेन्द्रियेषूदयस्थानानि चिन्त्यन्ते—तत्रैकेन्द्रियाणामुदयस्थानानि पञ्च—एकविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिश्चेति । तत्र तैजसकार्मणे अगुरुलघु स्थिरास्थिरे शुभाशुभे वर्णचतुष्कं निर्माणं चेत्येता द्वादश प्रकृतय उदयमाश्रित्य ध्रुवाः, तिर्यग्द्विकं स्थावरमेकेन्द्रियजातिर्बादरसूक्ष्मयोरेकतरं पर्याप्तापर्याप्तयोरेकतरं दुर्भगमनादेयं यशःकीर्त्ययशःकीर्त्योरेकतरा चेत्येतन्नवकसहिता एकविंशतिः । अत्र भङ्गाः पञ्च बादरसूक्ष्माभ्यां प्रत्येकं पर्याप्तापर्याप्ताभ्यामयशःकीर्त्या सह चत्वारः, बादरपर्याप्तयशःकीर्त्तिभिः सह चैक इति । सूक्ष्मापर्याप्ताभ्यां सह यशःकीर्त्तेरुदयो

न स्यादिति तदाश्रिता विकल्पा न प्राप्यन्ते । एषा चैकविंशतिर्योऽग्रे सर्वा अपि स्वपर्याप्तीः पूरयिष्यति तस्य योग्यतया लब्धिमाश्रित्य भवान्तरालादावपि पर्याप्तिरस्तीति लब्धिपर्याप्त्यपेक्षया एकेन्द्रियस्य भवान्तरालगतौ वर्तमानस्यावगन्तव्या, अन्तराले बादरपर्याप्तयशःकीर्त्तीनामप्युदयसंभवात्, ततः शरीरस्थस्यौदारिकं हुण्डं उपघातं प्रत्येकसाधारणयोरेकतरमिति चतस्रः प्रकृतयः क्षिप्यन्ते, प्रागुक्तैकविंशतिमध्याच्च तिर्यगानुपूर्व्यपनीयते, ततश्चतुर्विंशतिः स्यात् । इह च भङ्गा दश तद्यथा—बादरपर्याप्तस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्त्तिपदैर्भङ्गाश्चत्वारः, बादरापर्याप्तस्य प्रत्येकसाधारणाभ्यामयशःकीर्त्तिनियन्त्रिताभ्यां सह द्वौ, सूक्ष्मस्य पर्याप्तापर्याप्तप्रत्येकसाधारणैरयशःकीर्त्तिनियन्त्रितैः सह चत्वार इति । तथा बादरवायुकायिकस्य वैक्रियं कुर्वत औदारिकस्थाने वैक्रियं वक्तव्यं, ततश्च तस्यापि चतुर्विंशतिरुदये प्राप्यते, केवलमिह बादरपर्याप्तप्रत्येकायशःकीर्त्तिपदैरेक एव भङ्गः, तेजस्कायिकवायुकायिकयोर्यशःकीर्त्तिसाधारणयोरुदयो न स्यादिति तदाश्रिता भङ्गा न प्राप्यन्ते । सर्वसङ्ख्यया चतुर्विंशतौ भङ्गा एकादश । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते पञ्चविंशतिः, सा च पर्याप्तकस्यैवेत्यपर्याप्तकमपसार्यते, अत्र भङ्गाः षट्, तद्यथा—बादरपर्याप्तस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्त्तिपदैश्चत्वारः, सूक्ष्मस्य च प्रत्येकसाधारणाभ्यामयशःकीर्त्या सह द्वाविति । तथा बादरवायुकायिकस्य वैक्रियं कुर्वतः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते पञ्चविंशतिः, अत्र च प्राग्वदेक एव भङ्गः । सर्वसङ्ख्यया पञ्चविंशतौ सप्त भङ्गाः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते षड्विंशतिः । अत्रापि भङ्गाः प्रागिव षट् । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते आतपोद्योतयोरन्यतरस्मिन्नुदिते षड्विंशतिर्भवति, अत्रापि भङ्गाः षट्, तद्यथा—

बादरस्योद्योतेन सहितस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्त्तिनिश्चत्वारः, आतपसहितस्य प्रत्येकयशःकीर्त्ययशःकीर्त्तिपदैश्च द्वाविति । तथा बादरवायुकायिकस्य वैक्रियं कुर्वतः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते प्रागुक्ता पञ्चविंशतिः षड्विंशतिर्भवति, तत्र च प्राग्वदेक एव भङ्गः, तैजस्कायिकवायुकायिकयोरातपोद्योतयशःकीर्त्तीनामुदयाभावात्तदाश्रितविकल्पाभावः । सर्वसङ्ख्यया षड्विंशतौ त्रयोदश भङ्गाः । तथा प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां षड्विंशतौ आतपोद्योतयोरन्यतरस्मिन्नुदिते सप्तविंशतिर्भवति । अत्र ये प्रागातपोद्योतान्यतरसहितायां षड्विंशतौ प्रतिपादितास्त एव षड्भङ्गाः । सर्वसङ्ख्ययैकेन्द्रियाणां भङ्गा द्विचत्वारिंशत् । अथ द्वीन्द्रियाणामुदयस्थानान्युच्यन्ते—द्वीन्द्रियाणामुदयस्थानानि षट्, तथाहि—एकविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत्रिंशदेकत्रिंशच्चेति । तत्र तिर्यग्द्विकं द्वीन्द्रियजातिस्त्रसं बादरं पर्याप्तापर्याप्तयोरेकतरं दुर्भगमनादेयं यशःकीर्त्ययशःकीर्त्योरेकतरा चेत्येता नव प्रकृतयः प्रागुक्तघादशध्रुवोदयप्रकृतिसहिता एकविंशतिः, इयं चान्तरालगतिस्थस्य द्वीन्द्रियस्यावाप्यते, अत्र भङ्गास्त्रयः—अयशःकीर्त्या सहापर्याप्तनामोदये वर्त्तमानस्यैकः, पर्याप्तकनामोदये वर्त्तमानस्य च यशःकीर्त्ययशःकीर्त्तिभ्यां द्वाविति । तस्यैव शरीरस्थस्य औदारिकद्विकहुण्डसेवार्त्तोपघातप्रत्येकलक्षणाः षट् प्रकृतय उपनीयन्ते तिर्यगानुपूर्वी चापनीयत इति षड्विंशतिर्भवति, अत्रापि भङ्गास्त्रयः प्राग्वत् । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाताप्रशस्तविहायोगत्योः क्षिप्तयोरष्टाविंशतिः, अत्र यशःकीर्त्ययशःकीर्त्तिभ्यां द्वौ भङ्गौ, अपर्याप्तकप्रशस्तविहायोगत्योरत्रोदयाभावात् । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते एकोनत्रिंशत्, अत्रापि तावेव द्वौ भङ्गौ, यदा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योते तूदिते एकोनत्रिंशत्, इहापि प्राग्वत् द्वौ

ङ्गौ, सर्वमीलने एकोनत्रिंशति चत्वारो ङ्गाः । ततो ङाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायामेकोनत्रिंशति सुस्वरदुःस्वरयोरेकतरस्मिन् प्रक्षिप्ते त्रिंशद्भवति, अत्र सुस्वरदुःस्वरयशःकीर्त्ययशःकीर्त्तिन्यां चत्वारो ङ्गाः । अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योते तूदिते त्रिंशत्, अत्र यशःकीर्त्ययशःकीर्त्तिन्यां द्वौ ङ्गौ, सर्वे त्रिंशति षड्ङ्गाः । ततो ङाषापर्याप्त्या पर्याप्तस्य स्वरसहितायां त्रिंशत्युद्योतनाम्नि क्षिप्ते एकत्रिंशत्, तत्र सुस्वरदुःस्वरयशःकीर्त्ययशःकीर्त्तिन्निश्चत्वारो ङ्गाः । सर्वसङ्ख्यया द्वीन्द्रियाणां द्वाविंशतिर्ङ्गाः । एवं त्रीन्द्रियाणां चतुरिन्द्रियाणां च प्रत्येकं षट् षडुदयस्थानानि सङ्गानि ङावनीयानि, नवरं स्वस्वजातिरुच्चारणीया । सर्वसङ्ख्यया विकलेन्द्रियाणां ङ्गाः षट्षष्टिः । अथ तिर्यक्पञ्चेन्द्रियाणामुदयस्थानान्युच्यन्ते—तत्र प्राकृततिर्यक्पञ्चेन्द्रियाणामुदयस्थानानि षट्, तथाहि—एकविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्च । तत्र तिर्यग्द्विकं पञ्चेन्द्रियजातिस्त्रसं बादरं पर्याप्तापर्याप्तयोरेकतरं सुङ्गदुर्ङ्गयोरेकतरं आदेयानादेययोरेकतरं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयो द्वादशध्रुवोदयप्रकृतिभिः सहिता एकविंशतिः, एषा च ङवान्तराङ्गतौ वर्त्तमानस्य तिर्यक्पञ्चेन्द्रियस्य ज्ञेया, अत्र ङ्गा नव, तत्र पर्याप्तनामोदये वर्त्तमानस्य सुङ्गदुर्ङ्गाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्त्तिभ्यां चाष्टौ ङ्गाः, अपर्याप्तकनामोदये वर्त्तमानस्य तु दुर्ङ्गानादेययशःकीर्त्तिभिरेक इति । अपरे त्वाहुः—सुङ्गदेये युगपदुदयमागच्छतो दुर्ङ्गानादेये च, न तु पर्यायेण, ततः पर्याप्तस्य सुङ्गदेययुगलदुर्ङ्गानादेययुगलाभ्यां यशःकीर्त्ययशःकीर्त्तिभ्यां च चत्वारो ङ्गाः, अपर्याप्तस्य त्वेक इति सर्वसङ्ख्यया पञ्च, एवमुत्तरत्रापि मतान्तरेण ङ्गवैषम्यं स्वधियाऽभ्यूह्यं । ततः शरीरस्थस्यानुपूर्वीमपनीयौदारिकद्विकषडन्यतमसंस्थानषडन्यतमसंहननोपघात-

प्रत्येकरूपप्रकृतिषट्कप्रक्षेपे कृते षड्विंशतिर्भवति। अत्र भङ्गानां द्वे शते एकोननवत्यधिके। तत्र पर्याप्तस्य षड्भिः संस्थानैः षड्भिः संहननैः सुभगदुर्भगान्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्त्तिभ्यां च द्वे शते भङ्गानामष्टाशीत्यधिके, अपर्याप्तकस्य तु हुण्डसेवार्त्तदुर्भगानादेययशःकीर्त्तिभिरेक इति तस्यामेव षड्विंशतौ शरीरपर्याप्त्या पर्याप्तस्य पराघातेऽन्यतरविहायोगतौ च प्रक्षिप्तायामष्टाविंशतिः। तत्र ये प्राक् पर्याप्तानां द्वे शते भङ्गानामष्टाशीत्यधिके उक्ते ते अत्र विहायोगतिद्विकेन गुणिते अवगन्तव्ये, तथा च सत्यत्र भङ्गानां पञ्च शतानि षट्सप्तत्यधिकानि भवन्ति। ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते एकोनत्रिंशत्। अत्रापि भङ्गाः प्राग्वत् पञ्च शतानि षट्सप्तत्यधिकानि, अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते एकोनत्रिंशत्, अत्रापि भङ्गाः पञ्च शतानि षट्सप्तत्यधिकानि, सर्वसङ्ख्यया भङ्गानामेकोनत्रिंशति द्विपञ्चाशदधिकान्येकादश शतानि। ततो भाषापर्याप्त्या पर्याप्तस्य सुस्वरदुःस्वरयोरन्यतरस्मिन् प्रक्षिप्ते त्रिंशद्भवति। अत्र ये उच्छ्वासेन षट्सप्तत्यधिकपञ्चशतप्रमाणा भङ्गा उक्तास्ते स्वरद्विकेन गुण्यन्ते, जातान्येकादश शतानि द्विपञ्चाशदधिकानि, अथवा प्राणापानपर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते त्रिंशद्भवति। अत्र भङ्गानां पञ्च शतानि षट्सप्तत्यधिकानि, सर्वसङ्ख्यया त्रिंशति भङ्गानां सप्तदश शतान्यष्टाविंशत्यधिकानि। ततः स्वरसहितायां त्रिंशत्युद्योतनाम्नि प्रक्षिप्ते एकत्रिंशद्भवति, तत्र ये स्वरसहितायां त्रिंशति द्विपञ्चाशदधिकैकादशशतसङ्ख्या भङ्गा उक्तास्त एवात्रापि द्रष्टव्याः। सर्वसङ्ख्यया प्राकृतपञ्चेन्द्रियतिरश्चां भङ्गाश्चत्वारि सहस्राणि नव शतानि षट् च। अथ वैक्रियं कुर्वतां तिर्यक्पञ्चेन्द्रियाणामुदयस्थानानि वाच्यानि, तानि च पञ्च, तथाहि—पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशात्रिंशच्च। तत्र

वैक्रियद्विकं समचतुरस्रमुपघातं प्रत्येकमिति पञ्च प्रकृतयः प्रागुक्तायां तिर्यक्पञ्चेन्द्रियप्रायोग्यायामेकाविंशतौ प्रक्षिप्यन्ते, तिर्यगानुपूर्वी चापनीयते, ततः पञ्चविंशतिः स्यात्, इह सुभगदुर्भगान्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्त्तिभ्यां च भङ्गा अष्टौ । ततः शरीरेण पर्याप्तस्य पराघाते प्रशस्तविहायोगतौ च क्षिप्तायां सप्तविंशतिः, तत्रापि भङ्गाः प्राग्वदष्टौ । ततः प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्तेऽष्टाविंशतिः, अत्रापि भङ्गाः प्राग्वदष्टौ, अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योते तूदितेऽष्टाविंशतिः, अत्रापि भङ्गाः प्राग्वदष्टौ, सर्वसङ्ख्ययाऽष्टाविंशतौ भङ्गाः षोडश । ततो भाषया पर्याप्तस्योच्छ्वाससहितायामष्टाविंशतौ सुस्वरे क्षिप्ते एकोनत्रिंशत्, अत्रापि प्राग्वद्भङ्गा अष्टौ, अथवा प्राणापानेन पर्याप्तस्य स्वरेऽनुदिते उद्योते तूदिते एकोनत्रिंशत्, अत्रापि प्राग्वद्भङ्गा अष्टौ, सर्वसङ्ख्ययैकोनत्रिंशति भङ्गाः षोडश । ततः सुस्वरसहितायामेकोनत्रिंशत्युद्योते क्षिप्ते त्रिंशत्, अत्रापि भङ्गाः प्राग्वदष्टौ । सर्वसङ्ख्या वैक्रियं कुर्वतां तिरश्चां भङ्गाः षट्पञ्चाशत् । सर्वेषां तिर्यक्पञ्चेन्द्रियाणां सर्वमीलनेन भङ्गाश्चत्वारि सहस्राणि नव शतानि द्विषष्टिश्च ।

अथ मनुष्याणामुदयस्थानानि वाच्यानि, तत्र सामान्यमनुष्याणामुदयस्थानानि पञ्च, तद्यथा—एकविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशच्च । एतानि सर्वाण्यपि यथा प्राक् तिर्यक्पञ्चेन्द्रियाणामुक्तानि तथाऽत्रापि वक्तव्यानि, नवरमेकोनत्रिंशत्त्रिंशच्चोद्योतरहिता वक्तव्या, वैक्रियाहारकसंयतान्मुक्त्वा शेषमनुष्याणामुद्योतोदयाभावात्, तत एकोनत्रिंशति भङ्गाः पञ्च शतानि षट्सप्तत्यधिकानि । त्रिंशति चैकादश शतानि द्विपञ्चाशदधिकान्येवेति सर्वसङ्ख्यया प्राकृतमनुष्याणां भङ्गाः षड्विंशतिशतानि द्विकाधिकानि । वैक्रियमनुष्याणामुदयस्थानानि पञ्च, तद्यथा—पञ्चविंशतिः सप्तविं-

शतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशच्च । तत्र मनुष्यगतिः पञ्चेन्द्रियजातिर्वैक्रियद्विकं समचतुरस्रमुपघातत्रसबादरपर्याप्तप्रत्येकानि सुभगदुर्भगयोरेकतरं आदेयानादेययोरेकतरं यशःकीर्त्ययशःकीर्त्योरेकतरेति त्रयोदश त्रादशभिर्ध्रुवोदयिनीभिः सहिता पञ्चविंशतिः, अत्र सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्त्तिभ्यां चाष्टौ भङ्गाः । देशविरतानां सर्वविरतानां वा वैक्रियं कुर्वतां सर्वप्रशस्त एव भङ्गोऽवधारणीयः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाते प्रशस्तखगतौ च क्षिप्तायां सप्तविंशतिः, अत्रापि प्राग्वदष्टौ भङ्गाः । ततः प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्तेऽष्टाविंशतिः, अत्रापि भङ्गाः प्राग्वदष्टौ, अथवा संयतानामुत्तरवैक्रियं कुर्वतां शरीरेण पर्याप्तानामुच्छ्वासेऽनुदिते उद्योते तूदितेऽष्टाविंशतिः, अत्रैक एव प्रशस्तपदो भङ्गः, संयतानां दुर्भगानादेययशःकीर्त्यनुदयात्, सर्वसङ्कलयाऽष्टाविंशतौ भङ्गा नव । ततो भाषया पर्याप्तस्योच्छ्वाससहितायामष्टाविंशतौ सुस्वरे क्षिप्ते एकोनत्रिंशत्, इहापि भङ्गाः प्राग्वदष्टौ, अथवा संयतानां स्वरेऽनुदिते उद्योते तूदिते एकोनत्रिंशत्, इहापि प्राग्वदेक एव भङ्गः, सर्वसङ्कलयैकोनत्रिंशति नव भङ्गाः । सुस्वरसहितायामेकोनत्रिंशत्युद्योते क्षिप्ते संयतानां त्रिंशदुदयः अत्रैक एव भङ्गः । सर्वसङ्कलया वैक्रियमनुष्याणां पञ्चत्रिंशद्भङ्गाः । आहारकसंयतानामुदयस्थानानि पञ्च, तद्यथा—पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशच्च । तत्राहारकद्विकं समचतुरस्रमुपघातं प्रत्येकं चेति पञ्च प्रकृतयः प्रागुक्तायां मनुष्यगतिप्रायोग्यायामेकविंशतौ प्रक्षिप्यन्ते ततो मनुष्यानुपूर्वी चापनीयते जाता पञ्चविंशतिः, केवलमियं सर्वप्रशस्तपदा, संयतानां दुर्भगानादेययशःकीर्त्युदयाभावादित्यत्रैक एव भङ्गः । ततः शरीरेण पर्याप्तस्य पराघाते प्रशस्तखगतौ च क्षिप्तायां सप्तविंशतिः, अत्राप्येक एव भङ्गः । ततः प्राणापानेन पर्या-

सस्योच्छ्वासे क्षिप्तेऽष्टाविंशतिः, इहाप्येको भङ्गः, अथवा शरीरेण पर्याप्तेस्योच्छ्वासेऽनुदिते उद्योते तूदितेऽष्टाविंशतिः, इहापि भङ्ग एकः। सर्वसङ्ख्ययाऽष्टाविंशतौ द्वौ भङ्गौ। ततो भाषया पर्याप्तस्योच्छ्वाससहितायामष्टाविंशतौ सुस्वरे क्षिप्ते एकोनत्रिंशत्, इहाप्येक एव भङ्गः, अथवा प्राणापानेन पर्याप्तस्य स्वरेऽनुदिते उद्योते तूदिते एकोनत्रिंशत्, इहाप्येक एव भङ्गः, सर्वसङ्ख्ययैकोनत्रिंशति द्वौ। ततो भाषापर्याप्तस्य सुस्वरसहितायामेकोनत्रिंशत्युद्योते क्षिप्ते त्रिंशत्, इहैको भङ्गः। सर्वसङ्ख्ययाऽऽहारकशरीरिणां सप्त भङ्गाः। केवलिनामुदयस्थानानि दश, तद्यथा—विंशतिरेकविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशन्नवाष्टौ च। तत्र मनुष्यगतिः पञ्चेन्द्रियजातिस्त्रसं बादरं पर्याप्तं सुभगमादेयं यशःकीर्त्तिरित्येता अष्ट ध्रुवोदयिनीभिर्द्वादशभिः सह विंशतिः, इहाप्येक एव भङ्गः एषा चातीर्थकृत्केवलिनः समुद्घातगतस्य कार्मणयोगे वर्त्तमानस्यावसेया। सैव विंशतिस्तीर्थकरसहितैकविंशतिः, इहाप्येको भङ्गः, एषा च तीर्थकृत्केवलिनः समुद्घातगतस्य कार्मणकाययोगवर्तिनो द्रष्टव्या। तस्यामेव विंशतौ औदारिकद्विकं षण्णामेकतमं संस्थानमाद्यसंहननं प्रत्येकमुपघातमिति षट्कं प्रक्षिप्यते, ततः षड्विंशतिर्भवति, एषा चातीर्थकृत्केवलिन औदारिकमिश्रकाययोगे वर्त्तमानस्यावसेया, अत्र षड्भिः संस्थानैः षड्भङ्गाः स्युः, परं सामान्यमनुष्योदयस्थानेष्वपि सम्भवन्तीति पृथग् न गण्यन्ते। एषैव षड्विंशतिस्तीर्थकरसहिता सप्तविंशतिः स्यात्, एषा तीर्थकृत औदारिकमिश्रकाययोगस्थस्यावसेया, अत्र संस्थानं समचतुरस्रमेवेत्येक एव भङ्गः। सैव षड्विंशतिः पराघातोच्छ्वासान्यतरगत्यन्यतरस्वरसहिता त्रिंशत्, एषा चातीर्थकरस्य सयोगिकेवलिन औदारिककाययोगवर्त्तिनोऽवगन्तव्या, अत्र संस्थानषट्कप्रशस्ताप्रशस्तखगतिसुस्वरदुःस्वरैर्भङ्गाश्चतुर्विंशतिः,

ते च सामान्यमनुष्योदयस्थानेष्वपि लभ्यन्ते इति पृथङ्न गण्यन्ते। एषैव त्रिंशत्तीर्थकरनामसहितैकत्रिंशद्भवति, सा च सयोगिकेवलिनस्तीर्थकरस्यौदारिककाययोगवर्त्तिन एकभङ्गाऽवधारणीया। एषैवैकत्रिंशद्वाग्योगे निरुद्धे त्रिंशत्, तत उच्छ्वासे निरुद्धे एकोनत्रिंशत्। अतीर्थकरकेवलिनः प्रागुक्ता त्रिंशद्वाग्योगे निरुद्धे एकोनत्रिंशत्। अत्र षड्भिः संस्थानैः प्रशस्ताप्रशस्तविहायोगतिभ्यां च द्वादश भङ्गाः, परं प्राग्वत् पृथङ्न गण्यन्ते। तत उच्छ्वासे निरुद्धेऽष्टाविंशतिः, अत्रापि द्वादश भङ्गाः प्राग्वत्, प्राग्वदेव च सामान्यमनुष्योदयस्थानग्रहणगृहीतत्वात् पृथङ्न गण्यन्ते। तथा मनुष्यगतिः पञ्चेन्द्रियजातिस्त्रसबादरपर्याप्तसुभगादेयानि यशःकीर्त्तिस्तीर्थकरं चेति नव, एतदुदयस्थानं तीर्थकृदयोगिकेवलिनश्चरमसमयवर्त्तिनो लभ्यते। तथा स एव नवोदयोऽतीर्थकरकेवलिनस्तीर्थकरनामरहितोऽष्टोदयः। सर्वसङ्ख्यया सामान्यतीर्थकरसयोग्ययोगिकेवलिभङ्गा द्विषष्टिः, किंतु ये सामन्यकेवलिनो भङ्गाः षड्विंशतौ षट्, अष्टाविंशतौ द्वादश, एकोनत्रिंशति द्वादश, त्रिंशति चतुर्विंशतिः, सर्वसङ्ख्यया चतुःपञ्चाशत्, ते सामान्यमनुष्योदयस्थानान्तःपातित्वात् पृथङ्ग गण्यन्ते इति। शेषा अष्टावेवोदयभङ्गाः परमार्थतः केवलिनां द्रष्टव्याः। तत्र विंशत्यष्टकयोर्भङ्गावतीर्थकृतः, एकविंशतिसप्तविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशन्नवगताश्च षड्भङ्गास्तीर्थकृत इति विवेकः। सर्वसङ्ख्यया मनुष्याणामुदयस्थानभङ्गाः द्वे सहस्रे षट् शतानि द्विपञ्चाशच्च। तदेवमुक्तानि मनुष्याणामुदयस्थानानि।

अथ देवानामुच्यन्ते—देवानामुदयस्थानानि षट्, तद्यथा—एकविंशतिः पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशच्च। तत्र देवद्विकं पञ्चेन्द्रियजातिस्त्रसं बादरं पर्याप्तं सुभगदुर्भगयोरेकतरं यशःकीर्त्ययशःकीर्त्योरेकतरमिति नव

प्रागुक्तान्निर्घादशभिर्ध्रुवोदयिनीभिः सहितैकविंशतिः, अत्र सुभगदुर्भगादेयानादेययशःकीर्त्ययशःकीर्तिभिरष्टौ भङ्गाः, इह च दुर्भगानादेययशःकीर्त्तीनामुदयः पिशाचादीनामवसेयः । ततः शरीरस्थस्य वैक्रियद्विकमुपघातं प्रत्येकं समचतुरस्रमिति पञ्च प्रकृतयः क्षिप्यन्ते देवानुपूर्वी चापनीयते, ततो जाता पञ्चविंशतिः, अत्रापि भङ्गास्तथैवाष्टौ । ततः शरीरेण पर्याप्तस्य पराघाते प्रशस्तविहायोगतौ च क्षिप्तायां सप्तविंशतिः, अत्रापि भङ्गाः प्राग्वदष्टौ । देवानामप्रशस्तविहायोगतेरुदयो न भवतीति तदाश्रिता विकल्पा न लभ्यन्ते । ततः प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्तेऽष्टाविंशतिः, अत्रापि प्राग्वदष्टौ भङ्गाः, अथवा शरीरेण पर्याप्तस्योच्छ्वासेऽनुदिते उद्योते तूदितेऽष्टाविंशतिः, इहापि भङ्गाः प्राग्वदष्टौ, सर्वसङ्ख्ययाऽष्टाविंशतौ भङ्गाः षोडश । ततो भाषापर्याप्तस्य सुस्वरे क्षिप्ते एकोनत्रिंशत्, इहापि भङ्गाः प्राग्वदष्टौ । दुःस्वरोदया देवा न भवन्तीति तदाश्रितविकल्पा न भवन्ति, अथवा प्राणापानेन पर्याप्तस्य सुस्वरेऽनुदिते उद्योते तूदिते एकोनत्रिंशत्, उत्तरवैक्रियं हि कुर्वतो देवस्योद्योतोदयो लभ्यते, अत्रापि प्राग्वदष्टौ भङ्गाः, सर्वसङ्ख्ययैकोनत्रिंशति षोडश भङ्गाः । ततो भाषापर्याप्तस्य सुस्वरसहितायामेकोनत्रिंशत्युद्योते क्षिप्ते त्रिंशत्, अत्रापि भङ्गाः प्राग्वदष्टौ । सर्वसङ्ख्यया देवानां भङ्गाश्चतुःषष्टिः । तदेवमुक्तानि देवानामुदयस्थानानि, अथ नैरयिकाणामुच्यन्ते—तत्र नैरयिकाणामुदयस्थानानि पञ्च, तद्यथा—एकविंशतिः पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत् । तत्र नरकद्विकं पञ्चेन्द्रियजातिस्त्रसबादरपर्याप्तानि दुर्भगमनादेयमयशःकीर्त्तिश्चेत्येता नव द्वादशसङ्ख्यान्निर्ध्रुवोदयिनीभिः सहिता एकविंशतिः, अत्र सर्वाण्यपि पदान्यप्रशस्तान्येवेत्येक एव भङ्गः, एवमन्यत्रापि ज्ञेयं । ततः शरीरस्थस्य वैक्रियद्विकं प्रत्येकं हुण्डमुपघातमिति पञ्च प्रकृतयः

क्षिप्यन्ते नरकानुपूर्वी चापनीयते, ततो जाता पञ्चविंशतिः । ततः शरीरेण पर्याप्तस्य पराघातेऽप्रशस्तखगतौ च प्रक्षिप्तायां सप्तविंशतिः । ततः प्राणापानेन पर्याप्तस्योच्छ्वासे क्षिप्तेऽष्टाविंशतिः । ततो भाषापर्याप्तस्य दुःस्वरे क्षिप्ते एकोनत्रिंशत् । सर्वसङ्ख्यया नैरयिकेषु भङ्गाः पञ्च । समग्रोदयस्थानभङ्गाः पुनः सप्तसप्ततिशतान्येकनवत्यधिकानि ।

अथ नामप्रकृतीनामेव गुणस्थानके उदयव्यवच्छेदश्चिन्त्यते—इह मिथ्यादृष्टिगुणस्थाने नानाजीवानपेक्ष्य तीर्थकराहारकद्विकवर्जितानां सर्वासामपि नामप्रकृतीनां चतुःषष्टिसङ्ख्यानामुदयः संभवति । तत्र साधारणसूक्ष्मापर्याप्तातपानां मिथ्यादृष्टावुदयो व्यवच्छिद्यते । व्यवच्छेदो नाम तत्र भाव उत्तरत्राभावः । तथा सासादने स्थावरैकेन्द्रियविकलेन्द्रियजातीनामुदयव्यवच्छेदः, इह पूर्वोक्तानां साधारणादीनामुदयासंभवात् षष्टिप्रकृतीनामुदयः । सम्यग्मिथ्यादृष्टौ च स्थावरादिपञ्चप्रकृतीनां सासादने व्यवच्छिन्नानामुदयो न भवति, तथा तस्य कालकरणाभावेनानुपूर्वीणामप्युदयो न भवतीत्येकपञ्चाशत्प्रकृतीनामुदयः । अविरतसम्यग्दृष्टिस्त्वपान्तरालगतावपि प्राप्यत इति तत्र चतसृणामप्यानुपूर्वीणामुदयः संभवतीति ततस्तत्र पञ्चपञ्चाशत्प्रकृतीनामुदयः । देवद्विकनरकद्विकवैक्रियद्विकदुर्भगानादेययशःकीर्त्तितिर्यङ्मनुष्यानुपूर्वीणां सर्वसङ्ख्ययैकादशप्रकृतीनामत्रोदयव्यवच्छेदः । अत्र च वैक्रियद्विकस्य निषेधः कर्मस्तवस्याभिप्रायेण, न तु पञ्चसङ्ग्रहस्य, तन्मते देशविरतप्रमत्ताप्रमत्तेषु तदुदयाभ्युपगमादिति स्मर्त्तव्यं । ततो देशविरते चतुश्चत्वारिंशत्प्रकृतीनामुदयः, अत्र तिर्यग्गत्युद्योतनाम्नोरुदयव्यवच्छेदः । ततः प्रमत्तसंयतेऽप्रमत्तसंयते च द्विचत्वारिंशत्प्रकृतीनामाहारकद्विकस्य चाधिकस्योदयो द्रष्टव्यः । इहान्तिमानां त्रयाणां संहननानामुदयव्यवच्छेदः, तथाऽऽहारकद्विकमपि श्रेण्यामुदये न प्राप्यत इत्यपूर्वकरणा-

दिषूपशान्तमोहपर्यवसानेष्वेकोनचत्वारिंशत्प्रकृतीनामुदयोऽवगन्तव्यः । उपशान्तमोहे द्वितीयतृतीयसंहननयोरुदयव्यच्छेदः तेन क्षीणकषाये सयोगिकेवलिनि च शेषाणां सप्तत्रिंशत्प्रकृतीनामेवोदयो भवति, क्वचित् सयोगिकेवलिनि तीर्थकरनाम्नोऽपि, तत्र च नामध्रुवोदयद्वादशकस्वरद्विकखगतिद्विकौदारिकद्विकप्रत्येकोपघातपराघातोच्छ्वाससंस्थानषट्कादयसंहननलक्षणानामेकोनत्रिंशत्प्रकृतीनामुदयव्यवच्छेदः । ततोऽयोगिकेवलिनि अष्टानां नवानां वोदयः, ताश्चोक्ता एव । तदेवं चिन्ततो गुणस्थानकेषु नामोदयव्यवच्छेदः, तच्चिन्तनाच्चाभिहितः सप्रपञ्चमुदयः ।

अथ नाम्नः सत्तास्थानान्युच्यन्ते, तानि च द्वादश, तत्र सर्वनामप्रकृतिसमुदायः पिण्डः, स त्रिनवतिप्रमाण इहाधिक्रियते, तथाविवक्षणात्, तत्प्रथमं सत्तास्थानं । तस्मिँस्तीर्थकरोने द्विनवतिप्रकृत्यात्मकं द्वितीयं । आहारकशरीराहारकोपाङ्गाहारकबन्धनाहारकसङ्घातरूपप्रकृतिचतुष्टयहीने च तस्मिँस्तृतीयमेकोननवतिप्रकृत्यात्मकं । तीर्थकराहारकचतुष्टयोभयविहीने च तस्मिन्नष्टाशीतिप्रकृत्यात्मकं चतुर्थं । इदं प्रथमं सत्तास्थानचतुष्कं । तस्मात्प्रकृतित्रयोदशके क्षीणेऽशीत्येकोनाशीतिषट्सप्ततिपञ्चसप्ततिलक्षणं द्वितीयं सत्तास्थानचतुष्कं भवति । ततोऽष्टाशीतेः सुरद्विके नरकद्विके वोद्वलिते षण्णवतिः । अष्टाशीतेर्वैक्रियचतुष्टयदेवद्विकनरकद्विकेषूद्वलितेष्वशीतिः । ततो मनुष्यद्विके उद्वलितेऽष्टसप्ततिः । एतानि त्रीण्यपि सत्तास्थानानि अध्रुवसंज्ञानि । तथा नवकं सत्तास्थानमष्टकं च । यद्यप्येवं गणनया त्रयोदश सत्तास्थानानि प्राप्नुवन्ति तथाप्यशीत्यात्मकं सत्तास्थानं द्विप्रकारमपि तुल्यसङ्ख्यत्वादेकमेव विवक्षयत इत्यदोषः । तदेवं द्वादशापि सत्तास्थानानि सप्ततिकाभिप्रायेण व्याख्यातानि, प्रकृतग्रन्थाद्यभिप्रायेण तु त्र्युत्तरशतादीनि व्याख्येयानि । अत्र यान्त्रयोदश

प्रकृतयः क्षीणाः सत्यो द्वितीयचतुष्कनिष्पादिकास्ता इमाः—स्थावरद्विकं तिर्यग्द्विकमातपमेकद्वित्रिचतुरिन्द्रियजातयः साधारणं नरकद्विकमुद्योतं चेति, एतास्वाद्या दश एकान्ततिर्यग्योग्या इष्यन्ते, तथात्वं चोदयमुदीरणां चाश्रित्य द्रष्टव्यं, बन्धसत्तापेक्षया तासामन्येषामपि योग्यत्वात्। एतेष्वध्रुवसत्तास्थानस्वामिन उच्यन्ते—पृथिव्यम्बुवनस्पतिषु षण्णवत्यशीत्यात्मके द्वे अध्रुवसत्तास्थाने प्राप्येते, तृतीयं त्वष्टसप्तत्यात्मकं तेजोवायुषु प्राप्यते, नान्येषु, तेषामेव मनुष्यद्विकोद्वलकत्वात्, अथवा तेजोवायुन्य उद्धृत्यैकेन्द्रियादिषु तिर्यक्पञ्चेन्द्रियपर्यन्तेषु समागतस्य कियत्कालं लभ्यते यावन्नाद्यापि मनुष्यद्विकं बध्नाति, तेजोवायुन्य उद्धृत्य मनुष्यादिषु गमनासंभवात् तिर्यक्पञ्चेन्द्रियपर्यवसानानुधावनं। अथ गतिषु सत्तास्थानानि प्ररूप्यन्ते—तत्र नरकगतौ त्रीणि सत्तास्थानानि—द्विनवतिरेकोननवतिरष्टाशीतिश्च, त्रिनवतिस्तु न प्राप्यते, तस्यास्तीर्थकराहारकद्विकसहितत्वात् तदुभयसत्कर्मणश्च नरकेषूत्पादप्रतिषेधात्। देवगतौ प्रथमसत्तास्थानचतुष्कं प्राप्यते, न शेषाणि, शेषाणामेकेन्द्रियादिषु क्षपकश्रेण्यां वा संभवात्। तिर्यक्षु यानि मिथ्यादृष्टौ वक्ष्यन्ते तान्येव तीर्थकरसहितानि प्राप्यन्ते एकोननवतिरहितानीतियावत्। मनुष्यगतौ त्वष्टसप्ततिस्थानं वर्जयित्वा शेषाणि सर्वाण्यपि द्रष्टव्यानि।

अथ गुणस्थानेषु चिन्त्यन्ते—मिथ्यादृष्टिगुणस्थाने प्रथमसत्तास्थानहीनप्रथमचतुष्काध्रुवसंज्ञकत्रिकलक्षणानि ९२–८९–८८–८६–८०–७८ षट् सत्तास्थानानि, त्रिनवतिस्तु तीर्थकराहारकसत्कर्मणो मिथ्यात्वगमनप्रतिषेधान्न भवति। सासादने मिश्रे च द्विनवत्यष्टाशीतिलक्षणे द्वे सत्तास्थाने। अविरतसम्यग्दृष्टौ देशविरतप्रमत्ताप्रमत्तापूर्वकरणेषु प्रथमसत्तास्थानचतुष्कं

भवति । अनिवृत्तिबादरसम्पराये सूक्ष्मसम्पराये च प्रथमसत्तास्थानचतुष्कं द्वितीयसत्तास्थानचतुष्कं चेति प्रत्येकमष्टावष्टौ सत्तास्थानानि, तत्राद्यानि चत्वार्युपशमश्रेण्यां, उत्तराणि तु चत्वारि क्षपकश्रेण्यां प्रकृतित्रयोदशकक्षये । उपशान्तमोहे तु प्रथमसत्तास्थानचतुष्कमेव । क्षीणमोहे सयोगिकेवलिनि च द्वितीयसत्तास्थानचतुष्कमेव । अयोगिकेवलिनि च षट् सत्तास्थानानि द्वितीयसत्तास्थानचतुष्कं नवाष्टौ च, तत्र द्वितीयसत्तास्थानचतुष्कं नानाजीवापेक्षया द्विचरमसमयं यावत्, चरमसमये तु तीर्थकरातीर्थकरावधिकृत्य नवाष्टाविति । तदेवं गुणस्थानेष्वभिहितानि सत्तास्थानानि । अथ बन्धोदयसत्तास्थानानां परस्परं संवेध उच्यते—तत्र त्रयोविंशतिबन्धे पञ्चविंशतिबन्धे षड्विंशतिबन्धे च प्रत्येकं नव नवोदयस्थानानि पञ्च पञ्च सत्तास्थानानि । तत्र त्रयोविंशतिबन्धोऽपर्याप्तैकेन्द्रियप्रायोग्य एव, तद्बन्धकाश्चैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियतिर्यक्पञ्चेन्द्रिया मनुष्याश्च । एतेषां त्रयोविंशतिबन्धकानां यथायोगं सामान्येन नवोदयस्थानानि, तद्यथा—एकविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशत् । तत्रैकविंशत्युदयोऽपान्तरालगतौ वर्त्तमानानामेकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्याणां ज्ञेयः, तेषामपर्याप्तकैकेन्द्रियप्रायोग्यबन्धसंभवात् । चतुर्विंशत्युदयोऽपर्याप्तपर्याप्तैकेन्द्रियाणां,अन्यत्र चतुर्विंशत्युदयस्याप्राप्यमाणत्वात् । पञ्चविंशत्युदयः पर्याप्तैकेन्द्रियाणां वैक्रियतिर्यङ्मनुष्याणां च मिथ्यादृष्टीनां । षड्विंशत्युदयः पर्याप्तैकेन्द्रियाणां पर्याप्तापर्याप्तद्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्याणां च मिथ्यादृष्टीनां । सप्तविंशत्युदयः पर्याप्तैकेन्द्रियाणां वैक्रियतिर्यङ्मनुष्याणां च मिथ्यादृष्टीनां।अष्टाविंशत्येकोनत्रिंशत्त्रिंशदुदयाः पर्याप्तद्वित्रिचतुरिन्द्रियाणां तिर्यक्पञ्चेन्द्रियमनुष्याणां च मिथ्यादृष्टीनां । एकत्रिंशदुदयो विकलेन्द्रि-

यतिर्यक्पञ्चेन्द्रियाणां मिथ्यादृष्टीनां । उक्तशेषास्त्रयोविंशतिबन्धका न लभन्ते । तेषां त्रयोविंशतिबन्धकानां सामान्येन पञ्च सत्तास्थानानि, तद्यथा—द्विनवतिरष्टाशीतिः षण्मशीतिरशीतिरष्टसप्ततिश्च । तत्रैकविंशत्युदये वर्त्तमानानां सर्वेषामपि पञ्चापि सत्तास्थानानि । नवरं मनुष्याणामष्टसप्ततिवर्जानि चत्वारि, यतोऽष्टसप्ततिर्मनुष्यद्विके उद्वलिते प्राप्यते, न च मनुष्याणां तदुद्वलनसंभवः । चतुर्विंशत्युदयेऽपि पञ्च सत्तास्थानानि, केवलं वायुकायिकस्य वैक्रियं कुर्वतश्चतुर्विंशत्युदये वर्त्तमानस्याशीत्यष्टसप्ततिवर्जानि त्रीणि वाच्यानि, यतस्तस्य वैक्रियषट्कं मनुष्यद्विकं च नियमादस्ति, यतोऽसौ वैक्रियद्विकं साक्षादनुभवत्येवेति न तदुद्वलयति, तदभावादेवद्विकनरकद्विके अपि नोद्वलयति, तथास्वाभाव्येन वैक्रियषट्कस्य समकालमुद्वलनसंभवात्, वैक्रियषट्के चोद्वलिते सति पश्चान्मनुष्यद्विकमुद्वलयति, न पूर्वं, ततोऽष्टसप्तत्यशीतिसत्तास्थानासंभवः । पञ्चविंशत्युदये पञ्चापि सत्तास्थानानि, तत्राष्टसप्ततिरवैक्रियवायुकायिकतेजस्कायिकानधिकृत्य प्राप्यते, नान्यान्, यतस्तेजस्कायिकवायुकायिकवर्जोऽन्यः सर्वोऽपि पर्याप्तको नियमान्मनुष्यगतिमनुष्यानुपूर्व्यौ बध्नाति,ततोऽन्यत्राष्टसप्ततिर्न प्राप्यते। षड्विंशत्युदयेऽपि पञ्चापि सत्तास्थानानि, तत्राष्टासप्ततिरवैक्रियवायुकायिकतैजसकायिकानां द्वित्रिचतुःपञ्चेन्द्रियाणां वा तेजोवायुभवादनन्तरमागतानां पर्याप्तापर्याप्तानां, ते हि यावन्मनुष्यगतिमनुष्यानुपूर्व्यौ न बध्नन्ति तावत्तेषामष्टसप्ततिः प्राप्यते, नान्येषां। सप्तविंशत्युदयेऽष्टसप्ततिवर्जानि चत्वारि सत्तास्थानानि, सप्तविंशत्युदयो हि तेजोवायुवर्जपर्याप्तबादरैकेन्द्रियवैक्रियतिर्यङ्मनुष्याणां, तेषु चावश्यं मनुष्यद्विकसंभवादष्टसप्ततिर्नावाप्यते । अथ कथं तेजोवायूनां सप्तविंशत्युदयो न भवति येन तदर्जनं क्रियते? उच्यते—सप्तविंशत्युदय एकेन्द्रियाणामातपोद्योतान्यतरप्रक्षेपे भवति, न च तेजो-

वायुष्वातपोद्योतोदयसंभव इति तद्वर्जनं । अष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशदुदयेषु नियमादृष्टसप्ततिवर्जानि चत्वारि चत्वारि सत्तास्थानानि, अष्टाविंशत्याद्युदया हि पर्याप्तविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्याणां, एकत्रिंशदुदयश्च पर्याप्तविकलेन्द्रियाणां पञ्चेन्द्रियतिरश्चां च, ते चावश्यं मनुजद्विकसत्कर्माण इति। तदेवं त्रयोविंशतिबन्धकानां यथायोगं नवाप्युदयस्थानान्यधिकृत्य चत्वारिंशत्सत्तास्थानानि भवन्ति । पञ्चविंशतिषड्विंशतिबन्धकानामप्येवमेव, नवरं पर्याप्तैकेन्द्रियपञ्चेन्द्रियप्रायोग्यपञ्चविंशतिषड्विंशतिबन्धकानां देवानामेकविंशतिपञ्चविंशतिसप्तविंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंशद्रूपेषु षट्सूदयस्थानेषु द्विनवतिरष्टाशीतिश्चेति द्वे द्वे सत्तास्थाने वाच्ये । अपर्याप्तविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यप्रायोग्यां तु पञ्चविंशतिं देवा न बध्नन्ति, अपर्याप्तेषु विकलेन्द्रियेषु च मध्ये देवानामनुत्पादात् । सामान्येन पञ्चविंशतिबन्धे षड्विंशतिबन्धे च प्रत्येकं नवाप्युदयस्थानानि प्रतीत्य चत्वारिंशच्चत्वारिंशत्सत्तास्थानानि । तथाऽष्टाविंशतौ बध्यमानायामष्टावुदयस्थानानि, तद्यथा—एकविंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्च । इहाष्टाविंशतिर्द्वेधा देवगतिप्रायोग्या नरकगतिप्रायोग्या च, तत्र देवगतिप्रायोग्याया बन्धेऽष्टावप्युदयस्थानानि नानाजीवापेक्षया प्राप्यन्ते, नरकगतिप्रायोग्यायास्तु बन्धे त्रिंशदेकत्रिंशच्चेति द्वे, तत्र देवगतिप्रायोग्याष्टाविंशतिबन्धकानामेकविंशत्युदयः क्षायिकसम्यग्दृष्टीनां वेदकसम्यग्दृष्टीनां वा पञ्चेन्द्रियतिर्यङ्मनुष्याणामपान्तराल्गतौ वर्त्तमानानामवसेयः, न मिथ्यादृष्टेः, यतो भवादौ सर्वपर्याप्तिपर्याप्त एव मिथ्यादृष्टिर्देवगतिप्रायोग्याऽष्टाविंशतिबन्धकः । एकविंशतिपञ्चविंशतिषड्विंशतिसप्तविंशत्यष्टाविंशत्येकोनत्रिंशदुदयवर्ती चापर्याप्त एवेति । वैक्रियतिर्यङ्मनुष्याणां(आहारकशरीरिणां) च पञ्चविंशत्याद्युदये (२५-२७-२८-२९)वर्त्तमानानां

मिथ्यादृष्टीनां यद्देवगतिप्रायोग्याष्टाविंशतिबन्धकत्वं वक्ष्यते तन्नवादौ पूरितपर्याप्तिकस्यापि पश्चाद्वैक्रियाङ्गनिष्पत्तिकाले औदारिकादितनुनिवृत्तौ पर्याप्त्युदयनिवृत्तिमन्निप्रेत्येत्यदोष इति स्मर्त्तव्यं। पञ्चविंशत्युदय आहारकसंयतानां वैक्रियतिर्यञ्चमनुष्याणां च सम्यग्दृष्टीनां मिथ्यादृष्टीनां वा। षड्विंशत्युदयः क्षायिकसम्यग्दृष्टीनां वेदकसम्यग्दृष्टीनां वा पञ्चेन्द्रियतिर्यञ्चमनुष्याणां शरीरस्थानां। सप्तविंशत्युदय आहारकसंयतानां वैक्रियतिर्यञ्चमनुष्याणां च सम्यग्दृष्टीनां मिथ्यादृष्टीनां वा। अष्टाविंशत्येकोनत्रिंशदुदयावपि यथाक्रमं शरीरपर्याप्त्या पर्याप्तानां तिर्यञ्चमनुष्याणां क्षायिकसम्यग्दृष्टीनां वेदकसम्यग्दृष्टीनां वा, तथाऽऽहारकसंयतानां वैक्रियतिर्यञ्चमनुष्याणां तु सम्यग्दृष्टीनां मिथ्यादृष्टीनां चावसेयौ। त्रिंशदुदयस्तिर्यञ्चमनुष्याणां सम्यग्दृष्टीनां मिथ्यादृष्टीनां सम्यङ्मिथ्यादृष्टीनां च, तथाऽऽहारकसंयतानां वैक्रियसंयतानां च । एकत्रिंशदुदयः पञ्चेन्द्रियतिरश्चां सम्यग्दृष्टीनां मिथ्यादृष्टीनां वा । नरकगतिप्रायोग्यां त्वष्टाविंशतिं बध्नतां त्रिंशदुदयः पञ्चेन्द्रियतिर्यञ्चमनुष्याणां मिथ्यादृष्टीनां, एकत्रिंशदुदयः पञ्चेन्द्रियतिरश्चां मिथ्यादृशां । अष्टाविंशतिबन्धकानां सामान्येन चत्वारि सत्तास्थानानि—द्विनवतिरेकोननवतिरष्टाशीतिः षण्णशीतिश्च । तत्रैकविंशत्युदये वर्त्तमानानां देवगतिप्रायोग्याष्टाविंशतिबन्धकानां द्विनवत्यष्टाशीतिलक्षणे द्वे सत्तास्थाने, एकविंशत्युदयस्थस्य तीर्थकरनामसत्कर्मणस्तद्बन्धोऽप्यवश्यं भावीत्येकोनत्रिंशद्बन्धकता स्यादिति । देवगतिप्रायोग्याष्टाविंशतिबन्धकस्यैकविंशत्युदये न त्रिनवतिसत्ता । पञ्चविंशत्युदयेऽप्यष्टाविंशतिबन्धकानामाहारकसंयतवैक्रियतिर्यञ्चमनुष्याणां सामान्येन ते एव द्वे सत्तास्थाने, तत्राहारकसंयतो नियमादाहारकसत्कर्मेति तस्य द्विनवतिरेव सत्तास्थानं, शेषाश्च तिर्यञ्चो मनुष्या वाऽऽहारकसत्कर्माणस्तद्रहिताश्च भवन्ति, ततस्तेषां द्वे

अपि सत्तास्थाने । षड्विंशतिसप्तविंशत्यष्टाविंशत्येकोनत्रिंशदुदयेष्वप्येते एव द्वे सत्तास्थाने । त्रिंशदुदये देवगतिनरकगतिप्रायोग्याष्टाविंशतिबन्धकानां सामान्येन चत्वारि सत्तास्थानानि, तद्यथा—द्विनवतिरेकोननवतिरष्टाशीतिः षण्मशीतिश्च । तत्र द्विनवतिरष्टाशीतिश्च प्राग्वद्भावनीया । एकोननवतिस्त्वेवं—कश्चिन्मनुष्यस्तीर्थकरनामसत्कर्मा वेदकसम्यग्दृष्टिः प्राग्बद्धनरकायुष्को नरकगमनाभिमुखः सम्यक्त्वात् प्रच्युत्य मिथ्यात्वं गतः, तस्य तदा तीर्थकरनामबन्धाभावात् नरकगतिप्रायोग्यामष्टाविंशतिं बध्नत एकोननवतिः । षण्मशीतिश्चैवं—इह तीर्थकराहारकचतुष्टयदेवद्विकनरकद्विकवैक्रियचतुष्टयरहिता त्रिनवतिरशीतिर्भवति, ततस्तावत्सत्कर्मा पञ्चेन्द्रियतिर्यङ्मनुष्यो वा जातः सन् सर्वाभिः पर्याप्तिभिः पर्याप्तो यदि विशुद्धस्ततो देवगतिप्रायोग्यामष्टाविंशतिं बध्नाति, तद्बन्धे च देवद्विकं वैक्रियचतुष्टयं च सत्तायां प्राप्यत इति तस्य षण्मशीतिः । अथ सर्वसंक्लिष्टस्ततो नरकगतिप्रायोग्यामष्टाविंशतिं बध्नाति, तद्बन्धे च नरकद्विकं वैक्रियचतुष्टयं चावश्यं सत्तायां प्राप्यत इत्येवमपि तस्य षण्मशीतिः । एकत्रिंशदुदये द्विनवतिरष्टाशीतिः षण्मशीतिश्चेति त्रीणि सत्तास्थानानि । एकोननवतिरिह न प्राप्यते, एकत्रिंशदुदयस्य पञ्चेन्द्रियतिर्यक्षु प्राप्तेस्तत्र च तीर्थकरनामसत्ताप्रतिषेधात् । षण्मशीतिस्थानभावना तु प्राग्वदेव । तदेवमष्टाविंशतिबन्धकानामष्टस्वप्युदयस्थानेष्वेकोनविंशतिः सत्तास्थानानि । एकोनत्रिंशति त्रिंशति च बध्यमानायां प्रत्येकं नव नवोदयस्थानानि सप्त सप्त च सत्तास्थानानि । तत्रोदयस्थानान्यमूनि—एकविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्च । तत्रैकविंशत्युदयस्तिर्यङ्मनुष्यप्रायोग्यामेकोनत्रिंशतं बध्नतां पर्याप्तापर्याप्तैकेन्द्रियविकलेन्द्रियपञ्चेन्द्रियतिर्यङ्मनुष्याणां देवनैरयिकाणां च । चतु-

विंशत्युदयः पर्याप्तापर्याप्तैकेन्द्रियाणां । पञ्चविंशत्युदयः पर्याप्तैकेन्द्रियाणां देवनैरयिकाणां वैक्रियतिर्यङ्मनुष्याणां च मिथ्यादृष्टीनां । षड्विंशत्युदयः पर्याप्तैकेन्द्रियाणां पर्याप्तापर्याप्तविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्याणां च । सप्तविंशत्युदयः पर्याप्तैकेन्द्रियाणां देवनैरयिकाणां वैक्रियतिर्यङ्मनुष्याणां च मिथ्यादृष्टीनां । अष्टाविंशत्युदय एकोनत्रिंशदुदयश्च विकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्याणां वैक्रियपञ्चेन्द्रियतिर्यङ्मनुष्यदेवनैरयिकाणां च । त्रिंशदुदयो विकलेन्द्रियतिर्यक्-पञ्चेन्द्रियमनुष्याणां देवानां चोद्योतवेदकानां । एकत्रिंशदुदयः पर्याप्तविकलेन्द्रियतिर्यक्पञ्चेन्द्रियाणामुद्योतवेदकानां । तथा देवगतिप्रायोग्यामेकोनत्रिंशतं बध्नतो मनुष्यस्याविरतसम्यग्दृष्टेरुदयस्थानानि सप्त, तद्यथा—एकविंशतिः पञ्चविं-शतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशात्रिंशच्च । आहारकसंयतानां वैक्रियसंयतानां चेमानि पञ्चोदयस्थानानि तद्यथा—पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशात्रिंशत् । असंयतानां संयतासंयतानां च वैक्रियं कुर्वतां मनुष्याणां त्रिंशद्वर्जानि चत्वार्युदयस्थानानि । त्रिंशद्वर्जनं च संयतान्मुक्त्वाऽन्येषां मनुष्याणां वैक्रियमपि कुर्वतामुद्योतोदयाभावात् । सामान्येनैकोनत्रिंशद्बन्धे सप्त सत्तास्थानानि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिः षण्मशीतिरशीतिरष्टसप्ततिश्च । तत्र विकलेन्द्रियतिर्यक्पञ्चेन्द्रियप्रायोग्यामेकोनत्रिंशतं बध्नतां पर्याप्तापर्याप्तैकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियाणामेक-विंशत्युदये वर्त्तमानानां पञ्च पञ्च सत्तास्थानानि—द्विनवतिरष्टाशीतिः षण्मशीतिरशीतिरष्टसप्ततिश्च । एवं चतुर्विंशति-पञ्चविंशतिषड्विंशत्युदयेष्वपि वक्तव्यं । सप्तविंशत्यष्टाविंशत्येकोनत्रिंशत्रिंशदेकत्रिंशदुदयेष्वष्टसप्ततिवर्जानि चत्वारि चत्वारि सत्तास्थानानि, भावना त्रयोविंशतिबन्धकानां प्राग्यथा कृता तथाऽत्रापि कार्या । मनुजगतिप्रायोग्यामेकोनत्रिं-

शतं बध्नतामेकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियाणां, तिर्यग्गतिमनुष्यगतिप्रायोग्यां पुनर्बध्नतां मनुष्याणां च स्वस्वोदयस्थानेषु यथायोगं वर्त्तमानानामष्टसप्ततिवर्जानि तान्येव चत्वारि चत्वारि सत्तास्थानानि । देवनैरयिकाणां तिर्यक्पञ्चेन्द्रियमनुष्यगतिप्रायोग्यामेकोनत्रिंशतं बध्नतां स्वस्वोदयेषु वर्त्तमानानां द्वे द्वे सत्तास्थाने द्विनवतिरष्टाशीतिश्चेति । केवलं नैरयिकस्य मिथ्यादृष्टेस्तीर्थकरसत्कर्मणो मनुष्यगतिप्रायोग्यामेकोनत्रिंशतं बध्नतः स्वोदयेषु पञ्चसु यथायोगं वर्त्तमानस्यैकोननवतिरेवैका वक्तव्या, तीर्थकरनामसहितस्याहारकचतुष्टयरहितस्यैव मिथ्यात्वगमनसंभवात् त्रिनवतेराहारकचतुष्टयेऽपनीते एकोननवतेरेव संभवात् । देवगतिप्रायोग्यामेकोनत्रिंशतं तीर्थकरनामसहितां बध्नतः पुनरविरतसम्यग्दृष्टेर्मनुष्यस्यैकविंशत्युदये वर्त्तमानस्य द्वे सत्तास्थाने त्रिनवतिरेकोननवतिश्च । एवं पञ्चविंशतिषड्विंशतिसप्तविंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंशदुदयेष्वपि एते एव द्वे सत्तास्थाने वाच्ये । आहारकसंयतानां तु स्वस्वोदये वर्त्तमानानामेकमेव त्रिनवतिरूपं सत्तास्थानं ज्ञेयं । तदेवं सामान्येनैकोनत्रिंशद्बन्धे एकविंशत्युदये सत्तास्थानानि पञ्च,(सप्त)चतुर्विंशत्युदये पञ्च, पञ्चविंशत्युदये सप्त, षड्विंशत्युदये सप्त, सप्तविंशत्युदये षट्, अष्टाविंशत्युदये षट्, एकोनत्रिंशदुदये षट्, त्रिंशदुदये षट्, एकत्रिंशदुदये चत्वारि, सर्वसङ्ख्यया चतुःपञ्चाशत्सत्तास्थानानि । तथा यथा तिर्यग्गतिप्रायोग्यामेकोनत्रिंशतं बध्नतामेकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुजदेवनैरयिकाणामुदयसत्तास्थानानि भावितानि तथा त्रिंशतमप्युद्योतसहितां तिर्यग्गतिप्रायोग्यां बध्नतामेकेन्द्रियादीनामुदयसत्तास्थानानि भावनीयानि । मनुष्यगतिप्रायोग्यां तीर्थकरसहितां त्रिंशतं बध्नतां देवनैरयिकाणामुदयसत्तास्थानान्युच्यन्ते—तत्र देवस्य यथोक्तां त्रिंशतं बध्नत एकविंशत्युदये वर्त्तमानस्य द्वे

सत्तास्थाने त्रिनवतिरेकोननवतिश्च । एकविंशत्युदय एव वर्त्तमानस्य नैरयिकस्यैकं सत्तास्थानमेकोननवतिलक्षणं । त्रिनवतिस्तु न लभ्यते, तीर्थकराहारकसत्कर्मणो नरकेषूत्पादाभावात् । उक्तं च सप्ततिकाचूर्णौ—" जस्स तित्थगराहारगाणि जुगवं संति सो नरएसु न उववज्जइ त्ति " । एवं पञ्चविंशतिसप्तविंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंशदुदयेष्वपि भावनीयं । नवरं नैरयिकस्य त्रिंशदुदयो नास्ति, त्रिंशदुदयस्योद्योतान्वितत्वान्नैरयिकस्य चोद्योतोदयाभावात् । तदेवं सामान्येन त्रिंशद्बन्धकानामेकविंशत्युदये सप्त, चतुर्विंशत्युदये पञ्च, पञ्चविंशत्युदये सप्त, षड्विंशत्युदये पञ्च, सप्तविंशत्युदये षट्, अष्टाविंशत्युदये षट्, एकोनत्रिंशदुदये षट्, त्रिंशदुदये षट्, एकत्रिंशदुदये चत्वारि, सर्वसङ्ख्यया द्विपञ्चाशत् । एकत्रिंशति बध्यमानायामेकमुदयस्थानं त्रिंशल्लक्षणं, यत एकत्रिंशद्देवगतिप्रायोग्यं तीर्थकराहारकसहितं बध्नतोऽप्रमत्तसंयतस्यापूर्वकरणस्य वा प्राप्यते, न च ते वैक्रियमाहारकं वा कुर्वन्ति, ततः पञ्चविंशत्यादय उदया न प्राप्यन्ते । एकं सत्तास्थानं त्रिनवतिस्तीर्थकराहारकचतुष्टययोरपि सत्तासंभवात् । एकस्मिन् यशःकीर्त्तिरूपे कर्मणि बध्यमाने एकं त्रिंशदुदयस्थानं, एकबन्धका ह्यपूर्वकरणादयोऽतिशुद्धत्वाद्वैक्रियमाहारकं वा नारभन्त इति तत्र पञ्चविंशत्याद्युदयस्थानाप्राप्तिः । अष्टौ सत्तांशाः—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिरशीतिरेकोनाशीतिः षट्सप्ततिः पञ्चसप्ततिश्च । तत्राद्यानि चत्वारि सत्तास्थानानि उपशमश्रेण्यां, क्षपकश्रेण्यामपि तावद्यावदनिवृत्तिबादरगुणस्थानं गत्वा त्रयोदश नामानि न क्षिप्यन्ते, क्षीणेषु च त्रयोदशनामसु नानाजीवापेक्षयोपरितनानि चत्वारि सूक्ष्मसम्परायं यावद्भण्यन्ते । परतो बन्धाभावे दशोदयस्थानानि, तद्यथा—विंशतिरेकविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशन्नवाष्टौ चेति ।

तत्र विंशत्येकविंशती यथासङ्ख्यं तीर्थकृदतीर्थकृतोः सयोगिकेवलिनोः कार्मणकाययोगे वर्त्तमानयोः, षड्विंशतिसप्तविंशती तयोरेवौदारिकमिश्रकाययोगे वर्त्तमानयोः, अतीर्थकृतः स्वभावस्थस्य त्रिंशत्, तस्यैव स्वरे निरुद्धे एकोनत्रिंशत्, तस्यैवोच्छ्वासेऽपि निरुद्धेऽष्टाविंशतिः, तीर्थकृतः स्वभावस्थस्यैकत्रिंशत्, तस्यैव स्वरे निरुद्धे त्रिंशत्, उच्छ्वासेऽपि निरुद्धे एकोनत्रिंशत्, अयोगिनस्तीर्थकृतो नवोदयोऽतीर्थकृतोऽष्टोदयः। दश सत्तास्थानानि, तद्यथा—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिरशीतिरेकोनाशीतिः षट्सप्ततिः पञ्चसप्ततिर्नवाष्टौ च। विंशत्युदये द्वे सत्तास्थाने—एकोनाशीतिः पञ्चसप्ततिश्च। एवं षड्विंशत्युदयेऽष्टाविंशत्युदयेऽपि च द्रष्टव्यं। एकविंशत्युदये अशीतिषट्सप्ततिलक्षणे द्वे सत्तास्थाने, एवं सप्तविंशत्युदयेऽपि। एकोनत्रिंशति चत्वारि सत्तास्थानानि, तद्यथा—अशीतिः षट्सप्ततिरेकोनाशीतिः पञ्चसप्ततिश्च। यत एकोनत्रिंशत्तीर्थकरस्यातीर्थकरस्य च स्यात्। तत्राद्ये द्वे तीर्थकरमधिकृत्य, अन्त्ये च द्वे अतीर्थकरमधिकृत्य। त्रिंशदुदयेऽष्टौ सत्तास्थानानि, तद्यथा—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिरशीतिरेकोनाशीतिः षट्सप्ततिः पञ्चसप्ततिश्च। तत्राद्यानि चत्वार्युपशान्तकषायस्य, अशीतिः क्षीणकषायस्य सयोगिकेवलिनो वा तीर्थकृत आहारकसत्कर्मणोऽतीर्थकृतस्तु तादृशस्यैकोनाशीतिः। आहारकचतुष्टयरहितयोस्तीर्थकृदतीर्थकृतोः क्षीणमोहयोः सयोगिकेवलिनोर्वा षट्सप्ततिपञ्चसप्तती। एकत्रिंशदुदयेऽशीतिषट्सप्तत्यात्मके द्वे सत्तास्थाने अतीर्थकरस्यैव ज्ञेये अतीर्थकरस्यैकत्रिंशदुदयाभावात्। नवोदयेऽशीतिषट्सप्ततिनवलक्षणानि त्रीणि सत्तास्थानानि, तत्राद्ये द्वे अयोगिकेवलिद्विचरमसमयं यावत् तीर्थकरस्य चरमसमये तु नव। अष्टोदये त्रीणि सत्तास्थानानि—एकोनाशीतिः पञ्चसप्ततिरष्टौ च, तत्राद्ये द्वे अयोगिकेव-

क्षिनोऽतीर्थकृतो द्विचरमसमयं यावत् चरमसमये त्वष्टाविति । एवमबन्धकस्य दशस्वप्युदयस्थानेषु त्रिंशत्सत्तास्थानानि भवन्ति । तदेवं सर्वेषामपि कर्मणां प्रत्येकं बन्धोदयसत्तास्थानानि सामान्यतो मिथः संवेधतश्च चिन्तितानि ।

अथ सर्वेषामपि कर्मणां (गुणस्थाने) बन्धोदयसत्ताः प्रत्येकं संवेधतश्चिन्त्यन्ते—तत्र ज्ञानावरणान्तराययोर्मिथ्यादृष्टेरारभ्य सूक्ष्मसम्परायं यावत् पञ्चैव प्रकृतयो बन्धे उदये सत्तायां च लभ्यन्ते, उपशान्तमोहे (क्षीणमोहे)च द्वयोरपि पञ्च पञ्च प्रकृतय उदयवत्यः सत्यश्च, क्षीणमोहादौ (सयोगिकेवल्यादौ) त्वनयोरेकापि नास्ति । दर्शनावरणस्य मिथ्यादृष्टौ सासादने च द्वौ भङ्गौ, नवविधो बन्धश्चतुर्विध उदयो नवविधा सत्ता, एष विकल्पो निद्रोदयाभावे, नवविधो बन्धः पञ्चविध-उदयो नवविधा सत्ता, एष विकल्पो निद्रोदयकाले । मिश्रादारभ्यापूर्वकरणप्रथमभागं यावत् इमौ द्वौ भङ्गौ, षड्विधो बन्धश्चतुर्विध उदयोनवविधा सत्ता, यदा षड्विधो बन्धः पञ्चविध उदयो नवविधा सत्तेति । अपूर्वकरणे निद्राप्रचलयोर्बन्धव्यवच्छेदादूर्ध्वमारभ्योपशमश्रेण्यां सूक्ष्मसम्परायं यावत् चतुर्विधो बन्धश्चतुर्विध उदयो नवविधा सत्ता, यदा चतुर्विधो बन्धः पञ्चविध उदयो नवविधा सत्तेति द्वौ भङ्गौ । बन्धाभावेऽप्युपशान्तमोहे बन्धाभिलापनिर्मुक्तावेतावेव द्वौ भङ्गौ । अनिवृत्तिबादरस्य सूक्ष्मसम्परायस्य च क्षपकस्य चतुर्विधे बन्धे षड्सत्तायामतिविशुद्धत्वेन निद्रोदयाभावाच्चतुर्विध एवोदय इत्येक एव भङ्गः । क्षीणमोहस्य बन्धाभावे द्वौ भङ्गौ, चतुर्विध उदयः षड्विधा सत्ता इत्येष भङ्गः क्षीणमोहस्य द्विचरमसमयं यावत्, चरमसमये तु चतुर्विध उदयश्चतुर्विधा सत्तेति । उक्ता गुणस्थानेषु दर्शनावरणीयस्य भङ्गाः । अथ वेदनीयस्योच्यन्ते—वेदनीयस्याद्याश्चत्वारो भङ्गा असातस्य बन्धः सातस्योदयो द्वे सती, यदाऽसातस्य बन्धोऽ-

सातस्योदयो वे सती, (यद्वा) सातस्य बन्धः सातस्योदयो वे सती, यद्वा सातस्य बन्धोऽसातस्योदयो वे सती इत्येते मिथ्यादृष्टेरारभ्य यावत्प्रमत्तसंयतस्तावन्नानाजीवापेक्षया कालभेदेनैकजीवापेक्षया च भावनीयाः । सातस्य बन्धः सातस्योदयो वे सती, सातस्य बन्धोऽसातस्योदयो वे सती इत्येतौ द्वौ प्रमत्तसंयतादारभ्य यावत्सयोगिकेवली तावत् । बन्धाभावेऽयोगिकेवलिनि चत्वारो विकल्पाः, तत्रासातस्योदयः सातासाते सती, यद्वा सातस्योदयः सातासाते सती, एतौ द्वौ द्विचरमसमयं यावत्, चरमसमये त्वन्यतरस्मिन् सति द्वौ भङ्गौ, तत्रासातस्योदयोऽसातस्य सत्तेत्येष भङ्गो यस्य द्विचरमसमये सातं क्षीणं तस्य, यस्य तु द्विचरमसमयेऽसातं क्षीणं तस्य सातस्योदयः सातस्य सत्तेत्येष भङ्गः । भाविता गुणस्थानेषु वेदनीयस्य भङ्गाः । अथायुषो भाव्यन्ते—आयुषो मिथ्यादृष्टिगुणस्थानेऽष्टाविंशतिरपि भङ्गा नैरयिकान् देवाँश्चाधिकृत्य पञ्च पञ्च, तिरश्चो मनुष्याँश्चाधिकृत्य नव नवेति।सासादनस्य षड्विंशतिः, यतस्तिर्यञ्चो मनुष्या वा सासादनभावे वर्त्तमाना नरकायुर्न बध्नन्तीति परभवायुर्बन्धकाले तिरश्चां नृणां चैकैको भङ्गो न प्राप्यते । सम्यग्मिथ्यादृष्टेः षोडश, तस्य हि नायुर्बन्धारम्भ इति आयुर्बन्धकालीना द्वादश भङ्गा अपयान्तीति षोडश भवन्ति । अविरतसम्यग्दृष्टेर्विंशतिर्भङ्गाः, कथमिति चेदुच्यते—तिर्यङ्मनुष्याणां प्रत्येकमायुर्बन्धकाले ये नरकतिर्यङ्मनुष्यगतिविषयास्त्रयस्त्रयो भङ्गाः देवनैरयिकाणां च तिर्यग्गतिविषय एकैकभङ्गः, ते सर्वसङ्ख्ययाऽष्टौ अविरतसम्यग्दृष्टेर्न भवन्तीति शेषा विंशतिरेव भवन्तीति । देशविरते द्वादश भङ्गाः, यतो देशविरतिर्देवानां नारकाणां च न संभवतीति तदाश्रिता दश भङ्गा अपयान्ति । तिर्यङ्मनुष्या अपि देशविरता देवायुरेव बध्नन्ति, न नरकतिर्यङ्मनुष्यायूंषि, ततस्तिर्यङ्मनुष्या-

णामायुर्बन्धकालीनास्त्रयस्त्रयो भङ्गा न प्राप्यन्ते इति षण्ण्येतेऽपगच्छन्ति इत्यष्टाविंशतेः षोडशस्वपनीतेष्ववशिष्टा द्वादशैव भवन्ति । प्रमत्ताप्रमत्तयोर्य एव मनुष्ये नव भङ्गास्त एव परभवायुर्बन्धकालीननारकतिर्यङ्मनुष्यायुर्बन्धघटितभङ्गत्रयहीनाः षड् द्रष्टव्याः, प्रमत्ताप्रमत्ता हि देवायुरेवैकं बध्नन्ति न शेषं, बन्धोत्तरकालं चरणप्रतिपत्त्या सत्ता तु चतुर्णामप्यायुषां संभवत्येव । अपूर्वकरणानिवृत्तिबादरसूक्ष्मसम्परायोपशान्तमोहेषूपशमश्रेण्यां द्वौ भङ्गौ, तद्यथा—मनुष्यायुष उदयो मनुष्यायुषः सत्ता, एष भङ्गः परभवायुर्बन्धकालात्पूर्वं, यदा मनुष्यायुष उदयो देवमनुष्यायुषी सती, एष भङ्गः परभवायुर्बन्धोत्तरं पूर्वबद्धदेवायुष उपशमश्रेणिप्रतिपत्तिसंभवात्, क्षपकश्रेण्यां त्वेतेषां मनुष्यायुष उदयो मनुष्यायुषः सत्तेत्येष एक एव भङ्गः, पूर्वबद्धायुषां क्षपकश्रेण्यप्रतिपत्तेः । क्षीणमोहादिगुणस्थानत्रयेऽप्येष एवैको भङ्गो द्रष्टव्यः । उक्ता गुणस्थानेष्वायुषो भङ्गाः । अथ गोत्रस्योच्यन्ते—मिथ्यादृष्टौ गोत्रस्यादिमाः पञ्च भङ्गाः, तद्यथा—नीचैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदयो नीचैर्गोत्रं सत्, एष तेजोवायुषु तद्भवाद्बृत्तेषु वा कियत्कालं । नीचैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदयो द्वे सती, यदा नीचैर्गोत्रस्य बन्ध उच्चैर्गोत्रस्योदयो द्वे सती, यदोच्चैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदयो द्वे सती, यदोच्चैर्गोत्रस्य बन्ध उच्चैर्गोत्रस्योदयो द्वे सती, एते चत्वारोऽपि यथायोगं मिथ्यादृशां संभवन्ति । एत एवादिमहीनाश्चत्वारः सासादने संभवन्ति, आद्यभङ्गस्थानेषु तेजोवायुषु सासादनभावो न लभ्यते, नापि तद्भवाद्बृत्तेषु तदात्वे इति तत्प्रतिषेधः । मिश्रादारभ्य देशविरतिं यावद्उच्चैर्गोत्रबन्धोपलक्षितौ प्रत्येकं द्वौ भङ्गौ भवतः । प्रमत्तसंयतादारभ्य सूक्ष्मसम्परायं यावन्नीचैर्गोत्रोदयाभावाद्उच्चैर्गोत्रस्य बन्ध उच्चैर्गोत्रस्योदयो द्वे सती इत्येक एव भङ्गः । अबन्धेऽयोगिचिर-

मसमयं यावदुच्चैर्गोत्रस्योदयो द्वे सती इति षष्ठ एव, चरमसमये तूच्चैर्गोत्रस्योदय उच्चैर्गोत्रमेव च सदिति सप्तम एव भङ्गः। उक्ता गुणस्थानेषु गोत्रभङ्गा, अथ मोहनीये गुणस्थानेष्वपि बन्धोदयसत्तास्थानान्युक्तान्येवेति न भूय उच्यन्ते। सम्प्रत्युच्चरितं पदसमूहविषयं यदुक्तव्यं तदुच्यते—तत्र पदसमूहो द्विविधः—अव्यक्तोदयसम्बन्धी गुणस्थानकोदयसम्बन्धी च। तत्राव्यक्तोदया गुणस्थानकविनिर्मुक्तसामान्योदयास्तत्सम्बन्धिपदसमूहपरिमाणं तावदुच्यते—तत्र दशकोदये एका चतुर्विंशतिः। नवोदये षट्—तिस्रो मिथ्यादृष्टौ, सासादनमिश्राविरतसम्यग्दृष्टिषु चैकैकेति। अष्टोदये एकादश—तिस्रो मिथ्यादृष्टौ, सासादनमिश्रयोर्द्वे द्वे, तिस्रोऽविरतसम्यग्दृष्टौ, देशविरते चैकेति। सप्तोदये दश—मिथ्यादृष्टिसासादनमिश्रेष्वेकैका, अविरतसम्यग्दृष्टिदेशविरतयोस्तिस्रस्तिस्रः, प्रमत्ताप्रमत्तयोर्मिलितयोः स्वरूपेण भेदाभावादेका चेति। षडुदये सप्त—एकाऽविरतसम्यग्दृष्टौ, देशविरते प्रमत्ताप्रमत्तयोश्च तिस्रस्तिस्र इति। अपूर्वकरणसत्कानि षट्कादीन्युदयस्थानानि तु प्रमत्ताप्रमत्तसत्केभ्यः स्वरूपभेदाभावात् पृथङ्न गण्यन्ते। पञ्चकोदये चतस्रः—एका देशविरते, तिस्रश्च प्रमत्ताप्रमत्तयोरिति। एका चतुष्कोदये, सा च प्रमत्ताप्रमत्तयोः। स्थापना—१–६–११–१०–९–४–१। एताश्चतुर्विंशतयस्तेन तेनोदयेन दशकादिना गुण्यन्ते। तथाहि—दशकोदये एका चतुर्विंशतिः, सा दशकेन गुण्यते, जाता दश। नवकोदये षट् चतुर्विंशतय इति षट् नवकेन गुण्यन्ते, जाताश्चतुःपञ्चाशत्। अष्टोदये एकादश चतुर्विंशतय इत्येकादश अष्टभिर्गुण्यन्ते, जाता अष्टाशीतिः। सप्तोदये दश चतुर्विंशतय इति दश सप्तकेन गुण्यन्ते, जाता सप्ततिः। षडुदये सप्त चतुर्विंशतय इति सप्त षड्भिर्गुण्यन्ते, जाता द्विचत्वारिंशत्। पञ्चोदये चतस्रश्चतुर्विंशतय इति चतस्रः पञ्च-

ज्निर्गुण्यन्ते, जाता विंशतिः । चतुरुदये एका चतुर्विंशतिरित्येका चतुर्ज्निर्गुण्यते, जाताश्चत्वारः । स्थापना—१०–५४–८८–१०–४२–२०–४ । इत्थं गुणित्वा चतुर्विंशतय एकत्र मील्यन्ते, जातं शतत्रयमष्टाशीतं २८८ । तत एतच्चतुर्विंशत्या गुण्यते, जातानि द्वादशोत्तराण्येकोनसप्ततिशतानि ६९१२ । तत्र द्विकोदयज्नङ्गा द्वादश, तेषां द्विकसंज्ञेनोदयेन गुणितानि पदानि चतुर्विंशतिः एकोदयज्नङ्गाश्चत्वारः तेषां चैकोदयगुणितानि पदान्यपि चत्वार्येवेति सर्वसङ्ख्ययाऽष्टाविंशतिपदान्यधिकानि प्रक्षिप्यन्ते, ततो जातानि षष्टिहीनानि सप्त सहस्राणि ६९४० । यद्वा पञ्चकबन्धे चतुर्विंशतिपदानि, चतुष्कबन्धे चत्वारि, त्रिकबन्धे त्रीणि, द्विकबन्धे द्वे, एककबन्धे एकं, अबन्धेऽप्येकमिति बन्धकज्नेदेन सर्वसङ्ख्यया पञ्चत्रिंशत्पदानि, तानि पूर्वराशौ प्रक्षिप्यन्ते, जातानि त्रिपञ्चाशदूनानि सप्त सहस्राणि ६९४५ । यद्वा मतान्तरेण चतुर्विधबन्धे द्वादश द्विकोदयज्नङ्गा लभ्यन्ते, पदानि च तत्र सर्वसङ्ख्यया चतुर्विंशतिः, तत्प्रक्षेपादेकोनसप्ततिशतान्येकसप्तत्यधिकानि ज्नवन्ति ६९७१ । एतदव्यक्तोदयपदसङ्ख्यायां मतत्रयं द्रष्टव्यं । अथ गुणस्थानोदयपदसङ्ख्याऽभिधीयते—मिथ्यादृष्टावष्टषष्टिः पदध्रुवकाः चतुर्विंशतिगुणनयोग्यानि पदानीत्यर्थः, तथाहि—दशोदये एका चतुर्विंशतिः, तत एको दशकेन गुण्यते, जाता दश । नवोदये तिस्रश्चतुर्विंशतय इति त्रयो नवज्निर्गुण्यन्ते, जाता सप्तविंशतिः । अष्टकोदये तिस्रश्चतुर्विंशतयस्ततस्त्रयोऽष्टज्निर्गुण्यन्ते, जाता चतुर्विंशतिः । सप्तोदये एका चतुर्विंशतिस्तत एकः सप्तज्निर्गुण्यते, जाताः सप्त । सर्वसङ्ख्यया मिथ्यादृष्टौ पदध्रुवका अष्टषष्टिः । एवं सासादने द्वात्रिंशत् । मिश्रे द्वात्रिंशत् । अविरतसम्यग्दृष्टौ षष्टिः । देशविरते द्विपञ्चाशत् । प्रमत्ते चतुश्चत्वारिंशत् । अप्रमत्ते चतुश्चत्वारिंशत् । अपूर्वकरणे विंशतिः । सर्वसङ्ख्यया त्रीणि शतानि द्विपञ्चाशदधिकानि पदध्रु-

वकाः। एते चतुर्विंशत्या गुण्यन्ते, जातानि चतुरशीतिशतान्यष्टचत्वारिंशदधिकानि। ततोऽनिवृत्तिबादरोदयपदानि प्रागुक्तान्यष्टाविंशतिसङ्ख्यानि प्रक्षिप्यन्ते, सूक्ष्मसम्परायगतं चैकमबन्धकपदं तत्सहिता पूर्णा पदसङ्ख्या भवति। सा च त्रयोविंशत्यूनानि पञ्चाशीतिशतानि ८४७७। अथवा पंञ्चविधबन्धके चतुर्विंशतिः पदानि, चतुष्कबन्धके चत्वारि, त्रिकबन्धे त्रीणि, द्विकबन्धे द्वे, एककबन्धे एकं, अबन्धके च सूक्ष्मसम्पराये एकमित्येवं बन्धभेदेन सर्वसङ्ख्यया पञ्चत्रिंशत्पदानि, तानि पूर्वराशौ प्रक्षिप्यन्ते, ततश्चयशीत्यधिकानि चतुरशीतिशतानि पदानां भवन्ति ८४८३। यद्वा चतुर्विधबन्धकस्य मतान्तरेण द्वादश द्विकोदयभङ्गाः प्राप्यन्ते, तेषां पदानि च चतुर्विंशतिः, ततस्तेषामप्यधिकानां द्वेषे सप्तोत्तराणि पञ्चाशीतिशतानि पदानां भवन्ति।

एवं योगोपयोगलेश्यादिभेदतोऽपि बहवो भेदा भवन्ति, तत्र योगानां बहुवक्तव्यत्वात्तान् विहाय प्रथमत उपयोगभेदतो भेदा भाव्यन्ते—इह मिथ्यादृष्टावष्टौ चतुर्विंशतयः, सासादने चतस्रः, मिश्रे चतस्रः, अविरतसम्यग्दृष्टेरष्टौ, देशविरतस्याष्टौ, प्रमत्तसंयतस्याष्टौ, अप्रमत्तसंयतस्याष्टौ, अपूर्वकरणस्य चतस्रः। तथा मिथ्यादृष्टौ सासादने सम्यग्मिथ्यादृष्टौ च प्रत्येकं मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानचक्षुरचक्षुर्दर्शनरूपाः पञ्चोपयोगाः। अविरतसम्यग्दृष्टिदेशविरतयोर्मतिश्रुतावधिज्ञानचक्षुरचक्षुरवधिदर्शनरूपाः प्रत्येकं षट्। प्रमत्तादीनां सूक्ष्मसम्परायान्तानां त एव षट् मनःपर्यवज्ञानसहिताः सप्त सप्त। तत्र मिथ्यादृष्ट्यादिषु चतुर्विंशतिगता अष्टादय उदयस्थानभङ्गा यथायोगमुपयोगैर्गुण्यन्ते, तद्यथा—मिथ्यादृष्टेरष्टौ, सासादने चत्वारः, मिश्रे चत्वारः, मिलिताः षोडश, पञ्चभिरुपयोगैर्गुण्यन्ते, अशीतिर्भवति ८०।

अविरतसम्यग्दृष्टेरष्टौ, देशविरतस्याष्टौ,मिलिताः षोडश चतुर्विंशतिजङ्घाः, षड्भिरुपयोगैर्गुण्यन्ते षण्णवतिः स्यात् ९६। प्रमत्तस्याष्टावप्रमत्तस्याप्यष्टौ, अपूर्वकरणस्य चत्वारः, मिलिता विंशतिः, सप्तभिरुपयोगैर्गुण्यन्ते, चत्वारिंशं शतं स्यात् १४०। सर्वसङ्ख्यया त्रीणि शतानि षोडशोत्तराणि ३१६। एतानि चतुर्विंशत्या गुण्यन्ते, पञ्चसप्ततिशतानि चतुरशीत्यधिकानि स्युः ७५८४। ततो द्विकोदयजङ्घा द्वादश, एकोदयजङ्घाः पञ्च, मिलिताः सप्तदश, सप्तभिरुपयोगैर्गुण्यन्ते, जातमेकोनविंशं शतं ११९। तत् पूर्वराशौ प्रक्षिप्यते, ततः सप्तसप्ततिशतानि त्र्युत्तराण्युदयजङ्घाः स्युः ७७०३। अथ पदसङ्ख्या समानीयते—तत्र मिथ्यादृष्टावष्टषष्टिः पदध्रुवकाः, सासादने द्वात्रिंशत्, मिश्रे द्वात्रिंशत्, अविरतसम्यग्दृष्टौ षष्टिः, देशविरते द्विपञ्चाशत्, प्रमत्ते चतुश्चत्वारिंशत्, अप्रमत्तेऽपि चतुश्चत्वारिंशत्, अपूर्वकरणे विंशतिः। एते पदध्रुवका यथायोगमुपयोगैर्गुण्यन्ते, तथाहि—मिथ्यादृष्टेरष्टषष्टिः, सासादने द्वात्रिंशत्, मिश्रे द्वात्रिंशत्, मिलिता द्वात्रिंशं शतं, तत्पञ्चभिरुपयोगैर्गुण्यते, षट्शती षष्ट्यधिका स्यात् ६६०। तथाऽविरतसम्यग्दृष्टेः षष्टिर्देशविरतस्य द्विपञ्चाशत्, मिलिता द्वादशोत्तरं शतं, तत् षड्भिरुपयोगैर्गुण्यते, षट्शती द्विसप्त्यधिका स्यात् ६७२। तथा प्रमत्तस्य चतुश्चत्वारिंशत्, अप्रमत्तस्य चतुश्चत्वारिंशत्, अपूर्वकरणस्य विंशतिः, सर्वसङ्ख्ययाऽष्टाधिकं शतं १०८, तत्सप्तभिरुपयोगैर्गुण्यते, सप्तशती षट्पञ्चाशदधिका स्यात् ७५६। सर्वसङ्ख्या विंशतिशतान्यष्टाशीत्यधिकानि २०८८। एतानि चतुर्विंशत्या गुण्यन्ते, ततः पञ्चाशत्सहस्राणि द्वादशोत्तरशताधिकानि स्युः ५०११२। ततो द्विकोदयपदानि चतुर्विंशतिः एकोदयपदानि पञ्च,

सर्वमीलने एकोनत्रिंशत्, सा सप्तभिरुपयोगैर्गुण्यते, जाते त्र्युत्तरे द्वे शते, ते पूर्वराशौ प्रक्षिप्येते, ततो जातः पूर्वराशिः पञ्चाशत्सहस्राणि शतत्रयं च पञ्चदशोत्तरं ५०३१५। एतावन्त्युपयोगगुणितान्युदयपदानि भवन्ति।

अथ लेश्यागुणिता उदयभङ्गा उदयपदानि च भाव्यन्ते—तत्र मिथ्यादृष्ट्यादिष्वविरतसम्यग्दृष्ट्यन्तेषु प्रत्येकं षड् लेश्याः, देशविरतप्रमत्ताप्रमत्तेषु तेजःपद्मशुक्लरूपास्तिस्रस्तिस्रः, कृष्णादिलेश्यासु देशविरत्यादिप्रतिपत्तेरभावात्, अपूर्वकरणादौ चैका शुक्ललेश्या। मिथ्यादृष्ट्यादिषु चाष्टचतुरादिकाश्चतुर्विंशतयो यथायोगं लेश्याभिर्गुण्यन्ते। तथाहि—मिथ्यादृष्टेरष्टौ, सासादनमिश्रयोश्चतस्रश्चतस्रः, अविरतसम्यग्दृष्टेरष्टौ, मिलिताश्चतुर्विंशतिः, सा षड्भिर्लेश्याभिर्गुण्यते, जातं चतुश्चत्वारिंशं शतं १४४। तथा देशविरतप्रमत्ताप्रमत्तानां प्रत्येकमष्टौ, मिलिताश्चतुर्विंशतिः, तस्यास्तिसृभिर्लेश्याभिर्गुणने द्विसप्ततिः ७२। अपूर्वकरणे चतस्रश्चतुर्विंशतयः, ता एकया लेश्यया गुणिताश्चतस्र एव ४। सर्वे मिलिता द्वे शते विंशत्यधिके २२०, ते चतुर्विंशत्या गुण्यन्ते, जातान्यशीत्यधिकानि द्विपञ्चाशच्छतानि। ततो द्विकोदया द्वादश, एकोदयाः पञ्च, मिलिताः सप्तदश, ते पूर्वराशौ प्रक्षिप्यन्ते, ततः सप्तनवत्यधिकानि द्विपञ्चाशच्छतानि स्युः ५२९७, इयन्तो लेश्यागुणिता उदयभङ्गाः। उक्तं च—"तिगहीणा तेवन्ना सया उ उदयाण हुंति लेसाणं"। अथैतत्पदसङ्ख्या समानीयते—मिथ्यादृष्टौ पदध्रुवका अष्टषष्टिः, सासादने मिश्रे च द्वात्रिंशत्, अविरतसम्यग्दृष्टौ षष्टिः, सर्वसङ्ख्यया द्विनवत्यधिकं शतं। एते षड्भिर्लेश्याभिर्गुण्यन्ते, ततो द्विपञ्चाशदधिकान्येकादश शतानि स्युः ११५२। तथा देशविरते द्विपञ्चाशत्, प्रमत्तेऽप्रमत्ते च चतुश्चत्वारिंशत्, सर्वसङ्ख्यया चत्वारिंशं शतं जातं १४०, तच्च तिसृभिर्लेश्याभिर्गुण्यते, ततो जाता विंशत्यधिका चतुः-

शती ४२० । सर्वसङ्ख्यया जातानि द्विनवत्यधिकानि पञ्चदश शतानि, एतानि चतुर्विंशतिगतानीति चतुर्विंशत्या गुण्यन्ते, जातान्यष्टात्रिंशत्सहस्राणि ६ शते चाष्टाधिके ३८२०८ । ततो द्विकोदयैकोदयपदान्येकोनत्रिंशत्प्रक्षिप्यन्ते, ततो जातान्यष्टात्रिंशत्सहस्राणि शतद्वयं च सप्तत्रिंशदधिकं ३८२३७ । उक्तं च—"अडतीससहस्साइं पयाण सय दो य सगतीसा" ।

अथ योगैः सह गुणनयोदयभङ्गा उदयपदानि च भाव्यन्ते—इह मिथ्यादृष्ट्यादिषु सूक्ष्मसम्परायान्तेषु द्विपञ्चाशच्चतुर्विंशतीनां (८-४-४-०-०-०-०-४) द्वादशानां (१२) चानिवृत्तौ द्विकोदयभङ्गानां पञ्चानां (५) चैकोदयभङ्गानां मीलने द्वादश शतानि पञ्चषष्टिश्चोदयभङ्गा भवन्ति १२६५ । तत्र वाग्योगचतुष्टयमनोयोगचतुष्टयौदारिककाययोगाः सर्वेष्वपि मिथ्यादृष्ट्यादिगुणस्थानेषु संभवन्तीति प्रागुक्तभङ्गा नवभिर्गुण्यन्ते, जातान्येकादश सहस्राणि त्रीणि शतानि पञ्चाशीतिश्च ११३८५ । तथा मिथ्यादृष्टेर्वैक्रियकाययोगेऽष्टापि चतुर्विंशतयः प्राप्यन्ते । वैक्रियमिश्रे औदारिकमिश्रे कार्मणकाययोगे च प्रत्येकं चतस्रश्चतस्रः, यतः सप्तोदय एका, अष्टोदये द्वे, नवोदये चैकेति चतस्रोऽनन्तानुबन्ध्युदयरहिता इह न प्राप्यन्ते, पूर्वं हि वेदकसम्यग्दृष्टिना सताऽनन्तानुबन्धिनो विसंयोज्य परिणामपरावृत्त्या मिथ्यात्वं गतेन भूयस्ते बद्धुमारब्ध्यन्ते, तस्यैव मिथ्यादृष्टेर्बन्धावलिकामात्रं कालं यावदनन्तानुबन्ध्युदयो न प्राप्यते, अनन्तानुबन्धिनश्च विसंयोज्य भूयोऽपि मिथ्यात्वं प्रतिपद्यते, जघन्यतोऽप्यन्तर्मुहूर्त्तावशेषायुष्क एवानन्तानुबन्ध्युदयरहितस्य मिथ्यादृष्टेः कालकरणप्रतिषेधात्, ततोऽपान्तरालगतौ वर्त्तमानस्य भवान्तरे वा प्रथमत एवोत्पन्नस्य मिथ्यादृष्टेः सतोऽनन्तानुबन्ध्युदयरहिता उदयविकल्पा न प्राप्यन्ते । अत्र च कार्मणकाययोगोऽपान्तरालगतौ औदारिकमिश्रवैक्रियमिश्रकाययोगौ च

भवान्तरे उत्पद्यमानस्य, एतच्च बाहुल्यमाश्रित्योक्तं, अन्यथा तिर्यङ्मनुष्याणामपि मिथ्यादृशां वैक्रियकारिणां वैक्रियमिश्रमवाप्यत एव, परं चूर्णिकृता तन्नात्र विवक्षितं, ततः कार्मणकाययोगादौ प्रत्येकं चतस्रश्चतुर्विंशतयोऽनन्तानुबन्ध्युदयरहिता न प्राप्यन्ते । तथा सासादनस्य कार्मणकाययोगे वैक्रियकाययोगे औदारिकमिश्रकाययोगे च प्रत्येकं चतस्रश्चतुर्विंशतयः । सम्यङ्मिथ्यादृष्टेर्वैक्रियकाययोगे चतस्रः । अविरतसम्यग्दृष्टेर्वैक्रिय(काय)योगेऽष्टौ । देशविरतस्य वैक्रिये वैक्रियमिश्रे च प्रत्येकमष्टावष्टौ । प्रमत्तसंयतस्यापि वैक्रिये वैक्रियमिश्रे च प्रत्येकमष्टावष्टौ । अप्रमत्तसंयतस्य वैक्रियकाययोगेऽष्टौ । सर्वसङ्ख्यया चतुरशीतिश्चतुर्विंशतयः । एताश्चतुर्विंशत्या गुणिता द्वे सहस्रे षोडशोत्तरे भवन्ति, तानि पूर्वराशौ प्रक्षिप्यन्ते । तथा सासादनस्य वैक्रियमिश्रे वर्त्तमानस्य ये चत्वारोऽमी उदयस्थानविकल्पाः—सप्तोदय एकविधः, द्विविधोऽष्टोदये, एकविधश्च नवोदये इति, एषु नपुंसकवेदो न लभ्यते, वैक्रियमिश्रकाययोगिषु नपुंसकवेदिषु नारकेषु मध्ये सासादनस्योत्पादाभावात् । ये चाविरतसम्यग्दृष्टेर्वैक्रियमिश्रे कार्मणकाययोगे च प्रत्येकमष्टावष्टावुदयस्थानविकल्पास्तेषु स्त्रीवेदो न लभ्यते, वैक्रियकाययोगिषु स्त्रीवेदिषु मध्येऽविरतसम्यग्दृष्टेरुत्पादाभावात् । एतच्च प्रायोवृत्त्योक्तम्, अन्यथा कदाचित् स्त्रीवेदिष्वपि मध्ये तदुत्पादो द्रष्टव्यः, उक्तं च सप्ततिकाचूर्णौ—"कयाइ होज्ज इत्थिवेयगेसु वित्ति," ततश्चतुर्विंशत्यष्टकस्य द्विनवत्यधिकशतप्रमाणस्य १९२ त्रिभागश्चतुःषष्टिरूपः स्त्रीवेदोदयलभ्यः प्रत्येकं कार्मणकाययोगे च न संभवति, सर्वसङ्ख्याऽष्टाविंशत्यधिकं शतं १२८, तथाऽविरतिसम्यग्दृष्टेरौदारिकमिश्रकाययोगे वर्त्तमानस्य पुंवेद एवैको भवति, न स्त्रीवेदनपुंसकवेदौ, तिर्यग्मनुष्येषु स्त्रीवेदनपुंसकवेदिषु मध्येऽविरतसम्यग्दृष्टेरुत्पादाभावात् । एतच्च प्राचुर्य-

मधिकृत्योक्त, तेन मङ्गिस्वामिन्यादिभिर्न व्यभिचारः। तथा प्रमत्तसंयतस्याहारककाययोगे आहारकमिश्रे चाप्रमत्तस्याहारककाययोगे च ये प्रत्येकमुदयस्थानविकल्पा अष्टौ तेऽपि स्त्रीवेदरहिता द्रष्टव्याः। आहारकं हि चतुर्दशपूर्विणामेव स्यात्, स्त्रीणां च पूर्वाधिगमलब्ध्यभाव इति। एते च सर्वेऽप्युदयस्थानविकल्पाश्चतुश्चत्वारिंशत्, एतेषु चोक्तप्रकारेण द्वौ द्वावेव वेदौ लब्धौ, ततः प्रत्येकं षोडश भङ्गाः, ततश्चतुश्चत्वारिंशत् षोडशभिर्गुणिताः सप्त शतानि चतुरुत्तराणि भवन्ति, तानि सर्वाणि पूर्वराशौ प्रक्षिप्यन्ते। तथाऽविरतसम्यग्दृष्टेरौदारिकमिश्रे येऽष्टोदयस्थानविकल्पास्ते पुंवेदसहिता एव प्राप्यन्ते, तिर्यङ्मनुष्येषु स्त्रीवेदनपुंसकवेदिषु मध्येऽविरतसम्यग्दृष्टेरनुत्पादात्। एतेषु चैकेन वेदेन प्रत्येकमष्टावेव लभ्यन्ते, ततोऽष्टावष्टभिर्गुणयित्वा पूर्वराशौ प्रक्षिप्यन्ते, ततो जातानि चतुर्दश सहस्राणि शतमेकं चैकोनसप्तत्यधिकं १४१६९, एतावन्तो मिथ्यादृष्ट्यादिषु सूक्ष्मसम्परायान्तेषु गुणस्थानेषूदयभङ्गा योगगुणिताः प्राप्यन्ते। प्रतिगुणस्थानं पुनरेवं—मिथ्यादृष्टावुदयस्थानभङ्गा अष्टौ, ते चतुर्विंशत्या गुण्यन्ते, जातं द्विनवत्युत्तरं शतं। तत्र नव योगाः प्राग्वत्, दशमश्च वैक्रियकाययोग इत्येतैर्दशभिर्गुणने जातान्येकोनविंशतिशतानि विंशत्युत्तराणि। तथा वैक्रियमिश्रादियोगत्रये प्रत्येकं चतस्रश्चतुर्विंशतयश्चतुर्विंशत्या गुण्यन्ते, षण्णवतिर्भवति, वैक्रियमिश्रादित्रयेण गुणने जाते द्वे शते अष्टाशीत्युत्तरे, तयोः पूर्वराशौ प्रक्षेपे द्वाविंशतिशतान्यष्टोत्तराणि स्युः। सासादने चत्वारो भङ्गाश्चतुर्विंशतिगुणिताः षण्णवतिः स्युः, ते द्वादशयोगैर्गुण्यन्ते, जातान्येकादश शतानि द्विपञ्चाशदुत्तराणि। सासादनस्य वैक्रियमिश्रस्थस्य चत्वारो भङ्गाः, तत्र नपुंसकवेदो न स्यात्, ततः प्रत्येकं षोडश भङ्गाः, तैश्चत्वारो गुणिता जाताश्चतुःषष्टिः, ते पूर्वराशौ क्षिप्यन्ते, जातानि द्वादश शतानि

षोऽशोत्तराणि । एवं मिश्रादिष्वपि पूर्वोक्तानुसारेणावगन्तव्यं । अथ पदसङ्ख्या योगगुणिता ज्ञाप्यते—तत्र मिथ्यादृष्टेरष्टषष्टिः पदध्रुवकाः, ते त्रयोदशभिर्योगैर्गुण्यन्ते, जातान्यष्टौ शतानि चतुरशीत्यधिकानि ८०४ । सासादने द्वात्रिंशत् पदध्रुवकाः, तेऽपि त्रयोदशभिर्योगैर्गुण्यन्ते, जातानि षोऽशाधिकानि चत्वारि शतानि ४१६ । मिश्रे द्वात्रिंशत् पदध्रुवकाः, ते दशभिर्योगैर्गुण्यन्ते, जातानि विंशानि त्रीणि शतानि ३२० । अविरतसम्यग्दृष्टौ षष्टिः पदध्रुवकाः, ते त्रयोदशभिर्योगैर्गुण्यन्ते, जातानि सप्त शतान्यशीत्यधिकानि ७८० । देशविरते द्विपञ्चाशत्पदध्रुवकाः, ते चैकादशभिर्योगैर्गुण्यन्ते, जातानि पञ्च शतानि द्विसप्तत्यधिकानि ५७२ । प्रमत्तसंयतेऽपि चतुश्चत्वारिंशत्पदध्रुवकाः, ते त्रयोदशभिर्योगैर्गुण्यन्ते, जातानि पञ्च शतानि द्विसप्तत्यधिकानि ५७२ । अप्रमत्तसंयतेऽपि चतुश्चत्वारिंशत्पदध्रुवकाः, ते चैकादशभिर्योगैर्गुण्यन्ते-जातानि चत्वारि शतानि चतुरशीत्यधिकानि ४०४ । अपूर्वकरणे विंशतिः पदध्रुवकाः, ते नवभिर्योगैर्गुण्यन्ते, जातमशीतं शतं १८० । सर्वसङ्ख्यया द्विचत्वारिंशच्छतान्यष्टाधिकानि ४२०८ । एतानि चतुर्विंशत्या गुण्यन्ते, जातं द्विनवत्यधिकनवशतोत्तरं लक्षं १००९९२ । तथा द्विकोदयपदानि चतुर्विंशतिः, एकोदयपदानि च पञ्च, सर्वमीलने एकोनत्रिंशत्, ते नवभिर्योगैर्गुण्यन्ते, जातमेकषष्ट्यधिकं शतद्वयं, तच्च पूर्वराशौ क्षिप्यते, ततो जातमेकं लक्षं द्वादश च शतानि त्रिपञ्चाशदधिकानि १०१२५३ । अस्माच्च राशेरसंज्ञवीनि पदानि शोध्यन्ते, तद्यथा—सप्तोदय एकः अष्टोदयौ द्वौ नवोदयश्चैक इत्येतेऽनन्तानुबन्ध्युदयरहिताः । तत्र सर्वसङ्ख्यया द्वात्रिंशत्पदध्रुवकाः, ते वैक्रियमिश्रादियोगत्रये न संज्ञवन्ति, हेतुः प्रागेवोक्तः, ततो द्वात्रिंशत्त्रिभिर्गुणिता जाताः षण्णवतिः, ते चतुर्विंशत्या गुण्यन्ते, जातानि त्रयोविंशतिशतानि चतुरुत्तराणि

२३०४। एतावन्ति पदानि मिथ्यादृष्टेरसंज्ञवीनि। तथा सासादनस्य वैक्रियमिश्रकाययोगे वर्त्तमानस्य नपुंसकवेदोदयो न घटते, हेतुस्तूक्त एव, नपुंसकवेदेन चाष्टौ ञङ्का लभ्यन्ते, ते द्वात्रिंशता पदध्रुवकैर्गुण्यन्ते, जाते द्वे शते षट्पञ्चाशदधिके २५६। इयन्ति पदानि सासादने न संज्ञवन्ति। तथाऽविरतसम्यग्दृष्टेः कार्मणकाययोगिनो वैक्रियमिश्रकाययोगिनो वा स्त्रीवेदोदयो नोपपद्यते, अष्टषष्टिश्च तत्र पदध्रुवकाः, स्त्रीवेदेन चाष्टौ ञङ्का लभ्यन्ते, ततः षष्टिरष्टभिर्गुणिताश्चत्वारि शतान्यशीत्यधिकानि ञवन्ति ४८०। एतानि च प्रत्येकं कार्मणे वैक्रियमिश्रे च न संज्ञवन्तीति नव शतानि षष्ट्यधिकानि ञवन्ति ९६०। तथाऽविरतसम्यग्दृष्टेरौदारिकमिश्रकाययोगे वर्त्तमानस्य स्त्रीनपुंसकवेदौ न ञवतः, ताभ्यां च षोऊश ञङ्का लभ्यन्ते, ततः षष्टिः षोऊशभिर्गुणिता जातानि नव शतानि षष्ट्यधिकानि ९६०। सर्वसङ्ख्ययाऽविरतसम्यग्दृष्टावसंज्ञवीनि पदानि विंशान्येकोनविंशतिशतानि १९२०। तथा प्रमत्तसंयतस्याहारके आहारकमिश्रे च स्त्रीवेदो न लभ्यते, प्रमत्तसंयते च पदध्रुवकाश्चतुश्चत्वारिंशत् स्त्रीवेदेन चाष्टौ ञङ्का लभ्यन्ते, ततश्चतुश्चत्वारिंशदष्टगुणितास्त्रीणि शतानि द्विपञ्चाशदधिकानि ३५२ स्युः, तानि चाहारकद्विकेन गुणितानि, सर्वसङ्ख्यया प्रमत्तसंयतस्यासंज्ञवीनि पदानि सप्त शतानि चतुरुत्तराणि ७०४। अप्रमत्तसंयतस्याप्युक्तरीत्याऽऽहारककाययोगे त्रीणि शतानि द्विपञ्चाशदधिकानि ३५२ पदान्यसंज्ञवीनि। सर्वसङ्ख्ययाऽसंज्ञवीनि पदानि पञ्चपञ्चाशच्छतानि षट्त्रिंशदुत्तराणि, एतानि पूर्वराशेः शोध्यन्ते, ततो ञवन्ति पञ्चनवतिसहस्राणि सप्त शतानि च सप्तदशोत्तराणि। एतावन्ति योगगुणितानि पदानि मोहनीयस्य सकलगुणस्थानकेषु ञवन्ति। तदेवमुक्तो मोहनीयस्य प्रागनुक्तो विशेषः।

अथ नामकर्मणो विशेष उच्यते—तत्र नाम्नोऽव्यक्तबन्धोदयसत्तास्थानाभिधानप्रस्तावे गुणस्थानेषु गतिषु च बन्धोदयसत्तास्थानानि यद्यपि सामान्यतः कथितानि तथापि नाग्रपञ्चितङ्गैः सामान्यतः कथितान्यवगन्तुं शक्यन्ते इति तेषामवबोधाय तानि प्रपञ्चतः कथ्यन्ते—तत्र मिथ्यादृष्टौ नाम्नः षड् बन्धस्थानानि—त्रयोविंशतिः पञ्चविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशच्चेति । तत्रापर्याप्तैकेन्द्रियप्रायोग्यं बध्नतस्त्रयोविंशतिः, तस्यां च बध्यमानायां बादरसूक्ष्मप्रत्येकसाधारणैश्चत्वारो भङ्गाः । पर्याप्तैकेन्द्रियप्रायोग्यमपर्याप्तद्वित्रिचतुःपञ्चेन्द्रियतिर्यङ्मनुष्यप्रायोग्यं च बध्नतः पञ्चविंशतिः । तत्र पर्याप्तैकेन्द्रियप्रायोग्यायां पञ्चविंशतौ बध्यमानायां भङ्गा विंशतिः । अपर्याप्तद्वीन्द्रियादिप्रायोग्यायां तु बध्यमानायां प्रत्येकमेकैको भङ्ग इति सर्वसङ्ख्यया पञ्चविंशतिः । पर्याप्तैकेन्द्रियप्रायोग्यं बध्नतः षड्विंशतिः, तस्यां च बध्यमानायां भङ्गाः षोडश । देवगतिप्रायोग्यं नरकगतिप्रायोग्यं च बध्नतोऽष्टाविंशतिः, तत्र देवगतिप्रायोग्यायामष्टाविंशतावष्टौ भङ्गाः, नरकगतिप्रायोग्यायां चैक इति सर्वसङ्ख्यया नव । पर्याप्तद्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यप्रायोग्यं बध्नत एकोनत्रिंशत् । तत्र पर्याप्तद्वित्रिचतुरिन्द्रियप्रायोग्यायामेकोनत्रिंशति बध्यमानायां प्रत्येकमष्टौ भङ्गाः । तिर्यक्पञ्चेन्द्रियप्रायोग्यायां षट्चत्वारिंशच्छतान्यष्टाधिकानि ४६०८ । मनुष्यगतिप्रायोग्यायामप्येतावन्त एव भङ्गाः । सर्वसङ्ख्यया चत्वारिंशदधिकानि द्विनवतिशतानि ९२४० । देवगतिप्रायोग्या त्वेकोनत्रिंशत्तीर्थकरनामसहितेति मिथ्यादृष्टेर्न बन्धमायाति । पर्याप्तद्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियप्रायोग्यं बध्नतस्त्रिंशत्, तत्र पर्याप्तद्वित्रिचतुरिन्द्रियप्रायोग्यायां त्रिंशति बध्यमानायां प्रत्येकमष्टौ भङ्गाः । तिर्यक्पञ्चेन्द्रियप्रायोग्यायां त्वष्टाधिकानि षट्चत्वारिंशच्छतानि ४६०८ । सर्वसङ्ख्यया द्वात्रिंशदुत्तराणि षट्-

चत्वारिंशच्छतानि ४६३२ । या च मनुष्यगतिप्रायोग्या जिननामसहिता त्रिंशत् या च देवगतिप्रायोग्याऽऽहारकद्विकसहिता ते उभे अपि मिथ्यादृष्टेर्न बन्धमायातः । तथा मिथ्यादृष्टेर्नवोदयस्थानानि, तद्यथा—एकविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशत् । एतानि सर्वाण्यपि नानाजीवापेक्षया यथा प्रागुक्तानि तथाऽत्रापि वाच्यानि, केवलमाहारकसंयतानां वैक्रियसंयतानां केवलिनां च सम्बन्धीनि न वाच्यानि, तेषामिमथ्यादृष्टित्वात्, सर्वसङ्ख्यया मिथ्यादृष्टावुदयस्थानभङ्गाः सप्त सहस्राणि सप्त शतानि त्रिसप्तत्यधिकानि ७७७३ ।

तत्र यन्त्रकं ।

२१	४१	एकेंद्रियाणां १ वि.१ति. पं. १ म.१ दे.८ना.१	२८	११९९	वि.६ति.पं१७६वै.ति.पं.१६म.५७६वै.म.८दे.१६ना.१.
२४	११	एकेंद्रियाणां	२९	१७८१	वि.१३ति.पं.११५३वै.ति.पं.१६म.५७६वै.म.८दे.१६ना१.
२५	३२	ए. ७ वै. ति. ८ दे. ८ ना. १ वै. म.८	३०	२९१४	वि. १८ ति. पं.१७३८ वै. ति. पं. ८ म. ११५३ दे. ८
२६	६००	ए. १३ वि. १ ति. पं. ३८१ म. ३८१	३१	११६४	वि. १३ ति. पं. ११५३
२७	३१	ए ६ वै. ति. पं. ८ वै. म. ८ दे. ८ ना. १			सर्वाग्रं ७७७३

तथा मिथ्यादृष्टेः षट् सत्तास्थानानि, तद्यथा—द्विनवतिरेकोननवतिरष्टाशीतिः षण्मशीतिरशीतिरष्टसप्ततिश्च । तत्र द्विनवतिश्चतुर्गतिकानामपि मिथ्यादृष्टीनां, एकोननवतिः प्राग्बद्धनरकायुष्कस्य वेदकसम्यग्दृष्टेस्तीर्थकरनाम बध्ध्वा परिणामपरावृत्त्या मिथ्यात्वं गतस्य नरकेषु समुत्पद्यमानस्यान्तर्मुहूर्त्तं यावदुत्पत्तेरूर्ध्वमन्तर्मुहूर्त्तानन्तरं तु सोऽपि सम्यक्त्वं

प्रतिपद्यते, अष्टाशीतिश्चतुर्गतिकानामपि मिथ्यादृष्टीनां, षण्णशीतिरशीतिश्चैकेन्द्रियेषु यथायोगं देवगतिप्रायोग्ये नरकगतिप्रायोग्ये चोद्वलिते सति लभ्यते, एकेन्द्रियनवाकुद्धृत्य विकलेन्द्रियेषु तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु वा समुत्पन्नानां सर्वपर्याप्तिभावादूर्ध्वमप्यन्तर्मुहूर्त्तं यावल्लभ्यते, अष्टसप्ततिस्तेजोवायूनां मनुष्यद्विके उद्वलितेऽवसेया, तन्नवाकुद्धृत्योत्पन्नानामन्तर्मुहूर्त्तं यावत् परतो नियमेन मनुष्यद्विकबन्धसंभवात्। तदेवं सामान्येन मिथ्यादृष्टेर्बन्धोदयसत्तास्थानान्युक्तानि। अथ संवेध उच्यते—तत्र मिथ्यादृष्टेस्त्रयोविंशतिं बध्नतः प्रागुक्तानि नवाप्युदयस्थानानि ज्ञेयानि। नवरमेकविंशतिपञ्चविंशतिसप्तविंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंशद्रूपेषु षट्सूदयस्थानेषु देवनैरयिकाश्रिता भङ्गा न प्राप्यन्ते, तेषां त्रयोविंशत्यबन्धकत्वात् तस्या अपर्याप्तैकेन्द्रियप्रायोग्यत्वात्। सत्तास्थानि पञ्च—द्विनवतिरष्टाशीतिः षण्णशीतिरशीतिरष्टसप्ततिश्चेति। तत्रैकविंशतिचतुर्विंशतिपञ्चविंशतिषड्विंशत्युदयेषु पञ्च सत्तास्थानानि। नवरं पञ्चविंशत्युदये तेजोवायुकायिकानधिकृत्याष्टसप्ततिः प्राप्यते। षड्विंशत्युदये तेजोवायुकायिकान् तन्नवाकुद्धृत्य विकलेन्द्रियतिर्यक्पञ्चेन्द्रियेषु वोत्पन्नानाश्रित्य प्राप्यते। सप्तविंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्रूपेषूदयेषु अष्टसप्ततिवर्जानि चत्वारि। सर्वसङ्ख्यया त्रयोविंशतिबन्धके चत्वारिंशत्सत्तास्थानानि। एवं पञ्चविंशतिषड्विंशतिबन्धकानामपि वाच्यं। केवलमिह देवोऽप्यात्मीयेषु सर्वेष्वप्युदयस्थानेषु वर्त्तमानः पर्याप्तैकेन्द्रियप्रायोग्यां पञ्चविंशतिं च बध्नन् संग्राह्यः। नवरं पञ्चविंशतिबन्धे बादरपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभदुर्भगानादेययशःकीर्त्ययशःकीर्त्तिपदैरष्टौ भङ्गाः, न शेषाः, सूक्ष्मसाधारणपर्याप्तेषु देवस्यानुत्पादात्। सत्तास्थानभावना पञ्चविंशतिबन्धे षड्विंशतिबन्धे च प्राग्वत्। सर्वसङ्ख्यया चत्वारिंशत् प्रत्येकं सत्तास्थानानि। अष्टावि-

शतिबन्धकस्य मिथ्यादृष्टेर्द्वे उदयस्थाने त्रिंशदेकत्रिंशच्चेति, तत्र त्रिंशत्तिर्यक्पञ्चेन्द्रियमनुष्यानधिकृत्य, एकत्रिंशत्तिर्यक्पञ्चेन्द्रियानेव सत्तास्थानानि चत्वारि—द्विनवतिरेकोननवतिरष्टाशीतिः षण्णवतिश्च। तत्र त्रिंशदुदये चत्वार्यपि, तत्राप्येकोननवतिर्बध्नजिननाम्नो वेदकसम्यग्दृष्टेः परिणामपरावृत्त्या मिथ्यात्वं गतस्य नरकाभिमुखस्य तद्योग्यामष्टाविंशतिं बध्नतोऽवसेया। शेषाणि तु त्रीण्यविशेषेण तिर्यङ्मनुष्याणां। एकत्रिंशदुदये एकोननवतिवर्जानि त्रीणि, एकोननवतिस्तु जिननामसहितेति तिर्यक्षु न संभवति। सर्वसङ्ख्याऽष्टाविंशतिबन्धे सत्तास्थानानि सप्त। देवगतिप्रायोग्यवर्जा शेषामेकोनत्रिंशतं विकलेन्द्रियतिर्यक्पञ्चेन्द्रियप्रायोग्यां मनुष्यगतिप्रायोग्यां च बध्नतो मिथ्यादृष्टेः सामान्येन नवापि प्राक्तनान्युदयस्थानानि, षट् च सत्तास्थानानि—द्विनवतिरेकोननवतिरष्टाशीतिः षण्णवतिरशीतिरष्टसप्ततिश्च। तत्रैकविंशत्युदये सर्वाण्यपीमानि प्राप्यन्ते, तत्राप्येकोननवतिर्बध्नतीर्थकरनामानं मिथ्यात्वगतं नैरयिकमधिकृत्य ज्ञेया, द्विनवतिरष्टाशीतिश्च देवनैरयिकमनुजविकलेन्द्रियतिर्यक्पञ्चेन्द्रियैकेन्द्रियानपेक्ष्य, षण्णवतिश्च विकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुजैकेन्द्रियानधिकृत्य, अष्टसप्ततिरेकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य। चतुर्विंशत्युदये एकोननवतिवर्जानि शेषाणि पञ्च सत्तास्थानानि, तानि चैकेन्द्रियानेवाधिकृत्य ज्ञेयानि, अन्यत्र चतुर्विंशत्युदयाभावात्। पञ्चविंशत्युदये षण्णवतिरपि सत्तास्थानानि यथैकविंशत्युदये भावितानि तथा भावनीयानि। षड्विंशत्युदये एकोननवतिवर्जानि पञ्च प्राग्वद्भाव्यानि, एकोननवतिश्च नरकेषूत्पित्सोः संभविनी, न च नैरयिकस्य षड्विंशत्युदय इति तद्वर्जनं। सप्तविंशत्युदयेऽष्टसप्ततिवर्जानि पञ्च, तत्रैकोननवतिः प्रागुक्तस्वरूपं नैरयिकमधिकृत्य, द्विनवतिरष्टाशीतिश्च देवनैरयिकमनुजविकलेन्द्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य,

षण्णशीतिरशीतिश्चैकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यानधिकृत्य, अष्टसप्ततिस्तु न संज्ञवति, तेजोवायुवर्जानामातपोद्योतान्यतरसहितानां नारकादीनां वा सप्तविंशत्युदयस्य ज्ञावात् तेषां चाष्टसप्ततेर्मनुष्यद्विकबन्धावश्यकत्वेनासंज्ञवात्। एतान्येव पञ्चाष्टाविंशत्युदयेऽपि द्रष्टव्यानि, तत्रैकोननवतिद्विनवत्यष्टाशीतिज्ञावना प्राग्वदेव, षण्णशीतिरशीतिश्च विकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यानधिकृत्यावसेया। एवमेकोनत्रिंशदुदयेऽप्येतान्येव सत्तास्थानानि ज्ञावनीयानि। त्रिंशदुदये चत्वारि—द्विनवतिरष्टाशीतिः षण्णशीतिरशीतिश्चेति। एतानि विकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यानधिकृत्य ज्ञेयानि। एकत्रिंशदुदयेऽप्येतान्येव चत्वारि, तानि विकलेन्द्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य द्रष्टव्यानि। सर्वसङ्ख्यया मिथ्यादृष्टेरेकोनत्रिंशतं बध्नतः पञ्चचत्वारिंशत्सत्तास्थानानि। देवगतिप्रायोग्या या त्वेकोनत्रिंशत्सा मिथ्यादृशा न बध्यते, हेतुस्तत्रोक्त एव। तथा मनुष्यगतिदेवगतिप्रायोग्यवर्जां शेषां त्रिंशतं विकलेन्द्रियतिर्यक्पञ्चेन्द्रियप्रायोग्यां बध्नतः सामान्येन प्रागुक्तानि नवोदयस्थानानि, पञ्च च सत्तास्थानानि एकोननवतिवर्जानि एकोननवतिस्त्वेकोननवतिसत्कर्मणस्तिर्यग्गतिप्रायोग्यबन्धारम्ज्ञासंज्ञवान्न संज्ञवति, तानि च पञ्च सत्तास्थानान्येकविंशतिचतुर्विंशतिपञ्चविंशतिषड्विंशत्युदयेषु प्राग्वज्ज्ञावनीयानि। सप्तविंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्रूपेषु पञ्चसूदयस्थानेष्वष्टसप्ततिवर्जानि चत्वारि चत्वारि सत्तास्थानानि। अष्टसप्ततिनिषेधहेतुश्च प्रागुक्त एव स्मर्त्तव्यः। सर्वसङ्ख्यया मिथ्यादृष्टेस्त्रिंशतं बध्नतश्चत्वारिंशत्सत्तास्थानानि। मनुजगतिदेवगतिप्रायोग्या च त्रिंशन्मिथ्यादृष्टेर्न बन्धमायाति, मनुजगतिप्रायोग्यायास्त्रिंशतो जिननाम्ना देवगतिप्रायोग्यायाश्चाहारकद्विकेन सहितत्वात्, जिननामाहारकद्विकयोश्च मिथ्यादृष्टेर्बन्धायोगात्। तदेवमुक्तो मिथ्यादृष्टेर्बन्धोदयसत्तासंवेधः।

सम्प्रति सासादनस्य बन्धोदयसत्तास्थानान्युच्यन्ते—सासादनस्य त्रीणि बन्धस्थानानि—अष्टाविंशतिरेकोनत्रिंशत्त्रिंशच्चेति । तत्राष्टाविंशतिर्द्विधा—देवगतियोग्या नरकगतियोग्या (च) । तत्र द्वितीया सासादनस्य बन्धानर्हा, आद्यायाश्च बन्धकास्तिर्यक्पञ्चेन्द्रिया मनुष्याश्च । तस्यां च बध्यमानायामष्टौ भङ्गाः । एकोनत्रिंशतं तिर्यक्पञ्चेन्द्रियप्रायोग्यां मनुष्यप्रायोग्यां वा सासादना एकेन्द्रिया विकलेन्द्रिया मनुष्या देवा नैरयिकाश्च बध्नन्ति, न शेषां, अत्र भङ्गाश्चतुःषष्टिशतानि, तथाहि—द्विविधामप्येकोनत्रिंशतं बध्नतः सासादना द्वुएकं सेवार्त्तं च न बध्नन्ति, मिथ्यात्वोदयाभावात् । ततस्तिर्यक्पञ्चेन्द्रियप्रायोग्यामेकोनत्रिंशतं बध्नतः पञ्चभिः संस्थानैः पञ्चभिः संहननैः शुभाशुभखगतिभ्यां स्थिरास्थिराभ्यां शुभाशुभाभ्यां सुभगदुर्भगाभ्यां सुस्वरदुःस्वराभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्त्तिभ्यां च भङ्गा द्वात्रिंशच्छतानि ३२०० । इयन्त एवेत्थं मनुष्यगतिप्रायोग्यामपि बध्नतः ३२०० । सर्वसङ्ख्यया चतुःषष्टिशतानि । त्रिंशतं च तिर्यक्पञ्चेन्द्रियप्रायोग्यामेव सोद्योतां सासादना एकेन्द्रिया विकलेन्द्रियास्तिर्यक्पञ्चेन्द्रिया मनुष्या देवा नैरयिका वा बध्नन्ति, न शेषां, तां च बध्नतां भङ्गाः प्राग्वत् द्वात्रिंशच्छतानि । सर्वबन्धस्थानभङ्गा अष्टोत्तराणि षण्णवतिशतानि ९६०८ । सासादनस्योदयस्थानानि सप्त, तथाहि—एकविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्च । तत्रैकविंशत्युदय एकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवानधिकृत्य, नरकेषु सासादनानुत्पत्तेस्तद्विषयैकविंशत्युदयाभावाच्च । तत्रैकेन्द्रियाणां एकविंशत्युदये बादरपर्याप्तेन सह यशःकीर्त्ययशःकीर्त्तिभ्यां द्वावेव भङ्गौ, न शेषाः, सूक्ष्मेष्वपर्याप्तेषु मध्ये सासादनस्यानुत्पादात् । अत एव विकलेन्द्रियाणां तिर्यक्पञ्चेन्द्रियाणां मनुष्याणां च प्रत्येकमपर्याप्तेन सह य एकैको भङ्गः स

इह न भवति, किं तु शेषा एव। ते च विकलेन्द्रियाणां प्रतिभेदं द्वौ द्वाविति षट्, तिर्यक्पञ्चेन्द्रियाणामष्टौ, मनुष्याणामष्टौ, देवानामष्टौ, सर्वसङ्ख्ययैकविंशत्युदये द्वात्रिंशत्। द्वाविंशत्युदय एकेन्द्रियेषूत्पन्नमात्रस्य, अत्रापि बादरपर्याप्तेन सह यशःकीर्त्ययशःकीर्तिभ्यां द्वावेव भङ्गौ संभवतः, न शेषाः, सूक्ष्मेषु साधारणेषु तेजोवायुषु च मध्ये सासादनस्यानुत्पादात्। पञ्चविंशत्युदयो देवेषूत्पन्नमात्रस्य, तत्राष्टौ भङ्गाः, ते च स्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्तिपदैः प्रत्येयाः। षड्विंशत्युदयो विकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्येषु मध्ये उत्पन्नमात्रस्य, अत्राप्यपर्याप्तकसहित एकैको भङ्गोऽसंभवी, अपर्याप्तकमध्ये सासादनस्यानुत्पादात्, शेषास्तु सर्वेऽपि संभविनः, ते च विकलेन्द्रियाणां प्रत्येकं द्वाविति षट्, तिर्यक्पञ्चेन्द्रियाणां द्वे शते अष्टाशीत्यधिके २८८, मनुष्याणामपि ते एव २८८, सर्वसङ्ख्यया षड्विंशत्युदये पञ्च शतानि द्व्यशीत्यधिकानि। सप्तविंशत्युदयाष्टाविंशत्युदयौ उत्पत्त्यनन्तरमन्तर्मुहूर्त्तानन्तरभाविनावुत्पत्त्यनन्तरमुत्कर्षतः किञ्चिदूनषण्मावलिकामात्रकालभाविनि सासादने न घटेते। एकोनत्रिंशदुदयो देवनैरयिकाणां स्वस्थानगतानां प्रथमसम्यक्त्वात्प्रच्यवमानानामाप्यंते, तत्र देवस्याष्टौ नैरयिकस्य चैक इति सर्वसङ्ख्यया नव भङ्गाः। त्रिंशदुदयस्तिर्यङ्मनुष्याणां पर्याप्तानां प्रथमसम्यक्त्वात्प्रच्यवमानानां देवानां वोत्तरवैक्रियस्थानां सासादनानां, तत्र तिर्यक्पञ्चेन्द्रियाणां मनुष्याणां च प्रत्येकं द्विपञ्चाशान्येकादश शतानि ११५२, देवस्याष्टाविति सर्वसङ्ख्यया द्वादशाधिकानि त्रयोविंशतिशतानि भङ्गाः २३१२। एकत्रिंशदुदयस्तिर्यक्पञ्चेन्द्रियाणां पर्याप्तानां प्रथमसम्यक्त्वात्प्रच्यवमानानां, अत्र भङ्गा एकादश शतानि द्विपञ्चाशदधिकानि ११५२, सर्वसङ्ख्यया सप्तनवत्यधिकानि चत्वारिंशच्छतानि सासादनस्योदयभङ्गाः। सत्तास्थाने द्वे—द्विनवतिरष्टा-

शीतिश्च, तत्र द्विनवतिराहारकचतुष्टयं बध्ध्वोपशमश्रेणिमारुह्य प्रतिपततः सासादनभावमुपगतस्य, न शेषस्य । अष्टाशीतिश्चतुर्गतिकानामपि सासादनानां । अथ संवेध उच्यते—तत्राष्टाविंशतिं बध्नतः सासादनस्य द्वे उदयस्थाने—त्रिंशदेकत्रिंशच्च । अष्टाविंशतिर्हि सासादनस्य बन्धयोग्या देवगतिप्रायोग्या, न च करणापर्याप्तः सासादनो देवगतिप्रायोग्यां बध्नाति, ततः शेषा उदया नोपपद्यन्ते । तत्र मनुष्यमधिकृत्य त्रिंशदुदये द्वे अपि ९२-८८ सत्तास्थाने । तिर्यक्पञ्चेन्द्रियानधिकृत्याष्टाशीतिरेव, द्विनवतेरुपशमश्रेणीतः प्रतिपात एव लाभात्, तिरश्चां चोपशमश्रेण्यसंभवात् । एकत्रिंशदुदये त्वष्टाशीतिरेव, यतोऽसौ तिर्यक्पञ्चेन्द्रियाणामेव, न च तेषां द्विनवतिर्घटते। एकोनत्रिंशतं तिर्यक्पञ्चेन्द्रियमनुष्यप्रायोग्यां बध्नतः सप्ताप्युदयस्थानानि, तत्रैकेन्द्रियविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवनैरयिकाणां सासादनानां स्वस्वोदयस्थानेषु वर्त्तमानानामेकमेव सत्तास्थानमष्टाशीतिः । नवरं मनुष्यस्य त्रिंशदुदये वर्त्तमानस्योपशमश्रेणीतः प्रतिपततः सासादनस्य द्विनवतिः । एवं त्रिंशद्बन्धकस्यापि वाच्यं ।

अथ सम्यग्मिथ्यादृष्टेर्बन्धोदयसत्तास्थानान्यभिधीयन्ते—तत्र सम्यग्मिथ्यादृष्टेर्द्वे बन्धस्थाने अष्टाविंशतिरेकोनत्रिंशच्च । तत्र तिर्यङ्मनुष्याणां सम्यङ्मिथ्यादृष्टीनां देवगतिप्रायोग्यमेव बन्धमायाति, ततस्तेषामष्टाविंशतिः, तत्र भङ्गा अष्टौ । एकोनत्रिंशन्मनुष्यगतिप्रायोग्यं बध्नतां देवनैरयिकाणां, तत्राप्यष्टौ भङ्गाः । ते चोच्चयत्रापि स्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्त्तिपदैः, शेषास्तु परावर्त्तमानाः प्रकृतयः शुभा एव सम्यग्मिथ्यादृष्टीनां बन्धमायान्ति, ततः शेषभङ्गा न प्राप्यन्ते । त्रीण्युदयस्थानानि—एकोनत्रिंशत्त्रिंशदेकत्रिंशच्च । तत्रैकोनत्रिंशति देवानधिकृत्याष्टौ, नैरयिकानधि-

कृत्य चैक इति सर्वसङ्ख्यया नव भङ्गाः । त्रिंशति तिर्यक्पञ्चेन्द्रियानधिकृत्य सर्वपर्याप्तिपर्याप्तयोग्यानि द्विपञ्चाशान्येकादश शतानि ११५२ । मनुष्यानधिकृत्यापि तावन्त्येव ११५२ भङ्गाः । सर्वसङ्ख्यया त्रयोविंशतिशतानि चतुरुत्तराणि २३०४ । एकत्रिंशदुदयस्तिर्यक्पञ्चेन्द्रियानधिकृत्य, तत्र भङ्गा द्विपञ्चाशान्येकादश शतानि ११५२ । सर्वोदयस्थानभङ्गाश्चतुस्त्रिंशच्छतानि पञ्चषष्ट्यधिकानि ३४६५ । द्वे सत्तास्थाने—द्विनवतिरष्टाशीतिश्चेति । अथ संवेध उच्यते—सम्यङ्मिथ्यादृष्टेरष्टाविंशतिबन्धकस्य द्वे उदयस्थाने त्रिंशदेकत्रिंशच्चेति । एकैकस्मिन्नुदयस्थाने द्वे द्वे सत्तास्थाने—द्विनवतिरष्टाशीतिश्च । एकोनत्रिंशद्बन्धकस्यैकोनत्रिंशदात्मकमेकमुदयस्थानं, अत्रापि ते एव द्वे सत्तास्थाने । तदेवमेकैकस्मिन्नुदयस्थाने द्वे द्वे सत्तास्थाने इति सर्वसङ्ख्यया षट् ।

सम्प्रत्यविरतसम्यग्दृष्टेर्बन्धोदयसत्तास्थानानि वाच्यानि—तत्राविरतसम्यग्दृष्टेस्त्रीणि बन्धस्थानानि—अष्टाविंशतिरेकोनत्रिंशत्त्रिंशच्च । तत्र तिर्यङ्मनुष्याणामविरतसम्यग्दृष्टीनां देवगतिप्रायोग्यं बध्नतामष्टाविंशतिः, अत्राष्टौ भङ्गाः, ते हि न शेषगतिप्रायोग्यं बध्नन्ति, तेन नरकगतिप्रायोग्याऽष्टाविंशतिर्न लभ्यते । मनुष्याणां देवगतिप्रायोग्यं जिननामसहितं बध्नतामेकोनत्रिंशत्, अत्राप्यष्टौ भङ्गाः । देवनैरयिकाणां मनुष्यगतिप्रायोग्यं बध्नतामेकोनत्रिंशत्, अत्रापि त एवाष्टौ भङ्गाः । तेषामेव मनुष्यगतिप्रायोग्यं जिननामसहितं बध्नतां त्रिंशत्, अत्रापि त एवाष्टौ भङ्गाः । अष्टावुदयस्थानानि—एकविंशतिः पञ्चविंशत्यादीन्येकत्रिंशदन्तानि च । तत्रैकविंशत्युदयो नैरयिकतिर्यक्पञ्चेन्द्रियमनुष्यदेवानधिकृत्य क्षायिकसम्यग्दृष्टेः प्राग्बद्धायुष्कस्यैतेषु सर्वेषूत्पादसंभवात् । अविरतसम्यग्दृष्टिरपर्याप्तेषु नोत्पद्यते, तेनापर्याप्तोदयवर्जाः शेषाः

सर्वेऽपि ज्ञङ्गा ज्ञेयाः, ते च पञ्चविंशतिः, तत्र तिर्यक्पञ्चेन्द्रियान्मनुष्यान् देवाँश्चाधिकृत्य प्रत्येकमष्टौ नैरयिकानधिकृत्य चैक इति । पञ्चविंशतिसप्तविंशत्युदयौ देवनैरयिकान् वैक्रियतिर्यञ्चमनुष्याँश्चाधिकृत्यावसेयौ । तत्र नैरयिकः क्षायिकसम्यग्दृष्टिर्वेदकसम्यग्दृष्टिर्वा, देवस्त्रिविधसम्यग्दृष्टिरपि । उक्तं च सप्ततिकाचूर्णौ—"पणवीससत्तावीसोदया देवनेरइए वेउव्वियतिरिमणुए य पकुच्च णेरइगा खइगवेयगसम्मद्दिट्ठी देवो तिविहसम्मद्दिट्ठी वि त्ति" । ज्ञङ्गा अत्र सर्वेऽप्यात्मीया ऽष्टव्याः । शतकबृहच्चूर्ण्यनुसारेण तु देवोऽपि द्विविधसम्यग्दृष्टिरेव ग्राह्यो ज्ञवति, तस्यापर्याप्तस्यौपशमिकसम्यक्त्वनिषेधात् । तथा च तत्रोक्तं—"जो ज्ञवसमसम्मद्दिट्ठी ज्ञवसमसेढीए कालं करेइ सो पढमसमए चेव सम्मत्तपुंजं ज्ञदयावलिआए छोढूणं सम्मत्त पोग्गले वेएइ, तेण न ज्ञवसमसम्मद्दिट्ठी अपज्जत्तगो लब्भइ त्ति" । तत्त्वमत्रत्यं केवलिगम्यं । षड्विंशत्युदयस्तिर्यञ्चमनुष्याणां क्षायिकवेदकसम्यग्दृष्टीनां, औपशमिकसम्यग्दृष्टिश्च तिर्यञ्चमनुष्येषु नोत्पद्यते इति त्रिविधदृष्टीनामिति नोक्तं, वेदकसम्यग्दृष्टिता च तिरश्चो द्वाविंशतिसत्कर्मणो ज्ञेया । अष्टाविंशत्येकोनत्रिंशदुदयौ नैरयिकतिर्यञ्चमनुष्यदेवानां । त्रिंशदुदयस्तिर्यक्पञ्चेन्द्रियमनुष्यदेवानां । एकत्रिंशदुदयस्तिर्यक्पञ्चेन्द्रियाणां । ज्ञङ्गाः स्वीयस्वीयाः सर्वेऽपि ऽष्टव्याः । चत्वारि सत्तास्थानानि त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिश्च। तत्र योऽप्रमत्तसंयतोऽपूर्वकरणो वा तीर्थकराहारकसहितामेकत्रिंशतं बध्वा पश्चादविरतसम्यग्दृष्टिर्देवो वा जातः तमधिकृत्य त्रिनवतिः । यस्त्वाहारकं बध्वा परिणामपरावृत्त्या मिथ्यात्वं गत्वा चतसृणामन्यतमस्यां गतावुत्पन्नस्तस्य तत्र गतौ भूयोऽपि सम्यक्त्वं प्रतिपन्नस्य द्विनवतिः । देवमनुष्येषु मध्ये मिथ्यात्वमप्रतिपन्नस्यापि द्विनवतिः प्राप्यते । एकोननवतिर्देवनैरयिकमनुष्याणामविरतस-

म्यग्दृष्टीनां । ते हि त्रयोऽपि तीर्थकरनामार्जयन्ति, तिर्यक्षु तीर्थकरनामसत्कर्मा नोत्पद्यत इति तदग्रहणं । अष्टाशीतिश्चतुर्गतिकानामविरतसम्यग्दृष्टीनां । अथ संवेध उच्यते—तत्राविरतसम्यग्दृष्टेरष्टाविंशतिबन्धकस्याष्टावप्युदयस्थानानि, तानि तिर्यञ्चमनुष्यानधिकृत्य। तत्रापि पञ्चविंशतिसप्तविंशत्युदयौ वैक्रियतिर्यञ्चमनुष्यानधिकृत्य, एकैकस्मिन्नुदयस्थाने द्विनवत्यष्टाशीत्यात्मके द्वे द्वे सत्तास्थाने। एकोनत्रिंशद्विधा देवगतियोग्या नरकगतियोग्या च । तत्र देवगतियोग्या जिननामसहिता, तां च मनुष्या एव बध्नन्ति। तेषामुदयस्थानानि सप्त, तद्यथा—एकविंशतिः पञ्चविंशत्यादीनि त्रिंशदन्तानि च, मनुष्याणामेकत्रिंशन्न संभवति । एकैकस्मिन्नुदयस्थाने त्रिनवत्येकोननवत्यात्मके द्वे द्वे सत्तास्थाने। मनुष्यगतिप्रायोग्यां चैकोनत्रिंशतं बध्नन्ति देवनैरयिकाः । तत्र नैरयिकाणामुदयस्थानानि पञ्च, तद्यथा—एकविंशतिः पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशच्च । देवानां पञ्च तावदेतान्येव, षष्ठं तु त्रिंशत्, सा चोद्योतवेदकानामवसेया । एकैकस्मिन् द्वे द्वे सत्तास्थाने द्विनवतिरष्टाशीतिश्च । मनुष्यगतिप्रायोग्यां त्रिंशतमविरतसम्यग्दृष्टयो देवा नैरयिकाश्च बध्नन्ति । तत्र देवानामुदयस्थानानि षट्, तानि चानन्तरोक्तान्येव, तेषु प्रत्येकं द्वे द्वे सत्तास्थाने त्रिनवतिरेकोननवतिश्च । नैरयिकाणामुदयस्थानानि पञ्च, तेषु प्रत्येकं सत्तास्थानमेकोननवतिरेवैकं, तीर्थकराहारकसत्कर्मणो नरकेष्वनुत्पादात् । तदेवं सामान्येनैकविंशत्यादिषु त्रिंशदन्तेषूदयस्थानेषु सत्तास्थानानि प्रत्येकं चत्वारि–९३–९२–८९–८८ । एकत्रिंशदुदये द्वे–९२–८८ इति, सर्वसङ्ख्यया त्रिंशत् ।

अथ देशविरतस्य बन्धादिस्थानान्युच्यन्ते–देशविरतस्य द्वे बन्धस्थाने अष्टाविंशतिरेकोनत्रिंशच्च । तत्राष्टाविंशतिर्मनुष्यस्य तिर्यक्पञ्चेन्द्रियस्य वा देशविरतस्य देवगतिप्रायोग्यं बध्नतो वेदितव्या । तत्राष्टौ भङ्गाः । सैव तीर्थकरसहितैकोन-

त्रिंशत्, सा च मनुष्यस्यैव, तिरश्चस्तीर्थकरनामकर्मबन्धाभावात्, अत्राप्यष्टौ भङ्गाः। षडुदयस्थानानि, तद्यथा—पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्च। तत्राद्यानि चत्वारि वैक्रियतिर्यङ्मनुष्याणां, अत्रैकैक एव भङ्गः,सर्वपदानां प्रशस्तत्वात्। त्रिंशत्स्त्रभावस्थानामपि तिर्यङ्मनुष्याणां, अत्र भङ्गानां चतुश्चत्वारिंशं शतं १४४। तच्च षड्भिः संस्थानैः षड्भिः संहननैः सुस्वरदुःस्वराभ्यां प्रशस्ताप्रशस्तविहायोगतिभ्यां च जायते। दुर्भगानादेययशःकीर्त्तीनामुदयो गुणप्रत्ययादेव न भवतीति तदाश्रिता विकल्पा न प्राप्यन्ते। एकत्रिंशत्तिरश्चां, तत्रापि त एव भङ्गाः। चत्वारि सत्तास्थानानि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिश्च। तत्र योऽप्रमत्तोऽपूर्वकरणो वा तीर्थकराहारकनाम्नी बध्ध्वा परिणामहासेन देशविरतो जातस्तस्य त्रिनवतिः, शेषाणां भावनाऽविरतसम्यग्दृष्टेरिव कर्त्तव्या। सम्प्रति संवेध उच्यते—तत्र मनुष्यस्य देशविरतस्याष्टाविंशतिबन्धकस्य पञ्चोदयस्थानानि, तद्यथा—पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशत्। एतेषु प्रत्येकं द्वे द्वे सत्तास्थाने—द्विनवतिरष्टाशीतिश्च। एवं तिरश्चोऽपि, नवरं तस्यैकत्रिंशदुदयोऽपि वाच्यः, तत्रापि चैते एव द्वे सत्तास्थाने। एकोनत्रिंशद्बन्धो मनुष्यस्य देशविरतस्य, तस्योदयस्थानान्यनन्तरोक्तान्येव पञ्च, तेषु प्रत्येकं द्वे द्वे सत्तास्थाने—त्रिनवतिरेकोननवतिश्च। तदेवं देशविरतस्य पञ्चविंशत्यादिषु त्रिंशदन्तेषूदयेषु चत्वारि चत्वारि सत्तास्थानानि, एकत्रिंशदुदये च द्वे इति सर्वसङ्ख्यया द्वाविंशतिः।

अथ प्रमत्तसंयतस्य बन्धादिस्थानान्यभिधेयानि—तत्र प्रमत्तसंयतस्य द्वे बन्धस्थाने—अष्टाविंशतिरेकोनत्रिंशच्च, ते च देशविरतस्येव भावनीये। पञ्चोदयस्थानानि, तद्यथा—पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशत्। एतानि सर्वा-

एयप्याहारकसंयतस्य वैक्रियसंयतस्य वा ज्ञातव्यानि । त्रिंशत्स्वज्ञावस्थसंयतस्यापि । तत्र वैक्रियसंयतानामाहारकसंयतानां च पञ्चविंशतिसप्तविंशत्युदययोः प्रत्येकमेकैको ज्ञङ्गः, अष्टाविंशतावेकोनत्रिंशति च द्वौ द्वौ, त्रिंशति चैकः, सर्वसङ्ख्यया चतुर्दश । त्रिंशदुदयः स्वज्ञावस्थस्यापीति, तत्र चतुश्चत्वारिंशं शतं ज्ञङ्गानां १४४ । तच्च देशविरतस्येव ज्ञावनीयं । सर्वसङ्ख्याऽष्टपञ्चाशं शतं १५८ । चत्वारि सत्तास्थानानि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिश्च । सम्प्रति संवेध उच्यते—अष्टाविंशतिबन्धकस्य पञ्चस्वप्युदयस्थानेषु प्रत्येकं द्विनवत्यष्टाशीत्यात्मके द्वे द्वे सत्तास्थाने । तत्राहारकसंयतस्य द्विनवतिरेव, आहारकसत्कर्मा ह्याहारकशरीरमुत्पादयतीति । वैक्रियसंयतस्य तु द्वे अपि, तीर्थकरनामसत्कर्मा चाष्टाविंशतिं न बध्नातीति त्रिनवतिरेकोननवतिश्च न प्राप्यते । एकोनत्रिंशद्बन्धकस्य पञ्चस्वप्युदयस्थानेषु प्रत्येकं द्वे द्वे सत्तास्थाने—त्रिनवतिरेकोननवतिश्च । तत्राहारकसंयतस्य त्रिनवतिरेव, तस्यैकोनत्रिंशद्बन्धकस्य नियमतस्तीर्थकराहारकसज्ञावात्, वैक्रियसंयतस्य तु द्वे अपि । तदेवं प्रमत्तसंयतस्य सर्वेष्वप्युदयस्थानेषु प्रत्येकं चत्वारि चत्वारि सत्तास्थानानि प्राप्यन्ते इति सर्वसङ्ख्यया विंशतिः ।

अधुनाऽप्रमत्तसंयतस्य बन्धादीन्युच्यन्ते—अस्य चत्वारि बन्धस्थानानि—अष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्च । तत्राद्ये द्वे प्रमत्तस्येव ज्ञाव्ये । सैवाष्टाविंशतिराहारकद्विकसहिता त्रिंशत्, तीर्थकराहारकद्विकसहिता त्वेकत्रिंशत् । एतेषु चतुर्ष्वपि बन्धस्थानेषु ज्ञङ्ग एकैक एव वेदितव्यः, अस्थिराशुज्ञायशःकीर्त्तीनामप्रमत्ते बन्धाज्ञावात् । द्वे उदयस्थाने—एकोनत्रिंशत्त्रिंशच्च । तत्रैकोनत्रिंशत्तस्य प्राप्यते यो नाम पूर्वं संयतः सन्नाहारकं वैक्रियं वा निर्वर्त्त्य पश्चादप्रमत्तज्ञावं

याति। अत्र द्वौ भङ्गौ—एको वैक्रियस्यापर आहारकस्य। त्रिंशदुदयेऽपि प्राग्वद्द्वौ भङ्गौ। तथास्वभावस्थस्याप्यप्रमत्तसंयतस्य त्रिंशदुदयो भवति। अत्र भङ्गाश्चतुश्चत्वारिंशं शतं १४४। सर्वसङ्ख्ययाऽष्टचत्वारिंशं शतं १४८। सत्तास्थानानि चत्वारि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिश्च। अथ संवेध उच्यते—अष्टाविंशतिबन्धकस्य द्वयोरप्युदयस्थानयोरेकैकं सत्कर्म—अष्टाशीतिः। एकोनत्रिंशद्बन्धकस्यापि द्वयोरप्युदयस्थानयोरेकैकं सत्तास्थानं—त्रिनवतिः। यस्य हि तीर्थकरमाहारकं वा सत् स नियमात्तद्बध्नातीत्येकैकस्मिन् बन्धे एकैकमेव सत्तास्थानं। सर्वसङ्ख्ययाऽष्टौ।

अथापूर्वकरणस्य बन्धादीन्युच्यन्ते—अस्य पञ्च बन्धस्थानानि अष्टाविंशत्यादीन्येकत्रिंशदन्तान्येका च। तत्राद्यानि चत्वार्यप्रमत्तसंयतवत् ज्ञेयानि, एका तु यशःकीर्त्तिः सा च देवगतिप्रायोग्यबन्धव्यवच्छेदे। एकमुदयस्थानं त्रिंशत्। अत्राद्यसंहननसंस्थानषट्कस्वरद्विकखगतिद्विकैर्भङ्गाश्चतुर्विंशतिः। अन्ये त्वाचार्या ब्रुवते—आद्यसंहननत्रयान्यतमसंहननयुक्ता अप्युपशमश्रेणिं प्रतिपद्यन्ते। तन्मतेन भङ्गा द्विसप्ततिः ७२। एवमनिवृत्तिबादरसूक्ष्मसम्परायोपशान्तमोहेष्वपि द्रष्टव्यं। चत्वारि सत्तास्थानानि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिश्च। अथ संवेध उच्यते—अष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्बन्धकानां त्रिंशदुदये सत्तास्थानानि यथाक्रममष्टाशीतिरेकोननवतिर्द्विनवतिस्त्रिनवतिश्च। एकविधबन्धकस्यापि त्रिंशदुदये चत्वार्यपि सत्तास्थानानि, अष्टाविंशत्यादि २८–२९–३०–३१ बन्धकानां प्रत्येकं देवगतिप्रायोग्यबन्धव्यवच्छेदे सत्येकविधबन्धकत्वात्, अष्टाविंशत्यादिबन्धकानां च यथाक्रममष्टाशीत्यादिस्थानसत्त्वात्, एकविधबन्धे चतुर्णामपि प्राप्तेः।

अथानिवृत्तिबादरस्य बन्धादिस्थानान्युच्यन्ते—अस्यैकं यशःकीर्त्याख्यं बन्धस्थानं। एकत्रिंशदात्मकमुदयस्थानं। अष्टौ सत्तास्थानानि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिरशीतिरेकोनाशीतिः षट्सप्ततिः पञ्चसप्ततिश्च। तत्राद्यानि चत्वार्युपशमश्रेण्यां, क्षपकश्रेण्यामपि नामत्रयोदशकाक्षयपर्यन्तं क्षीणे च तस्मिन्नुपरितनानि चत्वार्येव भवन्ति। अत्र बन्धोदयस्थानभेदाभावात्संवेधाभावः। सूक्ष्मसम्परायस्य बन्धादिस्थानान्यनिवृत्तिबादरवज्ज्ञेयानि, अत ऊर्ध्वं बन्धाभावः। तत्रोपशान्तमोहे उदयस्थानं त्रिंशदात्मकमेकं, सत्तास्थानानि च त्रिनवत्यादीनि ९३–९२–८९–८८ चत्वारि। क्षीणकषायस्यैकमुदयस्थानं त्रिंशत्। अत्र जङ्घाश्चतुर्विंशतिरेव, आद्यसंहनिन एव क्षपणश्रेण्यारंभसंभवात्। तत्रापि तीर्थकरनामसत्कर्मणः क्षीणमोहस्य सर्वं संस्थानादि प्रशस्तमेव। सत्तास्थानान्यशीत्यादीनि ८०–७९–७६–७५ चत्वारि। तत्रैकोनाशीतिः पञ्चसप्ततिश्चातीर्थकरसत्कर्मणो, अशीतिः षट्सप्ततिश्च तीर्थकरसत्कर्मणः।

सयोगिकेवलिनः अष्टावुदयस्थानानि—विंशतिरेकविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्च। एतानि सामान्यचिन्तायां सप्रपञ्चं विवृतानीति न भूयो विव्रियन्ते। चत्वारि सत्तास्थानानि—अशीतिः षट्सप्ततिरेकोनाशीतिः पञ्चसप्ततिः। अथ संवेधो वाच्यः, स च प्राग्वज्ज्ञेयः। अयोगिकेवलिनो द्वे उदयस्थाने—नवाष्टौ च। तत्राष्टोदयोऽतीर्थकृदयोगिनः, नवोदयश्च तीर्थकृदयोगिनः। षट् सत्तास्थानानि—अशीतिरेकोनाशीतिः षट्सप्ततिः पञ्चसप्ततिर्नवाष्टौ च। तत्राष्टोदये त्रीणि सत्तास्थानानि—एकोनाशीतिः पञ्चसप्ततिरष्टौ च। तत्राद्ये द्वे द्विचरमसमयं यावद्व-

न्येते, चरमसमयेऽष्टौ । नवोदये त्रीणि सत्तास्थानि—अशीतिः षट्सप्ततिर्नव च । तत्राद्ये द्वे द्विचरमसमयं यावत्, चरमसमये नव । तदेवं गुणस्थानेषु नाम्नो बन्धोदयसत्तास्थानानि प्रपञ्चितानि ।

अथ गतिषु प्रपञ्च्यते—तत्र नैरयिकाणां द्वे बन्धस्थाने—एकोनत्रिंशत्त्रिंशच्च । तत्रैकोनत्रिंशन्मनुष्यगतिप्रायोग्या तिर्यक्पञ्चेन्द्रियप्रायोग्या वा, त्रिंशत्तिर्यक्पञ्चेन्द्रियप्रायोग्या सोद्योता, मनुष्यगतिप्रायोग्या तु जिननामसहिता । भङ्गाश्च प्रागुक्ताः सर्वेऽपि द्रष्टव्याः । उदयस्थानानि पञ्च—एकविंशतिः पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत् । एतानि सप्रभेदानि प्राग्वद्वाच्यानि । त्रीणि सत्तास्थानानि—द्विनवतिरेकोननवतिरष्टाशीतिश्च । एकोननवतिर्बद्धजिननाम्नो मिथ्यात्वगतस्य नरकाभिमुखस्यावसेया । त्रिनवतिस्तु न संभवति, जिनाहारकसत्कर्मणो नरकेष्वनुत्पादात् । अथ संवेध उच्यते—नैरयिकस्य तिर्यग्गतिप्रायोग्यामेकोनत्रिंशतं बध्नतः पञ्चोदयस्थानानि, तानि चानन्तरमेवोक्तानि । तेषु प्रत्येकं द्वे सत्तास्थाने—द्विनवतिरष्टाशीतिश्च । तीर्थकरसत्कर्मणस्तिर्यग्गतिप्रायोग्यबन्धासंभवादेकोननवतिर्न लभ्यते । मनुष्यगतिप्रायोग्यामेकोनत्रिंशतं बध्नतः पञ्चस्वप्युदयस्थानेषु त्रीण्यपि ९२–८९–८८ सत्तास्थानानि भवन्ति । जिननामसत्कर्मा नरकेषूत्पन्नो यावन्मिथ्यादृष्टिस्तावदेकोनत्रिंशतं, सम्यक्त्वं तु प्रतिपन्नस्त्रिंशतं बध्नाति, जिननाम्नोऽपि बन्धात् । तिर्यग्गतिप्रायोग्यां सोद्योतां त्रिंशतं बध्नतः पञ्चस्वप्युदयस्थानेषु प्रत्येकं द्वे सत्तास्थाने—द्विनवतिरष्टाशीतिश्च । एकोननवत्यभावभावना प्राग्वत् । मनुष्यगतिप्रायोग्यां जिननामसहितां बध्नतः पञ्चस्वप्युदयस्थानेषु प्रत्येकमेकं सत्तास्थानं एकोननवतिः । सर्वबन्धोदयस्थानापेक्षया सत्तास्थानानि त्रिंशत् ।

अथ तिरश्चां बन्धादिस्थानान्युच्यन्ते—तत्र तिरश्चां षट् बन्धस्थानानि—त्रयोविंशतिः पञ्चविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशच्च । एतानि प्राग्वत्सञ्ज्ञेदानि वाच्यानि । केवलमेकोनत्रिंशत्त्रिंशच्च तीर्थकराहारकद्विकसहिता न वाच्या, तिरश्चां तद्बन्धासंज्ञवात् । नवोदयस्थानानि—एकविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्च । एतान्येकेन्द्रियविकलेन्द्रियसवैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य सञ्ज्ञेदानि प्राग्वद्वाच्यानि । पञ्च सत्तास्थानानि, तद्यथा—द्विनवतिरष्टाशीतिः षण्ण्यशीतिरशीतिरष्टसप्ततिश्च । तीर्थकरसम्बन्धीनि द्वपकसम्बन्धीनि च सत्तास्थानानि न संज्ञवन्ति, तीर्थकरनाम्नः द्वपकश्रेण्याश्च तिर्यद्गवज्ञावात् । सम्प्रति संवेध उच्यते—त्रयोविंशतिबन्धकस्य तिरश्च एकविंशत्यादीनि नवोदयस्थानानि, तानि चानन्तरमेवोक्तानि । तत्राद्येषु चतुर्षु २१–२४–२५–२६ प्रत्येकं पञ्च सत्तास्थानानि—नवतिरष्टाशीतिः षण्ण्यशीतिरशीतिरष्टसप्ततिश्चेति । इहाष्टसप्ततिस्तेजोवायूँस्तन्नवाऽनुद्वृत्तान् वाऽधिकृत्य ज्ञेया । शेषेषु तु सप्तविंशत्यादिषु पञ्चसूदयस्थानेष्वष्टसप्ततिवर्जानि चत्वारि चत्वारि सत्तास्थानानि, सप्तविंशत्याद्युदयेषु हि नियमेन मनुष्यद्विकसंज्ञवात् अष्टसप्ततिर्नावाप्यते । एवं पञ्चविंशतिषड्विंशत्येकोनत्रिंशत्त्रिंशद्बन्धकानामपि वाच्यं, नवरमेकोनत्रिंशतं मनुष्यगतिप्रायोग्यां बध्नतः सर्वेष्वप्युदयस्थानेष्वष्टसप्ततिवर्जानि चत्वारि चत्वारि सत्तास्थानानि । अष्टाविंशतिबन्धकस्याष्टावुदयस्थानानि, तद्यथा—एकविंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्च । तत्रैकविंशतिषड्विंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंद्रूपाः पञ्चोदयाः द्वायिकसम्यग्दृष्टीनां वेदकसम्यग्दृष्टीनां वा द्वाविंशतिसत्कर्मणां पूर्ववद्भायुषामवगन्तव्याः । एकैकस्मिँश्च द्वे द्वे सत्तास्थाने द्विनवतिरष्टाशीतिश्चेति । पञ्चविंशतिसप्तविंशत्युदयौ

वैक्रियतिरश्चां ज्ञेयौ, तत्रापि ते एव द्वे द्वे सत्तास्थाने। त्रिंशदेकत्रिंशदुदयौ सर्वपर्याप्तिपर्याप्तानां सम्यग्दृष्टीनां मिथ्यादृष्टीनां वाऽवसेयौ। एकैकस्मिँश्च त्रीणि त्रीणि सत्तास्थानानि–द्विनवतिरष्टाशीतिःषण्यशीतिश्च। षण्यशीतिर्मिथ्यादृष्टीनां ज्ञेया, सम्यग्दृष्टीनामसंज्ञवात्, तेषामवश्यं देवद्विकादिबन्धसंज्ञावात्। तदेवं सर्वबन्धोदयस्थानापेक्षया सत्तास्थानानां द्वे शते अष्टादशाधिके २१८। तथाहि—त्रयोविंशतिपञ्चविंशतिषड्विंशत्येकोनत्रिंशत्त्रिंशद्बन्धेषु चत्वारिंशत्सत्तास्थानानि, अष्टाविंशतिबन्धे चाष्टादश।

अथ मनुष्यगतौ बन्धादिस्थानान्युच्यन्ते—मनुष्याणामष्टौ बन्धस्थानानि—त्रयोविंशतिः पञ्चविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशदेका च। सर्वाण्यप्येतानि प्राग्वत्सञ्ज्ञेदानि वाच्यानि, मनुष्याणां चतुर्गतिकप्रायोग्यबन्धसंज्ञवात्। एकादशोदयस्थानानि—विंशतिरेकविंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशन्नवाष्टौ च। एतानि च स्वज्ञावस्थमनुष्यवैक्रियमनुष्याहारकसंयततीर्थकरातीर्थकरसयोग्ययोगिकेवलिनोऽधिकृत्य प्राग्वज्ञावनीयानि। एकादश सत्तास्थानानि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिः षण्यशीतिरशीतिरेकोनाशीतिः षट्सप्ततिः पञ्चसप्ततिर्नवाष्टौ च। अष्टसप्ततिस्तु न संज्ञवति, मनुष्याणामवश्यं मनुष्यद्विकसंज्ञवात्। अथ संवेध उच्यते—तत्र मनुष्यस्य त्रयोविंशतिबन्धकस्य सप्तोदयस्थानानि—एकविंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशत् (च), शेषाः केवल्युदया इति न घटन्ते। पञ्चविंशतिसप्तविंशत्युदयौ वैक्रियकारिणो वेदितव्यौ। एकैकस्मिँश्चत्वारि सत्तास्थानानि–द्विनवतिरष्टाशीतिः षण्यशीतिरशीतिश्च, नवरं पञ्चविंशत्युदये सप्तविंशत्युदये च द्वे द्वे सत्तास्थाने—

द्विनवतिरष्टाशीतिश्च । शेषाणि तु सत्तास्थानानि तीर्थकरक्षपकश्रेणिकेवलिशेषगतिप्रायोग्यानीति न संभवन्ति, सर्वसङ्ख्यया चतुर्विंशतिः । एवं पञ्चविंशतिषड्विंशतिबन्धकानामपि वाच्यं । मनुजगतिप्रायोग्यां तिर्यग्गतिप्रायोग्यां चैकोनत्रिंशतं त्रिंशतं च बध्नतामप्येवमेव । अष्टाविंशतिबन्धकानां सप्तोदयाः—एकविंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत् त्रिंशत् (च) । तत्रैकविंशतिषड्विंशत्युदयावविरतसम्यग्दृष्टेः करणापर्याप्तस्य । पञ्चविंशतिसप्तविंशत्युदयौ वैक्रियसंयतस्याहारकसंयतस्य वा । अष्टाविंशत्येकोनत्रिंशतावविरतसम्यग्दृष्टीनां वैक्रियकारिणामाहारकसंयतानां च । त्रिंशत्सम्यग्दृष्टीनां मिथ्यादृष्टीनां वा । एकैकस्मिन् द्वे द्वे सत्तास्थाने—द्विनवतिरष्टाशीतिश्च, आहारकसंयतस्य द्विनवतिरेव । त्रिंशदुदये चत्वारि सत्तास्थानानि—द्विनवतिरेकोननवतिरष्टाशीतिः षण्णशीतिश्च । तत्रैकोननवतिर्नरकगतिप्रायोग्यामष्टाविंशतिं बध्नतो मिथ्यादृष्टेरवसेया । सर्वसङ्ख्ययाऽष्टाविंशतिबन्धे षण्णव सत्तास्थानानि । देवगतिप्रायोग्यामेकोनत्रिंशतं तीर्थकरसहितां बध्नतः सप्तोदयस्थानानि, तानि चाष्टाविंशतिबन्धकानामिव ज्ञेयानि । नवरमिह त्रिंशदुदयः सम्यग्दृष्टीनामेव वाच्यः । सर्वेष्वपि चोदयस्थानेषु द्वे द्वे सत्तास्थाने—त्रिनवतिरेकोननवतिश्च, तत्राहारकसंयतस्य त्रिनवतिरेव । सर्वसङ्ख्यया चतुर्दश । आहारकसहितां त्रिंशतं बध्नतो द्वे उदयस्थाने—एकोनत्रिंशत्त्रिंशच्च । तत्र यो नामाहारकसंयतोऽन्तिमकालेऽप्रमत्तस्तं प्रतीत्यैकोनत्रिंशत्, (२अन्यत्रैकोनात्रिंशति) आहारकबन्धहेतोर्विशिष्टसंयमस्याभावात् । द्वयोरप्युदयस्थानयोः प्रत्येकमेकं सत्तास्थानं द्विनवतिः । एकत्रिंशद्बन्धकस्यैकमुदयस्थानं त्रिंशत्, एकं सत्तास्थानं त्रिनवतिः ।

१ आहारकमोक्षकाले । २ अप्रमत्तं विहाय ।

एकविधबन्धकस्यैकमुदयस्थानं त्रिंशत् । अष्टौ सत्तास्थानानि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिरशीतिरेकोनाशीतिः षट्सप्ततिः पञ्चसप्ततिश्च । सर्वबन्धोदयस्थानापेक्षया सत्तास्थानानि शतमेकोनषष्ट्यधिकं । अबन्धे उदयसत्तास्थानयोर्मिथः संवेधः सामान्यसंवेधचिन्तायामिव ज्ञेयः ।

अथ देवानां बन्धादिस्थानानि वाच्यानि—तत्र तेषां चत्वारि बन्धस्थानानि—पञ्चविंशतिः षड्विंशतिरेकोनत्रिंशात्रिंशत् । तत्र पञ्चविंशतिः षड्विंशतिश्च पर्याप्तबादरप्रत्येकसहितामेकेन्द्रियप्रायोग्यां बध्नतो ज्ञेया । अत्र स्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्त्तिभिरष्टौ भङ्गाः । षड्विंशतिरातपोद्योतान्यतरसहिता भवति, ततोऽत्र भङ्गाः षोडश । एकोनत्रिंशन्मनुष्यगतिप्रायोग्या तिर्यग्गतिप्रायोग्या च सञ्ज्ञेदाऽवसेया । त्रिंशत्पुनस्तिर्यक्पञ्चेन्द्रियप्रायोग्या सोद्योताऽष्टोत्तरषट्चत्वारिंशन्नत (४६०८) सङ्ख्यभेदोपेता प्राग्वद्वाच्या । या तु मनुष्यगतिप्रायोग्या तीर्थकरनामसहिता तत्र स्थिरास्थिरशुभाशुभयशःकीर्त्ययशःकीर्त्तिभिरष्टौ भङ्गाः । षडुदयस्थानानि—एकविंशतिः पञ्चविंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशत् । एतानि प्रागेव सप्रपञ्चमुक्तानीति न भूय उच्यन्ते । चत्वारि सत्तास्थानानि—त्रिनवतिर्द्विनवतिरेकोननवतिरष्टाशीतिः । शेषाणि तु कानिचिदेकेन्द्रियसम्बन्धीनि कानिचित्कृपकसम्बन्धीनीति देवानां न संभवन्ति । अथ संवेध उच्यते—देवानां पञ्चविंशतिबन्धकानां षट्स्वप्युदयस्थानेषु प्रत्येकं द्वे सत्तास्थाने—द्विनवतिरष्टाशीतिश्च । एवं षड्विंशत्येकोनत्रिंशद्बन्धकानामपि ज्ञेयं । सोद्योतां तिर्यक्पञ्चेन्द्रियप्रायोग्यां त्रिंशतमपि बध्नतामेवमेव, तीर्थकरसहितां पुनस्त्रिंशतं मनुष्यगतिप्रायोग्यां बध्नतः षट्स्वप्युदयस्थानेषु प्रत्येकं द्वे सत्तास्थाने—त्रिनवतिरेकोननवतिश्च। सर्वसङ्ख्यया सत्तास्थानानि षष्टिरिति।

अथेन्द्रियेषु विचार्यते—एकेन्द्रियविकलेन्द्रियेषु प्रत्येकं त्रयोविंशत्यादीन्यष्टाविंशतिहीनानि पञ्च पञ्च बन्धस्थानानि २३–२५–२६–२९–३० । तत्र देवगतिप्रायोग्यामेकोनत्रिंशतं त्रिंशतं च वर्जयित्वा शेषाणि सर्वाण्यपि सर्वगतिप्रायोग्यानि सप्रभेदानि वाच्यानि । पञ्चेन्द्रिये त्रयोविंशत्यादीन्यष्टावुदयस्थानानि २३–२५–२६–२८–२९–३०–३१–१ । एतानि सर्वाण्यपि सर्वगतिप्रायोग्यानि सप्रभेदानि वाच्यानि । उदयस्थानान्येकेन्द्रियाणामेकविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिश्चेति पञ्च । एतानि च सप्रभेदानि प्राग्वद्वाच्यानि । विकलेन्द्रियाणां षट्, तद्यथा—एकविंशतिः षड्विंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशच्चेति । एतान्यपि यथाऽधस्तादुक्तानि तथैव वाच्यानि । पञ्चेन्द्रियाणामेकादश, तद्यथा—विंशतिरेकविंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिरेकोनत्रिंशत्त्रिंशदेकत्रिंशन्नवाष्टौ च । एकेन्द्रियविकलेन्द्रियसम्बन्धीन्युदयस्थानानि मुक्त्वा शेषाणि सर्वाण्यपि पञ्चेन्द्रियाणां सप्रभेदानि वाच्यानि । सत्तास्थानान्येकेन्द्रियविकलेन्द्रियाणां पञ्च, तद्यथा—द्विनवतिरष्टाशीतिः षण्यशीतिरशीतिरष्टसप्ततिश्च । पञ्चेन्द्रियाणां च द्वादशापि सत्तास्थानानि ।

अथ जीवस्थानेषु बन्धोदयसत्तास्थानानि प्रतिपाद्यन्ते—तत्र ज्ञानावरणान्तरायदर्शनावरणानां बन्धोदयसत्तास्थानेषु ये भङ्गा मिथ्यादृष्टौ भवन्ति त एव पर्याप्तसंज्ञिपञ्चेन्द्रियवर्जेषु शेषेषु त्रयोदशसु जीवस्थानेषु ज्ञेयाः । तत्र ज्ञानावरणस्यान्तरायस्य च प्रत्येकं पञ्चविधो बन्धः, पञ्चविध उदयः, पञ्चविधा सत्ता । दर्शनावरणस्य नवविधो बन्धश्चतुर्विध उदयो नवविधा सत्ता, यदा नवविधो बन्धः पञ्चविध उदयो नवविधा सत्ता । संज्ञिपर्याप्ते तु ये गुणस्थानोक्ता भङ्गास्त एवा-

न्यूनानतिरिक्ता वेदितव्याः । वेदनीयस्याद्येषु त्रयोदशसु जीवस्थानेष्वादिमाश्चत्वारो भङ्गाः, तद्यथा—असातस्य बन्धोऽसातस्योदयो द्वे सती, यदाऽसातस्य बन्धः सातस्योदयो द्वे सती, यदा सातस्य बन्धोऽसातस्योदयो द्वे सती, यदा सातस्य बन्धः सातस्योदयो द्वे सती इति । गोत्रस्य त्रयो भङ्गाः, तद्यथा—नीचैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदयो नीचैर्गोत्रं सत्, एष विकट्पस्तेजोवायुकायिकेषु लभ्यते । तन्नवाऽनुत्तरेष्वपि कियत्कालं नीचैर्गोत्रस्य बन्धः नीचैर्गोत्रस्योदयो द्वे सती, यदोच्चैर्गोत्रस्य बन्धो नीचैर्गोत्रस्योदयो द्वे सती । शेषास्तु भङ्गा न भवन्ति, तेषूच्चैर्गोत्रस्योदयाभावात् । आयुर्विचारे तिर्यगायुरुदये ये नव भङ्गास्ते सर्वेऽप्यसंज्ञिपर्याप्ते द्रष्टव्याः, तेषां सर्वेषामपि तस्मिन् संभवात् । एकेन्द्रियाणां विकलेन्द्रियाणां च पर्याप्तापर्याप्तानां त एव सुरनारकाश्रितभङ्गचतुष्टयरहिताः पञ्च भङ्गा द्रष्टव्याः, तेषां देवनारकायुर्बन्धाभावात् । असंज्ञिन्यपर्याप्ते तिरश्चि मनुष्ये चैत एव पञ्च पञ्च भङ्गा अन्यूनानतिरिक्ता द्रष्टव्याः । तथा मनसा पर्याप्तेऽष्टाविंशतिरप्यायुषो भङ्गा ज्ञेयाः । मनसाऽपर्याप्ते संज्ञिनि पञ्च मनुष्ये पञ्च तिरश्चीति सर्वसङ्ख्यया दश भङ्गाः, एते लब्ध्यपर्याप्तके । तथा देवनारकाणां करणापर्याप्तानामेकैको भङ्गः । सर्वसङ्ख्ययाऽपर्याप्ते संज्ञिनि द्वादश । मोहनीयस्य बन्धोदयसत्तास्थानानि संज्ञिनः पर्याप्तस्य सर्वाण्यपि सप्रभेदानि यथाऽधस्तादुक्तानि तथा वाच्यानि । बादरैकेन्द्रियविकलेन्द्रियासंज्ञिपञ्चेन्द्रियेष्वादिमौ द्वौ बन्धौ—द्वाविंशतिरेकविंशतिश्च । इमौ च यथाऽधस्तादुक्तौ तथा ज्ञेयौ । नवरमेकविंशतिः करणापर्याप्तावस्थायां द्रष्टव्या । पर्याप्तापर्याप्तसूक्ष्मापर्याप्तबादरद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिसंज्ञिरूपेष्वष्टसु जीवस्थानेषु द्वाविंशतिरेवैको बन्धः । स च सप्रभेदः प्राग्वद्वाच्यः । एतेष्वेवाष्टसु त्रीण्युदयस्थानानि भवन्ति,

तद्यथा—अष्ट नव दश चेति । यस्तु सप्तकमुदयस्थानमनन्तानुबन्ध्युदयरहितं तन्न प्राप्यते, तेषामवश्यमनन्तानुबन्ध्युदयसहितत्वात् । वेदश्च तेषामुदयागतो नपुंसकवेद एव, न स्त्रीनृवेदौ । ततोऽष्टोदयेऽष्टौ भङ्गाः, नवोदये षोडश, दशोदयेऽष्टौ, सर्वसङ्कलया प्रत्येकं द्वात्रिंशद्भङ्गाः । एतान्येव त्रीणि सप्तकयुतानि पर्याप्तबादरैकेन्द्रियविकलेन्द्रियासंज्ञिरूपेषु पञ्चसु चत्वार्युदयस्थानानि ७–८–९–१० । तत्र सासादने सप्ताष्टौ नव चेति त्रीणि । मिथ्यादृष्टावष्टादीनि त्रीणि । वेदश्चैतेषामुदयप्राप्तो नपुंसकवेद एव । ततश्चतुर्विंशतिस्थाने भङ्गानामष्टकं द्रष्टव्यं, तेन सासादने मिथ्यादृष्टौ च प्रत्येकं द्वात्रिंशद्भङ्गाः । एतेषु पञ्चकाष्टकरूपेषु त्रयोदशसु जीवस्थानेषु त्रीणि त्रीणि सत्तास्थानानि—अष्टाविंशतिः सप्तविंशतिः षड्विंशतिश्च । तत्रापि बादरैकेन्द्रियादिषु पञ्चसु सासादनभावापन्नेषु अष्टाविंशतिरेवैकं सत्तास्थानं । संज्ञिनि तु करणापर्याप्ते कस्मिँश्चित्सप्तदशबन्धोऽपि षष्ठादीनि च चत्वार्युदयस्थानानि चतुर्विंशत्येकविंशतिरूपाण्यपि च सत्तास्थानानि ज्ञेयानि । नामकर्मणः संज्ञिनि पर्याप्तेऽष्टावपि बन्धस्थानानि, तानि च प्राग्वद्व्याख्यानि । असंज्ञिनि पर्याप्ते आदिमानि षड् बन्धस्थानानि २३–२५–२६–२८–२९–३० । असंज्ञिपञ्चेन्द्रियाणां पर्याप्तानां हि नरकगतिदेवगतिप्रायोग्यबन्धोऽपि भवतीत्यष्टाविंशतिरपि बन्धस्थानं लभ्यते । तान्येवाष्टाविंशतिहीनानि २३–२५–२६–२९–३० पञ्च पर्याप्तापर्याप्तविकलेन्द्रियबादरसूक्ष्मैकेन्द्रियेषु भवन्ति । असंज्ञिसंज्ञिनोरपि लब्ध्यपर्याप्तयोरेतान्येव पञ्च बन्धस्थानानि, अपर्याप्तानां सर्वेषां तिर्यङ्मनुष्यप्रायोग्यस्यैव बन्धात् । तानि च पञ्च बन्धस्थानानि तिर्यङ्मनुष्यप्रायोग्याणि यथाऽधस्तादुक्तानि तथा भाव्यानि । सूक्ष्मबादरैकेन्द्रिययोरपर्याप्तयोरेकविंशतिश्चतुर्विंशतिश्चेति द्वावुदयौ । तत्र सूक्ष्मापर्याप्तस्यैकविंशतिरियं—

तिर्यग्द्विकं तैजसकार्मणे अगुरुलघु वर्णचतुष्टयं एकेन्द्रियजातिः स्थावरसूक्ष्मापर्याप्तानि स्थिरास्थिरे शुभाशुभे दुर्भगमनादेयमयशःकीर्त्तिनिर्माणमिति । एषा चापान्तरालगतिस्थस्याप्यते । अत्र चैक एव भङ्गः, अपर्याप्तस्य परावर्त्तमानशुभप्रकृतीनामनुदयात् । बादरपर्याप्तस्याप्येषैवैकविंशतिः, नवरं सूक्ष्मस्थाने बादरं वाच्यं, तत्राप्येक एव भङ्गः । उभयोरपि तस्यामेकविंशतौ औदारिकशरीरहुण्डोपघातप्रत्येकसाधारणैकतररूपप्रकृतिचतुष्टयप्रक्षेपे तिर्यगानुपूर्व्याश्चापनयने चतुर्विंशतिः । अत्र प्रत्येकसाधारणान्यां सूक्ष्मापर्याप्तस्य बादरापर्याप्तस्य च प्रत्येकं द्वौ भङ्गौ । विकलेन्द्रियसंज्ञ्यसंज्ञिनां चापर्याप्तानामिमे द्वे उदयस्थाने—एकविंशतिः षड्विंशतिश्च । तत्रैकविंशतिरपर्याप्तद्वीन्द्रियाणामियं—तैजसं कार्मणमगुरुलघु स्थिरास्थिरे शुभाशुभे वर्णादिचतुष्टयं निर्माणं तिर्यग्द्विकं द्वीन्द्रियजातिस्त्रसबादरपर्याप्तानि दुर्भगानादेययशःकीर्त्तय इति । एषा चैकविंशतिरन्तरालगतिस्थानां ज्ञेया । इयं च सर्वाऽप्रशस्तपदेत्येक एव भङ्गः । ततः शरीरस्थस्यौदारिकद्विकहुण्डसेवार्त्तोपघातप्रत्येकलक्षणप्रकृतिषट्कप्रक्षेपे तिर्यगानुपूर्व्याश्चापनयने षड्विंशतिः । अत्राप्येक एव भङ्गः । एवं त्रीन्द्रियादीनामपि वाच्यं । तदेवमपर्याप्तद्वीन्द्रियादीनामुदयस्थानाश्रितौ द्वौ द्वौ भङ्गौ, केवलमपर्याप्तसंज्ञिनश्चत्वारः, यतो द्वावपर्याप्तसंज्ञिनस्तिरश्चो द्वौ च मनुष्यस्येति । तथा पर्याप्तसूक्ष्मैकेन्द्रियाणां चत्वार्युदयस्थानानि—एकविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिश्च । तत्रैकविंशतिरियं—तैजसं कार्मणमगुरुलघु स्थिरास्थिरे शुभाशुभे वर्णादिचतुष्टयं निर्माणं तिर्यग्द्विकं एकेन्द्रियजातिः स्थावरसूक्ष्मपर्याप्तदुर्भगानादेययशःकीर्त्तय इति । एषा चैकविंशतिः सूक्ष्मपर्याप्तस्यापान्तरालस्थस्य, अत्रैको भङ्गः, प्रतिपक्षपदविकल्पाभावात् । अस्यां हुण्डोपघातौदारिकशरीरप्रत्येकसाधारणैकतरलक्षणप्रकृतिचतु-

ष्टयक्षेपे तिर्यगानुपूर्व्यपनयने चतुर्विंशतिः, सा च शरीरस्थस्य, अत्र प्रत्येकसाधारणान्यां द्वौ भङ्गौ । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते पञ्चविंशतिः, अत्रापि तावेव द्वौ भङ्गौ । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते षड्विंशतिः, अत्रापि तावेव द्वौ भङ्गौ । सर्वसङ्ख्यया सूक्ष्मपर्याप्तस्य सप्त भङ्गाः । पर्याप्तबादरैकेन्द्रियाणामुदयस्थानान्येकविंशत्यादीनि पञ्च २१-२४-२५-२६-२७ । तत्रैकविंशतिरियं—तैजसं कार्मणमगुरुलघु स्थिरास्थिरे शुभाशुभे वर्णादिचतुष्टयं निर्माणं तिर्यग्द्विकमेकेन्द्रियजातिः स्थावरबादरपर्याप्तदुर्भगानादेयानि यशःकीर्त्ययशःकीर्त्योरेकतरेति । एषा चैकविंशतिरपान्तरालस्थस्य, अत्र यशःकीर्त्ययशःकीर्त्तिभ्यां द्वौ भङ्गौ । ततः शरीरस्थस्यौदारिकहुण्डोपघातप्रत्येकसाधारणैकतरलक्षणप्रकृतिचतुष्टयक्षेपे तिर्यगानुपूर्व्यपनयने चतुर्विंशतिः । अत्र प्रत्येकसाधारणयशःकीर्त्ययशःकीर्त्तिभिश्चत्वारो भङ्गाः । वैक्रियं कुर्वतस्तु बादरवायुकायिकस्यैकः, यतस्तस्य साधारणयशःकीर्त्ती उदये नागच्छतः । अन्यच्च वैक्रियवायुकायिकचतुर्विंशतावौदारिकशरीरस्थाने वैक्रियशरीरं वाच्यं, शेषं तथैव । सर्वसङ्ख्यया चतुर्विंशतौ पञ्च भङ्गाः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते पञ्चविंशतिः, अत्रापि तथैव पञ्च भङ्गाः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते षड्विंशतिः अत्रापि तथैव पञ्च भङ्गाः । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते आतपोद्योतान्यतरस्मिँस्तूदिते षड्विंशतिः, अत्रातपेन प्रत्येकयशःकीर्त्ययशःकीर्त्तिपदैर्द्वौ भङ्गौ । साधारणस्यातपोदयाभावात्तदाश्रितविकल्पाभावः । उद्योतेन प्रत्येकसाधारणयशःकीर्त्ययशःकीर्त्तिपदैश्चत्वारः । सर्वसङ्ख्यया षड्विंशतावेकादश भङ्गाः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां षड्विंशतावातपोद्योतयोरन्यतरस्मिन् क्षिप्ते सप्तविंशतिः । अत्राप्यातपेन द्वौ उद्योतेन सह चत्वार

इति सर्वसङ्ख्यया सप्तविंशतौ षट्। बादरपर्याप्तस्य सर्वे भङ्गा एकोनत्रिंशत्। संज्ञिपर्याप्तस्य चतुर्विंशतिवर्जानि सर्वाण्यप्युदयस्थानानि। चतुर्विंशत्युदय एकेन्द्रियाणामेवेति तत्प्रतिषेधः। उदयस्थानभङ्गाश्च देवनारकतिर्यङ्मनुष्यानधिकृत्य यथाऽधस्तादुक्तास्तथैवात्रापि भाव्याः। पर्याप्तद्वित्रिचतुरिन्द्रियासंज्ञिनामेकविंशतिषड्विंशत्यष्टाविंशत्येकोनत्रिंशत्त्रिंशदेकत्रिंशद्रूपाः षडुदया भवन्ति। तत्र द्वित्रिचतुरिन्द्रियाणां यथाऽधस्ताद्भङ्गास्तथात्रापि भाव्याः। यथा च सामान्यतिर्यक्पञ्चेन्द्रियाणामधस्तादुक्तास्तथाऽसंज्ञिनामपि। नवरं सर्वेषामप्येकविंशतौ षड्विंशतौ च प्रत्येकमपर्याप्तपदाश्रितो य एकैको भङ्गः स इह न वाच्यः, पर्याप्तानामेवेह चिन्त्यमानत्वात्। सत्तास्थानान्याद्येषु त्रयोदशसु जीवस्थानेषु पञ्च पञ्च, तत्र त्रीण्यध्रुवसंज्ञानि द्विनवतिरष्टाशीतिश्च, तत्राष्टसप्ततिः सूक्ष्मबादरैकेन्द्रियेषु तेजोवायुष्वाद्येषु चतुर्षूदयेषु, तेजोवायुभवाद्वृत्तेषु चैकविंशतिचतुर्विंशत्युदययोः, द्वीन्द्रियादिषु तु तेजोवायुभवाद्वृत्तेषु एकविंशतिचतुर्विंशत्युदययोः प्राप्यते, न शेषेषूदयेषु। संज्ञिनस्तु गुणस्थानक्रमेण द्वादशापि सत्तास्थानानि नाम्नः प्रागुक्तदिशा भावनीयानि।

अथ गत्यादिषु बन्धादिस्थानविषयसत्पदप्ररूपणा क्रियते। तत्र नारकतिर्यक्सुरगतिषु कर्माणि बध्यन्ते सप्ताष्टौ वा, तत्रायुर्बन्धकाले ऽष्टौ, शेषकालं सप्त। उदये च अष्टावेव। उदीर्यन्ते सप्ताष्टौ वा, तत्र स्वस्वायुःपर्यन्तावलिकायां नोदीर्यत इति सप्त, शेषकालं त्वष्ट उदीरणानि। संति चैतासु तिसृषु गतिष्वष्टैव प्राप्यन्ते, न तु कदापि सप्त चत्वारि वा, तत्र श्रेण्यादिप्रतिपत्त्यभावात्। मनुष्यगताविन्द्रियद्वारे पञ्चेन्द्रियाणां कायद्वारे त्रसानां गुणस्थानान्यहितं द्रष्टव्यं, तच्चेदं—मिश्रं वर्जयित्वा सप्तमगुणस्थानं यावत्सप्तानामष्टानां वा बन्धः। तत्रायुर्बन्धकाले सप्तानां, शेषकालं त्वष्टानां।

मिश्रापूर्वकरणानिवृत्तिबादरेषु सप्तानामेव, तेषामतिविशुद्धत्वेनायुर्बन्धासंभवात् । सूक्ष्मसम्पराये षण्णां बन्धः, तत्र मोहस्याप्यबन्धात् । ततः परं त्रिषु गुणस्थानेष्वेकस्यैव वेदनीयस्य बन्धः । तथा सूक्ष्मसम्परायं यावदष्टानामुदयसत्ते । उपशान्तमोहे सप्तानामुदयोऽष्टानां सत्ता । क्षीणमोहे सप्तानामेवोदयः सत्ता च । सयोग्ययोगिकेवलिनोश्चतुर्णामुदयसत्ते । तथा षष्ठं गुणस्थानं यावत्सप्तानामष्टानां वोदीरणा । तत्र यदायुः पर्यन्तावलिकाप्राप्तं भवति तदा तस्योदीरणाऽभावात्सप्तानामुदीरणा, शेषकाले त्वष्टानां । मिश्रगुणस्थाने तु सदैवाष्टानामेव, आयुःपर्यन्तावलिकायां वर्त्तमानस्य मिश्रगुणस्थानासंभवात् । अप्रमत्तापूर्वकरणानिवृत्तिबादरेषु वेदनीयायुर्वर्जानां षण्णामुदीरणा, तेषु वेदनीयायुषोरुदीरणाभावात् तद्योग्याध्यवसायस्थानासंभवात् । सूक्ष्मसम्पराये षण्णां पञ्चानां वोदीरणा, तत्र प्रथमतः षण्णां, सा च तावद्यावदावलिका गुणस्थानस्य शेषा न भवति, आवलिकायां तु शेषीभूतायां मोहनीयमप्यावलिकाप्रविष्टमिति तस्योदीरणाया अभावात्पञ्चानामुदीरणा । एतेषामेव पञ्चानामुपशान्तमोहेऽपि । क्षीणमोहे पञ्चानां तावदुदीरणा यावत्स्वावलिका शेषा न भवति । आवलिकायां तु शेषीभूतायां ज्ञानावरणदर्शनावरणान्तरायाणामप्यावलिकाप्रविष्टत्वेनोदीरणाया अभावात् द्वयोर्नामगोत्रयोरुदीरणा । सयोगिकेवलिन्यपि तयोरेव द्वयोरुदीरणा । अयोगी तु योगाभावादेव न किंचिदुदीरयति । एकद्वित्रिचतुरिन्द्रियाणां कायद्वारे स्थावरकायानां सप्तानामष्टानां वा बन्धोदीरणे, अष्टानामुदयसत्ते । तथा योगद्वारे मनोयोगिनो वीतरागछद्मस्थपर्यवसाना इव वेदितव्याः, मनोयोगिनां क्षीणमोहगुणस्थानकं यावत्संभवात् । काययोगिनो वाग्योगिनश्च सयोगिकेवलिपर्यन्ता इव द्रष्टव्याः, काययोगवाग्योगयोः सयोगिकेवलिगुणस्थानं यावत्संभवात् । वेदद्वारे त्रिवेदाः कषायद्वारे

त्रिकषाया नवगुणस्थानतुल्याः, वेदत्रयस्य कषायत्रयस्य चानिवृत्तिबादरसम्परायं यावत्संज्ञवात् । लोज्ने सूक्ष्मसम्परायान्ता इव वाच्याः, लोज्नस्य सूक्ष्मसम्परायं यावत्संज्ञवात् । ज्ञानद्वारे मत्यज्ञानश्रुताज्ञानविज्ञङ्गज्ञानेषु मिथ्यादृष्ट्यादिषु सम्यङ्मिथ्यादृष्टिपर्यन्तेष्विव । मतिश्रुतावधिज्ञानेष्वविरतसम्यग्दृष्ट्यादिषु क्षीणमोहपर्यन्तेष्विव । मनःपर्यवज्ञाने प्रमत्तसंयतादिषु क्षीणमोहपर्यन्तेष्विव । केवलज्ञाने सयोग्ययोगिकेवलिनोरिव । संयमद्वारे सामायिकछेदोपस्थापनयोः प्रमत्तसंयतादिष्वनिवृत्तिबादरपर्यन्तेष्विव । परिहारविशुद्धिके प्रमत्ताप्रमत्तयोरिव । सूक्ष्मसम्पराये सूक्ष्मसम्परायगुणस्थान इव । यथाख्यातसंयमे ज्पशान्तमोहक्षीणमोहसयोग्ययोगिकेवलिनामिव । देशसंयमे देशविरतगुणस्थान इव । असंयमे प्रथमगुणस्थानचतुष्टयस्थानामिव । दर्शनद्वारे चक्षुरचक्षुर्दर्शनयोर्मिथ्यादृष्ट्यादीनां क्षीणमोहान्तानामिव । अवधिदर्शनेऽविरतसम्यग्दृष्ट्यादीनां क्षीणमोहान्तानामिव । केवलदर्शने सयोग्ययोगिकेवलिनोरिव । लेश्याद्वारे आद्यासु पञ्चसु लेश्यासु मिथ्यादृष्ट्यादीनामप्रमत्तसंयतान्तानामिव । शुक्ललेश्यायां मिथ्यादृष्ट्यादीनां सयोगिकेवलिपर्यन्तानामिव वाच्यं । ज्नव्यद्वारे ज्नव्येषु सर्वगुणस्थानतुल्यं । अज्नव्येषु मिथ्यादृष्टेरिव । सम्यक्त्वद्वारे क्षायोपशमिकसम्यक्त्वेऽविरतसम्यग्दृष्ट्यादीनामप्रमत्तसंयतान्तानामिव । औपशमिकसम्यक्त्वेऽविरतसम्यग्दृष्ट्यादीनामुपशान्तमोहान्तानामिव । क्षायिकसम्यक्त्वेऽविरतसम्यग्दृष्ट्यादीनामयोगिकेवलिपर्यन्तानामिव । मिथ्यात्वे मिथ्यादृष्टेरिव । सासादने सासादनस्येव । मिश्रे मिश्रस्येव । संज्ञिद्वारे संज्ञिषु मनुष्यगताविव । असंज्ञिषु मिथ्यादृष्टिसासादनयोरिव । आहारकद्वारेऽनाहारके मिथ्यादृष्टिसासादनाविरतसम्यग्दृष्ट्ययोगिकेवलिनामिव । आहारके मिथ्यादृष्ट्यादीनां सयोगिकेवलिपर्यन्तानामिव सत्पदप्ररूपणा कर्तव्या ।

तदेवं सप्ततिकार्थोऽपि सम्बन्धाधिकारे प्रसक्तानुप्रसक्तः प्ररूपितः । तदेवं ग्रन्थकर्त्रा यत् पूर्वं प्रतिज्ञातं कर्माष्टकस्य करणाष्टकमुदयसत्ते च वक्ष्यामीति तत्समर्थितम् ॥ ५४ ॥

सम्प्रति प्रकरणपरिज्ञानस्य विशिष्टफलमाह—

करणोदयसंतविऊ तन्निज्जरकरणसंजमुज्जोगा । कम्मट्ठगुदयनिट्ठाजणियमणिट्ठं सुहमुवेंति ॥ ५५ ॥

व्याख्या—करणोदयसत्ताविदः करणानामुक्तस्वरूपाणां बन्धादीनामुदयसत्तयोश्च समयपरिज्ञानयुक्ता तन्निर्जराकरणसंयमोद्योगा इति तासां करणोदयसत्तानां या निर्जरा तस्याः करणं निर्वर्त्तनं तदर्थं संयमोद्योगश्चारित्रान्यासो येषां ते तथा । करणाष्टकस्योदयनिष्ठयोदयग्रहणं बन्धसत्तोपलक्षणं, ततो बन्धोदयसत्ताक्षयेणेत्यर्थः, तेन जनितमुत्पादितं यत् "मणिट्ठं ति" मनस इष्टं, यद्वा "अणिट्ठं ति" निष्ठापर्यवसानं तद्रहितं सुखं परमपदप्राप्तिलक्षणमुपयन्ति प्राप्नुवन्ति । तथाहि—करणाष्टकादिपरिज्ञानवन्तस्तथातथापरिणामयुक्तं कर्मजालमेव दुरन्तदुःखज्वलनज्वालावलीढसंसारकारणं निश्चिन्वन्तस्तत्क्षयाय पारमेश्वरीमाज्ञामास्थाय सम्यग्यतमाना इच्छायोगशास्त्रयोगपरिपाकोपनतशुद्धात्मस्वभावलाभास्तदनन्तरप्रसृमरसामर्थ्ययोगातिशयदहनदग्धनिःशेषान्तरायाः परमधर्मसन्न्यासपवित्रा महात्मानः क्षपकश्रेणिमपि प्रारभन्ते, तत्र चायं क्रमः—

इह यः क्षपकश्रेणिप्रस्थापकः सोऽवश्यं मनुष्यो वर्षाष्टकस्योपरि वर्त्तमानः उत्तमसंहननी शुभध्यानोऽविरतसम्यग्दृष्टिदेशविरतप्रमत्ताप्रमत्तसंयतानामन्यतमः, केवलं यद्यप्रमत्तसंयतः पूर्ववित्तदा शुक्लध्यानोपगतः, शेषस्तु सर्वोऽपि धर्मध्या-

नोपगतः, तत्र क्षपकश्रेणिमारोहन् प्रथमतोऽनन्तानुबन्धिनः क्षपयति, तद्विधिश्च निःशेषः प्रागुक्त एवेति न भूय उच्यते। क्षीणसप्तकश्चाबद्धायुश्चारित्रमोहनीयक्षयाय यतमानो यथाप्रवृत्तादिकरणत्रयं करोति। तत्र यथाप्रवृत्तकरणमप्रमत्तगुणस्थाने, अपूर्वकरणमपूर्वकरणगुणस्थाने, अनिवृत्तिकरणमनिवृत्तिबादरसम्परायगुणस्थाने, तत्रापूर्वकरणे स्थितिघातादिभिर्मध्यमकषायाष्टकं तथा क्षपयति यथाऽनिवृत्तिकरणाद्धाप्रथमसमये तत्पल्योपमासङ्ख्येयभागमात्रस्थितिकं भवति, अनिवृत्तिकरणाद्धायाश्चासङ्ख्येयेषु भागेषु गतेषु सत्सु स्त्यानर्द्धित्रिकनरकद्विकतिर्यग्द्विकाद्यजातिचतुष्टयस्थावरातपोद्योतसूक्ष्मसाधारणानां षोडशप्रकृतीनामुद्वलनासंक्रमेणोद्वल्यमानानां पल्योपमासङ्ख्येयभागमात्रा स्थितिर्भवति। ततो बध्यमानासु प्रकृतिषु तानि षोडशापि कर्माणि गुणसङ्क्रमेण प्रतिसमयं प्रक्षिप्यमाणानि निःशेषतोऽपि क्षीणानि भवन्ति। इह मध्यमकषायाष्टकं प्रागेव क्षपयितुमारब्धं, परं तन्नाद्यापि क्षीणं, केवलमपान्तराल एव पूर्वोक्तं प्रकृतिषोडशकं क्षपितं, ततः पश्चात्तदपि कषायाष्टकं मुहूर्त्तमात्रेण क्षपयति, एष सूत्रादेशः। अन्ये त्वाहुः—षोडशकर्माण्येव पूर्वं क्षपयितुमारभते, केवलमपान्तराले ऽष्टौ कषायान् क्षपयति, पश्चात् षोडश कर्माणीति। ततोऽन्तर्मुहूर्त्तमात्रेण नवानां नोकषायाणां चतुर्णां च संज्वलनानामन्तरकरणं करोति। अन्तरकरणं च कृत्वा नपुंसकवेददलिकमुपरितनस्थितिगतमुद्वलनविधिना क्षपयितुमारभते, तच्चान्तर्मुहूर्त्तमात्रेण पल्योपमासङ्ख्येयभागमात्रं भवति। ततः प्रभृति बध्यमानासु प्रकृतिषु गुणसङ्क्रमेण तद्दलिकं प्रक्षिपति। तच्चैवं प्रक्षिप्यमाणं प्रक्षिप्यमाणमन्तर्मुहूर्त्तमात्रेण निःशेषं क्षीयते, अधस्तनस्थितिदलिकं च यदि नपुंसकवेदेन क्षपकश्रेणिमारूढस्ततोऽनुभवतः क्षपयति, अन्यथा त्वावलिकामात्रं तत्, तच्च वेद्यमानासु प्रकृतिषु स्तिबुक-

सङ्क्रमेण संक्रमयति । तदेवं क्षपितो नपुंसकवेदः । ततोऽन्तर्मुहूर्त्तेन कालेन स्त्रीवेदोऽप्यनेनैव क्रमेण क्षप्यते, ततः षड् नोकषायान् युगपत्क्षपयितुमारभते । ततः प्रभृति तेषामुपरितनस्थितिगतं दलिकं पुंवेदे न संक्रमयति, अपि तु संज्वलनक्रोधे । एवं चान्तर्मुहूर्त्तेन नोकषायषट्कोपरितनदलिकं निःशेषतः क्षीणं, तत्समय एव च पुंवेदस्य बन्धोदयोदीरणोच्छेदः समयोनावलिकाद्वयबद्धं मुक्त्वा शेषदलिकक्षयश्च, इदं च पुंवेदिनः प्रारंभकस्य ज्ञेयं । यदा तु नपुंसकवेदी प्रारभ्यकस्तदा प्रथमं स्त्रीवेदनपुंसकवेदौ युगपत्क्षपयति, तत्क्षयसमय एव च पुंवेदबन्धादित्रयव्यवच्छेदः । ततः पुंवेदहास्यषट्के युगपत्क्षपयति । यदा तु स्त्रीवेदी क्षपकश्रेणिप्रारभ्यकस्तदा प्रथमं नपुंसकवेदं ततः स्त्रीवेदं क्षपयति, तत्क्षयसमकालमेव च पुंवेदबन्धव्युच्छेदः । ततः पुंवेदहास्यषट्कयोर्युगपत्क्षयः । अथ पुंवेदिनः प्रस्तुतमभिधीयते—क्रोधं वेदयमानस्य पुंवेदिनः क्रोधाद्धाया त्रागत्रयं भवेत्—अश्वकर्णकरणाद्धा किट्टिकरणाद्धा किट्टिवेदनाद्धा च । तत्राश्वकर्णकरणाद्धायां वर्त्तमानः प्रतिसमयमनन्तान्यपूर्वस्पर्धकानि संज्वलनचतुष्कस्याप्यन्तरकरणेनोपरितनस्थितौ करोति । अस्यां चाद्धायां वर्त्तमानः पुंवेदमपि समयोनद्व्यावलिकारूपेण कालेन क्रोधे गुणसङ्क्रमेण संक्रमयन् चरमसमये सर्वसङ्क्रमेण संक्रमयति । एवं क्षीणपुरुषवेदः अश्वकर्णकरणाद्धासमाप्त्यनन्तरं किट्टिकरणाद्धायां प्रविष्टः सन् संज्वलनचतुष्कस्योपरितनस्थितिगतदलिकस्य किट्टीः करोति, ताश्च परमार्थतोऽनन्ता अपि स्थूरजातिभेदापेक्षया द्वादश कल्प्यन्ते, एकैकस्य कषायस्य तिस्रस्तिस्रः प्रथमा द्वितीया तृतीया चेति । इदं च क्रोधेन क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यं । मानेन तु तां प्रतिपद्यमानस्य प्रागुक्तोद्वलनविधिना क्रोधे क्षपिते सति शेषत्रयस्य प्राग्वत् नव किट्टीः करोति । मायया तु प्रतिपन्नस्य पूर्वं क्रोधमानयोरुद्वलनवि-

धिना द्वयं कृत्वा शेषद्विकस्य प्राग्वत् षट् किट्टीः करोति । लोभेन तु प्रतिपन्नस्योपशमनविधिना क्रोधादित्रिकद्वयं कृत्वा लोभस्य किट्टित्रिकं करोति । एष किट्टीकरणविधिः । किट्टिकरणाद्धायां निष्ठितायां क्रोधेन प्रतिपन्नः क्रोधस्य प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः । ततोऽनन्तरसमये द्वितीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः । ततोऽनन्तरसमये तृतीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः । तिसृष्वपि चामूषु किट्टिवेदनाद्धासूपरितनस्थितिगतं दलिकं गुणसङ्क्रमेणापि प्रतिसमयमसङ्ख्येयगुणवृद्धिलक्षणेन संज्वलनमाने प्रक्षिपति । तृतीयकिट्टिवेदनाद्धायाश्चरमसमये संज्वलनक्रोधस्य बन्धोदयोदीरणानां युगपच्छ्यवच्छेदः, सत्कर्मापि च तस्य समयोनावलिकाद्विकबद्धं मुक्त्वाऽन्यन्नास्ति, सर्वस्य माने प्रक्षिप्तत्वात् । ततोऽनन्तरसमये मानस्य प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावदन्तर्मुहूर्त्तं, क्रोधस्यापि च बन्धादौ व्यवच्छिन्ने सति तस्य सम्बन्धि दलिकं समयोनावलिकाद्विकमात्रेण कालेन गुणसङ्क्रमेण सङ्क्रमयन् चरमसमये सर्वं सङ्क्रमयति । मानस्यापि च प्रथमकिट्टिदलिकं प्रथमस्थितीकृतं वेद्यमानं समयाधिकावलिकाशेषं जातं । ततोऽनन्तरसमये मानस्य द्वितीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः । ततोऽनन्तरसमये तृतीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः । तस्मिन्नेव च समये मानस्य बन्धोदयोदीरणानां युगपच्छ्यवच्छेदः, सत्कर्मापि

च तस्य समयोनावलिकाद्विकबद्धमेव, शेषस्य मायायां प्रक्षिप्तत्वात् । ततो मायायाः प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावदन्तर्मुहूर्त्तमात्रं । संज्वलनमानस्य च बन्धादौ व्यवच्छिन्ने तस्य सम्बन्धि दलिकं समयोनावलिकाद्विकमात्रेण कालेन गुणसङ्क्रमेण मायायां सर्वं प्रक्षिपति । मायाया अपि च प्रथमकिट्टिदलिकं द्वितीयस्थितिगतं प्रथमस्थितीकृतं वेद्यमानं समयाधिकावलिकाशेषं जातं । ततोऽनन्तरसमये मायाया द्वितीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः । ततोऽनन्तरसमये तृतीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावत्समयाधिकावलिकामात्रं शेषः । तस्मिन्नेव च समये मायाया बन्धोदयोदीरणानां युगपद्व्यवच्छेदः, सत्कर्मापि च तस्याः समयोनावलिकाद्विकबद्धमात्रमेव, शेषस्य गुणसङ्क्रमेण लोभे प्रक्षिप्तत्वात् । ततोऽनन्तरसमये लोभस्य प्रथमकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च तावद्यावदन्तर्मुहूर्त्तं । संज्वलनमायायाश्च बन्धादौ व्यवच्छिन्ने तत्सम्बन्धि दलिकं समयोनावलिकाद्विकमात्रेण कालेन गुणसङ्क्रमेण सर्वं लोभे संक्रमयति । संज्वलनलोभस्य च प्रथमकिट्टिदलिकं प्रथमस्थितीकृतं वेद्यमानं समयाधिकावलिकामात्रशेषं जातं । ततोऽनन्तरसमये लोभस्य द्वितीयकिट्टिदलिकं द्वितीयस्थितिगतमाकृष्य प्रथमस्थितीं करोति वेदयते च, तां च वेदयमानस्तृतीयकिट्टिदलिकं गृहीत्वा सूक्ष्मकिट्टीः करोति तावद्यावत् द्वितीयकिट्टिदलिकस्य प्रथमस्थितीकृत्य वेद्यमानस्य समयाधिकावलिकामात्रं शेषः । तस्मिन्नेव च समये संज्वलनलोभस्य बन्धबादरकषायोदयोदीरणा नवमगुणस्थानकालानां युगपद्व्यवच्छेदो जायते । ततोऽनन्तरसमये सूक्ष्मकिट्टिदलिकं द्वितीयस्थि-

तिगतमाकृष्य प्रथमस्थितिं करोति वेदयते च, तदानीमसौ सूक्ष्मसम्पराय उच्यते, प्रागुक्ताश्चावलिकास्तृतीयकिट्टिगताः शेषीभूताः सर्वा अपि वेद्यमानासु परप्रकृतिषु स्तिबुकसङ्क्रमेण सङ्क्रमयति, प्रथमद्वितीयकिट्टिगताश्च यथास्वं द्वितीयतृतीयकिट्टयन्तर्गता वेद्यन्ते, सूक्ष्मसम्परायश्च लोभस्य सूक्ष्मकिट्टीर्वेदयमानः सूक्ष्मकिट्टिदलिकं समयोनावलिकाद्विकबद्धं च प्रतिसमयं स्थितिघातादिभिस्तावत् क्षपयति यावत्सूक्ष्मसम्परायाद्धायाः सङ्ख्येया भागा गता भवन्ति, एकोऽवशिष्यते, ततस्तस्मिन् सङ्ख्येयभागे संज्वलनलोभं सर्वापवर्त्तनयाऽपवर्त्य सूक्ष्मसम्परायाद्धासमं करोति, सा चाद्याप्यन्तर्मुहूर्त्तमाना, ततः प्रभृति च मोहस्य स्थितिघातादयो निवृत्ताः, शेषकर्मणां तु प्रवर्त्तन्त एव, तां च लोभस्यापवर्त्तितां स्थितिमुदयोदीरणाभ्यां वेदयमानस्तावद्गतो यावत्समयाधिकावलिकामात्रं शेषः । ततोऽनन्तरसमये उदीरणा स्थिता । तत उदयेनैव केवलेन तां वेदयते यावच्चरमसमयः । तस्मिँश्च चरमसमये ज्ञानावरणपञ्चकदर्शनावरणचतुष्कयशःकीर्त्युच्चैर्गोत्रान्तरायपञ्चकरूपाणां षोडशकर्मणां बन्धव्यवच्छेदो मोहनीयस्योदयसत्ताव्यवच्छेदश्च भवति । ततोऽसावनन्तरसमये क्षीणकषायो जायते । तस्य च शेषकर्मणां स्थितिघातादयः प्राग्वत् प्रवर्त्तन्ते यावत् क्षीणकषायाद्धायाः सङ्ख्येया भागा गता भवन्ति, एकः सङ्ख्येयो भागोऽवतिष्ठते । तस्मिँश्च ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्कनिद्राद्विकरूपाणां षोडशकर्मणां स्थितिसत्कर्म सर्वापवर्त्तनयाऽपवर्त्य क्षीणकषायाद्धासमं करोति, केवलं निद्राद्विकस्य स्वरूपापेक्षया समयन्यूनं सामान्यतः कर्मरूपतया तु तुल्यं । ततो द्विचरमसमये निद्राद्विकस्य स्वरूपसत्तापेक्षया क्षयश्चतुर्दशानां प्रकृतीनां चरमसमये क्षयः । ततोऽनन्तरसमये केवली जायते, स च भगवान् जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतश्च देशोनपूर्वकोटिं यावद्विहृत्य सर्वोऽपि समुद्घातादर्वा-

गायोजिकाकरणमारभते । तत्करणानन्तरं च कश्चित् कर्मणां समीकरणार्थं समुद्घातं गच्छति, यस्य वेदनीयादि कर्म आयुषः सकाशादधिकतरं भवति, अन्यस्तु न करोत्येव । अथ कुतोऽयं नियमो यद्वेदनीयाद्येवायुषः सकाशादधिकस्थितिकं भवति, न तु कदाचिदपि वेदनीयादेरायुरिति ? उच्यते—तथारूपजीवपरिणामस्वाभाव्यात् । इत्थंभूत एव ह्यात्मनः परिणामो येनास्यायुर्वेदनीयादेः समं भवति न्यूनं वा, न तु कदाचनाप्यधिकं । यथा तस्यैवायुषोऽध्रुवबन्धस्वभावः, शेषकर्माणि हि सर्वदैव बध्यते, आयुस्तु प्रतिनियत एव काले स्वभवत्रिभागादिरूपे, न चेदृग्बन्धवैचित्र्ये स्वभावादृतेऽपरः कश्चिदस्ति हेतुः । एवमायुषो वेदनीयादेराधिक्याभावेऽपि स्वभावविशेष एव नियामको द्रष्टव्यः ।

अथ समुद्घात इति कः शब्दार्थः ? उच्यते—सम्यक् अपुनर्भावेन उत्प्राबल्येन घातो वेदनीयादिकर्मणां विनाशो यस्मिन् क्रियाविशेषे स समुद्घातः, तं च कुर्वन् केवली प्रथमसमये बाहल्यतः स्वशरीरप्रमाणमूर्ध्वमधश्च लोकान्तपर्यन्तमात्मप्रदेशानां दण्डमारचयति । द्वितीये समये पूर्वापरं दक्षिणोत्तरं वा कपाटं, तृतीये मन्थानं, चतुर्थेऽवकाशान्तरपूरणं, पञ्चमेऽवकाशान्तराणां संहारं, षष्ठे मथः, सप्तमे कपाटस्य, अष्टमे स्वशरीरस्थो भवति । तत्र दण्डसमयात्प्राग् या पल्योपमासङ्ख्येयभागमात्रा वेदनीयनामगोत्राणां स्थितिरासीत्तस्या बुद्ध्याऽसङ्ख्येया भागाः क्रियन्ते । ततो दण्डसमये दण्डं कुर्वन्नसङ्ख्येयान् भागान् हन्ति, एकोऽसङ्ख्येयो भागोऽवतिष्ठते । यश्च प्राक् कर्मत्रयस्यापि रस आसीत्तस्याप्यनन्ता भागाः क्रियन्ते, ततस्तस्मिन् दण्डसमयेऽसातवेदनीयाद्यवर्जसंस्थानपञ्चकाद्यवर्जसंहननपञ्चकाप्रशस्तवर्णादिचतुष्कोपघाताप्रशस्तविहायोगत्यपर्याप्तकास्थिराशुभदुर्भगदुःस्वरानादेययशःकीर्तिनीचैर्गोत्ररूपाणां पञ्चविंशतिप्रकृतीनामनन्तान् भागान्

हन्ति, एकोऽनन्तभागोऽवशिष्यते । तस्मिन्नेव च समये सातवेदनीयदेवद्विकमनुजद्विकपञ्चेन्द्रियजातिशरीरपञ्चकाङ्गोपाङ्गत्रयप्रथमसंस्थानप्रथमसंहननप्रशस्तवर्णादिचतुष्टयागुरुलघुपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकातपोद्योतस्थिरशुभसुभगसुस्वरादेययशःकीर्तिनिर्माणतीर्थकरोच्चैर्गोत्ररूपाणामेकोनचत्वारिंशतः प्रकृतीनामनुभागोऽप्रशस्तप्रकृत्यनुभागमध्ये प्रवेशनेनोपहन्यते । समुद्घातमाहात्म्यमेतत् । तस्य चोर्ध्वरितस्य स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्ततमभागस्य पुनर्बुद्ध्या यथाक्रममसङ्ख्येया अनन्ताश्च भागाः क्रियन्ते । ततो द्वितीये कपाटसमये स्थितेरसङ्ख्येयान् भागान् हन्ति, एकोऽवशिष्यते, अनुभागस्य चानन्तान् भागान् हन्ति, एकं मुञ्चति । अत्राप्यप्रशस्तप्रकृत्यनुभागमध्यप्रवेशनेन प्रशस्तप्रकृत्यनुभागघातो द्रष्टव्यः । पुनरप्येतस्मिन् समयेऽवशिष्टस्य स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्ततमभागस्य बुद्ध्या यथाक्रममसङ्ख्येया अनन्ताश्च भागाः क्रियन्ते । ततस्तृतीये समये स्थितेरसङ्ख्येयान् भागान् हन्ति, एकं मुञ्चति, अनुभागस्य चानन्तान् भागान् हन्ति, एकमनन्ततमभागं मुञ्चति । अत्रापि प्रशस्तप्रकृत्यनुभागघातोऽप्रशस्तप्रकृत्यनुभागमध्यप्रवेशनेनावसेयः । ततः पुनरपि तृतीयसमयावशिष्टस्य स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्ततमभागस्य बुद्ध्या यथाक्रममसङ्ख्येया अनन्ताश्च भागाः क्रियन्ते । ततश्चतुर्थसमये स्थितेरसङ्ख्येयान् भागान् हन्ति, एकस्तिष्ठति, अनुभागस्याप्यनन्तान् भागान् हन्ति, एकोऽवशिष्यते । प्रशस्तप्रकृत्यनुभागघातश्च पूर्ववदवसेयः । एवं स्थितिघातादि कुर्वतश्चतुर्थसमये स्वप्रदेशापूरितसमस्तलोकस्य भगवतो वेदनीयादिकर्मत्रयस्थितिरायुषः सङ्ख्येयगुणा जाता, अनुभागस्त्वद्याप्य-

१ यद्यपि आतपोद्योतौ नवमगुणस्थाने क्षपितौ तथापि त्रयोः पुनरत्राभिधानं तद्बहुश्रुतगम्यम् ॥

नन्तगुणः । चतुर्थसमयावशिष्टस्य च स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्ततमभागस्य भूयोऽपि बुद्ध्या यथाक्रमं सङ्ख्येया अनन्ताश्च भागाः क्रियन्ते । ततोऽवकाशान्तरसंहारसमये स्थितेः सङ्ख्येयान् भागान् हन्ति, एकं सङ्ख्येयभागं शेषीकरोति, अनुभागस्य चानन्तान् भागान् हन्ति, एकं मुञ्चति । एवमेतेषु पञ्चसु दण्डादिसमयेषु प्रत्येकं सामयिकं कण्डकमुत्कीर्ण, समये समये स्थितिकण्डकानुभागकण्डकघातात् (घातनात्)। अतः परं षष्ठसमयादारभ्य स्थितिकण्डकमनुभागकण्डकं चान्तर्मुहूर्त्तेन कालेन विनाशयति। षष्ठादिषु च समयेषु कण्डकस्यैकैकं शकलं तावदुत्किरति यावदन्तर्मुहूर्त्तचरमसमये सकलमपि तत्कण्डकमुत्कीर्णं भवति । एवमान्तर्मौहूर्तिकानि स्थितिकण्डकान्यनुभागकण्डकानि च तावद्घातयति यावत्सयोग्यवस्थाचरमसमयः । सर्वाण्यपि चामूनि स्थित्यनुभागकण्डकान्यसङ्ख्येयान्यवगन्तव्यानि । अयं च समुद्घातविधिरावश्यकचूर्ण्यनुसारेणाभिहितः । यस्य तु केवलिनो वेदनीयादिकर्मत्रयमायुषा सह समस्थितिकं स समुद्घातं न गच्छति । गत्वाऽगत्वा वा समुद्घातं लेश्यानिरोधार्थं योगनिमित्तबन्धनिरोधार्थं च योगनिरोधमवश्यं कुरुते । उक्तं च—"स ततो योगनिरोधं करोति लेश्यानिरोधमभिकाङ्क्षन् । समयस्थितिं च बन्धं योगनिमित्तं विनिरुरुत्सन् ॥ १ ॥ समये समये कर्मादाने सति संततेर्न मोक्षः स्यात् । यद्यपि हि विमुच्यन्ते स्थितिक्षयात् पूर्वकर्माणि ॥ २ ॥ नोकर्मणा हि वीर्य योगाख्येण भवति जीवस्य । तस्यावस्थानेन तु सिद्धः समयस्थितिर्बन्धः ॥ ३ ॥" अत्र बन्धस्य समयमात्रस्थितिकता बन्धसमयबहिर्भावेन द्रष्टव्या । योगनिरोधं कुर्वन् प्रथमतो बादरकाययोगबलादन्तर्मुहूर्त्तमात्रेण वाग्योगं निरुणद्धि । तन्निरोधानन्तरं चान्तर्मुहूर्त्तं स्थित्वा बादरकाययोगोपष्टम्भादेव बादरमनोयोगमन्तर्मुहूर्त्तमात्रेण निरुणद्धि । उक्तं च—"बाद-

रतन्वा पूर्वं वाङ्मनसे बादरे स निरुणद्धि । आलम्बनाय करणं तदिष्यते तत्र वीर्यवतः ॥ १ ॥" बादरमनोयोगनिरोधानन्तरं च पुनरप्यन्तर्मुहूर्त्तं स्थित्वोच्छ्वासनिश्वासावन्तर्मुहूर्त्तमात्रेण निरुणद्धि । ततः पुनरप्यन्तर्मुहूर्त्तं स्थित्वा सूक्ष्मकाययोगबलाद्बादरकाययोगं निरुणद्धि, सति बादरयोगे सूक्ष्मयोगस्य निरोद्धुमशक्यत्वात् । आह च—"बादरतनुमपि निरुणद्धि ततः सूक्ष्मेण काययोगेन । न निरुध्यते हि सूक्ष्मो योगः सति बादरे योगे ॥ १ ॥" केचिदाहुः—"बादरकाययोगबलाद्बादरकाययोगं निरुणद्धि, यथा कारपत्रिकः स्तम्भे स्थितस्तमेव स्तम्भं छिनत्ति" । तदत्र तत्त्वमतिशयिनो विदन्ति । बादरं च काययोगं निरुन्धानः पूर्वस्पर्धकानामधस्तादपूर्वस्पर्धकानि करोति । तत्र यानि तस्मिन् भवे पर्याप्तिपर्यायपरिणतेन सता जीवेन पूर्वं कायादिव्यापारनिष्पादनार्थं कृतानि तानि पूर्वस्पर्धकान्यभिधीयन्ते । तानि च स्थूलानि । यानि पुनरधुना कर्तुमारभ्यते तानि सूक्ष्माणि । न चैवंभूतान्यनादौ संसारे कृतानि, ततोऽपूर्वाणीत्युच्यन्ते । तत्र पूर्वस्पर्धकानामधस्तन्यो याः प्रथमादिवर्गणाः सन्ति तासां ये वीर्याविभागपरि (छि) च्छेदास्तेषामसङ्ख्येयान् भागानाकर्षति, एकमसङ्ख्येयं भागं मुञ्चति । जीवप्रदेशानामपि चैकमसङ्ख्येयं भागमाकर्षति, शेषं सर्वं स्थापयति । एष बादरकाययोगनिरोधप्रथमसमयव्यापारः । तथा च कर्मप्रकृतिप्राभृतं—"पढमसमए अपुव्वफड्डगाणि करेइ पुव्वफड्डगाणं हेट्ठा आइवग्गणाए अविभागपरिच्छेयाणमसंखेज्जे भागे उक्कड्डइ जीवपएसाणं च असंखेज्जइमं भागमोकड्डइ त्ति" । ततो द्वितीयसमये प्रथमसमयाकृष्टजीवप्रदेशासङ्ख्येयभागादसङ्ख्येयगुणं भागं जीवप्रदेशानामाकर्षति तावतोऽसङ्ख्येयान् भागानाकर्षतीत्यर्थः । वीर्याविभागपरिच्छेदानामपि प्रथमसमयाकृष्टाद्भागात्सङ्ख्येयगुणहीनं भागमाकर्षति । एवं प्रतिसमयं समाकृष्य

समाकृष्य तावदपूर्वस्पर्धकानि करोति यावदन्तर्मुहूर्त्तचरमसमयः। कियन्ति पुनः स्पर्धकानि करोतीति चेदुच्यते—श्रेणिवर्गमूलस्यासङ्ख्येयभागमात्राणि अपूर्वस्पर्धककरणान्तर्मुहूर्त्तानन्तरसमय एव च किट्टीः कर्तुमारभते। ताश्चान्तर्मुहूर्त्तं यावत्करोति। उक्तं च—"नाशयति काययोगं स्थूलं सोऽपूर्वफड्डुकीकृत्य। शेषस्य काययोगस्य तथा किट्टीश्च स करोति ॥ १ ॥" अथ किट्टिरिति कः पदार्थः? उच्यते—एकोत्तरवृद्धिं च्यावयित्वाऽनन्तगुणहीनैकैकवर्गणास्थापनेन योगस्याल्पीकरणं। तत्र पूर्वस्पर्धकानामपूर्वस्पर्धकानां च याः प्रथमादिवर्गणास्तासां येऽविभागपरिच्छेदास्तेषामयमसङ्ख्येयान् भागानाकर्षति एकमसङ्ख्येयभागं स्थापयति। जीवप्रदेशानामपि चैकमसङ्ख्येयभागमाकर्षति, शेषं सर्वं स्थापयति। एष किट्टीकरणप्रथमसमयव्यापारः। ततो द्वितीयसमये प्रथमसमयाकृष्टवीर्याविभागपरिच्छेदभागादसङ्ख्येयगुणहीनं वीर्याविभागपरिच्छेदानां भागमाकर्षति। जीवप्रदेशानां तु प्रथमसमयाकृष्टजीवप्रदेशासङ्ख्येयभागादसङ्ख्येयगुणभागं तावतोऽसङ्ख्येयान् भागानाकर्षतीत्यर्थः। एवं तावत् किट्टीः करोति यावदन्तर्मुहूर्त्तचरमसमयः। तत्र प्रथमसमयकृताभ्यः किट्टिभ्यो द्वितीयसमयकृताः किट्टयोऽसङ्ख्येयगुणहीनाः। गुणकारश्च पल्योपमासङ्ख्येयभागः। एवं शेषेष्वपि समयेषु भावनीयं। तथा चोक्तं कर्मप्रकृतिप्राभृते—"इत्थं अंतोमुहुत्तं किट्टीओ करेइ असंखेज्जगुणहीणाए सेढीए जीवपएसे य असंखेज्जगुणाए सेढीए उक्कड्डइ, किट्टीगुणकारो पलिओवमस्स असंखेज्जइभागो त्ति"। प्रथमसमयकृताश्च किट्टयः श्रेण्यसङ्ख्येयभागप्रमाणाः। एवं द्वितीयादिसमयेष्वपि प्रत्येकमवगन्तव्याः। सर्वा अपि च किट्टयः श्रेण्यसङ्ख्येयभागप्रमाणाः पूर्वस्पर्धकानामपूर्वस्पर्धकानां चासङ्ख्येयभागमात्राः। किट्टिकरणावसानानन्तरं च पूर्वस्पर्धकान्यपूर्वस्पर्धकानि च नाशयति। तत्समयादारभ्य चान्तर्मुहूर्त्तं

यावत् किट्टिगतयोगो भवति। तथा चोक्तं—"किट्टिकरणेणिट्ठिए तओ से काले पुव्वफड्डगाणि अपुव्वफड्डगाणि च णासेइ अंतोमुहुत्तं किट्टिगयजोगो भवइ त्ति"। न चात्र किञ्चिदपि करोति। ततोऽनन्तरसमये सूक्ष्मकाययोगोपष्टम्भादन्तर्मुहूर्त्तमात्रेण सूक्ष्मवाग्योगं निरुणद्धि। ततो निरुद्धसूक्ष्मवाग्योगोऽन्तर्मुहूर्त्तमात्रं नान्यसूक्ष्मयोगनिरोधं प्रति प्रयत्नवान् भवति। ततोऽनन्तरसमये सूक्ष्मकाययोगोपष्टम्भात् सूक्ष्ममनोयोगमन्तर्मुहूर्त्तमात्रेण निरुणद्धि। ततः पुनरप्यन्तर्मुहूर्त्तमात्रमास्ते। ततः सूक्ष्मकाययोगबलात्सूक्ष्मकाययोगमन्तर्मुहूर्त्तेन निरुणद्धि। तं च निरुन्धानः सूक्ष्मक्रियाप्रतिपातिध्यानमारोहति, तत्सामर्थ्याच्च वदनोदरादिविवरपूरणेन संकुचितदेहत्रिभागवर्तिप्रदेशो भवति। आह च—"सूक्ष्मेण काययोगेन ततो निरुणद्धि सूक्ष्मवाङ्मनसे। भवति ततोऽसौ सूक्ष्मक्रियस्तदा किट्टिगतयोगः ॥१॥ तमपि स योगं सूक्ष्मं निरुरुत्सन् सर्वपर्ययानुगतम्। सूक्ष्मक्रियमप्रतिपात्युपयाति ध्यानममनस्कम् ॥ २ ॥" इत्यादि। सूक्ष्मकाययोगं च निरुन्धानः प्रथमसमये किट्टीनामसङ्ख्येयान् भागान्नाशयति, एकस्तिष्ठति। द्वितीयसमये तस्यैवैकस्य भागस्योपरितस्य सम्बन्धिनोऽसङ्ख्येयान् भागान्नाशयति एक उपरति एवं समये समये किट्टीस्तावन्नाशयति यावत्सयोग्यवस्थाचरमसमयः। तस्मिँश्च चरमसमये सर्वाण्यपि कर्माण्ययोग्यवस्थासमस्थितिकानि जातानि। येषां च कर्मणामयोग्यवस्थायामुदयाद्भावस्तेषां स्थितिं स्वरूपं प्रतीत्य समयोनां विधत्ते सामान्यतः सत्ताकालं प्रतीत्यायोग्यवस्थासमानामिति। तस्मिँश्च सयोग्यवस्थाचरमसमये सूक्ष्मक्रियाप्रतिपातिध्यानं सर्वाः किट्टयः सवेद्यबन्धो नामगोत्रयोरुदीरणा योगः शुक्ललेश्यास्थित्यनुभागघातश्चेति सप्त पदार्था युगपद्व्यवच्छिद्यन्ते। ततोऽनन्तरसमयेऽयोगिकेवली भवति। स च कर्मक्षपणाय व्युपरतक्रियमनिवृत्तिध्यानमारोहति। असावयोगिकेवली

स्थितिघातादिरहितो यान्युदयवर्त्तीनि कर्माणि तानि स्थितिक्षयेणानुभवन् क्षपयति । यानि तु तदानीमनुदयवन्ति तानि वेद्यमानासु प्रकृतिषु स्तिबुकसङ्क्रमेण संक्रमयन् वेद्यमानप्रकृतिरूपतया च वेदयमानस्तावद्याति यावदयोग्यवस्थाद्विचरमसमयः । तस्मिंश्च द्विचरमसमये देवद्विकशरीरपञ्चकबन्धनपञ्चकसङ्घातपञ्चकसंस्थानषट्काङ्गोपाङ्गत्रयसंहननषट्कवर्णादिविंशतिपराघातोपघातागुरुलघूच्छ्वासविहायोगतिद्विकस्थिरास्थिरशुभाशुभसुस्वरदुःस्वरदुर्भगप्रत्येकानादेययशःकीर्त्तिनिर्माणपर्याप्तकनीचैर्गोत्रसातासातान्यतरानुदितवेदनीयरूपाणि द्विसप्ततिः कर्माणि स्वरूपसत्तामधिकृत्य क्षयमुपगच्छन्ति, चरमसमये स्तिबुकसङ्क्रमेणोदयवतीषु मध्ये सङ्क्रम्यमाणत्वात् । चरमसमये चान्यतरवेदनीयमनुष्यत्रिकपञ्चेन्द्रियजातित्रससुभगादेययशःकीर्त्तिपर्याप्तबादरतीर्थकरोच्चैर्गोत्ररूपाणां त्रयोदशप्रकृतीनां सत्ताव्यवच्छेदः । अन्ये त्वाहुः—मनुष्यानुपूर्व्या द्विचरमसमये व्यवच्छेद उदयाभावात्, उदयवतीनां हि स्तिबुकसङ्क्रमाभावात् स्वरूपेण चरमसमये दलिकं दृश्यत एवेति युक्तस्तासां चरमसमये सत्ताव्यवच्छेदः । आनुपूर्वीणां च चतसृणामपि क्षेत्रविपाकतयाऽपान्तरालगतावेवोदय इति नाभवस्थस्य तदुदयसंभव इत्ययोग्यवस्थाद्विचरमसमय एव मनुष्यानुपूर्व्याः सत्ताव्यवच्छेदः । तन्मते द्विचरमसमये त्रिसप्ततेः, चरमसमये च द्वादशानां सत्ताव्यवच्छेदः, ततोऽनन्तरसमये कर्मबन्धविमोक्षलक्षणसहकारिसमुत्थस्वभावविशेषादस्पृशद्गत्योर्ध्वलोकान्तं गच्छति । तत्र च गतः सन् भगवान् परमानन्दमयः शाश्वतं कालमवतिष्ठते । तदेवमनया प्रणाल्याऽस्य शास्त्रस्य मोक्षजनकत्वादस्मिन् शास्त्रे निरन्तरमभ्यासः कार्यः, कृत्वा च यथाशक्ति संयममार्गे यतितव्यं, तत्र यतमानेन च यथोपायं संक्लिष्टाध्यवसायपरिहारः कार्य इति तात्पर्यम् ॥ ५५ ॥

अथाचार्य औद्धत्यं परिहरन् बहुश्रुतानां प्रकरणार्थपरिज्ञावने प्रार्थनां च कुर्वन्नत्र प्रकरणे उपादेयताबुद्धिमाधातुं परंपरया सर्वविन्मूलकतामाह—

इय कम्मप्पगडीउं जहासुयं णीयमप्पमइणा वि । सोहिय णाभोगकयं कहंतु वरदिट्ठिवायन्नू ॥५६॥

व्याख्या—अल्पमतिनाऽपि सतैवमुक्तप्रकारेण गुरुचरणकमलपर्युपासमानेन मया यथा श्रुतं तथा कर्मप्रकृतेर्दृष्टिवादैकदेशचतुर्दशपूर्वस्थानेकवस्तुसमन्विताग्रायणीयान्निधद्वितीयपूर्वस्थविंशतिप्राभृतपरिमाणपञ्चमवस्त्वेकदेशं चतुर्विंशत्यनुयोगद्वारमयकर्मप्रकृत्याख्यचतुर्थप्राभृतादिदं प्रकरणं नीतमाकृष्टं, तदत्र यत्किमपि स्खलितमनाभोगकृतं भवेत् कृतप्रयत्नस्यापि छद्मस्थस्यावरणसामर्थ्यादनाभोगसंभवात्, तच्छोधयित्वाऽपनीय ये वरा उत्कलितबुद्ध्यतिशया दृष्टिवादज्ञास्ते प्रसादमास्थाय श्रुतानुसारि पदान्तरं प्रक्षिप्य कथयन्तु "यथेदमत्र पदं सम्यक्, न त्विदमिति," न पुनरुपेक्षारूपोऽप्रसादस्तैः कर्त्तव्य इति प्रार्थना ॥ ५६ ॥

इह शास्त्रस्यादावविघ्नपरिसमाप्तये, मध्ये शिष्यप्रशिष्यादिपरम्परागमानयनस्थैर्याय आगन्तुकविघ्नविनाशायेत्यन्ये-पर्यन्ते च प्रशिष्यादिभिरवधार्यमाणस्य शास्त्रस्य तच्चेतसि सुप्रतिष्ठितत्वभावनाया विच्छेदायेत्यन्ये, मङ्गलमवश्यमभिधातव्यं । तत्रादिमङ्गलं "सिद्धं सिद्धत्थसुयं" इत्याद्युक्तं, मध्यमङ्गलं तु "अकरणअणुइण्णाए अणुज्जगधरे पणिवयामि" तिइ सम्प्रति पुनः पर्यवसानमङ्गलमाह—

जस्स वरसासणावयवफरिसपविकसियविमलमइकिरणा ।
विमलेंति कम्ममइले सो मे सरणं महावीरो ॥ ५७ ॥

व्याख्या—यस्य वरमनुत्तरं यच्छासनं तदवयवस्योदयगिरिशिखररूपस्य स्पर्शात् प्रकर्षेण विकसिका उद्बोधमापन्ना विमला मिथ्यात्वतमोमलरहिता मतिकिरणा ज्ञानसूर्याः कर्ममलिनान् जीवान् विमलयन्ति अविद्यारजनीविनाशनेन स्फुटप्रकाशान् कुर्वन्ति, स भगवान् महावीरो वर्धमानस्वामी स्वप्रणीतशासनावयवस्पर्शनमात्रेण लोकानामनन्तज्ञानसूर्योत्पादकत्वेनाचिन्त्यातिशयः परमब्रह्मा मे मम संसारभयभीतस्य शरणं परित्राणहेतुः ॥ ५७ ॥

॥ अथ टीकाकृत्प्रशस्तिः ॥

ज्ञात्वा कर्मप्रपञ्चं निखिलतनुभृतां दुःखसंदोहबीजं, तद्विध्वंसाय रत्नत्रयमयसमयं यो हितार्थी दिदेश ।
अन्तःसङ्क्रान्तविश्वव्यतिकरविलसत्कैवलैकात्मदर्शः, स श्रीमान् विश्वरूपः प्रतिहतकुमतः पातु वो वर्द्धमानः ॥ १ ॥
सूरिश्रीविजयादिदेवसुगुरोः पट्टाम्बराहर्मणौ, सूरिश्रीविजयादिसिंहसुगुरौ शक्रासने भेजुषि ।
सूरिश्रीविजयप्रभे श्रितवति प्राज्यं च राज्यं कृतो, ग्रन्थोऽयं वितनोतु कोविदकुले मोदं विनोदं तथा ॥ २ ॥
सूरिश्रीगुरुहीरशिष्यपरिषत्कोटीरहीरप्रभाः, कल्याणद्विजयाभिधाः समभवँस्तेजस्विनो वाचकाः ।
तेषामन्तिषदश्च लाभविजयप्राज्ञोत्तमाः शाब्दिकश्रेणिकीर्त्तितकार्तिकीविधिरुचिप्रस्पर्द्धिकीर्त्तिप्रथाः ॥ ३ ॥
तच्छिष्याः स्म भवन्ति जीतविजयाः सौभाग्यभाजो बुधा, भ्राजन्ते सनया नयादिविजयास्तेषां सतीर्थ्या बुधाः ।

तत्पादाम्बुजभृङ्गपद्मविजयप्राज्ञानुजन्मा बुध–स्तत्त्वं किञ्चिदिदं यशोविजय इत्याख्याद्भृदाख्यातवान् ॥ ४ ॥
इदं हि शास्त्रं श्रुतकेवलिस्फुटाधिगम्य पूर्वोद्धृतभावपावनम् ।
ममेह धीर्वामनयष्टिवद्ययौ तथापि शक्त्यैव विभोरियद्भुवम् ॥ ५ ॥
प्राक्तनार्थलिखनाद्वितन्वतो नेह कश्चिदधिको मम श्रमः ।
वीतरागवचनानुरागतः पुष्टमेव सुकृतं तथाप्यतः ॥ ६ ॥

॥ इति काशीविबुधविजयावाप्तन्यायविशारदपद–अपूर्वग्रन्थशतग्रथनप्रज्ञावितीर्णन्यायाचार्यपदधारक-
श्रीमद्यशोविजयवाचकपुङ्गवविरचिता कर्मप्रकृतिवृत्तिः ॥

॥ समाप्तोऽयं कर्मप्रकृतिनामा ग्रन्थः ॥

सं० १९५९ संवत्सरादद्ययावत् एतत्संसत्प्रकटितसंस्कृतप्राकृतग्रन्थानां नामसूचिः

* १-६ श्रीत्रिषष्टिशलाकापुरुषचरितं मूलं श्रीहेमचन्द्राचार्यकृतम्.

१ पर्व १-	१-०-०	४ पर्व ७	१-०-०
२ पर्व २-	०-१२-०	५ पर्व ८-९	१-८-०
३ पर्व ३-४-५-६	१-१२-०	६ पर्व १०	१-८-०

७ श्रीपरिशिष्टपर्व स्थविरावलिः	१-०-०	२१ पञ्चाशकः सटीकः	२-८-०
८-९ * श्रीकर्मग्रन्थटीका विभागः प्रथमो द्वितीयश्च	३-८-०	२२ प्रमेयरत्नकोषः मूलम्	०-४-०
१० द्वात्रिंशद्द्वात्रिंशिका सटीका	१-८-०	२३ * श्रीज्ञानसारः (अष्टकं) पन्यास श्रीगंभीरविजयगणि-	
११ प्रशमरतिः सटीका	०-१२-०	कृतटीकासहितः	०-१२-०
१२ प्रबोधचिन्तामणिर्मूलम्	०-८-०	२४ * श्रीशान्तसुधारसः ,,	०-१२-०
१३ * श्रीमद्यशोविजयकृतग्रन्थमाला (ग्रन्थदशकसङ्ग्रहः)	१-०-०	२५ * श्रीअध्यात्मसारः ,,	२-०-०
१४ * श्रीसिद्धसेनदिवाकरकृतग्रन्थमाला (ग्रन्थत्रयम्)	०-४-०	२६ * श्रीकर्मप्रकृतिः श्रीमलयगिरिकृतटीकासहिता	०-१४-०
१५ * श्रीहरिभद्रसूरिकृतग्रन्थमाला (ग्रन्थत्रिकम्)	०-४-०	२७ पउमचरियं (पद्मचरितं) प्राकृतगाथामयं-प्राचीनं	२-८-०
१६ श्रीविजयचन्द्रकेवलिचरितम् (प्राकृतपद्यमयम्)	०-८-०	२८ श्रीउपदेशप्रासादस्याद्यस्तम्भषट्कम्	१-८-०
१७ * योगबिन्दुः सटीकः	०-१२-०	२९ श्रीसूक्ष्मार्थविचारसारोद्धारः (सार्धशतकं) सटीकः	१-०-०
१८ श्रीवासुपूज्यचरितम्, श्रीवर्धमानसूरिकृतं, पद्यमयम्	२-८-०	३० श्रीउपदेशमाला मूलं योगशास्त्रं च मूलम्	०-८-०
१९ * श्रीशान्तिनाथचरितम् गद्यमयम्	१-०-०	३१ जंबूद्वीपसंग्रहणी सटीका	०-४-०
२० * श्रीपार्श्वनाथचरितम् गद्यमयम्	१-८-०	३२ * पयन्ना चउक्कं मूलम्	०-४-०

* एतच्चिह्नाङ्किता ग्रन्था निष्ठितत्वाद्दुर्लभ्याः ।